आचार्यवर्य श्रीवर्धमानसूरिविरचितः

स्वोपज्ञटीका समलङ्कृतः

धर्मरत्नकरण्डकः

संपादकः

पंन्यास मुनिचन्द्रविजयगणि

प्रकाशकः

शारदाबेन चिमनभाई एज्युकेशनल रिसर्च सेंटर

शाहीबाग, अहमदाबाद - ३८०००४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवाङ्गी वृत्तिकाराचार्य देवश्री अभयदेवसूरि पट्टालङ्कार आचार्यवर्य श्रीवर्धमानसूरिविरचितः

स्वोपज्ञटीका समलङ्कृतः

धर्मरत्नकरण्डकः

संपादकः
पंन्यास मुनिचन्द्रविजयगणि

द्रव्य सहायकः
श्री भीलडीयाजी पार्श्वनाथ तीर्थ कमेटी
भीलडीयाजी, जि. बनासकांठा

प्रकाशकः
शारदाबेन चिमनभाई एज्युकेशनल रिसर्च सेंटर
शाहीबाग, अहमदाबाद - ३८०००४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

DHARMARATNAKARANDAKA

(Dharma)

By: Acarya Vardhaman Suriji

Edited by: Pamnyas Munichandravijayagaṇi

Published by: Jitendra B. Shah, Director

Sharadaben Chimanbhai Educational Research Centre

'Darshan', Shahibag. Ahmedabad-380004.

संपादक: पंन्यास मुनिचन्द्रविजयगणि

प्रथमावृत्ति: - ५००

विक्रम संवत् २०५०

ईस्वी सन् १९९४

मूल्य: रू. २५०.००

मुद्रक :

राकेश के. देसाई

चंद्रिका प्रिन्टरी

मिरझापुर रोड

अहमदाबाद ३८० ००१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પ્રકાશકીય

આચાર્ય શ્રી વર્ધમાન સૂરિ કૃત સ્વોપજ્ઞ ટીકા યુકૃત ધર્મરત્ન કરંડક નામનો ગ્રંથ પ્રકાશિત કરતાં અમે આનંદ અનુભવીએ છીએ.

આચાર્ય વર્ધમાન સૂરિ એ સાંપ્રત ગ્રંથ વિ. સં. ૧૧૭૨ માં રચ્યો છે. આ ગ્રંથ સંસ્કૃત ભાષામાં લખાયેલ હોવા છતાં સરળ અને સુબોધ છે. ગ્રંથમાં ધર્મને લગતા જૂદાં જૂદાં ૨૦ વિષયો ઉપર વિવેચન કરવામાં આવ્યું છે. માનવ જીવન માં આવશ્યક હોય તેવા ગુણો ઉપર કથાઓ સહિત ઉપદેશ આપવામાં આવ્યો છે. આથી આ ગ્રંથમાં લગભગ ૫૦ જેટલી જૂદી જૂદી કથાઓનો તથા અનેક સુભાષિતો નો સંગ્રહ છે જેથી ગ્રંથ રોચક બન્યો છે. કથા સાહિત્ય ઉપર અભ્યાસ કરનારને આ ગ્રંથમાંથી ખૂબ સામગ્રી મળી શકશે તેવી આશા છે તથા ધાર્મિક સિદ્ધાન્તો નો અભ્યાસ કરનાર અને સંસ્કૃત ભાષાના અભ્યાસીને પણ આ ગ્રંથ ઉપયોગી થશે તેવી આશા છે.

પ્રસ્તુત ગ્રંથ ઘણાં સમય થી અનુપલબ્ધ હતો. પૂર્વે પ્રકાશિત થયેલ ધર્મરત્ન કરંડક અશુદ્ધ અને જૂની પદ્ધતી એ છપાયેલ હતો જેથી તેનું પુનઃસંપાદન આવશ્યક હતું. આ ગ્રંથના પુનઃસંપાદનનું કાર્ય પૂ. મુનિશ્રી મુનિચંદ્ર વિજયજી એ હાથ ધર્યું. તેઓશ્રીએ અનેક હસ્તપ્રતો ને આધારે મૂળગ્રંથ ને શુદ્ધ કરી, પાઠાંતર તથા પરિશિષ્ટ સહિત ગ્રંથનું સંપાદન કર્યું છે. પૂ. મુનિશ્રી સંસ્કૃત તથા પ્રાકૃત ભાષાના વિદ્વાન્ છે. તેઓ શ્રી એ ખૂબજ મહેનત પૂર્વક આ ગ્રંથનું સંપાદન કર્યું છે. તથા આ ગ્રંથના પ્રકાશનનો અવસર અમને આપ્યો છે તે બદલ અમે તેમનો ખૂબ ખૂબ આભાર માનીએ છીએ.

આ ગ્રંથ ના પ્રકાશન કરવામાં શ્રી ભીલડિયાજી જૈન તીર્થની પેઢીએ તથા પેઢીના ટ્રસ્ટીઓ એ ખૂબ જ રસ લીધો છે. તેમનો આર્થિક સહયોગ પ્રાપ્ત થયો જેથી પ્રકાશન કાર્ય સુકર બન્યું છે. આ માટે અમે તેમને આભાર માનીએ છીએ.

આ ગ્રંથના કંપોઝ તથા મુદ્રણ કાર્ય માં સહયોગ આપવા બદલ શ્રી નિમેષ શાહ તથા રાકેશ ભાઈ નો પણ આભાર માનીએ છીએ.

તા. ૮. ૪. ૯૪
અમદાવાદ

જિતેન્દ્ર બાબુલાલ શાહ
ડાયરેકટર
શારદાબેન ચીમનભાઈ એજ્યુકેશનલ રિસર્ચ સેન્ટર.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ભીલડીયાજી તીર્થ

સ્ટેશને ઊતરી યાત્રિક ધર્મશાળા તરફ ચાલવા લાગે છે, કે તરત ઊત્તુંગ શિખરોથી ઘેરાયેલ મુખ્ય શિખર તેની નજરે પડે છે. પહેલી જ નજરે બાવન જિનાલય યુકત આ ચૈત્ય તેની આંખોમાં વસી જાય છે.

ભવ્ય દ્વારમાંથી તે પ્રવેશે છે. અને સોપાન પંકિત ચઢતાં જ તોરણ દ્વારો અને નકશીકામથી ઓપતા સંગેમરમરના સ્થંભોથી શોભતો. ચોકી મંડપ આવે છે. બે બાજુ બાવન જિનાલયોની વિશાળ કોરી ડોર... વચ્ચે નૃત્ય મંડપને તે પછી વિશાળ નિજ મંડપ વિદ્યાદેવીઓના શિલ્પયુકત પ્રતિકોથી સોહતા વિશાળ ગુંબજની નીચે પથરાયેલો આ મંડપ એવો તો ભવ્ય લાગે છે ! પણ ના દર્શક આ મંડપની ભવ્યતા જોવા રોકાઈ શકે તેમ નથી, કારણકે સામે જ તીર્થાધિપતિ ભીલડીયાજી પાર્શ્વનાથ પ્રભુની ભવ્ય પ્રતિમા દેખાય છે. ભકતની આંખો પ્રભુજીને જોતાંજ ભાવ વિભોર બની જાય છે.

વચ્ચે તીર્થાધિપતિ એક બાજુના ગભારે ચિંતામણી પાર્શ્વનાથ પ્રભુજી અને બીજી બાજુના ગભારે મહાવીર પ્રભુજી બાજુની બે ભવ્ય દેરીઓ પૈકીની એક દેરીમાં આદિનાથ પ્રભુની ભવ્ય વિશાળ નયનાકર્ષક મૂર્તિ બીજી દેવ કુલિકામાં નેમિનાથ પ્રભુની શ્યામ નયનહર મૂર્તિ...

મઝાનું પરિસર

જિનાલયની સામે ભવ્ય ભોજન ગૃહ અને જમણી બાજુ ઉપાશ્રય ધર્મશાળાનું વિશાળ કેમ્પસ... ડાબી બાજુ પાર્શ્વભકિત નગરની ધર્મશાળા સંઘો વિગેરે માટે અહીં સંપૂર્ણ વ્યવસ્થા છે. પરિસર અહીંનું અતિભવ્ય છે. આજુબાજુની ગ્રામ્ય ભૂમિ પરિસરને મઝાનો સંસ્પર્શ આપે છે.

ઈતિહાસ

આ તીર્થનું પ્રાચીન નામ ભીમપલ્લી હતું. પરમાર્હત કુમાર પાળ મહારાજા [વિ.૧૧૯૯ થી ૧૨૩૦] ના સમયમાં ભીમપલ્લી માં વાઘેલા આધિપત્ય હતું તેવો ઉલ્લેખ 'સુકૃત સંકીર્તન' કાવ્યમાં મળે છે. ખોદકામ કરતાં જમીનમાંથી અત્યારે પણ દોઢ ફૂટની અને લગભગ આઠ કીલો વજનની ઈંટો મળી આવે છે. ચિંતામણી પાર્શ્વનાથ પ્રભુની ભવ્ય મૂર્તિ પણ જિનાલયની પાછળથી રોડનું કામ કાજ કરતાં મળી આવેલ...

વિ. સં ૧૨૧૮ ના ફાગણ વદિ ૧૦ ના દિવસે આ. જિનચન્દ્ર સૂરિ મહારાજે આ. જિનપતિ સૂરિને અહીં શ્રી મહાવીર પ્રાસાદમાં દીક્ષિત કરેલ તેવો ઉલ્લેખ મળે છે.

બાર અદ્ધાર વીર જિનાલયે ફાગણ વદિ દશમીએ પવરે વરીય સંજય સિરીય. ભીમપલ્લી પુરે નંદીશ્વર ઠવિય જિણચંદ સૂરે !

આ. દેવેન્દ્રસૂરિ આ. સોમપ્રભ સૂરિ ઉપાધ્યાય દેવ ભદ્રગણી અહીં યાત્રાર્થે પધાર્યા હતા. વિ. સં. ૧૩૮૩ આસપાસ. વિ. સં. ૧૨૭૩ માં આ. જગચ્ચન્દ્રસૂરિ વિગેરેએ અહીંની યાત્રા કરી હતી. મંત્રીશ્વર વસ્તુપાળે શ્રી પાર્શ્વનાથ સ્વામીના મંદિરોના જીર્ણોદ્ધાર કરી રમણીય મંદિર બંધાવ્યું હતું અને સુંદર કલામય રથ બનાવ્યો હતો. વિ. સં. ૧૨૮૭ લગભગ. વિ. સં. ૧૩૧૭ ના વૈશાખ સુદ ૧૦ના

Jain Education International For Private & Personal Use Only www.jainelibrary.org

શ્રી ભીલડીયાજી પાર્શ્વનાથ ભગવાન

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

દિવસે આ. જિનેશ્વરસૂરિજીએ શ્રી મહાવીર ભ. ના બિંબની પ્રતિષ્ઠા કરાવી હતી. પાલનપુરનાં શ્રેષ્ઠિ રુદ્રપાલના પુત્ર સમર અને પુત્રી કીલ્હુની દીક્ષા શ્રી મહાવીર ભ. ના પ્રાસાદમાં થઈ હતી. [ચૌદમો સૈકો] ઊપરોકત ઊલ્લેખો જોતાં વિક્રમનાં ૧૩ માં અને ૧૪ માં સૈકામાં આ તીર્થની જહોજલાલી ટોચે હતી. આ. સોમપ્રભ સૂરિ મ. [વિ. સં. ૧૩૩૨ થી ૧૩૭૨] ભીમપલ્લીમાં ચાતુર્માસ રહ્યા ત્યારે બે કારતક માસ હતા. શ્રુતજ્ઞાનથી નગરીનો નાશ જાણી પહેલા કારતકમાં જ ચૌમાસી પ્રતિક્રમણ કરી રાધનપુર વિહાર કરી ગયા. રાધનપુરમાં રહેતાં મસાલિયા પરીવાર ની કુળ દેવી ભીલડીયાજીમાં છે. જૈન ભોજનશાળાની પાછળના ભાગમાં નૂતન દેરીમાં કુળ દેવીની પ્રતિષ્ઠા ગયા વર્ષે જ મસાલિયા કુંટુંબો એ કરાવી છે. અગ્નિના ઊપદ્રવથી આ નગરીનો ચૌદમાં સૈકામાં ભંગ થયો ત્યાર બાદ ફરી નગર વસ્યું. વિ. સં. ૧૫૫૭ માં તપગચ્છનાં અનંતહંસ ગણિ અહીં પધાર્યા હતા. તેમના ઊપદેશથી ઓડસી પાસવીર પોરવાળે ગ્રંથ ભંડાર સ્થાપ્યો હતો. આ પછી કાળની વિષમતાના કારણે મૂલનાયક ભગવાનના બિંબને ભોંયરામાં પધારાવવામાં આવ્યું વિ. સં. ૧૯૩૬ માં પં. ઉમેદવિજયજી ની પ્રેરણાથી પોષ દસમનો મેળો ભરવાનું ડીસા સંઘે નક્કી કર્યું આ પછી ધીમે ધીમે તીર્થ માં યાત્રિકોની અવર જવર વધવા લાગી. દહેરાસર જીર્ણ અને નાનું પડતું હોવાથી જિર્ણોદ્ધારની આવશ્યકતા જણાઈ. વિ. સં. ૨૦૧૭ માં મૂળનાયક ભ. વિગેરે બિંબોને પૂ. આ. ભ. શ્રીમદ્ વિજય ભદ્રસૂરીશ્વરજી મ.સા. અને પૂ. આ.ભ. શ્રીમદ્ વિજય ઉઁકાર સૂરીશ્વરજી મ. સા. ની પ્રેરણા-માર્ગદર્શન મુજબ ઉત્થાપીને ઉપાશ્રયમાં પધરાવવામાં આવ્યા. ત્રણ શિખર અને વિશાળ રંગ મંડપ સાથે તૈયાર થયેલા ભવ્ય જિનાલયમાં વિ. સં. ૨૦૨૭ જેઠ સુદ ૧૦ ના દિવસે તીર્થોદ્ધારના પ્રેરક પૂ. આ. ભ. શ્રીમદ્ વિજય ભદ્રસૂરીશ્વરજી મહારાજ તથા તેઓ શ્રી ના પટ્ટ પ્રભાવક પૂ. આ. ભ. શ્રીમદ્ વિજય ઉઁકાર સૂરીશ્વરજી મહારાજ અને પ્રશાંત મૂર્તિ આ. ભ. કીર્તિસાગર સૂરિ. મ. સા. ના પટ્ટધર પૂ. આ. ભ. શ્રી સુબોધસાગર સૂરીશ્વરજી આદિની શુભ નિશ્રામાં મહામહોત્સવ પૂર્વક ભવ્ય પ્રતિષ્ઠા મહોત્સવ ઉજવાયો, દિવસે દિવસે તીર્થનો મહિમા વધતો રહ્યો. ધર્મશાળા પણ નવી સુવિધાપૂર્ણ બનાવવામાં આવી દેરાસરની ભવ્યતાને અનુરૂપ બાવન જિનાલયનું નિર્માણ થયું. વિ. સં ૨૦૩૭ ના વૈશાખ સુદ ૭ ના દિવસે સિદ્ધાંત મહોદધિ આ. ભ. શ્રી પ્રેમસૂરીશ્વરજી મહારાજના પટ્ટધર પૂ. આ. ભ. શ્રી રામચંદ્ર સૂરીશ્વરજી મહારાજ આદિની નિશ્રામાં બાવન જિનાલયના અંજનશલાકા પ્રતિષ્ઠા મહોત્સવ ભવ્ય રીતે ઉજવાયો. આ તીર્થની યાત્રા કરવા પધારવાનું આપ સહુને અમારૂં ભાવ ભીનું આમંત્રણ છે.

પૂ. પં. શ્રી ભદ્રંકર વિજયજી ગણિવરના પ્રશિષ્ય રત્ન પૂ.પં શ્રી વજ્રસેન વિજયજી ગણિવરની પ્રેરણાથી આ ગ્રંથના પ્રકાશનનો લાભ ટ્રસ્ટ ના જ્ઞાન દ્રવ્યની રકમમાંથી લીધો છે. અભ્યાસીઓ આનો ખૂબ ખૂબ ઊપયોગ કરે એજ અભ્યર્થના.

લી.
ટ્રસ્ટી ગણ
શ્રી ભીલડીયાજીતીર્થ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વિદ્વાન્ મુનિરાજશ્રી મુનિચન્દ્ર વિજયજી મહારાજ દ્વારા સંપાદિત-સંકલિત પુસ્તકો

ધાતુપારાયણમ્
દ્વ્યાશ્રય મહાકાવ્યમ્ ભાગ ૧-૨
હીર સૌભાગ્ય મહાકાવ્યમ્
પ્રવચન સારોદ્ધાર ભાગ ૧-૨ (પ્રતાકાર)
(આચાર્યશ્રી સિદ્ધસેન સૂરિકૃત ટીકા સાથે)
પ્રવચન સારોદ્ધાર (વિષમપદ વ્યાખ્યા સાથે)
ધર્મસંગ્રહ ભાગ ૧-૨-૩ (પ્રતાકાર)
દસ સાવગચરિયં (શ્રીશુભવર્ધન ગણિ કૃત)
ઉપદેશમાળા (હેયોપાદેયા ટીકા અને આ. વર્ધમાન સૂરિના પ્રાકૃત કથાનકો સાથે)
ધર્મરત્ન કરંડક (આ. વર્ધમાન સૂરિ કૃત સ્વોપજ્ઞ ટીકા સાથે)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री शंखेश्वर पार्श्वनाथाय नमः
श्रीमते शान्तिनाथाय नमः

श्रीभद्र-विलास-ॐकार-भद्रङ्कर-जनक-अरविन्द-यशोविजय-जिनचन्द्रविजयादिभ्यो नमः

प्रस्तावना

આચાર્યપ્રવર શ્રી વર્ધમાનસૂરિ વિરચિત ધર્મરત્નકરંડક ગ્રન્થ સ્વોપજ્ઞટીકાસાથે તાડપત્રીય આદિ વિવિધ હસ્તલિખિત પ્રતિઓના આધારે સંશોધિત કરી વિદ્વાનો સમક્ષ રજૂ કરતાં ઘણો હર્ષ થાય છે.

પ્રસ્તુત ગ્રન્થનું મુદ્રણ કરાવી વિ. સં. ૧૯૭૧માં (સને ૧૯૧૫માં) જામનગર નિવાસી પં. હીરાલાલ હંસરાજે બે ભાગમાં પ્રતાકારે પ્રકાશન કર્યું હતું.

સંપાદન-ઉપયુક્ત હસ્તપ્રતો

B વડોદરા સ્થિત શ્રી આત્માનંદ જૈન જ્ઞાનમન્દિરની આ તાડપત્રીય પ્રત છે. આ પ્રતિની ઝેરોક્ષ નકલ પૂ. પ્રવર્તક મુનિરાજશ્રી જમ્બૂવિજયજી મ. સા. ની કૃપાથી અમને મળી છે.

પત્ર ૨૫૦ લંબાઈ ૨'.૩'' x પહોળાઈ ૨'' લગભગ પત્રની દરેક બાજુ ૪ થી ૭ પંક્તિઓ. દરેક પંક્તિમાં લગભગ ૧૨૫ અક્ષરો. લેખન સંવત અનુમાનતઃ વિક્રમનો ૧૨મો સૈકો. પ્રશસ્તિ નથી.

આ પ્રત અમને જો કે પાછળથી મળી છે. પણ, પ્રાચીન અને મહત્ત્વની હોવાથી અમે એનો યથાશક્ય વધુ ઉપયોગ કર્યો છે. ધર્મરત્નકરંડકની તાડપત્ર ઉપર લખાયેલી પ્રાયઃ આ એકમાત્ર પ્રતિ છે.

J આ હસ્તલિખિત પ્રતિ સૂરત સ્થિત શ્રી જૈનાનંદ પુસ્તકાલયમાં ૮૦૩ ક્રમાંકની છે. પત્ર સંખ્યા ૨૩૫ (૬૫ ક્રમાંકનું પત્ર નથી.) પત્રની દરેક બાજુ ૧૩-૧૩ પંક્તિઓ. દરેક પંક્તિમાં ૫૬ અક્ષરો લગભગ. લંબાઈ ૨૭ સે. મી. x પહોળાઈ ૧૩ સે. મી.

પ્રશસ્તિઃ- જૈતારણ મારવાડ । ભાઇ દીપચંદ હજારીમલ્લજી મા(મહા)ત્મા જ્ઞાતી પૂજ્ય પ્રમ્મ પૂજ્યશ્રી ધર્મરત્નચિન્તામણિ જૈનાચાર્ય પણ્ડિતરાજ પુન્યાસજી મહારાજ શાહીશ્રી મુનિરાજ. શ્રી ૧૦૦૮ શ્રી શ્રી આનન્દસાગરજી મહારાજસ્યાર્થે ઇદં પુસ્તકં લિખિતં સમ્વત્ ૧૯૭૦ ના માઘમાસે શુક્લપક્ષે કમ્યાં મણ્ડલેષ્ટાં દિને સમાપ્તમગમત્।

P પાટણ સ્થિત હેમચન્દ્રાચાર્ય જ્ઞાનમન્દિરની આ પ્રતિ છે.
ડાભડા નંબર ૨૯૨,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પ્રતિ ક્રમાંક: ૧૩,૯૨૪ પત્ર સંખ્યા: ૨૧૨ લંબાઈ ૨૮ સે. મી. x પહોળાઈ ૧૨ સે. મી. પત્રની બન્ને બાજુ ૧૭-૧૭ પંક્તિઓ.

દરેક પંક્તિમાં લગભગ ૪૨ અક્ષર.

પ્રશસ્તિ:- ग्रं. १०००० संवत् १८८० वर्षे मीति आषाढ कृष्णपक्षे अष्टमीतिथौ भोमवारे श्रीमद् बृहत्खरतरगच्छे जिनभद्रसूरिशाखायां श्री १०८ श्रीक्षमाप्रमोदगणि तत्शिष्य वा. श्रीज्ञानवल्लभ गणिः तत्शिष्य पं. प्र. श्रीपुण्यकमल गणि तत्शिष्यमुख्य पं. प्र. श्रीपद्महंस गणि तत्शिष्य लिखितं पं. क्षमाविनयमुनिः श्रीमज्जेसलमेरु दुर्गे चातुर्मासस्थिता कल्याणमस्तु ॥

C અમદાવાદમાં દોશીવાડાની પોળમાં આવેલી સુબાજી રવચંદ જૈન વિદ્યાશાળામાં આવેલ હસ્તલિખિત પ્રતોના ભંડારની આ પ્રત છે. પત્ર સંખ્યા ૧૬૯.
લંબાઈ ૨૭ સેં. મી. x ૧૧ સે. મી.
પત્રની બન્ને બાજુ ૧૪-૧૪ પંક્તિઓ, દરેક પંક્તિમાં ૬૬ અક્ષરો લગભગ.

પ્રશસ્તિ:- લિ. ભાઇલાલ જમનાદાસ સંવત ૧૯૫૪ ના વર્ષે શ્રાવણ શુદિ ૨ ને દિને ગામ વસો મધ્યે લખ્યું છે। શુભં ભવતુ। કલ્યાણમસ્તુ। ગ્રંથાગ્ર ૯૩૦૦ ॥

આ પ્રતમાં સગરચક્રીની કથા પ્રસિદ્ધ છે એમ જણાવી લખી નથી.

V આ પ્રત પણ ઉપર્યુકત સુબાજી રવચંદ જૈન વિદ્યાશાળા (દોશીવાડાની પોળ, અમદાવાદ)ના હસ્તલિખિત ભંડારની છે.

પત્ર સંખ્યા ૩૪૬, લંબાઈ ૨૫ સે. મી. X પહોળાઈ ૫૫ સે. મી., પત્રની બન્ને બાજુમાં ૧૩-૧૩ પંક્તિઓ. દરેક પંક્તિમાં ૩૫ અક્ષરો.

પ્રશસ્તિ:- संवत् नेत्र-वेद-निधि-चन्द्र संवत् १९४२ प्रथम ज्येष्ठ सूदि ८ गुरुवासरे। ग्रन्थमानं १०,०००। लिषतां। कू ॥२॥ लिषतां ऋषि रत्नचन्द्र नागोरी लुंका गच्छे श्री जेसलमेरमध्ये। रहेवासी फलोधिमध्ये। श्रीचिंतामणीनाथजीप्रसादात् दृष्टभैरवप्रसादात् दिन पचीसमां लिख्यो छे।

D ખેતરવસીપાડો પાટણથી અમદાવાદ દોશીવાડાની પોળમાં લાવવામાં આવેલ પં. ધર્મવિજય ચિત્કોષની આ હસ્તપ્રત પૂ. આ. ભ. રામસૂરિ મ. સા. (ડેલાવાળા)ના સૌજન્યથી અમને મળી હતી.

ડાભડા નં. ૭, પ્રત ક્રમાંક ૧૭૧. પત્ર ૨૨૮. લેખન અનુમાનતઃ વીસમો સૈકો.

અમે J સંજ્ઞક પ્રત સાથે અક્ષરશઃ મેળવીને પાઠભેદો નોંધ્યા છે. મળેલા પાઠભેદોવાળા સ્થળે અને બીજે પણ જ્યાં જ્યાં શંકા પડી ત્યાં BCP સંજ્ઞક પ્રતિઓ જોઈ છે. V અને D સંજ્ઞક પ્રતિઓનો ઉપયોગ બહુ ઓછો કર્યો છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ગ્રંથકાર આ. વર્ધમાનસૂરિજી

ચન્દ્રકુલની શોભા વધારનાર ગ્રંથકાર આચાર્યશ્રી વર્ધમાનસૂરિજી નવાંગી ટીકાકાર આ. અભયદેવસૂરિના પટ્ટશિષ્ય હતા.

પોતના જીવન-કવન દ્વારા વિક્રમના ૧૨ શતકને આલોકિત કરનાર અને ભ. મહાવીરની ૩૯મી પાટે આવનાર આચાર્યશ્રીના જીવન વિષે વિશેષ વિગતો મળતી નથી. માત્ર વિક્રમ સં. ૧૧૯૨ના લેખ ની [1]પ્રશસ્તિમાં ઉલ્લેખ મળે છે. (જૈન પ્રશસ્તિ લેખ સંગ્રહ ૧૨)

આ. વર્ધમાનસૂરિજીએ ધર્મરત્નકરંડક ગ્રંથની રચના વિ. સં. ૧૧૭૨માં કરી તે પૂર્વે વિ. સં. ૧૧૪૦માં **'मणोरमाकहा'** નામની પંદર હજાર શ્લોક પ્રમાણ, વિશાળ કદ ધરાવતી અનેક અવાંતર કથાઓથી સમૃદ્ધ વિશાળ પ્રાકૃત કથાનું નિર્માણ [2]ધંધૂકામાં રહીને કર્યું હતું. અને ત્યારબાદ વિ. સં. ૧૧૬૦માં **'जुगाइजिणचरियं'** નામની અગિયાર હજાર શ્લોક પ્રમાણ ગ્રંથાગ્ર ધરાવતી પ્રાકૃત કૃતિ દ્વારા શ્રી ઋષભદેવ ભગવાનની કથાનું સુંદર આલેખન ખંભાતમાં રહીને કર્યું હતું.

આ બન્ને પ્રાકૃત ચરિત્રગ્રન્થો તાજેતરમાં પં. રૂપેન્દ્રકુમાર દ્વારા સંપાદિત થઈ લાલભાઈ દલપતભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર દ્વારા પ્રસિદ્ધ થઈ ચુકયા છે. અને હવે તેઓશ્રીની આ સંસ્કૃત રચના પુનઃ પ્રસિદ્ધ થઈ રહી છે. ત્યારે તેઓશ્રીની ત્રણેય[3] રચનાઓ અભ્યાસીઓને સુલભ બની રહી છે તે આનંદનો વિષય છે.

ધર્મરત્નકરંડક

સ્વોપજ્ઞટીકા સાથે લગભગ દસ હાજર શ્લોક પ્રમાણ કાયા ધરાવતો પ્રસ્તુત ગ્રંથ **મહારાજા જયસિંહ** શાસિત **શ્રીદાયિકાકૂપ** નામના જિનમંદિરથી શોભતા ગામમાં રચાયો હતો.

દાયિકાકૂપ ગામમાં હુંવટ વંશમાં અલંકારસમા **જિંદક** શ્રેષ્ઠિ અને **અજિત** શ્રેષ્ઠિ નામે બે ભાઈઓ રહેતા હતાં. આ બન્ને ભાઈઓએ બનાવેલી પૌષધશાળામાં સ્થિરતા દરમિયાન વિ. સં. ૧૧૭૨માં આ ગ્રન્થની રચના કરવામાં આવી છે.

ગ્રંથરચનામાં આ. વર્ધમાનસૂરિજીને તપસ્વી અને યશસ્વી ઉપાધ્યાય **પાર્શ્વચન્દ્રજી**એ સહયોગ આપ્યો હતો.

ગ્રંથ સંશોધનમાં ઉપાધ્યાય પાર્શ્વચન્દ્રજી ઉપરાંત મુનિશ્રી નેમિચન્દ્રજી એ પણ સુંદર યોગદાન આપ્યું છે.

---

૧. આ વિગત અમે શારદાબેન ચી. એ. રી. સેંટરમાં આપેલ માહિતી સંગ્રહમાંથી લખી છે. કોંપ્યુટરનો સંદર્ભ અંક ૩૯ (૦૦૦૨૮૩૭) છે.

૨. ધંધૂકામાં મહલ શ્રેષ્ઠિના પુત્ર વેલ્લક શ્રેષ્ઠીની વસતિમાં રહીને આચાર્યશ્રી એ 'મણોરમાકહા' ની રચના કરી હતી.

૩. **जैन साहित्य का बृहद् इतिहास** (भा. ५. पृ. १९८) માં આ. અભયદેવસૂરિ શિષ્ય આ. વર્ધમાનસૂરિ કૃત 'શકુનરત્નાવલી' નો ઉલ્લેખ છે. આ આ. વર્ધમાનસૂરિ ધ. ૨. ક. કાર આ. વર્ધમાનસૂરિથી અભિન્ન હોય તો તેઓએ ઓછામાં ઓછી ૪ કૃતિની રચના કરી હતી એમ માનવું રહ્યું.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આ ગ્રન્થનો પ્રથમાદર્શ લખવાનું પુણ્યકાર્ય ગણિવરશ્રી અશોકચન્દ્રજી અને મુનિશ્રી ધનેશ્વરજીએ કર્યું.

વીસ અધિકારોમાં વહેંચાયેલા પ્રસ્તુત ગ્રંથમાં આવતાં અધિકારોનાં નામ, પેટા વિષયો, કથાઓના નામ વગેરે 'વિષયાનુક્રમ'માં વિસ્તારપૂર્વક બતાવ્યું છે. અભ્યાસીઓની સુગમતા ખાતર ભિન્ન ભિન્ન ટાઈપોનો ઉપયોગ કર્યો છે. અહીં અલગ આપવામાં આવેલા 'વિષયાનુક્રમ' ઉપર નજર નાંખતા સાથે જ જણાઈ આવે છે કે પ્રસ્તુત ગ્રંથનું નામ ધર્મરત્નકરંડક-ધર્મરૂપી રત્નોનો કરંડિયો-તદ્દન યથાર્થ છે.

ગ્રંથના મૂળ શ્લોકોની [1]સંખ્યા ૩૭૬ થાય છે. મોટાભાગના શ્લોક અનુષ્ટપછંદમાં છે પણ કેટલાક અન્ય છંદોમાં પણ છે.

શ્લોક સરળ સુગમ અને હૃદયંગમ છે. કેટલાક શ્લોકો તો વાંચતા સાથે સમજાઈ જાય એવા સરળ છે. અને એવા સરળ શ્લોકોની વ્યાખ્યા કરવાને બદલે **श्लोकोऽयं स्पष्टः** લખી દેવામાં આવ્યું છે.

મોટાભાગના શ્લોકો તે તે વિષયની બેનમૂન સુભાષિતો બનવાની ક્ષમતા ધરાવે છે.

સામાન્ય રીતે ધર્મરત્નકરંડક (ધ. ર. ક.) ની બધી હસ્તલિખિત પ્રતિઓમાં અવતરણિકા પછી મૂળ શ્લોક કે શ્લોકો અને પછી વ્યાખ્યા-ટીકા છે.

વ્યાખ્યામાં મોટેભાગે શ્લોકના પ્રતીકો લઈ પર્યાયો આપ્યા છે. સુગમ શબ્દોના પર્યાયો પણ નથી આપ્યા. અને કયારેક સંપૂર્ણ શ્લોકની સુગમ હોવાના કારણે વ્યાખ્યા નથી કરી.

બે ત્રણ સ્થળે વ્યાખ્યા વિસ્તૃત છે. વ્યાખ્યામાં આગમાદિ ગ્રંથોના અનેક સાક્ષીપાઠો પણ આપવામાં આવ્યા છે. (જુઓ શ્લોક ૪૭-૪૮, ૨૪૪-૪૫ની વ્યાખ્યા)

કયારેક મૂળ શ્લોકના પાઠ કરતાં ટીકામાં અપાયેલા પ્રતીકનો પાઠ ભિન્ન હોય છે. ટીકા સ્વોપજ્ઞ છે. એટલે ગ્રંથકારને જ પાછળથી ફેરફાર કરવાનો વિચાર થયો હોય એમ બનવા જોગ છે. અન્ય ગ્રંથોમાં પણ આવું બનતું હોય છે. અમે જ્યારે ટીકાગત પાઠ સ્વીકાર્યો છે ત્યારે ટિપ્પણમાં એનો નિર્દેશ અને હસ્તપ્રતોના પાઠ આપી દીધા છે. (જુઓ પૃ. ૧૬૩ ટિ. ૧, પૃ. ૨૧૭ ટી. ૧, પૃ. ૨૧૮ ટી. ૧ પૃ. ૨૨૯ ટિ ૧ વગેરે.)

એક સ્થળે એવું બન્યું છે કે- ત્રણ શ્લોકોની ટીકા છે પણ મૂળ શ્લોકો નથી. અમે ટીકાગત પ્રતીકોના આધારે મૂળશ્લોકો ગોઠવીને ચોરસ બ્રેકેટમાં આપી ટિપ્પણમાં નિર્દેશ કર્યો છે. (જુઓ શ્લોક નં. ૮૮-૯૦, પૃ. ૧૪૧ ટી. ૧)

---

૧. જો કે ગ્રંથના અંતિમ શ્લોકમાં કુલ શ્લોક ૩૩૫ થતાં હોવાનું જણાવ્યું છે.

ग्रथितेऽपि हि विज्ञेयं श्लोकानां सर्वसङ्ख्यया ।
पूर्वापर्वेण सम्पिण्ड्य पञ्चत्रिंशं शतत्रयम् ॥३७६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

એક સ્થળે એવું બન્યું છે કે- મૂળ શ્લોક (૧૪૭)ના સ્થળે પૂરો શ્લોક નથી. અને ટીકામાં ૧૪૫મી ગાથાનું પ્રતીક આપી '**श्लोकास्त्रयः सुखावबोधा एव**' એમ લખી દીધું છે. આવા સ્થળે શ્લોકની પૂર્તિ કરવાનું અમારી પાસે કોઈ સાધન ન હોવાથી અધૂરા જ મુકવા પડ્યા છે. (જુઓ પૃ. ૧૯૩ ટી. ૧)

. આવું જ ૧૮૦ ની ટીકા પૂરી થયા પછી '**अनग्रः पर्वताकारः' इति श्लोकः सुगम एव (पृ. २२०)** લખ્યું છે પણ મૂળ શ્લોકો ૧૭૨-૧૯૯ માં આવો કોઈ શ્લોક છે નહીં. અને એના વિના જ અવતરણિકામાં (પૃ. ૨૧૭) જણાવેલ '**श्लोकानां सप्तविंशतिः**' થઈ રહે છે. એટલે આ શ્લોક ગ્રંથકારે પાછળથી કાઢી નાંખ્યો હોય તેમ બને. (પૃ. ૨૦૦ ટિ. ૧)

ગ્રંથમાં ચર્ચ્ય વિષયો પ્રચલિત અને જાણીતા છે. અષ્ટપ્રકારી પૂજાના ક્રમ અને પ્રકારમાં વર્તમાનમાં પ્રચલિત ક્રમ અને પ્રકાર કરતાં ફેરફાર છે. મૂલશુદ્ધિપ્રકરણની ગાથા ૨૧માં પણ અહીં ધ. ૨. ક. (શ્લોક ૫૦-૫૮)માં નિર્દિષ્ટ ક્રમ અને પ્રકાર મુજબ જ વર્ણન છે. એટલે આ ક્રમ અને પ્રકારની પરંપરા પ્રાચીન હોવાનું જણાય છે.

ગ્રંથમાં કે કથામાં આવતાં વિષયોને પુષ્ટ કરવા માટે અવતરણો સાક્ષીપાઠો પણ ઘણા સ્થળે આપ્યા છે. પાંચસોથી વધુ અવતરણોમાં પ્રાકૃત ગાથાઓની સંખ્યા મોટી છે. અવતરણોના મૂળ સ્થાન જ્યાં જ્યાં શોધી શકાયા છે ત્યાં ત્યાં તે તે ગ્રંથોના[1] નામ આદિ આપ્યા છે. અવતરણોને ભિન્ન ટાઈપમાં મુદ્રિત કરવામાં આવ્યા છે. અવતરણોની અકારાદિસૂચિ પરિશિષ્ટ ૩માં આપવામાં આવી છે.

અહીં ધ. ૨. ક. માં આવતાં અવતરણો '**मणोरमाकहा**' વગેરેમાં પણ મળતા હોય છે.[2]

ટીકામાં અને કથામાં પ્રસંગે પ્રસંગે સંસ્કૃત-પ્રાકૃત-અપભ્રંશમાં સુંદર સુભાષિતો, અન્ય ગ્રંથોની સાક્ષીઓ આવ્યા કરતી હોય જ છે. કેટલીક વિશેષ ઉલ્લેખનીય બાબતો ગ્રંથમાં આવે છે તે આવી છે.

નવકારમહિમા પ્રાકૃત પદ્યમાં (પૃ. ૪૨-૪૪)
પ્રતિષ્ઠાવિધિવર્ણન પ્રાકૃત પદ્યમાં (પૃ. ૩૧-૩૫)
જિનસ્તુતિ (પૃ. ૪૧,૧૨૬-૨૭)
અંતિમઆરાધનાનું વર્ણન (પૃ. ૪૫-૪૭)
ધર્મદેશના (પૃ. ૫૨-૫૩, ૫૫-૫૬, ૯૯, ૧૧૪-૧૫, ૧૧૮)
શ્રાવકધર્મવર્ણન (પૃ. ૧૦૮-૧૦૯)
ગુરુવર્ણન (પૃ. ૫૫)
વિદ્યાપ્રશંસા (પૃ. ૧૭૮)

---

૧. વિશેષ માટે સંપાદન-ઉપયુક્ત ગ્રંથ સૂચિ જુઓ.
૨. જેમ કે ધ. ૨. ક. પૃ. ૯૬ ગાથા ૮૨, '**मणोरमाकहा**' પૃ. ૩૨૫ ગાથા ૯૯૭.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વસંતઋતુવર્ણન (પૃ. ૬૬)
સરોવરવર્ણન (પૃ. ૮૨)
પ્રવ્રજ્યાવર્ણન ગદ્યમાં (પૃ. ૯૨-૯૩)
નરકવર્ણન ગદ્યમાં (પૃ. ૧૧૪)
દારિદ્રયનિંદા (પૃ. ૧૦૨,૩૭૨)
ચારગતિનું વર્ણન (પૃ. ૨૭૯-૮૦)
સ્ત્રીમોહવર્ણન (પૃ. ૧૮૦)
આર્યદેશ ૨પા (પૃ. ૮)
અશરણભાવના (પૃ. ૨૧૩)

કથાઓ

ધ. ૨. ક. માં મૂળ શ્લોકની વ્યાખ્યા કર્યા પછી વિષયને વધુ સ્પષ્ટ કરવા પ્રસંગે પ્રસંગે કથાઓ મુકી છે. દસહજ્જર શ્લોકપ્રમાણ ગ્રંથનો સિંહભાગ-૭૦૦૦ શ્લોકપ્રમાણ-કથામાં રોકાયો છે.

મોટાભાગની કથાઓ સરળ પદ્યમાં છે. ક્વચિત્ અલંકારિક ઉપમા અને શ્લેષ પ્રયોગ પણ છે. મોટાભાગના પદ્ય અનુષ્ટુપ છંદમાં છે. ક્વચિત્ ભિન્ન ભિન્ન છંદો પણ છે.

કેટલીક કથાઓ ગદ્યમાં છે. જેમ કે [1]દુર્ગતાનારીકથા (પૃ. ૧૩૨-૩), શ્રેણિકદૃઢતા પ્રસંગ (પૃ. ૧૫૩-૫૪), કુલવાલકકથા (પૃ. ૩૩૪-૫), ચોરકથા (પૃ. ૩૮૯-૩૯૦) અમૃતમુખાસ્થવિરાકથા (પૃ. ૩૭૮, ૩૮૬) જેવી કેટલીક કથાઓ ગદ્યમાં છે. અને કેટલીક પદ્ય કથાઓમાં પણ વચ્ચે વચ્ચે ગદ્ય આવે છે. (પૃ. ૨૩૮-૩૯, ૨૭૯-૮૦).

ગદ્ય વર્ણન પણ પ્રાસાદિક શૈલિનું છે. સિદ્ધર્ષિ ગણિના ઉપમિતિના ગદ્યની યાદ અપાવે તેવું. કયાંક સમાસપ્રચૂર લાંબા અલંકારિક વર્ણન પણ છે. (પૃ. ૪૦૨)

કેટલીક કથાઓ પ્રસિદ્ધ હોવાથી સંક્ષેપમાં જ પૂર્ણ કરી છે. શાલિભદ્રકથા (પૃ. ૨૬૭ શ્લોક ૧૪), અભયકુમાર (પૃ. ૧૫૫ શ્લોક ૨૮), મહાવીરપ્રભુ જીવનપ્રસંગ (પૃ. ૨૩૩-૪ શ્લોક ૧૮).

ફલસારકથા (શ્લોક ૪૦૦ પ્રમાણ), નરકેશરીકથા (શ્લોક ૪૧૯) અને ચિત્રસંભૂતિકથા (૪૪૬ શ્લોક) જેવી કેટલીક દીર્ઘ કથાઓ પણ છે.

ચાલીસથી વધુ કથાઓમાં ૨૦થી વધુ પ્રાચીન અને પ્રસિદ્ધ ઐતિહાસિક છે. દુષ્પ્રસહસૂરિ વકતવ્યતામાં (પૃ. ૧૩૯-૪૦) ઈતિહાસ પ્રેમીઓને રસ પડે તેવી વિગતો છે.

---

૧. દુર્ગતાનારીકથામાં પંચાશક ટીકાની શબ્દશઃ છાયા છે. (પૃ. ૧૩૩ ટિ. ૧) અમૃતમુખાસ્થવિરાની કથામાં 'મણોરમાકહા' ટિપ્પણ ગત પ્રાકૃત કથાનું સંસ્કૃત રૂપાંતર-શબ્દશઃ સંસ્કૃત છાયા જોવા મળે છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અષ્ટપ્રકારીપૂજાના મહિમા વર્ણવતી આઠ કથાઓ નરચન્દ્રકથા (પૃ. ૧૬૪-૧૭૨), આમ્ર-લિંબકકથા (પૃ. ૩૩૫-૩૩૮) વગેરે પ્રાચીન કથાની શૈલીએ લખાયેલી છે. 'મણોરમાકહા'માં પણ અષ્ટપ્રકારીપૂજાના મહિમા ઉપર અને અન્ય વિષયો પર પણ પ્રાચીન શૈલીની કથાઓ છે. બન્નેમાં (ધ. ૨. ક. અને મણોરમાકહામાં) ફલપૂજા ઉપર ફલસારની કથા છે. પણ કથા તદ્દન જુદી જુદી છે.

કેટલીક કથાઓમાં કેટલુંક સામ્ય પણ છે. જેમ કે 'મણોરમાકહા'માં આવતી તેજસારનૃપકથાનો પ્રારંભિક અંશનું (પૃ. ૨૦૪-૨૦૭) ધ. ૨. ક. માં ગંધપૂજાના મહિમા ઉપર આવતી રત્નસુન્દરકથા (પૃ. ૫૪-૬૩) જોડે સામ્ય છે. તેજસારકથાના પાછળના અંશ જોડે (પૃ. ૨૦૭-૨૧૭) ધ. ૨. ક. ગત દીપકપૂજા મહિમા ઉપરની ભાનુપ્રભકથા (પૃ. ૮૦-૯૩) મળતી આવે છે.

'મણોરમાકહા' ના પ્રારંભમાં આ. વર્ધમાનસૂરિજીએ ગ્રંથગત કથાઓ બાબતમાં લખ્યું છે કે-

एसो कहापबंधो कओ मए मंदबुद्धिणा वि दढं ।
कत्थइ चरियसमेओ कत्थइ पुण कप्पियाणुगओ ।।

અમુક કથાઓ પ્રાચીન ચારિત્રાનુસાર અને અમુક કલ્પનાનુસાર રચી છે. એટલે આ કથાઓ કલ્પનાનુસાર બની હોવાનો સંભવ છે.

રૂપકકથાઓ

ધ. ૨. ક. માં કેટલીક રૂપકકથાઓ પણ છે. મધુબિન્દુની પ્રસિદ્ધ કથા (પૃ. ૧૫-૧૭) અહીં કેટલીક વિશિષ્ટતા અને વિસ્તાર સાથે જોવા મળે છે. **'जुगाइ जिणिंचरिय'** પૃ. ૧૯૦ માં આ કથા સંક્ષિપ્ત માં છે.

શ્રેષ્ઠિપુત્રત્રયકથા (પૃ. ૧૮-૨૩)માં પિતા દ્વારા પુત્રોને અપાયેલી હિતશિક્ષા અને નીતિશાસ્ત્રની વાતો માર્મિક છે.

રુદ્રદેવની કથામાં કષાયોની ભયંકરતા બતાવતા પાત્રોની સરસ ગૂંથણી છે. (પૃ. ૨૨૧-૨૨૮) આ કથા **'जुगाइ जिणिंदचरिय'** પૃ. ૧૯૮માં પ્રાકૃત ગદ્યમાં છે.

'વસુસાર'ની કથા (પૃ. ૧૬૮-૬૯) છાણામાંથી રત્નો બનાવવા વગેરે રસપ્રદ બાબતો છે. કથાના પાત્રોની છેલ્લે ઉપનયમાં સમજણ આપી છે. શ્રેષ્ઠિ = તીર્થંકર, વસુસાર = સંઘ, પત્રક = જિનાગમ, ભસ્મ ભરેલા વહાણ = અશુચિમય કાયા વગેરે.

આ કથા 'મણોરમાકહા' (પૃ. ૧૬૮-૬૯)માં પ્રાકૃત ગદ્યમાં છે.

લોકકથાઓ

અહીં ધ. ૨. ક. માં કેટલીક લોકકથાઓ પણ છે. આ કથાઓ લોકસાહિત્યમાં ઘણા ઠેકાણે ભિન્ન ભિન્ન સ્વરૂપ જોવા મળે છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આઠસો વર્ષ પહેલા આ લોકકથાઓનું સ્વરૂપ કેવું હતું તે જાણવા અને એની પ્રાચીનતા નક્કી કરવા માટે આ કથાઓનું અધ્યયન ઉપયોગી બને તેવું છે.

તારાચન્દ્રની કથા (પૃ. ૧૮૬-૧૯૧) અને [૧]રત્નચૂડરાસ (રચના સં. ૧૫૦૯ લગભગ) અને રત્નચૂડકથાનક (રચના વિ. સં. ૧૫૩૦) વગેરેમાં આવતી રત્નચૂડની કથા જોડે સામ્ય ધરાવે છે.

[૨]શુક અને સારિકાના મોઢે વેદ, પુરાણ વગેરેના હવાલા આપી કહેવાતી સ્ત્રીચરિત્ર અને પુરુષચરિત્રની કથાઓ (પૃ. ૩૪૧-૬૧) જેવી કથાઓ લોકસાહિત્યમાં વિપુલ પ્રમાણમાં નજરે ચડે છે. આને લગતી સ્વતંત્ર રચનાઓ પણ 'સૂડાબહોંતેરી', 'શુકસપ્તતિ' નામથી થયેલી છે.

આમાં [૩]કાષ્ઠ શ્રેષ્ઠિની કથા (પૃ. ૩૪૩-૩૪૮) આવશ્યક ચૂર્ણિ, આવશ્યક હારિભદ્રી ટીકા, આવશ્યકમલયગિરિટીકા (આવશ્યકનિર્યુક્તિગાથા ૯૫૯ ની ટીકામાં) નંદિસૂત્રની ટીકા, હેમવિજય કૃત કથારત્નાકર, ઉપદેશપ્રાસાદ વગેરેમાં પણ મળે છે.

રત્નસુંદરકથામાં (પૃ. ૫૮-૫૯) પણ સ્ત્રીચરિત્રનો પ્રસંગ આવે છે. આ જ કથામાં (પૃ. ૬૦-૬૨) યક્ષાગારમાં એકઠા થયેલા કાર્પટિકો દ્વારા કહેવાતી આશ્ચર્યજનક ઘટનાઓનું નજરે જોયેલું બયાન વર્ણવાયું છે.

અમૃતમુખાસ્થવિરાકથા (પૃ. ૩૭૭-૮૬) જેવી કથા [૪]લોકસાહિત્યમાં મીઠી ડોસી અને કડવી ડોસીની કથા તરીકે જોવા મળે છે.

આ કથા અને એની અવાંતરકથાઓ 'મણોરમાકહા'માં (પૃ. ૩૫-૪૧) શબ્દશઃ આ જ રીતે પ્રાકૃતગદ્યમાં છે.

શીલસુંદરીકથા (પૃ. ૨૮૧-૮૫) મણોરમાકહામાં (પૃ. ૮૯ થી) પ્રાકૃતગદ્યમાં છે. આ કથામાં આવતાં પ્રાકૃત પદ્યો મણોરમાકહામાં પણ આવે છે.

[૫]શીલસુન્દરકથા આખ્યાનકમણિકોશવૃત્તિ, પંચશતીપ્રબોધ, શામળભટ્ટની નંદબત્રીસી, નંદોપાખ્યાન વગેરેમાં આ કથા કેટલાક ફેરફાર જોડે મળે છે.

આ ઉપરાંત શુભસંગ-કુસંગ કથામાં (પૃ. ૨૩૪-૨૪૦) આવતી બે પેટા કથાઓ, પિંગલાખ્યાન (પૃ. ૧૮૨-૧૮૯) વગેરેના મૂળ લોકસાહિત્યમાં હોવા સંભવ છે.

---

૧. વિશેષ માટે જુઓ 'લોકકથાના મૂળ અને કુળ' લે. હરિવલ્લભ ચૂ. ભાયાણી. પૃ. ૨૩૯-૨૫૩, ૩૬૧.
૨. વિશેષ વિગતો માટે જુઓ 'મધ્યકાલીન ગુજરાતી કથાકોષ' ભા. ૧ પ્ર. ગુજરાત સાહિત્ય અકાદમી. 'લોકકથાના મૂળ અને કુળ' (પૃ. ૧૦૮-૧૩, ૩૬૧-૬૨).
૩. વિશેષ માહિતી માટે જુઓ 'લોકકથાના મૂળ અને કુળ' પૃ. ૨૩૯-૨૫૩, ૩૬૧.
૪. જુઓ 'લોકકથાના મૂળ અને કૂળ' પૃ. ૭૧-૭૬, ૩૨૯-૩૦, ૩૫૦-૫૩.
૫. વિશેષ માટે જુઓ લોકકથાના મૂળ અને કૂળ પૃ. ૧૧, ૩૦૭-૧૧.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

પ્રસ્તુત સંસ્કરણ

ઘણાં વર્ષોથી દુર્લભ બનેલા આ ગ્રન્થનું પ્રસ્તુત સંસ્કરણ પૂર્વસંસ્કરણ કરતાં ઘણી ઘણી વિશિષ્ટતાઓ ધરાવે છે. પૂર્વસંસ્કરણની અમે **મુ.** સંજ્ઞા મળે છે.

પ્રસ્તુત સંસ્કરણમાં મૂળ શ્લોક, ટીકા, પ્રતીક, અવતરણ, વિશેષનામ, વગેરેના ટાઈપો સુગમતા ખાતર ભિન્ન ભિન્ન રાખવામાં આવ્યા છે.

જ્યાં બે કે વધુ ગાથાઓનો અર્થ પરસ્પર સંકળાયેલો હોય ત્યાં ત્યાં મુ. માં (પૂર્વસંસ્કરણમાં) **युग्मं त्रिभिः कुलकं** વગેરે ઉમેરવામાં આવેલું છે. હસ્તપ્રતોમાં આવું કશું ન હોવાથી અમે તે કાઢી નાખ્યું છે.

કથાના વર્ણન વગેરેમાં જ્યાં કંઈ ખૂટતું જણાય ત્યાં પં. હીરાલાલ હંસરાજે પોતે શ્લોક કે શ્લોકાર્ધ બનાવી **મુ.** માં ઉમેરી દીધો હોય છે. અમે આવા ઉમેરાઓને [] આવા ચોરસ કૌંસમાં મુકયા છે. (પૃ. ૯૮/શ્લોક ૧૩૦, ૧૪૮/શ્લોક ૧૭૭, ૧૭૮/શ્લોક ૧૯, ૧૯૧/શ્લોક ૧૫૫ વગેરે.)

એવી રીતે પં. હીરાલાલે અપરિચિત શબ્દોના સ્થળે પરિચિત શબ્દો **મુ.** માં મુકી દીધા છે. જેમ કે **योषिषु** ના સ્થળે **नारीषु**. અમે હસ્તપ્રત અનુસાર પાઠ રાખ્યો છે.

પ્રાકૃત કે અપભ્રંશની ગાથાઓ અશુદ્ધ મળતી હોય ત્યારે **મુ.** માં (પૂર્વસંસ્કરણમાં) લેવામાં નથી આવી. અમે હસ્તપ્રતોમાં મળતી ગાથાઓને યથાશકય શુદ્ધ કરીને આપી છે. [1]જુઓ પૃ. ૨૩૭ ટિ. ૧.

આવી જ રીતે **મુ.** માં (પૂર્વસંસ્કરણમાં) છુટી ગયેલ શ્લોક આદિ પણ આ સંસ્કરણમાં લઈ લેવામાં આવ્યા છે. (પૃ. ૧૯૦ ટિ. ૧)

અહીં ધ. ૨. ક. માં અનુષ્ટુપ શ્લોકના કોઈ કોઈ ચરણો આઠના બદલે ૭ કે ૯ અક્ષરમાં ગ્રંથકારે રચ્યા છે. **મુ.** માં પં. હીરાલાલે ઘણા ઠેકાણે ફેરફાર કરી આઠ અક્ષરના ચરણો કર્યા છે. અમે હસ્તપ્રત અનુસાર મૂળમાં પાઠ સ્વીકાર્યો છે. અથવા હસ્તપ્રતનો પાઠ ટિપ્પણમાં આપ્યો છે. (પૃ. ૪૧/ ટિ. ૨, ૪૨/ ટિ. ૧, ૧૬૫/ ટિ. ૧, ૨૦૩/ ટિ. ૧ વગેરે)

ગ્રંથમાં આવતાં અવતરણો ને મૂળ સ્થળ સાથે કે અન્યગ્રંથમાં અવતરણ તરીકે ઉદ્ધરેલા હોય તેવા સ્થળે મેળવતાં કંઈ પાઠભેદ કે વિશિષ્ટતા નોંધવા જેવી લાગી છે તો તે તે સ્થળે ટિપ્પણમાં આપી છે. (પૃ. ૩૨/ ટિ. ૧, ૩૩/ ટિ. ૨, ૪૨/ ટિ. ૨-૩, ૪૪/ ટિ. ૧, ૧૩૯/ ટિ. ૧, ૨૧૫/ ટિ. ૧, ૨૬૮/ ટિ. ૧, ૨૭૧/ ટિ. ૧ વગેરે)

J સંજ્ઞક પ્રતિમાં કયાંક કયાંક અઘરા શબ્દોના અર્થો બાજુના હાંસિયામાં આપેલા છે. આમાંથી અમને ઉપયોગી લાગ્યા તે ટિપ્પણમાં આપ્યા છે. (પૃ. ૪૧/ ટિ. ૧, ૪૨/ ટિ. ૨, ૭૨/ ટિ. ૧ વગેરે)

---

૧. પૃ. ૩૮૫ ગાથા ૧-૨-૩ અને પૃ. ૩૮૬ ગાથા ૧-૨-૩ આ બધી ગાથાઓ પૂર્વસંસ્કરણમાં નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

કયારેક અમે પણ અઘરા શબ્દોના અર્થ શબ્દકોષ વગેરેના આધારે ટિપ્પણમાં આપ્યા છે. (પૃ. ૨૬/ ટિ. ૧, ૪૪/ ટિ. ૨, ૩૦૮/ ટિ. ૧)

જ્યારે હસ્તપ્રતોનાં પાઠ કરતાં મુ. માં ભિન્ન પાઠ હોય છે ત્યારે અમે મોટાભાગે હસ્તપ્રતને અનુસર્યા છીએ. મૂળમાં સ્વીકારેલ પાઠ કઈ કઈ પ્રતોનો છે અને મુ. માં શું પાઠ છે તે કયારેક કયારેક ટિપ્પણમાં અમે બતાવ્યું છે.

જેમ કે પૃ. ૧ ટિપ્પણમાં નિર્દિષ્ટ BPJCD સંજ્ઞક પ્રતોમાં **હેતુના** પાઠ છે. અને મુ. માં **હેતવે** પાઠ છે.

કયારેક કોઈ એક કે વધુ પ્રતોનો પાઠ સ્વીકાર્યો છે અને અન્ય પ્રત કે પ્રતોના પાઠભેદ અને મુ. નો પાઠભેદ ટિપ્પણમાં આપ્યા છે. પૃ. ૬૬ ટિ. ૧ વગેરે.

વ્યાકરણ આદિના નિયમસર કે કથાના પ્રસંગને અનુલક્ષીને અમે હસ્તપ્રતિઓ અને મુ. ના પાઠથી ભિન્ન પાઠ સ્વીકાર્યો છે ત્યાં ટિપ્પણમાં પ્રતિઓ અને મુ. ના પાઠભેદ પ્રાયઃ આપ્યા છે. પૃ. ૨૮/ ટિ. ૧, ૩૩/ ટિ. ૧, ૪૩/ ટિ. ૧, ૬૩/ ટિ. ૧-૨, ૬૯/ ટિ. ૧, ૩૦૮/ ટિ. ૨ વગેરે.

કયારેક મૂળપાઠ સુધારવા જેવો લાગે ત્યારે સુધારો () આવા ગોળાકાર કૌંસમાં અને જ્યારે મૂળપાઠમાં કંઈક ઉમેરવાની જરૂર જણાય ત્યારે આવા ઉમેરા [] અમે આવા ચોરસ કૌંસમાં આપ્યા છે. પૃ. ૪૩/ ગાથા ૭૭, ૭૮, પૃ. ૧૬૦/ પંકિત ૭, ૧૨, પૃ. ૨૩૦/ પંકિત ૨૨ વગેરે.

અન્ય ગ્રંથોની વિશેષ બાબતો નોંધવા જેવી લાગી ત્યાં ટિપ્પણમાં જણાવી છે. પૃ. ૩૮/ ટિ. ૧, પૃ. ૩૬૪/ ટિ. ૧. વગેરે

કથા કે અવતરણોની અન્ય ગ્રન્થ જોડે તુલના પણ કરી છે. પૃ. ૩૭૭/ ટિ. ૧, પૃ. ૪૨/ ટિ. ૧.

ઋણસ્વીકાર-આભાર-ધન્યવાદ.

પૂજ્યપાદ યુગમહર્ષિ આચાર્ય ભગવંત શ્રીમદ્ વિજય ભદ્રસૂરીશ્વરજી મહારાજ અને તેઓશ્રીના પટ્ટપ્રભાવક સંઘ એકતા શિલ્પી પૂ. આચાર્ય ભ. શ્રીમદ્ વિજય ઉંકારસૂરીશ્વરજી મહારાજની દિવ્યકૃપા અને વર્ધમાન તપોનિધિ પૂ. આ. ભ. શ્રીમદ્ વિજય ભદ્રંકરસૂરીશ્વરજી મ. સા., પૂ. આ. ભ. અરવિંદસૂરીશ્વરજી મહારાજ, પૂ. આ. ભ. યશોવિજયસૂરીશ્વરજી મહારાજ, પૂજ્ય ગુરુદેવ શ્રી જિનચન્દ્રવિજયજી મ. સા. આદિના શુભાશિષના બળે આ સંપાદન કાર્ય થઈ શકયું છે. પૂજ્યપાદ પ્રવર્તક મુનિરાજશ્રી જંબૂવિજયજી મ. સા. નું માર્ગદર્શન પણ અવારનવાર મળતું રહે છે.

ઉપકારી વડીલોના ચરણોમાં ભાવભરી વંદના.

સંપાદનનું આ અતિ શ્રમસાધ્ય કાર્ય રળીયામણું બનાવવામાં ઝાઝા હાથોએ સહયોગ આપ્યો છે. પ્રૂફ સંશોધન દ્વારા ઝીણવટભર્યું શુદ્ધિકરણ કરવામાં પૂ. પં. શ્રી શીલચન્દ્રવિજયજી ગણિવર (શાસન

Jain Education International For Private & Personal Use Only www.jainelibrary.org

સમ્રાટ આ. નેમિસૂરિ મ. સા. ના સમુદાયના) વિદ્વદ્વર્ય મુનિરાજશ્રી મહાબોધિવિજયજી (આ. ભ. શ્રી હેમચન્દ્રસૂરીશ્વરજી મ. સા. ના શિષ્યરત્ન), વિદ્વદ્વર્ય મુનિરાજશ્રી હર્ષતિલકવિજયજી (વર્ધમાન તપોનિધિ આ. ભ. રાજતિલકસૂરિ મ. સા. ના શિષ્ય) આદિના અને વિવિધ સમુદાયના સાધ્વીજી મહારાજ, પં. રજનીભાઈ વગેરેએ ઘણી સહાય કરી છે.

વિવિધ જ્ઞાનભંડારોના કાર્યવાહકોએ હસ્તલિખિત પ્રત કે એની ઝેરોક્ષ કોપી આપવાની ઉદારતા બતાવી સંશોધન કાર્ય સરળ બનાવ્યું છે.

'શારદાબેન ચીમનભાઈ એજ્યુકેશન રીસર્ચ સેન્ટર' સંસ્થાના ટ્રસ્ટીશ્રી અજયભાઈ વગેરેએ આ ગ્રંથ સંસ્થા દ્વારા પ્રગટ કરવા નિર્ણય કરી સંસ્થાના જ કોમ્પ્યુટરો દ્વારા ગ્રંથના મુદ્રણ અંગેની પ્રક્રિયા ચાલુ કરાવી શ્રુતભક્તિનું સુંદર કાર્ય કર્યું છે. શ્રી ભીલડીયાજી તીર્થ કમીટીએ જ્ઞાનદ્રવ્યનો સદ્વ્યય પ્રસ્તુત ગ્રંથના પ્રકાશનમાં દ્રવ્ય સહાય કરીને કર્યો છે.

શારદાબેન ચી. એ. રી. સેન્ટરના ડાયરેકટર પં. શ્રી જિતેન્દ્રકુમાર બાબુલાલ શાહે પ્રારંભથી જ ગ્રંથનું મુદ્રણ સુંદર અને સુઘડ બને એ માટે પૂરતી ચીવટ રાખી છે. જોઈએ તેટલીવાર પ્રુફો કાઢી આપ્યા છે. અને ઘણી બાબતોમાં માર્ગદર્શન આપ્યું છે. શ્રીપ્રકાશ પાંડેયજીએ પણ સુંદર સહયોગ આપ્યો છે.

આ બધાના સહયોગને કારણે પ્રસ્તુત ગ્રંથનું સંપાદનકાર્ય અમે સરળતાથી કરી શકયા છીએ.

આ ગ્રંથના સંપાદનકાર્યમાં જિનાજ્ઞા વિરુદ્ધ કંઈ થયું હોય તો મિચ્છામિ દુક્કડં.

અભ્યાસીઓ આ ગ્રંથોનો સુંદર ઉપયોગ કરી આત્મકલ્યાણને વરે એજ મંગળ કામના.

યુગ મહર્ષિ પૂ. આ. ભ. શ્રીમદ્ વિજય ભદ્રસૂરીશ્વરજી મહારાજના શિષ્યરત્ન
પૂ. મુનિરાજશ્રી જિનચન્દ્રવિજયજી મ. સા. ના વિનેય
પં મુનિચન્દ્રવિજયજી ગણી.

જૈન ઉપાશ્રય
મુ. દસાડા
વાયા વીરમગામ
વિ. સં. ૨૦૫૦ ફા. સુ. ૧
તા. ૧૩-૩-૧૯૯૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्पादनोपयुक्तग्रन्थसूचिः

१.	आवश्यकनिर्युक्ति	पृ. २७०
२.	आवश्यक हारिभद्री टीका	पृ. १३५, २७०, ३९७
३.	उत्तराध्ययन निर्युक्ति	पृ. २७१
४.	उत्तराध्ययन सूत्र	पृ. १८१
५.	उपदेशपद	पृ. १३६
६.	उपदेशमाला	(आ. वर्द्धमानसूरिकथासहिता)
७.	कल्याणकलिका	पृ. ३२ टि., ३३ टि.
८.	जिनपूजा विधिसंग्रह	पृ. ३३ टि.
९.	धातुपारायण	पृ. ३६४ टि.
१०.	नवतत्त्व प्रकरण	पृ. २६८, २७०
११.	पञ्चवस्तुक प्रकरण	पृ. २६९
१२.	पञ्चाशक प्रकरण	पृ. २९-३१, ३५-३६, १३१
१३.	पञ्चाशक प्र. टीका	पृ. १३३ टि. १-२
१४.	पाइअसद्दमहण्णवकोस	पृ. २०८ टि.
१५.	प्रज्ञापनासूत्र	पृ. ८
१६.	प्रशमरतिप्रकरण	पृ. १५८, ३३६, ३९६
१७.	भगवतीसूत्र	पृ. २७०, २७१
१८.	मणोरमाकहा	पृ. ४२ टि., २१५ टि., ३७७ टि., ३७९ टि.
१९.	माधवीया धातुवृत्ति	पृ. २६४ टि.
२०.	विचारसारप्रकरण	पृ. १३७, १३९
२१.	विशेषावश्यक भाष्य	पृ. २६८ टि. २६९
२२.	शब्दरत्नमहोदधि	पृ. २६ टि.
२३.	संवेगरंगसाला	पृ. ४२ टि., ३०६, ३०७, ३०९
२४.	स्थानाङ्ग सूत्र	पृ. १५९, २७१, २७२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयानुक्रमः

	પ્રકાશકીય	૩
	ભીલડીયાજી તીર્થ	૪
	પ્રસ્તાવના	૭
गाथाङ्क	विषय	पत्राङ्क
१-४	मङ्गलाचरणम्	१-३
५-९	विषयाधिकारनिरूपणम्	४
१०-४४	**धर्माऽधर्मस्वरूपाधिकारः १**	५-२८
१०-११	धर्माधर्मयोः पर्यायाः	५
	४२ पुण्यप्रकृतयः	५-६
	८२ पापप्रकृतयः	६-७
१२-१७	धर्माऽधर्मयोः हेतवः	७-१०
	२५ ॥ आर्यदेशाः	८
	धर्माऽधर्मयोः स्वरूपम्	१०-११
२०-२३	धर्माऽधर्मयोः फलम्	११-१२
२४-२५	धार्मिकाऽधार्मिकस्वरूपादि	१२
२६-३७	धर्माऽधर्मप्रशंसानिन्दे	१२-१५
	मधुबिन्दुकथा	१५-१७
३८	धर्मकरणोपदेशः	१८
३९	मानुषत्वमहिमा	१८
	श्रेष्ठिपुत्रत्रयकथा	१८-२३
४०-४३	धर्मप्रशंसा	२४
४४	धर्मकरणोपदेशः	२४-२५
	प्रासादद्वय कथा	२५-२८
४५-७६	**जिनपूजाऽधिकारः २**	२९-१३३
४५	द्रव्यपूजा-भावपूजास्वरूपम्	२९
४६	पूजाधिकारिस्वरूपम्	२९-३०
४७	जिनबिम्ब-जिनमन्दिरनिर्माणादिस्वरूपम्	३०-३१
	प्रतिष्ठाविधिः	३१-३५
४८	पूजाविधिस्वरूपम्	३५-३६
४९	पूजाभेदाः	३७
५०-५९	अष्टप्रकारीपूजास्वरूपम्	३७-३९
	पुष्पपूजायां रत्नचन्द्रकथा	४०-५३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

	नवकारमहिमा धर्मदेशना	४२-४४
	अन्तिमआराधना	४५-४७
	गन्धपूजायां रत्नसुन्दरकथा २	५४-६३
	धूपपूजायां नरकेशरी कथा ३	६४-७९
	दीपपूजायां भानुप्रभकथा ४	८०-९३
	अक्षतपूजायां कणसारकथा ५	९४-१०१
	फलपूजायां फलसारकथा ६	१०२-११६
	घृतपूजायां गोधनकथा ७	११७-१२१
	जलपूजायां रससारकथा ८	१२२-१२८
६०-६२	अष्टपुष्पी पूजा	१२९
६३	विलेपनपूजा	१२९
६४-६६	आभरणपूजा	१२९
६७-६९	पुष्पादिपूजोपयागिता	१३०
७०-७४	जिनपूजाकरणोपदेशः	१३१
७५	जिनपूजाप्रणिधानम्	१३१
	दुर्गतानारीकथा	१३२-१३३
७६	जिनपूजामहत्त्वम्	१३३
७७-९९	**गुरुभक्ति अधिकारः ३**	१३४-१५९
७७-७९	गुरुभक्तिस्वरूपम्	१३४-१३५
८०-८३	गुरुतत्त्वस्वरूपम्	१३५-१३६
	दुष्प्रसहसूरिवक्तव्यता	१३७-१४०
८४-८७	गुरुमहत्त्वम्	१४०-१४१
८८-९०	जिनवाणी श्रवणोपदेशादि	१४१
	रौहिणेयचोरकथा	१४२-१४८
	वसुसारकथा	१४९-१५२
९१	**श्रेणिका-ऽभयकुमारोदाहरणे**	१५३-१५५
९२	बोधिः पूर्वभवाऽभ्यासात्	१५५
९३	**सुलभ-दुर्लभबोधिविषये चोरयुगलकथा**	१५६-१५७
९४-९६	गुरुभक्तिप्रकाराः	१५७
९७-९९	गुरुभक्तिकरणोपदेशः	१५८-१५९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

१००-११६	**परोपकाराधिकारः ४**	१६०-१७३
१००-११४	परोपकारमहत्त्वादि	१६०-१६४
	नरचन्द्रकुमारकथा	१६४-१७२
११५-११६	परोपकारिप्रशंसा	१७३
११७-१३४	**सन्तोषाधिकारः ५**	१७४-१९१
११७-१२९	सन्तोषमहत्त्वादि	१७४-१७७
	कपिलकेवलीकथा	१७८-१८१
	पिङ्गलाऽऽख्यानकम्	१८२-१८४
१३०-१३३	आशाविनाशोपायादि	१८४
१३४	सन्तोषकरणोपदेशः	१८५
	ताराचन्द्रकथा	१८६-१९१
१३५-१५२	**संसाराधिकारः ६**	१९२-२०१
१३५-१५२	संसाराऽसारतास्वरूपम्	१९२-१९४
	कुबेरसेनादृष्टान्तः (१८ नातरां)	१९४-२०१
१५३-१७२	**शोकाधिकारः ७**	२०२-२१६
१५३-१६१	शोकत्यागोपदेशः	२०२
१६२-१७२	शोकाकारीणामुपालम्भः हितोपदेशश्च	२०३-२०५
	सगरचक्रवर्तिकथा	२०५-२१६
१७३-१९९	**कषायाधिकारः ८**	२१७-२२८
१७३-१९९	कषायस्वरूपम्	२१७-२२१
	रुद्रदेवकथा	२२१-२२८
२००-२२१	**लोकविरुद्धाधिकारः ९**	२२९-२४०
२००-२२१	लोकविरुद्धत्यागकरणोपदेशः	२२९-२३३
	श्रीमहावीर प्रभुजीवन प्रसङ्गः	२३३-२३४
	शुभसङ्ग-कुसङ्गकथा	२३४-२४०
	सुविद्यकथा	२३४-२४०
२२२-२४०	धनचन्द्रकथा	२३५-२३८
२२२-२४०	**दानाऽधिकारः १०**	२४१-२६६
२२२-२२४	धर्मकरणोपदेशः	२४१
२२५-२२७	दानस्वरूपादि	२४१-२४२
२२८	ज्ञानदानमहत्त्वम्	२४३
२२९	अभयदानमहत्त्वम्	२४३-२४४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२३०-२४०	सुपात्रदानस्वरूपादि	२४४-२४७
	श्रेयांसकुमारकथा	२४७-२५१
	चन्दनबालाकथा	२५२-२५८
	कृतपुण्यकथा	२५९-२६५
	शालिभद्रकथा	२६६
	शीलाऽधिकारः ११	२६७-२८६
२४१-२४३	शीलस्वरूपादि	२६७
२४४-२४५	शीलवन्तसाधुस्वरूपम्	२६७-२७२
२४७-२५४	शीलमाहात्म्यम्	२७२-२७४
	सुदर्शनश्रेष्ठिकथा	२७४-२८०
	शीलसुन्दरीकथा	२८१-२८६
	तपोऽधिकारः १२	२८७-३१०
२५५-२६३	तपो महिमा	२८७-२८८
	चित्रसम्भूतिकथा	२८८-३०४
	[ब्रह्मदत्तचक्रिकथा]	
	हरिकेशकथा	३०५-३१०
	भावनाऽधिकारः १३	३११-३२५
२६४-२७३	भावमाहात्म्यम्	३११-३१२
	मृग-बलदेवमुनि-रथकारकथा	३१२-३२५
	शिष्टसङ्गाऽधिकारः १४	३२६-३३१
२७४-२८४	शिष्टसङ्गमहिमा	३२६-३२७
	केशी-प्रदेशीकथा	३२८-३३१
	विनयाधिकारः १५	३३२-३३८
२८५-२९८	विनयमहिमा	३३२-३३४
	कूलवालककथा	३३४-३३५
	आम्रलिम्बककथा	३३५-३३८
	विषयाधिकारः १६	३३९-३६१
२९९-३१०	विषयदोषाः	३३९-३४१
	शुक-सारिकादृष्टान्तानि	३४१-३६२
	काष्ठ श्रेष्ठिकथा १	३४३-३४८
	पुराणोक्तं स्त्रीचरित्रम् २	३४८-३५१
	वेदोक्तं स्त्रीचरित्रम् ३	३५१-३५३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

	पुरुषचरित्रम् ४	३५३-३५४
	पुराणोक्तं पुरुषचरित्रम् ५	३५५-३५९
	पुराणोक्तं पुरुषचरित्रम् ६	३५९-३६१
	विवेकाधिकारः १७	३६३-३७३
३११-३२३	विवेकमहिमा	३६३-३६५
	भोगदेवकथा	३६६-३७३
	मृदुभाषिताऽधिकारः १८	३७४-३८४
३२४-३३८	मृदुभाषागुणाः	३७४-३७६
	अमृतमुखी नामवृद्धानारीकथा	३७७-३८६
	चण्डरुद्रकथा	३७८
	चित्रनिपुणकथा	३८०-३८२
	अनक्षबहुलकुम्भकारकथा	३८२-३८४
	दयाऽधिकारः १९	३८५-३९०
३३९-३५५	दयामहिमा	३८७-३८९
	चोरदृष्टान्तः	३८९-३९०
	सङ्घपूजाऽधिकारः २०	३९१-४०८
३५६-३७२	सङ्घपूजामाहत्म्यम्	३९१-३९४
	धनसारकथा	३९४-४०७
३७३-३७४	ग्रन्थोपसंहारः	४०७
३७५-३७६	ग्रन्थकृत्प्रशस्तिः	४०७-४०८
परिशिष्टम् १	अकारादिक्रमेण मूलगाथासूचिः	४०९
परिशिष्टम् २	अकारादिक्रमेण अवतरणसूचिः	४१५
परिशिष्टम् ३	अकारादिक्रमेण विशेषनाम्नां सूचिः	४२४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री शङ्खेश्वरपार्श्वनाथाय नमः

श्रीजिनाय नमः

पूज्यपाद-सिद्धि-विनय-भद्र-विलास-ॐकार-भद्रङ्कर-अरविन्दसूरि-सद्गुरुभ्यो-नमः

आचार्यप्रवर श्रीमद् वर्धमान सूरिनिर्मितः

स्वोपज्ञटीकासमन्वित

धर्मरत्नकरण्डकः

टीका- प्रणम्य श्रीजिनं वीरं, वीरितान्तरशात्रवम् । कल्पद्रुममिवानल्प-सङ्कल्पितफलप्रदम् ॥१॥
यथाबोधं विबुद्धीनां, सुखसम्बोधहेतुना[१] । वक्ष्ये वृत्तिं समासेन, धर्मरत्नकरण्डके ॥२॥

तत्र तावदादावेव प्रकरणकारः शिष्टसमयप्रतिपालनाय प्रत्यूहव्यूहव्यपोहकृतेऽभीष्टदेवता-नमस्काररूपभावमङ्गलाभिधानार्थं प्रयोजनादित्रयप्रतिपादनार्थं च श्लोकचतुष्टयमुपन्यस्तवान्, तद्यथा-

मूल- **सर्वनीतिप्रणेतारं, सर्वधर्मप्रदर्शकम् ।**
सर्वविद्यालतामूलं नौमि श्रीनाभिनन्दनम् ॥१॥
सर्वकर्मविनिर्मुक्तं, सर्वलोकैकभास्करम् ।
सर्वामरनरैर्वन्द्यं, वन्दे वीरं जिनेश्वरम् ॥२॥
अन्यानपि नमस्यामि, श्रीमतस्तीर्थनायकान् ।
सिद्धांश्च सर्वसूरींश्च, वाचकांश्च मुनींस्तथा ॥३॥
एवं कृतनमस्कारः, स्वान्योपकृतिवाञ्छया ।
वक्ष्ये प्रकरणं नाम्ना, धर्मरत्नकरण्डकम् ॥४॥

---

१ BPJCD । हेतवे-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्य व्याख्या-इह हि शिष्टाः क्वचिदभीष्टे वस्तुनि प्रवर्तमानाः सन्तोऽभीष्टदेवतानमस्कारपुरस्सरमेव प्रवर्त्तन्ते, यत उक्तं -

अवतरण- **प्रेक्ष्य पूर्वकृतां प्रायः, प्रारम्भेषु चतुष्टयम् ।**
वक्तुं युक्तं विनेयानां, वृत्त्युत्साहनिबन्धनम् ॥१॥
मङ्गलं शास्त्रसम्बन्धः, शरीरं सप्रयोजनम् ।
चतुष्टयमभिप्रेतं, प्रत्यूहापोहि मङ्गलम् ॥२॥ इत्यादि,

अयमप्याचार्यो न हि न शिष्ट इत्यतः शिष्टसमयपरिपालनाय, तथा श्रेयांसि बहुविघ्नानि भवन्तीत्युक्तं च-

श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥१॥ इति,

इदं च प्रकरणं धर्माधर्मादिफलप्रतिपादकत्वेन सम्यग्दर्शनज्ञानादिहेतुत्वात् श्रेयोभूतं वर्तते, अतो विघ्नविनायकोपशान्तये, तथा प्रयोजनादिरहिते प्रेक्षावन्तो न प्रवर्तन्ते, तदुक्तं-

सर्वस्यैव हि शास्त्रस्य, कर्मणो वापि कस्यचित् ।
यावत्प्रयोजनं नोक्तं, तावत्तत्केन गृह्यताम् ॥१॥
तथा-सिध्यर्थं सिद्धसम्बन्धं, श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥२॥

अतः प्रयोजनादिप्रतिपादनार्थं च, तत्र सर्वनीतिप्रणेतारम् इत्यादिश्लोकत्रयेणाभीष्टदेवतानमस्कारमाह, अयमेव चोक्तन्यायेन प्रत्यूहप्रतिहतिहेतुः, एवं कृतनमस्कार इत्यादिना श्लोकेन प्रयोजनादित्रयमुक्तं, तथाहि -स्वान्योपकृतिवाञ्छया इति वदता प्रयोजनमुक्तं, वक्ष्ये प्रकरणं नाम्ना धर्मरत्नकरण्डकम् इत्यनेन पुनरिदं प्रकरणमभिधेयतया निर्दिष्टम्, अभिधानाभिधेयलक्षणश्च सम्बन्ध इति समुदायार्थः- अवयवार्थो व्याख्यालक्षणानुरोधाद्योजनीयस्तच्चेदं

संहिता च पदं चैव, पदार्थः पदविग्रहः ।
चालना प्रत्यवस्थानं, व्याख्या तन्त्रस्य षड्विधा ॥१॥

इह च गमनिकामात्रफलत्वात्प्रस्तुतारम्भस्य प्रायः संहितादिचर्चव्यपोहेन भावार्थकथनमेव क्रियते, शेषव्याख्यालक्षणयोजना तु स्वयमेव सुधिया वर्णनीया। तत्र सर्वनीतिप्रणेतारम् इत्यत्र नौमीति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रिया, ततश्च **नौमि** स्तौमि, कं कर्मतापन्नं ? **श्रीनाभिनन्दनं** नाभेर्नाभिकुलकरस्य नन्दनः पुत्रो नाभिनन्दनः, श्रिया लक्ष्म्योपलक्षितो नाभिनन्दनः श्रीनाभिनन्दनः युगादिदेव इत्यर्थस्तं, किंविशिष्टं? **सर्वनीतिप्रणेतारं**, सर्वाश्च ता नीतयश्च लोकलोकोत्तरव्यवहाराः सर्वनीतयस्तासां प्रणेता स्रष्टा सर्वनीतिप्रणेता तं, पुनरपि किंविशिष्टं? **सर्वधर्मप्रदर्शकं** सर्वे च तेऽस्तिधर्मश्रुतधर्मचास्त्रिधर्मग्रामधर्मादयो धर्माश्च सर्वधर्माः तेषां प्रदर्शकः प्रकाशकः सर्वधर्मप्रदर्शकस्तं, भूयोऽपि किंभूतं? **सर्वविद्यालतामूलं**, सर्वाश्च ता विद्याश्च शब्दविद्याप्रभृतयः प्रज्ञप्त्यादयश्च सर्वविद्यास्ता एव वल्लयः सर्वविद्यालतास्तासां मूलं कारणं सर्वविद्यालतामूलं, तं श्रीनाभिनन्दनं नौमीति श्लोकार्थः ॥१॥

तथा **सर्वकर्मविनिर्मुक्तम्** इत्यत्र श्लोके वन्दे इति क्रिया, कं वन्दे? वीरं, किंविशिष्टं? **जिनेश्वरं** जिनाः केवलमनःपर्याया-ऽवधिज्ञानिनश्चतुर्दशदशनवपूर्वविदश्च तेषामीश्वरो जिनेश्वरस्तं, पुनरपि किंविशिष्टं?**सर्वकर्मविनिर्मुक्तं** सर्वकर्माणि ज्ञानावरणादीनि तेभ्यो विशेषेण बन्धोदयोदीरणापेक्षया नितरां सत्तापेक्षया मुक्तः सर्वकर्मविनिर्मुक्तस्तं, पुनरपि किंविशिष्टं? **सर्वलोकैकभास्करं** सर्वश्चासौ लोकश्च सर्वलोकस्तस्य प्रकाशकारित्वादेकोऽद्वितीयो भास्कर इव भास्करस्तं, भूयोऽपि किंविशिष्टं? **सर्वामरनरैर्वन्द्यं** सकलसुरनराणां स्तुत्यमिति श्लोकार्थः ॥२॥

तथा **अन्यानपि** अपरानप्यजितादीन् महाविदेहजादींश्च **नमस्यामि** नमस्करोमि **श्रीमतो** लक्ष्मीवत**स्तीर्थनायकांस्तीर्थाधिपतीन्**, सिद्धांश्चेत्यादौ चकाराः समुच्चयार्थाः, ततश्च **सिद्धांश्च** सकलकर्मक्षयेण निष्ठितार्थान्, **सूरींश्चाचार्यांश्च वाचकांश्चोपाध्यायांश्च मुनीन्** साधून् **तथा** तेनैव प्रकारेण नमस्यामीति श्लोकार्थः ॥३॥

ततश्च **एवं कृतनमस्कार** एवममुना प्रकारेण पूर्वोक्तेन कृतो विहितो नमस्कारः प्रणामो येन मया स कृतनमस्कारोऽहं **स्वान्योपकृतिवाञ्छया** स्वस्यात्मनोऽन्येषां च परेषामुपकृतिरुपकारस्तस्यां वाञ्छा इच्छा स्वान्योपकृतिवाञ्छा तया स्वान्योपकृतिवाञ्छया, अनेन कर्तुः श्रोतुश्चानन्तरं प्रयोजनमुक्तं, परंपरं तु द्वयोरपि मुक्तिरिति **वक्ष्येऽभिधास्ये प्रकरणं** लघुशास्त्रविशेषं **नाम्ना** नामधेयेन **धर्मरत्नकरण्डकं**, धर्मस्य शुभाध्यवसायरूपस्य सम्बन्धीनि रत्नानीव रत्नानि, पुण्यप्राणिभिरेव प्राप्यत्वादचिन्त्यचिन्तामणिकल्पत्वेन सकलसमीहितार्थप्रदायकत्वाच्च ज्ञान-दर्शन चारित्ररूपाणि, दान-शील-तपो-भावना स्वभावानि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दया-दान-दाक्षिण्य-सौजन्यसदौदार्य-गाम्भीर्य-विनय-नय-प्रशमादिसत्पुरुषगुणगणस्वरूपाणि च धर्मरत्नानि, तेषां करण्डक इव करण्डकस्तं धर्मरत्नकरण्डकं वक्ष्ये, इति श्लोकचतुष्टयार्थः ॥४॥

अथ प्रकरणाधिकारास्तत्सङ्ख्यां च बिभणिषुः श्लोकपञ्चकमाह-

धर्माधर्मौ १ जिने पूजा २, गुरुभक्तिरकृत्रिमा ३ ।
परोपकारः ४ सन्तोषः ५, संसारासारतामतिः ६ ॥५॥
शोकशङ्कोः समुच्छेद ७ श्चेतसो निष्कषायिता ८ ।
सर्वलोकविरुद्धानां, दूरतः परिवर्जनम् ९ ॥६॥
दानं१० शीलं११ तपो१२ भावः१३, शिष्टसङ्गो१४ विनीतता१५ ।
विषयेषु च वैमुख्यं १६, विवेको १७ मृदुभाषिता १८ ॥७॥
सर्वधर्मशिरोरत्नं, दयाधर्मः सदोत्तमः १९ ।
विधिवत्सङ्घपूजा च २०, सर्वत्रामी न सद्गुणाः ॥८॥
धर्माधर्मादिकामेनां, सङ्घपूजावसानिकाम् ।
वक्ष्येऽहमधिकाराणा-मानुपूर्व्येह विंशतिम् ॥९॥

तत्र धर्माधर्मौ प्रतीतौ, तावत्र प्रकरणे भणिष्येते इति क्रिया सर्वत्र योज्या। जिने पूजे त्यादिचतुष्टयं सुगमं, संसारासारतामतिः इति संसारस्यासारता संसारासारता, तस्यां मतिः संसाराऽसारतामतिः, सा चाऽत्र भणिष्यते, शोकशङ्को : शोककीलस्य समुच्छेदः सर्वथा विनाशः चेतस श्चित्तस्य निष्कषायिता कषायकालुष्यरहितत्वं, सर्वलोकविरुद्धानां सर्वलोकस्य सकलशिष्टजनस्य विरुद्धानि विरोधवन्ति कर्माणि सर्वलोकविरुद्धानि, परुषता वा तेषां दूरतो दूरेण परिवर्जनं परित्याग इति, इतः पदनवकं सुगममेव, तथा सर्वधर्मशिरोरत्न मिति सर्वधर्माणां शिरोरत्नमिव चूडामणिरिव दयाधर्मो दयैव धर्मो दयाधर्मः, सदा सर्वकालमुत्तमः प्रधान इति, विधानेन विधिवद् विधिपूर्वकमित्यर्थः, सङ्घपूजा साधु-साध्वी-श्रावक-श्राविकालक्षणचतुर्विधश्रमण[प्रधान]सङ्घसपर्या कर्तव्येति तात्पर्यमिति, सर्वत्र सर्वप्राणिष्वमी एते न नैव सद्गुणाः शोभनगुणा भवन्तीति गम्यते तथा धर्माधर्मावादी यस्याः सा धर्माधर्मादिका, तां धर्माधर्मादिकामेनामिमां, सङ्घपूजा अवसानं पर्यन्तो यस्याः सा सङ्घपूजावसानिका, तां वक्ष्ये भणिष्याम्यह मधिकाराणां प्रस्तावाना मानुपूर्व्या परिपाट्या इहाऽत्र प्रकरणे विंशतिं विंशतिप्रमाणानधिकारानिति भावः इति श्लोकपञ्चकसमासार्थः ॥५-९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्माऽधर्मस्वरूपाधिकारः १

अथ प्रथममधिकारमभिधित्सुर्धर्माधर्मयोरेकार्थिकशब्दान् श्लोकद्वयेनाह–

धर्मः पुण्यं वृषः श्रेयः, सद्वृत्तं सुकृतं शुभम् ।
सदनुष्ठानमित्याद्याः, शब्दास्तुल्यार्थवाचकाः ॥१०॥
अधर्मः किल्बिषं पाप-मवद्यं दुष्कृतं तथा ।
दुरनुष्ठानमित्याद्याः, शब्दास्तुल्यार्थवाचकाः ॥११॥

तत्र दुर्गतिपतज्जन्तुधारणाद्धर्मः, तदुक्तं–

दुर्गतिप्रसृतान् जन्तून्, यस्माद्धारयते ततः ।
धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म इति स्मृतः ॥२॥

स च जीवस्य शुभपरिणामः, कारणे कार्योपचारेण तत्त्वार्थश्रद्धानं चैत्यवन्दनादिक्रियाकलापरूपं बाह्यमनुष्ठानं चोच्यते, यथा-तण्डुलान् वर्षति पर्जन्यः, पर्जन्यो हि जलं वर्षति, तेन च तण्डुला निष्पद्यन्ते, ततो जले कारणभूते तण्डुलाः कार्यभूता उपचर्यन्त इति। एवं धर्मोऽपि शुभाध्यावसायरूपः कारणं, सदनुष्ठानं च क्रियारूपं कार्यं, तत्र शुभाध्यवसाये कारणभूते सदनुष्ठानं कार्यभूतमुपचर्यते, अयमभिप्रायः-

सदनुष्ठानं क्रियारूपं धर्मशब्देन व्यपदिश्यत इति, एवं सर्वत्र कार्यकारणभावो वेदितव्यः। तथा धर्महेतुत्वात्पुण्यमपि धर्मः, पुण्यं च पुण्यप्रकृतयः, ताश्चेमाः–

सायं उच्चागोयं, सत्ततीसं च नाम पगईओ ।
तिन्नि य आऊणि तहा, बायालं पुन्नपगईओ ॥१॥
सत्ततीसं नामस्स, पगईओ पुन्नमायता य इमा ।
मणुयगइ तयणुपुव्वी, देवगइ तयणुपुव्वी य ॥२॥
पंचिंदियजाई तह, देहाणं पंचयं च ते य इमे ।
ओरालियवेउव्विय, आहारय तेय कम्मइगा ॥३॥
अंगोवंगा तिन्नेव, आइमा आइमं च संघयणं ।
समचउरंसं अणहा, वन्न रसा गंध फासा य ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगुरुलहु पराघायं ऊसासं आयवं च उज्जोयं ।
सुपसत्था विहगगई, तसाइदसगं च निम्माणं ।।५।।
तस बायर पज्जत्तं, पत्तेय थिरं सुभं च सुभगं च ।
सूसरआएज्जजसं, तसाइदसगं इमं होइ ।।६।।
तित्थयरेणं सहिया, सत्ततीसं तु नाम पगईओ ।
तिन्नि य आऊणित्ति य, सुरनरतिरियाउभेएण ।।७।।

तथा **वृषः** वृषशब्देन धर्मोऽभिधीयते. श्रेयः श्रेयःकर्म प्रशस्यं सदनुष्ठानमेव। **सद्वृत्तं सुकृतं** च तदेव। शुभस्य पुण्यवद्व्याख्या। **सदनुष्ठानमिति**, सच्च तदनुष्ठानं च शुभव्यापाररूपं सदनुष्ठानम् इत्याद्या एवमाद्याः, आदिशब्दात् सच्चारित्रं सुचरितं चरणं निवृत्तिर्विरतिर्नियमः संयमश्चैवमादयो द्रष्टव्याः, **शब्दा ध्वनयस्तुल्यार्थवाचका** एकार्थवाचका इति । इह च कथञ्चिद्भेदेऽपि तुल्यार्थत्वेन विवक्षितत्वान्न पर्यनुयोगः कर्तव्य इति श्लोकार्थः ।।१०।।

अधर्मो धर्मविपक्षस्तस्य व्याख्यानं पूर्ववद्विपक्षत्वेनैव कर्तव्यम् । **किल्विष-**मित्यधर्महेतुकत्वादतीवनिन्द्यं कर्म अधर्मशब्दाभिधायि भवतीति सर्वत्र योज्यम् पापमिति जीवस्वरूपपांशनान्मलिनकारित्वात् **पापं** पापकर्मप्रकृतयस्ताश्चेमाः–

नाणंतरायदसगं, दंसण नव मोहपयडिछव्वीसं ।
नामस्स य चउतीसं, तिण्हं एक्केकपावाओ ।।१।।
मइसुयओहीमणपज्ज-वाण तह केवलस्स आवरणं ।
नाणावरणं कम्मं, पंचविहं होइ एवं तु ।।२।।
जं दाणलाभभोगो-वभोगविरयाण विग्घसंजणणं ।
ते णंतरायकम्मं, पंचविहं वन्नियं समए ।।३।।
चक्खु अचक्खू ओही वरकेवलदंसणाण आवरणं ।
चउरो पंच य निद्दा, दंसण उवओग विग्घत्था ।।४।।
निद्दा निद्दानिद्दा, पयला अन्ना उ पयलपयलत्ति ।
थीणद्धी य तहेवं, दंसणवरणं भवे नवहा ।।५।।
मिच्छत्तमोहणीयं, सोलसभेयं कसायमोहणियं ।
कोहाईण चउण्हं-ऽणंताइचउव्विहत्तणओ ।।६।।
इत्थीपुरिसनपुंसग-वेया हासो य रइ य अरई य ।
सोगो भयं दुगंच्छत्ति, नवविहं इयरमोहणियं ।।७।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मोहच्छवीस एसा, एसा पुण होइ नामचउतीसा ।
नरयगई तिरियगई, एसिं चियं आणुपुव्वीओ ॥८॥
एगिंदियाइ चउरो, जाई बीयाइ कम्मसंघयणा ।
एवं संठाणावि य, वन्नाइचउक्कमपसत्थं ॥९॥
उवघायं कुविहगगई, थावरसुहुमं तहा अपज्जत्तं ।
साहारणाऽथिराऽसुभ-मसुभगदूसर अणाइज्जं ॥१०॥
अजसकित्ती य तहा, तिण्हं एक्केक्कियत्ति अपसत्था ।
गोयाउवेयणिज्जा-णुपावमेक्केक्किया पगई ॥११॥
नीयं गोत्तं निरया-उयं च असायवेयणिज्जं च ।
एया सव्वा मिलिया बासीई पावपगईओ ॥१२॥

तथा अवद्यं पापमेव हिंसादि अधर्महेतुकत्वेन, तदप्यधर्मः दुष्कृतंदुष्टं कृतं दुष्कृतं दुरध्यवसायनिमित्तकत्वादेतदप्यधर्मः दुरनुष्ठानंदुष्टं हिंसादिमहारम्भादिरूपमनुष्ठानमशुभ-परिणामप्रवृत्तिकत्वादिदमप्यधर्म एव । इत्याद्या एवंप्रभृतयः,आदिशब्दाद्दुश्चरितदुश्चेष्टितादिग्रहः, शब्दा ध्वनयस्तुल्यार्था एकार्था भवन्तीति श्लोकद्वयसमासार्थः ॥११॥

अथ धर्माधर्मयोर्बाह्यान्तरहेतूनुपदर्शयन् श्लोकषट्कमाह–

मानुष्यं शोभनो देशः, शुभा जातिः शुभं कुलम् ।
सुरूपं दीर्घमायुष्य-मारोग्यं बुद्धिपाटवम् ॥१२॥
कल्याणमित्रसंसर्गः, पापमित्रविवर्जनम् ।
शुश्रूषा सुश्रुतिश्चैव, सुकलत्रादिपरिच्छदः ॥१३॥
अन्तरङ्गद्विषां मान्द्य-मौदार्यं पापभीरुता ।
सुनीतौ प्रीतिरित्याद्या, बहवो धर्महेतवः ॥१४॥
कुदेशः कुत्सितो वासः, कुजातिः कुत्सिता गतिः ।
कुशास्त्राणि कुमित्राणि, कुकलत्रादिपरिच्छदः ॥१५॥
कुश्रुतिः कुमतिश्चैव, कुविद्या कुत्सितो गुरुः ।
अत्यन्तमुत्कटो रागो, द्वेषो मोहश्च कुग्रहः ॥१६॥
महारम्भो महादम्भो, महालोभो महामदः ।
कुनीतौ प्रीतिरित्याद्या, बहवः पापहेतवः ॥१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानुष्यं मानुषत्वं धर्मस्य बाह्यो हेतुर्भवतीति सर्वत्र क्रियायोगः कर्तव्यः। इदं चातीव दुर्लभत्वेन सम्पूर्णधर्मकर्मकारणत्वेन च धर्मप्राप्तौ बाह्यहेतुत्वेन प्रथममुपन्यस्तमिति, दुर्लभत्वं चास्य चुल्लकादिदृष्टान्तैर्भावनीयं, ते चामी-

चुल्लग१ पासग२ धन्ने३, जूए४ रयणे य५ सुमिणद६ चक्के य७ ।
चम्म८ जुगे९ परमाणू१० दस दिट्ठंता मणुयलंभे ॥१॥

एतत्कथानकानि पुनरतिक्षुण्णत्वान्न लिख्यन्तेऽस्माभिः, **आवश्यकादिभ्य** एवावसेयानि। तथा **शोभनो देश** इति, शोभनः प्रधानो देशो जनपद आर्यदेश इत्यर्थः, सोऽपि धर्मस्य बाह्यो हेतुरिति, स च शोभनो देशः सार्धपञ्चविंशतिजनपदात्मको यत उक्तम्–

रायगिह मगह १ चंपा, अंगा २ तह तामलित्ति वंगा य ३ ।
कंचणपुरं कलिंगा ४, वाणारसी चेव कासी य ५ ॥१॥
साकेय कोसला ६ गयउरं च कुरु ७ सोरियं कुसट्टा य ८ ।
कंपिल्लं पंचाला ९, अहिछत्ता जंगला चेव १० ॥२॥
बारवई य सुरट्ठा ११, मिहिल विदेहा य १२ वच्छ कोसंबी १३ ।
नंदिपुरं संडिल्ला १४, भद्दिलपुरमेव मलया य १५ ॥३॥
वइराड वच्छ १६ वरणा-वच्छा १७ तह मत्तियावइ दसन्ना १८ ।
सुत्तिमईया चेई १९, वीअभयं सिंधुसोवीरा २० ॥४॥
महुरा य सूरसेणा २१, पावा भंगीय २२ मासपरिवट्टा २३ ।
सावत्थी य कुणाला २४, कोडीवरिसं च लाटा य २५ ॥५॥
सेयवियावि य नयरी, केयइअद्धं च आरियं भणियं ।
जत्थुप्पत्ति जिणाणं, चक्कीणं रामकण्हाणं ॥६॥

[प्रज्ञापना सूत्र पद १ सूत्र १०२, गा.११२-११७]

तथा **शुभा जातिः शुभं कुलमिति**, तत्र मातृसमुत्था जातिः, सापि शुभा धर्मस्य बाह्यो हेतुः, पितृसमुत्थं कुलं, तदपि शुभं तथैव । अथवा ब्राह्मणक्षत्रियवैश्यशूद्रस्वरूपा जातिः, उग्रभोगज्ञातईक्ष्वाकुकौरव्यहरिवंशादिकं कुलमिति । तथा **सुरुप** मिति शोभनं रूपं सुरूपमविकलपञ्चेद्रियत्वमिदमपि धर्मस्य हेतुः, यस्मादनुपहतपूर्णपञ्चेन्द्रियत्व एव जीवः सम्पूर्णधर्मयोग्यो भवति, न त्वितर इति । तथा **दीर्घमायुष्क** मिति, दीर्घं वर्षशतादिजीवनत्वेन प्रलम्बमायुष्कं जीवितम्, एतदपि धर्मस्य बाह्यं कारणम्, यस्मादल्पायुर्जीवो मानुष्यादिसाम्रगीं प्राप्यापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न धर्मं साधयितुमलमिति । तथा **आरोग्यमिति** अरोगस्य भाव आरोग्यमिदमपि धर्मस्य बाह्यं निमित्तं, यतो दीर्घायुरपि जन्तुः सरुक् धर्मं कर्तुं न समर्थ इति । तथा बुद्धिपाटव मिति बुद्धेः प्रज्ञायाः पाटवं दक्षत्वं बुद्धिपाटवं तीक्ष्णधिषणत्वमित्यर्थः, एतच्च धर्मस्यान्तरङ्गमङ्गं यतो दीर्घायुरपि नीरोगोऽपि सदबुद्धिविकलः प्राणी न धर्मकर्माणि सम्यक्कर्तु पारयति ॥१२॥ तथा कल्याणमित्रसंसर्गः कल्याणं सुखं, तत्कारीणि मित्राणि, तैः सह संसर्गः सम्बन्धः कल्याणमित्रसंसर्गः सदुपदेशदायिजनसम्पर्क इत्यर्थः । कल्याणमित्रसंसर्गो हि धर्मस्य बाह्यं प्रधानं कारणमिति । तथा **पापमित्रविवर्जन** मिति, पापकारीणि मित्राणि पापमित्राणि, तेषां विवर्जनं परिहरणं पापमित्रविवर्जनं, पापमित्रसङ्गतो हि पापेष्वेव रमते, न धर्मकर्मसु तत्सङ्गपरिहारी तु विबन्धकाभावात् सुखेनैव धर्मं प्रतिपद्यते, अतः पापमित्रविवर्जनमपि बाह्यं धर्मनिबन्धनमिति, तथा **शुश्रूषा** श्रोतुमिच्छा शुश्रूषा सदागमस्येति गम्यते । **सुश्रुतिश्चैवेति**, चैवेति समुच्चये, शोभना श्रुतिः सुश्रुतिः सम्यगागमश्रवणं, **सुकलत्रादिपरिच्छद** इति, शोभनानि कलत्राणि सुकलत्राणि, तान्यादिर्यस्य सुपुत्रसुमित्रसुभ्रातृसुस्वजनादिकस्य सुकलत्रादिः, स चादौ(सौ) परिच्छदश्च परिवारश्च सुकलत्रादिपरिच्छदः, अयमपि धर्मस्य बाह्यो हेतुः यतः शोभनेषु कलत्रपुत्रादिष्वाज्ञाविधेयतया सुखं धर्मः प्रतिपत्तुं कर्तुं च शक्यत इति ॥१३॥

तथा **अन्तरङ्गद्विषां मान्द्य** मिति, अन्तरङ्गद्विषो रागादयो ज्ञानावरणादिकर्माणि च, तेषां मान्द्यं मन्दता प्रतनुत्वमित्यर्थः तथा **औदार्यम्** उदारस्य भाव औदार्यं दानरसिकत्वमित्यर्थः, **पापभीरुता** पापेभ्यः पापकर्मभ्यो भीरुता सभयत्वं पापभीरुता **सुनीतौ प्रीति** रिति शोभना चासौ नीतिश्च सुनीतिः सुन्यायस्तस्यां सुनीतौ प्रीतिः प्रमोदः, **इत्याद्या** एवमादयः, आदिशब्दाद्दाक्षिण्यसौजन्यपरोपकर्तृत्वौचित्यकरणत्वादिपरिग्रहः **बहवः** प्रभूता धर्महेतवो धर्मकारणानि, इह च बुद्धिपाटवं शुश्रूषा सुश्रुती रागादिमान्द्यम्, औदार्यं पापभीरुता सुनीतिप्रीतिरित्येते सप्तान्तरङ्गा धर्महेतवः, मानुषं सुदेशः सुजातिः सुकुलं सुरूपं दीर्घायुष्कमारोग्यं कल्याणमित्रसंसर्गः, पापमित्रविवर्जनं, सुकलत्रादिपरिच्छदश्चेत्येते दश बाह्या धर्महेतव इति श्लोकत्रयार्थः ॥१४॥

अथाधर्महेतूनाह-तत्र **कुदेश** इत्यनार्यदेशः, तत्राधर्म एव प्रवर्तते, न धर्मस्य नामापि ज्ञायते, अतः कुदेशः सर्वेषामपि प्राणिनामधर्महेतुरेव, एवं सर्वत्राधर्महेतुत्वं भावनीयमिति **कुत्सितोवास** इति, यत्र बहवो मद्यमांसाशिनः पापिष्ठलोका वसन्ति स कुत्सितो वासः, आर्यदेशेऽपि तथाविधग्रामादौ वसतां प्रायो न धर्मप्राप्तिरिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुजाति श्वाण्डालकोलिकादिका, तत्रापि समुत्पन्नो जन्तुः प्रायः पापेष्वेव रमते। **कुत्सिता गतिरिति** नरक[त्व]तिर्यक्त्व [कु]मानुषत्वकुदेवत्वलक्षणा कुत्सिता गतिः, तत्रापि प्रायः प्राणिनः पापप्रिया एव भवन्ति **कुशास्त्राणीति** कुत्सितानि शास्त्राणि, येषु धर्मव्याजेनापि प्राणिनां वधो वर्ण्यते यथा **वेदेषु** तथा यानि **वात्स्यायन**वशीकरणधातुवादादिशास्त्राणि, तान्यपि प्रायः श्रूयमाणानि पापमेव पुष्णन्ति। **कुमित्राणीति** पापमित्राणि, तान्यपि पापेष्वेव प्रेरयन्तीति। **कुकलत्रादिपरिच्छद** इति, कुत्सितः पापप्रियः कलत्रादिपरिवारः तेन धार्मिकोऽपि बलादपि पापकर्मसु प्रेर्यत इति ॥१५॥

कुश्रुति रिति कुत्सितागमश्रवणं, तदपि प्राणिवधादौ प्रेरयतीति। **कुमतिरिति** कुत्सिता मतिः, कुमतिरनर्थपरम्पराप्रवर्तिका, तयाप्यधर्म एव प्राणी प्रवर्त्यत इति। **कुविद्येति** कुत्सिता विद्या खड्गधनुर्वेदविद्यादिका, सापि पापप्रवर्तिकैव। **कुत्सितो गुरु** रिति कुधर्माचार्यः, सोऽपि [धर्म] व्याजेनाधर्ममेव कारयतीति, **अत्यन्तमुत्कटो राग** इति सचेतनाचेतनवस्तुषु नितरामभिष्वङ्गः, स च पापहेतुत्वेन प्रसिद्ध एव। एवं द्वेषो मोहः कुग्रहश्च, नवरं **द्वेषो** ऽनिष्टवस्तुषु रोषप्रसरः, **मोहः** पुनरज्ञानं ममत्वं वा, **कुग्रहो** यत्र कुत्रापि शोभनेऽशोभने वा वस्तुनि लग्नस्तत्र बद्धाग्रहत्वमिति ॥१६॥

महारम्भ इति महान् कृष्याद्यारम्भः, अयमपि पापहेतुत्वेन प्रसिद्ध एव। **महादम्भो** नानाकूटकपटैरत्यन्तमपरेषां वञ्चनं पापहेतुत्वमस्य प्रकटमेव। **महालोभो महामदश्च** प्रतीतौ, **कुनीतौ प्रीतिरित्यन्यायप्रियत्वमित्यर्थः**। **इत्याद्या** एवं प्रभृतयः, आदिशब्दान्महा-परिग्रहादिग्रहः, **बहवो भूयांसः पापहेतवः** पापकारणानीति। इह च कुदेशादयो बाह्या अधर्महेतवः, रागादयः पुनरन्तरङ्गा इति स्वधिया भावनीयमिति श्लोकषट्कार्थः ॥१७॥

अथ धर्माधर्मयोः स्वरूपमुपदर्शयन् श्लोकद्वयमाह–

यत्राहिंसावचः सत्य-मस्तेयं ब्रह्मसेवनम्।
सन्तोषश्च स विज्ञेयो, धर्मः सर्वज्ञभाषितः ॥१८॥
यत्र हिंसा मृषा भाषा, चौर्यं मैथुनसेवनम्।
महालोभश्च सोऽधर्मो, विज्ञेयो जिनदेशितः ॥१९॥

यत्रेति धर्मेऽहिंसा दया सर्वसत्त्वेषु वर्ण्यते क्रियते च स धर्मो विज्ञेय इति क्रिया सर्वत्र योज्या।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वचो वचनं **सत्यं** तथ्यं **वर्ण्यते** भाष्यते च स धर्म इति । यत्र वा **चौर्यं** चोरस्य भावश्चौर्यं स्तैन्यं तद्विपरीतमचौर्यं वर्ण्यते चर्यते च स धर्म इति । ब्रह्मसेवनमिति, **ब्रह्म** ब्रह्मचर्यं, तस्य **सेवनं** पालनं ब्रह्मचर्यसेवनं, तद्यत्र वर्ण्यते चर्यते च पाल्यते च स धर्म इति । **सन्तोषः** सन्तुष्टता सचित्ताचित्तवस्तुषु मूर्च्छापरिहार इत्यर्थः । स च यत्र वर्ण्यते सेव्यते स **विज्ञेयो** ज्ञातव्यो **धर्मः** श्रुतचारित्रात्मकः **सर्वज्ञभाषितः** सर्ववेदिभिः प्ररूपित इति ॥१८॥

उक्तं धर्मस्वरूपमथाधर्मस्वरूपमाह **यत्र** यस्मिन्नधर्मे **हिंसा** प्राणिप्रहाणरूपा वर्ण्यते क्रियते च सोऽधर्म इति सर्वत्र योज्यम् । **मृषा** वितथा **भाषा** वाणी यत्र वर्ण्यते भाष्यते च, **चौर्यं** स्तैन्यं यत्र प्ररूप्यते विधीयते यत्र **मैथुनसेवनम्** अब्रह्मनिषेवणं स्त्रीसेवनमित्यर्थ प्रदर्श्यते सेव्यते च, यत्र **महालोभश्च** सचित्ताचित्तवस्तुषु महाभिलाषश्च मूर्च्छातिरेकश्च निरूप्यते क्रियते च सोऽयमधर्मः पापं **विज्ञेयो** वेदितव्यो **जिनदेशितो** जिनप्ररूपित इति श्लोकद्वयार्थः ॥१९॥

अथ धर्माधर्मयोः फलमुपदर्शयन् श्लोकचतुष्टयमाह–

सत्कुले जातिरारोग्यं, सौभाग्यं रूपसम्पदः ।
आयुर्दीर्घं वरा लक्ष्मीः कीर्तिर्विद्या वरस्त्रियः ॥२०॥
यदन्यदपि सद्वस्तु, सुन्दरं हृदयेप्सितम् ।
जीवानां जायते लोके, सर्वं धर्मस्य तत्फलम् ॥२१॥
हीना जातिः सरोगत्वं, दरिद्रत्वं पराभवः ।
अल्पमायुः कुरूपत्वं, दौर्भाग्यं दीनवृत्तिता ॥२२॥
यदन्यदपि वस्त्वत्र, प्राणभाजां न सुन्दरम् ।
दुःखाय जायते लोके, तत्सर्वं पापजृम्भितम् ॥२३॥

सत्कुले शोभनवंशे उग्रभोगादौ **जातिरुत्पत्तिर्यद्भवति** तद्धर्मफलमिति सर्वत्र सम्बन्धः कार्यः । **आरोग्यं** नीरोगता **सौभाग्यं** सर्वजनवल्लभत्वं, **रूपसम्पदः** शरीरसौन्दर्यश्रियः, **आयुः** जीर्वितं **दीर्घं** प्रलम्बं, **वरा** प्रधाना **लक्ष्मी** राज्यादिसम्पत् **कीर्तिः** ख्यातिः **विद्या** शब्दविद्यादिका पाण्डित्यमित्यर्थः, **वरस्त्रियः** प्रधानयोषितः **यदन्यदपि** यदपरमपि, **सत्** शोभनं **वस्तु** पदार्थः **सुन्दरं** रमणीयं **हृदयेप्सितं** हृदयवाञ्छितं **जीवानां** प्राणिनां **जायते** सम्पद्यते **लोके** जगति **सर्वं** समस्तं **धर्मस्याऽहिंसादिरूपसदनुष्ठानस्य फलं** सत्कुलजात्यादिप्राप्तिरूपं सर्वमेतद्धर्ममाहात्म्यमित्यर्थः ॥२०-२१॥ अथाऽधर्मफलमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हीनेत्यादि, **हीना** हीनम्लेच्छादिलोकसम्बन्धिनी **जातिरुत्पत्तिर्वंशरूपा** **सरोगत्वं** सव्याधित्वं, **दरिद्रत्वं** दुर्गतत्वं, **पराभवः** परैरपमाननम्, **अल्पं** स्तोकमायु जीवितं, **कुरूपत्वं** हीनरूपत्वं, **दौर्भाग्यं** लोकावल्लभत्वं, **दीनवृत्तिता** दीनानुकम्पार्हा वृत्तिर्वर्तनं यस्य स दीनवृत्तिस्तस्य भावो दीनवृत्तिता, जघन्यवृत्त्या परप्रेष्यत्वसेवकत्वरूपया निर्वाह इत्यर्थः। **यदन्यदपि** यदपरमपि **वस्तु** कलत्रादिकः पदार्थोऽत्राऽस्मिन् लोके **प्राणभाजां** प्राणिनां **न सुन्दरमशोभनं दुःखाय** चित्तसन्तापाय **जायते** सम्पद्यते **लोके** भुवने **तत्सर्वं** तत्समस्तं **पापजृम्भितं** पापविलसितं, तदेतत्सर्वमशुभं पापानुष्ठानविपाकेन प्राप्यते प्राणिभिरित्यर्थः इति श्लोकचतुष्टयार्थः ॥२२-२३॥

अथ धर्मिकाधार्मिकयोः स्वरूपं पूज्यतां निन्द्यतां च प्रदर्शयन् श्लोकद्वयमाह–

निवृत्ताः सर्वपापेभ्यः प्रवृत्ता धर्मकर्मसु ।
इहैव धार्मिका लोकाः पूज्यन्ते मनुजामरैः ॥२४॥
इहैव पापकर्माणि, कुर्वन्तः पापिनो जनाः ।
निन्द्यन्ते सर्वलोकेन, प्राप्यन्ते च कदर्थनाः ॥२५॥

निवृत्ता व्यावृत्ता **सर्वपापेभ्यः**, सर्वाणि च तानि पापानि च प्राणिवधादीनि तेभ्यः सर्वपापेभ्यः, **प्रवृत्ताः** प्रवृत्तिं कृतवन्तो **धर्मकर्मसु** धर्मक्रियासु; **इहैवा,त्रैव** लोके, **धार्मिका** धर्मवन्तो **लोका** जनाः **पूज्यन्तेऽर्च्यन्ते मनुजामरैर्नरत्रिदशैरिति। इहैव पापकर्माणि** अत्रैव प्राणिवधमहारम्भादिपापक्रियां **कुर्वन्तो** निर्वर्तयन्तः **पापिनः** पापिष्ठाः **जना** लोका **निन्द्यन्ते** हील्यन्ते **सर्वलोकेन** सकलजनेन, प्राप्यन्ते लभ्यन्ते कदर्थना विडम्बना इति श्लोकद्वयार्थः ॥२४-२५॥

अथ धर्माधर्मप्रशंसाऽप्रशंसार्थं श्लोकद्वादशकमाह–

तस्मादधर्ममुत्सुज्य, धर्मे चित्तं निवेश्यताम् ।
स्वर्गापवर्गसंसर्ग-हेतुर्धर्मो यतोऽङ्गिनाम् ॥२६॥
सेतुर्भवार्णवे धर्मो, दुर्गतिद्वाररोधकः ।
कृशानुः कर्मकान्तारे, निःश्रेणि शिवमन्दिरे ॥२७॥
सर्वापायविनिर्मुक्तः, सर्वशिष्टनिषेवितः ।
माभीः प्रदायको लोके, धर्म एव न चापरः ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जननी जनको भ्राता, पुत्रः पुत्री सुहृद्धनम् ।
एतानि कृत्रिमाण्येव, धर्मः पुनरकृत्रिमः ॥२९॥
तिष्ठन्त्यर्था गृहेष्वेव, श्मशानेषु च बान्धवाः ।
दत्त्वा जलाञ्जलिं भूयो, मोदन्ते गृहमागताः ॥३०॥
परलोकप्रयाणस्थं, विमुक्तं मित्रबान्धवैः ।
धर्माधर्माविमं जीवं, गच्छन्तमनुगच्छतः ॥३१॥
यत्र यत्र प्रयात्येष, जीवो धर्मसहायकः ।
तत्र तत्रास्य सौख्यानि, जायन्ते चोत्तराः श्रियः ॥३२॥
यत्र यत्र प्रयात्येष, जीवः पापसमन्वितः ।
तत्र तत्रास्य दुःखानि, दारिद्र्यं च प्रजायते ॥३३॥
दुःखद्विषो जनाः सर्वे, सर्वेऽपि सुखलिप्सवः ।
सुखं च धर्मतः सर्वं, दुःखं पुनरधर्मतः ॥३४॥
जानन्तोऽप्येवमत्यर्थं, महामोहवशंगताः ।
सक्ताः सांसारिके सौख्ये, धर्म्यं कर्म न कुर्वते ॥३५॥
सुखे वैषयिके लुब्धाः, प्रार्थयन्तस्तदेव हि ।
दुःसहान्यपि दुःखानि, गणयन्ति न देहिनः ॥३६॥
हस्त्यादिभ्यो महाभीतिं, विगणय्य विमूढधीः ।
मधुबिन्दुरसासक्तो, यथा कूपगतो नरः ॥३७॥

तस्मात्कारणाद् **अधर्मं** पापानुष्ठानमुत्सृज्य परित्यज्य **धर्मे** सदनुष्ठानरूपे **चित्तं** मनो **निवेश्यतां** निधीयतां **स्वर्गापवर्गसंसर्गहेतुः** देवलोकसिद्धिसम्पर्ककारणं **धर्मो** दयाप्रधानमनुष्ठानं **यतो** यस्मात्कारणाद् **अङ्गिनां** शरीरिणामिति ॥२६॥

सेतुर्मार्गो भवार्णवे संसारसमुद्रे, **दुर्गतिद्वाररोधको** नरकादिदुःखपिधायकः **कृशानु** ज्वलनः **कर्मकान्तारे** कर्मवनगहने, **निःश्रेणिः** अधिरोहिणी **शिवमन्दिरे** परमपदप्रासाद इति ॥२७॥

सर्वापायविनिर्मुक्तः सर्वदोषविवर्जितः **सर्वशिष्टनिषेवितः** सर्वसाधुजनाचरितः **माभीः प्रदायको** मा भयं कार्षुरित्येवमाश्वासकवचनदायकः, **लोके** जगति **धर्म एव** शुभानुष्ठानमेव, **न चापरो** नान्य इत्यर्थः ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जननी माता, **जनकः** पिता, **भ्राता** सहोदरः, **पुत्रः** सुतः, **पुत्री** दुहिता, **सुहृन्मित्रं**, **धनं द्रव्यं एतान्यमूनि कृत्रिमाण्येवासहजान्येव धर्मः पुनः** शुभानुष्ठानं **पुनः अकृत्रिमः** सहज एवैकरूप इत्यर्थः ॥२९॥

तिष्ठन्ति आसते **अर्था** द्रव्याणि **गृहेष्वेव** मन्दिरेष्वेव, **श्मशाने** पितृवने **यान्ति** गच्छन्ति **बान्धवाः** स्वजनाः **दत्त्वा** वितीर्य **जलाञ्जलिं** पानीयाञ्जलिं **भूयोऽपि** पुनरपि अपेर्गम्यमानत्वा **न्मोदन्ते** क्रीडन्ते **गृहं** मन्दिरमागता आयाता इति ॥३०॥

परलोकप्रयाणस्थं परभवे प्रस्थितं **विमुक्तं** परित्यक्तं **मित्रबान्धवैः** सुहृज्जनैः **धर्माधर्माविमंजीवं** सुकृतदुष्कृते एनं जन्तुं **गच्छन्तं** व्रजन्तमनुगच्छतोऽनुव्रजत इति ॥३१॥

यत्र यत्र यस्मिन् यस्मिन् स्थाने **प्रयाति** प्रगच्छति **एषोऽयं जीवो** जन्तुर्**धर्मसहायको** धर्मद्वितीयस्तत्रतत्रास्यैतस्य **सौख्यानि** सुकर्माणि **जायन्ते** सम्पद्यन्ते, चस्य भिन्नक्रमत्वाद् **उत्तराः** प्रधानाः **श्रियः** सम्पदश्च ॥३२॥

यत्र यत्र प्रयात्येष जीव इति पूर्ववत् **पापसमन्वितः** पापयुक्तस्तत्र **तत्रास्य दुःखानि दारिद्र्यं च प्रजायते**, दुःखानि शारीरमानसिकसन्तापाः **दारिद्र्यं** निर्धनत्वं च भवतीत्यर्थः ॥३३॥

दुःखद्विषो दुःखद्वेषिणो **जना** लोकाः **सर्वे** समस्ताः, **सर्वे च सुखलिप्सवः** सुखाभिलाषिणः, **सुखं च** शर्म च **धर्मतो** धर्मादेव, **दुःखं पुनरधर्मतो** दुरनुष्ठानादेव।३४।

जानन्तोऽपि विदन्तोऽप्येवममुना प्रकारेणात्यर्थमतिशयेन **महामोहवशंगता** बृहदज्ञानवश्यतां प्राप्ताः **सक्ताआसक्ताः सांसारिके** भवसम्बन्धिनि **सुखे** शर्मणि **धर्म्यं** धर्मार्हं **कर्मानुष्ठानं न कुर्वते** न विदधतीति ॥३५॥

सुखे शर्मणि **वैषयिके** शब्दरसरूपगन्धस्पर्शरूपविषयजे **लुब्धा** गृद्धाः **प्रार्थयन्तो** वाञ्छन्तस्तदेव विषयसुखमेव, **हिः** पूरणे, **दुःसहान्यपि दुःखानि** कृच्छ्राणि **गणयन्ति** सङ्ख्यानयन्ति **न** नैव **देहिनो** जीवा इति ॥३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्त्यादिभ्यो गजादिभ्यः, आदिशब्दादजगरसर्प्पमूषकमक्षिकादिपरिग्रहः, **महाभीतिं** महती चासौ भीतिश्च महाभीतिस्तां महाभयमित्यर्थः, **विगणय्यापकर्ण्य विमूढधीर्विशेषेण** मूढा मोहं गता धीर्बुद्धिर्यस्य स विमूढधीः**मधुबिन्दुरसासक्तो** मधुनः क्षौद्रस्य बिन्दवो लवा मधुबिन्दवस्तेषां रसस्तत्रासक्तो गृद्धो मधुबिन्दुरसासक्तो **यथा** येन प्रकारेण **कूपगतोऽवटमध्यप्रविष्टो नरो** मानव इति श्लोकद्वादशकार्थः ॥३७॥

अवटगत**मधुबिन्दुरसासक्तमनुजकथानकमिदम्-**

बभूव **भारते** क्षेत्रे, देशे च **मगधाभिधे**। **क्षितिप्रतिष्ठितं** नाम, पुरं शक्रपुरोपमम् ॥१॥
भान्ति यत्र सपद्मानि, सरांसि च गृहाणि च। कामिन्यः काव्यबन्धाश्च, सालङ्काराश्चकासति ॥२॥
शूरः सत्यप्रतिज्ञश्च, तत्रासीद् दुर्गशासनः। चन्द्र इव प्रजानन्दो, **द्रोणमेघो** नराधिपः ॥३॥
सहजातः क्रीडितो धूल्या, सहैव च विवर्धितः। निर्भाग्यशेखरस्तस्य, **डुङ्गरोऽजनि सेवकः** ॥४॥
ददाति शतशो राजा, बालमित्रधिया धनम्। तच्च तस्य क्वचिद्याति, दारिद्र्यमवतिष्ठते ॥५॥
ततोऽसौ निष्फलारम्भो, दीनो दारिद्र्यभाजनम्। कष्टां दशां समापन्नः, कष्टं नयति वासरान् ॥६॥
अन्येद्युः साधिताशेष-प्राभातिकप्रयोजने। सभासिंहासनासीने, द्रोणमेघनराधिपे ॥७॥
वर्णगन्धरसस्पर्शै-र्हृद्यं जनमनोहरम्। बीजपूरफलं राज्ञे, मालाकारेण ढौकितम् ॥८॥
प्रयोजनवशायाता, राजमाता **वसुन्धरा**। सन्मानिता नरेन्द्रेण, भद्रासनमुपाश्रिता ॥९॥
यावदास्ते क्षणं तावद्, डुङ्गरोऽपि समागतः। प्रणम्य भूभुजः पादा-न्निविष्टो दर्शितासने ॥१०॥
वसुन्धरा बभाणेदं, राजानं जातविस्मया। किमेष दुःखितो वत्स! डुङ्गरस्तव सेवकः ? ॥११॥
त्वं हि विश्वम्भरो राजा, डुङ्गरश्च त्वदाश्रितः। रत्नाकरः सखा यस्य, स कथं दुर्गतायते ? ॥१२॥
एतन्निशम्य सञ्जात-गुरुखेदो नराधिपः। जगादेदं जगत्पूज्यो, मातृप्रत्यायनाकृते ॥१३॥
दत्तमस्मै मया मात-र्धनं जीवनहेतवे। न तिष्ठति परं याति, छिद्रहस्ते यथा जलम् ॥१४॥
एवमुक्त्वा समाहूतः, शिल्पिकश्छेदकोविदः। तथा च पाटितं तेन, मातुलिङ्गं प्रवेशितम् ॥१५॥
नृपाङ्गुलीयकं तत्र, लक्षमूल्यं मनोहरम्। सीवितं च तथा तेन, दुर्लक्षं जायते यथा ॥१६॥
भणिता वसुन्धरा राज्ञा, स्वहस्तेन समर्पय। फलमस्मै महामूल्यं, मुद्रालङ्कारसम्भृतम् ॥१७॥
तयापि ढौकितं तस्मै, चलितः सोऽपि निजे गृहे। गच्छता चिन्तितं तेन, किमनेन करोम्यहम् ? ॥१८॥
यस्य मे भोजनं नास्ति, फलं तस्य करोति किं ?। ततश्च गच्छता तेन, वणिक्पुत्रो **धनञ्जयः** ॥१९॥
धनवानग्रतो दृष्टः, फलमस्मै समर्पितम्। तेनापि रूपको दत्त-स्तमादाय गृहं गतः ॥२०॥
न ददात्यधिकं दातुं, विधिरस्य विबन्धकः। इतश्चास्ति सशृङ्गारा, मान्या मन्मथमन्दिरम् ॥२१॥
मगधासुन्दरी नाम, राजपिण्डविलासिनी। धनञ्जयेन तत्तस्यै, दत्तं कामसुखार्थिना ॥२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयापि सुन्दरं ज्ञात्वा, रक्षितं न तु भक्षितम्। प्रभाते च तमादाय, सा गता नृपमन्दिरम् ॥२३॥
प्रणम्य भूपतेः पादौ, तया तत्फलमर्पितम्। प्रत्यायनाकृते राज्ञा, समाहूता वसुन्धरा ॥२४॥
ततः सुखासनस्थाया, दत्तमस्याः करे फलम्। ततो विलासिनी पृष्टा, कुतो लब्धमिदं त्वया ? ॥२५॥
तया वणिक्सुतः शिष्टो, वणिजाऽपि च डुङ्गरः। एतच्छ्रुत्वा च दृष्ट्वा च, विस्मयस्मेरलोचना ॥२६॥
प्रोवाचेदं सभामध्ये, राजमाता वसुन्धरा। अहो सत्यापितोऽनेन, जनवादोऽयमीदृशः ॥२७॥
अथवास्याऽपि नो दोषो, यस्य कर्म पराङ्मुखम्। द्रोणमेघजलं जातु, डुङ्गरे नावतिष्ठते ॥२८॥
अप्राप्तं जायते नैव, नाकृतं कर्म भुज्यते। [सं] प्राप्तं च कृतं चैव, कर्म जीवफलप्रदम् ॥२९॥

भणितं च-**जो जेत्तियस्स अत्थस्स, भायणं लहइ तेत्तियं सो उ।**
वुट्ठेवि दोणमेहे, न डुंगरे पाणियं ठाइ ॥३०॥
न हि भवति यन्न भाव्यम्, भवति च भाव्यं विनापि यत्नेन।
करतलगतमपि नश्यति, यस्य तु भवितव्यता नास्ति ॥३१॥

यद्यावद्यादृशं येन, कृतं कर्म शुभाशुभम्। तत्तावत्तादृशं तस्य, फलमप्यवतिष्ठते ॥३२॥
एवमुक्त्वा गता राज्ञी, विसर्जितसभो नृपः। राजकार्यपरो जातो, डुङ्गरोऽपि गतो गृहम् ॥३३॥
विषादविधुरो दीनः, खेदखेदितविग्रहः। नष्टचेता निरानन्द-श्चिन्तयामास मानसे ॥३४॥
वरं मृतो वरं दग्धो, वरं देशान्तरे गतः। यो जीवति परावज्ञा-दुःखदग्धोऽपि मानवः ॥३५॥
मरणं वा विदेशो वा, द्वयमेव मे सङ्गतम्। एवं विचिन्त्य सुप्तोऽसौ, क्षपा क्षयमुपागता ॥३६॥
रत्नसागरसम्बन्धी, भेरीभाङ्कारभीषणः। प्रभाते चलितः सार्थः, सोऽपि तेन समं गतः ॥३७॥
कृतरक्षो महायोधैः, सुखावासप्रयाणकैः। दिनैः कतिपयैरेव महाटव्यां विवेश सः ॥३८॥
या च नानाविधैर्वृक्षै-र्विहगैश्च विराजिता। विचरत्खड्गिशार्दूला, सन्त्रासितजगज्जना ॥३९॥
नभःश्रीरिव कुत्रापि, चलचित्रोपशोभिता। अन्यत्र सिंहज्येष्ठार्क-मूलमन्दारराजिता ॥४०॥
क्वचिद्भूतगणोपेता, भवानीव मनोहरा। क्वचिद्भ्रमन्महाभोग-भुजङ्गशतसङ्कुला ॥४१॥
क्वचिन्महाशिवासङ्घ-फेत्कारसंरवाकुला। क्वचित्प्रेतरसेवोच्चैः, सर्वलोकभयङ्करा ॥४२॥
स तस्यां दैवयोगेन, सार्थाद्भ्रष्टो भयद्रुतः। बभ्राम भीषणेऽरण्ये, एकाकी कर्मयोगतः ॥४३॥
ततः प्रचण्डशुण्डेन, भीषिताखिलजन्तुना। उद्ध्वंवालधिना तूर्ण-मितश्चेतश्च धावता ॥४४॥
वनवल्लीवितानानि, क्रोधावेशात्प्रभञ्जता। गर्जता घनशब्देन, तुङ्गेन च तरस्विना ॥४५॥
कालेनैव च कालेन, नगजेन गजेन सः। दृष्टः क्रूरदृशा तेन, हेलया हन्तुमिच्छता ॥४६॥
डुङ्गरोऽपि गजस्याग्रे, धावमानः शनैः शनैः। जराजर्जरसर्वाङ्गीं, स्त्रियमेकां व्यलोकयत् ॥४७॥
सोऽपि तं गजमालोक्य, समागच्छन्तमातुरः। नश्यन्नितस्ततः शीघ्रं, वटमेकमुपागतः ॥४८॥
शतशाखं सुविस्तारं, सुपत्रं द्विजसेवितम्। पुण्यं पुण्यफलोपेतं, सत्पुरुषमिवोन्नतम् ॥४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलापिकोकिलाकान्त-सारिकाशुकशब्दितैः । गायन्तमिव नृत्यन्तं, मरुत्कम्पितपल्लवैः ॥५०॥
तमारोढुमशक्तेन, भयभीतेन सर्वतः । अधोऽधः पश्यता तेन, अन्धकूपो विलोकितः॥५१॥
वन्यवारणभीतेन, प्राणप्राणनवाञ्छया । तेनात्मा चावटे क्षिप्तः, सरस्तम्बस्तदन्तरे ॥५२॥
विलोकितो गृहीतश्च, भुजाभ्यां जीवितार्थिना । स तत्र लम्बमानो हि, यावदास्ते क्षणान्तरम् ॥५३॥
तावत्कूपतले दृष्टो-ऽजगरो यमसन्निभः । ऊर्ध्ववक्त्रो महाकायो, बृहत्कुक्षिर्महोदरः ॥५४॥
रौद्रः सन्दर्शनादेव, सम्पादितमहादरः । इतश्च पश्यता तेन, कूपान्तश्च दरीस्थिताः ॥५५॥
चत्वारः पन्नगा दृष्टा, महाकाया महाभयाः । सनीरनीरदच्छाया, रक्ताक्षाः क्षामकुक्षयः ॥५६॥
स्निग्धस्त्रीवेणिसङ्काशा, द्विजिह्वा दुर्जनोपमाः । सरस्तम्बतले दृष्टौ, शुक्लकृष्णौ च वर्णतः ॥५७॥
मूषकौ तस्य मूलानि, खनन्तौ तावनारतम् । इतश्च दन्तिना तेन, क्रोधान्धीकृतचक्षुषा ॥५८॥
तिर्यग्दत्तप्रहारेण, समुद्धृतकरेण च । बलिना मदमत्तेन, दन्ताभ्यामाहतो वटः ॥५९॥
स शाखी शतशाखोऽपि, दशनाघातपीडितः । चकम्पे शत्रुणा रुद्धो, यथा कातरमानवः ॥६०॥
नानानीडसमुड्डीन-विहङ्गमविकूजितैः । मुक्तकण्ठं कठोरेण, रोदितीव स्वरेण सः ॥६१॥
अल्पसत्त्वस्य सत्त्वस्य, महतोऽपि महाभयम् । सिंहे लघुशरीरेऽपि, सत्त्वतो मृगराजता ॥६२॥
कूपस्योपरि या शाखा, तस्यां यन्मधुसम्भृतम् । तद्भ्रं मक्षिका नष्टा, धाविता डुङ्गरं प्रति ॥६३॥
स ताभिश्चण्डतुण्डाभिः, खाद्यमानो मुहुर्मुहुः । किं करोति सहत्येव, तीव्रदुःखं परंवशः ॥६४॥
शाखातः पतितो बिन्दु-र्मधुनस्तस्य मस्तके । शनैः शनैर्लुठन्नेष, मुखमूलमुपागतः ॥ ६५॥
ततः सर्वाणि दुःखानि, हस्त्यादीनि भयानि च । विहाय पृष्ठतः पापः, पपौ तं मधुबिन्दुकं ॥६६॥
ललल्लालाकरालेन, जिह्वाग्रेण समन्ततः । लिलेह स्वं मुखं श्वेव, रसास्वादनतत्परः ॥६७॥
दृष्टान्तोऽयं समाख्यात, एष दार्ष्टान्तिकोऽधुना । भण्यते भव्यसत्त्वानां, भवनिर्वेदहेतवे ॥६८॥
जीवः पथिकसङ्काशः, संसारश्च महाटवी । वनहस्तिसमो मृत्यु-र्वनिता च जरा मता ॥६९॥
मन्दं मन्दं प्रयात्येषा, पृष्ठौ लग्ना शरीरिणाम् । एषैव सर्वजीवानां, राक्षसीव भयङ्करा ॥७०॥
वटो मोक्षसमः प्रोक्तः, सर्वजीवाभयङ्करः । यदर्थं योगिनः सर्वे, यतन्ते कृतनिश्चयाः ॥७१॥
कूपो नरभवः प्रोक्त-स्तमःस्तोमसमाकुलः । आयुष्कं च सरस्तम्ब-मूलतुल्यं प्रचक्षते ॥७२॥
द्वौ पक्षौ मूषकौ ज्ञेया-वायुर्मूलविनाशकौ । पन्नगा इव चत्वारः, कषाया दुःखहेतवः ॥७३॥
रोगा मधुकरीतुल्या, नानादुःखनिबन्धनाः । यैरतीवाहतो जीवो, बम्भ्रमीति भवाध्वनि ॥७४॥
वक्त्रमाजगरं यत्तु, तद्रौद्रनरकोपमम् । गुरुकर्मरसासक्तो, धर्मकर्मपराङ्मुखः ॥७५॥
अभव्यो दूरभव्यो वा, पुमानेष विभाव्यताम् । ततो भव्या भवाम्भोधे-र्यदि वस्तरणे मतिः ॥७६॥
तदेदृक्षैर्न वै भाव्यं, भवभीतभवादृशैः । तदिदं धर्मसर्वस्व-मुपदेशोऽयमुत्तमः ॥७७॥

इति **मधुबिन्दुरसासक्तकूपगतनरकथानकं** समाप्तमिति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं स्थिते यत्कर्तव्यं तदुपदिशन्नाह–

तदहो मानुषत्वादि-सामग्रीं प्राप्य दुर्लभाम् ।
सर्वसौख्यकरे जैने, धर्मे यत्नो विधीयताम् ।।३८।।

तत्तस्मात्कारणादहो ! इत्यामन्त्रणे **[मानुषत्वादिसामग्रीं]** मानुषत्वं मनुजत्वमादिर्यस्याः सा चासौ सामग्री च ताम्, आदिशब्दाद्गोत्रकुलादिग्रहः, **प्राप्य** लब्ध्वा **दुर्लभां** दुष्प्रापां **सर्वसौख्यकरे** सकलसुखकरे **जैने** जैनेन्द्रे **धर्मे** शुभानुष्ठाने **यत्नः** प्रयत्नो **विधीयतां** क्रियतामिति ।।३८।।

अथ मानुषत्वं धर्मस्य मूलहेतुतया दर्शयन्नाह–

मानुषत्वं हि सद्धर्म-मूलनीवीसमं बुधैः ।
कथ्यते समये श्रेष्ठि-पुत्रत्रयनिदर्शनात् ।।३९।।

श्लोकोऽयं सुगमो, नवरं सद्धर्ममूलनीवी प्रथमभाण्डमूल्यं, तया सममिति, तथा **समये** सिद्धान्ते **श्रेष्ठिपुत्रत्रयनिदर्शना**द्वणिक्सुतत्रयदृष्टान्तादिति । कथानकमत्र-

बभूव भुवनाख्याते, पुरे भूरिधनालये । त्रिदशालयसंकाशे, **वसन्तपुर**नामनि ।।१।।
श्रियः स्थानं **धनो** नाम, श्रेष्ठी धनदसन्निभः । राजादीनां सदा मान्यः, सुहृद्बन्धुसमाश्रयः ।।२।।
बुभुजे निजकां लक्ष्मीं, बद्ध्वा सुगुणरज्जुभिः । प्रियां कान्तां समालिङ्ग्य, बाहुभ्यामिव मारभाक् ।।३।।
मान्या प्रियंवदा शान्ता, सुरूपा शीलशालिनी । **सुभद्रे**ति बभूवास्य, गृहिणी गुणधारिणी ।।४।।
परस्परेण निश्छिद्र-प्रेमपूरितयोस्तयोः । एकमेवाभवच्चित्रं, पृथक्त्वं देहमात्रतः ।।५।।

मनोरथशतैर्जाता-स्तयोः पुत्रास्त्रयः क्रमात् ।
धनयक्षो धनावासो, धनचन्द्रः कनिष्ठकः ।।६।।

कृतानि नामधेयानि, वर्धापनकपूर्वकम् । प्रहृष्टश्च पिता चित्ते, माता माति न भूतले ।।७।।
पञ्चधात्रीगृहीताश्च, परिवारकृतादराः । सुखंसुखेन वर्धन्ते, नन्दने पादपा यथा ।।८।।
लालिताः पालिताश्चैव, पाठिताः परिणायिताः । विकारबहुले याव-दारूढा नवयौवने ।।९।।
भार्यायत्ततया ताव--न्मातृपितृपराङ्मुखाः । ये निजास्ते परे जाता, धिगहो यौवनजृम्भितम् ।।१०।।
परस्परेण पितॄणां, जायते चित्तखेदनम् । कलहायोपतिष्ठन्ते, श्वश्र्वा सार्द्धं वधूटिकाः ।।११।।
अन्येद्युः श्रेष्ठिनाऽचिन्ति, नेदं गृहविवृद्धिकृत् । यथा पृष्टा किलेन्द्रेण, हे लक्ष्मि! क्वोष्यते त्वया? ।।१२।।
श्रुत्वा शक्रवचो लक्ष्मीः किञ्चिदुत्फुल्ललोचना । जगादेदं सुराधीशं, हृष्टवक्त्रा स्फुटाक्षरम् ।।१३।।
श्रूयतां श्रूयतां स्वामिन्!, कथ्यते कथ्यते तव । गुरवो यत्र पूज्यन्ते, धान्यं यत्र सुसञ्चितम् ।।१४।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न दन्तकलहो यत्र, तत्र शक्र! वसाम्यहम् । कुटुम्बकलहो नापि, तत्र वासो भवेन्मम ॥१५॥
परिच्छेदो हि पाण्डित्यं, तदायत्ता हि सिद्धयः । अपरिच्छिन्नतत्त्वानां, काचकिच्यं पदे पदे ॥१६॥
राज्यमन्दिरगच्छानां, भारोऽयमतिदुर्वहः । अयोग्यस्थापितो नूनं, स्थाणुतां न समश्नुते ॥१७॥
ततः कृत्वा स्वपुत्राणां, योग्यायोग्यपरीक्षणम् । पात्रभूते गृहभारं, निवेश्याहं निराकुलः ॥१८॥
करोमि धर्मकर्माणि, सुतं मे गृहचिन्तया । एवं विनिश्चयं कृत्वा, भणिता तेन गेहिनी ॥१९॥
कुसूत्रं ते गृहं भद्रे!, वद किं क्रियतेऽधुना । आर्यपुत्रो विजानाति कार्याकार्यविवेचनम् ॥२०॥
आज्ञाकारी जनस्तेऽयं, ततः श्रेष्ठी बभाषताम् । महाकटकृतच्छायं, सर्वतो रचितासनम् ॥२१॥
महान्तं महतां योग्यं, रम्यं रञ्जितसज्जनम् । सर्वतोऽपि परिक्षिप्तं, मण्डपं रचयाम्यहम् ॥२२॥
भवत्यपि वराहारं, निष्पादयतु सत्वरम् । येनैष भोज्यते लोको, मण्डपे चोपवेश्यते ॥२३॥
तथेति प्रतिपद्यासौ, पाकं कर्तुं समुद्यता । निष्पन्नस्तत्क्षणादेव, पाकः पुण्यजनोचितः ॥२४॥
वैवाहिकाः स्वगोत्राश्च, ये चान्ये राजपूजिताः । श्रेष्ठिनाऽऽमन्त्रिताः सर्वे, भोजनार्थं निजे गृहे ॥२५॥
आयाता भोजिताश्चैव, मण्डपे चोपवेशिताः । ताम्बूलादिप्रदानेन, कृताः सन्मानभाजनम् ॥२६॥
स्वयं मण्डपमध्यस्थो, निषण्णो वरविष्टरे । मण्डपागतलोकेन, सर्वतः परिवारितः ॥२७॥
सहस्रमानमेकैकं, तद्भृत्यैर्वासनत्रयम् । श्रेष्ठिवाक्यात् समानीय, मुक्तं तत्पादयोः पुरः ॥२८॥
समाहूताः सुताः सर्वे, जनाध्यक्षं च भाषिताः । वत्सा! या मन्दिरे लक्ष्मीः, सा सर्वापि मयार्जिता ॥२९॥
तया गर्वो न कर्तव्य-स्तद्भोगोऽपि न सङ्गतः । यतः सा जननीतुल्या वन्दनीया विवेकिनाम् ॥३०॥
यौवनेऽपि समारूढा, अर्थोपार्जनवर्जिताः । नरास्ते रूपमात्रेण, तत्त्वतो नरकीटकाः ॥३१॥
न देशभाषाविज्ञानं न देशाचारविज्ञता । न च नेपथ्यविज्ञानं, न स्वपुण्यपरीक्षणम् ॥३२॥
वाणिज्येन विनानैत-न्नराणामुपजायते । वाणिज्यविकला लोके, पशवः शृङ्गवर्जिताः ॥३३॥
स्वभुजोपात्तवित्तेन, भोगो दानं च शोभते । पितृलक्ष्म्या तु कुर्वन्ति, ये ते मानविवर्जिताः ॥३४॥
कालकारी नरो लोके, केन केन न शस्यते ? । प्राप्नोति वाञ्छितं चार्थं, यतोऽवाचि विचक्षणैः ।३५।

प्रथमे नार्जिता विद्या, द्वितीये नार्जितं धनम् ।
तृतीये नार्जितो धर्म-श्चतुर्थे किं करिष्यति ? ॥३६॥

इत्याद्युक्त्वा स्वहस्तेन, पुत्राणां करतले कृतम् । एकैकं वासनं तेन यात यातेति जल्पता ॥३७॥
अथ प्राचीं प्रति ज्येष्ठ-श्चलितो हृदि पीडितः । दिनैः कतिपयैरेव, प्राप्तो विश्वपुरं पुरम् ॥३८॥
वेश्यास्ताम्बूलिकास्तत्र, द्यूतकाराश्च मालिकाः । वसन्ति बहवो लोका, धनाकर्षणहेतवे ॥३९॥
अथ तत्र पुरे तस्य, सञ्जाता चित्तनिर्वृतिः । उन्मुद्र्य वासनं पैत्र्यं, चिन्तितं मूढचेतसा ॥४०॥
सत्यापितश्च तातेन, जनवादोऽयमीदृशः । वृद्धत्वे हि मनुष्याणां, पञ्चानिष्टसमुद्भवाः ॥४१॥
दुर्भाषालीकभाषित्वं, निर्लज्जत्वं भयं तथा । तृष्णा च प्रत्यहं तस्य, देहेन सह वर्धते ॥४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदसौ न विजानाति, युक्तायुक्तविवेचनम् । विवेकविकलो वृद्धो, जरया विमनीकृतः ॥४३॥
धनिनो यौवने धन्या, धनभोगोपभोगिनः । संरक्षितेन किं तेन, दत्तभुक्तफलं धनम् ॥४४॥
एवं वितर्क्य स स्वान्ते, गतः कान्दविकापणे । भुक्तो यथेच्छया तेना-हारश्च मनसः प्रियः ॥४५॥
किञ्चिद्धनमधन्येन, वेश्याभिः सह भक्षितम् । किञ्चिद्द्यूतेन तत्तेन, हारितं हीनकर्मणा ॥४६॥
पुष्पेषु व्ययितं किञ्चि-त्किञ्चित्ताम्बूलभक्षणे । किञ्चिद्गायकलोकेषु, नग्नाचार्येषु किञ्चन ॥४७॥
किञ्चित्किञ्चिद्गतं सर्वं, तस्य हस्ते न किञ्चन । ततो नकिञ्चनो जातः, क्षामकुक्षिः क्षुधालयः ॥४८॥
पाटिताखिलसद्वस्त्रः, कृतकच्छोटकः कुधीः । कुम्भकारापणे गत्वा, गृहीत्वा खण्डहण्डिकाम् ॥४९॥
रज्ज्वा संयम्य यत्नेन, गृहीत्वा दक्षिणे करे । भिक्षां बभ्राम सर्वत्र, पुरे कार्पटिको यथा ॥५०॥
यतः- अभिमतमहामानग्रन्थिप्रभेदपटीयसी, गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका ।
विपुलविलसल्लज्जावल्ली वितानकुठारिका, जठरपिठरी दुष्पूरेयं करोति विडम्बनाम् ॥५१॥
निर्गत्य सरसीतीरे, जलस्नेहं कुभोजनम् । भुक्त्वा नीत्वा दिनं तत्र, मक्षिकाशतसङ्कुलः ॥५२॥
नक्तं सुष्वाप शून्येषु, देवगेहेषु दुःस्थितः । वर्षावधिं नयत्येष, जीवन्मृतकसन्निभः ॥५३॥
धनावासोऽपि कौबेरीं, गत्वैकत्र पुरे स्थितः । सोऽपि सञ्चिन्तयामास, यथा ज्येष्ठेन चिन्तितम् ॥५४॥
समस्ति कारणं किंचि-त्तातो वेत्ति न चापरः । ततो यामद्वयं यावद्-व्यवहारो मम सङ्गतः ॥५५॥
उपार्जितस्य चार्थस्य, भक्षणं मूलरक्षणम् । सोऽपि शास्त्रे वणिग्दृष्टो, मूलं यस्य न नश्यति ॥५६॥
एवं च कुर्वतस्तस्य, प्रत्यहं यान्ति वासराः । धनचन्द्रो वारुणीं गत्वा, स्थितश्चैकत्र पत्तने ॥५७॥
चिन्तितं सुधिया तेन, स्वस्थानेऽपि न सुन्दरम् । व्यसनं शिष्टलोकानां, विदेशेषु विशेषतः ॥५८॥
असारेऽप्यत्र संसारे, पितरौ सारतां गतौ । यच्चाहितौ तदा कोऽन्यो, हितो हन्त! भविष्यति ॥५९॥
व्यसनं सकलं त्यक्त्वा, ग्रासाच्छादनतत्परः । अर्थचिन्तापरः शेते, यामद्वन्द्वं यथा मुनिः ॥६०॥
शेषकालं गतालस्यो, व्यवहारं चकार सः । जातश्चाष्टगुणो लाभ-स्तस्य स्वल्पदिनैरपि ॥६१॥
सम्पूर्णावधयः सर्वे, चलिताः स्वगृहोन्मुखाः । सुखं सुखेन सम्प्राप्ता, ग्रामे ते गुणसुन्दरे ॥६२॥
कनिष्ठेन पुमानेको, वार्ताकथनहेतवे । प्रेषितः श्रेष्ठिनस्तेन, सर्ववार्ता निवेदिता ॥६३॥
भणिता श्रेष्ठिना भद्रा, सुभद्रे! तव नन्दनाः । तिष्ठन्ति मिलिताः सर्वे, ग्रामे ते गुणसुन्दरे ॥६४॥
गमने यो विधिस्तेषा-मागमेऽपि स एव हि । क्रियतां येन लोकस्य, प्रतीतिर्जायते प्रिये! ॥६५॥
तथैव विहितं सर्वं, लोके मण्डपमाश्रिते । ग्रामादानायिता पुत्राः, समासन्नाश्च धारिताः ॥६६॥
पूर्वं प्रवेशितो ज्येष्ठो, भृत्यैर्वामकरैर्धृतः । लज्जन्नधोमुखः क्षीणः, स्खलत्पादः पदे पदे ॥६७॥
पापः प्रकटकौपीनः, कृतकच्छोटकः कटौ । सर्वलोककृपास्थानं, दुर्बलोऽतिमलाविलः ॥६८॥
भृत्यद्वयेन लज्जालु-र्धृत्वा वामेतरे करे । मुक्तोऽग्रे स समानीय, श्रेष्ठिनः श्रेष्ठकर्मणः ॥६९॥
भणितः श्रेष्ठिना वत्स!, पादं पूजय मामकम् । दक्षिणं मूलनीव्या त्वं, लब्धलाभेन वामकम् ॥७०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहैरिव गृहीतोऽसौ, मन्त्रैरिव जडीकृतः । निरुद्धवचनः शून्यो, भणितोऽपि न भाषते ॥७१॥
आकारसंवरं कृत्वा, पृष्ठं शपथपूर्वकम् । वत्स ! सत्यं प्रवक्तव्यं, तत्र गत्वा पुरे त्वया ॥७२॥
किमुक्तं चिन्तितं किं वा, किं वा कर्म त्वया कृतम् ? । तेनापि च यथा वृत्तं, तथा सर्वं निवेदितम् ॥७३॥
तच्छ्रुत्वा कुपितः श्रेष्ठी, किञ्चित्कम्पितकन्धरः । उवाच मिलितं लोकं, सर्वं सावेशमानसः ॥७४॥
भो ! पश्यत जना ! यूयं, ज्येष्ठपुत्रस्य चेष्टितम् । व्यवसायं पितृभक्तिं च, शरीरस्य स्थितिं तथा ॥७५॥
एवंविधेन वेषेण, साधुरेव प्रशस्यते । पूज्यते च जनैः सर्वैः, स्तूयते स्तुतिभिस्तथा ॥७६॥
निर्धनः श्लाघ्यते साधु-रहो मुनिरकिञ्चनः । मलिनो मान्यतामेति, मलधारी महामुनिः ॥७७॥
दुर्बलः पूज्यते लोके, भो! कष्टं तप्यते तपः । दुष्टदुर्मुखवाक्यानि, सहन् लोकेन शस्यते ॥७८॥
क्षमावानेष वन्द्योऽयं, धन्यो धर्मशिरोमणिः । कदन्नभोजी लोकेन, भण्यते निःस्पृहो मुनिः ॥७९॥
भूमिशायी मुनिर्लोके, कष्टकारीति भण्यते । रोमपादनखादीनां, वर्धनं गुणवर्धनम् ॥८०॥
परूषत्वमचर्या च, केशानां श्लाघ्यते जने । अस्नानं च प्रशस्यन्ति, नैव स्नान्ति दमे रताः ॥८१॥
[स्नानमुद्वर्तनाऽभ्यङ्गे, नखकेशादिसत्क्रियाम् । गन्धं माल्यं च ताम्बूलम्, प्रदीपं तु मुनिस्त्यजेत् ।८२।

स्मृतिरपि-**ब्रह्मचर्यस्थितो नैव-मन्नमद्याद्विनिन्दितम् ।**
दन्तधावनगीतादि, ब्रह्मचारी विवर्जयेत् ॥८३॥]

एतान्युन्नतिकारीणि, साधूनां शीलशालिनाम् । अनुन्नतिकराण्येव, जायन्ते गृहमेधिनाम् ॥८४॥

उक्तं च-**कार्श्यं क्षुत्प्रभवं कदन्नमशनं शीतोष्णयोः पात्रता,**
पारुष्यं च शिरोरुहेषु शयनं मह्यास्तले केवलम् ।
यान्येवावनतिं वहन्ति गृहिणां तान्युन्नतिं संयमे,
दोषाश्चापि गुणीभवन्ति हि नृणां योग्ये पदे योजिताः ॥८५॥

तदेष ज्येष्ठपुत्रो मे, निर्भाग्यो गुरुतल्पगः । अयोग्यो गृहभारस्य, बाह्यकर्मकरोऽस्त्विति ॥८६॥
मूलनीवीधनं मुक्त्वा, पादाग्रे प्रणतिं गतः । द्वितीयो भणितः पित्रा, पुत्रेदं मामकं धनम् ॥८७॥
दूरं दूरतरं यान्ति, पुरुषा लाभवाञ्छया । समूलं ते समेतस्य, बहिश्चारो निरर्थकः ॥८८॥
ज्येष्ठवदनुज्येष्ठोऽपि, कृतः शपथशापितः । तेनापि कथितं सर्वं, यत्कृतं यच्च चिन्तितम् ॥८९॥
लोकाः शृणुत सर्वेऽपि, मिलिता मामकं वचः । एषोऽपि कर्मकार्येव, मन्दिरे किन्तु मध्यमः ॥९०॥
कनिष्ठोऽपि समायातो, भृत्यवर्गसमन्वितः । आदेशार्थी पुरोभूय, स्थितो विरचिताञ्जलिः ॥९१॥
मूलनीवीधनं सर्वं, पादे मे मुञ्च दक्षिणे । वामे विवर्धितं मुक्त्वा, ममोत्सङ्गे निवेश्यताम् ॥९२॥
त्वन्मुखामृतपानस्य, चिरकालमुत्कण्ठितः । अद्याहं मुदितो जातो, जात ! त्वय्यवलोकिते ॥९३॥
क्व मेघा बर्हिणः कुत्र ?, क्व चन्द्रः क्व च सागरः ? । गुणाः कुर्वन्ति दूतत्वं, दूरेऽपि वसतां सताम् ॥
धनचन्द्रस्तथा प्रोक्तः, पितुरङ्कमुपागतः । हर्षाश्रुपूरिताक्षेण, तेनाचुम्बि स मस्तके ॥९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणितो वत्स! किं तत्र, वाणिज्यं कुर्वता सता। अयमासादितो लाभो, मूलादष्टगुणो महान् ॥९६॥
तेनापि कथितं सर्वं, यत्कृतं यच्च चिन्तितम्। लाभश्च पूज्यपादानां, पुण्यैरासादितो मया ॥९७॥
निशम्य तस्य वाक्यानि, धनो मनसि रञ्जितः। हर्षाश्रुपूरिते बिभ्र-च्चक्षुषी गलदश्रुणी ॥९८॥
पुण्यानुबन्धिपुण्येन, जन्म सम्भाव्यते तव। सुक्षेत्रमिव शस्यानां, त्वं पात्रं सर्वसम्पदाम् ॥९९॥
लभ्यते ऋक्षसङ्ख्यापि, गण्यन्ते द्वीपसागराः। तव देहे गुणानां तु, पर्यन्तोऽपि न लभ्यते ॥१००॥
त्वयैव पुत्रीपुत्राहं, त्वयैव गुणवानहं। त्वयैव श्लाघ्यतां नीत-स्त्वया जातो निराकुलः ॥१०१॥
मनांसि शिष्टलोकानां, कूपोदकसमान्यहो! । निर्गुणैः स्तब्धकैः शून्यैर्गृह्यन्ते न कदाचन ॥१०२॥
भो लोकाः ! साक्षिणो यूयं, विसंवादनिवारणे। कनिष्ठेऽपि गुणाधारे, धनचन्द्रेऽस्ति मे मनः ॥१०३॥

यत उक्तं-**गुणा गौरवमायान्ति, महत्त्वेन न रूपतः।**
कलङ्की न तथा पूज्यो निष्कलङ्को यथा शशी ॥१०४॥

ततश्च सर्वलोकानां, पुरतो मङ्गलपूर्वकम्। गृहभारोऽश्रुणा सार्धं, मूर्ध्नि तस्य निवेशितः ॥१०५॥
कुबुद्धया नाशितो ज्येष्ठो, गृहे कर्मकरः कृतः। सुबुद्धियोगतो जातो, धनचन्द्रो गृहाधिपः ॥१०६॥
कुबुद्धिदानतः क्रुद्धः कुमित्रपरिवारितः। विधिरेष उपायेन, पुंसो हरति सम्पदम् ॥१०७॥
सुबुद्धिदानतस्तुष्टः सुमित्रपरिवारितः। विधिरेष उपायेन, नरस्य कुरुते श्रियम् ॥१०८॥
नास्त्यसाध्यं सुचीर्णानां, पुरा जन्मनि कर्मणाम्। धनचन्द्रेण येनात्मा, लघुनापि गुरूकृतः ॥१०९॥

उक्तं च-**लहुएण वि वडवीयं-कुरेण साहीसयाण मज्झम्मि।**
तह संठविओ अप्पा, जह सेसतरू तले तस्स ॥११०॥

वीचिव्याप्तवियद्वितानवसुधं क्वागाधरन्ध्रं पयो,
गोलाङ्गूलसलीलपाणिकलिताः क्षुद्राः क्व ते क्ष्माभृतः।
बद्ध्वा दाशरथिस्तथापि जलधिं प्रत्याजहार प्रियां,
ग्रावाणोऽपि तरन्ति वारिणि यदा पुंसोऽनुकूलो विधिः ॥१११॥

ततस्तं शिक्षयामास, श्रेष्ठी स्नेहपरायणः। वत्सावहितचित्तेन, श्रोतव्यं मामकं वचः ॥११२॥
एष भारो महाभारो, दुर्वहः किन्नरैनरैः। तदयं पुत्र ! वोढव्यो, गतालस्येन सर्वदा ॥११३॥
यथा न तरलायन्ते, दुर्जना दुःखदायिनः। श्यामायन्ते यथा नैते, सज्जनाः सुखकारिणः ॥११४॥
सर्वदैव सलज्जेन, स्वोपयोगेन सर्वदा। व्यसनं व्यसनं कृत्वा, कर्तव्यं सुगुणार्जनम् ॥११५॥
देवानां च गुरूणां च, कार्या भक्तिरकृत्रिमा। सर्वत्रोचितवृत्त्या च, वर्तितव्यं विवेकिना ॥११६॥
माननीया जना मान्या, निन्दनीया न केचन। परमर्म न वक्तव्यं, कर्तव्यो धर्मसङ्ग्रहः ॥११७॥
कर्कशं न वचो वाच्यं, न भाव्यं बद्धमुष्टिना। इन्द्रियाणि वशीकृत्य, पालनीयो गृहाश्रमः ॥११८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहान्तर्वातुलः कोऽपि, पित्तलः कोऽपि कोपनः। मानी मायी च लोभी च, कलही चापि कश्चन ॥११९॥
दुःशीलो दुर्भगः कोऽपि, कोऽपि दुष्टोऽपरो जडः। गृहनायकेन कर्तव्या, सर्वेषामनुवर्तना ॥१२०॥
स्वल्पजल्पक्रियाकारी, देहादर्शितविक्रियः। श्लाघ्यते सर्वलोकेन, यत उक्तं महात्मभिः ॥१२१॥
न खनति खुरैः क्षोणीपृष्टं न नर्दति सादरं, प्रकृतिपुरुषं प्रेक्ष्याप्यग्रे न कुप्यति गोन्तरम्।
वहति च धुरं धुर्यो धैर्यादनुद्धुरकन्धरो, जगति गुणिनः कार्यौदार्यात्परानतिशेरते ॥१२२॥
दानादिगुणसंयुक्तः, सदाचारपरायणः। कुलाचारैकचित्तश्च, केन केन न शस्यते ? ॥१२३॥

यतः- **त्यागैः सच्चरितैर्दयाभिरतुलैरन्योपकारैर्गुणै-**
र्गुर्वादेर्विनयैस्तपोभिरमलैः शुभ्रैर्यशोभिर्नयैः ॥
तारस्फारविवेकतो निजकुलाचारात्तथा धर्मतो,
यो धीरैर्धुरि देहिनां न गणितः किं सोऽपि मर्त्यो भुवि ? ॥१२४॥

सर्वस्य चोन्नतिः कार्या, वार्या दुर्जनसङ्गतिः। स्त्रीणां वशे न गन्तव्यं, वचो वाच्यं न कर्कशम् ॥१२५॥
एवं च जायते कीर्ति-र्यशः सर्वत्र जृम्भते। लभ्यते प्रथमा रेखा, सत्पुरुषविचारणे ॥१२६॥
कियत्ते कथ्यते वत्स! सङ्क्षेपात् शृणु साम्प्रतम्। दोषा हेया गुणा ग्राह्याः, कर्तव्या निर्मला दया ॥१२७॥
एवं श्रेष्ठी समाश्वास्य, धनचन्द्रं मुदं दधौ। गुणिन्यपि गुणाधानं, गुणायैवोपजायते ॥१२८॥
गृहस्य स्वामिनं कृत्वा, दत्त्वा परिजनं निजम्। स्वयं श्रेष्ठी समारब्धो, धर्मं कर्तुमनाकुलः ॥१२९॥
दृष्टान्तोऽयं समाख्यातो, दार्ष्टान्तिक इहोच्यते। सांसारिकास्त्रयः सत्त्वा, मानुषीं योनिमागताः ॥१३०॥
तत्रैको लब्धसम्यक्त्वः, सत्यशौचसमन्वितः। लब्धलाभवणिक्तुल्यो, मृत्वा देवेषु जायते ॥१३१॥
परस्तनुकषायत्वा-द्दानदातृत्वयोगतः। मूलाहारिवणिक्तुल्यो, मृत्वा भवति मानवः ॥१३२॥
तृतीयस्तु महापापो, धर्मकर्मबहिर्मुखः। जीवघाती मृषावादी, चौर्यचातुर्यसङ्गतः ॥१३३॥
परभार्यारतः पापो, महारम्भपरिग्रहः। समूलहारिणा तुल्यो, नरकं याति दारुणम् ॥१३४॥
मानुषत्वं भवेन्मूलं, लाभो देवगतिर्भवेत्। मूलनाशेन जीवानां नारकतिर्यग्योनिता ॥१३५॥
लब्धलाभसमैर्भाव्यं सर्वथा भव्यजन्तुभिः। मूलाहारिसमैर्वापि, न तुल्यैर्मूलहारिणा ॥१३६॥
तदहो दुर्लभं प्राप्य, मानुष्यं भवकोटिभिः। यतध्वं सर्वदा धर्मे, येनेदं सफलं भवेत् ॥१३७॥

इति **वणिक्त्रयकथानकं** परिसमाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूयोऽपि धर्मं प्रशंसयन् श्लोकचतुष्टयमाह–

सम्प्राप्य मानुषं जन्म, दुर्लभं भवकोटिभिः ।
व्यापारितं सदा धर्मे, यैस्ते ह्यत्रनरोत्तमाः ॥४०॥
गच्छतां दुर्गसंसार-मार्गे पर्यन्तवर्जिते ।
धर्मसम्बलमृते पुंसां, दुःषमानि पदे पदे ॥४१॥
सीदन्त्यत्र न यैर्धर्मः, सम्यगासेवितः पुरा ।
साम्प्रतं न च कुर्वन्ति, तेषामग्रेऽपि नो सुखम् ॥४२॥
तदेष भगवान् धर्मो, दुर्गतिगतधारकः ।
सद्भिः सदैव कर्तव्यः, सर्वसौख्यनिबन्धनम् ॥४३॥

सम्प्राप्य लब्ध्वा **मानुषं** मनुजभवसम्बन्धि **जन्म** जननं **दुर्लभं** दुष्प्रापं **भवकोटिभिर्**नरकादिभवलक्षशतसहस्रैर्व्यापारितं नियोजितं **सदा** नित्यं **धर्मे** सदनुष्ठानरूपे **यैः** कैश्चिदनिर्दिष्टनामभिस्तेऽत्रास्मिन् लोके **नरोत्तमाः** प्रधानपुरुषाः ॥४०॥

गच्छतां व्रजतां **दुर्गसंसारमार्गे** विषमभववर्त्मनि **पर्यन्तवर्जिते** निधनरहिते **धर्मसम्बलं** धर्मपाथेयमृते विना **पुंसां** पुरुषाणां **दुःषमानि** दुःखशतविधायित्वाद् दुःखानि **पदे पदे** स्थाने स्थान इति ॥४१॥

सीदन्ति समभिलषितार्थापूर्त्या दुःखमनुभवन्ति, **अत्र** मनुष्यभवे **न** नैव **यै** नरै **धर्मः** सुन्दरानुष्ठानं **सम्यक्** शोभनेन न्यायेनासेवितः कृतः **पुरा** पूर्वं, **साम्प्रत**मधुना **न च** नैव कुर्वन्ति विदधति **तेषामग्रेऽपि** तेषां नराणामग्रेऽपि परलोकेऽपि **नो** नैव सुखं समेति ॥४२॥

तत् तस्मात्कारणादेषोऽयं पूर्वोक्तो **भगवान्** सकललोकपूजनीयो **धर्मः** श्रुतधर्मश्चारित्रधर्मश्च **दुर्गतिगतधारको** दुर्गतिप्रस्थितजन्तुनिवारकः **सद्भिः** सत्पुरुषैः **सदैव** सदाकालं **कर्तव्यो** विधेयः **सर्वसौख्यनिबन्धनं** सकलशर्मकारणमिति श्लोकचतुष्टयसमासार्थः ॥४३॥ तथा–

धर्मो विजयी सर्वत्रा-ऽधर्मो विजयवर्जितः ।
ततोऽधर्मं परित्यज्य, धर्मे यत्नो विधीयताम् ॥४४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मः शोभनानुष्ठानं **विजयी** विजयवान् **सर्वत्र** सर्वलोके **अधर्मो** धर्मविपक्षो **विजयवर्जितो** जयरहितः । **ततस्तस्मात्कारणादधर्मं परित्यज्य** विमुच्य **धर्मे यत्न आदरो विधीयतां** क्रियतामिति ॥४४॥

स च सदनुष्ठानेन शिष्टसमाचारपालनेन च भवति । लोकाश्चेह बहवो महारम्भमहापरिग्रहासक्ताश्चौर्यपारदार्यप्रभृतिदुर्नयकारिणश्च, तथाप्यात्मानं धार्मिकाणां धुरि धारयन्ति, आत्मसन्तुष्टत्वाज्जगत इति एतदर्थप्रतिपादकश्च दृष्टान्तोऽयं, तद्यथा-

प्रासादद्वयकथा

अस्तीह **मगधो** नाम, देशो देशशिरोमणिः । महेश्वरकृतावासः, स कैलास इवोन्नतः ॥१॥
यत्र नार्यश्च वाप्यश्च, निर्मलाः सुपयोधराः । सुतेजसः सुवंशोत्था, मुक्ताश्च मुनयोऽपि च ॥२॥
पुरं **राजगृहं** तत्र, निवासः सर्वसम्पदाम् । विशालेनोच्चशालेन, परितः परिवेष्टितम् ॥३॥
तत्रासीत् **श्रेणिको** राजा, स्वगुणै रञ्जितप्रजः । भाण्डागारादिसम्पूर्णः, सुप्रतापी परन्दमः ॥४॥
गृहीतहृदया तस्य, **चेल्लणा** नाम गेहिनी । **रोहिणीव** शशाङ्कस्य, विलसत्तारतारिका ॥५॥
तथाभयाभिधानश्च, मन्त्री पुत्रश्च सद्गुणः । बुद्ध्या सर्वातिशायिन्या, त्रिदशाचार्यसन्निभः ॥६॥
अथान्यदा समारूढः, प्रासादे मेदिनीपतिः । परितः प्रेषयामास, दृष्टिं द्रष्टव्यदर्शनः ॥७॥
यत्र यत्र प्रयात्यस्य, दृष्टिर्दर्शनलोलुपा । पश्यति तत्र तत्रापि, लक्षशः कोटिशो जनान् ॥८॥
ततः सकौतुको राजा, प्रासादादवतीर्य सः । सर्वतः पुरमालोक्य, सभामण्डपमागतः ॥९॥
सामन्तमन्त्रिणः सर्वे, समायाताश्च तत्क्षणम् । सन्निषण्णा निजे स्थाने, तान् सन्मान्य ततो नृपः ॥१०॥
लोकविस्मयकारीद-मकालजलदोपमम् । प्रोवाचि च नरेन्द्रेण, मन्त्रिणो मिलितान् प्रति ॥११॥
एतस्मिन्नगरे लोका, बहवो ये वसन्ति नः । किं पापा धार्मिका वेति, ममेदं कथ्यतां द्रुतम् ॥१२॥
श्रुत्वेदं मन्त्रिणो बुद्ध्या, पर्यालोच्य परस्परम् । प्रोचुश्च बहवः पापा, वसन्त्यत्र पुरे प्रभो ! ॥१३॥
धार्मिका गणिताः केचि-च्छतांशादपि दुर्लभाः । कुकर्मकारिणां पुंसां, पर्यन्तोऽपि न लभ्यते ॥१४॥
तन्मन्त्रिभणितं वाक्यं, राज्ञोऽपि हृदि संस्थितम् । केवलं वक्ति नो किञ्चि-दभयो मन्त्रिणां वरः ॥१५॥
अशृण्वन्निव तूष्णीक, आस्तेऽधोनमितेक्षणः । भणितो भूभृता मन्त्रि-न्नुत्तरं किं न दीयते ? ॥१६॥
स प्राह न विजानेऽहं, देवोत्तरमुदीरितुम् । अजानानस्य सर्वत्र, मौनं सर्वार्थसाधनम् ॥१७॥
यथैते तव जानन्ति, मन्त्रिणः कार्यनिश्चयम् । तथाहं न विजानामि, विभिन्ना मतयो नृणाम् ॥१८॥
अहं तु ननु जानामि, प्रभूता धार्मिका जनाः । वसन्ति च स्वल्पाः पापाः, कुरु तात! परीक्षणम् ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वल्पशौचा अधर्मिष्ठा, [१]अरण्यानीनिवासिनः । अविचारा न शस्यन्ते, नरा गड्डुरिका यथा ॥२०॥
अपरीक्षितकारित्वं, मृतानां देहमण्डनम् । बधिरेण समं मन्त्रो, जात्यन्धमुखमण्डनम् ॥२१॥
ततः परीक्षणाहेतोः, पुरमध्ये सितेतरम् । प्रासादद्वयमुत्तुङ्गं, कारयित्वा मनोहरम् ॥२२॥
परितः पटहेनाशु, श्रावयित्वाखिलं जनम् । यथा भो भूभृता धर्म्यः, प्रासादः कारितो महान् ॥२३॥
द्वितीयः पापनामा च, तत्र यः कोऽपि धार्मिकः । धर्म्यं प्रासादमागत्य, स आरोहतु सत्वरम् ॥२४॥
पापो जनो द्वितीयं तु, प्रासादमुपगच्छतु । एतच्छ्रुत्वा जनः सर्वो, धावितो धर्ममन्दिरे ॥२५॥
निरोद्धुं शक्यते नैव, प्रतीहारशतैरपि । चक्रिणः कल्पपालाश्च, मत्स्यबन्धाश्च खट्टिकाः ॥२६॥
वेश्या वागुरिका गोघ्ना, ये चान्ये पापकारिणः । प्रतीहारेण ते प्रोक्ताः, किं यूयमिह चागताः? ॥२७॥
मद्यमांसरसासक्ता जीवघातपरायणाः । अधर्मिष्ठाः कुकर्माणो, लोकनिन्द्याश्च सर्वदा ॥२८॥
जगाद चक्री चक्रं नो, धर्माङ्गं प्रथमं स्मृतम् । विचारय प्रतीहार !, कथ्यमानं वचो मम ॥२९॥
द्विजपाखण्डिदीनान्ध-पङ्गुभ्यस्तैलधारया । दत्तया किं न धर्मो न, इति सम्यग्विभाव्यताम् ॥३०॥
तडागे खन्यमाने तु, लेष्ट्वाकर्षणसम्भवम् । अर्थमात्रसमुत्थं वा, पुण्यं केन निवार्यते ? ॥३१॥
सौवासिनी द्विजेभ्यश्च, दक्षिणा या प्रदीयते । तदुत्थो धर्मसन्तानः, किमस्माकं न जायते ? ॥३२॥
ततो वयं सुधर्मिष्ठा, धर्मकर्मविचक्षणाः । धर्मप्रासादयोग्याश्च, मुधा वारयते भवान् ॥३३॥
अत्रान्तरे समायाता, सुनन्दवणिगङ्गजा । विटभोज्या महापापा, न वेश्या न कुलाङ्गना ॥३४॥
जारघातितभर्तृका, निर्मर्यादा गतत्रपा । वर्जिता पितृवर्गेण, श्वशुरेणापि वर्जिता ॥३५॥
उद्घाटमस्तका लोकै-र्हस्यमाना मुहुर्मुहुः । कुलङ्कुलमटन्ती च, सा कुलटेति विश्रुता ॥३६॥
अन्यायार्जितवित्तेन, तया यक्षस्य मन्दिरम् । कारितं तेन यक्षोऽपि, तन्नामा भुवि विश्रुतः ॥३७॥
कुलटायक्ष इत्येषा, ख्यातिर्यक्षस्य जृम्भते । किं कुर्वन्ति विगुप्यन्ते, देवा अपि कुसङ्गतः ॥३८॥
प्रतीहारेण सा रुद्धा, निर्धर्मे! धर्ममन्दिरे । प्रवेशे कोऽधिकारस्ते, सावोचदिदमञ्जसा ॥३९॥
अहं धर्मवतां सीमा, यया यक्षस्य मन्दिरम् । कारितं निजवित्तेन, त्वमज्ञ इव लक्ष्यसे ॥४०॥
ततो **मदनमञ्जुषा**-नाम्नी वरविलासिनी । प्रतीहारनिरुद्धाऽसा-विदं वचनमब्रवीत् ॥४१॥
धर्मसौधे प्रविशन्त्या, निषेधः क्रियते कथम् ? । स्वल्पाक्षरैः प्रतीहार-स्तामवोचद्विलासिनीम् ॥४२॥
स्वकर्म किं न जानासि ?, पापे ! पापगृहोचितम् । प्रतीहारप्रबोधाय, जगादेदं विलासिनी ॥४३॥
त्रीन् वारान् प्रतिमासान्ते, कामसत्रं ददाम्यहम् । द्विजादिदुःस्थलोकानां, सुस्थत्वे किं न मे शुभम्? ॥४४॥
एवमन्येऽपि सर्वेऽपि, मत्स्यबन्धादयो नराः । आत्मानं धार्मिकम्मन्या, धर्मसौधमुपागताः ॥४५॥
प्रतीहारोऽचिन्तयत्-

सर्वस्यात्मा गुणवान्, सर्वः परदोषदर्शने कुशलः ।
सर्वस्य चास्ति वाच्यं, न चात्मदोषान् वदति कश्चित् ॥४६॥

१ अरण्यानी = भोटुं જંગલ इति शब्दरत्नमहोदधौ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यापितः प्रवादोऽयं, जनेनैवं प्रजल्पता । जगदात्मनि सन्तुष्टं, सर्वः स्वं चारु मन्यते ॥४७॥
बहिष्टान्मस्तके मध्ये, पार्श्वतः पृष्ठतोऽपि च । सर्वतो नागरो लोको, धर्मागारमुपाश्रितः ॥४८॥
शून्यं पापगृहं सर्वं, न कोऽपि क्वापि दृश्यते । खरांशुर्मस्तके रूढ-स्तीव्रतेजाः सुदुस्सहः ॥४९॥
नरेन्द्रश्च समासन्नः, प्रधानपरिवारितः । जनं च जनजल्पं च, पश्यति च शृणोति च ॥५०॥
अत्रान्तरे च पापीयः-प्रासादे कालिमालये । द्वावेव पुरुषौ राज्ञा, विशन्तावववलोकितौ ॥५१॥
विस्मयापन्नचित्तेन, अभयोऽभाणि भूभृता । कावेतौ पुरुषौ भद्र!, पापप्रासादमागतौ ॥५२॥
तेनोचे श्रावकावेतौ प्रियङ्करशुभङ्करौ । कारणं तत्र तद्याने, समाकार्य विचार्यताम् ॥५३॥
ततो राज्ञा प्रतीहार-मुखेनाकारितावुभौ । आगत्य प्रणतौ राज्ञे, निषण्णावुचितासने ॥५४॥
राज्ञा पृष्टौ यथा जैन-शासने श्रावकौ युवाम् । देवश्च युवयोः श्रीमान्, समग्रैश्वर्यसंयुतः ॥५५॥
सर्वज्ञः सर्वदर्शी च सर्वदेवनमस्कृतः । गुरवः साधवश्चैव, प्राप्यन्ते नाल्पपुण्यकैः ॥५६॥
सद्विवेकः श्रिया सार्धं, विनयो विद्यया सह । आत्मगुणैरनुत्सेको, युष्मास्वेव विलोक्यते ॥५७॥
भो भद्रौ ! शेषलोकेभ्यो, गुणित्वं वां समर्गलम् । ततः केन निमित्तेन, पापप्रासादमाश्रितौ? ॥५८॥
तावूचतुर्महाराज! यन्न तुष्टिर्निजैर्गुणैः । क्रियाकाण्डमपि स्वीयं, न तच्चेतसि वर्तते ॥५९॥
जगद्बन्धुर्जिनाधीशो, देवो नौ देवदेवता । क्षमावन्तः श्रुताधारा, गुरवश्च सुसाधवः ॥६०॥
श्रूयते तद्वचो नित्यं, क्रियते पर्युपासना । क्रियाकाले पुनः सर्वं, काकवासितसन्निभम् ॥६१॥
जिनाज्ञा हृदयेऽस्माक-मनुष्ठानं सकल्मषम् । मोक्षाध्वनिस्थितस्येदं, प्रस्थानं नरकाध्वनि ॥६२॥
ते शोच्या ये न जानन्ति, सर्वज्ञमतमुज्ज्वलम् । शोच्यानामपि ते शोच्या, ज्ञात्वा ये न प्रकुर्वते ॥६३॥
आपादितचमत्कारा, इन्द्रजालिकसन्निभाः । बहवो विरलास्ते च, ये रञ्जितस्वमानसाः ॥६४॥
अन्तःशून्या बहिःसारा, नित्यशो भोजनप्रियाः । ध्वनिसाराश्च संसारे, बहवो मर्दलोपमाः ॥६५॥
अन्तःसद्वासनोपेता, बहिश्च बकवृत्तयः । वाचंयमा क्षमावन्तो, निःस्पृहा विरला जनाः ॥६६॥
सुधर्मादिमुनीन्द्राणां, मौनीन्द्रगुणधारिणाम् । जिनाज्ञायोगयुक्तानां, धर्मप्रासादयोग्यता ॥६७॥
तेनात्र वयमारूढा, मूढाः सन्मार्गवर्त्मनि । कुकर्मकारका दत्त-सत्यङ्कारा भवाध्वनि ॥६८॥
जगादाथाभयो देव!, स्वदोषे यस्य दोषधीः । स धन्यो वन्दनीयश्च, स धार्मिकशिरोमणिः ॥६९॥
दोषबुद्धिः स्वदोषेषु, गुणबुद्धिर्गुणेषु च । दोषेभ्यस्ते विरज्यन्ते, प्रवर्तन्ते गुणेषु च ॥७०॥
दोषा अपि गुणत्वेन, यैः प्रपन्ना नराधमैः । दोषेभ्यश्च कदा तेषाम्, विनिवृत्तिर्भविष्यति? ॥७१॥
दर्शने परदोषाणां, लोकानां लोचनद्वयम् । सहस्रगुणतां याति, हा हा मत्सरजृम्भितम् ॥७२॥
स्वदोषदर्शने द्वे तु, जात्यन्ध इव चक्षुषी । ये तु धर्मपरा लोका-स्ते स्वल्पा न तु भूरिशः ॥७३॥
यो हि यत्कुरुते कार्यं, तदेतत्तस्य सुन्दरम् । आत्मसन्तुष्टमेवेदं, विचाररहितं जगत् ॥७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन राजन् ! मया प्रोक्त-[१]मल्पाः पातककारिणः । स्वबुद्ध्या धार्मिकाः सर्वे, वसन्ति नगरे तव ॥७५॥
ततोऽसौ रञ्जितो राजा, श्रेणिको मगधाधिपः । श्लाघां कुर्वन् जगादेदं, प्रतीत्य श्रावकौ तकौ ॥७६॥
अहो वां विवेकस्य, अहो वां जल्पितस्य च । अहो वां धर्मदाढर्च्यस्य, यदि मूल्यं जगत्त्रयी, ॥७७॥
विसर्जितौ नरेन्द्रेण, प्रियङ्करशुभङ्करौ । श्लाघ्यमानौ च लोकेन, सादरं स्वगृहं गतौ ॥७८॥
अहो अभय! ते बुद्धिः, सर्वेषामुपरि स्थिता । नाम्नैव मन्त्रिणः शेषा-स्त्वमाद्यो मन्त्रदर्शिनाम् ॥७९॥
अभयाय निजं दत्त्वा, देहस्यांशुकभूषणम् । विसर्जितसभो राजा, जगाम निजमन्दिरम् ॥८०॥
कृतस्नानो विशुद्धात्मा, संवीतशुचिशाटकः । शान्तः कृतोत्तरासङ्गो, धर्मधीर्धर्ममूर्तिकः ॥८१॥
मालतीजात्यपत्रादि-सान्द्रपुष्पैः सुगन्धिभिः । पूजयित्वा विधानेन, श्रेणिकः श्रीजिनेश्वरम् ॥८२॥
जात्यकाञ्चननिर्मित-यवानां साष्टकं शतम् । प्रत्यहं कारयित्वा च अष्टमङ्गलहेतवे ॥८३॥
मङ्गलानि पुरो ह्यष्ट, विलेख्य विधिपूर्वकम् । रोमाञ्चाञ्चितसर्वाङ्गो, योगमुद्रापुरस्सरम् ॥८४॥
देवेन्द्रादिस्तवैः सारैः, स्तुत्वा भुवनबान्धवम् । अष्टस्वङ्गेषु चैकैकं, नमस्कारपुरस्सरम् ॥८५॥
पुष्पं दत्त्वा ततो भुङ्क्ते, निर्मलीकृतदर्शनः । एवं च कुर्वतो राज्यं, तस्य गच्छन्ति वासराः ॥८६॥
तदहो धार्मिकाः स्तोकाः, शिष्टाचारपरा नराः । अन्यायकारिणो लोका, भूयांसो धर्मवर्जिताः ॥८७॥
सर्वदा सर्वकल्याण-कारके भवतारके । यतध्वं भो जना धर्मे, सामग्री दुर्लभा पुनः ॥८८॥
श्रीमदभयदेवाख्य-सूरिपादान्तवासिना । सूरिणा वर्धमानेन, धर्मरत्नकरण्डके ॥८९॥
धर्माधर्मकृताह्वाने, धर्माधर्मविवेचके । प्रस्तावे प्रथमे वृत्तिः, सङ्क्षेपादेव चर्चिता ॥९०॥

इति प्रथमोऽधिकारः

१ °मल्पे- B J मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनपूजाधिकारः २

उक्तो धर्माधर्माविति प्रथमाधिकारः, अथ द्वितीयो जिनपूजेति व्याख्यायते, अस्य चायमभिसम्बन्धः–प्रथमाधिकारे धर्माधर्मौ सप्रपञ्चावभिहितौ, तत्र चाधर्मं परित्यज्य धर्मे यत्नो विधेय इत्युक्तं, धर्मार्थिनां पुनर्देवतापूजनं प्रथममेवानुष्ठानम्, अतोऽत्राधिकारे पूजाविधिरुच्यते, इत्यनेन सम्बन्धेन समायातोऽयमधिकारो व्याख्यायते, तत्र द्रव्यभावभेदेन द्वैविध्यम् पूजाया उपवर्णयन् श्लोकमेकमाह–

द्रव्यतो भावतश्चैव, द्विविधं देवतार्चनम् ।
द्रव्यतो जिनवेश्मादि, स्तुतिस्तोत्रादि भावतः ॥४५॥

द्रव्यतो द्रव्यमाश्रित्य, **भावतो** भावमाश्रित्य, **चः** समुच्चये, **एवो** ऽवधारणे, स च भिन्नक्रमो द्विविधमेवेत्यत्र दृष्टव्यं, ततो **द्विविधमेव** द्विप्रकारमेव **देवतार्चनं** देवपूजनं ततो **द्रव्यतो** द्रव्यमाश्रित्य **जिनवेश्मादि** जिनमन्दिरादि, आदिशब्दाज्जिनबिम्बप्रतिष्ठादिपरिग्रहः उक्तं च–

जिणभवणबिम्बठावण-जत्तापूयाइ सुत्तओ विहिणा ।
दव्वत्थओत्ति नेयं, भावत्थयकारणत्तेण ॥१॥
विहिणाणुट्ठाणमिणं ति, एवमेयं सया करेंताणं ।
होइ चरणस्स हेऊ, नो इहलोगादविक्खाए ॥२॥ [पञ्चाशकप्र.६/३-४]

तथा **स्तुतिस्तोत्रादि भावतो** भावमाश्रित्य भावपूजेत्यर्थः । तत्र स्तुतय एकश्लोकाद्या यावदष्टौ, ततः परं स्तोत्राणि भण्यन्ते, आदिशब्दात् पौषध-सामायिक-स्वाध्यायादिपरिग्रहः । साधूनाश्रित्य पुनः सकलमपि यत्यनुष्ठानं भावस्तव एवेति श्लोकार्थः ॥४५॥
अथ द्विविधस्यापि पूजनस्याधिकारिणो निरूपयन्नाह–

अस्याधिकारिणो ज्ञेया, द्विविधस्याप्यगारिणः ।
प्रायो भावस्तवे चैव, साधूनामधिकारिता ॥४६॥

अस्य एतस्य तस्य देवतार्चनस्य **अधिकारिणो** योग्यतावन्तो **ज्ञेया** ज्ञातव्या **द्विविधस्यापि** द्रव्यभावभेदेन द्विप्रकारस्याप्यगारिणो गृहस्थाः, तथा **प्रायो** बाहुल्येन **भावस्तवे चैव** भावार्चन एव, प्रायोग्रहणात्संयमाबाधया गुणमपेक्ष्य कदाचिद् द्रव्यस्तवेऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधूनां यतीनामधिकारिता अधिकारित्वं योग्यत्वमित्यर्थः । उक्तं च–

दव्वत्थओ य भावत्थओ य, दव्वत्थओ बहुगुणोत्ति बुद्धि सिया ।
अनिउणमइवयणमिणं, छज्जीवहियं जिणा बिंति ।।१।।
छज्जीवकायसंजमो, दव्वथए सो विरुज्झई कसिणो ।
तो कसिणसंजमविऊ, पुप्फाईयं न इच्छंति ।।२।।
अकसिणपवत्तयाणं, विरयाविरयाण एस खलु जुत्तो ।
संसारपयणुकरणो, दव्वथए कूवदिट्ठंतो ।।३।। [पञ्चाशके ५/४२]

इति श्लोकार्थः ।।४६।।

अथ द्रव्यस्वरूपं तत्राधिकारिणस्तदुपदेशं च श्लोकेनाह–

विधाप्य विधिना श्राद्धः, सुन्दरं जिनमन्दिरम् ।
तत्र बिम्बं प्रतिष्ठाप्य, पूजयेत् प्रतिवासरम् ।।४७।।

विधाप्य कारयित्वा विधिना शास्त्रोक्तविधानेन श्राद्धः श्रावकः सुन्दरं शोभनं जिनमन्दिरं जिनगृहं, तत्र तस्मिन् बिम्बं जिनप्रतिमां प्रतिष्ठाप्य शास्त्रोक्तविधिना प्रतिष्ठां कारयित्वा पूजयेदर्चयेत् प्रतिवासरं प्रतिदिनमिति । तत्र विधाप्य विधिना श्राद्ध इत्यनेन जिनभवनं विधिनैवाधिकारिणैव च कारयितव्यमिति दर्शयति । तत्राधिकारी गृहस्थ एव शुभस्वजनादिविशेषणयुक्तो वेदितव्यः यत उक्तं–

अहिगारिओ य गिहत्थो, सुहसयणो वित्तसंजुओ कुलजो ।
अक्खुद्दो धीवलिओ, मइमं तह धम्मरागी य ।।१।।
गुरुपूयाकरणरुई, सुस्सूसाइगुणसंगओ चेव ।
नाया अहिगयविहाणस्स, धणियं माणप्पहाणो य ।।२।।
एसो गुणिड्ढिजोगा, अणेगसत्ताण तीए विणिओगा ।
गुणरयणवियरणेणं, तं कारितो हियं कुणइ ।।३।।
तं तह पवत्तमाणं, दट्ठुं केइ गुणरागिणो मग्गं ।
अन्ने उ तस्स बीयं, सुहभावाओ पवज्जन्ति ।।४।।
जो चिय सुहभावो खलु, सव्वन्नुमयम्मि होइ परिसुद्धो ।
सो चिय जायइ बीयं, बोहीए तेण नाएण ।।५।। [पञ्चाशके ७/४-८]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनभवनविधिः पुनः शुद्धभूमिग्रहादिकः, भणितं च–

जिणभवणकारणविही, सुद्धा भूमी दलं च कट्ठाई ।
भियगाणइसंधाणं, सासयवुड्ढी य जयणा य ।।१।।
दव्वे भावे य तहा, सुद्धा भूमी पएसकीला य ।
दव्वे अपत्तिगरहिया, अन्नेसिं होइ भावे उ ।।२।। [पञ्चाशके ७/९-१०]

इत्यादिर्जिनभवनविधापनविधिर्वक्तव्य इति तथा तत्र बिम्बं प्रतिष्ठाप्य इत्यनेन जिनबिम्बप्रतिष्ठाविधिः सूचितः स चेत्थं कर्तव्यस्तद्यथा-

निप्फन्नस्स य बिंबस्स, दिवसदसगस्स मज्झयारंमि ।
कायव्वा उ पइट्ठा, सा पुण तिविहा विणिद्दिट्ठा ।।१।।
वत्तक्खा खलु एक्का, खेत्तक्खा वन्निया तहा अपरा ।
अन्ना य महक्खा इह, ताण सरूवं इमं होई ।।२।।
जो तित्थवई जइया, तइया तब्बिंबठावणा पढमा ।
उसभाईणं सव्वेसिं, जाण बीया पइठ त्ति ।।३।।
तइया सत्तरिसमहिय-तित्थयरसयस्स पुण पइठ त्ति ।
जो जस्स जहा भावं, जणेइ सा तस्स तह जुत्ता ।।४।।
आसायणदोसो वि हु, बिंबबहुत्तेण मज्जणाइकओ ।
संकेयव्वो जं तीए, संभवो जाव दोसो उ ।।५।।
आवस्सयाइचुन्निसु, वुत्तो वि हु बिंबठावणाइविही ।
चरियाणुकित्तणाओ, न सेसपडिसेहगो सो वि ।।६।।
इय जहसत्तीए गुरुं, लहुं व सेलुब्भवं मणिमयं वा ।
जिणबिंबं कारितो, कल्लाणपरंपरं लहइ ।।७।।

प्रतिष्ठाविधिः पुनरयं-

घोसावेज्ज अमारिं, रन्ना संघस्स तह य वाहरणं ।
विन्नाणियसम्माणं, कुज्जा खेत्तस्स य विसुद्धिं ।।१।।
तह य दिसिपालठवणं, तक्किरियंगाण संनिहाणं च ।
दुविहसुई पोसहिओ, चेईए ठवेज्ज जिणबिंबं ।।२।।
नवरं सुमुहुत्तंमि, पुव्वुत्तरदिसिमुहं सउणपुव्वं ।
वज्जंतेसु चउव्विह-मंगलतूरेसु पउरेसु ।।३।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो सव्वसंघसहिओ, ठवणायरियं ठवेत्तु पडिमपुरो ।
देवे वंदइ सूरी, परिहियनिरुवहयसुइवत्थो ।।४।।
संतिसुयदेवयाणं, करेइ उस्सग्गथुइपयाणं च ।
सहिरन्नदाहिणकरो, सयलीकरणं तओ कुज्जा ।।५।।
ते सुद्धोभयपक्खा, दक्खा खेयण्णुया विहियरक्खा ।
ण्हवणगरा उ खिवंती, दिसासु सव्वासु सुद्धवलिं ।।६।।
तयणंतरं तु मुद्दिय-कलसचउक्केण ते ण्हवंति जिणं ।
पंचरयणोदएणं, कसायसलिलेण ण्हवयंति ।।७।।[१]
चंदणजलेण कुंकुम-जलकुंभेहिं च तित्थसलिलेण ।
सुद्धकलसेहिं पच्छा, गुरुणा अभिमंतिएहिं तहा ।।८।।
ण्हाणाणं सव्वाण वि, जलधारापुप्फधूयगंधाई ।
दायव्वमंतराले, जावंतिम कलसपत्थावो ।।९।।
एवं ण्हविए विंबे, नाणकलानासमाचरेज्ज गुरू ।
तो सरससुयंधेणं, लिंपेज्जा चंदणदवेण ।।१०।।
कुसुमाइं सुयंधाइं, आरोवेत्ता ठवेज्ज विंबपुरो ।
नंदावत्तयपट्टं, पूएज्ज य चारुदव्वेहिं ।।११।।
चंदणछडुब्भडेणं, वत्थेणं छायए य तं पट्टं ।
अह पडिसरमारोवे, जिणबिंबे रिद्धिविद्धिजुयं ।।१२।।
तो सरससुयंधाइं, फलाइं पुरओ ठवेज्ज विंवस्स ।
जंबीरबीजपूरा-इयाइं तो देज्ज गंधाइं ।।१३।।
मुद्दामंतन्नासं, विंबे हत्थंमि कंकणनिवेसं ।
मंतेण धारणविहिं, करेज्ज बिंबस्स तो पुरओ ।।१४।।
बहुविहपक्कन्नाणं, ठवणा वरवेहगंधपुडियाणं ।
वरवंजणाण य तहा, जाइफलाणं च सविसेसं ।।१५।।
सागिक्खूवरसोलग-खंडाईणं वरोसहीणं च ।
संपुन्नबली य तहा, ठवणं पुरओ जिणिंदस्स ।।१६।।
घयगुडदीवो सुकुमा-रियाजुओ चउजवारया दिसिसु ।
बिंबपुरओ ठवेज्जा, पूयाण बलिं तओ देज्जा ।।१७।।

---

१ अत्र कल्याणकलिका द्वितीयभागे, १३९ तमे पत्रे एका गाथा अधिका वर्तते
मट्टीयजलेणं ता, अट्ठवग्गसव्वोसहिजलेहिं च । गंधजलेणं तह, पवरवाससलिलेण य ण्हवंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आरत्तियमंगलदीवयं च, उत्तारिऊण जिणनाहं ।
वंदेज्जऽहिवासणदेव-याए उस्सग्गथुइदाणं ।।१८।।
अह जिणपंचंगेसु, ठावेइ गुरू थिरीकरणमंतं ।
वारा उ तिन्नि पंच व, सत्त व अचंतमपमत्तो ।।१९।।
मयणहले आरोवइ, अहिवासणमंतनासमवि कुणइ ।
झायइ य तयं बिंबं, सजियं व जहा फुडं होइ ।।२०।।
[1]एवमधिवासियं तं, बिंबं छाएज्ज सदसवत्थेण ।
चंदणछडुब्भडेणं, तदुवरि पुप्फाइं वि खिविज्जा ।।२१।।
हावेज्ज सत्तधन्नेण, तयणु जीवंतउभयपक्खाहिं ।
नारीहिं चउहिं समलं-कियाहिं विज्जंतनाहाहिं ।।२२।।
[2]पडिपुन्नचत्तसुत्तेण, वेढणं चउगुणं च काऊणं ।
ओमिणणं कारेज्जा, तुट्ठाहिं हिरन्नदाणजुयं ।।२३।।
तो वंदेज्जा देवे, पइट्ठदेवीए काउ उस्सग्गं ।
दिज्ज थुई तीए चिय, ठवेज्ज पुंरओ य घयपत्तं ।।२४।।
सोवन्नवट्टियाए, कुज्जा महुसक्कराहिं भरियाए ।
कणगसलागाए बिंब-नयणउम्मीलणं लग्गे ।।२५।।
सम्मं पइट्ठमंतेण, अंगसंधीसु अक्खरन्नासं ।
कुणमाणो एगमणो, सूरी वासे खिवेज्ज तहा ।।२६।।
पुप्फक्खयंजलीहिं, तो गुरुणा घोसणा ससंघेण ।
थेज्जत्थं कायव्वा, मंगलसद्देहिं विंबस्स ।।२७।।
जह सिद्धिमेरुकुल-पव्वयाण पंचत्थिकायकालाणं ।
इह सासया पइट्ठा, सुपइट्ठा होउ तह एसा ।।२८।।
तह दीवसिंधुससहर-दिणयरसुरवासवासखेत्ताणं ।
इह सासया पइट्ठा, सुपइट्ठा होउ तह एसा ।।२९।।
एत्थं सुहभावकए, अक्खयखेवे कयंमि बिंबस्स ।
सविसेसं पुण पूया, किच्चा चिइवंदणा य तहा ।।३०।।
मुहउग्घाडणसमणं-तरं च पूया य समणसंघस्स ।
फासुयघयगुडगोरस-णंतयमाईहिं कायव्वा ।।३१।।

---

१ एवमभि- B J मु. ।। २ पडिपुन्न चत्तु-कल्याणकलिकायाम् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोहणद्दिणे य सोहग्ग-मंतविन्नासपुव्वयमवस्सं ।
मयणहलकंकणं कर-यलाओ विंबस्स अवणेज्जा ॥३२॥
जिणबिंबस्स य विसये, नियनियठाणेसु सव्वमुद्दाओ ।
गुरुणा उवउत्तेणं, पउंजियव्वाओ ता य इमा ॥३३॥
जिणमुद्द[१] कलस[२] परमेट्ठि[३], अंग[४] अंजलि[५] तहासणा[६] चक्का[७] ।
सुरही[८] पवयण[९] गरुडा[१०], सोहग्ग[११] कयंजली[१२] चेव ॥३४॥
जिणमुद्दाए चउकलस-ठावणं तह करेह थिरकरणं ।
अहिवासमंतनसणं, आसणमुद्दाए अन्ने उ ॥३५॥
कलसाए कलसण्हवणं, परमेट्ठीए उ आहवणमंतं ।
अंगाए समालभणं, अंजलिणा पुप्फरुहणाइ ॥३६॥
आसणयाए पट्टस्स, पूयणं अंगफुसणं [च] चक्काए ।
सुरहीए अमयमुत्ती, पवयणमुद्दाए पडिबोहो ॥३७॥
गरुडाए दुट्ठरक्खा, सोहग्गाए य मंतसोहग्गं ।
तह अंजलीए देसण-मुद्दाहीं कुणह कज्जाइं ॥३८॥
चोएइ एत्थ कोइ, जह किर साम्माइयंमि किं गुरुणो ।
जुत्तो ठियस्स एसो, सावज्जो विंहिसमारंभो? ॥३९॥
कायवहचरणभंसा, तंमि जओ तस्स नियमओ हुंति ।
जायइ य अविस्सासो, गुरूवएसेसु सीसाणं ॥४०॥
भन्नइ एत्थ समाही, कह वि जइ होइ कोइ कायवहो ।
तह वि हु गुरुवयणाओ, आयरणाओ य नो दुट्ठो ॥४१॥
विहिवयणं च पमाणं, सुत्तुत्तं जेण ठावणा गुरुणा ।
कज्जा जिणबिंबाणं, तं सविसयं हवइ करणे ॥४२॥
अन्नह निव्विसयत्तं, पावेइ तयं तु तेण सो जुत्तो ।
तइया तह गुरुठवणे, विंबस्स उ गउरवाइगुणा ॥४३॥
अन्नं च सुत्तविहिणा, संभवजयणाए विंबठवणाए ।
नो कायवहाईया, दोसा जिणभवणकहणे व्व ॥४४॥
जिणभवणबिंबपूया-इयं च न विणा गुरुं गिही मुणई ।
न य तत्थ न कायवहो, गुरुणो दोसो य न य वुत्तो ॥४५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलमेत्थ पसंगेणं, ठविए एवं जिणस्स विंबंमि ।
अट्ठोत्तरकलससएण, मज्जिए पुण जहाविहवं ।।४६।।
पूयाइएसु जत्तो, परमो पइदियहमेव कायव्वो ।
एवं जयंताण लहुं, जायइ चारित्तपरिणामो ।।४७।। [ ]

अथ पूजाविधिमुपदर्शयन् श्लोकमेकमाचष्टे–

विधिना शुचिभूतेन, काले सत्कुसुमादिभिः ।
स्तुतिस्तोत्रैश्च गम्भीरैः, कर्तव्यं जिनपूजनम् ।।४८।।

विधिना विधानेनाऽऽशातनापरिहारेण मुखस्थगनलक्षणेन, **शुचिभूतेन** द्रव्यभावशौचवतेत्यर्थः, **काले** सन्ध्यात्रयलक्षणे **सत्कुसुमादिभिः** शोभनपुष्पादिभिः **स्तुतिस्तोत्रैश्च** लघुबृहद्भिः स्तवनैश्च **गम्भीरैः** गम्भीरार्थैः **कर्तव्यं** विधेयं **जिनपूजनं** जिनार्चनमिति श्लोकसमासार्थः ॥१॥

तत्र विधिरागमविद्भिरेवमुक्तस्तद्यथा–

वत्थेण बंधिऊणं, नासं अहवा जहा समाहीए ।
वज्जेयव्वं तु तया, देहंमि वि कंडुयणमाई ।।१।।
भिच्चा वि सामिणो तिह, जत्तेण कुणंति जे उ सणिओगं ।
हुंति फलभायणं ते, इयरेसिं किलेसमेत्तं तु ।।२।।
भुवणगुरूण जिणाणं, विसेसओ एवमेव दट्ठव्वं ।
ता एवं चिय पूया, एयाण बुहेहिं कायव्वा ।।३।।
[पञ्चाशके ४/२०-२२] इत्यादि ।

शुचिभूतत्वं पुनरेवमुक्तं–

तत्थ सुइणा दुहावि हु, दव्वे ण्हाएण सुद्धवत्थेण ।
भावे उ अवत्थोचिय, विसुद्धचित्तप्पहाणेण ।।१।। [पञ्चाशके ४/९] इत्यादि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालस्त्वेवमभिहितस्तद्यथा–

कालंमि कीरमाणं, किसिकम्मं बहुफलं जहा लोए ।
इय सव्वा चिय किरिया, नियनियकालंमि विन्नेया ।।१।।
सो पुण इह विन्नेओ, संझाओ तिन्नि ताव ओहेण ।
वित्तिकिरियाऽविरुद्धो, अहवा जो जस्स जावइओ ।।२।।

[पञ्चाशके ४/४-५] इत्यादि ।

सत्कुसुमादीनि पुनरेवं कथितानि, तद्यथा–

वरगंधधूयसव्वो-सहेहिं उदगाइएहिं चित्तेहिं ।
सुरहिविलेवणवरकुसुम-दामावलिदीवएहिं च ।।१।।
सिद्धत्थयदहिअक्खय-गोरोयणमाइएहिं जहलाभं ।
कंचणमोत्तियरयणाइ-दामएहिं च विविहेहिं ।।२।।
पवरेहिं साहणेहिं, पायं भावो वि जायई पवरो ।
न य अन्नो उवओगो, एएसिं सयाण लट्ठयरो ।।३।।
इहलोयपरलोइयकज्जाणं पारलोइयं अहियं ।
तंपि य भावपहाणं, सो वि य इय कज्जगम्मोत्ति ।।४।।
ता नियविहवाणुरूवं, विसिट्ठपुप्फाइएहिं जिणपूया ।
कायव्वा बुद्धिमया, तम्मी बहुमाणसारा य ।।५।।

[पञ्चाशके ४/१४-१८] इत्यादि ।

गम्भीरार्थस्तुतिस्तोत्राणि पुनरेवं–

थुइथोत्ता पुण नेया, गंभीरपयत्थविरइया जे उ ।
सब्भूयगुणुक्कित्तण-रूवा खलु ते जिणाणं तु ।।१।।
तेसिं अत्थाहिगमे, नियमेणं होइ कुसलपरिणामो ।
सुंदरभावा तेसिं, इयरंमि वि रयणनाएण ।।२।।
जरसमणाई रयणा, अन्नायगुणा वि ते समेंति जहा ।
कम्मजराईथुइमा-इया वि तह भावरयणाउ ।।३।।

इति श्लोकभावार्थः ॥४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ सा पूजा कतिविधेति दर्शयन्नाह–

चारुपुष्पामिषस्तोत्रै-स्त्रिविधा जिनपूजना ।
पुष्पगन्धादिभिश्चान्यै-रष्टधेयं निगद्यते ।।४९।।

चारुपुष्पामिषस्तोत्रैरिति चारूणि प्रधानानि, पुष्पाणि कुसुमानि, आमिषाणि-नैवेद्यानि, स्तोत्राणि-स्तवनानि, तैश्चारुपुष्पामिषस्तोत्रैः त्रिविधा त्रिप्रकारा जिनपूजना जिनार्चना पुष्पगन्धादिभिः कुसुमवासादिभिः आदिशब्दाद् धूपदीपाऽक्षतादिग्रहः चः समुच्चये अन्यैरपैराचार्यैः अष्टधा अष्टप्रकारा इयमेषा निगद्यते कथ्यते इति श्लोकार्थः ।।४९।।

अथाष्टविधत्वमेवास्याः सदृष्टान्तं श्लोकदशकेनाह–

शुभैः सुगन्धिभिः पुष्पै-र्यः कुरुते जिनार्चनम् ।
स प्राप्नोति समं कीर्त्या, रत्नचन्द्र इव श्रियः ।।५०।।
पुटपाकादिभिर्गन्धै-र्येऽर्चयन्ति जिनेश्वरम् ।
लभन्ते तेऽचिरात्सिद्धिं, रत्नसुन्दरवज्जनाः ।।५१।।
धूपं दहति यः सारं, भावसारं जिनाग्रतः ।
स याति लब्धसर्वर्द्धि-र्नरकेसरिवच्छिवम् ।।५२।।
प्रदीपयति यो भक्त्या, प्रदीपं जिनमन्दिरे ।
स हि स्यादखिलश्रीणां, भानुप्रभ इव प्रभुः ।।५३।।
योऽक्षतैरक्षतैः शुभ्रै-रर्हतां कुरुते बलिम् ।
कणसार इवात्यन्तं, वर्धतेऽसौ कणश्रिया ।।५४।।
जिनानामग्रतो दद्यात्, सुन्दराणि फलानि यः ।
फलवत्यः क्रियास्तस्य, भवन्ति फलसारवत् ।।५५।।
सुगन्धसर्पिषा यस्तु, करोति जिनमज्जनम् ।
सद्घृतभृतपात्राणि, स्थापयेद्वा तदग्रतः ।।५६।।
स गोधन इवोदग्रां, भुक्त्वा भोगपरम्पराम् ।
क्षीणनिःशेषकर्मांशः, प्रयाति परमां गतिम् ।।५७।।
यः स्नापयति बिम्बानि, सुगन्धवरवारिणा ।
सदम्भः पूर्णकुम्भान् वा, ढौकयेद्यस्तदग्रतः ।।५८।।
स प्राप्य सुन्दरा लक्ष्मी, रससार इवेप्सिताः ।
सम्पूर्णधर्मसम्पत्त्या, ततो याति शिवालयम् ।।५९।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुभैः प्रशस्तैः सुगन्धिभिः सुरभिभिः पुष्पैः कुसुमैर्यः कश्चिदनिर्दिष्टनामा कुरुते विधत्ते जिनार्चनं जिनपूजनं सोऽसौ प्राप्नोति लभते समं सह कीर्त्या ख्यात्या रत्नचन्द्र इव रत्नचन्द्राभिधानराजपुत्रवत् श्रियः ? [सम्पदः] इति प्रथमश्लोकार्थः ॥५०॥

पुटपाकादिभिरनेकप्रकारप्रधानसुगन्धद्रव्याग्निपाकादिभि [1]र्गन्धैर्वासैर्ये केचनार्चयन्ति पूजयन्ति जिनेश्वरं [वीतरागं] लभन्ते प्राप्नुवन्ति तेऽचिरात् स्तोककालेन सिद्धिं मुक्तिं रत्नसुन्दरवत् रत्नसुन्दराख्यराजसूनुरिव जना लोका इति द्वितीयश्लोकार्थः ॥५१॥

धूपं प्रतीतं दहत्युद्ग्राहयति यः कश्चित्सारं सारद्रव्यनिष्पन्नं प्रधानमित्यर्थः, भावसारमन्तःकरणप्रधानं जिनाग्रतो जिनपुरतः सोऽसौ याति गच्छति लब्धसर्वर्द्धिः प्राप्ताशेषसमृद्धिर्नरकेसरिवत् नरकेसरिनामनृपनन्दन इव शिवम् मोक्षमिति तृतीयश्लोकार्थः ॥५२॥

प्रदीपयति प्रज्वालयति यः कश्चिद् भक्त्या भावेन प्रदीपं दीपं जिनमन्दिरे जिनगृहे सो ऽसौ हि पूरणे स्याद् भवेद् अखिलश्रीणां समस्तलक्ष्मीनां भानुप्रभ इव भानुप्रभाभिधाननृपात्मज इव प्रभुर्नायको भवेदिति चतुर्थश्लोकार्थः ॥५३॥

---

१ सूत्रकृताङ्ग की टीकामें आचार्य श्रीशीलांक लिखते है : गन्धाः कोष्ठपुटपाकादयः अर्थात् संपुटमें रखकर चन्दनचूर्ण आदिको पकाने से वे कोष्ठपुटपाक गंध बनते है।

...पिण्डनिर्युक्तिकी टीकामें आचार्य श्री मलयगिरिजी ने गन्ध शब्दका अर्थ पटवास आदि किया है: गन्धा पटवासादयः अर्थात् पटवास आदि को गन्ध कहते है। सामान्य रूपसे पटवास पूर्वकालसे आजतक बढिया कीमती वस्त्रों में डालनेकी सुगन्धि है, तथापि मलयगिरिजी के उपर्युक्त उल्लेख से जाना जाता है कि मध्यकालमें पुटपाक गन्धों के अतिरिक्त पटवासभी देवोंकी पूजामें चढाया जाता होगा.

वासकी व्याख्या करते हुए आप (प्रश्नव्याकरणटीकामें आ. अभयदेवसूरि) लिखते है: वरचूर्णरूपावासास्ताडिताः अर्थात् उखली आदिमें चन्दन-कर्पूर आदि पदार्थो को कूटकर बनाया हुआ। सफेद चूर्ण वास नामसे प्रसिद्ध है।
[श्री जिनपूजाविधिसंग्रह ले. पं. कल्याणविश्रयजी म. टि पृ. ३८-३९]

प्रतिष्ठाकल्पो में वासाः श्वेतवर्णाः ऐसा विधान है, तब गंधके लिए वासा एव ईषद् कृष्णा गन्धाः इस प्रकार लक्षण बताया है। गंध-चंदन अगरु, कस्तूरी, बरास, शिलारस आदि सुगंधित पदार्थो के मिश्रण से बनता है और उसको पुटपाकबनाने से वह अधिक सुगन्ध छोडता है। जिनपूजा विधि संग्रह पृ.५२।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः कश्चिदक्षतैस्तण्डुलैरक्षतैरखण्डैः शुभ्रै र्विशदैरर्हतां जिनानां कुरुते विधत्ते बलिम् उपहारं कणसार इव कणसाराख्यश्रेष्ठिपुत्रवदत्यन्तमत्यर्थं वर्धते वृद्धिं यात्यसौ स कणश्रिया धान्यलक्ष्म्योपलक्षणत्वाच्छेषश्रीभिरपीति पञ्चमश्लोकार्थः ॥५४॥

जिनानाम् अर्हतामग्रतः पुरतो दद्यात्प्रयच्छेत् सुन्दराणि प्रधानानि फलानि आम्रनालिकेरादीनि यः कश्चित् फलवत्यः सफलाः क्रिया वाणिज्यादिकर्माणि तस्य फलपूजाकर्तुर्भवन्ति जायन्ते फलसारवत् फलसाराभिधानराजपुत्रस्येवेति षष्ठश्लोकार्थः ॥५५॥

सुगन्धसर्पिषा सद्गन्धनाशिकापेयघृतेन यः पुनः करोति विधत्ते जिनमज्जनं जिनस्नानं, सद्घृतभृतपात्राणि शोभनघृतसम्पूर्णस्थालानि स्थापयेद्वा न्यसेद्वा तदग्रतो जिनाग्रत इत्यर्थः सोऽसौ गोवर्धन (गोधन) इव गोवर्धना (गोधना) भिधानकुटुम्बिक इवोदग्रामुदारां भुक्त्वा भूयो भोगपरम्परां शब्दादिविषयसुखमालिकां क्षीणनिःशेषकर्मांशः प्रलीनाखिलज्ञानाऽ- वरणीयादिकर्मकलङ्कांशः प्रयाति गच्छति परमां प्रधानां गतिं सिद्धिगतिमित्यर्थः, इति सप्तमाष्टमश्लोकद्वयार्थः ॥५६-५७॥

यः कश्चित् स्नापयति अभिषिञ्चति बिम्बानि प्रतिमाः सुगन्धवरवारिणा सुरभिप्रवरनीरेण, सदम्भःपूर्णकुम्भान् वा प्रवरतरविमलजलभृतकलशान् वा ढौकयेत् स्थापयेत्तदग्रतो जिनबिम्बाग्रतः सो ऽसौ प्राप्य समासाद्य सुन्दरा : प्रधाना, लक्ष्मी : श्रियो रससार इव रससाराभिधानराजनन्दन इव ईप्सिताः सम्पूर्णधर्मसम्पत्त्या परिपूर्णयतिधर्मप्राप्त्येत्यर्थः ततस्त दनन्तरं याति गच्छति शिवालयं निर्वाणनगरमिति नवम-दशमश्लोकद्वयार्थः ॥५८-५९॥

अथ प्रकरणकारसूचितपुष्पाद्यष्टविधपूजाफलप्रतिपादकरत्नचन्द्रादिकथानकानि कथ्यन्ते, तानि पुनरमूनि, तद्यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुष्पपूजायां रत्नचन्द्रकथा

अस्ति समस्तसुश्रेष्ठ-वस्तुस्तोमविराजितम् । जितशत्रुपुरश्रीकं, चारुप्रासादसम्पदम् ॥१॥
सम्पदाकुलशालीन-भूरिलोकसमाकुलम् । कुलक्रमागतानेक-सद्व्यवहारसुन्दरम् ॥२॥
मध्यखण्डे क्षितौ ख्यातं, भूभालतिलकोपमम् । बङ्गाजनपदस्यान्त-र्धनधान्यसमाकुलम् ॥३॥
समस्तशास्तसंसार-सारभूतं महीतले । अत्रैव भारते क्षेत्रे, पुरं विजयवर्धनम् ॥४॥
तत्रास्त्यनेकसंग्राम-शिरोनिर्व्यूढसाहसः । साहसाङ्कसमो राजा, नाम्ना च रत्नशेखरः ॥५॥
रत्नावली च तस्याग्र-महिषी विश्वविश्रुता । संसारसुखसर्वस्वं, हरस्य ललिता यथा ॥६॥
तया सार्धं महीशस्य, कुर्वतः कामसेवनम् । सञ्जातस्तनयः सारो, भववृक्षफलोपमः ॥७॥
समये प्रतिष्ठितं नाम, रत्नचन्द्र इति स्फुटम् । ततोऽसौ वर्धते विश्व-माह्लादयन् यथा शशी ॥८॥
काले समर्पितो राज्ञा, कलाग्रहणहेतवे । कलाचार्यस्य तेनापि, पाठितः सकलाः कलाः ॥९॥
ततो यौवनमारूढः, परिणीता नृपाङ्गजाः । युवराजपदे पित्रा, प्रमोदेन प्रतिष्ठितः ॥१०॥
एकदा चाश्ववाहिन्यां, निर्गतो हयहेषया । पूरयन्नम्बरं सर्वं, महाटव्यां विवेश सः ॥११॥
ततोऽप्यपहृतोऽश्वेन, सुवेलगिरिगह्वरे । नीत्वा मुक्त्वा ततो वाजी, जगामादर्शनं क्षणात् ॥१२॥
कुमारोऽपि पिपासार्त्तः, श्रान्तो विस्मितमानसः । पपौ निर्झरनिर्व्यूढं, शीतलं निर्मलं पयः ॥१३॥
कन्दमूलकृताहार, इतश्चेतश्च पर्यटन् । ददर्शैकत्र शुभ्रोच्चं, सुन्दरं जिनमन्दिरम् ॥१४॥
प्रविष्टस्तत्र सानन्दो, रोमाञ्चाञ्चितविग्रहः । सर्वतोऽपि क्षिपच्चक्षुः, कौतुकाक्षिप्तमानसः ॥१५॥
शान्तं कान्तं शिवं सौम्यं, सुरूपं सुमनोहरम् । बिम्बं युगादिदेवस्य, दृष्ट्वात्यर्थं मुमोदसः ॥१६॥
ततश्च चिन्तयामास, विस्मितो हर्षनिर्भरः । यथा कोऽप्येष निःशेष-विश्ववन्द्यो जगत्प्रभुः ॥१७॥
जगत्पूज्यो जगज्ज्येष्ठो, देवदेवो जगद्धितः । तदहं पूजयाम्येनं, सत्पुष्पैर्भक्तियोगतः ॥१८॥
विचिन्त्यैवं सुगन्धीनि, गृहीत्वा कुसुमानि सः । भक्त्या युगादितीर्थेशं, सप्रमोदमपूपुजत् ॥१९॥
ततः प्रणम्य निष्क्रान्तो, राजपुत्रो जिनालयात् । बहिर्मण्डपमागत्य, वेदिकायां निषण्णवान् ॥२०॥
सानन्दो जिनबिम्बास्य-न्यस्तदृष्टिरचिन्तयत् । धन्योऽहं पुण्यवानद्य, कृतार्थः कृतरक्षणः ॥२१॥
येन देवाधिदेवोऽयं, मया दृष्टो महाप्रभुः । पूज्योऽयं सर्वदेवानां, ध्येयोऽयं सर्वयोगिनाम् ॥२२॥
वन्द्योऽयं सर्वसाधूनां, त्राताऽयं सर्वदेहिनाम् । हितोऽयं सर्वजीवानां, दातायं सर्वसम्पदाम् ॥२३॥
इत्याद्यनेकधा हृष्टो, यावदास्ते स चिन्तयन् । तावदेकः समायातो, वृद्धस्तत्र नभश्चरः ॥२४॥
ततो वापीजलेनाशु, शुचिर्भूत्वा सितांशुकः । गृहीत्वा शतपत्रादि, सुगन्धकुसुमोत्करम् ॥२५॥
प्रविश्य जिनवेश्मान्तः, पूजयित्वा जिनेश्वरम् । विधाय विधिवद्भक्त्या, विशुद्धं चैत्यवन्दनम् ॥२६॥
दधानः सर्वतो देहे, प्रकटं पुलकोत्करम् । ततोऽसौ स्तोतुमारब्धः, संवेगातिशयं वहन् ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा- जय त्वं जगदानन्द! जय त्वं जगदीश्वर! । जय त्वं त्रिजगद्बन्धो!, जय त्वं त्रिजगत्प्रभो! ॥२८॥
जय त्वं त्रिजगन्नेत्र! जय त्वं जगदर्चित! । जय त्वं त्रिजगन्नाथ! जय त्वं नाभिनन्दन! ॥२९॥
नमस्ते केवलालोक-लोकालोकविलोकिने । नमस्ते भुवनादित्य-भव्याम्भोजविकासिने ॥३०॥
नमस्ते सर्वतः सर्प-न्मोहध्वान्तविनाशिने । नमस्ते विश्वविख्यात-सर्वनीतिप्रकाशिने ॥३१॥
नमस्ते सर्वकल्याण-कारिणे क्लेशवारिणे । नमस्ते भक्तिमल्लोक-भवसन्तापहारिणे ॥३२॥
रागो द्वेषश्च मोहश्च, त्रयोऽपि प्रहतास्त्वया । अहं त्वेभिः सदाकालं, प्रहन्ये सन्ततं प्रभो! ॥३३॥
हन्यमानश्च देवेश!, त्वां शरण्यमुपाश्रितः । तदेतेभ्यो भयोद्भ्रान्तं, रक्ष रक्ष मुनीश! माम् ॥३४॥
चत्वारोऽपि त्वयात्यर्थं, कषायारातयो हताः । अहं पुनरिमैः पापैः, प्रभो! पीडये निरन्तरम् ॥३५॥
तदित्थं मामिमानुच्चै-र्बाध्यमानान्महाप्रभो! । अचिन्त्यशक्तिसंयुक्त!, नाथ! वारय वारय ॥३६॥
कर्माष्टकं त्वयात्यन्तं प्रलयं प्रापि लीलया । नाथेऽपि त्वयि बद्धोऽह-मष्टभिरपि कर्मभिः ॥३७॥
तदित्थं बद्धमालोक्य, बद्धानां प्रविमोचक ! । निष्कर्मन् ! सर्वकर्मभ्यो, मां विमोचय मोचय ॥३८॥
लीलयापि त्वया तीर्णो, विस्तीर्णोऽपि महार्णवः । अहं तु तत्र मज्जामि, कर्मसम्भारभारितः ॥३९॥
प्रसीद साम्प्रतं स्वामिन्! मज्जन्तं मां भवार्णवे । सद्धर्मपोतमारोप्य, देव! तारय तारय ॥४०॥
ध्वस्तमिथ्यात्वनिद्रस्त्वं, त्वं निद्रासु प्रबोधक! । मिथ्यात्वनिद्रया सुप्तं, मां प्रबोधय बोधय ॥४१॥
किं बहुनान्तरैः सर्वैः, शत्रुभिः सततं सदा । हन्यमानं जगत्त्रात-[1]र्मामपालय पालय ॥४२॥
अनन्तपरमानन्द-युक्त! मुक्तिसुखालय! । सुप्रसन्नं मनः कृत्वा, मां प्रापय शिवालये ॥४३॥
त्वं स्वामी त्वं च मे बन्धु-स्त्वं मित्रं त्वं च मे गुरुः । त्राणं त्वमेव देवेश!. भूयाज्जन्मनि जन्मनि ॥४४॥
आभवं भवसम्भ्रान्त-जन्तुसन्तानरक्षक! । भूयान्मे भूयसी भक्ति-स्त्वय्येव परमेश्वर! ॥४५॥
तथा प्रसीद मे नाथ!, शरणागतवत्सल! । यथाज्ञां तावकीं पूर्णा-मासंसारं करोम्यहम् ॥४६॥
एवं स्तुत्वा जिनाधीशं, संवेगभरनिर्भरः । जिनालयाद्विनिष्क्रम्य, निषण्णः सोऽपि मण्डपे ॥४७॥
ततो गत्वा कुमारोऽपि, तं ननाम नताङ्गकः । उपविश्य तदासन्ने, पप्रच्छेदं कृताञ्जलिः ॥४८॥
केनेदं कारितं तुङ्गं, सुन्दरं जिनमन्दिरम्? । को वा देवाधिदेवोऽयं?, कुतो वा त्वं समागतः ? ॥४९॥
गन्तव्यं वा त्वया कुत्र?. कुत्र वावस्थितिस्तव ? । स प्राह श्रूयतां वत्स!, सावधानेन कथ्यते ॥५०॥
वैताढ्यपर्वते रम्ये, पुरे गगनवल्लभे । सूरप्रभाभिधस्तत्रा-भवन्मे[2] पितामहः ॥५१॥
तेनेदं कारितं वत्स!, जिनवेश्म मनोहरम् । युगादिदेवदेवोऽय-मृषभो जिनपुङ्गवः ॥५२॥
आगच्छामि त्वहं तस्मा-त्पुराद्गगनवल्लभात् । गन्तव्यं तु न कुत्रापि, मया मर्तव्यमत्र हि ॥५३॥
यतः कल्ये समायातो, विद्याचारणसन्मुनिः । केवलज्ञानविज्ञात-विश्वव्यापारविस्तरः ॥५४॥
स वन्दित्वा मया पृष्टः, प्रमाणं निजकायुषः । तेनोक्तं दिवसा भद्र!, पञ्चैव तव जीवितम् ॥५५॥

१ र्मामपालय- BJ मु. । = आनन्दालय- J पार्श्वभागे ॥ २ BJC । भवन्मम-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्यक्त्वा सर्वमारम्भ-मुद्यच्छ स्वहितं प्रति । कुरु पारत्रिकं कार्यं, धर्मे चित्तं निवेशय ॥५६॥
आकर्ण्येदं ततस्तूर्ण-महमत्र समागतः । विधिनाऽनशनं कृत्वा, मरिष्यामि गिराविह ॥५७॥
तत्तवापि जिनो देवः, पूजनीयोऽस्तु सर्वदा । धर्मस्तेन प्रणीतोऽस्तु, गुरवस्तु सुसाधवः ॥५८॥
तथा भो न त्वया जीवा, मारणीया निरागसः । नैवालीकं वचो वाच्यं, नो [१]कार्या परधनस्पृहा ॥५९॥
परदारा न भोक्तव्याः, कार्यो नातिपरिग्रहः । मद्यं मांसं च द्यूतं च, दूरतः परिवर्जयेः ॥६०॥
पापर्द्धिं मा कृथा वत्स!, मा कृथा रात्रिभोजनम् । माऽश्रीयाः फलमज्ञातं, वेश्यासक्तिं च मा कृथाः ॥६१॥
त्याज्यो दुर्जनसंसर्गः, कार्या सज्जनसङ्गतिः । तदेष श्रावको धर्मः, सिद्धिसौख्यकरोऽस्तु ते ॥६२॥
तथैनं भो महासत्त्व! गृहाण विधिपूर्वकम् । मन्त्रं पञ्चनमस्कार-नामकं भवनाशकम् ॥६३॥
यत्प्रभावेण निःशेषं, वाञ्छितं जायतेऽङ्गिनाम् । नश्यन्ति व्यापदः सर्वाः, सन्ति सानुग्रहा ग्रहाः ॥६४॥
यतः—

धन्नाण मणोभवणे, सद्धाबहुमाणवट्टिनेहिल्लो ।
मिच्छत्ततिमिरहरणो, वियरइ नवकारवरदीवो ॥६५॥
जाण मणवणनिकुंजे, रमइ नमोक्कारकेसरिकिसोरो ।
ताणं अणिट्ठदोघुट्ट[२]-थट्टघडणा न नियडावि ॥६६॥
ता निबिडनिगडघडणा, गुत्ती ता वज्जपंजरनिरोहो ।
नो जावऽज्जवि जविओ, एस नमोक्कारवरमंतो ॥६७॥
दप्पिट्ठदुट्ठनिट्ठुर-सुरुट्ठदिट्ठीवि ताव होइ परो ।
नवकारमंतचिंतण-पुव्वं न पलोइओ जाव ॥६८॥
मरणरणंगणगणसंगमे गमे गामनगरमाईणं ।
एयं सुमरंताणं, ताणं संमाणणं च भवे ॥६९॥

तथा- **जलमाणमणिप्पहपुण्ण-फारवरप्फणिवईफणाहिंतो ।**
पसरंतकिरणभरभग्ग-भीमतिमिरंमि पायाले ॥७०॥
चिंताणंतरघडमाण-माणसाणंदिइंदियत्थाणं ।
विलसंति दाणवा किर, तं सुनमोक्कारफुरियलवो ॥७१॥
जंपि य विसिट्ठपयई-विज्जाविन्नाणविणयनयनिउणं ।
अक्खलियपसरपसरंत-कंतजसभरियभुवणयलं ॥७२॥
अचंतणुरत्तकलत्त-पुत्तपामोक्खसयलसुहिसयणं ।
आणापडिच्छणुच्छाहि-दच्छगिहिकम्मकारिजणं ॥७३॥

---

१ BJC । कार्याऽन्यधन° मु. ॥ २ = गज J पार्श्वे । °दोघट्ट° इति संवेगरंगसालायां । तुला- मणोरमाकहा ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अच्छिन्नलच्छिवित्थड्ड-सामिभोइत्तवियरणपहाणं ।
रायामच्चाइविसिट्ठ-लोयपयईबहुमयं च ।।७४।।
जहचिंतियसंपज्जंत-सुंदरं दिन्नदुक्कहचमक्कं ।
पाविज्जइ मणुयत्तं, तं पि नमोक्कारफललेसो ।।७५।।
जंपि य सव्वंगपहाण-लडहचउसट्ठिसहसवणियाणं ।
बत्तीससहस्समह-प्पभावभासंतसामंतं ।।७६।।
सुरपुरसरिच्छछन्नवइ- गामकोडीकडप्पदुप्पसरं ।
सुरलोयसरिसपुरवर-बिसत्तरीलक्ख(सहस)संखालं ।।७७।।
बहुसंखखेडकब्बड-मडंबदोणमुह[पमुह] बहुवसिमं ।
दीसंतकंतसुंदर-संदणसंदोहदिन्नदिहं ।।७८।।
परचक्ककंपणाणप्प-दप्पपाइक्कचक्कसंकिन्नं ।
पगलंतगंडमंडल-पयंडदोघुट्टथट्ठिलं ।।।७९।।
मणपवणजवणचंचल-खुरक्खयखोणितलतुरंगालं ।
सोलसहस्सपरिसंख-[1]रक्खकरक्खापरिक्खित्तं ।।८०।।
नवनिहिचोद्दसरयण-प्पहावपाउब्भवंतसयललच्छं ।
छक्खंडभरहखेत्ता-हिवत्तणं लब्भए भुवणे ।।८१।।
तंपि हु किर सद्धा-सलिलसेयपरिवड्ढियस्स तस्सेव ।
पंचनमोक्कारतरुस्स, कोवि फलविलसियवियारो ।।८२।।
जंपि य सियदेवंऽसुय-संवुयसुरसयणसुंदरुच्छंगे ।
सिप्पिपुडंतो मोत्ता-हलं व उववज्जए तत्तो ।।८३।।
आजम्मं रम्मतणू, आजम्ममुदग्गजोव्वणावत्थो ।
आजम्मं रोगजरा-रयसेयविवज्जियसरीरो ।।८४।।
आजम्मं ण्हारुवसट्ठि-मंसरुहिराइतणुमलविमुक्को ।
आजम्मं अमिलायंत-मल्लवरदेवदूसधरो ।।८५।।
उत्तत्तजच्चकंचणतरुणदिवायरसमप्पहसरीरो ।
पंचप्पहरयणाऽऽहरण-किरणकब्बुरियदिसिचक्को ।।८६।।
अक्खंडगंडमंडल-लुलंतकुंडलपहापयासिल्लो ।
रमणीयरमणअमरण-रमणीगणमणहरो किंच ।।८७।।

१ रक्खरक्खा परिखित्तं BJCP। जक्खरक्खा परिकिन्नं-इति संवेगरंगसाला । रक्खकजक्खपरिक्खित्तं-मु. ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]गहचक्कमेक्कवेलं, पाडेउं भूयलं भमाडेउं।
सयलकुलाचलचक्कं, चालेउं तह य लीलाए ॥८८॥
माणसपमुहमहासर-सरियादहसायराणसलिलाइं।
पलयपवणोव्व समकाल-मेव सत्तो विसोसेउं ॥८९॥
तेलोक्कपूरणत्थं, एक्करवणच्चियमहल्लतरुरूवो।
परमाणुमेत्तरूवोवि, तह य होउ लहु समत्थो ॥९०॥
किं बहुणा संतंपि हु, असंतयं तह असंतमवि संतं।
चक्कं एक्करवणच्चिय, दरिसेउमलंकरेउं वा ॥९१॥
नमिरसुरविसरसिरमणि-[2]मऊहरिंछोलिविच्छुरियपाओ।
भूभंगाइट्ठपहिट्ठ-सव्वमुट्ठितपरिवारो ॥९२॥
चिंताणंतरसहसत्ति-संपडंताणुकूलविसयगणो।
अणवरयरइरसुक्कड-विलासकरणेक्कदुल्ललिओ ॥९३॥
अणिमिसनयणसहस्सा-वलोयसमकाललद्धदट्ठव्वो।
समकालोदयसमुविंत-सयलसुहकम्मपयई य ॥९४॥
रिद्धिप्पबंधबंधुर-विमाणमालाहिवत्तणं सुइरं।
पालइ अखलियपसरं, सुरलोए किर सुरिंदोवि ॥९५॥
तंपि असेसं जाणसु, सम्मं सब्भावगब्भविहियस्स।
पंचनमोक्काराराहणस्स लीलाइयलवोत्ति ॥९६॥

[संवेगरंगसाला गा. ७६५०-७६७५, ७६७७-७६८२]

स चायं पञ्चनमस्कारनामा महामन्त्रः ॐ नमो अरिहंताणं इत्यादि।

ध्यातव्योऽयं त्वया भद्र!, सन्मन्त्रः शुचिना सदा। येनेप्सितार्थसंसिद्धि-र्जायते ते निरन्तरम् ॥९७॥
मह्यमपि त्वया भद्र!, म्रियमाणाय सादरम्। देयोऽयं निकटस्थेन, कर्णाभ्यर्णे स्फुटाक्षरम् ॥९८॥
तथा भो मम विद्येते, द्वे विद्ये पाठसिद्धिके। एकाऽऽकाशगमा नाम्ना, द्वितीया बहुरूपिणी ॥९९॥
तदेते द्वे वरे विद्ये, गृहाण मम तुष्टये। स्थातव्यं च ममाभ्यर्णे, दिनानां पञ्चकं त्वया ॥१००॥
ततस्तथेति तद्वाक्यं, कुमारः प्रतिपन्नवान्। अथ भूयोऽप्युवाचेदं, सूरतेजाः कुमारकम् ॥१०१॥
स्वस्थाने सन्ति मे भूरि-बान्धवाः स्नेहनिर्भराः। समायातोऽत्र तेनाह-मेकाक्येव मुमूर्षया ॥१०२॥

१ गहचक्कमेक्कहेलं-इति संवेगरंगसाला ॥ २ = मयूखपङ्क्तिः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनाख्यायैव बन्धूनां, समाध्यर्थं वराचले । तदहो कुरु साहाय्य-मसहायस्य साम्प्रतम् ॥१०३॥
नमस्कारप्रदानेन, ममोत्पादय निर्वृतिं । कुमारेणापि तद्वाक्यं, तथैव च प्रतिश्रुतम् ॥१०४॥
ततो द्वावपि संविग्नौ, ततः स्थानात्समुत्थितौ । गृहीत्वा चारुपुष्पाणि, पूजयित्वा जिनेश्वरम् ॥१०५॥
विधाय विधिना सम्यक्-सम्पूर्णं चैत्यवन्दनम् । कृत्वा च सुप्रणिधानं, निष्क्रान्तौ जिनमन्दिरात् ॥१०६॥
गतौ दक्षिणदिग्भागे, तस्यैव जिनवेश्मनः । स प्रमृज्य ततस्तत्र, सुविशालं शिलातलम् ॥१०७॥
सूरतेजास्ततस्तस्मि-न्नुपविश्य सुधीरधीः । विधिनानशनं कृत्वा, वक्तुमेवं प्रचक्रमे ॥१०८॥

नमोत्थुणं अरिहंताणं भगवंताणं इत्यादि

तेलोक्कपूयणिज्जे, जगप्पईवे जिणे जियारिगणे ।
वंदामि जे अईए, अणाइकालेण सिद्धिगए ॥१०९॥
वंदामि संपयं जे, विहरंति महाविदेहवासम्मि ।
वंदामि जे भविस्संति एसु पन्नरसु खेत्तेसु ॥११०॥
वंदामि णिट्ठियट्ठे, अणाइकालेण जे गया मोक्खं ।
तित्थयरसिद्धभेया-इएहिं भेएहिं सव्वेवि ॥१११॥
वंदामि गणहरिंदे, देविंदनमंसिए महासत्ते ।
तीयाणागयभेए, संपयकालेवि जे ते उ ॥११२॥
वंदामि बारसंगी-समग्गसुयधारए महासत्ते ।
तीयाणागयसंपइ-भेयगए सव्वभावेण ॥११३॥
वंदामि वंदणिज्जे, सदेवमणुयासुरस्स लोगस्स ।
दसपुव्विणो अईए, अणागए वट्टमाणे अ ॥११४॥
जे केइ जगप्पहाणे, आयरिए आयरियमहासत्ते ।
चरणकरणप्पहाणे, अणुओगधरे जहासत्तिं ॥११५॥
तीयाणागयसंपइ-भेएणं जे जयंमि आयरिया ।
ते सव्वेवि महप्पा वंदे परमाए भत्तीए ॥११६॥
वंदामि वंदणिज्जे अवज्जसंजमगुणुज्जुए धीरे ।
सुयसागरमगिलाए, अज्झाविंते उवज्झाए ॥११७॥
भरहेरवयविदेहे, नाणाइसमन्निया महासत्ता ।
देहे वप्पडिबद्धा, अखंडियवयकलाविल्ला ॥११८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अट्ठारससीलंगाणधारया सयलगुणगणाइन्ना ।
जे केइ तीयणागय-संपइकालाणुगा मुणओ ।।११९।।
ते भगवंते तेल्लोक्क-पूयठाणंगए महासत्ते ।
मणसा वयसा काए-ण वंदिमो परमविणएणं ।।१२०।।
तहा-जिण-सिद्ध-केवलीणं, मणपज्जवनाणि-ओहिनाणीणं ।
गणहर-पत्तेयाणं, सयंसंबुद्धाण नाणीणं ।।१२१।।
चोद्दसपुव्वीण तहा, दसपुव्वीण य तहन्नसूरीणं ।
आगमववहारीणं, पुरओ भत्तीए विणएणं ।।१२२।।
नाणंमि दंसणंमि य, चरणंमि तवंमि जे उ अइयारा ।
तेऽहं आलोएमी, मणसा वयसा य काएण ।।१२३।।
काले विणए य तहा, बहुमाणुवहाण तह अनिन्हवणे ।
जं मे वितहमणुठियं, तं निंदे तं च गरिहामि ।।१२४।।
वंजण-अत्थे तह तदु-भए य तह सुयहराण किइकम्मे ।
जं किंचि मया एत्थं, वितहारियं तयं निंदे ।।१२५।।
संका कंखा वितिगिच्छा, पसंस तह संथवो कुलिंगीण ।
सम्मत्तस्सइयारे, जे उ कए निंदिमो ते उ ।।१२६।।
उववूहा जन्न कया, मुणीण तह दुत्थियाण थिरकरणं ।
जिणधम्मे वच्छल्लं, बालगिलाणाइविसयं तु ।।१२७।।
भत्तीए जन्न कया, पभावणा पवयणंमि जइणंमि ।
तिविहं तिविहेण य, तयं निंदामि इमाण पच्चक्खं ।।१२८।।
पाणिवह-मुसावाए, अदत्त-मेहुण-परिग्गहे चेव ।
विरईए जं वितहं, कयं ति तं निंदिमो इण्हिं ।।१२९।।
इंदिय-कसाय-जोगे, पडुच्च जं वितहसेवियं किंचि ।
तं एयाणं पुरओ, तिविहेणं निंदिमो एस ।।१३०।।
बारसभेयंमि तवे, अइयारो बायरो य सुहुमो वा ।
तं एयाणं पुरओ, तिविहं तिविहेण निंदामि ।।१३१।।
खामेमि सव्व जीवे, सव्वे जीवा खमंतु मे ।
मेत्ति मे सव्वभूएसु, वेरं मज्झं न केणइ ।।१३२।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पेच्छंतु जिणे सव्वे, सिद्धा य तिलोयपूइया सव्वे ।
पुरओ भगवंताणं, तुम्हाणमिणं तु सव्वंपि ।।१३३।।
पाणवहं सुहुमेयर-तस-थावरगोयरं तु तिविहेणं ।
मणसा वयसा तणुणा, कय-कारिय-अणुमईहिं तु ।।१३४।।
पच्चक्खामि इयाणिं, जावज्जीवाए सव्वभावेण ।
तह कोह-लोह-मायाइ-भेयओ अलियवयणंपि ।।१३५।।
सचित्त-मीस-अचित्त-गोयरं गाम-नयर-रन्नेसु ।
परकीयादत्तंपि हु, तिविहं तिविहेण वोसरिमो ।।१३६।।
देवीहिं माणुसीहिं, तिरिक्खजोणीहिं मेहुणं सव्वं ।
धम्मोवगरणवज्जं, परिग्गहं वोसिरेऽवज्जं ।।१३७।।
सव्वं असणं पाणं, खाइमं तह साइमं च तिविहेणं ।
तुम्ह पुरओ इयाणिं, वोसिरिमो जावजीवाए ।।१३८।।

इत्थं विभावयंश्चेतः-संशुद्धया शुद्धभावनाः । स्मरन् पञ्चनमस्कारं, भक्त्या संविग्नमानसः ।।१३९।।
प्रतिजागर्यमाणश्च, रत्नचन्द्रेण सादरम् । सत्त्वेषु समतां बिभ्र-ज्जीवित्वा दिनपञ्चकम् ।।१४०।।
अन्ते समाधिना मृत्वा, जातः कल्पे स पञ्चमे । इन्द्रसामानिको देवो, दीर्घायुश्च महर्द्धिकः ।।१४१।।
अथासौ रत्नचन्द्रोऽपि, तं निर्याम्य नभश्चरम् । औदिचीं दिशमाश्रित्य, चलितः पर्वतात्ततः ।।१४२।।
गच्छता च कुमारेण, दृष्टमेकत्र सुन्दरम् । काननं नागवल्लचादि-नानामण्डपसङ्कुलम् ।।१४३।।
तस्य मध्ये च शुभ्रोच्चः, प्रासादः सुमनोहरः । आरूढः कुमरस्तत्र, सानन्दो गतसाध्वसः ।।१४४।।
तत्रापश्यत्सुरूपाढ्यं, सुन्दरं कन्यकाद्वयम् । पृष्टे च ते कुमारेण, के युवां किमुनामिके ? ।।१४५।।
एकाकिन्यौ किमित्यत्र, तिष्ठतः कथ्यतां मम । तत्रैका वक्तुमारब्धा, कम्पमानाङ्गयष्टिका ।।१४६।।
श्रूयतां भो महासत्त्व!, सङ्क्षेपात्तव कथ्यते । वैताढ्ये दक्षिणश्रेण्यां, पुरे गगनवल्लभे ।।१४७।।
हेमचन्द्राभिधानोऽस्ति, विद्याधरमहाप्रभुः । अहं तु पुत्रिका तस्य, नाम्ना मदनसुन्दरी।१४८।
मत्पित्रा चान्यदा पृष्टः, सिद्धपुत्रो विचक्षणः । यथास्या मम सत्पुत्र्याः, को भर्ता भविता वद ।।१४९।।
ततस्तेन समादिष्टो, रत्नशेखरनन्दनः । रत्नचन्द्र इति ख्यातः, कुमारो भूमिगोचरः ।।१५०।।
ततोऽहं पुष्णती तत्र, सत्कलाः सकला अपि । सन्तिष्ठामि निजे गेहे, सखीचक्रसमन्विता ।।१५१।।
अन्यदा भानुवेगस्य, पुत्रेणाहं विलोकिता । भानुप्रभाभिधानेन, कामान्धेन दुरात्मना ।।१५२।।
ततः संहृत्य मामत्र, प्रासादे स विमुक्तवान् । स्वयं पुनर्गतः पापो, विद्यासाधनहेतवे ।।१५३।।
तथेयं या द्वितीयात्र, कन्यका कनकच्छविः । पुत्री चम्पाधिराजस्य, नाम्ना तु रत्नमेखला।१५४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषापि तेन पापेन, ततो हत्वा दुरात्मना। मुक्ता ममान्तिके कामं, कामपीडितचेतसा ॥१५५॥
तदेष ते मया सर्वः, स्ववृतान्तो निवेदितः। साम्प्रतं श्रोतुमिच्छामि, गोत्रं नाम च तावकम् ॥१५६॥
कथयाऽनुग्रहं कृत्वा, कुरुष्व मम निर्वृतिम्। कुमारोऽपि स्ववृत्तान्तं, तस्यै सर्वं न्यवेदयत् ॥१५७॥
श्रुत्वेदमाहतुः कन्ये, समानन्दितमानसे। अहो नौ कीदृशं पश्य, सत्कल्याणमुपस्थितम्। ॥१५८॥
यस्मादमृतवृष्ट्याभं, सञ्जातं तव दर्शनम्। नूनमरण्यवासोऽपि, स्वर्गावाससमोऽजनि ॥१५९॥
तन्नाथालं विलम्बेन, शीघ्रं परिणयस्व नौ। यावन्नायाति मूढात्मा, पापोऽसौ खेचराऽधमः ॥१६०॥
कुमारोऽपि हि ते कन्ये, सङ्क्षेपात्परिणीतवान्। ततस्तिष्ठति सानन्द- स्तत्र यावत्क्षणान्तरम् ॥१६१॥
तावद्भानुप्रभो वेगा-दाजगाम तदन्तिकम्। विलोक्य कुमरं तत्र, कोपाविष्टोऽब्रवीदिदम् ॥१६२॥
रे! रे! शस्त्रं गृहाण त्वं, यद्यस्ति तव पौरुषम्। एषोऽहं मारयामि त्वां, रटन्तं विस्वरैः स्वरैः ॥१६३॥
एवमाक्रोशयन्नुच्चै-रागतः कुमरान्तिकम्। मुक्तः खड्गप्रहारश्च, कुमारस्य यथाबलम् ॥१६४॥
कुमारेणापि वञ्चित्वा, खड्गाघातं तकं जवात्। प्रहतः खड्गमादाय, स दुष्टः खेचराऽधमः ॥१६५॥
प्रापितः पञ्चतामाशु, रञ्जितं भार्ययोर्मनः। ततो भार्ये गृहीत्वाऽसौ, ततः स्थानाद्विनिर्गतः ॥१६६॥
स्तोकान्तरं गतो याव-त्तावदस्तं गतो रविः। गूढद्वारां गृहाकारां, दृष्ट्वाऽसौ वंशजालिकाम् ॥१६७॥
प्रिये ! प्रवेशयामास, तत्र सानन्दमानसः। स्वयं तु खड्गमादाय, द्वारदेशे व्यवस्थितः ॥१६८॥
गता रात्रिः क्रमेणाथ, यावदालोकते प्रिये। तावन्नैव वीक्षते नैव, तस्मिन् वंशकुडङ्गके ॥१६९॥
ततोऽसौ चिन्तयामास, विस्मयाकुलमानसः। क्व गते ते कथं वापि, केन नीते मम प्रिये? ॥१७०॥
एवं चिन्तातुरो यावत्, स तिष्ठति कुमारकः। तावदेकं सुरं कान्तं, सम्पश्यति पुरः स्थितम् ॥१७१॥
देवः प्राह कुमार! त्वं, किं जानासि न वेति माम्। न चेति कुमरो ब्रूते, सुरः प्राह निशम्यताम् ॥१७२॥

सोऽहं विद्याधरो भद्र !, यस्तु निर्यामितस्त्वया।
मृत्वाहं पञ्चमे कल्पे, शक्रतुल्यः सुरोऽजनि (ऽभवम्) ॥१७३॥

तदहो मा कृथाः खेदं, त्वदीये यद्गते प्रिये। अचिरादेव ते ताभ्यां, सार्धं सङ्गो भविष्यति ॥१७४॥
चिन्तारत्नमिदं सर्वं, चिन्तितार्थप्रदायकम्। गृहाण कुरु मे तुष्टिं, कुमारोऽपि तथाऽकरोत् ॥१७५॥
सुरः प्रोवाच भूयोऽपि, कुमर! त्वं व्रजाधुना। वैताढ्यपर्वते रम्ये, पुरे गगनवल्लभे ॥१७६॥
स्थातव्यं च त्वया तत्र, हेमचन्द्रस्य मन्दिरे। तिष्ठतस्तत्र ते सर्वं, सम्पत्स्यते समीहितम् ॥१७७॥
तथा भद्र ! त्वया यत्नः, कार्यो धर्मे जिनोदिते। धर्म एवाऽङ्गिनां येन, सर्वकल्याणकारकः ॥१७८॥

यतः-**धर्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्धनं,**
धर्मेणैव भवन्ति निर्मलयशोविद्यार्थसम्पत्तयः।
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते,
धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥१७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्रागा मदभिन्नगण्डकरटास्तिष्ठन्ति निद्रालसा,
द्वारे हेमविभूषिताश्च तुरगा हेषन्ति यद्गर्पिताः ।
वीणावेणुमृदङ्गशङ्खपणवैः सुप्तश्च यद्बोध्यते,
तत्सर्वं सुरलोकसौख्यसदृशं धर्मस्य विस्फूर्जितम् ॥१८०॥

एवमुक्त्वा गतो देवः, क्षणादेव सुरालये । ततो गतः कुमारोऽपि, पुरे गगनवल्लभे ॥१८१॥
मा मेऽवज्ञा भवेत्तत्र, नूनं श्वशुरमन्दिरे । रूपं मदनमञ्जर्या, विधाय तद्गृहे गतः ॥१८२॥
पिता कण्ठग्रहं कृत्वा, रुरोद जननी तथा । हा वत्से! क्व गतासि त्वं, केनाऽऽनीतासि साम्प्रतम् ॥१८३॥
तयापि कथितं सर्वं, येन नीता च यत्र च । आनीता रत्नचन्द्रेण, रत्नशेखरसूनुना ॥१८४॥
क्वासौ क्वासौ महाभाग-स्तैः ससम्भ्रममूचिरे । तव सङ्कल्पितो भर्ता, जामाता पुनरावयोः ॥१८५॥
कन्यका प्राह मां द्वारि, मुक्त्वा तेन तिरोदधे । यत्सम्बन्धिगृहे सन्तो, न विशन्ति यतस्ततः ॥१८६॥
ततश्च हेमचन्द्रेण, वायुवेगास्तुरङ्गमाः । वरवेगा महाप्राणा, योधाश्चापि समन्ततः ॥१८७॥
सम्प्रेषिताः प्रयत्नेन, कुमारान्वेषणाकृते । गत्वाऽऽगता न तैर्दृष्टो, रत्नशेखरनन्दनः ॥१८८॥
सखेदः पार्थिवो जातः, साशङ्का हेमसुन्दरी । अहो गृहागतो दूरी-भूतो जामातृकः कथम् ॥१८९॥
यद्यसावुपरोधेन, नागच्छति गृहे स्वयम् । किमर्थं च करे कृत्वा, नानीतः पुत्रिके! त्वया ॥१९०॥
त्वं हि तस्य मया दत्ता, विवाहश्चात्र वत्सरे । भविष्यत्यन्तरा कर्म, यदि ते नो विबाधकम् ॥१९१॥
प्रेषितः पुरुषस्तेन, लेखहस्तो महारथः । बङ्गाजनपदे गत्वा, पुरे विजयवर्धने ॥१९२॥
रत्नशेखरभूपाय, गत्वा लेखमथार्पयत् । भणितोऽनेन भूपोऽसौ, विनम्य विधिपूर्वकम् ॥१९३॥
हेमचन्द्रनरेन्द्रस्य, सुता मदनमञ्जरी । रत्नचन्द्राय सा दत्ता, युष्मभ्यं यदि रोचते ॥१९४॥
श्रुत्वेदं सविषादोऽसौ, तस्मै प्रत्युत्तरं ददौ । अश्वारूढश्च पुत्रो मे, नीतः केनापि वैरिणा ॥१९५॥
आश्वीयं पृष्टतो लग्नम्, पादातं च समुद्धतम् । तदद्यापि च नायाति, सखेदा वयमास्महे ॥१९६॥
प्रतिलेखं समादाय, गच्छ त्वं निजमन्दिरे । सति धर्मिणि चिन्त्यन्ते, धर्माः किं कथ्यतेऽधुना ॥१९७॥
एतच्छ्रुत्वा समायातः, स्वस्थाने लेखवाहकः । मुखेन कथितं किञ्चि- ल्लेखोऽपि च समर्पितः ॥१९८॥
अहो संसारवैचित्र्य–मुभयत्राप्यनिर्वृतिः । हेमचन्द्रो विचिन्त्यैवम्, मनसा मौनमाश्रितः ॥१९९॥
श्यामाकारा कुरूपा च, जाता मदनमञ्जरी । किमेतदिति सोद्वेगा, सम्पन्ना हेमसुन्दरी ॥२००॥
कदाचन कृशा स्थूला, गोरी तन्वी कदाचन । नानारूपधरा दृष्टा, सिद्धयोगेव योगिनी ॥२०१॥
विस्मिता जननी तस्याः, जनकोऽपि च विस्मितः । एकान्ते भणिता ताभ्याम्, किं त्वं मदनमञ्जरी? ॥
तयोक्तं कथयिष्यामि, सर्वं हि समयागतम् । या काचिद्येन सञ्जाता, नानारूपविधायिका ॥२०३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मिन्नेव दिने नक्त-मदृश्याञ्जनयोगतः । जनोक्तं शृण्वती भ्रान्ता, प्रतिवेश्म पुरेऽखिले ॥२०४॥
एकस्मिंश्च गृहे ब्रूते, वृद्धा विद्याधरी वचः । सुतां सङ्क्षेपतो वत्से ! सामग्रीं प्रगुणां कुरु ॥२०५॥
प्रज्ञप्ती मम पुत्रेण, **मेघनादेन** साधिता । यात्रा युगादिदेवस्य, महाटव्यां प्रवर्तिता ॥२०६॥
आनिन्ये कन्यके तत्र, खेचरी भूमिगोचरी । गीतनृत्यकलाजाल-कुशला रूपशालिनी ॥२०७॥
नेपथ्यं भोजनं भोगाः, भव्यास्तेषां कृते मया । नेतव्याः पुत्रसन्देशा-त्तद्याने प्रगुणीभव ॥२०८॥
ततस्तया यथादिष्टं, समस्तं प्रगुणीकृतम् । ततश्चचाल सानन्दा-च्छीघ्रं गगनवर्त्मना ॥२०९॥
तदनु कौतुकाक्षिप्ता, चेले मदनमञ्जरी । पश्यन्ती च महीं रम्यां, सम्प्राप्ता जिनमन्दिरे ॥२१०॥
बहुविद्याधराकीर्णे, नानाविद्याधरीभृते । कर्पूरागुरूसन्दोह-गन्धद्रव्यैर्मनोहरे ॥२११॥
दृष्टं युगादिदेवस्य, बिम्बं जनमनोहरम् । विधाय सहजं रूपं, रत्नचन्द्रेण तत्क्षणात् ॥२१२॥
रोमाञ्चाञ्चितगात्रेण, सुगन्धां सुमनोहराम् । गृहीत्वा मालतीमालां, पूजितः परमेश्वरः ॥२१३॥
परमात्मा जगन्नाथः, पुत्रीयितजगत्त्रयः । ऋषभो भवकान्तार- सार्थवाहो निरञ्जनः ॥२१४॥
चिरं चालोकि पूजादि, निर्निमेषेण चक्षुषा । तनूकृतो भवाम्भोधिः, सञ्जाता चित्तनिर्वृतिः ॥२१५॥
भूयोभूयस्ततः पश्यन्, स्निग्धदृष्ट्या जिनाननम् । प्रेक्षामण्डपमागत्य, निषण्णो वरविष्टरे ॥२१६॥
अत्रान्तरे सशृङ्गारा, सर्वलोकमनोहरा । अष्टादशाब्ददेशीया, नर्तिता रत्नमेखला ॥२१७॥
आक्षिप्तश्च जनः सर्वः, शिरांसि च धुनापितः । अहो नृत्यकला काचि-दपूर्वात्र विलोकिता ॥२१८॥
ततः प्रनर्तिता हाव-भावसारं ससम्भ्रमम् । हेमचन्द्रनरेन्द्रस्य, सुता मदनमञ्जरी ॥२१९॥
तयापि रञ्जितो लोको, गुणग्राही विनिर्मितः । गता सा नृत्यपर्यन्ते, तत्रस्थपितुरन्तिके ॥२२०॥
हेमचन्द्रनरेन्द्रेण, स्नेहसारं ससम्भ्रमम् । सन्तोषामृततृप्तेन, पृष्टा मदनमञ्जरी ॥२२१॥
वत्से ! कथय मे सर्वं, विस्मयो मम वर्तते । क्व नीता केन चानीता, त्वया किं वान्वभूयत ? ॥२२२॥
तयापि मूलतः सर्वं, यथावृत्तं निवेदितम् । मद्गृहे च त्वदाकारा, त्वदाह्वाना च कन्यका ॥२२३॥
क्षणे क्षणेऽन्यथाकारा, नटीवाश्चर्यकारिणी । सा का कथय मे पुत्रि!, यदि त्वं मदनमञ्जरी ॥२२४॥
तयोक्तं न विजानेऽहं, तात ! तत्त्वं शरीरिणां । भूरिधूर्तसमाकीर्णा, नानाकारा वसुन्धरा ॥२२५॥
क्षन्तव्यं मम तातेन, यदात्मा परिणायितः । गुरूणां हि प्रमोदाय, डिम्भदुश्चेष्टितं मम ॥२२६॥
राजाह मर्षितं पुत्रि !, ते भर्ता कुत्र साम्प्रतम् ? । अत्रान्तरे स्वभावस्थो, रत्नचन्द्रस्तयेक्षितः ॥२२७॥
तत्समीपे स्थिता रत्न-मेखला मुदिताननाः । दृष्टा मदनमञ्जर्या, ततः पित्रे निवेदितम् ॥२२८॥
तेनापि स समाहूतः, समायातस्तदन्तिके । पृष्टश्च भो महासत्त्व!, रत्नचन्द्रः कुतो भवान् ? ॥२२९॥
स च प्राह **सुवेला**रव्य-पर्वतात्तु परिभ्रमन् । प्रयोजनवशादत्र, सम्प्राप्तो जिनमन्दिरे ॥२३०॥
ततो गतस्तमादाय, हेमचन्द्रो निजे पुरे । सकलत्रो धृतस्तत्र, गुरुगौरवयोगतः ॥२३१॥
हेमचन्द्रनरेन्द्रेण, पृष्टा मदनमञ्जरी । ब्रूहि त्वं यदि जानासि, विस्मयो मम वर्तते ॥२३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानारूपधरः कोऽयं, त्वद्रूपेण च मद्गृहे। स्थित्वा गतो न वार्तापि, कथिता तेन गच्छता ॥२३३॥
साचख्यौ ज्ञातवृत्तान्ता, स्वपित्रे भर्तृचेष्टितम्। यथावज्ञाभियानेन, दर्शितर्द्धिर्निजा तव ॥२३४॥
ततो रञ्जितचित्तेन, हेमचन्द्रेण जल्पितम्। अहो वीर्यमहो लब्धि-र्भूमिगोचरचारिणः ॥२३५॥
भूमिगोचर इत्येषा, अनास्था नैव सङ्गता। विद्याधरोऽयमित्येष, बहुमानोऽस्तु सङ्गतः ॥२३६॥
ततोऽसौ द्विगुणस्नेहः, सम्पश्यति वधूवरम्। स्वसुतातो विशेषेण, वल्लभां रत्नमेखलाम् ॥२३७॥
मेघनादेन सानन्दं, नृत्यन्ती रत्नमेखला। दृष्टा मनःप्रविष्टा च, हृत्वा नीता च पर्वते ॥२३८॥
वसन्तसुन्दरा ह्वाने, झरन्निर्झरसङ्कुले। नानावृक्षसमाकीर्णे, गुहाकूटसमाकुले ॥२३९॥
ततः सञ्जातखेदेन, हेमचन्द्रेण सादरम्। स्मृता विद्या तया सर्वैः, वृत्तान्तोऽस्य निवेदितः ॥२४०॥
स्थाने स्थाने ततस्तूर्णं, सामर्षो रत्नचन्द्रकः। निषेध्य गच्छतः सर्वान्, विद्याधरमहाभटान् ॥२४१॥
एकाकी खड्गमादाय, वार्यमाणोऽपि खेचरैः। चचाल विकटैः पादैः, खड्गासत्त्वसमन्वितः ॥२४२॥
वसन्तसुन्दरे प्राप्तो, गिरौ दृष्टश्च खेचरः। मेघनादो रुदन्ती च, सशोका रत्नमेखला ॥२४३॥
समाकृष्य ततः खड्गं, रे रे भव पुरो मम। प्रजल्पन् मेघनादस्य, तूर्णमभ्यर्णमागतः ॥२४४॥
लग्नं ततस्तयोर्युद्धं, मत्तद्विरदयोरिव। परस्परं महाघोरं, दूरमारुष्टचित्तयोः ॥२४५॥
जित्वा क्षणेन तं कृत्वा, प्रहारशतजर्जरम्। गृहीतमायुधं तस्य, कुमारेण बलादपि ॥२४६॥
ततः संरोहिणी योगा-त्प्रहारास्तस्य तत्क्षणम्। संरोहिताः कुमारेण, खेचरः प्रगुणोऽभवत् ॥२४७॥
ततस्तस्मै स्वसा स्वीया, मेघनादेन सादरं। तत्रैवानीय संक्षेपा-द्दत्ता कनकमञ्जरी ॥२४८॥
कारितं च तया सार्धं, पाणिग्रहणमङ्गलम्। कुमाररत्नचन्द्रस्य, खेचरेण प्रमोदतः ॥२४९॥
दत्तं च मेघनादेन, धनदेवेन पुष्कलम्। धनं कनकमञ्जर्या, लक्षशः कोटिशोऽपि वा ॥२५०॥
ददौ च रत्नवस्त्रादि, कुमारायापि खेचरः। ततो गतो निजे गेहे, तामादाय कुमारकः ॥२५१॥
सस्नेहं दृश्यमानोऽसौ, हेमचन्द्रेण भूभुजा। आस्ते तत्र प्रमोदेन, कान्तात्रयसमन्वितः ॥२५२॥
रत्नचन्द्रकुमारेण, विनम्य भणितो नृपः। साम्प्रतं तात! गच्छामि, पश्यामि पितरौ निजौ ॥२५३॥
हेमचन्द्रनरेन्द्रेण, विमानं प्रगुणीकृतम्। भृतम् च भूरिरत्नानां, मुक्तानां वरवाससाम् ॥२५४॥
युष्माभिर्यददत्ता मे, ऊढा मदनमञ्जरी। तत्तात ! मर्षणीयं मे, सन्तो हि नतवत्सलाः ॥२५५॥
कान्ताभिः सहितस्तत्र, विद्याधरगणान्वितः। रत्नचन्द्रः समारूढो, विमानं चलितं ततः ॥२५६॥
क्षणादेव च सम्प्राप्तं, पुरे विजयवर्धने। रत्नशेखरभूपस्य, तत्रापि वरमन्दिरे ॥२५७॥
अवतीर्णः कृतातिथ्यो, रत्नशेखरभूभुजा। विद्याधरजनः सर्वैः, कुमारेण विसर्जितः ॥२५८॥
पितुः पादग्रहं कृत्वा, प्रणतो मातृपादयोः। लब्धाशी राजवृद्धानां, यथायोगं ननाम सः ॥२५९॥
वध्वोऽपि च यथाज्येष्ठं, प्रणेमुर्गुरुपादयोः। दत्ताशिषश्च ताः श्वश्रा, निषेदुः पादयोः पुरः ॥२६०॥
रत्नचन्द्रकुमारेण, मातापित्रोः सविस्तरः। कथितो निजवृत्तान्तो, यावदत्र समागतः ॥२६१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो राजाब्रवीदेवं, नास्त्यसाध्यं सुकर्मणाम्। विपदोऽपि हि पुत्रस्य, सम्पदो विधिना कृताः ॥२६२॥
कालेन गच्छता जाताः, पुत्रा जनमनोहराः। कुमारस्य कृतार्थोऽस्मि, मुदितो मेदिनीपतिः ॥२६३॥
ततो दत्त्वा निजं राज्यं, रत्नचन्द्राय धीरधीः। धर्मस्थाने धनं भूरि, विनियोज्य विधानतः ॥२६४॥
दमघोषमुनीन्द्राणां, समीपे व्रतमुज्ज्वलम्। विधाय विधिना धीरो, जगाम त्रिदशालयम्॥
रत्नचन्द्रनरेन्द्रोऽपि, पालयामास हेलया। स्वराज्यं नामिताशेष-भूपालकृतसन्नतिः ॥२६६॥
साधिताशेषदुर्दान्तं, पालिताखिलधार्मिकम्। कोषागारादिसम्पूर्णं, सुरञ्जितजगज्जनम् ॥२६७॥
समुल्लसद्यशोराशि-धवलीकृतभूतलम्। एकातपत्रमुत्खात-कण्टकं मेदिनीतलम् ॥२६८॥
कान्तकान्तासुखासक्तो, धर्मार्थकृतसेवनः। सर्वलोककृतानन्दो, कालं नयति भूपतिः ॥२६९॥
एकदा च समागत्य, पुरुषेण ससम्भ्रमम्। विज्ञप्तोऽसौ यथा देव! दयासुन्दरनामके ॥२७०॥
त्वदुद्याने समायाता, दमघोषमुनीश्वराः। प्राशुके भूमिभागे च, तस्थुः शिष्यगणान्विताः ॥२७१॥
तच्छ्रुत्वा रञ्जितो राजा, दत्त्वास्मै पारितोषिकम्। पुरुषं प्रेषयामास, चतुरङ्गबलान्वितः ॥२७२॥
स्वयं चचाल जात्याश्व-खुरोत्क्षुण्णमहीतलः। दमघोषमुनीन्द्राणां, वन्दनाय धराधिपः ॥२७३॥
गत्वा प्रदक्षिणापूर्वं, वन्दित्वा भक्तियोगतः। नातिदूरे न चासन्ने, स निषण्णः कृताञ्जलिः ॥२७४॥
प्रारब्धा दमघोषेण, सूरिणा धर्मदेशना। आदौ धर्मस्य सम्यक्त्वं, तस्य शुद्धिविधायकम् ॥२७५॥
चैत्यवन्दनमाख्यातं, तच्च पूजापुरस्सरम्। पूजा च मुखकोषादि-विधानेन महाफला ॥२७६॥
परिणामोऽपि पूजायाः, समीहितफलप्रदः। विधानं विधिना दत्ते, किं किं नात्र शरीरिणाम् ? ॥२७७॥
यतः-चैत्यपूजनतः सम्यक्, शुभो भावः प्रजायते। तस्मात्कर्मक्षयः सर्वं, ततः कल्याणमश्नुते ॥२७८॥
एष एव जगत्सारः, शुभो भावः प्रकीर्तितः। एष एव जगत्त्राण-मेष एव च बान्धवः ॥२७९॥
एष एव भवावर्ते, पततामवलम्बनम्। एष एव भवाटव्या-मटतां मार्गदर्शकः ॥२८०॥
एष एव भिषक्कल्पः, सर्वव्याधिनिषूदनः। एष एव गदोच्छेद-करणे परमौषधम् ॥२८१॥
एष एव महामन्त्रः, परमानन्दकारणम्। एष एव परं तत्त्वं, सम्मतं तत्त्ववेदिनाम् ॥२८२॥
एष एव कुमानुष्य-दुःखविच्छेददायकः। एष एव कुदेवत्व-मनःसन्तापनाशकः ॥२८३॥
एष एव महामोह-वृक्षोच्छेदकुठारकः। एष एव महानिद्रा-द्रावणप्रतिबोधकः ॥२८४॥
एष एव गुरुक्रोध-वह्निविध्यापने जलम्। एष एव महामान-पर्वतोद्दलने पविः ॥२८५॥
एष मायाकुडङ्ग्याश्च, दहने दवसन्निभः। एष लोभसमुद्रस्य, शोषणे वडवानलः ॥२८६॥
मत्वेदं शुभभावेन, कर्तव्यं जिनपूजनम्। ततः पूर्णविधानेन, विशुद्धं चैत्यवन्दनम् ॥२८७॥
पञ्चमङ्गल महामन्त्रो, ध्यातव्यस्तदनन्तरम्। एकसन्ध्यं द्विसन्ध्यं वा, त्रिसन्ध्यं वा विधानतः ॥२८८॥
अष्टावष्टाधिकं वापि, शतं वारान् जपेदमुम्। एकचित्तेन भावेन, प्रत्यहं विजनस्थितः ॥२८९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ॐ नमोऽर्हत इत्यादि, स्वाहान्तं पदमुच्चरन् । मुञ्चन् पदे पदे पुष्पं, सर्वदुःखैर्विमुच्यते ॥२९०॥
अङ्गानङ्गप्रविष्टं हि, श्रुतं व्याप्य व्यवस्थितः । एष एव महातत्त्वं, कथितस्तत्त्ववेदिभिः ॥२९१॥
शेषश्रुतं परित्यज्य, मरणे समुपस्थिते । एष एव बुधैर्ध्येयः, कर्मनिर्मूलनाकृते ॥२९२॥
यदि भक्तिर्नमस्कारे, शक्तिः संसारलङ्घने । अभक्तिश्चेन्नमस्कारे, न शक्तिर्भवलङ्घने ॥२९३॥
ऐहिकानि फलान्यस्य, प्रसिद्धानि पदे पदे । कियन्ति तव कथ्यन्ते, जानाति यदि केवली ॥२९४॥
किञ्चात्र ये महापापा, निर्भाग्याः पुरुषाधमाः । न पठन्ति नमस्कारं, न चापि बहु मन्वते ॥२९५॥
य एव भाविकल्याणाः, पुण्यभाजो नरोत्तमाः । त एव हि नमस्कारं, पठन्ति विहितादरम् ॥२९६॥
किं भूरिभाषितेनात्र, राजंस्तत्त्वं निशामय । नमस्कारे मनो यस्य, भवाब्धिस्तस्य गोष्पदम् ॥२९७॥
तदेतदस्य सामर्थ्यं, सङ्क्षेपेण निदर्शितम् । विशेषेण पुनः कोऽस्य, गुणान् वर्णयितुं क्षमः ॥२९८॥
एतच्छ्रुत्वा जनः सर्वो, जिनपूजाकृतादरः । पञ्चमङ्गलपाठे च, प्रवृत्तो विधिपूर्वकम् ॥२९९॥
अथ स्वकर्द्धितुष्टेन, रत्नचन्द्रेण भूभुजा । समयं प्राप्य सम्पृष्टा, दमघोषमुनीश्वराः ॥३००॥
भगवन् ! किं मया पूर्व-जन्मन्यासेवितं शुभम् । येनेदृक्षा महाभोगा, भूपत्वे समुपस्थिताः ॥३०१॥
अथोचुरवधिज्ञान-विज्ञातभवविस्तराः । सजलाम्भोदनादेन, नर्तयन्तो मयूरकान् ॥३०२॥
प्रभवो दमघोषाख्याः, सर्वसत्त्वहितावहाः । पुरे राजगृहे राज-न्नासीस्त्वं **पुष्पशेखरः** ॥३०३॥
मालाकारो **महारम्भः**, स्वभावेनैव भद्रकः । एकदा च समायातः, पुष्पाण्यादाय मन्दिरे ॥३०४॥
जैने जनसमाकीर्णे, जातस्नात्रमत्रहोत्सवे । दृष्ट्वा जैनेश्वरं बिम्बं, भक्तिरुल्लसिता तव ॥३०५॥
सुगन्धपञ्चवर्णानां, पुष्पाणां भक्तियोगतः । माला स्वयं समादाय, पूजितो जिननायकः ॥३०६॥
सञ्जाता परमा श्रद्धा, संसारः प्रतलीकृतः । बद्धं परभवायुष्कं, भोगसारं तदा त्वया ॥३०७॥
मृत्वा चेह समायातो, रत्नशेखरमन्दिरे । यत्पूजोपार्जितं पुण्य-मुदीर्णमिह तेऽधुना ॥३०८॥
इतो देवगतिं गत्वा, भूत्वा च नृपनन्दनः । विधाय निर्मलां दीक्षां, गन्ता त्वं शाश्वते पदे ॥३०९॥
श्रुत्वेदं रञ्जितो राजा, धर्मेऽत्यन्तं स्थिरोऽभवत् । नत्वा सूरिं गतो गेहे, श्रावकत्वमपालयत् ॥३१०॥

इति **पुष्पपूजाकथानकं** समाप्तम् ॥ श्रीरस्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गन्धपूजायां रत्नसुन्दरकथा

पुष्पपूजाफलं प्रोक्तं, स्वर्गमोक्षप्रसाधकम् । साम्प्रतं गन्धपूजायाः, फलं शृणुत कथ्यते ॥१॥
समस्ति सर्वदेशानां, सारभूतो महीतले । बङ्गाजनपदो नाम्ना, पदं निःशेषसम्पदाम् ॥२॥
रत्नादिखनिभिर्यत्र, क्षरन्तीभिर्वरं वसु । जनर्द्धिहेतुभूताभि-र्यथार्था सा वसुन्धरा ॥३॥
बङ्गाजनपदे तस्मिन्, नगरं रत्नसञ्चयम् । निवासः सर्वरत्नानां, रम्यं जनमनोहरम् ॥४॥
रराज यत्सदाकालं, सदन्तैर्मत्तवारणैः । सद्गृहैश्च समुत्तुङ्गैः, सदन्तैर्मत्तवारणैः ॥५॥
द्विरदेषु मदो यत्र, धातूनां सोपसर्गता । निपातनं च शब्देषु, कुचेषु करपीडनम् ॥६॥
द्विजिह्वता भुजङ्गेषु, परचिन्ता च योगिनाम् । वनितोदरेषु तुच्छत्व-मोष्ठेष्वधरसम्भवः ॥७॥
बभूव तस्य देशस्य, नगरस्य च शासिता । राजा सर्वजनानन्दो, नाम्ना कनकसुन्दरः ॥८॥
अचिन्त्यशक्तिसंयुक्तो, गुरुतेजा महाभुजः । विक्रमाक्रान्तनिःशेष-महीपालनतक्रमः ॥९॥
सद्वृत्तेन कुलं यस्य, यशोभिःशीलमुज्ज्वलम् । शरदभ्रनिभैः कान्तै-र्गुणै रूपं च पप्रथे ॥१०॥
तस्याजनि जनी देव-पादपङ्कजभृङ्गिका । निर्धौतस्वर्णवर्णाभा, रत्नमालेति विश्रुता ॥११॥
सर्वातिशायिशब्दादि-विषयास्वादनिष्ठयोः । याति कालः सुखेनैव, निबिडस्नेहयोस्तयोः ॥१२॥
अन्यदा सुन्दराकारः, शुभस्वप्नेन सूचितः । जातस्तयोर्जनानन्दी, तनयो रत्नसुन्दरः ॥१३॥
द्वासप्ततिकलावेदी, सञ्जातः स्वल्पवासरैः । मृता माता कुमारस्य, पिता स्नेहेन पश्यति ॥१४॥
सपत्न्यो मातरः सर्वाः, प्रतिकूलाः समत्सराः । परिवारोऽप्युदासीनः, सर्वोऽपि कुमरं प्रति ॥१५॥
अन्यदा देशपर्यन्ते, कनककेतुर्भूमिपः । स्वर्णसुन्दरभूपस्य, न सेवां प्रतिपद्यते ॥१६॥
आज्ञाभङ्गे समुत्पन्ने, दूतवचनफूत्कृतः । स्वर्णसुन्दरभूपस्य, दिदीपे कोपपावकः ॥१७॥
स चचाल महाद्वेषा-च्चतुरङ्गबलान्वितः । गत्वा च तं विनिर्जित्य, वलितः सत्वरैः पदैः ॥१८॥
कुमारोऽपि पराभूति-दुःखदुःखितमानसः । निशीथे नक्तमेकाकी, सखड्गोऽलक्षितो जनैः ॥१९॥
उत्तरायणसङ्क्रातौ, मन्दतेजाः शनैः शनैः । सुवृत्तः कनकच्छायः, सवितेव चचाल सः ॥२०॥
भिक्षाभोगी गतस्नानो, रुक्षदेहो महीशयः । यत्याचारधरो धीरः, परं नियमवर्जितः ॥२१॥
विधिरेवोन्नतिं नीत्वा, निपातयति देहिनम् । एकजन्मनि जीवानाम्, दर्शयति द्विजन्मताम् ॥२२॥
अन्यस्मिंश्च दिने सुप्तो, दृष्टोऽयं रत्नमालया । वटस्याधो महाटव्या-मेकाकी रत्नसुन्दरः ॥२३॥
स्पृष्टः पादतले मात्रा, प्रबुद्धश्च ससम्भ्रमः । गाढं कण्ठग्रहं कृत्वा, मुक्तकण्ठं रुरोद सा ॥२४॥
कथं पुत्र ! महाटव्या-मेकाकी त्वं समागतः । वृत्तान्तः कथितस्तेन, पराभूतिसमुद्भवः ॥२५॥
भोजितो भोजनं भव्यं, पायितो निर्मलं जलम् । विलिप्ताशेषगात्रश्च, चन्दनेन सुगन्धिना ॥२६॥
कर्पूरपूरसन्मिश्रो, दत्तस्ताम्बूलबीटकः, । स्वस्थावस्थः सुखासीनः, कुमारः स्वस्थचेतनः ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पप्रच्छ कुशलं मातुः, कुतस्तेऽत्र समागमः। प्रोवाच वत्स! जाताहं, मृत्वा नाम्ना **सुलोचना**॥२८॥
यक्षिणी जगति ख्याता, क्रीडन्तीह समागता। भवद्दर्शनसम्भ्रान्ता, सम्प्राप्ता च तवान्तिकम् ॥२९॥
स नीतश्च तया तूर्णं, विधाय करकुड्मले। पुरे **पुरिमतालाख्ये**, उत्तराशाशिरोमणौ ॥३०॥
निधानानि समस्तानि, करस्थानीव पश्यति। अनेनाञ्जितनेत्रो हि, पुरुषो मेदिनीतले ॥३१॥
तदिदं दृष्टसामर्थ्यम्, करस्थं कुरु पुत्रक !, । भूयोऽपि व्यसने वत्स !, स्मर्तव्याहं विशेषतः ॥३२॥
इत्युक्त्वा सा गता देवी, निजस्थानं सुलोचना। दूरादेव कुमारेण, दृष्टमेकं सरोवरम् ॥३३॥
गत्वा तत्राञ्जिते नेत्रे, भ्रान्तः पाल्यां समन्ततः। दृष्टानि च निधानानि, सञ्जातो हृदि निश्चयः ॥३४॥
ततश्च तत्सरो दृष्टं, पद्मखण्डविराजितम्। स्फटिकाकाशशुभ्राभिः, शिलाभिर्बद्धभित्तिकम् ॥३५॥
नानारत्नशिलासार्था-ञ्चितसोपानपङ्क्तिकम्, । कलकूजितविभ्रान्त-शकुन्तगणसङ्कुलम् ॥३६॥
शुभ्रादभ्रपयःपूर्णं, कल्लोलालिविराजितम्। घनपल्लवसच्छायं, लतामण्डपमण्डितम् ॥३७॥
प्रविश्यान्तःकृतस्नानो, लोचनक्षालिताञ्जनः। पयः पीत्वा समुत्तीर्णः, स्वर्णसुन्दरनन्दनः ॥३८॥
सरोवरसमासन्ने, उद्याने **गुणसुन्दरे**। शिष्यसङ्घसमायुक्ताः, सूरयो **मतिसागराः** ॥३९॥
सागरादपि गम्भीरा, मेरोरपि गरीयसः। पूर्णाः परमरूपेण, हेपयन्तो रुचा विधुम् ॥४०॥
नानातिशयसम्पन्नाः, सर्वसत्त्वहितावहाः। धर्मध्यानसमारूढा, रागद्वेषविवर्जिताः ॥४१॥
भग्नत्रिदण्डसञ्चाराः, कषायकषणोद्यताः। ज्ञानदर्शनचारित्र - रत्नत्रयविराजिताः ॥४२॥
हृषीकाणां विजेतारो, जीवानां जननीसमाः। भयस्थानैर्विनिर्मुक्ता, मदाष्टकविवर्जिताः ॥४३॥
प्राशुके विपुले शुद्धे, भूतले जन्तुवर्जिते। उपविष्टास्तनुच्छाया-च्छादिताखिलदिङ्मुखाः ॥४४॥
सितवस्त्राः स्वदन्तांशु-शुभ्रिताखिलदिङ्मुखाः। साधुसमूहमध्यस्था, मध्यस्थाः सोममूर्तयः ॥४५॥
सजलमेघनादेन, कुर्वाणा धर्मदेशनाम्। भव्यपद्मप्रबन्धानां, बोधने नवभास्कराः ॥४६॥
प्रणिपत्य कुमारेण, पृष्टा धर्मं मुनीश्वराः। ततस्ते वक्तुमारब्धाः, परोपकृतिचञ्चवः ॥४७॥
अहिंसैव परो हेतु-र्धर्मस्योक्तो जिनेश्वरैः। शेषस्तु परिवारोऽस्य, सत्यवादादिरिष्यते ॥४८॥
यां यां जीवाः प्रपद्यन्ते, गतिं कर्मवशानुगाः। तत्र तत्र प्रकुर्वन्ति, रतिं हिंसानिबन्धने ॥४९॥
यद्येको वसुधां दद्या-दन्यो दद्याच्च जीवितम्। विहाय वसुधां भीतो, जीवो गृह्णाति जीवितम् ॥५०॥
किमत्र बहुनोक्तेन, स्वसंवेद्यमिदं नृणाम्। यथा स्वं जीवितं कान्तं, सर्वेषां प्राणिनां तथा ॥५१॥
तस्मादेवंविधं मूढा, जीवितं ये शरीरिणाम्। हरन्ति रौद्रकर्माणः, पापं किं किं न तैः कृतम्? ॥५२॥
जीवानां जीवितं हृत्वा, कर्मभारगुरूकृताः। पतन्ति नरके जीवा, अयःपिण्डो यथा जले ॥५३॥
मधु श्रवन्ति ये वाचा, हृदये विषदारुणाः। कायेन पापकर्माणि, कुर्वते ते नराधमाः ॥५४॥
शिष्टाचारविनिर्मुक्ता, यथाकामविचारिणः। ते भ्रमन्ति दुरात्मान-स्तिर्यग्गर्भपरम्पराम् ॥५५॥
विषयेभ्यो जनाः सौख्यं, कीदृशं नाम जायते। यत्र प्रत्युत दुःखाना-मुपर्युपरि सन्ततिः ॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किम्पाकफलकल्पेभ्यो, विषयेभ्यः पराङ्मुखाः । ये नरास्तान्नमस्यामि, त्रिसन्ध्यं शुद्धचेतसा ॥५७॥
हा कष्टं वञ्चितो लोको, दीर्घकालं विसंस्थुलैः । विषयैर्विषमासङ्गै-र्विषवन्मारणात्मकैः ॥५८॥
स्वर्गेऽपि मोहिताः सन्तो, हिताहितपराङ्मुखाः । च्युत्वा गर्भगृहे भूयो, विण्मूत्रकृतलेपने ॥५९॥
वसन्त्यतीवबीभत्से, दुर्गन्धेऽत्यन्तदुस्सहे । चर्मजालकसञ्छन्नाः पित्तश्लेष्मादिमध्यगाः ॥६०॥
जनन्याहारनिःष्यन्दं, लिहन्तो नाडिकाच्युतम् । पिण्डीकृतसमस्ताङ्गा, दुःखसम्भारपीडिताः ॥६१॥
गर्भाद्विनिर्गताः सन्तो, नियमाचारवर्जिताः । जीवघातरता धर्मे, विषीदन्ति पदे पदे ॥६२॥
तथा चात्रानृतं वाक्यं, वर्जनीयं प्रयत्नतः । हिंसायाः कारणं तद्धि, सा च संसारकारणम् ।६३॥
स्तेयं च दुरतस्त्याज्यं, परस्त्री मातृसन्निभा । द्रव्येच्छापरिमाणं च, कर्तव्यं सुविवेकिना ॥६४॥
उक्तं च भोजनत्यागः, सदाचारप्रवर्तनम् । मर्यादावर्तनं चैव, धर्मोऽयं सिद्धिसाधनः ॥६५॥
श्रुत्वेदं सूरिसद्वाक्यं, संविग्नो रत्नसुन्दरः । पप्रच्छ प्रणतिं कृत्वा, व्यतीतं भवमात्मनः ॥६६॥
चतुर्ज्ञानोपगूढात्मा, विनयेनोपसेदुषे । रत्नसुन्दरभूपाय, जगाद मतिसागरः ॥६७॥
कुमार शृणु सङ्क्षेपा-त्पूर्वजन्मविचेष्टितम् । न हि निष्कारणं कोऽपि, वेत्ति जन्तुः सुखासुखम् ॥६८॥
मगधेषु मागधग्रामे, माधवः कुलपुत्रकः । भवानभवद्भार्या च, **माधवी** बद्धमुष्टिका॥
मधुसूदननामा च, माधवस्य सहोदरः । **मधुसूदनी** तद्भार्या, धर्मकर्मपरायणा ॥७०॥
पापर्द्धौ च रतः प्रायः, स्वभावेनैव माधवः । माधवी च महालोभा, न दत्ते कस्य किञ्चन ॥७१॥
एवं सरति संसारो जीवघातरतस्य ते । कटुकानि प्रजल्पन्त्या, माधव्या भिक्षुकानभि ।७२॥
अकुलीनेति वन्ध्येति, दुर्मुखेति च निन्दिता । सर्वभिक्षुकसार्थेन, कालं नयति माधवी ।७३॥
अन्यदा च महाटव्यां, माधवो मृगयां गतः । दृष्टैका हरिणी तेन, मृगशावसमन्विता ॥७४॥
गत्वाऽतिवेगतो हस्ते, गृहीतो हरिणीसुतः । भीतभीता मृगी नष्टा, पश्यन्ती पुत्रकं निजम् ॥७५॥
बद्ध्वा वल्लीवितानेन, शावं तं लोललोचनम् । धावितो मृगयूथस्य, वधायाधिज्यकार्मुकः ॥७६॥
अथासौ दैवयोगेन, कन्दमूलफलार्थिना । अटवीमटता दृष्ट-स्तापसेन मृगीसुतः ॥७७॥
मोचितो बन्धनात्तेन, करुणाकृष्टचेतसा । गत्वा च मिलितो मातु-र्मोदते कान्तकानने ॥७८॥
दूरं दूरतरं नीतो, मृगयूथेन माधवः । सिंहनादं ततः श्रुत्वा, माधवेन पलायितम् ॥७९॥
नश्यता तेन दृष्टा च, मृगी प्रसवधर्मिणी । अपत्यस्नेहसम्भार-तन्तुसन्दृब्धमानसा ॥८०॥
इतश्चेतश्च निक्षिप्त-चलच्चकितलोचना । लिहन्ती जिह्वया पुत्रान्, महामोहपरायणा ॥८१॥
मृगश्च तत्समीपस्थः कण्डूययन्मृगीतनुम् । अहो कामस्य माहात्म्यं, पशूनामपि दुर्जयम् ॥८२॥
वनात्तृणानि भक्ष्याणि, वनाच्च विमलं जलम् । मृगमृग्योस्तथाप्युच्चैः, प्रेमाजन्म निरन्तरम् ॥८३॥
सिंहनादभयं मुक्त्वा, पुनः सञ्जातपौरुषः । आकृष्टशरस्तरसा, धावितस्तज्जिघांसया ॥८४॥
एकतो हरिणी नष्टा, ह्यन्यतो मृगपोतकाः । मृगश्चाप्यन्यतो नष्टो, वियुक्तं तत्कुटुम्बकम् ॥८५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृगस्य मार्गतो लग्नो, मारयामीति चिन्तयन् । धावमानोऽपतद्भूमौ, स्खलितो विषमस्थले ॥८६॥
लब्ध्वाऽन्तरं कुरङ्गोऽपि, नश्यन्नुच्चैर्भयातुरः । वटस्याधो मुनिं दृष्ट्वा, तत्समीपमुपागतः ॥८७॥
रक्ष रक्ष महाभाग!, कुरु त्राणं दयानिधे! । इत्युक्त्वा च मृगो नत्वा, साधवे शरणं गतः ॥८८॥
माधवोऽपि समुत्थाय, लग्नः सारङ्गपृष्ठतः । साधोः पादान्तिकं प्राप्तः, साधुनैवं प्रजल्पितः ॥८९॥
परप्राणप्रहाणेन, निजप्राणप्रधारणम् । न तत्सन्तः प्रशंसन्ति, शरं संहर माधव ! ॥९०॥
कोदण्डं विगुणं कृत्वा, शरं संहृत्य सत्वरम् ! नमस्कृत्य मुनेः पादौ, निषण्णः सोऽपि भूतले ॥९१॥
पृष्टश्च स मुनिस्तेन, भाषते किमयं मृगः ? मुञ्चन्नश्रूणि शोकार्तः, साधुः प्राह निशामय ॥९२॥

त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली, ।
विश्रम्भस्थितिहेतवो न गणिता बन्धूपमाः पादपाः ॥९२॥
बालापत्यवियोगदुःखविधुरा मुक्ता मृगी वल्लभा, ।
धावन्तः पदवीं तथाप्यकरुणा व्याधा न मुञ्चन्ति मे ॥९३॥

मामेवं कथयत्येष, स्वदुखं निजया गिरा । यतो मातृसमः प्रोक्तः, साधुवर्गः शरीरिणाम् ॥९४॥
तवापि युज्यते नैव, कर्तुं कर्म सुनिर्घृणम् । परं मारयता येन, भवत्यात्मापि घातितः ॥९५॥
क्रियन्ते यानि कर्माणि, रागद्वेषविसंस्थुलैः । तेषां फलविपाकं हि, जानाति यदि केवली ॥९६॥

यतः हन्मीति जन्मजनितं सुकृतं निहन्ति, शस्त्रग्रहस्त्रिभवसम्भवमेव धर्मम् ।
शस्त्राभिघातसमये शतजन्मजातं, सर्वं निहन्ति सुकृतं सति जीवघाते ॥९७॥

आत्मैव घातितस्तेन, परं घ्नता न संशयः । यतो हन्यादसौ हन्ता, लभते शतशो वधम् ॥९८॥
शरासनं शराः सर्वे, माधवेन द्विधा कृताः । श्रुत्वा धर्मं दयासारं, मुनिमुखाद्विनिर्गतम् ॥९९॥
संसाराम्बुधिमग्नेन, यानपात्रसमो मया । सम्प्राप्तस्त्वं च [1]लप्स्येऽहं, पारं धर्मप्रभावतः ॥१००॥
जीवघातान्निवृत्तोऽहं, यावज्जीवं तवाग्रतः । निशि भक्तं सुरापानं, मांसमद्यि न सर्वदा ॥१०१॥
भद्रकत्वं समापन्नो, देवभक्तिपरायणः । गुरुपूजारतो नित्यं, कालं नयति माधवः ॥१०२॥
अन्यदा च समायातः, सुगन्धपुटिको नरः । प्रयोजनवशात्कोऽपि, गन्धको माधवान्तिकम् ॥१०३॥
प्रदत्तो रुपकस्तस्मै, गन्धान् जग्राह माधवः । भावसारं स्वहस्तेन, तेन तैरर्चितो जिनः ॥१०४॥
पुण्यानुबन्धि यत्पुण्यं, गन्धपूजां प्रकुर्वता । निर्वर्तितं तदा काले उदयस्तस्य साम्प्रतम् ॥१०५॥
ततो दानरतो मृत्वा, मध्यमगुणयोगतः । जातस्त्वं सुन्दराकारः, स्वर्णसुन्दरन्दनः ॥१०६॥
एतत् श्रुत्वा कुमारोऽपि, रोमाञ्चाञ्चितविग्रहः । सानन्दः सूरिपादान्ते, श्रावकत्वं प्रपन्नवान् ॥१०७॥
सर्वज्ञो देवता मह्यं, गुरुवस्तु सुसाधवः । सर्वज्ञोक्तो दयासारो, धर्मो धर्मधिया मम ॥१०८॥
अस्तं गते दिवानाथे न करोमि भुजिक्रियाम् । करोमि स्मरणेनापि, त्रिसन्ध्यं चैत्यवन्दनम् ॥१०९॥

---

१ लास्ये-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूरिणा भणितं भद्र,! प्रतिपत्तिर्न दुष्करा । गृहीतपालना गुर्वी, सैव सर्वसुखावहा ॥११०॥
तत्र यत्नो महान्कार्यः, सत्यवाक्या महाधियः । प्रतिपद्य ये न कुर्वंति, ते नूनमधमाधमाः ॥१११॥
तथा त्वं प्रतलीभूत-चतुर्गतिगमागमः । सर्वसौख्यखनिर्जातो, गन्धपूजाप्रभावतः ॥११२॥
अत्रैव नगरे राज्यं, भोगा जनमनोहराः । पर्यन्ते निर्मला दीक्षा, ततस्ते सिद्धिसङ्गमः ॥११३॥
वियोजितः सवित्र्या य-न्माधवेन सता त्वया । कुरङ्गीतनयस्तेन, वियुक्तस्त्वं सहाम्बया ॥११४॥
नित्यं धर्मेण वर्धस्व, किमन्यद् ब्रूमहे वयं । वर्तमानेन योगेन, यास्यामोऽतो वयं प्रगे ॥११५॥
विहृताः सूरयोऽन्यत्र, मुदितो रत्नसुन्दरः । सद्धर्मरत्नलाभेन, सन्तुष्टो निजमानसे ॥११६॥
अन्यस्मिंश्च दिने नक्तं, भिक्षाकार्येण निर्गतः । भ्रमन् गृहाद्गृहं चैष, सम्पाप्तश्चैकमन्दिरे ॥११७॥
विशाले स्वल्पमानुष्ये, व्याधिगृहीतनायके । पुष्पताम्बूलकर्पूर-पूर्णसज्जितभाजने ॥११८॥
निर्गतैकाबला भिक्षा-मादाय करकुड्मले । दत्ता तया गृहीता च, भणिता तेन सा यथा ॥११९॥
करोमि भोजनं भद्रे,! नयाम्यत्रैव शर्वरीम् । प्रभातेऽहं गमिष्यामि, यदि वः प्रतिभासते ॥१२०॥
तयापि दर्शितं तस्य, शून्यमेकं कुटीरकम् । भुक्तः सुप्तश्च तत्रैव, शृणोत्येवंविधं वचः ॥१२१॥
पाहि पाहि पयः पापे!, म्रियेऽहं तृषयाधुना । ततस्तया विषं क्षिप्त्वा, स पयः पायितो रुषा ॥१२२॥
समागतो विटः कोऽपि, कृता प्रगुणता तया । कियानपि गतः कालो, विषयासक्तयोस्तयोः ॥१२३॥
विटेन भणिता किं न, गृहस्वामी प्रजल्पति । सुखसंवेदनादद्य, लब्धनिद्रो भविष्यति ॥१२४॥
तेनोक्तं महतीर्वाराः, पयःपानं न याचते । अतिनिद्रापितो भद्र!, सोऽपि चेतसि शङ्कितः ॥१२५॥
स्वल्पस्नेहो विषण्णश्च, कामक्रीडापराङ्मुखः । ताम्बूलान्तर्विषं दत्त्वा, तया सोऽपि निपातितः।१२६।
कुटीरकात्समाहूया-नीतः कार्पटिकस्तया । भणितश्च गृहाणेदं, मुखमूले कलेवरम् ॥१२७॥
स्वयं च पादयोर्लग्ना, नीतं तद्गृहपुष्टतः । प्रक्षिप्तं विजले कूपे, व्यतीता जारसङ्कथा ॥१२८॥
कचवरेण चाच्छाद्य, समागत्य निजे गृहे । सुप्ता निराकुला याव-त्ताम्रचूडेन वासितम् ॥१२९॥
भूयोऽपि च समुत्थाय, गता तस्मिन् कुटीरके । स्वप्रपञ्चाप्रकाशार्थं, सदर्पं जल्पितं तया ॥१३०॥
मुहूर्तमेकमत्रैव, स्थेयं भिक्षाचर! त्वया । विसर्जितेन गन्तव्यं, प्रपन्नं तेन तद्वचः ॥१३१॥
मुक्तकेशा निरानन्दा, दुःखसम्भारभारिता । सशोकेव कृताक्रन्दा, सदुःखेव रुरोद सा ॥१३२॥
मिलितो हेलया लोको, दृष्ट्वा तां दुःखदुःखिताम् । रुदन्तीं भर्तृनामानि, समुच्चार्य पुनः-पुनः ॥१३३॥
पृष्टा च तेन किं भद्रे! रोदितव्ये निबन्धनम् । न ददाति वचस्तेषां, रुदत्येव हि केवलम् ॥१३४॥
हा नाथ! दुःखितां मुक्त्वा-ऽशरणां मां कृपास्पदाम् । गच्छन्नपि न विज्ञातो, हृदयस्थोऽपि सर्वदा ।१३५।
हा विधे! ते कृपा नास्ति, किं कृतं मूढ वैशसम् । यत्प्रियोऽपहृतश्चित्ता-द्रक्षिताहं कुतोऽधुना ॥१३६॥
किं गुणान् वर्णयाम्यस्य, किं सौभाग्यं मनोरमम् । किं रूपं किं मतिं त्यागं, किं भोगं विस्मयावहम् ॥
मांसलौ परिघाकारौ, करौ कनककोमलौ । मदङ्गसङ्गमं त्यक्त्वा, कथमेतौ करिष्यतः ?॥१३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्वलज्ज्वालावलीसङ्गं, पश्यतां भयकारणम्। अहो कर्मवशाज्जीवै-र्जीविद्भिः किं न दृश्यते ॥१३९॥
उद्वसितमिवाभाति, जनलक्षसमाकुलम्। कान्तारसदृशं कान्तं, पुरं नाथ ! त्वया विना ॥१४०॥
त्वया त्यक्तापि नो त्यक्ष्ये, भवन्तं चुम्बकोपलम्। मम चित्तायसं यस्मा-त्त्वमाकर्षसि दूरतः ॥१४१॥
नीतिरेषा जने रूढा, धर्मोऽयं मनुनेरितः। मृतमप्यनुगच्छन्ति, भर्तारं कुलकन्यकाः ॥१४२॥
एवंविधसमुल्लाप-सञ्जातकरुणैर्जनैः। भणिताऽर्त्तिर्न कर्तव्या, यदेषैव भवस्थितिः ॥१४३॥
एतच्छ्रुत्वा जनोल्लापं, बहिर्दर्शितशोकया। लोकानां रञ्जनाहेतो, रुदन्त्या भणितं तया ॥१४४॥
यदि मे स्वजना यूयं, सुहृदो वाऽथ वत्सलाः। सम्पादयत सर्वेऽपि, मामकीनमिदं वचः ॥१४५॥
कुरुतैकां चितां गुर्वीं, सारकाष्टविनिर्मिताम्। निर्वापयामि येनेदं, दुःखदग्धं शरीरकम् ॥१४६॥
प्रविक्ष्यामि शिरस्यस्य, दत्त्वा बाहूपधानकम्। परलोकगतस्यापि, भवाम्युत्सङ्गशायिनी ॥१४७॥
श्रुत्वेदं विस्मितो लोकः, शिरोधूननपूर्वकम् अहो महासती धन्या जगादेदं परस्परम् ॥१४८॥
पतिभक्तं गुणे सक्तं, शीलाभरणभूषितम्। एवंविधं कलत्रं हि, नाल्पपुण्यैरवाप्यते ॥१४९॥
सा धृता बन्धुभिर्गेहे, नीतं भर्तृकलेवरम्। विधाय तस्य संस्कारं, यथास्थानं गता जनाः ॥१५०॥
रौरेदमपि सन्दृष्टं, मदीयं वैशसं त्वया। न कार्यः स्त्रीषु विश्वास, उपदेशोऽयमुत्तमः ॥१५१॥
कुमारस्तत्तथा दृष्टवा, चिन्तयामास मानसे। पुस्तकानि पठन्तोऽपि, स्त्रीचरित्रं न जानते ॥१५२॥
प्रथमं मारितो भर्ता, पश्चाज्जारोऽपि घातितः। ततोऽपि रञ्जितो लोकः स्वयं जाता महासती ॥१५३॥
अलब्धान्तःप्रवेशाय, कूटकपटवेश्मने। संसारतरुबीजाय, स्त्रीवृत्ताय नमो नमः ॥१५४॥
सर्पिण्येव महाभीति-कारिण्या वक्रचर्यया। यज्जीव्यते तदाश्चर्यं, समीपस्थितयानया ॥१५५॥
अयशश्च निजो वासः, अकीर्तेः कुलमन्दिरम्। दुर्गतौ गच्छतां पुंसां, समा सोपानपङ्क्तिका ॥१५६॥
सर्वाभ्याख्यानशस्यानां, क्षेत्रं दुष्कर्मणां खनिः। सत्यशौचबहिर्भूता, महासाहसकारिणी ॥१५७॥
लालिताः पालिताः पुत्राः परपुत्रीप्रतारिताः। तृणायापि न मन्यन्ते, मातरं पितरं गुरुम् ॥१५८॥
बन्धुभिश्चित्तविश्लेषं, कुर्वन्ति कारयन्ति च। क्लेशं विनापि कार्येण, कष्टंकष्टाः खलु स्त्रियः ॥१५९॥

अकन्दराः स्त्रियो व्याघ्रो, विना भोज्यं विसूचिकाः।
सञ्चरन्त्यः स्वपादाभ्यां, नार्यो ह्यार्य ! भयङ्कराः ॥१६०॥

शृङ्खलारहितो बन्धो, मालिन्यं कर्दमं विना। महासाहसशस्यानां वनिता वनिसन्निभा ॥१६१॥
यथैव राजहंसेन, भ्रमरेण समं तथा। पद्मिनी कुरुते सङ्गं, निर्विवेका हि योषितः ॥१६२॥
कुलीनेति विशुद्धेति, स्त्रीविश्रम्भो न सङ्गतः। यतोऽमला दीपशिखा, कुरुते मलिनं गृहं ।१६३॥
एवं खेदसमापन्नः, कुमारो रत्नसुन्दरः। यक्षागारं समायातो, बहुकार्पटिकाकुलम् ॥१६४॥
भुक्त्वौदनं पयः पीत्वा, निरारम्भो निराकुलः। वेदिकैकां समाक्रम्य , निषण्णः क्षितिपाङ्गजः ॥१६५॥
नानादेशसमायाता, नानानेपथ्यधारिणः। क्रोधिनो बहुरूपाश्च, नानाभाषाविचक्षणाः ॥१६६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मदीयः सुन्दरो देशो, मदीयः सुन्दरो नृपः । भव्यो भोज्यविधि स्तत्र, देशाचारोऽपि सुन्दरः ॥१६७॥
इत्यादि निष्फलं फल्गु, विवदन्तः परस्परम् । दृष्टाः पृष्टा कुमारेण, कौतुकाकुलचेतसा ॥१६८॥
भो भो भिक्षाचरा नूनं, नानादेशविचारिणः । किं दृष्टं किञ्चिदाश्चर्यं, कुत्रापि जगतीतले ? ॥१६९॥
एकेनोक्तं मया दृष्टो, ह्यटता चैकपत्तने । एकाक्ष एकपादश्च, विहस्तो विकृताकृतिः ॥१७०॥
तृणाहारो नरः कोऽपि, स्थानासनविवर्जितः । न पुमान्न पशुः पूर्णो, नृपशुः प्रथितो जने ॥१७१॥
ततोविस्मयमापन्नो, लग्नोऽहं तस्य मार्गतः । कर्तुं तस्योपचारं च, प्रयच्छामि तृणादिकम् ॥१७२॥
अन्यदा गतचिन्तोऽसौ, नरपशुरभाषत । किमर्थं क्रियते भद्र!, मम सेवा त्वया वद ॥१७३॥
विस्मयो मे महाभाग !, तव वृत्तान्तवेदने । किं त्वमेवंविधो जातः, पश्चाद्वा केनचित्कृतः ॥१७४॥
तेनाभाणि समस्त्यत्र, विप्रो **विश्वम्भरा**भिधः । आहिताग्निश्चतुर्वेदी, तत्पुत्रोऽहं **जनार्दनः** ॥
समिधानयनायाथ, पित्राहं प्रेषितो वने । गच्छन् गतो महाटव्यां, दिग्मोहेन च मोहितः ॥१७६॥
तत्राश्रमपदं दृष्टं, नानावृक्षसमाकुलम् । विहङ्गवितताराव, मृगयूथनिषेवितम् ॥१७७॥
गतोऽहं तत्र च दृष्टा, सहकारतरोरधः । **कुरङ्गकेसरा**नाम्नी, तापसी नवयौवना ॥१७८॥
सम्भ्रमादंसतः स्रस्तं, वल्कलं करपल्लवैः । आनयन्ती निजस्थाने, मधुरं भणिता मया ॥१७९॥
अहं ब्रह्मसुतो भद्रे! आहिताग्निर्जनार्दनः । दिग्मोहादिहायातः, का त्वं कस्यायमाश्रमः ? ॥१८०॥
तस्या रूपं वयो वर्णं, विभ्रमं वीक्ष्य विस्मितः । सर्वसीमन्तिनीसीमा, वेधसेयं विनिर्मिता ॥१८१॥
एतस्यां मन्मनो याति, धत्ते लज्जां कुलक्रमः । एषापि सानुरागेव, लक्ष्यते किं ममोचितम् ? ॥१८२॥
केदं कर्म द्विजन्मनो मम हहा वैखानसी तापसी, रूपं रञ्जितलोकलोचनमहो चित्तस्य मे विक्रिया।
वेदार्थस्मृतिगोचराः क्व च गिरः क्वेयं मनोदुर्लभा,
चेतश्चिन्तनमेव ते यदि परं धन्यो वरं धास्यति ॥१८३॥
लज्जे! दूरतरं याहि, मुञ्च मुञ्च कुलक्रमं । शौच! व्रज त्वमन्यत्र, अकालोऽयं भवादृशाम् ॥१८४॥
कुरङ्गकेसरा त्राण-मत्राणस्य ममाधुना, ततो मया समारब्धा । तया सार्धं रतक्रिया ॥१८५॥
अत्रान्तरे समायातः, **शृङ्गवेरो** वनान्तरात् । एतद् दृष्ट्वाऽतिरुष्टेन, शापो दत्तस्तपस्विना ॥१८६॥
हस्तपादशिरोभिश्च, लोष्टकल्पेन हि त्वया । भ्रमितव्यं महाटव्या-मेष ते पापनिग्रहः ॥१८७॥
सादरं पादलग्नेन, क्षामितोऽसौ मया मुनिः । शेषतापसलोकैश्च, दृष्टान्तेन प्रबोधितः ॥१८८॥
किं वराकः करोत्येष, सद्विवेकविवर्जितः । शक्रादयोऽपि नो शक्ताः, कर्तुमिन्द्रियनिग्रहम् ॥१८९॥
कार्याकार्यं न जानन्ति, जीवा मन्मथपीडिताः । अपदेऽपि प्रवर्तन्ते, यतोऽवाचि विचक्षणैः ॥१९०॥
किमु कुवलयनेत्राः सन्ति नो नाकनार्य-स्त्रिदशपतिरहल्यां तापसीं यत् सिषेवे ।
हृदयतृणकुटीरे दीप्यमाने स्मराग्ना-वुचितमनुचितं वा वेत्ति कः पण्डितोऽपि ? ॥१९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जराजीर्णः कायः श्रुतिविरहितं कर्णयुगलं, बलभ्रष्टा दृष्टिः पलितकलितं मस्तकमिदम् ।
तथाप्युच्चैर्बाणान् किरति सततं कामहतको, हहा कष्टं कष्टं कथयत कथं मुक्तिरमुतः ॥१९२॥
ततः किञ्चित्सतोषेण, शृङ्गवैरतपस्विना । अर्धीकृत्य निजं शाप-महमेवंविधः कृतः ॥१९३॥
कुरङ्गकेसरा शप्ता, जाता नारी शिलामयी । गौतमस्य पदे स्पृष्टे, पापे पापात्प्रमोक्ष्यसे ॥१९४॥
यद् दृष्टं तन्मयादिष्ट-मन्यो ब्रूते मयापि च । यद् दृष्टं तत् शृण्वन्तु, भवन्तो विहितादराः ॥१९५॥
उत्तरस्यां दिशि श्रेष्ठं समस्ति भुवि विश्रुतम् । पुरं पञ्चपुरं नाम, मेदिनीमुखमण्डनम् ॥१९६॥
तत्र राजा महामल्लो , रणनिर्व्यूढसाहसः । संपूर्णो भूरिकोशेन, चतुरङ्गबलान्वितः ॥१९७॥
तेन धन्येन धर्माय, ज्ञानसत्रं प्रवर्तितम् । अध्यापको धृतस्तत्र, सविद्यच्छात्रपाठकः ॥१९८॥
शतानि पञ्च छात्राणां, पेठुस्तत्र निरन्तरम् । भोजनाच्छादनं तेषां, प्रदत्ते मेदिनीपतिः ॥१९९॥
राजपुत्रोऽपि पाठार्थं, गतस्तत्र सकौतुकः । अध्यापककृतानुज्ञः प्रारब्धः पठितुं कलाः ॥२००॥
अथान्यस्मिन् दिने तस्य, पठतो गुरुसन्निधौ । पृच्छद्भिर्ज्ञायते तत्त्व-मिदं वाक्यमुपागतम् ॥२०१॥
गृहीतं तत्त्वबुद्धया च, तद्वाक्यं नृपसूनुना । अध्यापककरस्तत्र, छात्राणां सर्वदाप्ययम् ॥२०२॥
शतानिपञ्च पूलाना-मानेतव्यानि बाह्यतः । विचारो नैव कर्तव्यो, गुरुवाक्यमिदं यतः ॥२०३॥
अध्यापकगृहे नास्ति, छात्राः ! किञ्चिच्चतुष्पदम् । एनांश्चरति कश्चारिं ?, ब्रूत मे कौतुकं महत् ॥
कुमारो भणितश्छात्रै-र्न वयं तन्निकारकाः । त्वमिव परगेहेषु, किन्त्वादिष्टविधायकाः ॥२०५॥
कुमारेणान्यदा रात्रौ, प्रच्छन्नेन निरीक्षितम् । अध्यापकजनी दृष्टा, गच्छन्ती गृहपृष्ठतः ॥२०६॥
विधाय करजापं सा, कृत्वा प्रश्रवणं भुवि । तस्योपरि लुठित्वा च, जाता सपदि रासभी ॥२०७॥
द्रुतमेव तया सर्वे, भक्षितास्तृणपूलकाः । भूयोऽपि सहजा जाता, कुमारेण विलोकिता ॥२०८॥
कथितं शेषछात्राणां, यथेयं नैव भद्रिका । आत्मा प्रत्यहमेतस्या, रक्षणीयः प्रचत्नतः ॥२०९॥
विकाले तृणपूलांश्च, लातुं छात्राः समागताः । अटव्यां लब्धलक्षत्वाद्, गृहीत्वा पुनरागताः ॥२१०॥
अनभिज्ञः कुमारस्तु, भ्रमन् प्राप्तो महाटवीम् । क्षुत्क्षामकुक्षिना दृष्टो, राक्षसेन दुरात्मना ॥२११॥
भणितस्तेन रे ! पृष्ठे, मामारोपय सत्वरम् । आरोपितः कुमारेण, पूर्वमनु चचाल सः ॥२१२॥
महासरः समायातम्, पुरतो गच्छतोस्तयोः । कुमारः प्राह भो भद्र ! साम्प्रतं गम्यते कथम् ॥२१३॥
तेनोक्तं जलमध्येन, गच्छ त्वं हि निराकुलः । न भयं चेतसि कर्तव्यं, जानुदघ्नं जलं यतः ॥२१४॥
कुमारो गन्तुमारब्धः, प्रोवाचेदं निशाचरः । पुरतो दृश्यते गर्ता, वामतो याहि किञ्चन ॥२१५॥
स्तोकान्तरं गते भूयो, जजल्प निशिसञ्चरः । कजश्च कण्टकाश्चागे, दक्षिणेनाथ गम्यताम् ॥२१६॥
शनैः शनैः समुत्तीर्य, सरसः स्थलमागतौ । लग्नश्च हेलया गन्तुं, कुमारो भीतमानसः ॥२१७॥
रक्षः पादतलं दृष्ट्वा, नवनीतादपि कोमलम् । पृष्टोऽसौ च कुमारेण, कथं ते पादयोस्तलम् ॥२१८॥
सुखस्पर्शं मनोहारि, हृद्यं कमलकोमलम् । स प्राह क्षालनं कृत्वा, यावन्नोपरतं जलम् ॥२१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावद्भूमौ न मुञ्चामि, ममैष दृढनिश्चयः । पुनः पृष्टः कुमारेण, राक्षसो हृष्टचेतसा ॥२२०॥
गर्तादिकं विजानाति, जलमध्ये कथं भवान् ? । तेनोक्तं न हि गच्छामि, भास्कराभिमुखं सदा॥२२१॥
एवं क्रमेण गच्छन्तौ, प्रश्नोत्तरपुरस्सरम् । शतशाखं महाकायं, वटमेकमुपागतौ ॥२२२॥
उत्तीर्णः पृष्ठतो रक्षः कृतं चरणधावनम् । प्राचीं प्रति कुमारोऽपि, प्रणष्टः सत्वरैः पदैः ॥२२३॥
राक्षसः क्रमशः पादौ, क्षालयित्वा जले गते । धावितः पश्चिमैः पादै-र्दृष्टिं रक्षन् दिवाकरात् ॥२२४॥
कुमारोऽपि गतो दूरं, प्रविष्टः शून्यपत्तने । तत्रापि च मठे शून्ये, सम्प्राप्तश्च निशाचरः ॥२२५॥
रक्षसोक्तं समागच्छ, नागच्छामि तवान्तिकम् । यद्यर्थी च तदागच्छ, त्वमेव हि ममान्तिकम् ।२२६।
तेनोक्तं च न शक्नोमि, समागन्तुं तवान्तिकम् । किमर्थं कथितं तेन, रहस्यं ऋजुचेतसा ॥२२७॥
येयं बलानके व्यक्ता, करोटी दृश्यते त्वया । योगिनो मन्त्रसिद्धस्य, सास्माकं दुरतिक्रमा ॥२२८॥
इदं तत्त्वं परिज्ञाय, गृहिता कुमरेण सा । राक्षसाभिमुखं सोऽथ, गतो नष्टो निशाचरः ॥२२९॥
यैः पदैः स समायत-स्तैरेव चलितो द्रुतम् । कृताञ्जलिर्जगादेदं, राजपुत्रं निशाचरः ॥२३०॥
सौभाग्यसुन्दरं नाम, महारत्नं करे कुरु । अनेन कण्ठलग्नेन, स्त्रीप्रियस्त्वं भविष्यसि॥२३१॥
त्रयाणामपि सिन्धूनां, सारभूता मनोहरा । मुक्तावली त्वया ग्राह्या, मदनुग्रहकाम्यया ॥२३२॥
प्रयोजने समुत्पन्ने, स्मर्तव्योऽहं सदा त्वया । सङ्क्षोभो नैव कर्तव्यो, यतोऽहं तव किङ्करः ॥२३३॥
शृण्वन्नित्यादिवृत्तान्तान्, कार्पटिकैः प्रजल्पितान् । नीत्वा रात्रिं मठे तत्र, प्रगेऽसौ रत्नसुन्दरः ॥२३४॥
सविस्मयस्ततः स्थानात्, **पुरिमतालपुरे** गतः । अत्रान्तरे मृतस्तत्र, निस्सन्तानो नरेश्वरः ॥२३५॥
अभिषिक्तानि दिव्यानि, मन्त्रिभिर्मण्डलेश्वरैः । हयेन हेषितं तत्र, शब्दितं गन्धहस्तिना ॥२३६॥
अभिषेकः कृतो लक्ष्म्या ढलिते चारुचामरे । शिरस्यस्य स्थितं छत्रं, स्वत एव महीयसः ॥२३७॥
गन्धवारणमारूढः, प्रविष्टो नगरे नृपः । सिंहासने निषण्णस्य, मन्त्रिभिर्मण्डलेश्वरैः ॥२३८॥
श्रेष्ठिभिः सार्थवाहैश्च, स्वीकृतं तस्य शासनम् । कृताखिलेतिकर्तव्यो, विज्ञप्तो मन्त्रिणा नृपः ॥२३९॥
यथा राज्यं तथा कन्या, रत्नमालेतिसञ्ज्ञिता । स्वरूपा लक्षणोपेता, कान्तकाञ्चनसन्निभा ॥२४०॥
विमृश्य वेधसा चेयं, मन्ये युष्मत्कृते कृता । रत्नसुन्दरभूपेन, परिणीता मन्त्रिवाक्यतः ॥२४१॥
एकातपत्रमत्रस्तः, पालयामास हेलया । गुणानुरक्तनिःशेष-लोकमुद्धृतकण्टकम् ॥२४२॥
सम्पूर्णभूरिभाण्डारं, बहुकोशं भुवस्तलम् । [राज्यं भूमिपतिरेष, रत्नसुन्दरसञ्ज्ञकः] ॥२४३॥
महामल्लनरेन्द्रस्य, **मुक्तमालाभिधा** सुता । स्वयंवरा समायाता, महर्द्ध्या च विवाहिता ॥२४४॥
नानाविधनिधानानि, दूरं पश्यति पार्थिवः । दिव्याञ्जनप्रभावेण, पूर्वपुण्यानुयोगतः ॥२४५॥
नानापुराकरग्राम-पत्तनेषु समन्ततः । मन्दिरैर्मन्दराकारै-र्मण्डिता तेन मेदिनी ॥२४६॥
कारिताश्च जिनेन्द्राणां, तदन्तः प्रतिमाः पराः । अक्षयनीवीद्रव्यार्थं, ग्रामारामादि चिन्तितम् ॥२४७॥
कल्याणकानि यात्राश्च, रथनिष्क्रमणादिकम् । साधुसाधर्मिकाणां च, सत्कारं कुर्वता सदा ॥२४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभावना कृता गुर्वी, शासनस्याखिले जने । सम्यक्त्वं निर्मलं जातं, सिद्धिः करतले कृता ॥२४९॥
चत्वारश्च सुता जाता, जातरूपसमप्रभाः । भुक्ता निरुपमा भोगा, मानुष्यं सफलीकृतम् ॥२५०॥
विहरन्तः समायाताः, सूरयः **श्रुतसागराः** । **शान्तिसागर**सूरीणां, शिष्याः सर्वत्र विश्रुताः ॥
लतासुन्दर उद्याने, स्थिताः साधुजनोचिते । प्राशुके वसुधादेशे, त्रसजीवविवर्जिते ॥२५२॥
रत्नसुन्दरभूपालो, वन्दनार्थं समागतः । वन्दित्वा विधिना सूरिं, निषण्णो धरणीतले ॥२५३॥
गम्भीरमेघनादेन, प्रारब्धा धर्मदेशना । संवेगजननी हृद्या, भवनिर्वेदकारिणी ॥२५४॥
श्रुत्वा च देशनां राजा, ह्यभिषिच्य निजे पदे । रत्नशेखरनामानं, रत्नमालातनूद्भवम् ।२५५॥
विस्मापयन् जनं सर्वं, त्यागभोगादिभिर्गुणैः । श्रुतसागरसूरीणां, समीपं प्राप्य भूपतिः ॥२५६॥
तृणवत्सर्वं परित्यज्य, वस्त्राभरणभूषणम् । राजा जग्राह प्रव्रज्यां, सर्वकर्मनिषूदनीम् ॥२५७॥
प्रतिपन्नोऽभिग्रह स्तेन, कर्मनिर्मूलनाकृते । आजन्म [हि] मया षष्ठा-द्धोक्तव्यं कारणं विना ॥२५८॥
तदपि नीरसं रुक्षं, विरसं स्नेहवर्जितम् । [एषणादिविशुद्धं च, दोषमुक्तं समन्ततः] ॥२५९॥
श्रुतसागरगुरोः पार्श्वे, सदा संविग्नमानसः । पठिताशेषसूत्रार्थो गीतार्थो गुरुतालयः ॥२६०॥
मोक्षमार्गाहितस्वान्तः, सम्प्राप्तपरमोदयः । संयमैकरतो धीरः, सम्यग्दर्शननिर्मलः ॥२६१॥
सम्यग्ज्ञानातियुक्तात्मा, सम्यक्चारित्रतत्परः । अनुप्रेक्षाभिरात्मानं, भावयन्न च भीतधीः ॥२६२॥
संयमस्योपकारासु, धर्मानुगुणभूमिषु । मुनिभिर्विमलाचारैः, सह तासु निरन्तरम् ॥२६३॥
विहरन् सर्वजीवानां, [1]दयावांश्च पिता यथा । बाह्येन च सहान्तःस्थं, वर्धयन् सन्ततं तपः ॥२६४॥
आवासतां महर्द्धीनां, परिप्राप्तः प्रशान्तधीः । दमश्रिया परिष्वक्तः, परिशुद्धसुदर्शनः ॥२६५॥
उच्चैरुच्चैर्गुणस्थान-सोपानाऽऽरोहणादृतः । सबाह्याभ्यन्तरोदग्र-ग्रन्थग्रन्थिविवर्जितः ॥२६६॥
श्रुतेन सकलं पश्यन्, कृत्याकृत्यं महामुनिः । महासंवरसम्पन्नः, सातयन् कर्मसंहतिम् ॥२६७॥
प्राणधारणमात्रार्थं, भुञ्जानः सूत्रदेशितम् । धर्मार्थं धारयन् प्राणान्, धर्मं मोक्षार्थमर्जयन् ॥२६८॥
आनन्दं भव्यलोकानां, कुर्वन्नुत्तमदर्शनः । चरितेनोपमाभूतो, [2]यथोक्तश्च तपस्विनाम् ॥२६९॥
चिरं विहृत्य मेदिन्यां, तपसा क्षीणविग्रहः । गुरुणा समनुज्ञात-श्चकारानशनक्रियाम् ॥२७०॥
चतुर्धाहारसंहारां, देहसंहारहेतवे । मासमानां महासत्त्वः, संनिषण्णः शिलातले ॥२७१॥
विधायाराधनां वीरो, निर्धूयौदारिकां तनुं । पंचमीं गतिमापन्नो, यत्र यान्ति निराश्रवाः ॥२७२॥
मत्वेदं सर्वदा सद्भिः, कार्यो धर्मे समुद्यमः । [सुलभाऽमलभा येन । मुक्तिरामा भवेत्करे] ॥२७३॥
यः करोति जिनेन्द्राणां, सद्गन्धैः पादपूजनम् । लभते सर्वतो लक्ष्मीं, यथासौ रत्नसुन्दरः ॥२७४॥

इति **गन्धपूजाकथानकं** समाप्तम् ॥ श्रीरस्तु ॥

१ दयावान् पिता- BPJC ॥ २ यथोक्त त° BPC॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूपपूजायां नरकेसरिकथा

गन्धपूजाफलं प्रोक्तं, स्वर्गमोक्षफलप्रदम् । भावसारस्य धूपस्य, फलं सम्प्रति वर्ण्यते ॥१॥
समस्ति भारते वर्षे, निवासः सर्वसम्पदाम् । साधुसाधर्मिकाकीर्णो, देशो देशशिरोमणिः॥२॥
काशी जनपदो नाम, पुरी तत्र मनोरमा । **वाणारसी** जने रूढा, धनधान्यसमाकुला॥३॥
तत्रारिमत्तमातङ्ग-कुम्भनिर्भेदकेसरी । साहसाङ्कसमः शूरो, नरेन्द्रो **नरवाहनः** ॥४॥
तत्रास्ति **शङ्खचूडाख्यो**, विप्रो भार्या च **दुर्गिला** । दुर्भगा दुर्मुखा दुष्टा, निर्दया बद्धमुष्टिका॥
वर्जिता शङ्खचूडेन, दुर्गदौर्भाग्यपीडिता । कामभोगपरित्यक्ता, कालं नयति दुःखिता ॥६॥
शङ्खचूडलघुभ्राता, **मधुसुन्दरसञ्ज्ञितः** । दानधर्मरता तस्य, गेहिनी **मधुसुन्दरी** ॥७॥
एवं सरति संसारे, मासक्षपणपारणे । तपस्वी तपसा क्षीणो, दुर्गिलागृहमागतः ॥८॥
दृष्टवा साधुं सदाचार-मसदाचारया तया । प्रयुक्तं कर्कशं वाक्यं, दुष्टं दुर्गतिकारणम् ॥९॥
किं नास्ति कोऽप्युपायस्ते, मुण्ड! निर्वाहकारणम् । सुखहेतुराश्रितो येन, ह्युपायः परपीडकः ॥१०॥
श्रुत्वैतत्साधुदेहस्थो, गुणग्राही महोदरः । यक्षस्तां वक्तुमारेभे, रुष्टः कर्कशया गिरा ॥११॥
यदि पापे! न ते श्रद्धा, दातव्यं वा न विद्यते । निषेधस्ते तदा श्रेया-न्नो कर्कशप्रजल्पितम् ॥१२॥
दौर्भाग्योपरि दौर्भाग्यं, दुर्गिले! ते भविष्यति । गण्डान्तः स्फोटिकातुल्यं, दुर्गतिं च गमिष्यसि ॥१३॥
एवमुक्त्वा गतः साधु-र्द्वितीयक्षपणे स्थितः । भिक्षामटति नान्यत्र, विमुच्य प्रथमं गृहम् ॥१४॥
साप्युत्कटमहामोह-वेदोदयविवर्तिनी । येन तेन समासक्ता, परं सर्वेण वर्जिता ॥१५॥
न शीलं यमहीनत्वा-न्न कामो दुर्भगत्वतः । न धर्मो वासनासाध्यः, सा च तस्यां न विद्यते ॥१६॥
अन्यदा मिलितः कोऽपि, दुर्भगः कुलपुत्रकः । तेनापि दूरतस्त्यक्ता, दौर्भाग्यप्रचुरत्वतः ॥१७॥
अन्यदा च मृतो भर्ता, जाता रण्डा निरर्गला । शिक्षिता मधुसुन्दर्या, ततो जज्ञे समत्सरा ॥१८॥
रुष्टया च विषं दत्त्वा, मारिता मधुसुन्दरी । भणितश्च सशृङ्गारं, तद्भर्ता मधुसुन्दरः ॥१९॥
अमृतेनेव सिच्येते, त्वयि दृष्टे मम लोचने । प्रतिपद्यस्व मां भार्यां, सफलां कुरु याचनाम् ॥२०॥
श्रुत्वेदं स्तम्भिते तेन, श्रोतसी कम्पितं शिरः । भूयोऽपि न वक्तव्यं, त्वयेदृक्षं ममाग्रतः ॥२१॥
ततो वैलक्ष्यमापन्ना, विदित्वा तस्य निश्चयम् । आत्मानमवटे, क्षिप्त्वा, मृता सा दुर्गतिं गता ॥२२॥
निघ्नन्ति निजभर्तारं, स्वं पुत्रं मारयन्ति च । आत्मानमपि निघ्नन्ति, जीवा विरतिवर्जिताः ॥२३॥
शङ्खचूडस्य जीवोऽपि, मध्यमगुणयोगतः । मृत्वा वणिक्सुतो जातः शुद्धबुद्धिर्गुणाश्रयः ॥२४॥
रत्नचन्द्रकृताभिख्यः, सदाचारपरायणः । शुद्धबुद्धिर्गुणाधारो, धार्मिको धर्मवत्प्रियः ॥२५॥
दुर्गिलापि शुनीभावा-दुद्धृत्याजनि पुत्रिका । वणिजो **वसुदत्तस्य**, नाम तस्या **वसुन्धरा** ॥२६॥
परिणीता रत्नचन्द्रेण, कथञ्चिद्दैवयोगतः । अहो धातुरकौशल्यं, विषममृते योजितम् ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दौर्भाग्यं पृष्ठतो लग्नं, समायातं पुराकृतम् । अहो पृष्ठिं न मुञ्चन्ति, कृतकर्माणि देहिनाम् ॥२८॥
दृष्टा दहति नेत्राणि, स्पृष्टा करतलद्वयम् । भुक्ता दहति सर्वाङ्गं, सुखदा दूरतः स्थिता ॥२९॥
दुर्गृहावासदुःखेन, दग्धदेहस्य सर्वदा । वणिजो रत्नचन्द्रस्य, वव्रजुर्भूरिवासराः ॥३०॥
गृहाणि कुकलत्रेण, दृष्पुत्रेण कुलानि च । धनं कुव्यवहारेण, नूनं नश्यन्ति देहिनाम् ॥३१॥
क्षणवञ्चनया वर्षं, दिनं भुक्ते कुभोजने । कुभार्यया हतं जन्म, हतो राजा कुमन्त्रिभिः ॥३२॥
फलपुष्पकृते गेहा-न्निर्गतो नष्टमानसः । दृष्टाश्च पुरलोकानां, कुर्वन्तो धर्मदेशनाम् ॥३३॥
परोपकरणे निष्ठाः, करुणामृतसागराः । गुणरत्नधरा धीरा, **दमसार**मुनीश्वराः ॥३४॥
यथा जीवाः प्रबुध्यन्ते, विमुच्यन्तेच कर्मभिः । सङ्क्लिष्यन्ते यथा चैते, नरकं याति यथा तथा ॥३५॥
रत्नचन्द्रोऽपि वन्दित्वा, निषण्ण शुद्धभूतले । धर्मं श्रोतुं समारब्धो, दुःखदुःखितमानसः ॥३६॥
यथा जिनाग्रतो धूपं, कर्पूरागुरुमिश्रितम् । भावतो यो दहत्युच्चै-स्तस्य श्रीःसर्वतोमुखी ॥३७॥
इत्यादिकथिते धर्मे, सूरिणातिप्रबन्धतः । तेनावसरमासाद्य, सूरिं नत्वा च भावतः ॥३८॥
प्रपन्नो रत्नचन्द्रेण, सर्वज्ञो हृदि देवता । सर्वज्ञभणितो धर्मो, गुरवस्तु सुसाधवः ॥३९॥
रात्रिभोजनविरतिश्च, मधुमद्यनिवर्तनम् । नवनीतस्य मांसस्य, मैथुनस्य विवर्जनम् ॥४०॥
दमसारगुरुं नत्वा, रत्नचन्द्रो निजे गृहे । गतः करोति यत्नेन, प्रपन्नगुणपालनम् ॥४१॥
ब्रह्मचर्यव्रतं श्रुत्वा, चुकोपास्मै वसुन्धरा । निभालयति छिद्राणि, पापा मारणहेतवे ॥४२॥
अन्यदा मिलिता क्षुद्रा, **वत्सा**ऽऽख्या परिव्राजिका । सन्मान्य सा ततोऽयाचि, तया चूर्णं क्षयङ्करम् ॥
वत्सयापि च तद्दत्त-मुपचारगृहीतया । ततो वत्सा महापापा, साशङ्का स्वमठे गता ॥४४॥
वसुन्धरापि तन्मिश्र्य, भोजनेन दिने दिने । ददाति रत्नचन्द्रस्य, चूर्णं मारणहेतवे ॥४५॥
कालेन गच्छता जातः, क्षीणाङ्गश्चूर्णदोषतः । न शक्नोति समुत्थातुं, तत एवमचिन्तयत् ॥४६॥
को गुणोऽनेन देहेन, निर्गुणेनादृतेन मे । चतुर्भेदस्य संहार-माहारस्य करोम्यहम् ॥४७॥
विचिन्त्यैवं ततो धर्मे, धनं दत्त्वा यथोचितम् । पूजयित्वा जिनाधीशं, सुगन्धकुसुमादिभिः ॥४८॥
कर्पूरागरुसन्मिश्रं, धूपं दग्ध्वा तदग्रतः । रोमाञ्चाञ्चितसर्वाङ्गो, बद्ध्वायुष्कं सुरेष्वयम् ॥४९॥
विधायानशनं मृत्वा, देवभूयं गतिं गतः । सौधर्मे देवसौख्यानि, भुक्त्वा चायुः क्षये च्युतः ॥५०॥
बङ्गाजनपदे रम्ये **रङ्गशाला**महापुरे । राजलक्षणसम्पन्नो, राजा च **रणकेसरी** ॥५१॥
नरकान्ता प्रिया तस्य, सर्वदापि मनःप्रिया । रणकेसरिभूपस्य, सर्वकार्येषु संमता ॥५२॥
तस्याः कुक्षौ समुत्पन्नः, शुभस्वप्नेन सूचितः । समये प्रतिष्ठितं नाम, पुत्रस्य **नरकेसरी** ॥५३॥
समये च प्रयत्नेन, ग्राहितः सकलाः कलाः । यौवने च सामारूढो, व्यूढोरस्को महाभुजः ॥५४॥
प्रजाऽवनकृते धात्रा, निर्मितः सारपुद्गलैः । क्षात्रो धर्म इवाभाति, मन्येऽसौ कृतविग्रहः ॥५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मलयसुन्दराभिख्यो, वयस्योऽस्य सतां वरः । हृदयमिव कुमारस्य, द्वितीयं वेधसा कृतम् ॥५६॥
हेमपुरादथायातो, मेघनादो नृपाङ्गजः । धृतो दिनानि तत्रैव, कियन्ति नरकान्तया ॥५७॥
प्रणभ्य भणिता तेन, नरकान्ता कृतादरम् । मातर्मातुलसंदिष्टं, कथयामि तवाग्रतः ॥५८॥
मातुलेन समादिष्टं, कुमारेण ममान्तिके । दिनानि कतिचिन्नून-मागन्तव्यं यथा तथा ॥५९॥
अदर्शने दृढं प्रेम, नश्यत्येव शरीरिणाम् । कालेन गच्छता वत्स ! यथा हस्तपुटाज्जलम् ॥६०॥
भणितो मातापितृभ्यां, भवन्तं मातुलो दृढम् । समाह्वयति तद्वत्स, विलम्बं गच्छ मा कुरु ॥६१॥
मलयसुन्दरमित्रेण, मेघनादेन संयुतः । प्रधानं रथमारुह्य, चलितो हेमपुरोन्मुखः ॥६२॥
कतिभिरेव दिनैस्तत्र, सम्प्राप्तो हेमपत्तने । हेमसुन्दरभूपेन, सानंदमवलोकितः ॥६३॥
तत्रैव तिष्ठतस्तस्य, बहुमानपुरस्सरम् । नानाविधविनोदेन, क्रीडतो यान्ति वासराः ॥६४॥
अन्यदा च महीपीठे, मधुर्मन्मथबान्धवः । जनितानेकबिब्बोको, जजृम्भे जगतीतले ॥६५॥
मधुचन्द्रसखः कामः, कदर्थितजगत्त्रयः । तेजो बहुतरं प्राप, हविषेव हुताशनः ॥६६॥
केवलोऽपि बली कामो, दुर्जयः सर्वदेहिनाम् । किं पुनर्जनितोन्मादो, मधुचन्द्रकृतसन्निधिः ॥६७॥
चलद्भिः पल्लवैर्यत्र, मलयानिलकम्पितैः । मधुराजागमे तुष्टा, नृत्यंतीव महीरुहाः ॥६८॥
गन्धलुब्धालिशब्देन, वृक्षकक्षेषु सर्पता । सङ्गीतमिव कुर्वन्ति, तरवो मुदितमानसाः ॥६९॥
कोकिलानां निनादेन, स्त्रीमानग्रन्थिभेदिना । सितकुसुमैर्हसन्तीव, वसन्ते वनराजयः ॥७०॥
पुष्पकालेऽपि वक्रत्वं, श्यामत्वं यत्र का भवेत् । फलाशा किंशुकस्तेन, मुक्तः पत्रैरनागतम् ॥७१॥
[1]फलितान् पुष्पितान् दृष्ट्वा, सर्वतोऽपि वनस्पतीन्। सञ्जाता इति कालास्या, दुर्जना इव किंशुकाः ।७२।
किंशुकं पुष्पितं दृष्ट्वा, देशान्तरगतैरपि । स्मर्यन्ते वल्लभाश्चित्ते, नवरङ्गविराजिताः ॥७३॥
निर्झराम्भसि मग्नाभिः, शाखाभिर्यत्र शाखिनः । जलाञ्जलिं प्रयच्छन्ति, पथिकानां गतायुषाम् ॥७४॥
किंशुकैर्नवरङ्गाभै-र्बद्धमदन-फला सती । वसन्तलक्ष्मीर्यत्र, रेजे नववधूरिव ॥७५।
कोमलैर्गीतिवादित्रै-र्मञ्जनैश्च मनोहरैः । स्वच्छचन्दनवस्त्रैश्च, शृङ्गारैर्वरयोषिताम् ॥७६॥
कलकोकिलनादेन, दोलान्दोलेन लीलया । जलयन्त्रैर्विचित्रैश्च, देवालयमहोत्सवैः ॥७७॥
पाडलागन्धमाघ्राय, श्रुत्वा कोकिलकूजितम् । कान्तैकशरणो यत्र, क्रियते कामिनीजनः ॥७८॥
रम्यहर्म्यतलस्थेन, कुमारेण विलोकितः । विनिर्यन् राजमार्गेण, सुनेपथ्योऽबलाजनः ॥७९॥
मेघनादः कुमारेण, पृष्टः कोऽयं महोत्सवः । येनैष पिण्डितो याति, स्त्रीजनो मम कथ्यताम् ॥८०॥
तेनाभाणि कुमाराद्य, कामदेवमहोत्सवः । वर्तते सर्वलोकानां, मनः क्षोभविधायकः ॥८१॥
तत्रायं स्त्रीजनः सर्वो, वस्त्राभरणभूषितः । गृहीतपुष्पधूपादिः, कामाराधनहेतवे ॥८२॥
चलितो गम्यते तत्र, यदि तेऽस्ति कुतूहलम् । प्रतिपन्नं कुमारेण, गतास्तत्र त्रयोऽपि ते ॥८३॥

१ J । पतितान् पुष्पितान्- BCI पुष्पितान् फलितान्-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रणम्य कामदेवाय, शेषामादाय शीर्षतः । परिभ्रमितुमारब्धा, उद्याने कामसुन्दरे ॥८४॥
नवयौवनमारूढा, सखेदा शून्यमानसा । दृष्टैका कन्यका कान्ता, सहकारतरोरधः ॥८५॥
एकाकिनी सशोका च, सर्वावयवसुन्दरी । तनूदरी विशालाक्षी, लावण्यामृतदीर्घिका ॥८६॥
बकुलामोदिनिःश्वासा, पक्वबिम्बसमाधरा । मुक्तपद्मालया देवी, पद्मा वनमुपागता ॥८७॥
भूरिसम्भ्रमसञ्जात-निःश्वासोत्कम्पितस्तनी । लावण्येनैव लिम्पन्ती, समस्तां काननावनिम् ॥८८॥
पुष्पोपहारं कुर्वाणा, दृष्टिक्षेपैर्मुहुर्मुहुः । निःश्वासाकृष्टमत्तालि-कुलव्याकुलितानना ॥८९॥
सौकुमार्यादिवोदारा-च्छ्लाघ्यतां यान्ती निर्भरम् । यौवनेन-कृताश्लेषा, सीमा निःशेषयोषिताम् ॥९०॥
गृहीत्वेवाखिलस्त्रीणां, लावण्यं जगदद्भुतम् । कृतैषा वेधसा कर्तुमद्भुतं सार्वलौकिकम् ॥९१॥
इतश्चोन्मूलितालान-स्तम्भो मदजलाविलः । पट्टहस्ती नरेन्द्रस्य, क्रोधान्धीकृतलोचनः ॥९२॥
त्रोटयित्वा च वस्त्रादि, विधूयाधोरणं तथा । पातयित्वा महीपीठे, मारयित्वातिरोषतः ॥९३॥
मत्तो गुलगुलाराव-पूरिताखिलदिङ्मुखः । भञ्जन्नापणवेश्मानि, समुद्धृतकरः करी ॥९४॥
विलोक्य जनसञ्चारं, श्रुत्वा तूर्यस्य निःस्वनम् । कामसुन्दरमुद्यान-मनु वव्राज वेगतः ॥९५॥
तुरङ्गमगतैः पुम्भिः-र्धावद्भिश्च पुरःस्थितैः । हस्त्यागच्छति भो लोका!, यात यात दिशोदिशम् ॥९६॥
एतच्छ्रुत्वा जनः सर्वः, प्राणानादाय सत्वरम् । कोऽपि क्वापि गतो यस्मा-ज्जीवानां जीवितं प्रियम् ।९७।
सापि बाला भयोद्भ्रान्ता, प्रविष्टा वंशगह्वरे । वेपमानसमस्ताङ्गी, लतेव पवनाहता ॥९८॥
मेघनादो गतः क्वापि, नष्टो मलयसुन्दरः । एकाकी पर्यटन् प्राप्तः, कुमारो नरकेसरी ॥९९॥
यत्र सा भयसंत्रस्ता, हरिणीलोललोचना । वंशगह्वरमध्यस्था, संलीनास्ते कुमारिका ॥१००॥
विलोकिता कुमारेण, कुमारोऽपि तया दृशा । दृष्टः सानन्दया जात-स्तयोर्दृष्टिसमागमः ॥१०१॥
तद्वचनात्कुमारोऽपि, प्रविष्टो वंशगह्वरे । ससम्भ्रमा सशृङ्गारा, सम्प्रवृत्ता मिथः कथा ॥१०२॥
क्षणांतरेण विश्वस्ता, धृताभिमुखलोचना । आविष्कृतानुरागा च, पृष्टा सा तेन भामिनी ॥१०३॥

त्वं कस्यासि सुता बाले!, सशोका केन हेतुना ? ।
एकाकिनी कथं जाता ?, यूथभ्रष्टा यथा मृगी ॥१०४॥

किं वा भजन्ति ते नाम ?, वर्णाः पूर्णमनोरथे! । अदृष्टेऽपि सतां प्रीति-र्जायते सज्जने जने ॥१०५॥
तस्मै सा कथयामास, साश्रुगद्गदया गिरा । दधत्यात्यंतमाधुर्यं, चेतश्चोरणलक्षया ॥१०६॥
उदन्वता परिक्षिप्तः सारश्रीखण्डमण्डितः । मरिचोद्भ्रान्तहारीतो, मलयोऽस्ति महीधरः ॥१०७॥
मलयसारं पुरं तत्र देशे सुरपुरप्रभम् । मलयकेतुभूपाल-स्तत्पालयति हेलया ॥१०८॥
लीलयैव धराभार-धरणोद्धुरकन्धरः । सर्वावरोधनारीणां, मुख्या लक्ष्मीरिवोत्तमा ॥१०९॥
सर्वाङ्गसुन्दराकारा, नाम्ना मलयसुन्दरी । प्रतिबिम्बमिव स्त्रीणां, वेधसा सा विनिर्मिता ॥११०॥
तदङ्गतः समुत्पन्ना, नाम्नाहं जयसुन्दरी । तत्रैव समये सिद्धाः, पितुर्व्युत्थितपार्थिवाः ॥१११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा प्रश्नितस्तेन, मां समुद्दिश्य केवली । भगवन् जयसुन्दर्याः कोऽत्र भर्ता भविष्यति? ॥११२॥
स प्राह भुवनानन्दी, रणकेसरिनन्दनः । उदारचरितो वीरो, नाम्ना च नरकेसरी ॥११३॥
राकाचन्द्र इवाशेष-शुभशुभ्रकलालयः । रूपातिशयसंपन्नः, सोऽस्या भर्ता भविष्यति ॥११४॥
ततः सुखेन तिष्ठन्त्या, गतःकालः कियानपि । अथ हर्म्यतले सुप्ता, योगावर्तक योगिना ॥११५॥
सहसैव समानीता, मन्त्रेणाकृष्य सत्वरम् ।श्मशानेऽतिमहारौद्रे, भूतप्रेतसमाकुले ॥११६।
तत्र भूमिगृहे मुक्त्वा, मां गतोऽसौ दुराशयः । योगिन्यपि गता क्वापि, या मुक्ता मम रक्षिका ।११७।
[1]विजनं वीक्ष्य नष्टाहं, श्रुत्वा बहुजनारवम् । शनैः शनैः समायाता, प्रविष्टा काममन्दिरे ॥११८॥
प्रणम्य मदनं द्वारि, निर्गता शून्यमानसा । क्षणमेकं स्थिता याव-त्सहकारतरोरधः ॥११९॥
विषमध्येऽमृताकारं, तावद्दृष्टं तवाननम् । ततो हस्तिभयाद्भीता, द्रुतमत्र समागता ॥१२०॥
कथितो यस्त्वया पृष्टः, स्ववृत्तान्तो मयाखिलः । साम्प्रतं श्रोतुमिच्छामि, त्वदीयमपि मूलतः ॥१२१॥
कुमारेणापि निःशेषो, मातृपितृपुरादिकः । कथितो निजवृत्तान्तः, सानन्दाजनि कन्यका ॥१२२॥
अहोऽनुकूलमाचीर्णं, योगावर्तकयोगिना । [2]अतर्कित कृतो येन, त्वया सह समागमः ॥१२३॥
आपदः सम्पदश्चैव, समीपस्थाः शरीरिणाम् । आपदपि च येनैषा, मे जाता सम्पदुत्तमा ॥१२४॥
कुमार! कुरु मे पाणि-ग्रहणं कामकानने । इहैव किं विचारेण, दीर्घसूत्री विनश्यति ॥१२५॥
हुताशं साक्षिणं कृत्वा, गान्धर्वेन विवाहिता । भुक्ता सर्वाङ्गसंस्पर्शं, जाता सर्वाङ्गनिर्वृतिः ॥१२६॥
उपहत्य जनं कञ्चिद्भङ्क्त्वा भूरि लतागृहान् । इतस्ततः परिभ्रम्य, मोटयित्वाऽवनीरुहः ॥१२७॥
तुरङ्गिभिः समानीतो, वेणुग्राहैः कदर्थितः । आधोरणवशं जातो, यातः पुरवरे गजः ॥१२८॥
यथास्थानं गतो लोको, विजनं काममाननम् । सुवसं दुर्वसं धत्ते, दुर्वसं सुवसं सुधीः ॥१२९॥

यतः **अघटितघटितानि घटयति, सुघटितघटितानि जर्जरीकुरुते ।**
विधिरेव तानि घटयति, यानि पुमान्नैव चिन्तयति ॥१३०॥
द्वीपादन्यस्मादपि, मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति, विधिरभिमतमभिमुखीभूतः ॥१३१॥

गत्वराच्च कुमारोऽपि, खड्गहस्तो विनिर्गतः । पश्चाद्[वि]निर्गता कान्ता, सत्कान्ता जयसुन्दरी॥
पतिसम्पर्कसञ्जातां, बिभ्राणा वपुषः श्रियं । कंकणं च विवाहाख्यं, दधती वामपाणिना ॥१३३॥
शिरस्याहितसत्पुष्पा, कर्णविन्यस्तपल्लवा । वनश्रीरिवैतस्य, पृष्ठौ लग्ना चकास्ति सा ॥१३४॥
अत्रान्तरे समायातः, क्रोधान्धीकृतलोचनः । कम्पयन् कर्त्तिकां रौद्रां, योगावर्तकयोगिकः ॥१३५॥
आः पापे! वञ्चयित्वा मां, कथमत्र समागता ? । पिबत्वतोऽद्य ते कोष्णं, शोणितं मम कर्त्तिका ।१३६।
कुमारेणापि निस्त्रिंशः, कोशादाकृष्य लीलया । कृतः करे करैर्भानो-र्दुर्दर्शश्चर्मचक्षुषाम् ॥१३७॥

---

१ व्यजनं- BPJ ॥ २ BJP । कारितोऽतर्कितो येन-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंविधं न ते युक्तं, वक्तुं च योगिनः सतः । न जल्पन्त्यपराधेऽपि, सन्तो हि कर्कशां गिराम् ॥
रे पाप! प्रथमं तावत्, पिबामि तव शेणितम् । पश्चादस्याः करिष्यामि, नवखण्डं शरीरकम् ॥१३९॥
इत्युक्त्वा धावितो योगी, वेगतः कुमरं प्रति । वाहिता कर्तिका तेन, वञ्चिता कुमरेण सा ।१४०।
हतश्च दक्षिणे बाहौ, कुमारेणापि योगिकः । दृढमुष्टिप्रहारेण, पतिता कर्तिका भुवि ॥१४१॥
भूयोऽपि मुष्टिना पृष्टौ, प्रहतः पतितो भुवि । विलक्षोऽलब्धलक्षश्च, निरूपयन् दिशो दश ॥१४२।
कुमारेण भणितो योगी, उत्तिष्ठ कुरु पौरुषम् । पतिता न विराजन्ते, रणभूभौ महौजसः ॥१४३॥
भणितश्चलचित्तेन, योगिना नरकेसरी । यदहं वच्मि तत्कार्यं, कृतं पौरुषकर्मणा ॥१४४॥
अस्ति मे गारुडं दिव्यं, व्रसेतरविषापहम् । द्वितीयमञ्जनं श्रेष्ठं, तिरोधाननिबन्धनम् ॥१४५॥
गृहाणैतद् द्वयं येन, जायते मम निर्वृतिः । प्रतिपन्नं कुमारेण, गृहीतं विधिपूर्वकम् ॥१४६॥
मलयकेतुसुता बाला, लक्षणलाञ्छितविग्रहा । सुप्राकृष्य मयानीता, चण्डिकाबलिहेतवे ॥१४७॥
पूर्वसेवा कृता ताव-दुत्तरा चावतिष्ठते । तत्र कन्याबलिं दत्त्वा, साधयिष्यामि यक्षिणीम् ॥१४८॥
स्थितमेतद्यथाचैषा, प्राप्नोति पितृमन्दिरे । तथा [1]त्वया च कर्तव्यं, भूयो भवतु दर्शनम् ॥१४९॥
गतो योगी कुमारोऽपि, कामदेवगृहे गतः । दृष्टोऽसौ मेघनादेन, पृष्टश्च क्वोषितो भवान् ॥१५०॥
तेनापि कथितं सर्वं, यथा वृत्तं तथाखिलम् । विहस्य भणितं तेन, तुष्टस्ते मित्र! मन्मथः ॥१५१॥
मुहूर्तमेकमत्रैव, स्थातव्यं स्थिरबुद्धिना । प्रतिपन्नं कुमारेण, मेघनादो गतो गृहे ॥१५२॥
प्रोक्तः सर्वोऽपि वृत्तान्तः, प्रहृष्टो हेमसुन्दरः । चलितः सर्वसामग्र्या, सम्प्राप्तः काममन्दिरे ॥१५३॥
गन्धवारणमारोप्य, सशृङ्गारं वधूवरम् । प्रविवेश पुरं राजा, कृतशोभं समन्ततः ॥१५४॥
सम्पादितेतिकर्तव्यः, स्वयं राज्ञा पुरस्कृतः । वस्त्रैश्च भूषणाद्यैश्च, कालं नयति भूपभूः ॥१५५॥
अन्यदा ज्ञातवृत्तान्तो, मलयकेतुभूमिपः । तुतोष हृदये बाढं, माता मलयसुन्दरी ॥१५६॥
भणितो मलयसुन्दर्या, मलयकेतुर्महिपतिः । शोभनं यदि जामाता, आयाति सह वत्सया ॥१५७॥
प्रिये! खेदो न कर्तव्यः, करोमि तव वाञ्छितम् । इत्युक्त्वा प्रेषिता भृत्याः, सोपदा हेमपत्तने ॥१५८॥
तेऽपि हेमपुरं प्राप्य, प्रतीहारनिवेदिताः । सोपायना निरुत्सेकाः, सभामण्डपमागताः ॥१५९॥
अष्टादशसरं हारं, हरहारसमप्रभम् । सारश्रीखण्डखण्डानि, विमुच्य पुरतो नताः ॥१६०॥
निषण्णा दर्शितस्थाने, दृष्टाः सानन्दया दृशा । पृष्टाश्च क्षेमं सर्वत्र, मलयकेतुभूभुजः ॥१६१॥
क्षेमे च कथिते भणिताः, किमागमनकारणम् । ततस्तैरर्पितो लेखः सन्दिष्टं कथितं गिरा ॥१६२॥
मलयकेतुभूपेन, भूयो भूयः कृतादरम् । सन्दिष्टं च तथा कार्यं, कुमारो नरकेसरी ॥१६३॥
यथा शीघ्रं समायाति, मलये सह वत्सया । एष सन्देशकः स्वामिन्!, लेखार्थोऽप्ययमेव च ॥१६४॥
ततः सम्भूषिता राज्ञा, वस्त्राभरणभूषणैः । प्रतिप्राभृतहस्ताश्च, ते शुभेऽह्नि विसर्जिताः ॥१६५॥

---

१ द्वये- BJP॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ससहायः कुमारोऽपि, समये सह कान्तया। मुत्कलितो गच्छ हे वत्स!, पन्थानः सन्तु ते शिवाः।१६६।
द्रोणीभिर्जलमुत्तीर्य, गतास्ते स्तोकवासरैः। समागात्सन्मुखं तत्र, मलयकेतुभूपतिः ॥१६७॥
प्रवेशितो मुदा तेन, कृत्वा पुरमहोत्सवम्। श्वश्रूश्वशुरमानम्य, कुमारो नरकेसरी ॥१६८॥
निषण्णः प्रश्नितो राज्ञा, सर्वत्र कुशलं तव। प्रष्टव्यमेतदेवेह, चले यौवनजीविते ॥१६९॥
प्रणम्य पितृपादेभ्यः, सस्नेहं जयसुन्दरी। मातुः पादग्रहं कृत्वा, तदङ्के निषसाद सा ॥१७०॥
सानन्दा सविषादा च, जज्ञे मलयसुन्दरी। वत्से ! सङ्क्षेपतः सर्व-मामूलाच्चरितं निजम् ॥१७१॥
निवेदय यथावृत्तं, कौतुकं मम वर्तते। तयापि कथितं सर्वं, यथावृत्तं तथादितः ॥१७२॥
एतच्छ्रुत्वा जगादेदं, माता मलयसुन्दरी। यत्र दृष्टो विवाहस्ते, सखेदं तेन मानसम् ॥१७३॥
सुपात्रवरलाभेन, मुमुदे च मनो मम। [इत्युक्त्वा विरता राज्ञी, प्रमोदभरमेदुरा] ॥१७४॥
कृताशेषोपचारस्य, राज्ञा मलयकेतुना। पुत्रादभ्यधिकं तत्र, दृश्यमानस्य सर्वदा ॥१७५॥
वव्रजुर्वासरास्तस्य, सुखितस्य प्रमोदतः। मनोवाञ्छितवस्तूनां, तत्क्षणादेव योगतः ॥१७६॥
नाभिहृदप्रविष्टेन, जात्येन मृगनाभिना। वासिताशेषदिक्चक्रः, सत्पुष्पकृतशेखरः ॥१७७॥
कर्पूरपूरसन्मिश्र-सारश्रीखण्डचर्चितः। मृगमदेन सुगन्धेन, कपोले कृतमण्डनः ॥१७८॥
आर्द्रकर्पूरहारेण, विराजितशिरोवरः। हारिहीरकसङ्कीर्ण-श्रवणासक्तकुण्डलः ॥१७९॥
निःश्वासोह्यमहामूल्य-सद्वस्त्रावृतविग्रहः। ताम्बूलबीटकाशून्य-करः कृतकुतूहलः ॥१८०॥
ललाटपट्टविन्यस्त-तिलकेन विराजितः। आरामोद्यानरम्येषु, काननेषु वनेषु च ॥१८१॥
सरसीषु तडागेषु, निर्झरेषु नदीषु च। लतामण्डपगुल्मेषु, द्राक्षामण्डपभूमिषु ॥१८२॥
निकुञ्जेषु मनोज्ञेषु, नानापुष्पसुगन्धिषु। नागवल्लीमनोज्ञेषु, सोऽक्रीडत्सह कान्तया ॥१८३॥
अभग्नप्रसरं तस्य, क्रीडतः कामभूमिषु। सम्पूर्णाशेषकामस्य, मासैरपि दिनायितम् ॥१८४॥
प्रिये! स्थानं प्रमोदानां, मलयो हि मया श्रुतः। तेनादृष्टेन नो किञ्चिन्मया दृष्टं कुतूहलम् ॥१८५॥
तयाऽपि कथितं मातु-र्मात्रा भर्त्रे निवेदितम्। तेनाऽपि कारिता सर्वा, सामग्री यानहेतवे ॥१८६॥
विशिष्टभक्ष्यभोज्यानि, यदन्यदपि सुन्दरम्। तदुपयोगि योग्यं च, तत्सर्वं प्रगुणीकृतम् ॥१८७॥
सनृपः सकलत्रश्च, बहुलोकगणान्वितः। कुमारो नगमारूढः, कैलाशमिव शङ्करः ॥१८८॥
तत्र तालवने रम्ये, चन्द्रनामोदसुन्दरे। एलागन्धभृतघ्राणे, झरन्निर्झरहारिणी ॥१८९॥
कृतो वासः कुमारेण दृष्टैका हारहारिणी। श्रवणासक्तवज्रेन्द्र-कुण्डलोद्योतिताननाः ॥१९०॥
अष्टादशाब्ददेशीया, कान्तकार्तस्वरप्रभा। समुत्तीर्य नभोमार्गा-दक्षिणामनुससार सः ॥१९१॥
कैषा कैषेति जल्पन्तो, धाविताः पृष्टतो जनाः। सापि दुर्जनमैत्रीव, क्षणादेव न दृश्यते ॥१९२॥
तथैव वलितो लोको, न च सिद्धं प्रयोजनम्। कुमारश्चिन्तयामास, प्रथममेतत्कुतूहलम् ॥१९३॥
भुक्त्वा विश्रम्य सर्वत्र, विलोकितकुतूहलः। भूयोऽप्यावासमागम्य, सुष्वाप नृपनन्दनः ॥१९४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निशीथे खड्गमादाय, निर्गतोऽलक्षितो जनैः । एकाक्येव महासत्त्व-श्चचाल नरकेसरी ॥१९५॥
दक्षिणां दिशमाश्रित्य, परिसर्पन्नितस्ततः । गतो नैर्ऋतकोणस्थां, वनराजिविराजिताम् ॥१९६॥
चन्द्रसूर्यकरागम्यां, रौद्रामतिबिभीषणाम् । कृतान्तवदनाकारां, गुहां **भीममुखाभिधाम्** ॥१९७॥
मन्त्रसाधकसाक्षेप-हुङ्कारवचनैस्तथा । पुष्पधूपादिगन्धैश्च, ससत्त्वेति विनिश्चिताम् ॥१९८॥
प्रधानपद्मरागेण, तमःस्तोमविघातिना । प्रकाशितगुहाद्वारो, दृष्टो विद्याधरीसुतः ॥१९९॥
कुमारेणापि सञ्जात-विस्मयेन-विलोकितः । कोऽयं युवा गुहामध्या-त्केसरीव विनिर्गतः ॥२००॥
नितान्तसुकुमाराङ्गो, महौजा नव्ययौवनः । अत्यन्तकृशसर्वाङ्ग-स्तपःकारी सुसाधुवत् ॥२०१॥
सम्भ्रान्तं कुमरं दृष्ट्वा, समागत्य कृतादरः । पप्रच्छ स्वागतं भ्रातः!, कुतस्तेऽत्र समागमः ? ॥२०२॥
कुमरेण कथितं किञ्चि-त्किञ्चित्तेन निवेदितम् । एवं परस्परालापै-स्तयोस्तत्रावतिष्ठतोः ॥२०३॥
कामसंरोहिणी नाम, तरुणी तत्र चागता । दृष्टेति जातसङ्केत-कुमारेण निरीक्षिता॥
सीमन्तकविन्यस्त-पद्मरागमणित्विषा । सर्वतोऽपि विसारिण्या, नाशयन्ती निशातमः ॥२०५॥
ततो विद्याधरः प्राह, कुमार ! कुरु मे वचः । पिब्रेदं सुन्दरं दुग्धं, हृद्यं मदुपरोधतः ॥२०६॥
विद्याकल्पो महाभाग !, अर्धरात्रे तृतीयके । पीयतेऽनन्यगव्यस्य, पयःसम्पुटकत्रयम् ॥२०७॥
अतिथिस्त्वं समुत्तिष्ठ, सहितैरेव पीयते । कुमरः प्राह भुङ्क्ष्व त्वं, रुचिर्मे नास्ति साम्प्रतम् ॥२०८॥
गत्वैकान्ते ततः सोऽपि, पयः पीत्वा समागतः । निषण्णः कुमरस्यान्ते, बभाणेदं स्फुटाक्षरैः ॥२०९॥
प्रभाते बिल्वलक्षेण, तर्पणीयो हुताशनः । यदि सत्त्वं तदा सिद्धि-र्निसत्त्वस्य वृथा श्रमः ॥२१०॥
पुरुषरत्नमिवाभाति, [1]भवांश्च परमाकृतिः । समस्ति मे मनोवाञ्छा, परं वक्तुं न शक्यते ॥२११॥
प्रहराष्टं महाभाग !, प्रभाते यदि स्थीयते । ममान्तिके तदा सर्वं, सिद्धं मन्यामहे वयम् ॥२१२॥
किमेभिश्चञ्चलैः प्राणैः, कर्तव्यं कुरु वाञ्छितम् । प्रातरेव भवत्पार्श्वे, मां जानीहि समागतम् ॥२१३॥
इत्युक्त्वाथ कुमारोऽपि, क्षणं सुप्त्वा निजाश्रये । तल्पमुज्झांचकाराशु, मित्रार्थकरणोद्यतः ॥२१४॥
मलयसुन्दरस्याथ, मेघनादस्य च स्वयम् । रहस्यं हृदि निक्षिप्य, गतोऽसावसिना सह ॥२१५॥
आत्मा सन्दर्शितस्तेन, खेचरस्य गुहामुखे । निषण्णः कुमरस्तत्र, खेचरार्पितविष्टरे ॥२१६॥
यत्कर्तव्यं च तद् ब्रूहि, सर्वत्र प्रगुणा वयम् । जुहोमि श्रीफलैरग्निं, मन्त्रजापपुरस्सरम् ॥२१७॥
विघ्नान् सर्वान् निराकुर्वं-स्तिष्ठ त्वं सावधानकः । निर्भीतः साहसोपेत-स्त्वदायत्ता हि सिद्धयः ॥२१८॥
लिखितं खेचरेणापि, रक्तचन्दनमण्डलम् । तदेकदेशे लिखिता, देवताबहुरूपिणी ॥२१९॥
सारकाष्ठभृते कुण्डे, ज्वलज्ज्वालासमाकुले । होमं कर्तुं समारब्धः, श्रीफलैर्मन्त्रपूर्वकम् ॥२२०॥
अत्रान्तरे समाधूत-धूलीतृणमहीरुहः । वातो वातुं समारब्ध- श्चकम्पे मेदिनीतलम् ॥२२१॥
घनो गर्जितुमारब्धो, विद्युज्झम्पाभिरुत्थिता । न किंचित्तमसा तत्र, दृश्यते पुरतः स्थितम् ॥२२२॥

१ भवान्यरं BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोणशोणितधाराभि-र्वर्षत्याशु घनाघनः । उड्डीय जीवितं याति, शिवानां फेत्कृतारवैः ॥२२३॥
घूकघूत्कृतशब्देन, गुहासु प्रतिसर्पता । कर्णाभ्यर्णागतं नैव, श्रूयते जनजल्पितम् ॥२२४॥
मुक्तकेशा विवस्त्राश्च, करोल्लालितकर्त्तिकाः । ज्वाला मुखेन मुञ्चन्त्यो, योगिन्यो ननृतुरम्बरे ॥२२५॥
स चासनसमासीनो, यावदास्ते नृपाङ्गजः । खेचरोऽपि च निर्भीकः प्राजुहोज्जातवेदसम् ॥२२६॥

तयोः सत्त्वं समालोक्य, उपशान्ता च बिभीषिका ।
अत्रान्तरे समायातः, क्षेत्रपालो महाबलः ॥२२७॥

तयोः सत्त्वपरीक्षार्थं, मलयागस्य नायकः । क्षेत्रपालो महासत्त्व-क्षोभितानेकसाधकः ॥२२८॥

भो मानव! किमर्थं ते, करे खड्गो विलोक्यते ? ।
मन्त्राजापकरः कोऽयं ? देवी का लिखिता भुवि ? ॥२२९॥

मलये मां विमुच्यान्यं, देवं [च] ध्यायतस्तव । का वैदग्धी कुतः सिद्धिः, क्रुद्धस्ते जीवितान्तकः ।२३०।
कुमारोऽवग् न ते युक्तं, वक्तुमीदृग्वचःसुर !। राकाचन्द्रः सुधां सूते, न कदाचिद्दवानलम् ॥२३१॥
विद्यासाधनकल्पोऽयं, यदन्या देवता कृता । मलयः कस्य सम्बन्धी, वीरभोग्या वसुन्धरा ॥२३२॥
श्रुत्वेदं [स] कुमारस्य, सदर्पं कर्कशं वचः । सावेशो विहितावज्ञो, जगादेदं महाबलः ॥२३३॥
पाप ते नाशयाम्यद्य, पौरुषं पुरुषाधम ! । न हि साम्येन शाम्यन्ति, दुर्जना दृष्टचेतसः ॥२३४॥
विधाय विकृताकारं, वेतालाकृतिमात्मनः । ततो वर्द्धितुमारब्धो, दरकारी तनूभृताम् ॥२३५॥
दक्षिणस्यां नरं कञ्चि-त्खव्यग्रकरं वहन् । कापालिकं तु वामायां क्रन्दन्तं करुणैः स्वरैः ॥२३६॥
तयोः कर्त्तिकयोत्कृत्य, खादन् मांसानि शोणितम् । पिबन् हसन्नट्टहास्येन, नृत्यन्नुच्चैश्च विस्वरम् ॥
सौविराञ्जनभृङ्गालि-महिषशृङ्गसमप्रभः । कालकुटिलदंष्ट्रालः क्षामगण्डो भयङ्करः ॥२३८॥
सूर्पकर्णो विरूपाक्ष-स्तुच्छचिर्पटनासिकः । रक्ताक्षः कपिलकेशश्च, वृश्चिकैः कृतशेखरः ॥२३९॥
तत्कालोत्कृतरक्तार्द्र-चर्मावृतकटीतटः । कटीभागे वहन् भीमं, महाकायं महोरगम् ॥२४०॥
विसर्पत्स्फारफूत्कार-भुजङ्गकृतकङ्कणः, [१]कगवाशक्तबीभत्स-नृमुण्डकृत कण्डिकः ॥२४१॥
नररक्तवसापूर्ण-कपालन्यस्तलोचनः मुखमुक्तज्वलज्जवालः सीमा सर्वभयङ्कृताम् ॥२४२॥
रक्ताभ्यक्तां करासक्तां, कृतान्तरसनासमाम् । करालां कर्त्तिकां तीक्ष्णां, संलिहन् लोलजीह्वया ॥
सूर्पाकारनखः क्षुद्रः, क्रमेलकशिरोधरः । दीर्घदन्तुरदन्तश्च, करकम्पितकर्त्तिकः ॥२४४॥
विधाय विकृतं रूप-मूर्ध्वं गत्वा नभस्तले । हसन्नट्टट्टहासेन नृत्यत्युद्धुरकन्धरः ॥२४५॥
हेलयासौ चचालाथ, मन्त्रसाधकसन्मुखः । कुमारः खड्गमादाय, तयोरन्तःस्थितोऽवदत् ॥२४६॥
कस्त्वं भोः केन कार्येण, गम्यते सत्वरैः पदैः । निर्निमित्तं किमित्येवं, हस्यते विस्वरैः स्वरैः ॥२४७॥
स प्राह साधकस्यास्य, मांसरक्तपिपासया । गम्यते हस्यते चेष्टा, एतस्यैव दुरात्मनः ॥२४८॥

१ = मनुष्यकपाल- J पार्श्वे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरासुरनराभ्यर्च्यं, विमुच्य मां महाबलम् । का चैषा दृश्यते क्षुद्रा, लिखिता भुवि देवता ॥२४९॥
कुमारः प्राह कल्पोऽयं, कोपस्तव निरर्थकः । भिन्नोष्ठसम्पुटाः सन्तो, न हसन्ति महास्वरैः ॥२५०॥
विद्यासाधकपुंसस्तु, दुर्लभे मांसशोणिते । देवयोनेर्दुराशेयं, तव चेतसि वर्तते ॥२५१॥
वेतालोऽपि जगादेदं, कुमारं पुरतः स्थितम् । मुञ्च मार्गं व्रज स्थानं, यदि ते जीवनस्पृहा ॥२५२॥
कुमारः प्राह–
अद्य श्वो वा ध्रुवो मृत्यु-र्मित्रार्थं यद्यसौ भवेत् । तदा मे किं न पर्याप्तं, मरणान्न बिभेम्यहम् ॥२५३॥
अर्थाः प्राणाश्च ये यान्ति, गुरुदेवप्रयोजने । त एवात्र प्रशस्यन्ते, शेषाः सङ्क्लेशहेतवः ॥२५४॥
कोऽपि केनाप्युपायेन, जीवो जीवति भूतले । देवयोने र्न युक्तं ते, विघ्नं कर्तुं निरर्थकम् ॥२५५॥
मलयेऽस्मिन्नहं स्वामी, गर्वोऽप्येष न सङ्गतः । किं न श्रुतं त्वया वाक्यं, वीरभोग्या वसुन्धरा ॥२५६॥
महाबलः प्रोवाच–
रे डिम्भ प्रथमं ताव-द्भवतो मांसशोणिते । भक्षयामि पिबाम्युच्चैः, पश्चादस्य दुरात्मनः ॥२५७॥
इत्युक्त्वा धावितो वेगा-द्वेतालः कुमरं प्रति । वाहिता कर्त्तिका तेन, कुमारेणापि वञ्चिता ॥२५८॥
खड्गमादाय तेनापि, प्रहतो दक्षिणे करे । वेतालः पतिता तस्य, कराद्भुवि च कर्त्तिका ॥२५९॥
विलक्षो वीक्षयामास, दिक्चक्रं शून्यया दृशा । उक्तो भूयोऽपि भो भद्र!, करे कुरु निजायुधम् ।२६०।
निरायुधेषु दीनेषु, पतितेषु नतेषु च । प्रहारं न प्रकुर्वन्ति, सन्तः सन्मार्गगामिनः ॥२६१॥
तथा भो काविमौ क्षिप्तौ, वामदक्षिणकक्षयोः । नरौ निर्घृण! यावेवं, पीडयसि निरन्तरम् ॥२६२॥
महाबलभूतः प्राह, श्रूयतां कथयामि ते । कपालकुण्डो नाम वामतो मन्त्रसाधकः ॥२६३॥
यमुनो दक्षिणेनास्य, पुमानुत्तरसाधकः । अत्रैवाविधिना विद्यां, साधयन्तौ विलोकितौ ॥२६४॥
अवस्थामीदृशीं नीता-वन्येषां शिक्षणाकृते । दुर्मेधसोऽल्पसत्त्वाश्च खेदयन्ति यतोऽनिशम् ॥२६५॥
त्वत्साहससमाकृष्ट-चेता वच्मि वचो हितम् । ब्रूहि यत्ते प्रयच्छामि ह्यमोघं देवदर्शनम् ॥२६६॥
कुमारः प्रोवाच–
देवयोने! न मे कार्यं, केनाप्यस्तीह वस्तुना । कूजन्तौ करुणं मुञ्च, कक्षागतनराविमौ ॥२६७॥
मुक्तावर्धकमृतौ तेन, तौ नरौ लोललोचनौ । भणितौ च कुमारेण, यात भद्रौ! युवां गृहम् ॥२६८॥
भूयोऽपि निकटीभूय, वेतालेन प्रजल्पितः । यदहं वच्मि तत्कार्यं, भवता परिहितैषिणा ॥२६९॥
नितान्तं यद्यपि त्यागी, महाविनयसङ्गतः । वीर्यवानुत्तमैश्वर्यो, भवान् गुणविभूषितः ॥२७०॥
मद्दर्शनं तथाप्येत- त्तव मा भूदनर्थकम् । याचेऽहं तेन कार्येण, भवन्तं ग्रहणं प्रति ॥२७१॥
एकया दशया कस्य, कालो गच्छति देहिनः । विपदोऽनन्त रा सम्पत्, सम्पदोऽनन्तरा विपत् ॥२७२॥
मुद्रारत्नं गृहाणेदं, वरवज्रैर्विराजितं । एतेन ह्यङ्गुलिस्थेन, दुर्जयोऽसि महाहवे ॥२७३॥
सुगन्धगन्धगव्यूत-व्यापी ज्वरहरः पटः । धूपसाराभिधानोऽयं, कुमार! क्रियतां करे ॥२७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्नं कुमारेण, क्षेत्रपालप्रजल्पितम् । सिद्धा च कामदेवस्य, विद्याथ बहु रूपिणी ॥२७५॥
कुमारकामदेवाभ्यां, कृतपूजो महाबलः । जगामादर्शनं तुष्टः, कामदेवोऽप्यभाषत ॥२७६॥
तव सम्पर्कतः सिद्धा, विद्या मे बहूरूपिणी । अथवाचिन्त्यमाहात्म्याः, सन्तः कल्पद्रुमोपमाः ॥२७७॥
कामसंरोहिणी भगिनी, विद्या चाकाशगामिनी । सोपचारं द्वयं दत्तं, कुमाराय खगामिना ॥२७८॥
कृतस्तत्रैव वीवाहो, धनं चानाय्य कोटिशः । कर्पूरागुरूश्रीखण्ड-खण्डानां राशयः कृताः ॥२७९॥
सप्रणयं [1]पूरोभूय, जगादेदं नभश्चरः । कुमारावितथं विद्धि, वच्म्यहं यत्तवाग्रतः ॥२८०॥
एते वयमिमे चार्था, यदन्यदपि मामकम् । प्राणा अपि त्वदीया मे, यथायोगं नियुज्यताम् ॥२८१॥
विहितं केन सौरभ्यं, पुष्पाणां केन वा कृतम् । माधुर्यमिक्षुयष्टीनां, लीला च वरहस्तिनाम् ॥२८२॥
उपकर्तुं प्रियं वक्तुं, कर्तुं स्नेहमकृत्रिमम् । स्वजनानां स्वभावोऽयं, केनेन्दुः शिशिरीकृतः ॥२८३॥
इत्यादिभिर्वैर्वाक्यैः श्लाघयित्वा कुमारकम् । सानन्देन ततस्तेन, विमानं प्रविकुर्वितम् ॥२८४॥
नवकङ्कणकरां कान्तां, कुमारोऽपि नवकङ्कणः । कामदेवविमानेन, प्रातरेव समागतः ॥२८५॥
स्वावासं सर्वलोकेन, वीक्षितः स्फारचक्षुषा । भृत्यैर्मित्रैः कलत्रैश्च, सानन्दमवलोकितः ॥२८६॥
पुञ्जीकृत्य धनं धान्यं, कामदेवो विसर्जितः । कान्तयोश्च कुमारेण, कृता ज्येष्ठकनिष्ठता ॥२८७॥
प्रदोषे कृतकर्तव्यः, समये सुप्तो निराकुलः । निशीथे खड्गमादाय, जने सुप्ते विनिर्गतः ॥२८८॥
दक्षिणां दिशमाश्रित्य, चलितो नरकेसरी । शनैः शनैरसौ गच्छन्, गतो दूरतरां भुवम् ॥२८९॥
शृणोति मधुरं गीतं, कर्णपीयूषसन्निभम् । तरुण्या न नरस्येदं, सप्ततन्त्रीस्वरानुगम् ॥२९०॥
चचाल स्वरमार्गेण, मन्दं मन्दं नृपाङ्गजः । स्तोकान्तरं गतेनाथः, ददृशे देवमन्दिरम् ॥२९१॥
श्रीखण्डसारगन्धेन, घ्राणाघ्राणकरं परम् । जात्यश्रीखण्डकाष्ठेन, सर्वतोऽपि विनिर्मितम् ॥२९२॥
रम्यस्तम्भसमाकीर्णं, शान्तिनाथजगद्गुरोः । शान्तकान्तकृतानन्द-बिम्बेन तु विराजितम् ॥२९३॥
पद्मरागमयोत्प्रेङ्ख-त्कलशेन- नभःस्पृशा । वातोद्धूतध्वजैः शुभैः समाकारितसज्जनम् ॥२९४॥
निरुद्धपदसञ्चारं, प्रविश्य जिनमन्दिरे । दृष्टैका कन्यका तेन, गायन्ती वीणया जिनम् ॥२९५॥
गीतगर्भं जिनं स्तौति, वादयति च वल्लकीम् । तन्त्रीस्वरस्य गीतस्य, विशेषो नैव लक्ष्यते ॥२९६॥
नमस्ते शांतिनाथाय, जगच्छान्तिविधायिने । शान्ताकाराय शान्ताय, सुवर्णसदृशद्युते ॥२९७॥
नमस्ते देवदेवाय, लोकालोकविलोकिने । गुणैरतीतलोकाय, दुर्लक्षाय महात्मने ॥२९८॥
त्रिलोककृतपूजाय, नष्टमोहमहारये । वाणीगोचरतातीत-गुणसङ्घातधारिणे ॥२९९॥
शरण्य! शरणायातां, पाहि मां परमेश्वर! । मनोवाञ्छितसम्प्राप्त्या, सफला मेऽस्तु तव स्तुतिः ॥३००॥
एवं जिनमभिस्तुत्य, मुक्त्वा कोणे च वल्लकीम् । निर्गत्य मण्डपद्वारि, वेदिकैकामाशिश्रियत् ॥३०१॥
कुमारोऽपि प्रविश्यान्तः, प्रणम्य जिननायकम् । वेदिकैकां समासीनः, केसरीव शिलातलाम् ॥३०२॥

---

१ पुरतो भूय-BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः ससम्भ्रमा बाला, वेदिकातो भुवि स्थिता। भणिता च कुमारेण, भद्रे का त्वं किमागता?॥
शून्ये जिनगृहे नक्तं, कुतो वा कस्य वा सुता? । स्त्रीलक्षणयुक्तापि, सशोका केन हेतुना ?॥३०४॥
दृष्टपूर्वेव मे भासि, भवती तालवनास्पदे। आवासयितुमारब्धे, सैन्ये व्याकुलमानसे॥३०५॥
तयोक्तं सत्यमेवेदं, नान्यथा तव दर्शनम्। भवन्त दूरतो दृष्टवा, चलिता दक्षिणामभि॥३०६॥
ततः सा रोदितुं लग्ना, कुमारेण निवारिता। स्वस्थीभूय क्षणादेवं, प्रोवाच सरलप्रभा॥३०७॥
महाभाग! महामेघ-विद्याधरतनूद्भवा। सुवदनाकुक्षिजा चाहं, नाम्ना च सरलप्रभा॥
मत्पित्रा शैशवे पृष्टः, सिद्धपुत्रो यशःप्रभः। को भर्ता भद्र! भाव्यस्या-स्तेनापीदं प्रजल्पितम्॥
समस्तविश्वविख्यात-स्त्यागी भोगी महाबलः रणकेसरिजो भावी भर्तास्या नरकेसरी॥३१०॥
साम्प्रतं चाहमन्यत्र, पित्रा दातुं समीहिता। निर्विण्णा जीवितस्याहं, मरणार्थमिहागता॥३११॥
प्रणम्य भक्तितः कान्तं, शान्तं शान्तिकरं जिनम्। आरुह्य शिखरे मुक्तो, मयात्मा घातहेतवे॥३१२॥
पतिता पश्यामि तल्पस्थ-मात्मानं पापकारिणी। उत्थिता नभसो वाणी, पुत्रि! पूर्णा मनोरथाः॥३१३॥
प्रभाते ह्यर्धरात्रे ते, प्रियेण सह सङ्गमः। सम्भवी भाविकल्याणे, मागमोऽन्यत्र कुत्रचित्॥३१४॥
ततोऽहं जिननाथस्य, शान्तिदेवस्य पूजनम्। सङ्गीतकं च कुर्वाणा, स्थितात्रैव जिनालये॥३१५॥
अद्य त्वतर्कितो जात-स्त्वया सह समागमः। अरण्यं वसितं जातं, सञ्जाता चित्तनिर्वृत्तिः॥३१६॥
कथितं यत्त्वया पृष्टं, रहस्यं सकलं मया। साम्प्रतं श्रोतुमिच्छामि, त्वदीयमपि मूलतः॥३१७॥
कस्त्वं? कस्याथवा पुत्रः, किमेकाकी समागतः। नामाक्षराणि वः कानि, श्रवन्ति श्रवणामृतम्॥
कुमारेणापि निःशेषं, मूलतश्चरितं निजम्। कथितं नामपर्यन्तं, सानन्दा सरलप्रभा॥३१९॥
नाथ! त्वां प्रार्थये ह्येवं, पाणिग्रहं कुरुष्व मे। अत्रैव भवने भव्ये, देवतादृष्टिगोचरे॥३२०॥
जीवने मरणे त्राण-मेष मे कुलदेवता। विश्वविश्वम्भरो बन्धुः, प्रथितामितकीर्तिकः॥३२१॥
प्रतिपन्नं कुमारेण, सङ्क्षेपेण विवाहिता। पूजितो वन्दितो भक्त्या, श्रीशान्तिः षोडशो जिनः॥३२२॥
वेदिकायां निषण्णेन, कुमारेण समन्ततः। उत्फणा विफणाश्चैव, नानारूपा भुजङ्गमाः॥३२३॥
प्रविशन्तः परितो दृष्टाः, स्वल्पसत्त्वभयङ्कराः। फूत्कारस्फारनिर्घोष-भृतावनिनभस्तलाः॥३२४॥
परितः स्तम्भमूलानि, स्तम्भाग्राणि समन्ततः। वेष्टयित्वा स्थिता रात्रौ, गन्धलुब्धाः सरीसृपाः॥३२५॥
वेदिकासु विशालासु, चित्रपुत्तलिकासु च। सिंहशार्दूलमातङ्ग-कन्धरासु ललम्बिरे,॥३२६॥
बहिरन्तश्च सर्वत्र, विसर्पद्भिर्भुजङ्गमैः। भवनं शान्तिनाथस्य, भुजङ्गैरिव निर्मितम्॥३२७॥
नरकेसरिणा पृष्टा, कौतुकाकृष्टचेतसा। प्रिये! किमिदमाभाति, यदि जानासि तद्वद॥३२८॥
सा प्राह गन्धलोभेन, दिवारात्रौ निरन्तरम्। न च मुञ्चत्यमी प्रायो, जैनसद्म निरन्तरम्॥३२९॥
अन्यदा क्षेत्रपालेन, दुर्मुखो नाम सेवकः। महाबलेन सन्दिष्टो रे दुर्मुख! त्वया सदा॥३३०॥
दिवा देयो न सर्पाणां, प्रवेशो जैनमन्दिरे। रात्रौ[च] निर्विषाः कार्याः प्रविशन्तु यदृच्छया॥३३१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तस्याः प्रजल्पन्त्या, मातापितरावागतौ । प्रणतौ देवदेवस्य, [१]दृष्टं द्वन्द्वं तयो स्तथा ॥३३२॥
निविष्टौ वेदिकापृष्टे, कुमारेण नमस्कृतौ । सकङ्कणकरा पित्रोः, प्रणता सरलप्रभा ॥३३३॥
कुमाराकृतिमालोक्य, विलोक्य दुहितुर्मुखम् । समसंयोगसन्तुष्टौ, पितरौ रञ्जितौतराम् ॥३३४॥
दुर्नयोऽप्येष ते वत्से!, सुनयोऽजनि वेधसा । न गङ्गा सागरं मुक्त्वा, निपतत्यल्पजलाश्रये ॥३३५॥
कृत्वा विवाहकार्याणि, स्वहस्तेन समर्पिता । भवत्वाजन्म संयोगो, गङ्गासागरयोरिव ॥३३६॥
इत्यभिधाय वेगेन, गतौ तौ सत्वरं गृहे । प्रातरेव कुमारोऽपि, समेतो नवकान्तया ॥३३७॥
नवकङ्कणकरः प्राप्तः, स्वावासं सारसाहसः । भृत्यमित्रकलत्राणां, कथिताखिलसङ्कथः ॥३३८॥
सावशेषां निशां नीत्वा, नानालापैर्नृपाङ्गजः । कृतप्रत्यूषकर्तव्यो, रेमे मलयभूमिषु ॥३३९॥
पंचषानि दिनान्यत्र, नीत्वा विगतकौतुकः । उत्ततार गिरेस्तूर्णं, तत्कूटादिव केसरी ॥३४०॥
मलयकेतुभूपस्य, पुरं प्राप्तो मनोहरम् । भूभुजा कृतसन्मानो, श्वश्वा च कृतसत्कृतिः ॥३४१॥
अहानि कतिचित्स्थित्वा, युक्तो मलयकेतुना । वरं विमानमारुह्य, नभसा सपरिच्छदः ॥३४२॥
सम्प्राप्तश्च क्षणादेव, कुमारो हेमपत्तने । अतर्कितः समुत्तीर्णो, हेमसुन्दरमन्दिरे ॥३४३॥
किमेतदिति लोकेन, विस्मितेन विलोकितः । सस्नेहं सादरं स्निग्धं, गौरवेण कुमारकः ॥३४४॥
समासन्नोपविष्टश्च, पृष्टो राज्ञा सकौतुकम् । कथं भूमिचरो भूत्वा, भवानजनि खेचरः ॥३४५॥
लक्ष्मीसरस्वतीकल्पे, के इमे वरबालिके । परस्परविरुद्धे च, भवतोऽन्तिकमाश्रिते ॥३४६॥
कथितं मेघनादेन, नरकेसरिचेष्टितं । राज्ञाचिन्ति यथा नास्ति, दुर्लभं सुकृतकर्मणाम् ॥३४७॥
अत्रान्तरे समायातं, प्रधानपुरुषद्वयम् । प्रविष्टं च सभामध्ये, प्रतिहारनिवेदितम् ॥३४८॥
हेमसुन्दरराजेन्द्रं, नत्वा तेन समर्पितः । पितृलेखः कुमारस्य, स्वयं तेनापि वाचितः ॥३४९॥
यथा-

स्वस्तिश्रीरङ्गशाला पुरीतो राजा रणकेसरी नरकान्तादेवीसमन्वितस्तत्रस्थं वत्सं नरकेसरिणं सस्नेहं सादरं समाश्लिष्य भुजाभ्यां समादिशति, यत्किं विस्मृता वयं कुमारस्य ? येनाद्यपि विलंब्यते, कतिपयदिनमध्ये शीघ्रमागन्तव्यमिति । कुमारेण भणितमवगतो लेखार्थः अथ किं कुशली मे तातः ? निर्व्याकुला च पुत्रवत्सलाम्बा ? तावूचतुः-

मातुर्व्यामिलिते दृष्टी, रुदन्त्या प्रतिवासरम् । तवादर्शनदुःखार्त्तः, पिता कष्टेन जीवति ॥३५०॥
भवद्दर्शनलिप्सूनां, गुरूणां क्वाप्यनिर्वृतिः । युक्तायुक्तविचारे च, भवानेवात्र पण्डितः ॥३५१॥
प्रयाणेच्छुकुमारेण, मातुलास्यं निरीक्षितम् । तेनापि भणितं वत्स ! गम्यते न विलम्ब्यते ॥३५२॥
चतुरङ्गबलोपेतः, कुमारमनु मातुलः । निजपुत्रीं समादाय, कुमारार्थं सुदर्शनाम् ॥३५३॥

---

१ दृष्टं च वधूवरम्-BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चलितस्तरसा रम्यां, रङ्गशालां महापुरीम् । प्राप्तः कतिपयैरेव, वासरैर्हेमसुन्दरः ॥३५४॥
बहिरेव कृतावासो, विवेशान्तः स्वयं नृपः । निवेदितं विशांपत्यु-र्देव्या च सह मन्त्रिभिः ॥३५५॥
अस्ति मे दुहिता कांता, वरप्राप्ता सुदर्शना । अत्रैव [सा] समानीता, प्रीत्या कुमरहेतवे ॥३५६॥
यदि वः सम्मतं चेदं, तदा लग्नं निरूप्यताम् । अत्रान्तरे समायातो, गणकः स्वत एव हि ॥३५७॥
स्वप्रयोजनमुद्दिश्य, सुप्रसन्नः सुवेषभृत् । कृतानुज्ञो नरेन्द्रेण, निषण्णो दर्शितासने ॥३५८॥
रिक्ते रिक्तं विजानीयात्, पूर्णे पूर्णं समादिशेत् । ताम्बूलफलपुष्पादि-कृतपूजो महीभुजा ॥३५९॥
पृष्टो लग्नं विवाहस्य, तेन शीघ्रं निवेदितम् । अथवा कृतपुण्यानां, चिन्तितं निकटस्थितम् ॥३६०॥
प्रारब्धा सर्वसामग्री, सम्प्रातो लग्नवासरः । वृत्तं महाप्रमोदेन, पाणिग्रहणमङ्गलम् ॥३६१॥
सामन्ताऽमात्यपौरादि-पर्यालोचपुरस्सरम् । निवेशितो निजे राज्ये, कुमारो नरकेसरी ॥३६२॥
प्रशस्तेऽह्नि शुभे चन्द्रे, मुहूर्ते कार्यसाधके । मन्दं मन्दं सुखस्पर्शं, पृष्ठतो वाति मारुते ॥३६३॥
कृतर्द्धिशोभां सर्वत्र, तोरणध्वजराजिताम् । वरमञ्चसमारूढ-नृत्यत्पण्याङ्गनाकुलाम् ॥३६४॥
शुभ्रादभ्रमनोहारि-चित्रप्रासादतोरणाम् । विद्वज्जनसमाकीर्णां, द्विपवाजिरवाकुलाम् ॥३६५॥
नानासंव्यवहाराभि-रापणालीभिराकुलाम् । विवेश रङ्गशालां सो ऽलकामिव धनेश्वरः ॥३६६॥
सभासन्ननिषण्णस्य, बहुलोककृतसन्निधेः । सुप्रसन्नदृशा लोकं, पश्यतो मेदिनीपतेः ॥३६७॥
ततः कुलक्रमायात-नाथदर्शनलालसाः । गृहीत्वार्घैः फलैः पुष्पैः, पत्रैरन्यैश्च कल्पितम् ॥३६८॥
वीणावेणुविमिश्रेण, शङ्खनादानुगामिना । महता तूर्यनादेन, पूरिताखिलदिङ्मुखाः ॥३६९॥
सर्वे पौराः समागत्य, आशीर्वादपुरस्सरम्[1] । यथाविध्यर्चयामासु-स्तस्य पादौ मुदाकुलाः ॥३७०॥
विसर्जिता नरेन्द्रेण, [1]सम्प्राप्तप्रतिमाननाः । स्वं स्वं च निलयं जग्मु-स्तद्गुणोक्तिभृताननाः ॥३७१॥
अथ तद्भवनं स्त्रीभिः, कौतुकाकुलबुद्धिभिः । कृतनानाविभूषाभिः, परितः परिपूरितम् ॥३७२॥
गवाक्षाभिमुखा काश्चि-त्त्वराविस्रस्तवाससः । अन्योन्यघट्टनोच्छिन्न-मुक्ताहारादिभूषणाः ॥३७३॥
पीनस्तनकृतान्योन्य पीडनाश्चलकुण्डलाः । मञ्जुमञ्जीरशब्देन, वाचालचरणद्वयाः ॥३७४॥
किं न तृप्तासि दुस्तृप्ते, पार्श्वतो भव दुर्भगे ! । विवदन्त्य एवमादीनि, वचांस्याम्बुरुहाननाः ॥३७५॥
मुक्त्वा व्यापारजातानि, तमैक्षन्त पुराङ्गनाः । स्वरूपमेतन्नारीणां, यतस्ताः कौतुकाकुलाः ॥३७६॥
एका ब्रूते वरो भर्ता, परा ब्रूते वराङ्गना । अन्योभयमपि श्रेष्ठं, वदतीह मुहुर्मुहुः ॥३७७॥
प्रतिहारनरेणाथ, मन्दं मन्दं विसर्जितः । पुरनारीजनः सर्वो, गतो निजनिजालयम् ॥३७८॥
सन्तोषामृतमग्नाना-मन्योन्यं प्रीतियोगतः । ददतां भुञ्जतां चैव, गतः कालः कियानपि ॥३७९॥
रणकेसरिणा दीक्षा, प्रपन्ना जिनशासने । सन्तोषसारसूरीणां, समीपे भक्तियोगतः ॥३८०॥
सर्वजीवाभयं दत्त्वा, शीलमासेव्य निर्मलम् । तपश्च दुश्चरं तप्त्वा, विभाव्य वरभावनाः ॥३८१॥

---

१ BJP । ते सन्मानपुरस्सरम्-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ते चाराधनां कृत्वा, मृत्वानशनपूर्वकम्। औदारिकीं तनुं त्यक्तवा, स्वर्गे जग्राह वैक्रियाम् ॥३८२॥
देवलोकात्समागत्य, भूत्वा च नृपनन्दनः। विधाय निर्मलां दीक्षां, सम्प्राप्य वरकेवलम् ॥३८३॥
त्यक्त्वा सर्वशरीराणि, अनन्तज्ञानदर्शनः। अनन्तवीर्यसम्पन्नः, सिद्धौ सिद्धौ भविष्यति ॥३८४॥
हेमसुन्दरभूपोऽपि, नरकेसरिभूभुजा। सादरं ध्रियमाणोऽपि, जगाम निजपत्तने ॥३८५॥
रणकेसरिणः पुत्रो-ऽप्युत्खातप्रतिरोपितान्। मुद्रा रत्नप्रभावेण, कुर्वन् सर्वमहीभुजः ॥३८६॥
प्रधानधूपगन्धेन, वासिताखिलदिङ्मुखः। बम्भ्रमीति गजारूढो, धूपसारपटावृतः ॥३८७॥
जन्मान्तरसमाचीर्ण-पूर्णपुण्यानुभावतः। सर्वं सम्पद्यते पुसां, देवानामिव चिन्तितम् ॥३८८॥
इत्येवं सर्वलोकस्य, कृतचित्तचमत्कृतिः। बुभुजे राज्यसौख्यानि, स्वेच्छया वनितासखः ॥३८९॥
क्वचिद्विमानयानेन, क्वचिन्मत्तगजं गतः। क्वचिज्जात्याश्वमारूढः क्वचित्स्यन्दनवाहनः ॥३९०॥
नन्दनादिषु रम्येषु, काननेषु वनेषु च। रमते रम्यकान्ताभिः, सहितो नरकेसरी ॥३९१॥
क्वचिददृश्यरूपेण, क्वचिद् दृश्येन सञ्चरन्। विज्ञातजनसंलापः, साहसाङ्क इवापरः ॥३९२॥
पटरवप्रभावेन, ज्वरं तुदन् शरीरिणाम्। प्रजा रक्षन् विपक्षेभ्यो, यथार्थः क्षत्रियोऽभवत् ॥३९३॥
सम्पन्नोचितसन्तानः, सर्वलोकमनःप्रियः। एकातपत्रमत्रस्तो, बुभुजे राज्यं निराकुलः ॥३९४॥
अन्यदा च समासीनः, सभामण्डपविस्तरे। अमात्यमन्त्रिसामन्त भटलक्षसमाकुले ॥३९५॥
काननाच्च समागत्य, नरेण भणितो नृपः, दिष्टया त्वं वर्धसे देव!, तवोद्याने मनोरमे ॥३९६॥
सन्तोषसागरा नाम, सूरयः श्रुतसागराः। नानातिशयसम्पन्ना, बहुशिष्या समागताः ॥३९७॥
तच्छ्रुत्वा रञ्जितो राजा, दत्त्वास्मै पारितोषिकम्। चचाल पादचारेण, वन्दनार्थं बलान्वितः ॥३९८॥
गत्वा प्रदक्षिणीकृत्य, वन्दित्वा भक्तियोगतः। उचितासनमासीनो, धर्मं शुश्राव पार्थिवः ॥३९९॥
सम्प्राप्यावसरं राजा, पप्रच्छ निजसंशयम्। कथं मे वर्धते लक्ष्मीः ?, कथमाज्ञाकरो जनः ? ॥४००॥
निजगृहोपविष्टस्या-कृतदण्डस्य मे सदा। [1]समानीतोपदाः स्व स्व, कथमानेमुर्धराधिपाः ? ॥४०१॥
कथं मे वल्लभोऽयत्यन्तं, सुहृन्मलसुन्दरः ?। सविशेषमभीष्टा मे, केन वा जयसुन्दरी ? ॥४०२॥
अवधिज्ञानविज्ञात-पूर्वजन्मपरम्परः। राजानं प्रत्युवाचेदम्, सूरिः सन्तोषसागरः ॥४०३॥

इतस्तृतीपर्याये, वाराणस्यां द्विजात्मजः।
शङ्खचूडाभिधो भव्यो-ऽभवद्भार्या च दुर्गिला ॥४०४॥

मधुसुन्दरनामा ते, भ्राता भक्तिपरायणः। मधुसुन्दरी तद्भार्या, धर्मकर्मपरायणा ॥४०५॥
शङ्खचूडो द्विजो मृत्वा, जातो वणिक्सुतस्ततः। भार्याकार्मणदोषेण, धर्मकर्मपरायणः ॥४०६॥
सर्वज्ञपुरतः शुद्ध-भावसारं पुनः पुन। कर्पूरागुरुसन्मिश्र -सारश्रीखण्डसंयुतः ॥४०७॥
धूपो दग्धो विधानेन, मृत्वा देवगतिं गतः। ततश्च्युत्वेह सञ्जातो, नरकान्तोदरे सुतः ॥४०८॥

---

१ BJ। सामानीतोपदश्चाऽपि, कथं नेमुं मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन पुण्येन ते सर्व मनुकूलं धनादिकम् । भ्राता भ्रान्त्वेह संसारे, जातो मलयसुन्दरः ॥४०९॥
मधुसुन्दरी तद्भार्या, जाता च जयसुन्दरी । द्वयोरपि परा प्रीति-स्त्वां प्रति प्रतिवासरम् ॥४१०॥
एतावत्तु तवाप्युच्चै रासीत्प्रेम निरन्तरम् । पूर्वजन्मानुभावेन, स्नेहाधिक्यं महीपते ! ॥४११॥
भूयोऽप्युवाच भूपोऽथ, पर्यन्तो मम कीदृशः? पुण्यानुबन्धिपुण्येन, राजन्! समवलोकितः ॥४१२॥
आदौ मध्येऽवसाने च, शुभं विद्धि त्वमात्मनः । जातिस्मरणविज्ञात-निजपूर्वभवो नृपः ॥४१३॥
गृहे गत्वा समालोच्या-ऽमात्यमन्त्रिपुरस्सराद् । जयसुन्दरीसुतं राज्ये-ऽभिषिच्य जयशेखरम् ॥४१४॥
सप्तक्षेत्र्यां धनं दत्त्वा, कृत्वा यात्रामहोत्सवम् । दीनानाथान्धपङ्गुभ्यो, दत्त्वा दानं यदृच्छया ॥४१५॥
सहस्रवाहिशिबिकां, समारुह्य विनिर्गतः । सन्तोषसागराचार्य-समीपे निर्मलं व्रतम् ॥४१६॥
जग्राह तृणवत्त्यक्त्वा, स्वं राज्यं मेदिनीपतिः । शिक्षाद्वयानुसारेण, कृत्वानुष्ठानमुत्तमम् ॥४१७॥
केवलं शीलमासेव्य, समभावव्यवस्थितः । कृतसंलेखनो धीरो, धर्मारामरतः सदा ॥४१८॥
सम्प्राप्य केवलं ज्ञानं, लोकालोकप्रकाशकम् । सर्वाहारनिरोधेन, विधायानशनक्रियाम् ॥४१९॥
शुक्लध्यानेन निर्दग्ध सर्वकर्मेन्धनो मुनिः । चतुर्गतिविनिर्मुक्तः, पञ्चमीं गतिमाश्रितः ॥४२०॥

इति **धूपपूजाकथानकं** परिसमाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीपपूजायां भानुप्रभकथा

धूपपूजाफलं प्रोक्तं, दृष्टान्तेन सविस्तरम् । दीपपूजाफलं वच्मि, सम्प्रत्यवसरागतम् ॥१॥
समस्ति सकलद्वीपमध्यस्थश्च स्वशोभया । द्वीपानामुपरीवोच्चै - र्जम्बूद्वीपो व्यवस्थितः ॥२॥
तत्रापि भारते क्षेत्रे, षड्भिः खण्डैर्विराजिते । समस्ति मध्यमं खण्डं, धर्मधाम गुणाश्रयम् ॥३॥
मगधाजनपदस्तत्र, जिनमन्दिरराजितः । गुणग्राही गुणाधारो, धर्मवान् धार्मिकप्रियः ॥४॥
परदोषग्रहे मूको, जात्यन्धो दोषदर्शने । सुशीलो वृद्धसेवी च, नरवर्गो विराजते ॥५॥
नार्यो यत्र स्वसौन्दर्यै हेपयन्ति सुरस्त्रियः । पुष्पेषोः साधनीभूतै-र्विभ्रमैरपि केवलैः ॥६॥
विकाररहिता लक्ष्मी र्यौवनं विनयान्वितम् । श्रुतं प्रशमसंयुक्तम्, शौर्यं क्षान्त्या विभूषितम् ॥७॥
अर्थः परोपकाराय, दक्षता धर्मकर्मणि । प्रयत्नपरता नित्यं, व्रतशीलादिरक्षणे ॥८॥
स्वगुणाविष्कृतौ लज्जा, सौहार्दं कारणं विना । एते गुणा विलोक्यन्ते, यस्मिन्निवसतां सताम् ॥९॥
अस्त्यैश्वर्यवतां धाम, तत्र भानुमती पुरी । भानवीया प्रभा यत्र, पताकाभिर्निषिद्धयते ॥१०॥
रत्नकुट्टेषु सङ्क्रान्त-सञ्चरज्जनमूर्तिभिः । सजीवानीव लक्ष्यन्ते, चित्राणि गृहभित्तिषु ॥११॥
प्रसर्पत्तारतेजोभि र्हाटकामलसारकैः । राजमार्गा विराजन्ते, यत्र सर्वज्ञमन्दिरैः ॥१२॥
सञ्चारदीपिका यस्यां, भवन्त्याभरणप्रभाः । प्रियवेश्म प्रयातीनां, रजन्यां रम्ययोषिताम् ॥१३॥

तस्यामजनि राजेन्द्रो, भानुमान् भुवनप्रियः ।
यस्य वक्त्रे स्थिता वाणी, लक्ष्मीः खड्गे व्यवस्थिता ॥१४॥

सन्नप्यन्यायशब्दो यो, लुप्तो येन बलात् क्षितौ । इतीयानेव यत्रासीदन्यायो न्यायशालिनि ॥१५॥
अथ तस्य प्रजेशस्य, प्रजाक्षेमविधायिनः । बभूव भूरिशृङ्गारा, भानुश्रीरिति गेहिनी ॥१६॥
नीत्या लक्ष्म्या च भूपालो, नैवारमत केवलम् । भानुश्रियापि सार्धं, स, रेमे राजा यथाक्षणम् ।१७।
अजायत महादेव्याः, पुत्रो भानुप्रभाभिधः । निजतेजः श्रिया येन, भानुमानपि निर्जितः ॥१८॥
दुःसहेन प्रतापेन, रूपेण यशसा श्रिया । शेषैरपि गुणैः सर्वै- स्तेनातिशयितः पिता ॥१९॥
द्वासप्ततिकलानां यः, परं पारमुपागतः । धामामलगुणानां च, रत्नानामिव सागरः ॥२०॥
चलत्वाज्जीवितव्यस्य, तथा सोपक्रमत्वतः । भानुश्रीः सर्पसन्दष्टा, जगामान्यंद्भवान्तरम् ॥२१॥
तत्पदे स्थापिता चान्या, देवी हारप्रभाभिधा । तद्गुणैर्विस्मृता तस्य, भानुश्रीः सा हृदि स्थिता ॥
यद्ब्रूते तत्करोत्येव, यत्कृतं तत्कृतं तया । अविचारो नृपस्तत्र, यथा गड्डुरिको नरः ॥२३॥
यौवनं पल्लवस्तस्याः, सौभाग्यं कुसुमोद्गमः । सूरनामा गुणाधारः, सत्पुत्रः फलसन्निभः ॥२४॥
भानुप्रभं विलोक्यासौ, विधत्ते हृदि मत्सरम् । यावदेष कुत स्ताव-द्राज्यं तत्तस्य जायते ॥२५॥
अवज्ञादुःखदावाग्नि दग्धदेहापमानतः । यदेषः दूरतो याति, म्रियते वा तदा सुखम् ॥२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा भणितो वत्स ! हिताहं तव सर्वदा । भानुश्रीरिव द्रष्टव्या, कथनीयं प्रयोजनम् ॥२७॥
वस्त्राभरणताम्बूल- भक्ष्यभोज्यविलेपनम् । पुष्पाणि च विचित्राणि, सम्पादयति कस्तव ॥२८॥
कर्म सम्पादयत्यम्ब!, नान्यः कोऽपि मतिमर्म । किं न दत्ते पिता पुत्र!, नेति तेन प्रजल्पितम् ॥२९॥
कथितं चतुर्गुणं कृत्वा, चित्तोत्तारकृते तया । राज्ञस्तेनापि रुष्टेन, सर्वं चेतसि धारितम् ॥३०॥
द्वितीयेऽह्नि प्रभातेऽपि, सवयस्यः समागतः । सभासिंहासनारूढे, राज्ञि राजसुतस्ततः ॥३१॥
[1]प्रणतः पादयोर्भक्त्या, रूक्षदृष्टयावलोकितः । निषसादोचितस्थाने, भणितश्च महीभुजा ॥३२॥
केन जीवसि रे डिम्भ!, स प्राह निजकर्मणा । राजाह मुञ्च मे गेहं, फलं भुङ्क्ष्व स्वकर्मणाम् ॥३३॥
श्रुत्वेदं कर्कशं वाक्यं, सभामध्येऽपमानितः । प्रणम्य च पितुः पादौ, सभामध्याद्विनिर्गतः ॥३४॥
द्वे वाससी च मुद्रां च, गृहीत्वा निर्गतो गृहात् । गत्वाभिमानतो भुङ्क्ते, योजनानां चतुष्टयम् ॥३५॥
निजाश्रुस्नेहसन्मिश्रं, मानव्यंजनसंयुतम् । भुक्तं नदीतटे तेन, भिक्षयाहृतभोजनम् ॥३६॥
वज्रेणेवापमानेना- मानेन व्याहतो हृदि । पपात श्रान्तसर्वाङ्गः, सहकारतरोरधः ॥३७॥
अत्रान्तरे समायाता, स्त्री भानुश्रीसमप्रभा । भानुप्रभस्य सुप्तस्य, पादप्रक्षालनोद्यता ॥३८॥
प्रबुद्धोऽसौ करस्पर्शा- दुत्थितश्च ससम्भ्रमः । मातरं च पुरो भूत्वा, प्रोवाच विहिताञ्जलिः ॥३९॥
मातः कुतः समायाता ?, देवभूयं गतिं गता । अतर्कितसुधासार- समानप्रियदर्शने ! ॥४०॥
ततः शोकभराक्रान्त - कण्ठया सोत्कण्ठया । कृत्वा कुमारमुत्सङ्गे सदुःखं रुदितं तया ॥४१॥
कथं प्राणप्रियो भूत्वा, निजपितुस्त्वमीदृशीम् । अवस्थां प्रापितो धात्रा, धिग्विमातृविचेष्टितम् ॥४२॥
कुमारेणापि निःशेषो, वृत्तान्तः कथितो निजः । तयोक्तं नैव ते खेदः, कर्तुं युक्तो मनागपि ॥ ४३॥
आपदः सम्पदश्चैव, समीपस्थाः शरीरिणाम् । अस्तोदयौ दिनस्यान्तः, सूर्याचन्द्रमसोरिव ॥४४॥
अस्ति **भानुमती** नाम, मे भगिनी सहोदरी । कलिङ्गविषये पुर्यां, नगर्यां जनवत्सला ॥४५॥
तत्रस्थेन त्वया वत्स ! नेतव्या विषमा दशा । पश्चादहं करिष्यामि, सर्वं यदुचितं तव ॥४६॥
इत्युक्त्वा तत्क्षणादेव, पुर्यां नीतो निजाङ्गजः । नीत्वा समर्पितो नक्तं, भानुमत्या विशेषतः ॥४७॥
चिन्तामणिमणिं दत्त्वा, समाघ्राय च मूर्धनि । ध्यातव्या व्यसने वत्से- त्येवमुक्त्वा तिरोदधे ॥४८॥
भानुमत्यपि सत्प्रीत्या, पश्यन्ती कुमरं प्रति । करोति शेषकार्याणि, सतां स्नेहः सदा समः ॥४९॥
अथ विज्ञाय तत्रस्थं, भानुप्रभकुमारकम् । हारप्रभा दृढं चिते, दूना चैवं व्यचिन्तयत् ॥५०॥
अहो पुण्यैः स्वकैरेव, जीवत्येष कुमारकः । निखातं हृदि मे शल्यं, नितरां न समुद्धृतम् ॥५१॥
यदा तदापकाराय, जीवन्नेष न सुन्दरः । सर्वदापि भयस्थानं, वर्धमानः सुनिश्चितम् ॥५२॥
प्रेषिता घातकास्तत्र, विषदा गूढचारिणः । चूर्णयोगकराश्चान्ये, योगिकापालिकादयः ॥५३॥
भानुप्रभकुमारस्य, मरणं यः कुरुते नरः । तस्य लक्षं पुनर्लक्षं, ददामीत्यभिधाय च ॥५४॥

---

१ प्रणम्य - BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समायाताः पुरि सर्वे, मारणोपायतत्पराः । अलक्षिताश्च लोकेन, पापा भ्रेमुरितस्ततः ॥५५॥
भूयोऽपि च समायाता, कुशलान्वेषण हेतवे । कृता रक्षा शरीरस्य, निहता दुष्टचेतसः ॥५६॥
गता भूयोऽपि भानुश्रीः, स्वस्थानं हृष्टमानसा । नानाक्रीडनकैः क्रीडन्, कुमारस्तत्र तिष्ठति ॥५७॥
अन्यस्मिन्दिने कुमरौ **भानुप्रभमणिप्रभौ** । जात्याश्वयोः समारूढौ, चलितौ बलवेष्टितौ ॥५८॥
दूरं गत्वा निवृत्तेषु, शेषवाजिषु सत्वरम् । सुदूरं गन्तुमारब्धो, भानुप्रभतुरङ्गमः ॥५९॥
वल्गां करद्वयेनोच्चै- राकर्षति यथा यथा । तथा तथा च गृह्णाति, वेगं दुष्टतुरङ्गमः ॥६०॥
प्रवेशितो महाटव्यां, मुक्ता वल्गा स्थितो हयः । समुत्तीर्णः कुमारोऽपि, वाजी पञ्चत्वमागतः ॥६१॥
बुभुक्षितस्तृषार्त्तश्च, परिभ्राम्यन्नितस्ततः । कन्दमूलकृताहारः, पीत्वाच समलं जलम् ॥६२॥
सखेदः श्रान्त सर्वाङ्गो , विश्राम्य स तरोरधः । शृणोत्यतीव दीनानि, वचांसि रुदितानि च ॥६३॥
भानुश्रीकुक्षिसम्भूत ! भानुप्रभमहाप्रभो ! । मुञ्च मे मन्दभाग्याया, हृदयं मा मरिष्यसि ॥६४॥
त्वं भर्ता मे समादिष्टो, मुनिना दिव्यचक्षुषा । **यशःप्रभेण** तस्यापि, वचनं किं वृथा भवेत् ? ॥६५॥
अहो निर्मानुषा पृथ्वी, नूनं वीरविवर्जिता । अन्यथा पापपाखण्डी, कथं मां मारयत्ययम् ॥६६॥
एवमुक्त्वा भयभ्रान्ता, मुक्तकण्ठं रुरोद सा । हृदयान्यपि दीर्यन्ते, यत् श्रुत्वा नार्द्रचेतसाम् ॥६७॥
भो भो भीरु ! न भेतव्यं, मा रोदी लोललोचने ! । यमजिह्वासमो यावत्, खड्गो मे दक्षिणे करे ॥६८॥
इति जल्पंस्तदन्तेऽसौ, खड्गव्यग्रकरो गतः । इदं निशाम्य कोपान्ध, कापाली **भैरवाभिधः** ॥६९॥
धावितः खड्गमादाय, रुष्टो भानुप्रभं प्रति । पर्यन्तो जीवितव्यस्य, स्मर रे ! पितरौ निजौ ॥७०॥
रे पाप ! पापबुद्धिस्ते, केन दत्तेयमीदृशी ? । इत्युक्त्वा वाहितः खड्गो, भैरवेण भयङ्करः ॥७१॥
लब्धलक्षेण दक्षेण, कुमारेणापि वञ्चितः । गृहीत्वा पादयोस्तूर्णम्, मस्तकोपरि धूनितः ॥७२॥
भैरवेण भयादूचे, तुष्टोऽहं त्वं च मुञ्च माम् । गृहाणेमां महाविद्यां, शक्रसंमोहकारिणीम् ॥७३॥
इमां चानेकरूपाणां, तत्क्षणं करणक्षमाम् । विद्यां गृहाण येनाहं, कृतकृत्यो भवाम्यलम् ॥७४॥
मुक्तो भूमौ कुमारेण, क्षामितोऽविनयं निजम् । भणितश्चेदृशं कर्म, कर्तुं तव न सङ्गतम् ॥७५॥
स प्राहानुग्रहं कृत्वा, विद्याद्वन्द्वं गृहाण मे । दत्त्वा यदुरुदक्षिणां, योगशुद्धिं करोम्यहम् ॥७६॥
अकार्ये च प्रवृत्तोऽहं, त्वया नूनं निवारितः । तेन त्वं मे गुरुर्जातः प्रार्थनां [१]मावजीगणः ॥७७॥
उपरोधगृहीतेन, गृहीतं तेन तद् द्वयम् । गतो भैरवकापाली, पृष्टा तेनाथ कन्यका ॥७८॥
का त्वं कस्य वा पुत्री, सम्प्राप्ता व्यसनं कथम् ? । भानुप्रभकुमारस्य, नाम किं वा स्मृतं त्वया ? ॥७९॥
तयोक्तं पुत्रिका श्रीम-**त्सिंहलाधिपभूपतेः** । **कनकश्री**कुक्षीसम्भूता, नाम्ना **कनकसुन्दरी** ॥
गीतनृत्यविनोदेन, रजन्याः प्रहरे गते । रम्ये हर्म्यतले सुप्ता- त्रानीताहं कपालिना ॥८१॥
विद्यासिद्धिकृते पापो, मां मारयितुमुद्यतः । भानुप्रभश्च मे भर्ता, कथितो मुनिना पुरा ॥८२॥

---

१ मा ववीमम- B। मा ववीगण-JP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमारेणापि तुष्टेन, तया पृष्टेन मूलतः । नामान्तो निजवृत्तान्तः, सङ्क्षेपेण निवेदितः ॥८३॥
एहि सुन्दरि ! कान्तारा- त्तारयामि महाभयात् । इत्युक्त्वा चलितः पूर्वां, सापि तत्पृष्ठतः स्थिता ॥८४॥
क्षणान्तरेण सा ब्रूते, प्रियात्यन्तं पिपासिता । व्यक्तं वक्तुं न शक्नोमि, तृषा शुष्यति तालुकम् ॥८५॥
आमलकफलं दत्त्वा, समाश्वास्य पुनः पुनः । नीता स्तोकान्तरं तेन, बुभुक्षिता पिपासिता ॥८६॥
अत्रान्तरे महाभीमं, शीतवातेन सूचितम् । हंससारसचक्रादि- कूजितेन प्रकाशितम् ॥८७॥
अखण्डवनखण्डेन, शश्वच्छ्यामायमानया । अदभ्रशुभ्रया पाल्या, परितः परिवेष्टितम् ॥८८॥
लावण्यजलसम्पूर्णं, भूरमण्या मनोहरम् । नाभिह्रदमिवाभाति, वृत्तं गम्भीरमुज्ज्वलम् ॥८९॥
दिशावधूकुमारीणां, मुखालोकनहेतवे । वेधसा निर्मितं मन्ये, विशालमिव दर्पणम् ॥९०॥
देवनद्याः पयःपूर-रसातलप्रवेशने । द्वारमिव शशाङ्कस्य, ज्योत्स्नेव भुवमागता ॥९१॥
ग्रहनक्षत्रयुक्तेन, नक्तमन्तः प्रसर्पता । स्वच्छताप्रार्थना हेतो-र्व्योम्नेव कृतसेवनम् ॥९२॥
रक्ताशोकसमुद्भूत- पल्लवैः प्रतिबिम्बितैः । मांसखण्डधिया धाव-न्मुग्धमीनैर्विराजितम् ॥९३॥
तटस्थजलसङ्क्रान्त-पूगीफलमहीरुहैः । चलद्भिर्वातसम्पर्का-त्सर्पैरिव भयङ्करम् ॥९४॥
स्फाटिकाभिरदभ्राभि-र्निश्छिद्राभिः समन्ततः । निर्मूलाभिर्विशालाभिः, शिलाभिर्बद्धभित्तिकम् ॥९५॥
भित्तेरुपरि दुर्लक्ष-सन्धिबन्धैः सुनिर्मलैः । निबद्धवेदिकं शुभ्र-चन्द्रकान्तशिलातलैः ॥९६॥
वेदिकालग्नखर्जूर-नालिकेराम्रकेतकैः । पुन्नागहिङ्गुहिन्ताल-तालपूगैर्विराजितम् ॥९७॥
सुगन्धगन्धिभिः सार्द्रै-र्बकुलै राजचम्पकैः । धूलीधाराकदम्बैश्च, सर्वतः परिवेष्टितम् ॥९८॥
प्रधाननागवल्लीनां, द्राक्षाणां च मनोहरैः । आर्द्रैश्च सरसैः पत्रै-र्मण्डितं वरमण्डपैः ॥९९॥
नानानारङ्गजम्बीर-दाडिमैर्बीजपूरकैः । वेदिकासन्नसद्वृक्ष-कक्षेण कृतवेष्टनम् ॥१००॥
तरङ्गभङ्गरङ्गद्भिः, पयोभिः कृतविस्मयम् । **तारासरः**समाख्यातं, **तारया** येन कारितम् ॥१०१॥
तरङ्गबाहुभिर्दूरा-त्पक्षिणां विरुतेन च । शब्दयन्तमिवानेकान्, स्नानपानकृते जनान् ॥१०२॥
अवगाह्य तत्सरस्ताभ्यां, स्वशीलमिव निर्मलम् । पयः पीतं कृतं स्नान-मुत्तीर्य सरसस्ततः ॥१०३॥
कन्दमूलैः फलैश्चैव, द्राक्षाद्यैः सुमनोहरैः । स्मृत्वान्तर्गुरुदेवांश्च[1], विहिता भोजनक्रिया ॥१०४॥
श्रान्ता लतागृहस्यान्तः, स्थिता कनकसुन्दरी । कुमारः खड्गमादाय, दुष्टसंरक्षणाकृते ॥१०५॥
निषण्णो द्वारि निक्षिप्त-लोचनो दिक्षु पश्यति । सरःपालीसमासन्नं, नागवल्लीविराजितम् ॥१०६॥
वृक्षलक्षैः समाकीर्ण-मुद्यानं नन्दनोपमम् । आलवालपयःपान-प्रहृष्टमृगयूथकम् ॥१०७॥
तस्यान्तर्वरपुष्पाणि, चिन्वती कोमलैः करैः । दृष्टैका कन्यका तेन, पारिजाततरोरधः ॥१०८॥
सारङ्गयूथमध्यस्था, चन्द्रवक्त्रा मृगेक्षणा । उत्तप्तस्वर्णवर्णाभा, यौवनारम्भवर्तिनी ॥१०९॥
सर्वसीमन्तिनीसीमा, शशाङ्कस्येव कौमुदी । **शर्वाणी** शङ्करस्येव, शङ्करा प्रियदर्शना ॥११०॥

---

१ °देवानां- BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रामं पुरं दिशं स्थानं, यावदेषा प्रबुद्ध्यते । प्रश्नयामि पुरोभूय, तावदेनां मृगेक्षणाम् ॥१११॥
चलितः खड्गमादाय, भानुप्रभः सकौतुकः । समीपमागते तस्मिन्, मृगयूथं पलायितम् ॥११२॥
साङ्गभङ्गं सनिःश्वासं, सम्भ्रमभ्रान्तलोचनम् । सापि कम्पितुमारब्धा, लतेव पवनाहता ॥११३॥
भानुमतो नरेन्द्रस्य, पुत्रोऽहं भूमिगोचरः । दिङ्मोहमोहितो मूढो, ? बम्भ्रमीमि मृगेक्षणे ! ॥११४॥
का त्वं ? कस्याथवा पुत्री ? । कानि नामाक्षराणि ते ?एकाकिन्या कथं सुभ्रु ! शून्यारण्यमलङ्कृतम् ॥
मनःप्रमोदकारीदं, सरः केनेह खानितम् ? । केन वा कारितं चेद-मुद्यानं नन्दनोपमम् ॥११६॥
उद्यानान्तर्महानेष, प्रासादः केन कारितः ? । समस्ति निकटे किञ्चि-द्गोकुलं ग्राम एव वा ? ॥११७॥
अदत्त्वैवोत्तरं बाला, मार्गतो वलितेक्षणा । जृम्भारम्भं प्रकुर्वाणा, गता प्रासादसन्मुखी ॥११८॥
सविलक्षः कुमारोऽपि, चिन्तयामास मानसे । अहो अलौकिकी कन्या, लोकाचारविवर्जिता ॥११९॥
स्वयमेव समागत्य, पुरतोभूय प्रश्निता । अदर्शितार्थिभावेन, सान्वयाख्यानपूर्वकम् ॥१२०॥
तथापि कथितं नैव, किंचिदप्यनया मम । अहो मयार्थिना नून-मात्मायं मे लघूकृतः ॥१२१॥
सखेदश्च निरुत्साह-स्तैरेव चलितः पदैः । लतागृहेऽथ नो सापि, दृष्टा कनकसुन्दरी ॥१२२॥
निभालयितुमारब्धः, स विलक्ष इतस्ततः । विलोकिता नदीतीरे, तरुण्याः पदपद्धतिः ॥१२३॥
गतः स्तोकान्तरं याव-त्पदलग्नो नृपाङ्गजः । दृष्टा लतागृहस्यान्त-श्चतस्रो राजकन्यकाः ॥१२४॥
द्वारस्था रक्षिका चैका, खड्गहस्ता निरीक्षिता । विकोशासिकरा कान्ता, मृगाक्षी नवयौवना ॥१२५॥
नन्वेका सैव लोलाक्षी, यदर्थं बम्भ्रमीम्यहम् । पृच्छामि किं विकल्पेन, प्रविष्टश्च लतागृहे ॥१२६॥
भानुप्रभेण सा पृष्टा, किं त्वं कनकसुन्दरी ? । सापि तां रक्षिकां दृष्ट्वा, रुदत्येव न जल्पति ॥१२७॥
रक्षिकापि विमुच्यासिं, समारूढमनोभवा । प्रोवाच कुमरं वाक्यं, वेपमानाङ्गयष्टिका ॥१२८॥
संकाससिंहसूराणां, । पुत्रिका धरणीभुजाम् । **सुन्दरी मदना तारा**, तिस्रस्तरललोचनाः ॥
एषा [च] पुनरत्रैव, सुखसुप्ता लतागृहे । **रतिग्रहाभिधानेन**, भ्रात्रा मेऽक्षत्रकारिणा ॥१३०॥
आनीतास्ता गतः सोऽपि, वैताढ्ये निजकार्यतः । इमां विवाहसामग्रीं, सम्पूर्णां किं न पश्यसि ? ॥१३१॥
करग्रहं कुमारीणां, कुरु त्वमग्निसाक्षिकम् । विधेहि धीर ! विश्रब्धं, पञ्चमीं मां चतसृणाम् ॥१३२॥
सर्वासां सम्मतं ज्ञात्वा, कुमारेण विवाहिताः । सङ्क्षेपेण कृतं सर्वं, पाणिग्रहणमङ्गलम् ॥१३३॥
अत्रान्तरे समायत-स्तत्र वेगान्नभश्चरः । लता गृहाद्विनिर्गच्छ-न्निबद्धनवकङ्कणः ॥१३४॥
नव्यविवाहवेषश्च, सरोषं तेन वीक्षितः । प्रश्निता भगिनी कोऽयं, निर्गतः पुरुषाधमः ॥१३५॥
हे भ्रातरार्यपुत्रोऽयं, भानुमन्नृपनन्दनः । विश्वविश्वम्भराभार-धरणोद्धुरकन्धरः ॥१३६॥
रे पापे ! केन ते दत्तो, येनाजन्यार्यपुत्रकः । अथैनं प्रथमं ताव-न्मारयामि नराधमम् ॥१३७॥
पश्चादेनां महापापां, भगिनीरूपेण वैरिणीम् । यया कामान्धया सत्या, वञ्चितः स्वसहोदरः ॥१३८॥
रे पाप ! जार ! दुर्जात ! दुराचार ! नराधम ! । केनैताः कन्यका दत्ता-स्त्वया येन विवाहिताः ॥१३९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एताः स्वार्थं मयानीताः, सामग्री सकला कृता। त्वया तु दुर्जनेनैवं, छिद्रं लब्ध्वा विवाहिताः ॥१४०॥
शस्त्रं गृहाण कालस्ते, क्रुद्धो मूढाधुना ध्रुवम्। अद्यैव पाप ! ते मूर्ध्नि, सद्यः पततु पातकम् ॥१४१॥
भानुप्रभकुमारोऽपि, दुर्वचः शरशल्यितः। केसरीव निराशङ्की, डुढौके तस्य सन्मुखः ॥१४२॥
खेचरेणापि निस्त्रिंशो, वाहितः कुमरं प्रति। मुहूर्तं मूर्छितस्तेन, स्थितो भूपालनन्दनः ॥१४३॥
भूयोऽपि लब्धचैतन्यः, खड्गमादाय धावितः। तीक्ष्णखड्गप्रहारेण, प्रहतो दक्षिणे करे ॥१४४॥
मुमोच दक्षिणं बाहुं, खड्गेन सह खेचरः। स्मृता विलक्षवक्त्रेण, तेन विद्या समागता ॥१४५॥
वद वत्स ! यन्मया कार्यं, चिन्तिताहं समागता। दुराचारं दुराशं मे, मातर्मारय वैरिणम् ॥१४६॥
विधाय विकृतं रूपं, संवर्द्धच च नभस्तले। भुजपञ्जरमध्यस्थं, कृत्वा च नृपनन्दनम् ॥१४७॥
गत्वोर्ध्वं नभसा सापि, चलिता दक्षिणया दिशा। समुद्रे प्रक्षिपाम्येन-मिति बुद्ध्या कदाशया ॥१४८॥
हता खड्गप्रहारेण, मूर्ध्नि भानुप्रभेण सा। मुक्त्वा खिन्ना कुमारं च, गता विद्या यथागतम् ॥१४९॥
कुमारोऽपि नभोमार्गा-त्पतितो निम्नगाजले। ततार तारबाहुभ्यां, नदीमदीनमानसः ॥१५०॥
विश्रम्य च नदीतीरे, कन्दमूलकृताशनः। अजानानो दिशां भागं, स चचालैकया दिशा ॥१५१॥
स्तोकान्तरं गतेनाथ, ददृशे वंशजालिका। द्वारदेशसमासीना, स्त्री दृष्टा गतयौवना ॥१५२॥
निरुद्धपदसञ्चारा, त्रस्तमुग्धमृगेक्षणा। दृष्टैका कन्यका मध्ये, लावण्यामृतसारणी ॥१५३॥
उपसृत्य कुमारेण, प्रणम्येदं प्रजल्पितम्। का त्वं ? च केन कार्येण, दृश्यसे भयविह्वला ? ॥१५४॥
केयं मध्यस्थिता कन्या ?, कः प्रदेशोऽयमुच्यताम्। न जानेऽहं महाभागे!, तेन पृच्छामि कथ्यताम् ॥१५५॥
अथ वृद्धा प्राह-
इतो योजनमात्रेण, **वत्सा**विषयभूषणा। **सुवत्सा**स्ति पुरी तत्र, नरेन्द्रश्चन्द्रशेखरः ॥१५६॥
चन्द्रलेखा महादेवी, रूपसौभाग्यभाजनम्। शर्वाणी शङ्करस्येव, शशाङ्कस्यैव कौमुदी ॥१५७॥
उपयाचितशतैस्तस्या, एकैवाजनि कन्यका। सम्मता मातृपित्रोः सा, भ्रातॄणां नेत्रकौमुदी ॥१५८॥
दानसन्मानसत्कारैः, पूजयित्वा महाजनम्। सूरश्रीरिति नामास्याः, समये सम्प्रतिष्ठितम् ॥१५९॥
पित्रा पृष्टः प्रहृष्टेन, समाहूय सगौरवम्। नैमित्तिकः **शुभारम्भः**, ख्यातः सत्यप्रभावकः ॥१६०॥
नैमित्तिक ! शरीरेऽस्या, लक्षणानि निवेदय। निरूप्य भणितं तेन, राजपुत्रीशरीरकम् ॥१६१॥
राजन् ! कल्याणमालेयं, चतूराज्यनिबन्धना। जन्मग्रहबलं श्रेष्ठं, लक्षणानि शुभानि च ॥१६२॥
कल्याणभाजनं भव्यः, शुभग्रहनिरीक्षितः। धन्यः कोऽपि युवा योऽस्याः, करिष्यति करग्रहम् ॥१६३॥
विसर्जितः शुभारम्भ-श्चन्द्रशेखरभूभुजा। चन्द्रलेखा समाहूता, तस्याः सर्वं निवेदितम् ॥१६४॥
विस्तृतं सर्वराज्येषु, शुभारम्भप्रजल्पितम्। देशे देशे पुरे ग्रामे, तैलबिन्दुर्यथा जले ॥१६५॥
विषयराज्यलोभेन, [१]राजानस्तां ययाचिरे। न निषेधं न वा दानं, कुरुते चन्द्रशेखरः ॥१६६॥

---

१ राजानस्तं- BJPC ॥,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केरलाधिपसूरस्य, राज्ञो दूतः समागतः । नृपं प्रणम्य दूतेन, सदर्पं जल्पितं वचः ॥१६७॥
सूरस्य दुहितरं दत्त्वा, सुखं भुङ्क्ष्व महीपते ! । कृतं कालविलम्बेन, युद्धसज्जो भवाथवा ॥१६८॥
अज्ञस्तव नृपो दूत, ! भवानपि न कोविदः । न्यायेन लभ्यते कन्या, तत्रापि गुणसम्पदा ॥१६९॥
अर्धचन्द्रं गले दत्त्वा, दूतो निष्काशितो पुरात् । गत्वा तेनापि सूरस्य, सविशेषं निवेदितम् ॥१७०॥
श्रुत्वा दूतवचः सूरो, दिदीपे क्रोधवह्निना । विधाय सर्वसामग्रीं, चचालोद्धुरकन्धरः ॥१७१॥
अचिरादेव सम्प्राप्तः, सुवत्सां सूरपार्थिवः । चन्द्रशेखरभूपोऽपि, नोपसर्पति मानतः ॥१७२॥
बहिः स्थातुं न शक्नोति, योद्धुमल्पबलो यतः । दग्धतृणेन्धनो मानी, विनाशितजलाशयः ॥१७३॥
जलेन्धनतृणादीनां, प्रभूतकृतसङ्ग्रहः । पूर्वव्युच्छिन्नभूपाल-सन्धानकरणोद्यतः ॥१७४॥
मध्यस्थकूपवाप्यादि-संशोधितजलाशयः । शूरसामन्तमन्त्र्यादि-सार्थैं रक्षितगोपुरः ॥१७५॥
प्राकारशिखरासक्त-शिलाशतसमाकुलाम् । यन्त्रस्थटोलपाषाण- पातभीतारिपौरुषाम् ॥१७६॥
प्राकारासन्नविस्तीर्ण-खातिकाम्भः समाकुलाम् । जात्याऽश्वहेषितारावं भृताम्बररसातलाम् ॥१७७॥
निरुद्धजनसञ्चारां, दुष्प्रवेशविनिर्गमाम् । सुवत्सां नगरीं कृत्वा, प्रतस्थे चन्द्रशेखरः ॥१७८॥
सूरोऽपि पर्वताकारै- र्मदमत्तमतङ्गजैः । प्राकारपातनाहेतोः, सन्नद्धः सपरिच्छदः ॥१७९॥
सुवत्सा वेष्टिता तेन, परितो मत्तवारणैः । वाजिभिः स्यन्दनैः सारैः, पादातैर्गुरुविक्रमैः ॥१८०॥
सूरश्रियं समादाय, दासदासीसमन्विता । उपयाचितदानार्थं, पूर्वमेव त्वहं गता ॥१८१॥
दूरस्थभैरवीगेहे, कृतस्तत्रैव जागरः । प्रभाते चलिता यावद्, दृश्यते नार्कमण्डलम् ॥१८२॥
हृदयान्यपि दीर्यन्ते, शिवानां फारफेत्कृतैः । वचो न श्रूयते तत्र, घूकानां घोरघूत्कृतैः ॥१८३॥
न प्राकारो न वेश्मानि, न च देवकुलानि च । दृश्यन्ते हेतुना केन ?, किं वा मे मतिविभ्रमः ? ॥१८४॥
चिरं निरीक्ष्य सत्रासं, कुन्तलेन प्रजल्पितम् । भद्रे! नगररोधोऽयं, लक्ष्यते शत्रुणा कृतः ॥१८५॥
सूरश्रियं समादाय, गम्यते न विलम्ब्यते, तथैव कृतमस्माभि- रहमत्र समागता ॥१८६॥
शेषः परिजनः सर्वः, कोऽपि क्वापि विसर्जितः । कञ्चुकी कुन्तलो वृद्धो जटाभारधरः कृतः ॥
घरदासीकुक्षीसम्भूतौ, दासौ कपिलकेरलौ । अव्यक्तलिङ्गिनौ जातौ, परानीके विचेरतुः ॥१८८॥
सर्वत्र तत्र तौ भ्रान्त्वा, ज्ञात्वा वार्तां च शात्रवीम् । दिने दिने समागत्य, कथयामासतुर्मम ॥१८९॥
एवं करोति सा याव- त्स्ववृत्तान्तनिवेदनम् । भानुप्रभकुमारस्य, पुरतः प्रीतमानसा ॥१९०॥
तावत्तूर्णपदैर्धावन्, श्वाससम्पूरिताननः । वृद्धान्तिके समायातः, कञ्चुकी कुन्तलाभिधः ॥१९१॥
व्याकुलो दृश्यसे भद्र !, केन कार्येण कथ्यताम् । तेनापि भणितं भद्रे !, सङ्क्षेपेण निशम्यताम् ॥१९२॥
अद्य दासीसुतौ दृष्टौ, केरलाधिपमन्त्रिणा । पृष्टौ[1] च कौ भवन्तौ च ? कस्यादेशादिहागतौ ? ॥१९३॥
अशक्तावुत्तरं दातुं, क्षोभितौ लोललोचनौ । नियम्य सुदृढं रज्ज्वा, कशादण्डैः समाहतौ ॥१९४॥

१ पृष्टौ च भवतौ कौ कस्यां BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समर्पितौ नरेन्द्रस्य, तेनापि च कदर्थितौ । पृष्टौ रे ! कथ्यतां कुत्र, चन्द्रशेखरकन्यका ॥१९५॥
तच्छुद्धिं यदि जानीथः, स्वर्णकोटिं ददाम्यहम् । अन्यथा मारयाम्येव, युवामत्र न संशयः ॥१९६॥
विस्मृतस्वामिसन्मानै- र्जीवितार्थोपलोभितैः । कुमारी कथिता तस्मै, स्वाभिज्ञानपुरस्सरम् ॥१९७॥
इत एति महीनाथः, सूरः सबलवाहनः । श्रुत्वेदं मूर्च्छिता वृद्धा, पतिता मेदिनीतले ॥१९८॥
क्रन्दन्ती निर्गता मध्या- त्सूरश्री सम्भ्रमाकुला । मा भैषीरम्ब ! निस्त्रिंशो, यावन्मे दक्षिणे करे ॥१९९॥
इत्युक्त्वा पतितः शक्र- सैन्ये कुमरकेसरी । पराजितं च तत्तेन, सूरः स्वयमुपागतः ॥२००॥
सोऽपि खड्गप्रहारेण, प्रहतः पतितो भुवि । वलितं च [1]भरं कृत्वा, कृतकोलाहलं बलम् ॥२०१॥
कुमारेण स्मृता विद्या, शत्रुसंमोहकारिणी । कापालिकेन या दत्ता, सुप्तं तयाखिलं बलम् ॥२०२॥
कुमारस्योपचारेण, सूरः स्वास्थ्यमुपागतः । प्रतिविद्याप्रदानेन, बलं च प्रगुणीकृतम् ॥२०३॥
चन्द्रशेखरभूपोऽपि, बहिरेव समागतः । कृता परस्परं मैत्री, सहैव पुरमागताः ॥२०४॥
चन्द्रशेखरभूपेन, सूरश्री राज्यसम्पदा । भानुप्रभकुमाराय, दत्ता प्रीतिपुरस्सरम् ॥२०५॥
सूरेणापि कुमारस्य, दुहिता केरलाभिधा । प्रार्थनापूर्वकं दत्त्वा, विस्तरेण विवाहिता ॥२०६॥
अत्रान्तरे समायाता, विद्युत्सेना नभश्चरी । चूतस्रोऽपि समादाय, पञ्चमी मुक्तकञ्चुका ॥२०७॥
भणितं च कुमारेण, युष्माकं क्षेमं वर्तते । विद्युत्सेनाह सोद्वेगं, क्षेमाक्षेमं च वर्तते ॥२०८॥
मनःसमुद्राकेन्दु- रद्य त्वं येन वीक्षितः । महोदयसमारूढ- स्तेन नः क्षेमं वर्तते ॥२०९॥
विद्यामुक्तश्च भ्राता स, कन्यकानां वधोद्यतः । यन्मारितो मयाऽक्षेमं, तेन नाथ ! निगद्यते ॥२१०॥
प्रयोजनप्रियः प्रायो, जनोऽयं न जनप्रियः । पत्युः प्रयोजने येन, भग्न्या भ्राता निपातितः ॥२११॥
भानुप्रभवचो लब्ध्वा, तया दत्तो जलाञ्जलिः । गृहीतः कञ्चुकः पृष्ठौ, पतितश्च सहोदरः ॥
लतागृहे समूढानां, कन्यकानां चतसृणाम् । पितरो मिलितास्तत्र, सूरेण सममागताः ॥२१३॥
दृष्टा दुहितरस्ताभि- र्वृत्तान्तः कथितो निजः । तेन सत्पात्रयोगेन, ननन्दुः सुतरां नृपाः ॥२१४॥
सूरेणापि निजं राज्य- मपुत्रेण समर्पितम् । भानुप्रभकुमारस्य, चतुरङ्गबलसङ्गतम् ॥२१५॥
निःसन्तानो गतानन्दः, सूरः संहृतविस्तरः । न केवलं तपस्तेपे, शिश्रिये च तपोवनम् ॥२१६॥
गीतनृत्यविनोदेन, रजन्याः प्रहरे गते । सुप्तो हर्म्यतले रम्ये, तल्पे सर्वाङ्गकोमले ॥२१७॥
प्रभाते च प्रबुद्धोऽसौ, प्रासादशिखरस्थितम् । पश्यत्यात्मानमत्रस्तः, किमेतदिति विस्मितः ॥२१८॥
न तत्सौधतलं रम्यं, न तल्पं तूलकोमलम् । सुवत्सा नगरी नैषा, न कान्ता कमलेक्षणाः ॥२१९॥
एवं तर्कपरो याव- दास्ते भानुमदङ्गजः । तावत्तारा समायाता, देवता तत्र वासिनी ॥२२०॥
मातः ! का त्वं वने शून्ये ?, प्रासादः केन कारितः ? । उद्यानं च कृतं केन ?, कस्य कीर्तिसरोवरम् ॥२२१॥
केनेदं कारितं रम्यं ? मन्दिरं मदनद्विषः ? चराचरजगद्बन्धो- र्नाभेयस्य महात्मनः ॥२२२॥

---

१ BJPC । भयाकान्तं-मु. । भर = भय ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सापि वक्तुं समारेभे । बाष्पाम्भोभृतलोचना । तारा वनदेवता वत्स !, प्रासादोऽयं मया कृतः ॥२२३॥
सरश्च जलसम्पूर्णं, कल्लोलालिविराजितम् । युगादिजिननाथस्य, मन्दिरं च मया कृतम् ॥२२४॥
आरामोऽपि मयाकारि, नानावनविराजितः । पूजार्थं पूजनीयस्य, वृषभस्य जगद्गुरोः ॥२२५॥
भणितञ्च कुमारेण, यतस्त्वं वनदेवता । स्वच्छन्दचारिणां कार्यं, किमेतैर्विस्मयो मम ! ॥२२६॥
तयाभाणि महाभाग !, सङ्क्षेपात् शृणु कारणम् । **अङ्गा**जनपदस्यान्तः, **श्रीविलासपुरं** पुरम् ॥
श्रीविलासो नृपस्तत्र, मन्दिरं सर्वसम्पदाम् । **कामश्री**र्गेहिनी तस्य, रूपलावण्यशालिनी ॥
शतोपयाचितैर्जाता, अहमेकैव कन्यका । तस्याः प्रतिष्ठितं नाम **जयश्री**रिति सुन्दरम् ॥२२९॥
अवन्तिवर्धनेनाहं, **कलिङ्गा**धिपसूनुना । परिणीता प्रमोदेन, व्रजन्ति मम वासराः ॥२३०॥
सम्भूतो मेऽन्यदा गर्भो, मृतश्चावन्तिवर्धनः । **कीर्तिधर्मा**भिधस्तस्य, भागिनेयः प्रतिष्ठितः ॥२३१॥
अन्यदा च सशङ्केन, पृष्टो नैमित्तिकः स्वयम् । स्थिरं मे भद्र ! किं राज्यं ?, चलं वेति निगद्यताम् ॥२३२॥
जयश्रीकुक्षिसम्भूतां, कन्यां यः परिणेष्यति । स एतद्भोक्ष्यते राज्यं, निश्छद्म यदि जल्प्यते ॥२३३॥
नैमित्तिक ! गृहं याहि, हृदि धार्यमिदं त्वया । एकान्ते भणितस्तेन, **दृढधर्मा** निजमातुलः ॥२३४॥
जयश्रियं गृहीत्वा त्वं, नयामि त्वां पितुर्गृहे । इत्युक्त्वा गच्छ कान्तारे, व्यापाद्यागच्छ सत्वरम् ॥२३५॥
प्रतिपद्य वचस्तस्य, एकाकी च मया समम् । रथमारुह्य वेगेन, कान्तारमिदमागतः ॥२३६॥
ततो रथात्समुत्तीर्य, निवेद्य नृपशासनम् । कटीतटात्समाकृष्टा, तेन तीक्ष्णासिधेनुका ॥२३७॥
तीव्रार्ककरसम्पर्क- दुर्दर्शामसिपुत्रिकाम् । दृष्ट्वाहं कम्पितुं लग्ना, लतेव पवनाहता ॥२३८॥
भीतायाः पतितो गर्भो, भूतलेऽजनि पुत्रिका । हताहं च मृतात्रैव, सञ्जाता वनदेवता ॥२३९॥
दारिकां मारयन् सोऽपि, वनदेव्या निपातितः । पापानां निपतत्येव, पापमत्रैव जन्मनि ॥२४०॥
स्त्रीहत्यां भ्रूणहत्यां च, कृत्वासौ भावतोऽधमः । महापापभराक्रान्तो, मृत्वा च दुर्गतिं गतः ॥२४१॥
स्त्रीहत्या हि महापाप- महानर्थनिबन्धनम् । महापापाः प्रकुर्वन्ति, दुर्गदुर्गतिगामिनः ॥२४२॥
अनाचारे मतिर्यस्य, [१]जन्मद्वयं निहन्ति सः । दुर्गतिः परलोकेऽस्य, लोके चेह विडम्बना ॥२४३॥
पुत्रिकापि मया पुत्र !, महामोहेन पालिता । साम्प्रतं च वरप्राप्तौ, चिन्ता मे हृदये स्थिता ॥२४४॥
मानुषी तु न देवेषु, मनुर्ष्येषु न रूपवान् । वरोऽस्या विद्यते योग्यः, सचिन्तं तेन मे मनः ॥२४५॥
वरचिन्ताकुला याव- त्तिष्ठामि प्रतिवासरम् । तावदन्यदिने दृष्टा, तल्पासीनातिदुःखिता ॥२४६॥
एकाकिन्येव जल्पन्ती, रुदन्ती च पुनः पुनः । शून्यचित्ताह्यधोवक्त्रा, भ्रष्टमन्त्रेव योगिनी ॥२४७॥
अहो मे निर्घृणं कर्म, कृतमज्ञानदोषतः । न दत्तमुत्तरं तस्य, सस्नेहं पृच्छ्यमानया ॥२४८॥
लज्जानुरोधतो नैष, युवा सम्भाषितो मया । दूरस्था साम्प्रतं लज्जा, दुःखं निपतितं मम ॥२४९॥
क्व यामि कुत्र तिष्ठामि, परित्राणं कुतो भवेत् ? । मनो मेऽपहृतं तेन, कायस्तिष्ठति केवलः ॥२५०॥

१ स हन्ति जन्मद्वयं- BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वने जाता वने भुक्ता, वने वृद्धिमुपागता। कुतोऽस्या ईदृशा भावाः, प्रादुर्भूता अशिक्षिताः ॥२५१॥
ससम्भ्रमं समागत्य, मया पृष्टा पुनः पुनः। बाधते किं शरीरे ते, रुद्यते किं पुनः पुनः ॥२५२॥
एवमापृच्छ्यमानापि, रुदत्येव हि केवलम्। नाचष्टे कारणं किंचि- त्ततोऽहं मौनमाश्रिता ॥२५३॥
सामान्येन मया ज्ञातं, दृष्टः कोऽपि युवानया। निर्निमित्ता न जायन्ते, भावाः कामसमुद्भवाः ॥२५४॥
वत्से ! चिन्ता न कर्तव्या, चिन्तेयं मम साम्प्रतम्। तथा तथा करिष्यामि, सुखितासि यथा यथा ॥२५५॥
ततश्चेदं समाकर्ण्य, निपत्य मम पादयोः। स्नाता भुक्ता प्रतीता च, रेमे च हरिणैः सह ॥२५६॥
इतश्चेतो गवेषन्त्या, ग्रामेऽरण्ये जले स्थले। न दृष्टो न श्रुतः क्वापि, विफलो मे परिश्रमः ॥२५७॥
अद्य सुप्तो मया दृष्टो, वत्सायां पुरि मन्दिरे। चन्द्रशेखरराजस्य, तल्पेऽस्य मनोरमे ॥२५८॥
गते यामे च यामिन्याः, सुप्ते परिजनेऽखिले। दत्त्वावस्वापिनीं विद्या- मानीतोऽसि मयाधुना ॥२५९॥
वत्स ! खेदो न कर्तव्यो, ह्यवज्ञातोऽहमेतया। अज्ञानमथवा लज्जा, द्वयमत्रापराध्यति ॥२६०॥
सर्वदैव सलज्जेयं, दोषादोषं गुणागुणम्। नैव जानात्यतस्तुभ्यं, नानया दत्तमुत्तरम् ॥२६१॥
शरदभ्रसमानानि, मनांसीह मनस्विनाम्। बहिरुष्णानि कार्येण, मध्ये शीतानि सर्वदा ॥२६२॥
कन्यकैणामुखी नाम, प्राणेभ्योऽपि मम प्रिया। सा तुभ्यं दीयते वत्स !, वाक्यं मे मा वृथा कृथाः ॥
अत्रान्तरे समायाता, सुतारा नाम देवता। दृष्ट्वा भानुप्रभं पुत्रं, रुद्धकण्ठं रुरोद सा ॥२६४॥
कृत्वोत्सङ्गे समाघ्राय, पुत्रं मूर्ध्नि मुहुर्मुहुः। सुतारोवाच हे वत्स !, कुशलं ते शरीरके ? ॥२६५॥
सर्वत्र कुशलं मात-र्मा कार्षीर्दुःखितं मनः। सुखदुःखानि सर्वेषां, समीपस्थानि देहिनाम् ॥२६६॥
आतिथेयं समासाद्य, तारातो ह्युचितं ततः। सौजन्यवर्धितानन्दा, सुतारा मुमुदेतराम् ॥२६७॥
परस्परं समालापो, जातस्तारासुतारयोः। कृता विवाहसामग्री, मिलिता वनदेवताः ॥२६८॥
भानुप्रभकुमारेण, प्रशस्ते तिथिवासरे। एणामुखी विधानेन, परिणीता मुदा तदा ॥२६९॥
कोटिशः स्वर्णरत्नानि, वरवस्त्राणि कोटिशः। दत्तानि वनदेवीभिः, सर्वं हि महतां महत् ॥२७०॥
ततः सर्वाणि मिलितानि, गतानि जिनमन्दिरे। पूजा कृता विधानेन, विधाय जिनवन्दनम् ॥२७१॥
भानुप्रभः पुरोभूय, प्रमोदभरनिर्भरः। युगादिधर्मकर्तारं, तुष्टुवे तुष्टमानसः ॥२७२॥
युगादिजिन ! योगीश !, योगिगम्य ! निरञ्जन !। रागद्वेषमहामोह-मुक्तमूर्ते ! नमोऽस्तु ते ॥२७३॥
अद्यैव सफलं जन्म, यौवनं जीवितं च मे। शान्ता कान्ता शिवा सौम्या, यन्मूर्तिस्तेऽवलोकिता ॥२७४॥
एवं देवं नमस्कृत्य, युगादिजिननायकम्। मण्डपस्थे ततस्तस्मिन्, देव्यः प्रेक्षां प्रचक्रिरे ॥२७५॥
प्रगीतं किन्नरैर्गीतं, वादितं व्यन्तरैः सुरैः। प्रनृत्तं वनदेवीभि-र्हावभावपुरस्सरम् ॥२७६॥
प्रणम्य परमात्मानं, दत्त्वा नीवीं द्विलक्षिकाम्। स्वस्थानं च गताः सर्वे, प्रमोदभरनिर्भराः ॥२७७॥
माता विसर्जिता स्थाने, वनदेव्योऽपि तथैव च। स्वयं तारानिरोधेन, [1]तत्रैवासाञ्चकार सः ॥

१ अत्रैव तत्रैवासाश्चकार सः ॥ JP

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रीडत्तारासमुद्भूतः -पयःपालीष्वनारतम् । वनेषु वनखण्डेषु, ह्युद्यानारामभूमिषु ॥२७९॥
तारा जिनगृहे भक्त्या, नृत्यत्येणामुखी सदा । वीणां च वादयत्येष सुग्रामस्वरमूर्छनम् ॥२८०॥
एणामुख्या समं तस्य, क्रीडतो यान्ति वासराः । क्षणात्सौख्यं क्षणाद्दुःखं, करोति विधिरङ्गिनाम्॥२८१॥
नक्तं स्वकान्तया सार्ध, सुप्तः शुश्राव सुस्वरम् । वीणावेणुमृदङ्गानां, गीतं च श्रुतिकोमलम् ॥२८२॥
कान्ते ! कोऽयं जनो धन्यो, जिनस्याग्रे मनोरमाम् । प्रेक्षां करोति पुण्यात्मा, सावोचत् श्रूयतां प्रिय ! ॥
सरःपालीनिकुञ्जेषु सिद्धविद्या नभश्चराः । अष्टाह्निकां महापूजां, चक्रुरत्र कृतादराः ॥२८४॥
गम्यते दृश्यते पूजा, कीदृग्विद्याधरो जनः । कीदृशं वादितं तस्य, गीतं नृत्यं च कीदृशम् ? ॥२८५॥
तयोक्तं कान्तकायस्त्व-मेकाकी भूमिगोचरः । मानर्थः कोऽपि जायेत, तेन यानं न सङ्गतम् ॥२८६॥
हितेयं सङ्गतं ब्रूते, सन्त्रस्तमृगलोचना । न जगाम स्थितोऽत्रैव, नीतिमान् कमलाशयः ॥२८७॥
इतश्च कीर्तिधर्मेण, नक्तं स्वप्नोऽवलोकितः । सिंहासनादहं भ्रष्टः, पतितो मेदिनीतले ॥२८८॥
स्वयं शङ्कितचित्तेन, गणकाय निवेदितम् । तेनापि भणितं शीघ्रं, छत्रभङ्गो भविष्यति ॥२८९॥
स्वप्नो न सङ्गतो भाति, न स्यादस्यानृतं वचः । दृढधर्मोऽपि नायाति, नेदं कल्याणकारणम् ॥२९०॥
आप्तनरा समाहूताः, शिक्षयित्वा विसर्जिताः । शालाटव्यां द्रुतं यात, दृढधर्मगवेषणाम् ॥२९१॥
कृत्वा सर्वत्र भूयोऽपि, समागच्छत सत्वरम् । न जाने तस्य किं वृत्तं, साशङ्कं मम मानसम् ॥२९२॥
गतास्ते तत्र सर्वत्र, कृता तस्य गवेषणा । न दृष्टो दृष्टमेकत्र, निर्मांसमस्थिपञ्जरम् ॥२९३॥
तारासरः समासन्ने, कान्तकान्तासमन्वितः । दृष्टश्चैको युवा कोऽपि, कामदेव इवापरः ॥२९४॥
निषेदुषः पतत्यस्य, नभसः सिंहविष्टरम् । शिरोपरि धृतं याति, छत्रमस्य नरं विना ॥२९५॥
सव्येतरविभागे च, लुलतो वरचामरे । नरं विनापि तस्यैतं, जीवद्भिः किं न दृश्यते ॥२९६॥
अत्रान्तरे समायाता, योषैका कान्तदर्शना । कृतानि मङ्गलान्यस्य, सर्वाण्यपि तयाञ्जसा ॥२९७॥
प्रणम्य भणिता तेन, मुञ्च मामम्बसाम्प्रतम् । तयोक्तं कीर्तिधर्मस्य, राज्ये त्वमभिषिच्यसे ॥२९८॥
इतः पञ्चमदिने नूनम् , निश्चलीकुरु मानसम् । मा त्वरिष्या गरिष्ठत्व-मित्युक्त्वा सा तिरोदधे ॥२९९॥
वयमप्येतदाकर्ण्य, भीतभीता द्रुतं द्रुतम् । युष्मत्समीपमायाताः, पानभोजनवर्जिताः ॥३००॥
कथितं स्वामिने सर्वं, यथादृष्टं यथाश्रुतम् । आसन्नं व्यसनं देव !, ह्युपायः कोऽपि चिन्त्यताम्॥३०१॥
कीर्तिधर्मोऽपि तत् श्रुत्वा, चतुरङ्गबलान्वितः । नगरान्निर्गतः क्रोधा-द्गतः शालाटवीं प्रति ॥३०२॥
दिवा रात्रौ च वेगेन, ह्यखण्डितप्रयाणकैः । तारासरः समासन्ने, तारारामे कृतस्थितिः ॥३०३॥
आरामे[१] च कृतावासं, कीर्तिधर्मं विलोक्य सः । चचाल समरापेक्षी, गजयूथे केशरी यथा ॥३०४॥
रे रे गृह्णीत शस्त्राणि, प्रगुणीभव साम्प्रतम् । सुप्तमत्तप्रमत्तेषु, न प्रहारं करोम्यहम् ॥३०५॥
एकाकिनं तकं दृष्टवा, निर्भीकाः स्थिरमानसाः । शरं कृत्वा समायाताः, प्रवृत्तो दारुणो रणः ॥३०६॥

१ आरामकृता° BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रथस्थेसु गजस्थेषु, वाजिस्थेषु पदातिषु । पतत्सु सत्सु सर्वत्र, सङ्कीर्णाऽजनि मेदिनी ॥३०७॥
गजस्कन्धात्समाकृष्टो, गृध्रेणेव भुजङ्गमः । न ज्ञायते गतः क्वापि, कीर्तिधर्मो नराधिपः ॥३०८॥
दत्त्वावस्वापिनीं निद्रां, शायितं सकलं बलम् । अस्तं गते रवौ रात्रौ, यथा कमलवनं तथा ॥३०९॥
तारा समागता दृष्टं, भानुप्रभविचेष्टितम् । प्रतिविद्याविधानेन, नष्टनिद्रं समुत्थितम् ॥३१०॥
कीर्तिधर्मं न पश्यन्ति, यैन सार्धं समागताः । तारया कथितं सर्वं, तेभ्यस्तस्य च चेष्टितम् ॥३११॥
ततो विरक्तचित्तैस्तैः, प्रधानैः प्रतिपादितम् । भानुप्रभकुमारोऽयं, तस्य स्थाने निवेश्यताम् ॥३१२॥
तारया भणितं भद्राः, कुरुध्वं स्वसमीहितम् । कृतस्य करणं नास्ति, कालक्षेपो न सङ्गतः ॥३१३॥
श्रीविलासपुरे नीतो, राजामात्यपुरस्सरैः । कीर्तिधर्मपदे राज्ये, स्थापितो वरमङ्गलैः ॥३१४॥
राज्ये स्वचिन्तका मुक्ता-श्चन्द्रशेखरसूरयोः । सर्वाः कन्याः परिणीताः, समानीता निजान्तिके ॥३१५॥
त्रिराज्याधिपतिर्जात, उत्खातप्रतिरोपितान् । कुर्वन्नशेषभूपालान्, गमयामास वासरान् ॥३१६॥
पितृसत्काः समायाता, एकदा पुरुषा वराः । मन्त्रिभिः प्रेषिताः सन्तो, भानुप्रभनृपान्तिके ॥३१७॥
कुशलं तस्य तातस्य, चारुकीर्तेर्महौजसः । कुशलं यशसा ताव-न्न प्राणैः क्षणभङ्गुरैः ॥३१८॥
श्रुत्वेदं शोकसम्भार-भ्रान्तचेता महीपतिः । न विवेद सुखं दुःखं, जीवितं मरणं तथा ॥३१९॥
मूर्च्छान्ते लब्धचैतन्यः, प्रश्नयामास सादरम् । सुखमास्ते सदाकालं, कालश्रीः श्रीरिवापरा ॥३२०॥
पुरे राज्ये धने धान्ये, भाण्डागारे च रोधने । सिंहविक्रमराजस्य, वर्तते कुशलं ननु ! ॥३२१॥
पुरुषाः प्राहुः-नानुकूलाः प्रजास्तस्य, नृपा न वशवर्तिनः । प्रतापः सुसहस्तस्य, घनच्छन्नरवेरिव ॥३२२॥
तस्करास्तरलायन्ते हन्यन्ते प्रान्तभूमयः । किं बहुना विचारेण, सर्वं राज्यं विसंस्थुलम् ॥३२३॥
तदधिष्ठीयतां शीघ्र-मागत्य पैतृकं पदम् । प्रजाश्चिरन्तनं पाहि, मूलनाशो न सङ्गतः ? ॥३२४॥
श्रियोऽपि ता न शस्यन्ते, दृश्यन्ते या न सज्जनैः । तच्छ्रुत्वा मर्षितश्चित्ते, शरविद्ध इव केसरी ॥३२५॥
जघान भूतलं मुष्ट्या, खड्गो दृष्टिं ददौ च सः । देवो वा दानवो वापि, खेचरो भूमिगोचरः ॥३२६॥
यः करोति पराभूतिं, सिंहविक्रमभूभुजः । किं तस्य विस्मृतो मृत्युः, कुबुद्धिर्वा विजृम्भिता ॥३२७॥
दूरस्थोऽपि समासन्नः, किं नाहमवलोकितः । निश्चक्राम धराधीशो, लग्ने गणकसूचिते ॥३२८॥
प्रतापः पप्रथे तस्य, मेघमुक्तरवेरिव । चचाल चतुरङ्गेण, बलेन भृतभूतलः ॥३२९॥
स्वत एव समागत्य, राजभिः परिवारितः । शालाटव्यां समागत्य, तारया कृतगौरवः ॥३३०॥
तारासरः समासन्ने, आवासं कृतवान् स च । चतुर्वर्णसमाकीर्णं, नानावेश्मसमाकुलम् ॥३३१॥
विशालशालसंच्छन्नं, खातिकापरिवेष्टितम् । विचित्रचित्रसम्पन्न-चतुर्गोपुरराजितम् ॥३३२॥
पुरं **तारापुरं** नाम, स्वल्पकालेन कारितम् । दत्तं **युगादिदेवस्य**, सारामं पुण्यहेतवे ॥३३३॥
भानुप्रभनरेन्द्रेण, ताम्रशासनलेखितम् । [समर्पितं च सद्भाय, जिनपूजाकृते पुरम्] ॥३३४॥
अन्यदा भणिता तारा, मातर्गच्छामि साम्प्रतम् । करसम्पुटमादाय, तयापीदं प्रजल्पितम् ॥३३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यगेणामुखी राजन्, द्रष्टव्या स्निग्धया दृशा । त्वमस्याः सर्वकार्येषु, हर्ता कर्ता च सम्पदम् ॥३३६॥
चचाल स्वप्रतापेन, समाक्रान्तमहीतलः । पश्चिमां दिशमाश्रित्य, प्रभाते सविता यथा ॥३३७॥
आगच्छन्तं समाकर्ण्य, भानुप्रभनराधिपम् । सिंहविक्रमराजेन, मत्सरेण पलायितम् ॥३३८॥
बहिरावासितो राजा, समये च प्रवेशितः । कृतर्द्धिशोभं नगरं, मञ्चमालाविराजितम् ॥३३९॥
सोत्कण्ठाश्च प्रजाः सर्वा, दर्शनार्थं समागताः । अहो ! रूपमहो रूप-महो कान्तिर्मनोहरा ॥३४०॥
सकलानि कलत्राणि, अहो ! तुल्यः समागमः । अनुकूलो विधिः पुंसां, किं किं यन्न करोत्यहो ! ॥३४१॥
इत्येवं सर्वलोकेन, श्लाघ्यमानः पदे पदे । विवेश मन्दिरं पैत्र्यं, राजमानो नृपश्रिया ॥३४२॥
पूजयित्वा यथायोग्यं, लोकः सर्वो विसर्जितः । स्थितः सिंहासने राजा, प्रधानपरिवारितः ॥३४३॥
यदर्थं वयमायाता, यश्च मे हृदि वर्तते । शूरो विक्रमभूपालः, स किं भो नात्र दृश्यते ? ॥३४४॥
मन्त्रिणोक्तं च किं तेन, मत्सरच्छन्नबुद्धिना । नाऽधन्यश्च जनो येन, देवदर्शनमर्हति ॥३४५॥
महेन्द्रमातुलेनापि, राज्यश्रीरिव दुर्लभा । राज्यश्रीकन्यका दत्ता, विस्तरेण विवाहिता ॥३४६॥
गुणानुरक्तनिःशेष-लोकमुद्धृतकण्टकम् । प्रणताशेषसामन्तं, विनमन्मन्त्रिमण्डलम् ॥३४७॥
पालयतोऽप्रयासेन, रम्यं राज्यचतुष्टयम् । कामभोगान् यथाकामं, भुञ्जानस्याऽनुवासरम् ॥३४८॥
संसारसुखसन्दोह मग्नमूर्तेर्महात्मनः । सञ्जातयोग्यपुत्रस्य, गतः कालः कियानपि ॥३४९॥
अन्यदा भुवनालोक-केवल्यत्र समागतः । वन्दनार्थं गतो राजा, प्रभूतैर्नागरैः सह ॥३५०॥
केवली कथयामास, धर्मं दुर्गतिनाशनम् । हितञ्च सर्वजीवानां, सर्वजन्तुसुखावहम् ॥३५१॥
अथ प्रस्तावमासाद्य, भानुप्रभनृपोऽवदत् । पूर्वजन्मनि लोकेश !, किं मया सुकृतं कृतम् ॥३५२॥
येनेदृक्षा महाभोगा, रम्यं राज्यचतुष्टयम् । कान्ताः कान्ताः सुपुत्राश्च, श्रियः सर्वमनोहराः ॥३५३॥
केवल्युवाच भो राजन् !, सङ्क्षेपात् शृणु कारणम् । शुभाशुभपदार्थानां, पुण्यपापे निबन्धनम् ॥३५४॥
समस्तीह कलिङ्गेषु, सुखावासं महापुरम् । धाराख्या निर्धना नारी, तत्रोवास निरन्वया ॥
नानाकोलसमाकीर्ण-कुटीरकनिवासिनी । कुग्रासाच्छादना नित्यं, कुकर्मशतकारिणी ॥३५६॥
तैलकर्षं समादाय, सापणाद्वलिता सती । विवेश मन्दिरं जैनं, राज्यहस्तिभयाकुला ॥३५७॥
अहो महति संसारे, जीवद्भिः किं न दृश्यते । यद् दृष्टोऽदृष्टपूर्वोऽयं, देवदेवो जिनेश्वरः ॥३५८॥
शान्तः सौम्यः सदाकारः, प्रदीपोद्योतिताननः । गतरागो गतद्वेषो, गतमोहो [1]निरञ्जनः ॥३५९॥
अस्यैव पुरतो भाति, प्रदीप इति मे मतिः । इत्यालोच्य तया दत्तः प्रदीपः स्नेहपूरितः ॥३६०॥
अस्यैव पुरतो भाति, प्रदीप इति मे मतिः । इत्यालोच्य तया दत्तः प्रदीपः स्नेहपूरितः ॥३६०॥
अन्वमोदि चिरं कालं, रोमाञ्चाञ्चितगात्रया । बद्धं परभवायुष्कं, भोगसारं तदा तया ॥३६१॥
मृत्वा कालेन सञ्जातो, भानुश्रीपरमोदरे । भानुप्रभ इति ख्यातः, स च त्वं मेदिनीपते ॥३६२॥

१ निरंगतः - BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुत्वेदं भुवनालोक-भाषितं मेदिनीपतिः । सद्यः सञ्जातवैराग्यो, निजजातिस्मरोऽभवत् ॥३६३॥
ततश्च भणितस्तेन, भुवनालोक केवली । यद्यस्ति योग्यता स्वामिं-स्तदा दीक्षा प्रदीयताम् ॥३६३॥
केवल्युवाच भूपेश!, महदेतत्प्रयोजनम् । सङ्गतं सर्वजीवानां, विशेषेण भवादृशाम् ॥३६४॥
व्रतमेतन्महापुण्यै-स्तीर्थनाथैः स्वयं कृतम् । चक्रवर्तिभिराचीर्णं, बलदेवैर्निषेवितम् ॥३६५॥
परं सम्यक्समालोच्य, ह्यङ्गीकारोऽस्य सङ्गतः । सुकुमारशरीरस्त्वं, कष्टमत्र पदे पदे ॥३६६॥

तथाहि–

यदिदं प्रव्रजनं नाम साक्षाद्बाहुभ्यां तरणमेतत्स्वयम्भूरमणस्य, प्रतिश्रोतोगमनमेतद्गङ्गायाः, चर्वणमेतल्लोहमययवानां, भरणमेतत्सूक्ष्मपवनेन कम्बलमुत्कोल्याः, भेदनमेतच्छिरसा सुरगिरेः, मानग्रहणमेततत्कुशाग्रेण नीरधेः, नयनमेतदबिन्दुपातं धावतो योजनशतं तैलपूर्णपात्र्याः, ताडनमेतत्सव्यापसव्यभ्रमणशीलाष्टचक्रवर्तिविवरगामिना शिलीमुखेन वामलोचने पुत्रिकायाः, भ्रमणमेतदनपेक्षितपादपातं निशातकरवालधारायामिति, यतोऽत्र परिषोढव्याः परीषहाः, निराकर्तव्या दैत्याद्युपसर्गाः, विधातव्या समस्तपापयोगनिर्वृत्तिः, वोढव्यो यावत्कथं सुरगिरिगुरुरष्टादशशीलाङ्ग-सहस्रभारः, वर्तितव्यः सकलकालमात्मा माधुकर्या वर्तनया, निष्टप्तव्यो विकृष्टतपोभिर्देहः सात्मीभावतां नेतव्यः सप्तदशभेदभिन्नः संयमः, समुन्मूलयितव्या रागादयः, निरोद्धव्यो हार्दतमःप्रसरः, किं बहुना ? निहन्तव्योऽप्रमत्तचित्तैर्मोहमहावेताल इति, मृदुशयनाहारलालितं पालितं तावकं शरीरकम्, अपर्यालोचितकारिता हि महतेऽनर्थायेति, राजाह-भगवन्नंगीकृतं सर्वं, कष्टजातं मयाधुना। विधायानुग्रहं देहि, शीघ्रं भागवतं व्रतम् ॥३६७॥
वन्दित्वा भुवनालोकं, ततः स्वगृहमागतः । प्रोक्तः सर्वोऽपि वृत्तान्तः, प्रधानानां महीभुजां ॥३६८॥
राजश्रीसम्भवं पुत्रं, विजयं विश्वविश्रुतम् । स्वराज्ये स्थापयामास, भानुप्रभनरेश्वरः ॥३६९॥
सूरश्रीसम्भवं सूरं, केरलाकुक्षिसम्भवम् । सूरसेनाभिधं पुत्रं, कलाकौशलशालिनम् ॥३७०॥
एणाचन्द्राभिधं पुत्र-मेणामुख्याः समुद्भवम् । त्रयो मातामहे राज्ये, ह्यभिषिच्य विसर्जिताः ॥३७१॥
अन्यदपि यथायोग्यं, धर्मकर्म विधाय सः । निष्क्रान्तो भुवनालोक-केवलिनः पदान्तिके ॥३७२॥
आगमाधिगमाज्जातो, गीतार्थो गतमत्सरः । विजहार महीपीठे, भानुप्रभमहामुनिः ॥३७३॥
प्रशमामृततृप्तात्मा, क्षमालङ्कृतविग्रहः । निर्ममो निरहङ्कारो, गतरागो जितेन्द्रियः ॥३७४॥
सर्वजीवाभयं दत्त्वा, तपस्तप्त्वा सुदुस्तरम् । परिपाल्यामलं शीलं, विभाव्य वरभावनाः ॥३७५॥
विशुद्धसंयमस्थानो, हत्वा घातिचतुष्टयम् । उत्पाद्य केवलज्ञानं, जगाम परमं पदम् ॥३७६॥
सर्वज्ञपुरतो दत्तो, दीपो भावपुरस्सरम् । लोकद्वयेऽपि संसूते, सत्कल्याणपरम्पराम् ॥३७७॥

इति **दीपपूजाफलं** समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अक्षतपूजायां कणसारकथा

दीपपूजाफलं प्रोक्तं, लोकद्वयसुखावहम् । सम्प्रत्यक्षतपूजायाः, श्रूयतां कथ्यते फलम् ॥१॥
पञ्चालविषयस्यान्तः, पुरं काम्पिल्यसञ्ज्ञितम् ।
तत्रासीन्निषधो नाम, राजा सर्वजनप्रियः ॥२॥
ताराप्रभाभिधः श्रेष्ठी, पुरकार्यविचिन्तकः । समग्रनैगमग्राम-ग्रामणी राजसम्मतः ॥३॥
ताराप्रभा प्रिया तस्य, शशाङ्कस्येव रोहिणी । स्त्रीजनोचितनिःशेष-कलाकौशलशालिनी ॥४॥
ताराप्रभस्तया सार्धं, भुङ्क्ते विषयजं सुखम् । चिन्तानन्तरनिःशेष-पूर्यमाणमनोरथः ॥५॥
अन्यदा पश्चिमे यामे, यामिन्यास्तल्पशायिनी । स्वप्ने शुभमिदं स्वप्नं, ताराप्रभा समैक्षत ॥६॥
यथा मे सर्वतो गेह-माकीर्णं कणराशिभिः । कोष्ठागाराणि सर्वाणि, कणैः पूर्णानि भान्त्यलम् ॥७॥
प्रबुद्धा च समुत्थाय, गत्वा भर्तृसमीपके । यथा दृष्टं तथा सर्वं, तुष्टा तस्मै न्यवेदयत् ॥८॥
तेनाभाणि प्रिये श्रेष्ठ !, पुत्रस्तव भविष्यति । सर्वलक्षणसम्पूर्णो, वृद्धिकृत्सर्वसम्पदाम् ॥९॥
सत्यं भवतु ते वाक्य-मित्युक्त्वा हृष्टमानसा । जगाम निजकस्थाने, दधौ गर्भं यथासुखम् ॥१०॥
गतेषु त्रिषु मासेषु, तस्याजनि च दोहदः । यथा तण्डुलदानेन, लोकं सुस्थीकरोम्यहम् ॥११॥
पृष्टया च तयाचष्टे, श्रेष्ठिनः स विशेषतः । तेनापि पूरितस्तूर्णं, तुष्टा ताराप्रभाजनि ॥१२॥
गर्भाधानत आरभ्य, श्रेष्ठिनः सम्पदा सह । सर्वतोऽपि प्रवर्धन्ते, कणा गर्भानुभावतः ॥१३॥
चिन्तानन्तरनिःशेष-पूर्यमाणसुदोहदा । सुखं सुखेन सा गर्भं-मुवाह मुदिताननाः ॥१४॥
मासानां नवकेऽतीते, सार्धं सप्तदशाधिके । सासूत सुन्दरं पुत्रं, सर्वलक्षणसंयुतम् ॥१५॥
कारितं च ततः पित्रा, महर्द्ध्या बन्धुभिः सह । सर्वलोककृतानन्दं, वर्धापनकमुच्चकैः ॥१६॥
समये च कृतं तस्य, नाम स्वप्नानुसारतः । कणसार इति ख्यातं, महामहपुरस्सरम् ॥१७॥
अथासौ वर्धते बालो, धात्रीपञ्चकलालितः । सार्धं कलाकलापेन, पुष्णानो वपुषः श्रियम् ॥१८॥
कालेन यौवनं प्राप्तः, कामिनीजनमोदकम् । श्रेष्ठिपुत्रीं सुताराख्यां, परिणिन्ये च कन्यकाम् ॥१९॥
भुञ्जानस्य यथाकामं, कामभोगांस्तया सह । गच्छन्ति प्रीतचित्तस्य, कणसारस्य वासराः ॥२०॥
अथान्यदा समं मित्रै-र्नानाक्रीडापरायणः । कणसारो ललन् वीथ्यां, ददृशे राजकन्यकाम् ॥२१॥
कामवेश्मनि गच्छन्त्या, सुदर्शनाख्यया तदा । आलोकितश्च सस्नेहं, सादरं स्निग्धचक्षुषा ॥२२॥
विद्धा च कामदेवेन, ततः सा निशितैः शरैः । सन्ततं तं प्रपश्यन्ती, चिन्तयन्ती च तद्गुणान् ॥२३॥
कायेनैव न चित्तेन, गता सा काममन्दिरम् । सम्पूज्य कामदेवस्य, प्रतिमामप्रतिमाकृतिम् ॥२४॥
कणसारस्य रूपेण, मोहिता वलिता क्षणात् । कामग्रहगृहीतासा-वगच्छद्राजमन्दिरे ॥२५॥
सुप्ता सुन्दरपर्यङ्के, न च प्राप सुखासिकाम् । ददृशे च तथावस्थां, धात्र्या पृष्टा च सा यथा ॥२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाधते किमु ते वत्से!, सदुःखा येन दृश्यसे । वारंवारं तयाप्येवं, सादरं पृच्छ्यमानया ॥२७॥
प्रोक्तः सर्वोऽपि वृत्तान्तः, कणसारेक्षणादिकः । तदम्ब! त्वं कुरु यत्नं, यथा मे स्यादभीप्सितम्।२८॥
धात्र्या च तत्क्षणादेव, तस्या मातुर्निवेदितम् । तयापि नरनाथस्य, तेनोचे नातिचार्विदम् ॥२९॥
यद्राजपुत्रिकायास्तु, सम्बन्धो वणिजा सह । तथाप्येवं करिष्यामि, मत्सुता लभतां धृतिम् ॥३०॥
ततस्तारप्रभश्रेष्ठी, समाहूतो महीभुजा । वृत्तान्तं सर्वमाख्याय, सादरं भणितो यथा ॥३१॥
दत्तेयं कणसारस्य, मया पुत्री सुदर्शना । निर्विचारमिदं कार्यं, कालक्षेपं विना कुरु ॥३२॥
देव एव विजानाति, किमत्र ब्रूमहे वयम् । इत्युक्त्वा भूपतेर्वाक्यं, श्रेष्ठिना प्रतिपद्यते ॥३३॥
शोभने तिथिनक्षत्रे, महद्धर्द्धा विहितोत्सवम् । वृत्तं तयोः प्रमोदेन, पाणिग्रहणमङ्गलम् ॥३४॥
दत्ताश्च भूभुजा तस्मै, वाजिनः स्यन्दना गजाः । कोशश्च द्रव्यसम्पूर्णः, प्रासादाश्च मनोहराः ॥ ३५॥
अथासौ कणसारोऽपि, विलसन् राजलीलया । सुदर्शनासुताराख्या-संयुक्तो युक्तकारकः ॥३६॥
राज्ञा च राजलोकैश्च, दृश्यमानः सगौरवम् । कुर्वन् बन्धुजनानन्दं, कालं नयति नीतिमान् ॥३७॥
अन्यदा च निजे राज्ये, भूपतिस्तन्निकारकम् । कणसारं व्यवस्थाप्य, ययौ विजययात्रया ॥३८॥
कणसारोऽपि तद्राज्यं, सम्पालयति नीतितः । दुष्टानां निग्रहं कुर्वन्, शिष्टानां पालनं तथा ॥ ३९॥
एवं च राजलोकानां, सम्मतो रञ्जितप्रजः । सर्वाण्यपि निरुत्सेको, राज्यकार्याणि चिन्तयन् ॥४०॥
राज्ञो [ऽस्य] वल्लभादेव्या, चन्द्रकान्ताभिधानया । गवाक्षगतया दृष्टो, नेत्रानन्दविधायकः ॥४१॥
ततः सा चिन्तयामास, तद्गुणाक्षिप्तमानसा । अहो रूपमहो रूप-महो कान्तिरहो गतिः ॥४२॥
अहो देहस्य लावण्य-महो मधुरता गिराम् । वार्तायां श्रूयते कामो, मन्ये कामोऽयमेव हि ॥४३॥
तदत्र यद्ययं कामी, गत्वा कामं न काम्यते । तदेदं यौवनं रूपं, नरजन्म च निष्फलम् ॥४४॥
विचिन्त्यैवं तया दासी, प्रेषिता तस्य सन्निधौ । पृष्टा तेन यथा भद्रे!, निवेदय प्रयोजनम् ॥४५॥
तयोक्तं चन्द्रकान्ताया, देव्याः शरीरकारणम् । तदेहि सत्वरं देवी, प्रतिजागर्यतामिति ॥४६॥
श्रुत्वेदं कणसारोऽपि, चन्द्रकान्तान्तिकं गतः । प्रणम्य भणितं तेन, किमम्ब ! बाधते तव? ॥४७॥
तयापि प्रकटं चैव, हावभावपुरस्सरम् । उक्तः समन्थरैर्नेत्रैः, सर्वाङ्गं वीक्ष्य लीलया ॥४८॥
यथेदं मामकं देहं, सन्तप्तं कामवह्निना । स्वाङ्गसङ्गजलप्लावै-स्त्वं निर्वापय साम्प्रतम् ॥४९॥
मदीयां प्रार्थनामेनां, सर्वथा मा कृथा वृथा । म्रियेऽहमन्यथा नाथ!, त्वद्विरहाग्निपीडिता ॥५०॥
श्रुत्वेदं कणसारोऽपि, ब्रूते खेदवशं गतः । मा मा भाणि च यन्निन्द्यं, मातरेवंविधं वचः ॥५१॥
यन्मनसापि नो चिन्त्यं, लोकद्वयविरोधकम् । तत्कथं त्वयका पापं, वचसा प्रकटीकृतम् ॥५२॥
प्राणत्यागेऽपि नो कर्म, करिष्याम्यहमीदृशम् । तदम्ब! मुञ्च गच्छामि, किं वृथा बहुजल्पितैः ॥५३॥
एवमुक्त्वा गतस्तूर्णं, कणसारो निजाश्रयम् । सापि तं प्रति सावेशा, जाता मत्सरिणी दृढम् ॥५४॥
अथ कालेन दिग्यात्रां, कृत्वायातो नराधिपः । प्रविष्टश्च पुरे तुष्टः, क्रमाच्च निजमन्दिरे ॥५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो राज्ञे प्रणामार्थं, पौरलोकः समागतः । तेनापि च यथायोगं, स सन्मान्य विसर्जितः ॥५६॥
पृष्टाश्च निजका लोका, अमात्याद्या नियोगिकाः । यथा भो अत्र सर्वत्र, युष्माकं क्षेम वर्तते ॥५७॥
कणसारकुमारो वा, युष्मानाश्रित्य कीदृशः । प्रजासु वापि कीदृक्षः ?, श्रुत्वेदं तैः प्रजल्पितम् ॥५८॥
देव देवप्रसादेन, क्षेमं सर्वत्र वर्तते । कणसारस्तु निःशेष-गुणरत्नमहोदधिः ॥५९॥
येन चिन्तयता राज्यं, दुष्टलोकं निगृह्णता । रक्षता शिष्टलोकं च, गुणग्राही जनः कृतः ॥६०॥
एवं पृष्टा च दृष्टा च, कृत्वापि च यथोचितम् । विसर्ज्य च निजं लोकं, राजेन्द्रोऽन्तःपुरं ययौ ॥६१॥
यावच्च पश्यति तत्र, चन्द्रकान्तावलोकिता । विमनस्का विदीर्णाङ्गी, भूमौ विन्यस्तदृष्टिका ॥६२॥
महामन्युभराक्रान्ता, सखेदा दुःखनिर्भरा । ध्यायन्ती किञ्चिदव्यक्तं, भ्रष्टमन्त्रेव योगिनी ॥६३॥
ततः सा प्रश्निता राज्ञा, किमर्थं दुःखिता प्रिये! । तवाज्ञा खण्डिता केन ?, सखेदा केन दृश्यसे ?॥६४॥
सा प्राह किमहं राजन्, कथयामि तवाग्रतः । कथितं यत्तु नो कोऽपि, श्रद्धातुमपि शक्ष्यति ॥६५॥
राजाह किं तवानेन, यदि कथ्यं भणस्व मे । तथा तथा करिष्यामि, यथा ते जायते धृतिः ॥६६॥
सा प्राह देव योऽयं ते, जामाता राज्यचिन्तकः । तेनाहं प्रार्थिता बाढं, विषयासेवनं प्रति ॥६७॥
विदारिता च पापेन, दारुणं नखकोटिभिः । कष्टेन रक्षितं शीलं, ब्रवीमि किमतः परम् ॥६८॥
श्रुत्वेदं तत्क्षणादेव, निष्क्रान्तोऽन्तःपुरान्नृपः । कणसारं समाहूय, राज्ञा निर्भर्त्सितो यथा ॥६९॥
रे! रे! दुष्ट दुराचार !, महापापाधमाधम । किमन्यैर्न निष्ठिता मूढ!, रूपवत्यः कुलस्त्रियः ॥७०॥
मद्दारानपि येन त्वं, नैवं त्यजसि मूढधीः । तद्गच्छ गच्छ मे दृष्टि-मार्गादपि पुरादपि ॥७१॥
देशोऽपि मामकस्त्याज्यः, को द्रक्ष्यति मुखं तव । नामापि श्रूयते नैव, यत्र तत्र व्रजाधुना ॥७२॥
प्रसाद इति सञ्जल्प्य, कणसारोऽपि सत्वरम् । प्रणम्य भूभुजः पादा-वपमानभरेरितः ॥७३॥
समुत्थाय ततः स्थाना-देकाक्येव विषादवान् । अनाख्यायैव बन्धूना-मुत्तराभिमुखं ययौ ॥७४॥
पूर्वं मित्रसमो भूत्वा, पश्चाच्छत्रुसमोऽजनि । नरेन्द्रः कणसारस्य, राज्ञां मैत्री स्थिरा न हि ॥७५॥

यतः- **काके शौचं द्यूतकारे च सत्यं, सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।**
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता, राज्ञां मैत्री केन दृष्टा श्रुता वा ? ॥७६॥

नानानगनदीकीर्णं, नानाग्रामपुराकुलम् । परिभ्राम्यन्महीपीठं, स सम्प्रापोत्तरापथम् ॥७७॥
तत्रास्ति शालिपुराख्यो, ग्रामो भूरिजनालयः । बहिस्तस्य वटस्याधः, श्रान्तत्वान्निषसाद सः ॥
दृष्टश्च तत्र वास्तव्य-धान्यसारकुटुम्बिना । पृष्टश्च सादरं गत्वा, यथा कस्मादिहागतः ? ॥७९॥
गन्तव्यं भवता कुत्र ?, किं वा नाम कुलं च ते ? । तेनाभाणि महाभाग !, बृहतीयं कथा मम ॥८०॥
कथं वा कथ्यते भद्र !, स्वयमेव जनाग्रतः । स्थानभ्रष्टेन सत्पुंसा, कुलशीलादिकं निजम् ॥८१॥

किंच- **लहुइंति लहुं पुरिसं, मेरुसमाणं पि दो अकज्जाइं ।**
अप्पपसंसा परनिंदणा य पयडं पकिज्जंता ॥८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुत्वेदं धान्यसारोऽपि, मनस्येवं व्यचिन्तयत् । अहो वरकुलोत्पन्नः, कोऽप्ययं सुपुमानिति ॥८३॥
तेनायं पृच्छ्यमानोऽपि, नाख्याति निजकां कथाम् । आकृत्यैवास्य मन्येऽयं, भूतपूर्वमहोदयः ॥८४॥
यतः- यत्राकृतिर्गुणास्तत्र, गुणिनः सम्पदो ध्रुवम् । श्रीमत्याज्ञां परां प्राहु-स्ततो राज्यं महोदयः ॥८५॥
लक्षणानि च दृश्यन्ते, यादृशान्यस्य विग्रहे । तैरस्य निश्चितं भावि, भूरिवैभवमुत्तमम् ॥८६॥
विचिन्त्यैवं करे कृत्वा, नीतस्तेन निजे गृहे । कृत्वा स्नानादिकं सर्वं, भोजितश्च सगौरवम् ॥८७॥
दत्ता **शालिप्रभा** कन्या, शुभेऽह्नि परिणायितः । समर्पितं गृहं चैकं, चारु कुप्येन संयुतम् ॥८८॥
दत्तं तस्मै तथा चैकं, शालिक्षेत्रं मनोहरम् । रोपिताः शालयस्तत्र, जाता भूरिफलप्रदाः ॥८९॥
लघुक्षेत्रेऽपि भूयांसो, जायन्ते तस्य शालयः । पुण्यानि फलदानीह, व्यवसायो न देहिनाम् ॥९०॥
एवं च सर्वधान्यानि, जायन्ते तस्य कर्षणे । सर्वलोकातिशायीनि, प्रतिवर्षं यथोत्तरम् ॥९१॥
नानाधान्यभृताः [1]पल्याः, प्रभूतास्तेन कारिताः । धान्यविक्रयतो जातं, द्रविणं चातिपुष्कलम् ॥९२॥
तथा गावो महिष्यश्च, बलीवर्दास्तुरङ्गमाः । उष्ट्रा गन्त्रीविशेषाश्च, प्रभूतास्तस्य जज्ञिरे ॥९३॥
द्रव्यं कलान्तरेणैष, धान्यं वृद्ध्या ददात्यलम् । यथेच्छं सर्वलोकेभ्यो, ग्रामे ग्रामे पुरे पुरे ॥९४॥
स्तोकेनापि च कालेन, विस्तृतो भूरिसम्पदा । औदार्यादिगुणग्रामैः, परां ख्यातिमवाप च ॥९५॥
देशे च तत्र सर्वत्र, ग्रामे ग्रामे पुरे पुरे । तेनानेके महापल्या, धान्यपूर्णा निवेशिताः ॥९६॥
एवं च तत्र सर्वत्र, देशे ग्रामपुरादिषु । राजभिः सर्वलोकैश्च, मन्यमानस्य सादरम् ॥९७॥
शालिप्रभासमेतस्य, भुञ्जानस्यार्थसम्पदः । श्रीमतः कणसारस्य, गतः कालः कियानपि ॥९८॥
अथान्यदा च पाञ्चाल-देशेऽजनि सुदारुणम् । दुर्भिक्षं बहुकालीनं, जातोऽत्यन्तकणक्षयः ॥९९॥
मूल्येनापि यदा धान्यं, लोकैस्तत्र न लभ्यते । ततोऽसौ निषधो राजा, सचिन्तोऽजनि मानसे ॥१००॥
अहो भूरिधनोपेतः, कोषोऽयं मेऽस्ति पुष्कलः । परं धान्यं ममापीह, कोष्ठागारेषु निष्ठितम् ॥१०१॥
ततः सर्वे समाहूता, पुरलोका मन्त्रिणस्तथा । उक्ताश्च ते यथा भो ! भो !, साम्प्रतं किमु कुर्महे ॥१०२॥
मूल्यमस्ति न धान्यानि । क्षुधया म्रियते जनः । तदत्र चिन्त्यतां कश्चि-दुपायो येन जीव्यते ॥१०३॥
अत्रान्तरे गुणश्रेष्ठः, श्रेष्ठी ताम्रभोऽवदत् । अहो राजन्नहं किञ्चि-दाख्यामि यन्मया श्रुतम् ॥१०४॥
श्रूयते कणसाराख्य, उत्तरापथमण्डले । ग्रामे च धान्यपूराख्ये, प्रभूतकणसङ्ग्रही ॥१०५॥
यद्यसौ मामकः पुत्र-स्तत्कणा अपि मामकाः । अथान्यः कोऽपि तन्नामा, तदा तल्लाभसंशयः ॥१०६॥
राजाह यदि ते पुत्रो, नाऽसावत्र समेष्यति । यतो निष्कासितो देशा-न्निर्भर्त्स्य स मया पुरा ॥१०७॥
श्रेष्ठ्याह सत्यमेवेदं, यद्देवेन प्रभाषितम् । तथापि प्रेष्यते कश्चि-ल्लेखहस्तो निजो भटः ॥१०८॥
श्राव्यते च स वृत्तान्तः, सर्वकणक्षयादिकः । आकर्ण्य श्रेष्ठिनो वाक्यं, भूभुजापि तथा कृतम् ॥१०९॥
गतश्च स पुमांस्तत्र, लेखस्तस्मै समर्पितः । उच्छोट्य वाचितो लेख-स्तदर्थश्चावधारितः ॥११०॥

१ पाल्याः BJमु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिखित्वा कणसारोऽपि, प्रतिलेखं सविस्तरम् । समर्प्य प्रेषयामास, तं भटं त्वरितैः पदैः ॥१११॥
तेनापि शीघ्रमागत्य, राज्ञो लेखः समर्पितः । ततो वाचयितुमारब्धो, लेखं स्वयमेव भूपतिः ॥११२॥
यथा देशान्तरस्थोऽपि, तातायं तावको जनः । कणा अपि मदीया ये, ते सर्वेऽपि च तावकाः ॥११३॥
गृह्यन्ताम् च यथाकामं, निस्तार्यतां जनोऽखिलः । ततस्ताम्रप्रभादीनां । सम्मतेन महीभुजा ॥११४॥
बहवः प्रेषिता उष्ट्रा, धान्यानयनहेतवे । ते पत्तनं गतास्तत्र, कणसारस्य सन्निधौ ॥११५॥
भृत्वा तेनापि धान्येन, प्रेषिताः शीघ्रमेव हि । तथान्ये उष्ट्रसङ्घाता, बहुधान्यभृता निजाः ॥११६॥
भूयोभूयोऽपि भूयांसः, प्रेषितास्तेन भूभुजे । पाञ्चालेषु ततः सौस्थ्यं, कणसारकणैरभूत् ॥११७॥
जीविताशा च सञ्जाता, लोकानां तदनन्तरम् । ततस्तुष्टेन भूपेन, पौरलोकैः समन्विताः ॥११८॥
प्रेषिता मन्त्रिसामन्ता-स्तस्यानयनहेतवे । प्राप्तास्ते कणसारोऽपि, तान् सन्मान्य यथोचितम् ॥११९॥
स्वकीयं सर्वमादाय, काम्पिल्यपुरमागतः । भूभुजापि महर्द्ध्यासौ, पुरमध्ये प्रवेशितः ॥१२०॥
दत्ता पूर्वस्थितिः सर्वा, साधिका क्षामितस्तथा । श्रेष्ठितारप्रभाद्यांश्च, बन्धून् पुरजनांस्तथा ॥१२१॥
प्रणनाम यथायोगं, सन्मानं च चकार सः । मिलिता च सुताराख्या, सुदर्शना च सत्प्रिया ॥१२२॥
ततः शालिप्रभा चक्रे, प्रणामं सादरं तयोः । ततो भार्यात्रयोपेतो, भुञ्जानो भोगसम्पदम् ॥१२३॥
वल्लभो भूभुजोऽत्यर्थं, लोकानां च विशेषतः । शशीव बन्धुलोकानां, कुर्वाणो नयनोत्सवम् ॥१२४॥
महासौख्यार्णवे मग्नो, गमयति स्म वासरान् । भुक्त्वा भोगाश्चिरं तेन, जाताः पुत्रा मनोहराः ॥१२५॥
ततश्च भुक्तभोगत्व-द्धर्मे चित्तं ददात्यसौ । अन्यदा मेघनादाख्या, मेघनादसमप्रभाः ॥१२६॥
संसारसागरोत्तार-सेतवो भव्यदेहिनाम् । चतुर्ज्ञानसुविज्ञात-समस्तभवविस्तराः ॥१२७॥
भवकान्तारनिस्तार-सार्थवाहसमा नृणाम् । लतागुल्ममहोद्याने, स्थाने मुनिजनोचिते ॥१२८॥
समागत्य स्थितास्तत्र, सूरयो धर्मदेशकाः । वन्दनार्थं गतो राजा, लोकाश्च बहवस्तथा ॥१२९॥
प्रारब्धा देशना रम्या, [भव्यबोधप्रदायिनी । मेघनादध्वनिनोच्चै]-र्मेघनादमुनीश्वरैः ॥१३०॥
भो भो भव्याः ! शृणुत विशदं, मामकं वाक्यमेतत्, कर्णं दत्त्वा, विगतविकथं, द्वेषरागव्यपेतम्, ।
संसाराब्धेस्तरणतरिकाकल्पमाप्तोपदिष्टम्, यत्कल्याणं, त्विह परभवे तिष्ठतां गच्छतां च ॥१३१॥
नास्तिकैर्नैव भाव्यं च, भवद्भिर्भवभीरुभिः । नास्तिक्यं परमो दोष, आस्तिक्यं परमो गुणः ॥१३२॥

तथाहि-अनेकभवपरम्पराकोटाकोटीभिः कथंचिन्मानुष्यं जन्म लब्ध्वापि नास्तिक्यदोषदूषितो नास्तिको युक्त्यागमबाधितमेवं वक्ति, नास्ति परलोकः, न विद्यते कुशलाकुशलकर्मणः फलं, न सम्भवति खल्वयमात्मा, नोपपद्यते सर्वज्ञः, न घटते तदुपदिष्टो मोक्षमार्गः, ततोऽसावतत्त्वाभिनिविष्टचित्तो हिनस्ति प्राणिनः, भाषतेऽलीकं, समादत्ते परधनं, रमते परदारेषु, गृह्णात्यपरिमितपरिग्रहं, भुङ्क्ते रजन्यां, खादति मांसं, पिबति सुरां, न गृह्णाति सदुपदेशं, प्रकाशयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमार्गं, निन्दति वन्दनीयान्, वदति [1]परापवादं, आचरति समस्तपातकानि ततो बद्ध्वा निबिडं कर्मजालं पतत्येष जीवो नरकेषु, तत्र च पतितः पच्यते कुम्भीपाकेन, छिद्यते क्रकचपाटनेन, आरोह्यते वज्रकण्टकाकुलासु शाल्मलीषु, पाय्यते सन्दंशकैर्मुखं विधृत्य कलकलायमानं तप्तं त्रपु, भक्ष्यते निजमांसानि, भुज्यतेऽत्यन्ततप्तभ्राष्ट्रेषु, तार्यते पूयवसारुधिरक्लेदमूत्रान्त्रकलुषां वैतरिणीं नदीं, छिद्यतेऽसिपत्रवनेषु स्वपापभरप्रेरितैः परमाधार्मिकासुरैः, तथा समस्ताशुभपुद्गलराशिभक्षणेऽपि नोपशाम्यति बुभुक्षा, निःशेषजलधिपानेऽपि नापगच्छति पिपासा, अभिभूयते शीतवेदनया, कदर्थ्यते तापातिरेकेण, ततश्चायं जीवो गाढतापानुगतो हा तात ! हा मातः ! हा भ्रातः ! इत्यादि विरसमाक्रन्दति, न चास्य तत्र गात्रत्रायकः कश्चिद्विद्यते, कथंचिदुत्तीर्णोऽपि नरकाद्बाध्यते तिर्यक्षु वर्तमानः, कथं ? वाह्यते भारं, कुट्यते लकुटादिभिः, छिद्यन्ते कर्णपुच्छादयः, खाद्यते कृमिजालकैः, सहते बुभुक्षां, म्रियते पिपासया, तुद्यते नानाकारयातनाभिरिति ततः। कथञ्चिदवाप्तमनुष्यभावोऽप्येष जीवः पीड्यत एव दुःखैः, कथं ? तदुच्यते-क्लेशयन्त्येनं रोगव्राताः, जर्जरयति जरा, दोदूयन्ते इष्टवियोगानिष्टसंप्रयोगाः, विसंस्थुलयन्ति धनहरणानि, आकुलयन्ति स्वजनमरणानि, विधुरयन्ति व्यसनानि, तथा कथञ्चिल्लब्धविबुधजन्माप्येष जीवो ग्रस्यत एव नानाविधदुःखवेदनाभिः, तथाहि-आज्ञाप्यते विवशः शक्रादिभिः, खिद्यते परोत्कर्षदर्शनेन, जीर्यते प्राग्भवकृतप्रमादफलदर्शनेन, दन्दह्यतेऽस्वाधीनामरसुन्दरीप्रार्थनेन, शल्यते तन्निदानचिन्तनेन, निन्द्यते महर्द्धिकदेववृन्देन, विलपत्यात्मनश्च्यवनदर्शनेन, आक्रन्दति गाढं प्रत्यासन्नमरणदर्शनेन, पतति समस्ताशुचिनिधाने स्त्रीतिरश्चीगर्भकलिमले इति।

चातुर्गतिकसंसारे, नास्ति सौख्यं शरीरिणाम्। कर्मक्लेशप्रहाणोत्थां, विमुच्य पञ्चमीं गतिम् ॥१३३॥
सा च विशुद्धधर्मेण, स च सर्वज्ञभाषितः। पूर्वापराविसंवादि, दयासारः क्षमान्वितः ॥१३४॥
तनोर्विधूनन धत्ते, दत्ते च प्रशमं परम्। पुष्णाति च परं श्रेयः, मुष्णाति कुमतेर्मतिम् ॥१३५॥
स्वर्गापवर्गसंसर्ग-साधकः पापबाधकः। सर्वसौख्यकरः सत्यो, धर्मः सर्वज्ञभाषितः ॥१३६॥
द्वात्रिंशता सहस्राणां, महाबलमहीभृताम्। षोडशयक्षसहस्रैः, सर्वदा कृतसन्निधिः ॥१३७॥
चतुःषष्ट्या सहस्राणां, कान्ताकान्तकुचोष्मणा। शीतकालेऽपि निःशीतः, शेते चक्री निराकुलः॥
यद् भुङ्क्ते भारतं वर्ष-मुद्धृताखिलकण्टकम्। विचचार गजारूढ-श्च्छत्रछन्नदिगन्तरः ॥१३९॥
जीवनन्द चिरं देव !। देहि दृष्टिं मदानने। इत्यादिमागधोद्गीत-गीर्भिर्गीतगुणान्तरः ॥१४०॥
भोगाभोगान् यथा शक्र-श्चक्री भुङ्क्ते निराकुलः। तदेतदर्हदुक्तस्य, दयाधर्मस्य जृम्भितम् ॥१४१॥
किं बहुनात्र संसारे, यदन्यदपि सुन्दरम्। दृश्यते वस्तु तत्सर्वं, दयाधर्मस्य सत्फलम् ॥१४२॥

१J । परावर्तवादं - BPC मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदस्य श्रवणे यत्नो, नित्यं कार्यो हितैषिणा। शृण्वन्नेव हि जानाति, पुण्यापुण्यं हिताहितम्॥१४३॥
श्रुत्वेदं रञ्जितो राजा, सम्यक्त्वं प्रतिपन्नवान्। लोकोऽपि च यथायोग्यं, प्रपन्नो धर्ममार्हतम्॥१४४॥
अथ कणसारः प्राह–
किमकारि मया पुण्यं, भगवन्! पूर्वजन्मनि। अक्षता अक्षता येन, सञ्जाता मम मन्दिरे॥१४५॥
कणसारवचः श्रुत्वा, मेघनादैः प्रजल्पितम्। भो श्रेष्ठिन्! शृणु सङ्क्षेपा-दक्षताक्षतकारणम्॥१४६॥
पाञ्चालेषु महाग्रामो, पामरैश्च कृतास्पदः। सुखनिः सर्वशस्यानां, सुसीमो जनविश्रुतः॥१४७॥
तस्मिन्नाजन्मदारिद्र्यो, निस्सहायो निरन्वयः। पामरः पिङ्गलो नाम, कुटीरककृताश्रयः॥१४८॥
कुकर्मकरणासक्तः, कुचेलः कष्टभोजनः। नित्यं परमुखप्रेक्षी। मुनिवत्कुक्षिसम्बलः॥४९॥
अन्यदा वेतने लब्ध्वा, शालितण्डुलसेतिकाम्। आनीय च घटे क्षिप्त्वा, घटद्वारं नियन्त्रितम्॥१५०॥
विक्रणीया मयाप्येषा, सविशेषप्रयोजने। गतोऽसौ जिनदत्तस्य, गृहे कर्मचिकीर्षया॥१५१॥
अग्रे कूरं समर्प्यायं, प्रेषितो जिनमन्दिरे। सत्पुष्पपूजितं शान्तं, सदाभरणभूषितम्॥१५२॥
दृष्टं श्रीशान्तिनाथस्य, बिम्बं जनमनोहरम्। तदग्रे विलिखन् दृष्टो, मङ्गलान्यष्ट तण्डुलैः॥१५३॥
अखण्डास्फुटितैः सारै-र्भक्तितो जिनदत्तकः। पृष्टश्च पिङ्गलेनैष, किमेतदिति कथ्यताम्॥१५४॥
कथितं ज्ञाततत्त्वोऽसौ, गृहादानीय तण्डुलान्। लिलेख मङ्गलान्यष्टौ, भूरिभावसमन्वितः॥१५५॥
अहो मे तण्डुला धन्या, यैरयं पूजितो जिनः। एवं विशुद्धभावेन, भावतश्चानुमोदिताः॥१५६॥
बद्धंपरभवायुष्कं, भोगसारं ततो गृहे। कदन्नाहारयोगेन, जाता गाढविसूचिका॥१५७॥
ततो मृत्वा समुत्पन्न-स्त्वं तारप्रभनन्दनः। महर्द्ध्या ते कृतं नाम, कणसार इति स्फुटम्॥१५८॥
जिनाग्रे तण्डुला दत्ता, भावतश्चानुमोदिताः। कणसार! कणास्तेन, तव वृद्धिमुपागताः॥१५९॥
श्रुत्वेदं कणसारेण, स्मृता जातिश्चिरन्तनी। भगवन्नपारसंसार-भयभीतस्त्वदन्तिके॥१६०॥
व्रतं च लातुमिच्छामि, यद्यस्ति मम योग्यता। व्रतादानमयोग्यानां, यतोऽनर्थाय वर्तते॥१६१॥
सूरिणाभाणि भो श्रेष्ठिन्, योग्यस्त्वं धर्मकर्मणाम्। अविघ्नं भवतो भूयात्, संयमाध्वनि गच्छतः॥१६२॥
सप्तक्षेत्र्यां धनं दत्त्वा, कृत्वा पूजां जिनालये। महीनाथमनुज्ञाप्य, बन्दिमोक्षं विधाय च॥१६३॥
धनसारं पदे कृत्वा, सुताराकुक्षिसम्भवम्। इष्टमित्रजनं सर्वं, सम्भाष्यादरपूर्वकम्॥१६४॥
दीनानाथजनं सर्व-मर्थिनं दुःस्थमानसम्। सुस्थं कृत्वा यथाशक्त्या, आहारादिप्रदानतः॥१६५॥
श्रेष्ठिनः कणसारस्य, काप्यपूर्वा महार्थता। स्ववित्तं कोटिशो दत्तं, स्फटाटोपो न दर्शितः॥१६६॥
गर्जित्वा बहुदूरमुन्नतिभृतो मुञ्चन्ति वार्यम्बुदा, भद्रस्यापि गजस्य दानसमये सम्भाव्यते दुर्मदः॥
पुष्पाडम्बरदर्शनेन ददति प्रायः फलानि द्रुमा, नोत्सेको न मदो न कालहरणं दानप्रवृत्तौ सताम्॥१६७॥
तृणवत्सर्वं परित्यज्य, बहिरन्तः परिग्रहम्। मेघनादान्तिके श्रेष्ठी, प्रपेदे सर्वसंयमम्॥१६८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यग्ज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं,
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः।
न प्राप्तानि पुरा न सम्प्रति पुनः प्राप्तुं दृढः प्रत्ययो,
वाञ्छामात्रपरिग्रहाण्यपि वयं त्यक्तुं न तानि क्षमाः ॥१६९॥

मासकल्पावसाने तु, जग्मुरन्यत्र सूरयः। कणसाराऽनगारोऽपि, जगाम गुरुभिः सह ॥१७०॥
क्षमादिब्रह्मपर्यन्तं, विधाय वरसंयमम्। अनशनादितपः: कृत्वा, पठित्वा च बहु श्रुतम् ॥१७१॥
संसारक्लेशनाशाय, विधायानशनं तथा। वैजयन्ते सुरो जातः, एकजन्मा महामुनिः ॥१७२॥
तद्भो ! अक्षतपूजाया-मक्षताक्षतवाञ्छया। यत्नः सदैव कर्तव्यो, लोकद्वयहितैषिणा ॥१७३॥

इत्यक्षतपूजाकथानकं परिसमाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फलपूजायां फलसारकथा

साम्प्रतं फलपूजाया, दृष्टान्तोऽयं प्रदर्श्यते । श्रूयतां सावधानेन, चेतसा पुण्यहेतवे ॥१॥
अस्तीह लोकविख्यातं, **सोपारा**भिधपत्तनम् । नानावृक्षसमाकीर्णं, रम्यारामविराजितम् ॥२॥
बभूवारामिकस्तत्र, **फलसारा**भिधानकः । सदापि सफलारम्भ-प्रभूतारामनायकः ॥३॥
अन्यदा च तदारामाः, सर्वे दुर्वातदोषतः । शुष्का अकाण्ड एवाशु, न यच्छन्तीप्सितं फलम् ॥४॥
फलाभावेन तस्यासी-द्दारिद्र्यमतिदारुणम् । ततोऽसौ सर्वलोकानां, जातः परिभवास्पदम् ॥५॥

यतः- **दौर्गत्यं देहिनां दुःखं, किमन्यैः कीर्तितैः पुनः ।**
इहैव येन जायन्ते, जीवन्तोपि मृता इव ॥६॥

दैन्यस्य पात्रतामेति, पराभूतेः परं पदम् । विपदामाश्रयः शश्वद्, दौर्गत्यकलुषीकृतः ॥७॥
नीचानपि हि सेवन्ते, पालयन्ति पशूनपि । समुद्रमपि लङ्घन्ते, दारिद्र्योपहता नराः ॥८॥
मूर्तं लाघवमेवैत-दपायानामिदं गृहम् । पर्यायो मरणस्यैष, दारिद्र्यं नाम यज्जनाः ॥९॥
लज्जन्ते बान्धवास्तेन, सम्बन्धं गोपयन्ति च । न भजन्ते यथा पूर्वं, यस्य स्तोकाः कपर्दिकाः ॥१०॥
परगेहे कदन्नानि, दत्तान्युच्चैरवज्ञया । प्रभुङ्क्ते चाश्रुमिश्राणि, दौर्गत्यात्किमतः परम् ॥११॥
धार्मिकोऽपि विनीतोऽपि, वृद्धो वा पूजितोऽपि वा । जनैर्दरिद्रः सावज्ञं, चाण्डाल इव दृश्यते ॥१२॥
शौचावशिष्टयाप्यस्ति, किञ्चित्कार्यं क्वचिन्मृदा । निर्धनेन नरेणेह, तावन्मात्रं न विद्यते ॥१३॥
दुरुत्तारो महापङ्कः, शल्यं दुःखदमुच्यते । दुर्लङ्घ्यमेतत्कान्तारं, यद्दरिद्रस्य जीवितम् ॥१४॥
स एव नरको घोर-स्तदेतद्व्यसनं महत् । सेयं कष्टा दशा पुंसां, दारिद्र्यं नाम यज्जनाः ॥१५॥
स्पष्टेऽपि वासरे सत्यं, दौर्गत्यतमसावृतः । अग्रतोऽपि स्थितो यत्ना-न्न केनापीह दृश्यते ॥१६॥
अतिसन्तिष्ठमानोऽपि, प्रमोदादीश्वरे जने । कार्याय कल्प्यते क्षुद्रै-र्धिग्दौर्गत्यमसङ्गतम् ॥१७॥
अन्यस्य विनयेनापि, दरिद्रो यदि तिष्ठति । अर्थित्वपक्षे तदपि, क्षिप्यते निखिलं खलैः ॥१८॥
एवं च फलसारोऽसौ, [1]दुर्गदारिद्र्यखेदितः । कष्टां दशां समापन्नः, कष्टं नयति वासरान् ॥१९॥
अन्यदा गृहिणी तस्य, पुष्पश्रीनामिका किल । रजन्यां पश्चिमे यामे, शयाना शयनीयके ॥२०॥
स्वप्नेऽपश्यन् निजारामान्, पल्लवितान् समन्ततः । चारुपुष्पफलोपेतान्, नयनानन्ददायकान् ॥२१॥
शिष्टः स्वप्नस्तया भर्तु-स्तेनाभाणि तव प्रिये ! । भविता सुन्दरः पुत्रः, समीहितफलप्रदः ॥२२॥
प्रतीच्छ्य वचनं भर्तु-र्निजस्थानं जगाम सा । गमितो रात्रिशेषश्च, धर्म्यया कथया तया ॥२३॥
फलसारोऽपि सानन्दो, दृष्टः स्वप्नो वरोऽनया । जल्पन्नेवं गतः प्रात-र्निजारामेषु सत्वरम् ॥२४॥
यावदालोकते सर्वान्, पुष्पितान् फलितांस्तथा । सर्वतः शाड्वलानुच्चैः, सिक्तानिवामृतप्लवैः ॥२५॥

---

१ दुर्गदारिद्र्यभूमितः- BPJ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽसौ चिन्तयामास, विस्मयाकुलचेतसा। अहो ! मे पुण्यविस्फूर्ति-रहो मे चलिता दशा॥२६॥
येनैते सर्वतो रम्याः, पुष्पिताः फलिता द्रुमाः। मन्ये जातं ममैश्वर्यं, दूरं नष्टा दरिद्रता॥२७॥
ततस्तेन समाकार्य, शीघ्रं कर्मकरान् बहून्। नालिकेरादिवृक्षेभ्यो, जग्रहे तत्फलोत्कराः॥२८॥
ततस्तानपि विक्रीय, लब्धं द्रव्यं यथेप्सितम्। क्रमेण जातमैश्वर्यं, लोकमध्ये च गौरवम्॥२९॥

यतः- **मंदरतुल्लावि नरा, अत्थविहूणा हवंति तिणतुल्ला।**
तिणतुल्लावि हु अत्थेण, परिगया मंदरसमाणा॥३०॥

यस्यार्थास्तस्य मित्राणि, यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके, यस्यार्था स च पण्डितः॥३१॥

जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छतात्, शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलो, येनैकेन विना गुणास्तृणलवप्रायाः समस्ता अमी॥
एवं चैश्वर्ययुक्तोसौ, फलसारः फलैः कृतः। मान्यते सर्वलोकेन, सर्वकार्येषु सादरम्॥३३॥
अथान्यदास्य गेहिन्याः, कुक्षौ पुष्पश्रियोऽजनि। गर्भस्ततश्च सा तुष्टा, तमुवाह यथासुखम्॥३४॥
भर्त्रा संपूरिताशेष-दोहदा समये च सा। प्रसूता सुन्दरं पुत्रं, सर्वलक्षणसंयुतम्॥३५॥
कारितं च ततः पित्रा, महोत्सवपुरस्सरम्। कृतबन्धुजनानन्दं, वर्धापनकमञ्जसा॥३६॥
स्वप्नानुसारतस्तस्य, पित्रा नाम प्रतिष्ठितम्। फलदेव इति ख्यातं, विभूत्या बन्धुभिः सह॥३७॥
यथा यथा गृहे तत्र, बालोऽसौ परिवर्धते। [तथा तथा तदारामे, फलवृद्धिरपीष्टदा]॥३८॥
एवं च वर्धमानोऽसौ:, वयसाऽऽप्तमनोरथः स्वीकृऽऽताशेषविद्यश्च, सम्प्राप्तो वरयौवनम्॥३९॥
ततश्च जनकेनैष, महर्द्धया परिणायितः। कन्यकां **वसुदत्तस्य, वसुश्रीरि**तिनामिकाम्॥४०॥
एवं च पूर्णसर्वेच्छो, भुङ्क्ते भोगांस्तया सह। प्रावीण्यं च परं बिभ्र-त्कलासु सकलास्वपि॥४१॥
अथान्यदा हृतस्तस्य, पिता हतकमृत्युना। कृतानि मृतकृत्यानि, विशोकश्चाऽजनि क्रमात्॥४२॥
बन्धुभिः स्थापितः प्रीत्या, फलदेवः पितुः पदे। सर्वं सर्वजनानिन्द्यं, व्यवहारं चकार सः॥४३॥
कीर्त्या रूपेण लक्ष्म्या च, सौजन्यादिगुणैस्तथा। शेषलोकैः समं तेन, व्यतिक्रान्तो निजः पिता॥४४॥
अन्यदा कारितास्तेन, पोताः पञ्च महालयाः। कृत्वा समग्रसामग्रीं, क्रमेण प्रगुणीकृताः॥४५॥
प्रधानभूरिभाण्डानां, पोताः पञ्चापि ते भृताः। प्रभूतदिनयोग्यं च, सङ्गृहीतं जलेन्धनम्॥४६॥
शोभने तिथिनक्षत्रे, समारूढस्ततः स्वयम्। दुर्योधयोधसङ्घातैः, सार्धं वणिक्सुतैश्च सः॥४७॥
ततश्च प्रेरिताः पोताः, सिंहलद्वीपसन्मुखम्। तूर्णं गन्तुं समारब्धा-स्तूर्यध्वानभृताम्बराः॥४८॥
उल्लङ्घ्य भूयसीं भूमिं, स्तोकैरपि दिनैर्जवात्। प्राप्ता मलयदेशस्य, सम्बन्धं चन्दनशोभितम्॥४९॥
दूरादेव ततो दृष्ट्वा, शोभितानि वनश्रिया। मलयाचलशृङ्गाणि, फलदेवोऽब्रवीदिदम्॥५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोऽयं भो दृश्यते शैल-स्तैरूचे मत्नयाभिधः । गच्छतामुं प्रपश्याम, एवमस्त्विति ते जगुः ॥५१॥
ततश्चोत्तीर्य पोतेभ्यो, गतास्तत्र सकौतुकः । युक्तः शौर्ययुतैर्योधैः, कैश्चिद्वणिक्सुतैस्तथा ॥५२॥
आलोक्य सर्वतः शैल-मुत्तीर्णाश्च ततो भुवि । [ते सर्वे हर्षिता बाढं, पश्यन्तिस्माभितस्ततः] ॥
यावदेकत्र पश्यन्ति, वरारामद्वयं महत् । शुष्कमेकं तयोर्बाढ-मेकमत्यन्तशाड्वलम् ॥५४॥
तयोर्मध्ये पुनर्दृष्टं, जीर्णं देवकुलद्वयम् । ततस्तत्रापि ते जग्मु-र्भ्राम्यन्ति स्म समन्ततः ॥५५॥
ततश्च फलदेवोऽसौ, शुष्कारामं प्रविष्टवान् । तस्मिन्देवकुले यत्तु, तस्य मध्ये जगाम सः ॥५६॥
तथा पश्यन् जिनेन्द्रस्य, बिम्बं सर्वाङ्गसुन्दरम् । विलोक्य च प्रहृष्टोऽसौ, मनस्येवं व्यचिन्तयत् ॥५७॥
अहो देवाधिदेवोऽयं, पूज्योऽयं सर्वदेहिनाम् । तदेनमहमप्यद्य, पूजयामीति तर्कयन् ॥५८॥
बहिर्देवकुलाद्याव-न्निष्क्रान्तः पुष्पहेतवे । तावद् दृष्टः स आरामः, सद्यः पल्लवितद्रुमः ॥५९॥
पुष्पितः फलितः सान्द्रः, साड्वलो घनसन्निभः ॥५९A॥
ततश्चादाय पुष्पाणि, पूजितः परमेश्वरः । गृहीत्वा फलपूगं च, तत्पुरो रचितो बलिः ॥६०॥
ततः प्रणम्य तं देवं, भक्त्या चिरं विलोक्य च । सम्प्राप्ताशेषकल्याण-मात्मानमिति कल्पयन् ॥६१॥
विनिर्गत्य स तत्स्थानाद्, द्वितीयाराममागतः । देवकुलं च तत्रस्थं, प्रविवेश स कौतुकी ॥६२॥
दृष्टा च तत्र यक्षस्य, प्रतिमातिमहोदरा । सुभोगा शुभसद्गन्धन्ध-पुष्पमालाभिरर्चिता ॥६३॥
ततोऽसौ चिन्तयामास, साश्चर्यो निजमानसे । अहो एकप्रदेशेऽपि, तथैकस्मिन्नृतावपि ॥६४॥
एकोऽयं शुष्कका रामो, द्वितीयस्त्वभिशाड्वलः । एको देवाधिदेवोऽयं, केनापीह न पूज्यते ॥६५॥
पूज्यतेऽसौ तथा नित्यं, तेनोच्चैर्विस्मयो मम । कारणेनात्र भो भाव्यं, ज्ञातव्यं तत्कथं मया ॥६६॥
यावदेवं स तत्रास्ते, विकल्पाकुलमानसः । तावत्पुरः स्थितामेकां, ददर्शासौ वरस्त्रियम् ॥६७॥
पृष्टा च सा यथा का त्वं ? कुतो वा कुत्र तिष्ठसि । सा प्राह देवताऽहं, वसामि वरकानने ॥६८॥
यक्षमेनं सदाकालं, सपूजं कुर्वती सती । रक्षन्ती च निजोद्यानं, नानावृक्षसमाकुलम् ॥६९॥
स प्राह शुष्कका रामे, योऽयं देवोऽवतिष्ठते । तं सपूजं किमित्यत्र, न करोषि निवेदय ॥७०॥
तथा शुष्कः स आरामो, भद्रे ! चायं तु शाड्वलः । ममैतत्कौतुकं भाति, यदि वेत्सि तदा वद ॥७१॥
तयोक्तं श्रूयतां भद्र !, सावधानेन चेतसा । आसीदत्र पुरं रम्यं, शङ्खावर्ताभिधं महत् ॥७२॥

बभूव तत्र विख्यातः, शङ्खचूडाभिधो नृपः ।
तद्भार्या वनमालाख्या, रूपसौभाग्यशालिनी ॥७३॥

पुत्रश्च वनमालायाः, शङ्खनामा तथाजनि । स पित्रा यौवनं प्राप्तो, यौवराजपदे कृतः ॥७४॥
छत्रचामरहस्त्याद्यं, तस्मै दत्तं महीभुजा । ततोऽसौ भुज्यते भोगान्, विलसन् राजलीलया ॥७५॥
इतश्च दक्षिणश्रेण्यां, वैताढ्येऽस्ति महापुरम् । रथावर्तं प्रभुस्तत्र, विद्याधरो मणिप्रभः ॥
तद्भार्या रत्नरेखाख्या । रत्नमाला च तत्सुता । सान्यदा शङ्खचूडेन, मद्भर्त्रा पर्यणीयत ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालेन गच्छता जाता, सा राज्ञोऽतीववल्लभा । अहं पुनरनिष्टेति, दुर्गदौर्भाग्ययोगतः ॥७८॥
किंबहुना तयाकारि, वशवर्ती नराधिपः । युक्तमयुक्तकं वापि, करोत्येव स तद्वचः ॥७९॥
अन्यदा च सुतस्तस्या, जातो रत्नप्रभाभिधः । क्रमेण यौवनं प्राप्तः, नारीजनमनोहरम् ॥८०॥
प्रधानराजपुत्रीश्च, महर्द्धया परिणीतवान् । बुभुजे कामजं सौख्यं, ताभिः सार्धं स सन्ततम् ॥८१॥
अन्यदा भणितो राजा, सादरं रत्नमालया । यथामुं मामकं पुत्रं, यौवराजपदे कुरु ॥८२॥
तेनापि तत्तथाचक्रे, सर्वं तद्वशवर्तिना । अतीव च पराभूतः, शङ्खनामा महीभुजा ॥८३॥
ततोऽसौ वनमालाया, अनाख्यायैव निर्गतः । दूरं देशान्तरं प्राप्तो, बम्भ्रमीति स्म भूतले ॥८४॥
तथेदं मन्दिरं जैनं, कारितं रत्नमालया । आरामश्चाभिरामोऽयं, नानावृक्षसमाकुलः ॥८५॥
वनमाला पुनश्चेदं, सुन्दरारामराजितम् । प्राकारवेष्टितं तुङ्गं, यक्षालयमचीकरत् ॥८६॥
वहन्ती रत्नमालासौ, वनमालां च मत्सरम् । व्याघातं यक्षपूजायाः, प्रचक्रे राजवर्चसा ॥८७॥
आदाय सर्वपुष्पाणि, सर्वारामोद्भवानि सा । कारयति सदा पूजां, स्वकीये जिनमन्दिरे ॥८८॥
तयाभिभूयते बाढं, वनमाला पदे पदे । [1]दूयते च दृढं चित्ते, ततः सैवमचिन्तयत् ॥८९॥
राजा च रत्नमाला च, कुर्वाते मे पराभवम् । न शक्ताहममुं सोढुं, तस्मादग्नौ विशाम्यहम् ॥९०॥
वहन्ती मत्सरं घोरं, तत सा दम्पतीं प्रति । अवज्ञाता च सा राज्ञा, प्रविवेश हुताशने ॥९१॥
मृत्वा च व्यन्तरी जाता, विज्ञाय ज्ञानतस्ततः । आगत्य रुष्टया तूर्णं, शङ्खचूडो निपातितः ॥९२॥
ससुता रत्नमाला च, शेषलोको बहुस्तथा । शङ्खावर्तं पुरं दग्धं, धनधान्यसमाकुलम् ॥९३॥
तथा सर्वोऽपि देशोऽयं, निर्दह्योद्वासितस्तया । शोषितश्चायमारामः, प्राकारश्चास्य पातितः ॥९४॥
देवकुलानि सर्वाणि, सम्भग्नान्यत्र कानने । अथेदं भङ्क्तुमारब्धा, मौलं देवकुलं च सा ॥९५॥
न शशाक परं भङ्क्तुं, प्रतिष्ठागुणगौरवात् । सा चाहं वनमालेति, व्यन्तरीत्वमुपागता ॥९६॥
श्रुत्वेदं फलदेवेन, जजल्पेऽमलया गिरा । यदहं वच्मि हे भद्रे !, त्वं कोपं तत्र मा कृथाः ॥९७॥
नेदं मे सङ्गतं भाति, भद्रे ! यच्चेष्टितं त्वया । निरागसोऽपि यल्लोका, एतावन्तो निपातिताः ॥९८॥
इदं च पुनरत्यन्त-मसङ्गततरन्तरम् । यदेव देवदेवोऽय-मपूज्यस्त्वयका कृतः ॥९९॥
धर्मार्थमेव यक्षोऽपि, पूज्यते च भवादृशैः । धर्मार्थिना च पूज्योऽसौ, यो देवस्त्रिजगत्प्रभुः ॥१००॥
त्रैलोक्यप्रभुता ताव-द्यक्षस्यास्य न विद्यते । तत्संसूचकलिङ्गानां, यच्छरीरेऽप्यदर्शनात् ॥१०१॥
अस्य तु देवदेवस्य, त्रैलोक्यप्रभुतां स्फुटम् । छत्रत्रयादिचिह्नानि, व्यञ्जयन्ति न संशयः ॥१०२॥
तथाहि-श्वेतछत्रत्रयं प्रेङ्ख-न्नानारत्नविराजितम् । शंसत् त्रैलोक्यनाथत्व-मस्योपरि विराजते ॥१०३॥
उभयपार्श्वयोश्चेमौ, सुरौ चामरधारिणौ । व्यक्तं देवोधिदेवत्वं, व्यञ्जयन्तौ विराजतः ॥१०४॥
सिंहासनं च सौवर्णं, भास्वद्रत्नौघमण्डितम् । अस्येह ख्यापयत्येव, त्रैलोक्यमहनीयताम् ॥१०५॥

---

१ दूयते- BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्भद्रे ! देवदेवोऽयं, सर्वामरनरार्चितः । पूजनीयो विशेषेण, किं शेषैः पूजितैः सुरैः ॥१०६॥
तदत्र मत्सरं मुक्त्वा, मुक्त्वा मिथ्याभिमानिताम् । जगद्धितमिमं देवं, सपूजं कुरु सर्वदा ॥१०७॥
सा प्राह सर्वमेवेदं, करिष्याम्येवमेव हि । नान्यथा जायते तत्तु, यच्चित्ते चिन्तितं त्वया ॥१०८॥
चिन्तानन्तरमेवाशु, येनारामः स शुष्ककः । त्वत्प्रभावेण सञ्जातः, सद्यः पुष्पफलाकुलः ॥१०९॥
तदिदं सर्वथा मुक्तं, वैरं पूर्वभवानुगम् । प्रतिपन्नश्च देवोऽयं, देवत्वेन मयाधुना ॥११०॥
अतस्त्वं मेऽधुना बन्धु-गौरव्यो गुरुसन्निभः । इदं गृहाण मत्तुष्टि-हेतवे रत्नपञ्चकम् ॥१११॥
तत्र यक्षगृहस्याग्रे, सद्वृक्षो यः प्रदृश्यते । सर्वरोगहरश्चायं, नामतः कर्मतस्तथा ॥११२॥
द्वितीयश्च तदासन्ने, दृश्यते यो महाद्रुमः । सर्वविषापहो नाम्ना, ख्यातोऽयं क्रियया तथा ॥११३॥
एतयोः पुष्पपत्राणि, फलानि च गृहाण भो ! । येन मे जायते तुष्टि-र्मा मोघां प्रार्थनां कृथाः ॥११४॥
तथेदं भो गृहाण त्व-मौषधीद्वयमुत्तमम् । एकां संरोहिणीनाम्नी, शल्योद्धारकरा परा ॥११५॥
अयं च गृह्यतां बन्धो !, हारः सौभाग्यसुन्दरः । दुर्भगस्यापि सौभाग्य-कारको मम तुष्टये ॥११६॥
ततश्च फलदेवोऽपि, लात्वा तद्रत्नपञ्चकम् । वनमालोपरोधेन, पूजयंस्तत्र तं जिनम् ॥११७॥
दिनानां पञ्चकं स्थित्वा, वनमालाविसर्जितः । अचलद्यानपात्रस्थः, स्वाभिप्रेतदिशं प्रति ॥११८॥
समुल्लङ्घ्य ततस्तूर्ण-मम्भोधेर्भूयसीं भुवम् । सुवर्णवालुकाख्याया, नद्या मुखमुपागतः ॥११९॥
ततो जलेन्धनाद्यर्थं, प्रेषिताः पुरुषा निजाः । गत्वा तेऽपि समायाता, जलाद्यादाय सत्वरम् ॥१२०॥
शिष्टं च फलदेवाय, यद् दृष्टं कौतुकं तकैः । यथास्माभिर्गतैस्तीरं, दृष्टैका वरकन्यका ॥१२१॥
वंशकुडङ्गमध्यस्था, यौवनारम्भवर्तिनी । सविषादा रुदन्ती च, भयसम्भ्रान्तलोचना ॥१२२॥
कुडङ्गान्नातिदूरेण, ददृशे पुरुषद्वयम् । पतितं भूतले शस्त्र-प्रहारशतसङ्कुलम् ॥१२३॥
अन्तःशल्यं समासन्न-मरणादतिदुःखितम् । श्रुत्वेदं फलदेवोऽपि, समुत्तीर्य द्रुतं ततः ॥१२४॥
आरुह्य द्रोणिकां लघ्वीं, कियद्भिः सुभटैः सह । गतस्तत्र क्षणादेव, दृष्टौ च पुरुषौ तकौ ॥१२५॥

शल्योद्धरणिकानाम्नी, [1]कृष्टा सा चौषधी ततः ।
दत्ता व्रणमुखेष्वाशु, ततः शल्यानि निर्ययुः ॥१२६॥

संरोहिणीप्रयोगेण, व्रणाः संरोहिताः क्षणात् । स्वस्थावस्थौ च तौ जातौ, पुमांसावौषधीगुणात् ॥१२७॥
पृष्टौ च फलदेवेन, यथा भोः ! किमु कारणम् । युवां यदत्र शस्त्रौघ-प्रहारशतजर्जरौ ? ॥१२८॥
गतौ च मरणावस्थां, पतितावत्र भूतले । ताभ्यामुक्तं महाभाग !, श्रूयतां तव कथ्यते ॥१२९॥
आवां हि भ्रातरौ विद्धि, द्वावपि च सहोदरौ । पुत्रौ च चन्द्रचूडस्य चन्द्रश्रीकुक्षिसम्भवौ ॥१३०॥
सुचन्द्रपूर्णचन्द्राख्यौ, बन्धूनामतिवल्लभौ । विद्याधरौ सदा प्रीत्या, वर्तावहे परस्परम् ॥१३१॥
अन्यदा पूर्णचन्द्रेण, भ्राम्यता धरणीतलम् । सिंहलद्वीपमध्यस्थे, पुरे सिंहपुराभिधे ॥१३२॥

१ शृष्टा-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहविक्रमभूपस्य, दुहिता रत्नसुन्दरी ।
दृष्टा ततश्च सर्वाङ्गं, विद्धः कामशिलीमुखैः ॥१३३॥
समाख्यातं ममागत्य, द्वावप्यावां ततो द्रुतम् । गत्वा सिंहपुरे तूर्णं, गृहीत्वा रत्नसुन्दरीम् ॥१३४॥
गगनवर्त्मना याव-दागच्छावस्ततो मम । नितान्तं रत्नसुन्दर्या, सौन्दर्येण हृतं मनः ॥१३५॥
उक्तो मया लघुर्भ्रीता, बालेयं मे भविष्यति । स प्राह न ददे तुभ्य-महमिमां विना प्रिये ॥१३६॥
तत सा लातुमारब्धा, तस्य हस्तान्मया बलात् । केशाकेशिं च कुर्वन्ता-ववतीर्णौ महीतले ॥१३७॥
मुक्त्वा वंशकुडङ्गान्तः, कन्यकां रत्नसुन्दरीम् । गजाविव मदोन्मत्तौ, लग्नौ योद्धुं परस्परम् ॥१३८॥
युद्ध्वा च विविधैः शस्त्रै-श्चिरमाबद्धमत्सरौ । ततो गाढप्रहारैश्च, पतितावत्र भूतले ॥१३९॥
प्राप्तौ च मरणावस्थां, त्वयोज्जीवापितौ पुनः । तस्मादत्राऽऽवयोः श्रीमां-स्त्वदन्यो नोपकारकः ॥
त्वं पिता त्वं परं मित्रं, त्वं चात्यन्तिकबान्धवः । अस्याश्च रत्नसुन्दर्याः, कारणेनावयोरिमा ॥१४१॥
सञ्जाता दारुणा व्याप-दन्योन्यं मरणान्तिका । तदेष स्वीयवृत्तान्त, आवाभ्यां कथितस्तव ॥१४२॥
साम्प्रतं त्वं स्वकीयं नौ, सङ्क्षेपेण निवेदय । स प्राह वयमायाताः सोपाराभिधपत्तनात् ॥१४३॥
गन्तारः सिंहलद्वीपं, वाणिज्येन धनेच्छया । ततः प्रोक्तं सुचन्द्रेण, यद्येवं गृह्यतामियम् ॥१४४॥
कन्या सिंहपुरे गत्वा, जनकस्य समर्पयेः । तथा गृहाण भो विद्या-मिमामाकाशगामिनीम् ॥१४५॥
येन नौ जायते तुष्टि-स्तेनापि च तथा कृतम् । अथ प्रणम्य तौ भक्त्या, विद्याधरौ गतौ ततः ॥१४६॥
फलदेवोऽपि सानन्दो, गृहीत्वा रत्नसुन्दरीम् । आयातस्तेषु पोतेषु, प्रवृत्तो गन्तुमुच्चकैः ॥१४७॥
अथ गच्छद्भिरेकत्र, वंशाग्रे ददृशे ध्वजः । किमेतदिति पप्रच्छ, फलदेवो निजान् जनान् ॥१४८॥
तैरवाचीदमत्रास्ते, भिन्नवाहनिको नरः । कश्चित्तेनेह बद्धोऽयं, वंशाग्रे दृश्यते ध्वजः ॥१४९॥
आत्मनो ज्ञापनाहेतो-रेवं सम्भावयामहे । श्रुत्वेदं प्रेषिता द्रोणी, स पुमानानीतः क्षणात् ॥१५०॥
आरोपितः स्वबोधिस्थे, दृष्टो रोगैरपि द्रुतः । तथाहि तत्तनौ दृष्टो, दाघज्वरो हि दारुणः ॥१५१॥
श्वासः कासो गलत्कुष्टः, शुष्ककण्डू शिरोव्यथा । अक्षिकुक्षिव्यथातीव्रा, दन्तपीडा जलोदरम् ॥१५२॥
ततश्च फलदेवेन, परोपकृतिबन्धुना । तस्य रोगहरस्याशु, पूर्वोद्दिष्टस्य शाखिनः ॥१५३॥
पूर्वात्तपुष्पपत्राणि, तस्मै दत्तानि सादरम् । ततोऽसौ प्रगुणो जातो, नीरोगः कनकच्छविः ॥१५४॥
पृष्टश्च फलदेवेन, कुतस्त्वं कुत्र यास्यसि । किमर्थं वा किमेकाकी, कथं वाऽजनि रोगवान् ? ॥१५५॥
किं कुलं किं च ते नाम ?, स प्राह श्रूयतामिति सिन्धुसौवीरदेशस्था-दहं वीतभयपत्तनात् ।
जगाम कलहद्वीपं, बोधिस्थो च धनेच्छया । राशिं महान्तमादाय, तथा स्वस्य सहायकम् ॥१५७॥
कृत्वा च शुभदत्ताख्यं, वणिक्पुत्रं च दुर्जनम् । विक्रीतानि च भाण्डानि, भूरिद्रव्यमुपार्जितम् ॥१५८॥
ततो भृत्वा निजं पोतं, चलिता स्वं पुरं प्रति । अर्धमार्गं समायाताः, स्तोकैरपि च वासरैः ॥१५९॥
ततोऽहं शुभदत्तेन, द्रव्यसंलुब्धचेतसा । क्षिप्तश्छलेन बोधिस्था-त्पतितोऽगाधवारिणि ॥१६०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्छलितः क्षणादेव, लब्धं फलकखण्डकम् । लग्नस्तत्र जले भ्राम्यन्, दैवयोगादिहागतः ॥१६१॥

अत्रत्याम्बुफलाहार-दोषाद्रोगैरभिद्रुतः ।

नाम्ना च शुभचन्द्रोऽहं, जिनचन्द्रश्च मत्पिता॥

सुश्रावकसमाचार-कारको धर्मकारकः । तदहो यत्त्वया पृष्टं, तदादिष्टं मयाखिलम् ॥१६३॥

अथोक्तं फलदेवेन, भो ! शुभचन्द्र कीदृश ?: । सुश्रावकसमाचारः, सङ्क्षेपान्मम कथ्यताम् ॥१६४॥

स प्राह श्रूयतां श्रेष्ठिन्, कर्णं दत्त्वा क्षणान्तरम् । श्रावको नात्ति मांसानि, न मद्यानि पिबत्यसौ ॥१६५॥

न च भुङ्क्ते रजन्यां तु, नाश्नाति मधुम्रक्षणे । एषां हि भक्षणे दोषा, भूयांसः कथिता जिनैः ॥१६६॥

धिग्मांसं यत्परप्राण-प्रणाशेन प्रजायते । को भक्षयेदिदं प्राज्ञो, यद्भुक्तं पातयेदधः ॥१६७॥

अहिंसा धर्मसर्वस्वं, कुतः सा मांसभक्षणे ? । अतः श्रावकलोकेन, मांसमाजन्मवर्जितम् ॥१६८॥

मद्यं सर्वप्रमादानां, प्रमादः प्रथमो मतः । प्रथमत्वे च को हेतुः ? ज्येष्ठं यत्पापकारणम् ॥१६९॥

किञ्च-वैरूप्यं व्याधिपिण्डः स्वजनपरिभवः कार्यकालातिपातो,

विद्वेषो ज्ञाननाशः स्मृतिमतिहरणं विप्रयोगश्च सद्भिः ।

पारुष्यं नीचसेवा कुलबलतुलना धर्मकामार्थहानिः

कष्टं वो षोडशैते निरुपचयकरा मद्यपानस्य दोषाः ॥१७०॥

मूलं सर्वविकाराणां, कारणं पापकर्मणाम् । हेतुर्वैरानुबन्धस्य, निवासो निखिलापदाम् ॥१७१॥

रागद्वेषादिदोषाणां, पोषणं गुणमोषणम् । शिष्टैर्निन्द्यं कथं नाम, मद्यं सुश्रावकः पिबेत् ॥१७२॥

आयुर्वर्षशतं लोके, तदर्धं स उपोषितः । करोति विरतिं धन्यो, यः सदा निशि भोजने ॥१७३॥

यतः- **मालिंति महियलं जामिणीए रयणीयरा सयं तेणं ।**

ते विट्टालंति फुडं रयणीए भुंजमाणे उ ॥१७४॥

मेहं पिपीलियाओ हणंति वमणं च मच्छिया कुणइ ।

जूया जलोयरत्तं, कोलिओ उ कोढरोगं च ॥१७५॥

वालो सरस्स भंगं कंटो लग्गइ गलंमि दारुं च ।

तालुंमि विंधइ अली, वंजणमज्झंमि भुंजंतो ॥१७६॥

जीवाणं कुंथुमाईण घायणं भाणधोयणाईसु ।

एमाइ रयणिभोयण-दोसा को साहिउं तरइ ॥१७७॥

तद्वर्णास्तद्रसा जीवा, सम्भवन्ति यतः किल । सर्वज्ञशासने तेन, दूषिते मधुम्रक्षणे ॥१७८॥

यत उक्तमागमे- **मज्जे महुंमि मंसे य, नवणीयम्मि चउत्थए ।**

उप्पज्जंति असंखा तव्वन्ना तत्थ जंतुणो ॥१७९॥

तथा श्रावकलोकस्य; देवः सर्वज्ञ एव हि । धर्मस्तु तत्प्रणीतो यः, स त्वहिंसादिलक्षणः ॥१८०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतशीलतपोयुक्ता, गुरवस्तु सुसाधवः । तथा सुश्रावका नैव, हिंसन्ति स्थूलदेहिनः ॥१८१॥
स्थूलालीकं न जल्पन्ति, स्थूलादत्तं न गृह्णते । परदारान्न गच्छन्ति, परिगृह्णन्ति नामितम् ॥१८२॥
कुर्वन्ति दिक्षु सर्वासु, प्रमाणं गमनाश्रितम् । कुर्वन्ति शक्तितो मान-मपि भोगोपभोगयो ॥१८३॥
त्यजन्त्यनर्थदण्डं च, मनोवाक्कायजं सदा । समस्तव्रतसङ्क्षेपं, कुर्वन्ति प्रतिवासरम् ॥१८४॥
सावद्येतरयोगानां, त्यागसेवनरूपकम् । सामायिकव्रतं चैवं, यथाशक्त्या प्रकुर्वते ॥१८५॥
आहारदेहसत्कारा- ऽब्रह्मव्यापारवर्जनात् । कुर्वन्ति पौषधं चैव, विशुद्धं धर्मपोषकम् ॥१८६॥
वराहारादिदानं च, निजन्यायार्जितं तथा । यच्छन्ति साधुलोकाय, कर्मक्षयार्थमञ्जसा ॥१८७॥
जैने गृहे च बिम्बे च, सिद्धान्ते संङ्घ एव च । व्ययन्ति च यथाशक्त्या, न्यायोपात्तं निजं धनम् ॥१८८॥
तथा साधर्मिलोकानां, वात्सल्यं भक्तियोगतः । प्रकुर्वन्ति यथायोगं, यथाकालं यथाबलम् ॥१८९॥
क्रियते च सदा श्राद्धै-स्त्रिसन्ध्यं जिनपूजनम् । सदा सद्गुरुसेवा च, भक्त्या जैनवचः श्रुतिः ॥१९०॥
दानं दीनादिलोकेभ्यो, विधिवद्गुरुपूजनम् । लोकागमविरुद्धानां, दूरतः परिवर्जनम् ॥१९१॥
अशिष्टसङ्गतित्यागः, शिष्टैश्च सह सङ्गतिः । मोक्षसौख्याभिलाषश्च, संसारभयभीरुता ॥१९२॥
इन्द्रियाणां जयः शक्त्या, कषायाणां च निग्रहः । सत्यं शीलं च शौचं च, दाक्षिण्यं च दयालुता ॥१९३॥
तथेङ्गालवनादीनां, बहुसावद्यकर्मणाम् । बहुलोकविरुद्धानां, शक्तितः परिवर्जनम् ॥१९४॥
परपीडापरित्यागः, परावर्णाप्रभाषणम् । परोपकारकारित्वं, परद्रव्येष्वलोभता ॥१९५॥
मैत्री सर्वेषु सत्त्वेषु, माध्यस्थ्यं निर्गुणे जने । कृपा सङ्क्लिश्यमानेषु, तुष्टिः सद्गुणधारिषु ॥१९६॥
माननं मान्यलोकस्य, पूज्यलोकस्य पूजनम् । सर्वशिष्टजनानिन्द्य-व्यवहारेषु वर्तनम् ॥१९७॥
इत्यनेकगुणग्रामः, सुश्रावकजनोचितः । नाख्यातुं शक्यते सर्वो, भो श्रेष्ठिन् मादृशैर्जनैः ॥१९८॥
लेशतश्च मयाख्यातो, यथामति तवाग्रतः । विस्तरेण समाख्यान्ति, साधवो हि बहुश्रुताः ॥१९९॥
तदेष श्रावको धर्मः, सर्वः सर्वज्ञभाषितः । शुद्धसम्यक्त्वसंयुक्तः, पञ्चाणुव्रतसंयुतः ॥२००॥
सप्तशिक्षापदोपेतो, नानाभिग्रहशोभितः । सद्गतिपूरसन्मार्गो, दुर्गतिद्वाररोधकः ॥२०१॥
पारम्पर्येण जीवानां, मोक्षस्यापि हि साधकः । मयापि श्राद्धधर्मोऽयं, सर्वकल्याणकारकः ॥२०२॥
सद्भावतो विधानेन, गृहीतो गुरुसन्निधौ । अथानन्दितचित्तेन, फलदेवेन जल्पितम् ॥२०३॥
सुन्दरः सुन्दरो धर्मः, साधु साधूदितं त्वया । ममापि त्वं ह्यमुं धर्मं, देहित्वमेव मे गुरुः ॥२०४॥
आख्याय देवतत्त्वादि, तेनापि च तथा कृतम् । ततश्च फलदेवस्य, धर्मप्राप्तिवशादलम् ॥२०५॥
सञ्जातः परमानन्द-स्ततश्चिन्तितवानिदम् । धन्योऽहं कृतपुण्योऽहं, दृष्टोऽहं त्रिजगच्छ्रिया ॥२०६॥
यतोऽयं सुन्दरो धर्मो, लब्धो लब्धिमता मया । स एव शुभचन्द्रो मे, सद्बन्धुर्बन्धुरो गुरुः ॥२०७॥
यत्सङ्गेनाद्य जातोऽहं, सर्वकल्याणभाजनम् । अथोक्तं शुभचन्द्रेण, फलदेवाधुना भवान् ॥२०८॥
आचष्टां निजवृत्तान्तं, येन मे जायते धृतिः । मूलादेव समाख्यात-स्तस्मै तेनापि सोऽखिलः ॥२०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽपि तस्य समाकर्ण्य, मुमुदे निजमानसे । एवं च धर्मसम्बन्ध-विचारं कुर्वतोस्तयोः ॥२१०॥
वहन्तस्ते महापोताः समुल्लङ्घ्य पयोनिधिम् । सम्प्राप्ता रत्नगम्भीरं, पुरं पौरजनाकुलम् ॥२११॥
ततो नङ्गरितास्तत्र, वेलाकूले जनाकुले । ततोऽवतीर्य पोतेभ्यः, फलदेवो नयान्वितः ॥२१२॥
प्रधानवणिग्भिः सार्धं, गृहीत्वा प्राभृतं महत् । गतो राजकुले शीघ्रं, दृष्टो राजा ननाम तम् ॥२१३॥
अर्पितं प्राभृतं पश्चा-न्निषण्णो दर्शितासने । पृष्टा वार्ता नरेन्द्रेण, प्रोक्ता तेनापि मूलतः ॥२१४॥
ततस्तद्दर्शनेनैव, राज्ञा रञ्जितचेतसा । सन्मानं सादरं तस्य, प्रासादा दर्शिता वरा ॥२१५॥
ततश्च पातितं शुल्कं, विक्रीतं च क्रयाणकम् । आसादितो महान् लाभो, जाता चित्तस्य निर्वृतिः ॥
गृहीतं प्रतिभाण्डं च, सर्वं च प्रगुणीकृतम् । अन्यदा फलदेवस्तां, गृहीत्वा रत्नसुन्दरीम् ॥२१७॥
कृत्वा प्रधानसामग्रीं, चेले सिंहपुरं प्रति । [प्रेरितो वर्यशकुनैः, परिवारसमन्वितः] ॥२१८॥
गच्छता च पुमानेकः, परं खेदमुपेयिवान् । दृष्टःप्रदेश एकस्मिन्, महादारिद्र्यपीडितः ॥२१९॥
पृष्टश्च फलदेवेन, गत्वा कोमलया गिरा । किमित्येवं महासत्त्व !, सखेद इव लक्ष्यसे ? ॥२२०॥
स प्राह नोचितं वक्तुं, निजखेदस्य कारणम् । तथापि तव मूर्त्यैव, रञ्जितः कथयाम्यहम् ॥२२१॥
इदं हि वसुधासारं, महाभाग ! महापुरम् । अत्राभून्मे **सुचित्ताख्यः** पितामहपिता मम ॥२२२॥
तेनार्जिता महारम्भैः, सप्त स्वर्णस्य कोटयः । निखाताश्च महालोभा-देकान्ते निजवेश्मनि ॥२२३॥
अन्यदा मूर्च्छितस्तत्र, मृतोऽसौ दैवयोगतः । तत्पदे च कृतो लोकै-स्तत्पुत्रः **सुधनाभिधः** ॥२२४॥
अन्यदा सीदता तेन, समुत्खातुं प्रचक्रमे । निधानं तदहो पैत्र्यं, यावत्तस्माद्विनिर्गतः ॥२२५॥
दुष्टो दृष्टिविषः सर्प-स्तेनालोकि महारुषा । सुधनो भस्मतां नीत-स्तत्पदेऽजनि तत्सुतः ॥२२६॥
सुचित्तो नाम सोऽप्येवं, प्रापितो भस्मपुञ्जताम् । पदे तस्यानुजातोऽहं, दूरं दारिद्र्यपीडितः ॥२२७॥
[निधानस्थं च नूनं त-द्दारिद्र्यविनिवारकम् ।] द्रव्यं लातुं न शक्नोमि, तेनाऽहं खेदवानिति ॥२२८॥
श्रुत्वेदं फलदेवेन निजचित्ते विचिन्तितम् । मन्ये सुचित्त एवायं, मृत्वाजनि भुजङ्गमः ॥२२९॥
तेनेदं मूर्च्छितेनौच्चै-र्निधानकमधिष्ठितम् । तदिदं रक्षता तेन, प्रत्यक्षेणेव मृत्युना ॥२३०॥
स्वपुत्रः पुत्रपुत्रश्च, नीतौ द्वावपि पञ्चताम् । विचिन्त्यैवं ततस्तेन, स पुमान् भणितो यथा ॥२३१॥
दर्शयस्व निधानं मे, [1]येनोत्खात्य तवार्प्यते । स प्राह मम नो कार्यं, तेन भो ! मूर्तमृत्युना ॥२३१॥
जीव नन्द चिरं कालं, भुङ्क्ष्वेमां निजसम्पदम् । सप्रोक्तः फलदेवेन, मा भैषीर्दर्शयस्व मे ॥२३२॥
उत्तिष्ठ येन तद्द्रव्य-मुत्खात्याहं ददामि ते । प्रतिपन्नं च तत्तेन, नीतश्च निजमन्दिरे ॥२३३॥
दर्शितं च तकं तस्मै, तेनापि च ततो द्रुतम् । गृहीत्वा फलपत्राणि, तस्य विषघ्नशाखिनः ॥२३४॥
कृत्वा चूर्णमतिश्लक्ष्णं, बद्धो मुष्टिस्ततो जवात् । उद्घाटितं निधानं त-न्निष्क्रान्तः स भुजङ्गमः ॥२३५॥
आच्छोटितश्च चूर्णेन, भुजङ्गो ऽजनि निर्विषः । उक्तश्च फलदेवेन, मुञ्च मुञ्चाधुना रुषम् ॥२३६॥

१ येनोत्खातुं तवाऽर्प्यन्ते-BJC । येनोत्खात्य तवार्पये-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा कार्षीर्निजगोत्रस्य, क्षयं भो भो महोरग ! । तवैवेदं गृहं भोगिं-स्तवैते पुत्रपौत्रकाः ॥२३७॥
तवैवायं निजो लोकः, किमेवं खिद्यते भवान्। आकर्ण्येदं भुजङ्गोऽपि, जातो जातिस्मरः क्षणात् ॥२३८॥
तस्यैव पादमूलान्तः, संलीनः संवृतेक्षणः । ततस्तस्मै पयो दत्तं, न चासौ पातुमिच्छति ॥२३९॥
शुभचन्द्रस्ततः प्राह, सर्पोऽयं भोक्ष्यते न हि । मन्ये जातिस्मरो जातो, गृहीतानशनस्तथा ॥२४०॥
तद्भोः पञ्चनमस्कारो, दीयतेऽस्मै महाहये । तथैव दातुमारब्धो, नमस्कारं स्फुटाक्षरम् ॥२४१॥
सर्वज्ञभाषितो धर्मः, प्रोक्तस्तस्य सविस्तरः । ततः शृण्वन्नमस्कारं, जीवित्वा दिनपञ्चकम् ॥२४२॥
मृत्वा समाधिना जातो, दिवि देवो महर्धिकः । [नमस्कारप्रभावेण, धर्मध्यानपरायणः] ॥२४३॥
तत्र सुचित्तपुत्रेण, तकं स्वर्णनिधानकम् । उत्खन्य पुञ्जितं सर्वं, जनाध्यक्षं गृहाङ्गणे ॥२४४॥
फलदेवस्ततः प्रोक्त-स्तेनैवं हृष्टचेतसा । गृह्यतां गृह्यतां स्वामिं-स्तवैवैतत्सुवर्णकम् ॥२४५॥
तथा भो भगिनी येयं, मामकी धनसुन्दरी । श्रेष्ठिन् ! परिणयस्वेमां, मत्तुष्टिं कुरु सर्वथा ॥२४६॥
फलदेवस्तत आह, स्थाने कुरु सुवर्णकम् । तवैवेदं महाभाग !, संवृणु वृणु सत्वरम् ॥२४७॥
मा कार्षीरुपरोधं नः, सर्वथा कुरु मे वचः ।-ततस्तत्संवृतं तेन, यथायोगं निजोचितम् ॥२४८॥
लब्धश्च फलदेवेन, साधुवादो जनेऽधिकः । श्लाघितोऽस्य गुणग्रामो, लोकै रञ्जितमानसैः ॥२४९॥
श्रेष्ठिना बन्धुयुक्तेन, भण्यमानश्च सादरम् । परिणिन्यै परद्धर्चासौ, कन्यां तां धनसुन्दरीम् ॥२५०॥
कतिचिद्दिनानि तत्रैव, तया सार्धं प्रमोदतः । स्थित्वा सम्प्रस्थितो भूयः, पुरं सिंहपुरं प्रति ॥२५१॥
क्रमशस्तत्र सम्प्राप्तो, गृहीत्वा रत्नसुन्दरीम् । प्राभृतं च वरं लात्वा, गतोऽसौ राजमन्दिरे ॥२५२॥
दृष्टो राजा ततस्तस्मै, चार्पिता रत्नसुन्दरी । वरप्राभृतसंयुक्ता, ततस्तुष्टेन भूभुजा ॥२५३॥
पृष्टश्च कुत्र भो लब्धा, मत्पुत्री रत्नसुन्दरी ? । तेनाप्यामूलतः सर्वो, वृत्तान्तोऽस्मै निवेदितः ॥२५४॥
ततश्च सादरं राज्ञा, स्नापितो भोजितस्तथा । सन्मानितश्च वस्त्राद्यैः, फलदेवः सगौरवम् ॥२५५॥
तद्रूपादिगुणग्रामै, राजा रञ्जितमानसः । तस्मा एव ददौ प्रीत्या, कन्यां तां रत्नसुन्दरीम् ॥२५६॥
शुभे च तिथिनक्षत्रे, महामहपुरस्सरम् । वृत्तं चातिप्रमोदेन, पाणिग्रहणमङ्गलम् ॥२५७॥
दत्तं च भूभुजा तस्मै, वरप्रासादसंयुतम् । हस्त्यश्वस्वर्णरत्नादि-भूरिदानमनेकधा ॥२५८॥
एवं भार्याद्वयोपेतो, भुञ्जानः कामजं सुखम् । मासमेकं स्थितस्तत्र, श्लाघ्यमानो जनैरलम् ॥२५९॥
ततो मुत्कलितः कष्टा-द्राज्ञा सन्मानपूर्वकम् । हस्त्यश्वरथपादाति-सत्सामग्र्या चचाल सः ॥२६०॥
आगच्छच्च सुधासारे, नगरे दिनपञ्चकम् । स्थित्वा कृत्वा महानन्दम्, श्वशुरस्य ततोऽपि च ॥२६१॥
सम्प्रस्थितः स्वसामग्र्या, रत्नगम्भीरमागतः । सिंहविक्रमसम्बन्धि-हस्त्याद्यं विससर्ज सः ॥२६२॥
आरोप्य निजपोतेषु, स्वर्णरत्नादिकं धनम् । ततः स्वयं समारूढो, हेलया सपरिच्छदः ॥२६३॥
ततश्च प्रेरिताः पोताः, प्रवृत्ता गन्तुमुच्चकैः । प्राप्ता मलयदेशान्तं, तत्र स्थाने धृतास्ततः ॥२६४॥
फलदेवः समुत्तीर्णः, सत्वरं सपरिच्छदः । गत्वा तत्र पुरा दृष्ट-काननस्थजिनालये ॥२६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टः श्रीमज्जिनाधीशः, पूजितो वन्दितस्तथा । कारिता च वरा यात्रा, प्रबन्धेन दिनाष्टकम् ॥२६६॥
तृतीये च दिने तत्र, वनमाला समागता । पृष्टा च फलदेवेन, किं चिरादत्र दृश्यसे ? ॥२६७॥
तयाभाणि गताहं भो, द्वीपे नन्दीश्वराभिधे । तत्र सन्ति समुत्तुङ्गा, द्वापञ्चाशज्जिनालयाः ॥२६८॥
तत्राशेषसुराधीशै-रष्टाह्निकामहोत्सवः । चक्रे जैनेन्द्रबिम्बानां, गताहं तद्दिदृक्षया ॥२६९॥
युष्मानिह समायातान्, विलोक्येह समागता । फलदेवस्ततः प्राह, कौतुकाकुलमानसः ॥२७०॥
यदि भो ! गम्यते तत्र, दृश्यन्ते ते जिनालयाः । वन्द्यन्ते जिनबिम्बानि, सुन्दरं जायते तदा ॥२७१॥
वनमाला ततः प्राह, गम्यतां भो नयाम्यहम् । पूरयामि तवाभीष्टं, धर्मबन्धो ! यथा तथा ॥२७२॥
स प्राह स्वयमेवाहं, गगने गन्तुमीश्वरः । अयं तु त्वयका नेयः, शुभचन्द्रः सुहृन्मम ॥२७३॥
अथोक्तं रत्नसुन्दर्या, नयस्व प्रिय ! मामपि । कथं नयामि तत्रेमां, यावच्चिन्तापरोऽभवत् ॥२७४॥
तावत्पश्यति तं सर्प-जीवदेवं पुरः स्थितम् । देवः प्राह भवानद्य, परिजानाति मां न वा ? ॥२७५॥
तेनोक्तं परिजानामि, सामान्येनामरो भवान् । नो विशेषेण स प्राह, तर्हि ते कथयाम्यहम् ॥२७६॥
स एव सर्पजीवोऽहं, यस्त्वया प्रतिबोधितः । मृत्वा जातः सुरः कल्पे, ब्रह्मलोकाभिधानके ॥
अवधिज्ञानतो ज्ञात्वा, समायातस्तवान्तिके । तद् ब्रूहि यत्तवाभीष्टं, येन सम्पादयाम्यहम् ॥२७८॥
फलदेवस्ततः प्राह, द्वीपे नन्दीश्वराभिधे । चैत्यानां वन्दनार्थं तु, गन्तुमिच्छामि साम्प्रतम् ॥२७९॥
तेनापि सुन्दरं चैत-देवमुक्त्वा विकुर्वितम् । विमानं सुन्दराकारं, विस्तीर्णं सुमनोहरम् ॥२८०॥
फलदेवस्ततस्तस्मि-न्नारोप्य सपरिच्छदः । नीतो नन्दीश्वरे द्वीपे, दर्शिताश्च जिनालयाः ॥२८१॥
ततश्च तेन चैत्यानि, वन्दितान्यखिलान्यपि । जातश्चित्ते महानन्दः, कृतार्थं स्वं ह्यमन्यत ॥२८२॥
आनीतश्च ततः शीघ्रं, तस्मिन्नेव जिनालये । तत्रापि च कृता पूजा, सर्वैरपि विशेषतः ॥२८३॥
भूयोऽप्यवाचि देवेन, फलदेवः कृतादरम् । साम्प्रतं किमु ते कार्यं, ब्रूहि येन प्रसाध्यते ? ॥२८४॥
स प्राह नास्ति मे कार्यं, कार्यं किञ्चिदतःपरम् । पूरितं मे मनोऽभीष्टं, निजस्थानमलङ्कुरु ॥२८५॥
गतो देवस्ततस्तेन, वनमाला प्रजल्पिता । त्वया भद्रे ! तथा कार्यं, यथैतज्जिनमन्दिरम् ॥२८६॥
विशेषतः सदाकालं, सपूजं जायतेतराम् । तयापि तद्वचस्तोषा-त्तथेति प्रत्यपद्यत ॥२८७॥
एवं च तत्र चैत्यानि, द्वीपे नन्दीश्वरे तथा । वन्दित्वा पूजयित्वा च, प्रमोदातिशयं दधन् ॥२८८॥
आगत्य च निजान् पोता-नारूढः सपरिच्छदः । ततस्ते प्रेरिताः पोताः, प्रवृत्ता गन्तुमञ्जसा ॥२८९॥
लङ्घयित्वा नदीनाथं, स्तोककैरेव वासरैः । सम्प्राप्तश्च निजे स्थाने, सोपाराभिधपत्तने ॥२९०॥
नङ्गरिताश्च ते शीघ्रं, तीरमानीय धीवरैः । वर्धापितो जनै राजा, पोतागमनिवेदनात् ॥२९१॥
तत्रैवासौ समायातो, भूरिपौरजनैः सह । [परिवारयुतो वेगा-दतीव प्रमदाकुलः] ॥२९२॥
ततश्च फलदेवोऽपि, पोतादुत्तीर्य सत्वरम् । प्रतिपत्तिं यथायोगं, राजादीनां चकार सः ॥२९३॥
ततः समं नरेन्द्रेण, पौरैर्बन्धुजनैस्तथा । गीयमानगुणग्रामो, बन्दिवृन्दैर्मुहुर्मुहुः ॥२९४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीनानाथादिलोकेभ्यो, ददद्दानं यथेप्सितम् । वाद्यमानैर्वरैस्तूर्यै-र्नृत्यद्भिः स्त्रीजनोत्करैः ॥२९५॥
एवमादिप्रमोदेन, निजमन्दिरमागतः । सन्मान्य च यथायोगं, पौरलोको विसर्जितः ॥२९६॥
उत्तारितं च पोतेभ्यो, भाण्डं शुल्कं च पातितम्। विक्रीतं च यथामूल्यं, लब्धो लाभो यथेप्सितः ॥२९७॥
सन्तोषितो निजो लोको, दत्त्वा वित्तं यथोचितम् । सन्मानितो बृहल्लोकः, सद्वस्त्रादिप्रदानतः ॥२९८॥
यथालाभं निजं वित्तं, धर्मस्थाने नियोजितम् । यदन्यदपि कर्तव्यं, तत्कृतं सर्वमञ्जसा ॥२९९॥
भुञ्जानश्च सपत्नीको, कामभोगाननुत्तरान् । विदधद्धर्मकार्याणि, कालं नयति नीतिमान् ॥३००॥
तथास्य सम्पदं दृष्ट्वा, रञ्जिताः सज्जना जनाः । दूमिता दुर्जना लोकाः आननन्दुः स्वबान्धवाः ॥३०१॥
अन्यदा शुभचन्द्रोऽसौ, फलदेवं प्रभाषते । भो भ्रातर्गन्तुमिच्छामि, साम्प्रतं स्वपुरं प्रति ॥३०२॥
किञ्चात्र साधवः श्रेष्ठिन्न सन्त्यागमवेदिनः । न च साधर्मिका लोका, नापि तादृग्जिनालयाः ॥३०३॥
तद्भो ! मदुपरोधेन, तत्रायातु भवानपि । वीक्षतां जिनवेश्मानि, वन्दतां मुनिपुङ्गवान् ॥३०४॥
शृणोतु शुद्धसिद्धान्तं, सिद्धिसम्बन्धसाधकम् । वीक्षतां धर्मसन्निष्ठं, जनं साधर्मिकं तथा ॥३०५॥
एवमस्त्विति सञ्जल्प्य, फलदेवेन सत्वरम् । भूरिद्रविणसम्पूर्णो, बोहित्थः प्रगुणीकृतः ॥३०६॥
ततस्तत्र सपत्नीकः, शुभचन्द्रसमन्वितः । समारुह्य गतः शीघ्रं, पुरे वीतभयाभिधे ॥३०७॥
ततश्च शुभचन्द्रस्य, बन्धुवर्गोऽखिलोऽपि हि । तस्यैं सन्मुखमायातो, बहुः पौरजनस्तथा ॥३०८॥
महर्द्धिपूर्वकं प्रीत्या, पुरमध्ये प्रवेशितः । नीतश्च निजे गेहे, कृतं कृत्यं यथोचितम् ॥३०९॥
ततश्च कृतशृङ्गारः, सह साधर्मिकैर्जनैः । पूजोपकरणं लात्वा, जगाम जिनमन्दिरे ॥३१०॥
दृष्टानि जिनबिम्बानि, पूजितानि विधानतः । वन्दितानि स्तुतिस्तोत्रै-स्ततः स्वावासमागतः ॥३११॥
पित्रा च शुभचन्द्रस्य, भोजितश्च सगौरवम् । सन्मानितश्च वस्त्राद्यैः, सानन्दं सपरिच्छदः ॥३१२॥
एवं च शुभचन्द्रस्य, समग्रैरपि बन्धुभिः । सन्मानितो यथाशक्त्या, फलदेवः कृतादरः ॥३१३॥
ततश्च शुभचन्द्रेण, बन्धूनामग्रतो मुदा । मूलादारभ्य सर्वोऽपि, वृत्तान्तः कथितो निजः ॥३१४॥
ततस्तैर्भूपतेः सर्वं, शिष्टं तेनापि सत्वरम् । स आहूतो वणिक्पुत्रो, दूरमारुष्टचेतसा ॥३१५॥
शुभचन्द्रो जले तेन, क्षिप्तो द्रव्याभिलाषिणा । शुभचन्द्राय तद्द्रव्यं, तं निगृह्यप्रदापितम् ॥३१६॥
ततश्च फलदेवेन, सानन्दं तत्र तिष्ठता । वन्दितानि समग्राणि, चैत्यानि विधिपूर्वकम् ॥३१७॥
कारिताश्च महायात्राः, सर्वेषु जिनवेश्मसु । सद्वस्त्रपात्रभक्ताद्यैः, साधवः प्रतिलाभिताः ॥३१८॥
पूजितश्च सुवस्त्राद्यैः, सर्वः साधर्मिको जनः । दीनानाथादिलोकेभ्यो, दत्तं दानं यथेच्छया ॥३१९॥
एवं च कुर्वता तेन, कृता तीर्थप्रभावना । तत्रत्यसर्वलोकस्य, रञ्जितं नितरां मनः ॥३२०॥
एवं तिष्ठन्नसौ तत्र, स्वकीयगुणसम्पदा । सर्वस्यापि हि लोकस्य, प्रमोदमकरोदिति ॥३२१॥
स्थित्वा च तत्र सानन्दः, कतिपयान्यहान्यसौ । शुभचन्द्रं समापृच्छ्य, स्वकीयं पुरमागतः ॥३२२॥
तत्र सम्पादयन् प्रीतिं, लोकानां निजकैर्गुणैः । भुङ्क्ते भोगान् सपत्नीकः, पूर्णाखिलमनोरथः ॥३२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालेन गच्छता तस्य, जाताः पुत्रा मनोरमाः । सर्वलक्षणसम्पूर्णाः, कलाकौशलशालिनः ॥३२४॥
अन्यदा फलदेवस्तं, हारं सौभाग्यसुन्दरम् । परिधाय निजे कण्ठे, एकाक्येव सकौतुकः ॥३२५॥
निष्क्रान्तश्च ततः स्थानां-द्भूमण्डलदिदृक्षया । बभ्राम व्योममार्गेण, ग्रामे ग्रामे पुरे पुरे ॥३२६॥
हारानुभावजोदग्र-सौभाग्यगुणयोगतः । सर्वत्र सर्वलोकस्य, प्रीतिस्थानमभूदसौ ॥३२७॥
यत्र यत्र पुरे ग्रामे, यात्यसौ तत्र तत्र हि । जायते तन्मना लोकः, स्त्रीलोकस्तु विशेषतः ॥३२८॥
भ्राम्यन्नेवं महीपीठे, वीक्षमाणो जिनालयान् । पूजयन् वन्दमानश्च, जिनबिम्बानि भावतः ॥३२९॥
अन्यदा च जगामैष, पुरं भोगपुराभिधम् । तस्मिन्नालोकयामास, सूरिं सूरप्रभाभिधम् ॥३३०॥
कानने सुन्दरामोदे, बहुशिष्यसमन्वितम् । आचक्षाणं जिनप्रोक्तं, धर्मं संविग्नपर्षदि ॥३३१॥
ततोऽतिभक्तिसंयुक्तः, समायातस्तदन्तिकम् । वन्दित्वा विधिवत्सूरिं, निषण्णः शुद्धभूतले ॥३३२॥
ततस्तं सूरिभिः किञ्चि-त्सम्भाष्य च यथोचितम् । भूयोऽपि [च] समारब्धा, देशना भवनाशिनी ॥
यथा जीवाः प्रबध्यन्ते, मुच्यन्ते कर्मभिस्तथा । सङ्क्लिश्यन्ते यथा चैते, नरकं यान्ति यथा तथा ॥३३४॥
रागद्वेषप्रबद्धानां, विपाकोऽतीव दारुणः । कष्टेन वेद्यते जीवै-र्दुर्गतौ दुष्टकर्मणाम् ॥३३५॥
गम्यन्ते कर्मणा येन, नरकास्तत्र वेदनाः । यादृश्यो यद्विपाकेन, वेद्यन्ते पापकर्मभिः ॥३३६॥
छेदनभेदनकुम्भी-पाचनबहुशीतवातजनितानि । शाल्मलीवृक्षारोपण-वैतरिणीतारणादीनि ॥३३७॥
तप्तत्रपुपानदन्दह्यमानसर्वाङ्गविह्वलाः सन्तः । असिपत्रवनच्छायां, गतास्तैरेव तत्र पाटिता ॥३३८॥
उत्कृत्योत्कृत्य खण्डानि, मांसास्यास्ये तदीयके । प्रचिक्षिपुः प्रजल्पन्तो, मांसमासीत्तव प्रियम् ॥३३९॥
अम्बादिजनितास्तीव्राः, परस्परसमुद्भवाः । क्षेत्रानुभाविताश्चान्या, वेद्यन्ते तीव्रवेदनाः ॥३४०॥

उक्तं च-**अच्छिनिमीलियमित्तं, नत्थि सुहं दुक्खमेव अणुबद्धं ।**
नरए नेरइयाणं, अहोनिसं पच्चमाणाणं ॥३४१॥

इदमाख्याति सर्वज्ञः, सर्वदर्शी जिनोत्तमः । केवलज्ञानसद्दृष्ट्या, लोकालोकं विलोकयन् ॥३४२॥
असत्यवादिनो जीवाः, कृत्वोत्कोचनबन्धने । कूटमानेन जायन्ते, तिर्यञ्चस्तीव्रवेदनाः ॥३४३॥
शारीरमानसानेक-दुःखव्रातैरुपद्रुताः । परवाह्याः परायत्ताः, प्रायः सीदन्ति दुःखिताः ॥३४४॥
कशाघातैस्तथा तीव्रै-रङ्कुशैर्वधबन्धनैः । शीतवातातपैर्दंश-मशकैश्चापि पीडिताः ॥३४५॥
सर्वलोकेन वाह्यन्ते, बुभुक्षितपिपासिताः । त्राणकारी न कोऽप्येषां, प्रायशः प्रविलोक्यते ॥३४६॥
इदमाख्याति सर्वज्ञः, सर्वजीवदयापरः । सर्वदोषविनिर्मुक्तः, परमात्मा निरञ्जनः ॥३४७॥
प्रकृत्यैव प्रशान्तात्मा, दानदाता दयापरः । शीलसंयमहीनोऽपि, मानुष्यं लभते नरः ॥३४८॥
अनित्यं मानुषं जन्म, जरामृत्युभयद्रुतम् । दारिद्र्योपद्रुतं प्रायः, क्षणध्वंसि रुगाकुलम् ॥३४९॥
अष्टोत्तरशतव्याधि-व्रातेन विधुरीकृतम् । सर्वदाऽप्रियसंयोग-प्रियायोगविसंस्थुलम् ॥३५०॥
इदमाख्याति योगीशो, योगिगम्यो जिनोत्तमः । त्रिकालवेदी भगवान्, देवदेवो जिनेश्वरः ॥३५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरागसंयमाद्देवा, देशसंयमतोऽपि वा। अकामनिर्जरा देवा, अज्ञानतपसोऽपि वा ॥३५२॥
ईर्ष्याविषादसन्ताप-मानमायातिलोभता। देवेष्वपि वसन्त्येते, दोषास्तेषां कुतः सुखम् ॥३५३॥
एवमाह जिनाधीशो, देवदेवो दयानिधिः। क्लिष्टकर्मा भवातीतः, परं पदमुपागतः ॥३५४॥
चतुर्विधेऽपि संसारे, सौख्यं स्वल्पं शरीरिणाम्। सकृत्सौख्यानि जायन्ते, दुःखानि च पदे पदे ॥३५३॥
सिद्धौ च सर्वजीवानां, संपूर्णा सुखसङ्कथा। निःशेषकर्मविच्छेदा-त्स च चारित्रयोगतः ॥३५५॥
सर्वोपाधिसंशुद्धं चारित्रं प्राप्य सुन्दरम्। क्रमेण केवलज्ञानं, लोकालोकप्रकाशकम् ॥३५६॥
शैलेशीं च समासाद्य, समस्तोपरतक्रियम्। भवोपग्रहकारि च, हत्वा कर्मचतुष्टयम् ॥३५७॥
सर्वद्वन्द्वविनिर्मुक्ता, अष्टकर्मविवर्जिताः। भवाम्भोधिं समुल्लङ्घ्य, गच्छन्ति परमं पदम् ॥३५८॥
इदमाख्याति सर्वज्ञः, सनरामरपर्षदि। सुरासुरनराधीश-मौलिमालार्चितक्रमः ॥३५९॥
भवाटव्यामटाटचन्ते, बहुदुःखप्रपीडिताः। अधर्मसम्बला जीवाः, यत्र तत्रैव दुःखिताः ॥३६०॥
तद्भो भव्या भवाटव्यां, परिभ्रमणभीरवः। यदि यूयं तदा लात, धर्मसम्बलमुत्तमम् ॥३६१॥
वन्दित्वा च सभा सर्वा, विधाय करकुड्मलम्। अवादीच्च गणाधीशं, सत्यमेव त्वयोदितम् ॥३६२॥
तथैवैतन्न सन्देहो, तथैवैतन्न संशयः। अहो निदर्शितो मार्गः, सिद्धिपुर्यास्त्वया प्रभो! ॥३६३॥
श्रमणो ब्राह्मणो वापि, पाखण्डी वा गृहाश्रमी। ईदृङ्[1] धर्ममाख्यातुं, न शक्तः कोऽपि भूतले ॥३६४॥
यथायोगं परिज्ञाय, स्वत एव च योग्यताम्। परलोकहितं पथ्यं, ददध्वं धर्मसम्बलम् ॥३६५॥
व्रतिनः केऽपि सञ्जाताः, श्रावका जज्ञिरे परे। प्रत्याख्यानबहिर्भूताः केचिद्विरतदृष्टयः ॥३६६॥
अत्रान्तरे फलदेवेन, सूरयः प्रश्निता स्वयम्। अन्यजन्मनि कृतं पुण्यं, मया किं कथ्यतां प्रभो! ॥३६७॥
मित्रपुत्रकलत्राणि, राजानः सेवकाः श्रियः। वर्तन्तेऽनुकूलाः केन, कर्मणेदं निवेद्यताम् ॥३६८॥
सूरिः प्राह बभूव त्वं, पुरे कुम्भपुराभिधे। मालिकः पुष्पकुम्भाख्यो, भद्रको मलयप्रभुः ॥३६९॥
बन्धूनां सर्वपुष्पाणि, फलानि स ददौ सदा। एवं व्यवस्थया कालो, याति तेषां परस्परम् ॥३७०॥
अन्यदाष्टाह्निकापूजा, प्रारब्धा जिनमन्दिरे। पुष्पकुम्भः समादाय, फलान्यत्र समागतः ॥३७१॥
गृहीतानि च सर्वाणि, दत्तमुचितवेतनम्। ताम्बूलादिप्रदानेन, सम्भूष्य स[1] विसर्जितः ॥३७२॥
अहो नीतिरहो धर्मो, ह्यहो एकार्थचित्तता। अहो दया अहो दान-महो चित्तविशालता ॥३७३॥
अन्यत्रापि च दृश्यते, यात्रा नैवंविधो विधिः। एवं चिन्तयतस्तस्य, जातं दर्शनकारणम् ॥३७४॥
अष्टमेऽह्नि समायाते, भणितास्तेन गोष्ठिकाः। वेतनेन न मे कार्यं, पुण्यमेवात्र वेतनम् ॥३७५॥
प्रतिपन्नमिदं तेन, समानीय कृतो बलिः। फलान्यनेकभेदानि, सान्द्राण्यान्यार्द्रान्तरात्मना ॥३७६॥
कृतार्थमद्य मे जन्म, जीवितं यौवनं तथा। फलान्यपि कृतार्थानि, यैरेवं विहितो बलिः ॥३७७॥
बद्धं परभवायुष्कं, भोगसारं भवान्तरे। ततो मृत्वात्र सञ्जातः, फलसारस्य नन्दनः ॥३७८॥

---

१ J। च-मु.। BPC नास्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मासान्ते विहितं नाम, पित्रा स्वप्नानुसारतः । फलदेव इति ख्यातं, महामहपुरस्सरम् ॥३७९॥
आकर्ण्येदं स्मृता जातिः, संवेगश्च समागतः । सञ्जातो भवनिर्वेदः, शुद्धे धर्मे गतं मनः ॥३८०॥
श्रुत्वेदं फलदेवस्य, फलपूजाफलं महत् । सर्वज्ञफलपूजायां, भूरिलोको ददौ मनः ॥३८१॥
अथोक्तं फलदेवेन, भगवन् भवतारक! । निर्विण्णोऽहं भवावासाद्, दूरं दुःखनिबन्धनात् ॥३८२॥
अतोऽहं स्वकुटुम्बस्य, कृत्वा सौस्थ्यं यथोचितम् । संसारोत्तारिणीं दीक्षां, ग्रहीष्ये युष्मदन्तिके ॥३८३॥
सूरिभिर्जल्पितं भद्र !, मात्र कार्षीर्विलम्बनम् । स्वामिन्नेवं करिष्येऽह-मेवमुक्त्वा समुत्थितः ॥३८४॥
जगाम निजकस्थाने, रञ्जितो निजको जनः । ततश्च सर्वबन्धूनां, स्वाभिप्रायो निवेदितः ॥३८५॥
धर्मस्थाने निजं द्रव्यं, प्रभूतं विनियोजितम् ।
पुत्रश्च रत्नसुन्दर्याः, फलचन्द्राभिधानकः ॥३८६॥
सम्मतेन स्वबन्धूनां, स्थापितो निजके पदे । कृतं सौस्थ्यं कुटुम्बस्य, यथौचित्यविधानतः ॥३८७॥
सम्भाष्य क्षामयित्वा च, पौरलोकं यथाक्रमम् । इत्याद्यखिलं कृत्वा च, कृत्यं कृत्यविदां वरः ॥३८८॥
नभसैव समायातः, सूरीणां संनिधौ ततः । सूत्रोक्तेन विधानेन, दीक्षितः सूरिणाप्यसौ ॥३८९॥
अनुशिष्टश्च गम्भीर-वाक्यैः संवेगसुन्दरैः । यथा भो भो महासत्त्व !, यावज्जीवमपि त्वया ॥३९०॥
अष्टावीर्यासमित्याद्या, मातर इव मातरः । क्षणमपि न मोक्तव्या;, स्वस्य कल्याणमिच्छता ॥३९१॥
द्रव्याद्यभिग्रहाश्चित्रा, ग्राह्याश्चारित्रपुष्टये । प्राशुकमेषणीयं च, ग्राह्यं भक्तादि सर्वदा ॥३९२॥
उपसर्गाश्च सोढव्या, दिव्याद्या भद्र ! षोडश । विषह्याश्च सदाकालं, द्वाविंशतिपरीषहाः ॥३९३॥
तपसि द्वादशांशेऽपि, यतितव्यं यथाबलम् । उद्यतव्यं च सर्वेषु, वैयावृत्त्यादिकर्मसु ॥३९४॥
किञ्चेमां मानुषत्वादि-सामग्रीं प्राप्य दुर्लभाम् । तथा यत्नस्त्वया कार्यो, दुःखोच्छेदो भवेद्यथा ॥३९५॥
इत्याद्यनेकधाचार्यै-श्चक्रे तस्यानुशासनम् । इच्छाम्यहमनुशास्ति-मित्येवं सोऽप्यभाषत ॥३९६॥
ततस्तेनाप्रमत्तेन, स्वगुरूणां पदान्तिके । ग्रहणासेवनाशिक्षा, शिक्षिता शीघ्रमेव हि ॥३९७॥
चिरं तेपे तपश्चित्रं, पालितः संयमस्तथा । आलोचितप्रतिक्रान्तः, संलिख्य च निजां तनुम् ॥३९८॥
पर्यन्तेऽनशनं कृत्वा, मृत्वा बाढं समाधिना । अच्युते द्वादशे कल्पे, जातो देवो महर्द्धिकः ॥३९९॥
इत्थं प्रवर्धमानोरु-सत्कल्याणपरम्पराम् । प्राप्नुवन् क्षीणकर्मांशः, सिद्धोऽसौ पञ्चमे भवे ॥४००॥
तदहो फलदेवस्य, फलपूजाफलं महत् । श्रुत्वा जिनेन्द्रपूजायां, भो भव्याः ! कुरुतादरम् ॥४०१॥

इति **फलपूजाकथानकं** समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घृतपूजायां गोधनकथा

फलपूजाफलं प्रोक्तं, दृष्टान्तेन सविस्तरम् । साम्प्रतं घृतपूजायाः, फलं तेनैव कथ्यते ॥१॥
अस्तीह भारते क्षेत्रे, काशीदेशः सुविश्रुतः । तत्राभूद् गोधनो नाम, गोकुलिको महर्द्धिकः ॥२॥
प्रभूतानां गवां स्वामी, प्रकृत्यैवातिभद्रकः । दानश्रद्धालुरत्यन्तं, धर्मलिप्सुः प्रशान्तधीः ॥३॥
अन्यदा ददृशे तेन, भ्राम्यता मेदिनीतलम् । एकत्रोद्वसितप्राये, पुरे जीर्णजिनालयः ॥४॥
तस्मिंश्च सुन्दरं बिम्बं, जैनेन्द्रं सुतरां महत् । तद् दृष्ट्वा रञ्जितश्चित्ते, ततश्चैवं व्यचिन्तयत् ॥५॥
अहो! देवाधिदेवोऽयं, सुरूपः प्रीतिदायकः । तदहं स्नपयाम्येनं, सद्गन्धोद्धुरसर्पिषा ॥६॥
विचिन्त्यैवं ततः सर्पि-रानीयातिमनोहरम् । स्नापितः श्रीजिनाधीशः पूजितश्चाक्षतादिभिः ॥७॥
एवं च प्रत्यहं तस्य, कुर्वतो भक्तिनिर्भरम् । कालो भूयानतिक्रान्तः, शुभं भावमुपेयुषः ॥८॥
कालक्रमात्ततो मृत्वा, जातो नन्दिपुरे पुरे । जयवर्धनभूपस्य, पुत्रो विजयवर्धनः ॥९॥
कलाभिः सह सर्वाभि-र्वर्धमानो दिने दिने । क्रमेण यौवनं प्राप्तः, कन्दर्पकुलकेतनम् ॥१०॥
परिणिन्ये च रूपादि-गुणाढ्या राजकन्यकाः । स्थापितश्च निजे राज्ये, पित्रा धर्मचिकीर्षुणा ॥११॥
ततश्च स्वप्रतापेन, समाक्रान्तमहीतलः । कुर्वन् शेषमहीनाथा-नुत्खातप्रतिरोपितान् ॥१२॥
हस्तिभिर्वाजिभिर्भृत्यैः, पुरैरन्तःपुरैस्तथा । कोष्ठागारैश्च कोशैश्च, वर्धमानो यथोत्तरम् ॥१३॥

स्वकान्त्या कामिनीर्बाढं, सन्नीत्या निखिलाः प्रजाः ।
रञ्जयन् स्नेहतो बन्धून्, सज्जनान् गुणसम्पदा ॥१४॥

शौर्येण सर्वशत्रूणां, ददन्नित्यं महाभयम् । सौजन्यादिगुणग्रामैः, सत्कीर्तिं च वर्धयन् ॥१५॥
दुष्टानां निग्रहं कुर्वन्, शिष्टानां परिपालनम् । औचित्येन करं गृह्ण-न्नौचित्येन च दण्डयन् ॥१६॥
नातिशीतो न चाप्युष्णो, न मृदुर्न च कर्कशः । न क्रोधी नातिशान्तश्च, नातिदाता न सञ्चकः ॥१७॥
चिन्तानन्तरनिःशेष-पूर्यमाणमनोरथः । स्वराज्यं पालयामास राजा विजयवर्धनः ॥१८॥
विस्मारिता सुपुत्रेण, पितुः सम्बन्धिनो गुणाः । फलेन सहकारस्य, पुष्पसम्बन्धिनो यथा ॥१९॥
त्रिवर्गं सेवमानस्य, परस्परमबाधया । व्रजन्ति वासरास्तस्य, सुखवृन्दमया इव ॥२०॥
अन्यदा च शुभे लग्ने, राज्ञी मदनकन्दली । दृष्टे शुभग्रहैः सर्वैः, पुत्ररत्नमजीजनत् ॥२१॥
मासान्ते विहितं नाम, महोत्सवपुरस्सरम् । यथार्थं जातसन्तोषैः, पुत्रो मदनसुन्दरः ॥२२॥
अन्यदा च समायाता, बहुशिष्यसमन्विताः । तपःसंयमसंयुक्ताः, सूरयोऽमरसुन्दराः ॥२३॥
स्थिताश्च नन्दनोद्याने, भूभागे जन्तुवर्जिते । अवग्रहमनुज्ञाप्य, ज्ञानत्रयसमन्विताः ॥२४॥
वन्दनार्थं समायातो, राजाऽन्येऽपि च नागराः । प्रारब्धा देशना चैवं, सूरिभिः समशालिभिः ॥२५॥
सुखैषिणो जनाः सर्वे, सुखं धर्मनिबन्धनम् । धर्मः सदागमादेव, ज्ञायते क्रियते तथा ॥२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एष एव हि जीवानां, सुखदाता जिनागमः । हस्तालम्बसमो ह्येष, भवकूपे निमज्जताम् ॥२७॥
एष एव जगन्नाथो, वत्सलः परमार्थतः । एष एव जगत्त्राण-मेष एव सुबान्धवः ॥२८॥
एष एव विपद्वर्ते, पततामवलम्बनम् । एष एव भवाटव्या-मटतां मार्गदर्शकः ॥२९॥
एष एव महावैद्यः कर्मव्याधेर्निबर्हणः । एष एव परानन्द-कारणं परमौषधम् ॥३०॥
एष एव जगद्दीपः सर्ववस्तुप्रकाशकः । प्रमादराक्षसात्तूर्ण-मेष एव विमोचकः ॥३१॥
एषोऽविरतिजम्बाल-कल्मषक्षालनक्षमः । एष एव हि योगानां, दुष्टानां विनिवर्तकः ॥३२॥
[1]शब्दादिचरटव्रातै-र्जीवानामिह निष्कृपम् । सततं पीड्यमानाना-मेष एव हि रक्षकः ॥३३॥
एष एव हि निर्व्याजं, नरकद्वाररोधकः । एष एव हि तैरश्च-दुःखवह्निघनाघनः ॥३४॥
एष एव कुमानुष्य-दुःखविच्छेदकारणम् । एष एव कुदेवत्व-मनःसन्तापनाशकः ॥३५॥
अज्ञानतरुविच्छेदे, एष एव कुठारकः । एष एव महानिद्रा-द्रावणः प्रतिबोधकः ॥३६॥
एष स्वाभाविकानन्द-कारणं बत गीयते । अनन्तभवसंवर्धि-मिथ्याबुद्धिविधूनकः ॥३७॥
एष एव गुरुक्रोध-वह्निविध्यापने जलम् । एष एव महामान-पर्वतोद्दलने पविः ॥३८॥
एष मायामहाव्याघ्री-पातने सरभायते । एष एव महालोभ-नीरधेः शोषणेऽनलः ॥३९॥
एष हास्यविकारस्य, गाढं प्रशमनक्षमः । एष मोहोदयोत्पन्ना-ऽरतिं निर्नाशयत्यलम् ॥४०॥
एष एवारतिग्रस्ते, जनेऽस्मिन्नमृतायते । एष एव भवोद्भ्रान्त-सत्त्वसंरक्षणक्षमः ॥४१॥
एष शोकभराक्रान्तम्, सन्धीरयति देहिनम् । एष एव जुगुप्सादि-विकारं शमयत्यलम् ॥४२॥
एष कामपिशाचस्य, दृढमुच्चाटने पटुः । एष एव च मार्तण्डो, मिथ्यात्वध्वान्तसूदनः ॥४३॥
एष एव च दानादि-शक्तिसन्दोहकारणम् । एष एव महावीर्य-योगहेतुरुदाहृतः ॥४४॥
यस्माद्भागवतं वाक्यं, श्रुतं ज्ञातं परिस्फुटम् । अक्षाणां निग्रहं धत्ते, धत्ते जीवं शिवालये ॥४५॥
राजाह किमु[2] सर्वेऽपि, न कुर्वन्तीह सर्वदा । धर्मं सर्वज्ञनिर्दिष्टं, सर्वकल्याणकारणम् ॥४६॥
अथ सूरिराह-
सुखाभिलाषः सुकरो, दुःष्करोऽसौ नृपोत्तम ! । यतो जितेन्द्रियग्राम-स्तं साधयति मानवः ॥४७॥
अनादिभवकान्तारे, [3]प्राप्तानि परमं बलम् । दुर्बुद्धिभिर्न शक्यन्ते, जेतुं तानीन्द्रियाणि वै ॥४८॥
तेनैते जन्तवो मूढाः, सुखमिच्छन्ति केवलम् । धर्मं पुनः सुदूरेण, त्यजन्ति सुखकारणम् ॥४९॥
इन्द्रियाणां जयं भूप !, कर्तुं नो पारयन्त्यमी । धर्मतः प्रपलायन्ते, ततो जीवाः सुखैषिणः ॥५०॥
नरसुन्दरभूपेना-भाणि भगवन्निवेद्यताम् । कानि तानीन्द्रियाणीह, किंस्वरूपाणि वा मुने ? !॥५१॥
कथं वा दुर्जयानीति, श्रोतुमिच्छामि तत्त्वतः । यत्कुतूहलमत्रार्थे, गुरुकं मम वर्तते ॥५२॥

---

१ शब्दवेधिशरव्रातैः मु. ॥, २ किमिति BCJ ॥ ३ J मु. । प्राप्ता निजपं BC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूरिः प्राह-स्पर्शनं रसनं घ्राणं, चक्षुः श्रोत्रं च पञ्चमम् ।
एतानि तानि राजेन्द्र !, हृषीकाणि प्रचक्षते ॥५३॥
इष्टैः स्पर्शादिभिस्तोषो, द्वेषवृद्धिस्तथेतरैः । एतत्स्वरूपमेतेषा-मिन्द्रियाणां नृपोत्तम ! ॥५४॥
दुर्जयानि यथा तानि, कथ्यमानं तथाधुना । दत्तावधानस्तत्सर्व-मनुश्रुत्यावधारय ॥५५॥
अनेकभटसङ्कीर्णे, समरे योधयन्ति ये । मत्तमातङ्गसङ्घात-मेतैस्तेऽपि विनिर्जिताः ॥५६॥
अङ्गुल्यग्रे विधायेदं, भुवनं नाटयन्ति ये । शक्त्यादयोऽपि शक्तिष्ठा-स्तेऽप्यमीभिर्वशीकृताः ॥५७॥
हिरण्यगर्भवैकुण्ठ-महेश्वरपुरस्सराः । एतैर्वशीकृताः सन्त-स्तेऽपि किङ्करतां गताः ॥५८॥
अधीत्य सर्वशास्त्राणि, परमार्थविदो जनाः । एभिर्विधुरिताः सन्तश्चेष्टन्ते बालिशा इव ॥५९॥
एतानि हि स्ववीर्येण, ससुरासुरमानुषम् । वराकमिव मन्यन्ते, सकलं भुवनत्रयम् ॥६०॥
दुर्जयानि ततोऽमूनि, हृषीकाणि नराधिप ! । एवं सामान्यतः प्रोक्तं, हृषीकगुणवर्णनम् ॥६१॥
तिष्ठन्तु तावच्छेषाणि, हृषीकाणि नराधिप ! । स्पर्शनेन्द्रियमेवैकं, समर्थं बत वर्तते ॥६२॥
यतो न शक्यते लोकै-र्जेतुमेकैकमप्यदः । यतो विज्ञातवृत्तान्ता, इदमूचुर्विचक्षणाः ॥६३॥

''सक्तः शब्दे हरिणः, स्पर्शे नागो रसे च वारिचरः ।
नेत्रे कृपणपतङ्गो, भ्रमरो गन्धे विनष्टश्च'' ॥६४॥
पञ्चसु सक्ताः पञ्चविनष्टा, यत्राऽगृहीतपरमार्थाः ।
एकः पञ्चसु सक्तः प्रयाति भस्मान्ततां मूढः ॥६५॥

भगवन्निन्द्रियजेतारो, नराः किं सन्ति कुत्रचित् ? । आहोश्चिन्नैव विद्यन्ते, भुवनेऽपि तथाविधाः ॥६६॥
राजन्न हि न विद्यन्ते, केवलं विरला जनाः । ये तेषां विनिहन्तार-स्तत्राकर्णय कारणम् ॥६७॥
जघन्यमध्यमोत्कृष्टा-स्तथोत्कृष्टतमा गुणैः । चतुर्विधा भवन्तीह, पुरुषा भुवनोदरे ॥६८॥
तत्रोत्कृष्टतमास्ताव-द्यैरिहेन्द्रियपञ्चकम् । अनादिभवसम्बन्धा-त्पालितं लालितं प्रियम् ॥६९॥
जैनेन्द्रागमसम्पर्का-द्विज्ञाय बहुदूषणम् । ततः सन्तोषमादाय, महासत्त्वैर्निराकृतम् ॥७०॥
गृहस्था अपि ते सन्तो, ज्ञाततत्त्वा जिनागमे । हृषीकपञ्चलौल्येन, नाचरन्ति कुचेष्टितम् ॥७१॥
यदा पुनर्विशेषेण, तिष्ठत्येष जिनागमः । हृषीकपञ्चसम्बन्धं, त्रोटयन्ति सदाखिलम् ॥७२॥
यतो दीक्षां समादाय, निर्मलीमसमानसाः । सन्तोषभावतो धन्या, जायन्तेऽत्यन्तनिस्पृहाः ॥७३॥
ततस्ते भवकान्तार-निर्विण्णा वीतकल्मषाः । इन्द्रियप्रतिकूलानि, सेवन्ते वीरमानसाः ॥७४॥
भूमीशयनलोचादि-कायक्लेशविधानतः । ततः सुखस्पृहां हित्वा, जायन्तेऽतिनिराकुलाः ॥७५॥
ततः सकलकर्मांश-क्लेशविच्छेदभाजनम् । भूत्वा ते निर्वृतिं यान्ति, निर्जित्येन्द्रियपञ्चकम् ॥७६॥
तेनोत्कृष्टतमा राज-न्निर्दिष्टास्ते विचक्षणैः । ये चैवमनुतिष्ठन्ति, विरलास्ते जगत्त्रये ॥७७॥
साम्प्रतं च तथोत्कृष्ट-नराणां शुद्धचेतसां । स्वरूपं श्रूयतां राजन् !, कथ्यमानं मयाधुना ॥७८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कृष्टास्ते नरा ज्ञेया, यैश्च पञ्चेन्द्रियं जितम् । अवाप्य मानुषं जन्म, शत्रुबुद्ध्यावधारितम् ॥७९॥
भाविभद्रतया तेषां, परिस्फुरति मानसे । नैवैतत्सुन्दरं हन्त, पापमिन्द्रियपञ्चकम् ॥८०॥
ततो विज्ञाय ते तेषां, लोकवञ्चनतां नराः । सर्वत्र चकिता नैव, विश्वसन्ति कदाचन ॥८१॥
न चानुकूलं चारित्रं, भजन्ते विजितस्पृहाः । ततस्तज्जनितैर्दोषै-र्न युज्यन्ते विचक्षणाः ॥८२॥
शरीरस्थितिमात्रार्थ-माचरन्तोऽपि तत्प्रियम् । तत्र गृद्धेरभावेन, भवन्ति सुखभाजनम् ॥८३॥
प्राप्नुवन्ति यशः शुभ्र-मिह लोकेऽपि ते नराः । स्वर्गापवर्गमार्गस्य, निकटे तादृशाः सदा ॥८४॥
गुरवः केवलं तेषां, नाममात्रेण कारणम् । मोक्षमार्गे प्रवर्तन्ते, स्वत एव हि ते नराः ॥८५॥
अन्येषामपि कुर्वन्ति, शुद्धमार्गावतारणम् । तद्वाक्यं ये प्रपद्यन्ते, विज्ञाय गुणकारणम् ॥८६॥
ये पुन र्न प्रपद्यन्ते, तद्वाक्यं बालिशा जनाः । तेषामनादरं कृत्वा, ते तिष्ठन्ति निराकुलाः ॥८७॥
प्रकृत्यैव भवन्त्येते, देवाचार्यतपस्विनाम् । पूजासत्कारकरणे, रक्तचित्ता महाधियः ॥८८॥
इदमेवमुत्कृष्टानां, साधितं चरितं नृणाम् । साम्प्रतं मध्यबुद्धीनां, कथ्यमानं निशाम्यताम् ॥८९॥
मध्यमास्ते नरा ज्ञेया, यैर्हृषीककदम्बकम् । अवाप्य मानुषं जन्म, मध्यबुद्ध्यावधारितम् ॥९०॥
इन्द्रियग्रामसम्पाद्ये, सुखे ये गृद्धमानसाः । पण्डितैरनुशिष्टाश्च, दोलायन्ते स्वचेतसा ॥९१॥
चिन्तयन्ति निजे चित्ते, ते दोलायितबुद्धयः । विचित्ररूपसंसारे, किमत्र बत कुर्महे ? ॥९२॥
भोगानेके प्रशंसन्ति, रमन्ते सुखनिर्भराः । अन्ये शान्तान्तरात्मानो, निन्दन्ति विगतस्पृहाः ॥९३॥
तदत्र कतरो मार्गो, मादृशामिह युज्यते । न लक्षयामस्तच्चित्तं, सन्देहमवगाहते ॥९४॥
तस्मात्कालविलम्बोऽत्र, युक्तोऽस्माकं प्रयोजने । नैवैकपक्षनिक्षेपो, विधातुमिह बुद्ध्यते ॥९५॥
मध्यमानां भवेद्बुद्धि-र्यादृशी कर्मपद्धतिः । यस्मादाचक्षते सन्तो, बुद्धिः कर्मानुसारिणी ॥९६॥
तत इन्द्रियवर्गं ते, मन्यन्ते सुखहेतुना । अनुकूले च वर्तन्ते, किन्तु नात्यन्तलोलुपाः ॥९७॥
ततो लोकविरुद्धानि, नाचरन्ति कदाचन । पञ्चेन्द्रियवशं प्राप्ता, नापायान् प्राप्नुवन्त्यतः ॥९८॥
हितेनोक्ताः प्रबुध्यन्ते, विशेषवचनस्य ते । अदृष्टदोषास्तद्वाक्यं, केवलं नाचरन्ति ते ॥९९॥
मैत्रीं बालिशलोकेन, कुर्वन्ति स्नेहनिर्भराम् । लभन्ते तद्विपाकेन, रौद्रां दुःखपरम्पराम् ॥१००॥
अवर्णवादं लोके च, प्राप्नुवन्ति न संशयः । संसर्गः पापलोकेन, सर्वानर्थपरो यतः ॥१०१॥
यदा पुनः प्रपद्यन्ते, विदुषां वचनानि ते । आचरन्ति च विज्ञाय, तदीयां हितरूपताम् ॥१०२॥
तदा ते विगताबाधा, भवन्ति सुखिनो नराः । महापुरुषसम्पर्का-ल्लभन्ते मार्गमुत्तमम् ॥१०३॥
पण्डिता इव ते नित्यं, गुरुदेवतपस्विनाम् । बहुमानपराः सन्तः, कुर्वन्त्यर्चनवन्दनम् ॥१०४॥
तदेवं भणितास्ताव-न्मध्यमानां गुणाऽगुणाः । जघन्यनरसम्बन्धे स्वरूपमधुनोच्यते ॥१०५॥
जघन्यास्ते नरा ज्ञेया, ये हृषीकवशं गताः । सम्प्राप्य मानुषं जन्म, करणैर्ये विनिर्जिताः ॥१०६॥
पराररूपतां तेषां, न जानन्ति यतः स्वयम् । परेषामपि रुष्यन्ति, विदुषां हितभाषिणाम् ॥१०७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृषीकवर्गसम्पाद्ये पामाकण्डूयनोपमे । परार्थेऽपि च दुःखेऽपि, सुखलेशेऽतिगृद्धयः ॥१०८॥
स्वर्गोऽयं परमार्थोऽयं, लब्धोऽयं सुखसागरः । अस्माभिरिति मन्यन्ते, विपर्यासवशं गताः ॥१०९॥
ततो हार्दं तमस्तेषां, प्रतिसर्पति सर्वतः । विवेकशेषकाश्चित्ते, वर्धन्ते रागरश्मयः ॥११०॥
प्रणष्टसत्यसद्भावा, अन्धीभूतस्वबुद्धयः । कुर्वन्तोऽनार्यकार्याणि, वार्यन्ते केन ते ततः ? ॥१११॥
धर्मलोकविरुद्धानि, निन्दितानि पृथग्जनैः । कार्याणि कुर्वतां लोकः, शत्रुभावं प्रपद्यते ॥११२॥
कुलं चन्द्रांशुविशदं, ते कुर्वन्ति मलीमसम् । आत्मीयचरितैः पापाः, प्रयान्ति जनहास्यताम् ॥११३॥
अगम्यगमनासक्ता, निर्मर्यादा नराधमाः । अर्कतूलादपि परं, ते जने यान्ति लाघवम् ॥११४॥
दुर्लभा हि मनोऽभीष्टा, विषयाः स्त्र्यादिगोचराः । प्राणिनां हृदि वर्तन्ते, न लभ्यन्ते यथेप्सिताः ॥११५॥
तदा ते यानि दुःखानि, याश्च लोके विडम्बनाः । प्राप्नुवन्ति न शक्यन्ते, ता व्यावर्णयितुं गिरा ॥११६॥
केवलं गदितुं शक्य-मिदमेव समासतः । लभन्ते ते नरा सर्वा, लोके दुःखविडम्बनाः ॥११७॥
प्रकृत्यैव भवन्त्येते, गुरुदेवतपस्विनाम् । प्रत्यनीका महापापा, निर्भाग्या गुणदूषकाः ॥११८॥
सन्मार्गपतितं वाक्य-मुपदिष्टं हितैषिणा । केनचिन्न प्रपद्यन्ते, महामोहेन दूषिताः ॥११९॥
ततश्चेदं मुनेर्वाक्यं, विनिश्चित्य महीभृता । विचिन्तितं निजे चित्ते, अहो सद्धर्मदेशकाः ॥१२०॥
रञ्जितो हृदये राजा, सभा सन्तोषमागता । यथायोगं गुणस्थानं, प्रतिपद्य गृहं गता ॥१२१॥
उत्तमोत्तमनरैर्भाव्यं, नियम्येन्द्रियपञ्चकम् । नृजन्म सफलं कार्यं, विजयवर्धन! त्वया ॥१२२॥
इत्येवं सूरिभिः शिष्टे, धर्मे सर्वज्ञभाषिते । राजाह रञ्जितस्वान्तः, संवेगातिशयं वहन् ॥१२३॥
भगवन्निर्जितास्ताव-देते बाह्या मया द्विषः । आन्तरानपि निःशेषान्, जेतुमिच्छामि साम्प्रतम् ॥१२४॥
एते च सर्वदा पूज्य-पादसेवनतत्परैः । शक्यन्ते हि निराकर्तुं, मादृशैरत्र नान्यथा ॥१२५॥
तथाहं निजराज्यस्य, सौस्थ्यं कृत्वा यथोचितम् । ततो दीक्षां गृहीष्यामि, पूज्यानामन्तिके प्रभो! ॥
मा प्रमादं कृथा भद्र !, सर्वथात्र प्रयोजने । एवं सूरिभिरादिष्टे, ततो राजा समुत्थितः ॥१२७॥
गतो गेहे ततः शिष्टः, स्वाभिप्रायः स्वमन्त्रिणाम् । ततश्च स्थापितो राज्ये, पुत्रो मदनसुन्दरः ॥१२८॥
दत्ता शिक्षा ततस्तस्य, मन्त्रिणां च यथोचितम् । यदन्यदपि कर्तव्यं, तत्कृतं स्वयमेव हि ॥१२९॥
ततोऽसौ नन्दनोद्याने, गत्वा सूरिपदान्तिके । जग्राह विधिना दीक्षां, सर्वकर्मक्षयङ्करीम् ॥१३०॥
शिक्षिता द्विविधा शिक्षा, पठितं च बहु श्रुतम् । पालितश्च चिरं चारुः, संयमस्तपसा सह ॥१३१॥
आगमोक्तविधानेन, विधायानशनं ततः । मृत्वा च द्वादशे कल्पे, जातो देवो महर्द्धिकः ॥१३२॥
ततश्च्युत्वा महाराज-वंशे भूत्वा महानृपः । सम्प्राप्य शुद्धचारित्रं, निष्कलङ्कं प्रपाल्य च ॥१३३॥
आरुह्य क्षपकश्रेण्यां, हत्वा घातिचतुष्टयम् । उत्पाद्य केवलज्ञानं, कृत्वा भव्यप्रबोधनम् ॥१३४॥
भवोपग्राहिकर्माणि, शुक्लध्यानकृशानुना । निर्दह्य निर्वृतौ प्राप्तो, जातः सिद्धः सुखालयः ॥१३५॥

घृतपूजाकथानकम् समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलपूजायां रससारकथा

घृतपूजाफलं प्रोक्तं, स्वर्गमोक्षप्रसाधकम् । साम्प्रतं जलपूजायाः फलं शृणुत कथ्यते ॥१॥
बभूव भुवने ख्यातो, ग्रामाकरपुराकुलः । बङ्गाजनपदस्तत्र, पुरं विश्वपुराभिधम् ॥२॥
गुणसारो नृपस्तत्र, प्रजापालो महाबलः ।
तद्भार्या रूपसौभाग्य-सम्पन्ना बन्धुसुन्दरी ॥३॥
अन्यदा च तया स्वप्ने, दृष्टा मेघाः समुन्नताः । सर्वतोऽपि जलप्लावैः प्लावयन्तो महीतलम् ॥४॥
ततः शिष्टस्तया स्वप्नः, समानन्दितचित्तया । सादरं नरनाथाय, सुष्ठु कोमलया गिरा ॥५॥
तेनाभाणि प्रिये ! श्रेष्ठः, पुत्रस्तव भविष्यति । सर्वेषामपि लोकानां, मनोवाञ्छितपूरकः ॥६॥
प्रादुर्भूतस्ततो गर्भ-स्तस्याः कुक्षौ सुखप्रदः । अथ सोवाह तं गर्भं, सम्पूर्णाखिलदोहदा ॥७॥
तस्मिन् गर्भस्थिते वृष्टाः, सर्वत्रापि घनं घनाः । पूरिता च जलप्लावैः सर्वतोऽपि हि मेदिनी ॥८॥
सर्वेषामपि सञ्जाता, रसानां वृद्धिरुच्चकैः । धान्यानि च समर्घाणि, सर्वदेशेषु जज्ञिरे ॥९॥
वासरेषु च पूर्णेषु, पुत्रं सासूत सुन्दरम् । कारितं च ततः पित्रा, वर्धापनकमङ्गलम् ॥१०॥
स्वप्नानुसारतस्तस्य, महामहःपुरस्सरम् । रससार इति ख्यातं, कृतं नाम यथार्थकम् ॥११॥
अथासौ वर्धते बालः, कलाभिर्वपुषापि च । क्रमेणैव यौवनं प्राप्तो, धर्मकामार्थसाधकम् ॥१२॥
परिणीतास्ततस्तेन, रूपयौवनगर्विताः । विशालकुलसम्भूता, अनेका राजकन्यकाः ॥१३॥
पूर्णाशेषमनोवाञ्छ-स्ताभिः सार्धमखण्डितम् । शब्दादिविषयांस्तुष्टो, भुङ्क्ते पञ्चविधानपि ॥१४॥
अथ सोऽद्भुतशौर्येण, चक्रे क्षोभं हृदि द्विषाम् । चेतांसि चोरयामास, कामिनीनां सुलीलया ॥१५॥
सन्मानेन स्वमन्त्रिणां, परां तुष्टिं चकार सः । विदुषां विनयादेव, हृद्यानन्दं ददाविति ॥१६॥
इत्यादिभिर्गुणग्रामैः, सर्वलोकातिशायिभिः । शत्रवोऽपि हि तेनोच्चैः, शिरःकम्पं विधापिताः ॥१७॥
अन्यदा तत्र वर्षासु, धान्यपूर्णेषु भूतले । उद्गतेषु च नो मेघः, कथञ्चिदपि वर्षति ॥१८॥
ततः शुष्यन्ति धान्यानि, वान्ति वाताः सुदारुणाः । तपत्यर्को धरापीठं, द्वादशार्कसमर्गलम् ॥१९॥
जलाशयेषु सर्वेषु, त्रुट्यन्ति च पयांस्यलम् । गोरूपाणि च सीदन्ति, विना वारि गृहे गृहे ॥२०॥
बुभुक्षाक्रान्तदेहानि, म्रियन्ते तानि कानिचित् । आसते च गृहद्वारे, पतितानि च कानिचित् ॥२१॥
सानन्दा मानसे जाता, धान्यसङ्ग्रहकारिणः । विषण्णा दुर्गता लोका, जाताश्चिन्तातुरा हृदि ॥२२॥
बहुर्भिक्षाचरो लोको, वर्धते च दिने दिने । श्रीमन्तोऽपि हि नेच्छन्ति, भिक्षां दातुं तदर्थिनाम् ॥२३॥
त्यागिनोऽपि हि ये लोकाः, सुप्रसिद्धा मनस्विनः । तैरपि चेतसा सार्धं, हस्तः सङ्कोचितो दृढम् ॥२४॥
मूल्यं चटितुमारब्धं, धान्यानां प्रतिवासरम् । तानि दातुं न वाञ्छन्ति, धान्यसङ्ग्रहकारिणः ॥२५॥
यथा यथा न तादृक्षा, भिक्षा गेहेषु लभ्यते । तथा तथा मनः क्षोभो, जातः पाखण्डिनामपि ॥२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं हल्लोहले जाते, लोकानां दौःस्थ्यदायिनि । सुभिक्षं देशमाश्रित्य, लोकेषु च यियासुषु ॥२७॥
ततश्च भूपतेश्चिन्ता, जाता सम्भ्रान्तचेतसः । कथं नु मामके देशे, वर्षिष्यति घनं घनः ॥२८॥
शुष्यन्ति तावदेतानि, सस्यानीह विना जलम् । विना धान्यं न जीवन्ति, मामकीना इमाः प्रजाः ॥२९॥
विना लोकं न जायन्ते, ममापि द्रव्यसम्पदः । विना द्रव्यमिमे भृत्या, न स्थास्यन्ति ममान्तिकम् ॥३०॥
विना भृत्यैर्न मे राज्यं, स्थिरं सम्भाव्यते चिरम् । विना राज्यं भविष्यामि, लघूनामप्यहं लघुः ॥३१॥
एवं विचिन्त्य भूपेन, समाहूताः स्वमन्त्रिणः । प्रधानपौरलोकाश्च, ततश्चैवं प्रजल्पितम् ॥३२॥

भो ! भो ! मे मन्त्रिणः प्राज्ञा!, भो भोः पौराः ! सुबुद्धयः ! ।
दुर्भिक्षं जायते लग्नं, कथ्यतां किमु कुर्महे ? ॥३३॥

चिन्त्यतां कोऽप्युपायोऽत्र, येन मेघः प्रवर्षति । श्रुत्वेदं भूपतेर्वाक्यं, तत्रेत्थं कैश्चिदूचिरे ॥३४॥
इज्यन्तां विविधा यज्ञाः, पूज्यन्तां ब्राह्मणास्तथा । हूयन्तां भूरिसर्पींषि, ज्वलज्ज्वालाकुलेऽनले ॥३५॥
अन्ये पुनरिदं प्राहु-र्वक्रस्थानं गता ग्रहाः । तैश्च विष्कम्भितं तोयं, [1]देवस्तेन न वर्षति ॥३६॥
ततश्च क्रियतां पूजा, ग्रहाणामत्र सादरम् । यैन ते प्रीणिताः सन्त-स्तोयं कुर्वन्ति मुत्कलम् ॥३७॥
अन्यैरभाणि भो राजन्!, सन्ति पाखण्डिनोऽत्र ये । तेऽमाहूय पृच्छचन्तां, जलविष्कम्भकारणम् ॥३८॥
अन्ये प्रोचुः, प्रजाभाग्यं, यद्यस्तीह तदा ध्रुवम् । पतिष्यन्त्येव तोयानि, नान्यथेति किमाकुलाः ? ॥३९॥
अन्यैः पुनरिदं प्रोक्तं, कूर्चामर्षणपूर्वकम् । भो राजन् ! यद्वयं ब्रूम-स्तदाकर्णय साम्प्रतम् ॥४०॥
यः कश्चिदत्र सत्पुण्यो, महासत्त्वो नरोत्तमः । यद्यसौ सत्त्वमालम्ब्य, निश्चयं कुरुते नृप! ॥४१॥
जलं वा पातयाम्यद्य, वह्नौ वा प्रविशाम्यहम् । यद्येवं कुरुते कोऽपि, तदा वर्षति माधवः ॥४२॥
श्रुत्वेदं नरनाथेन, मन्त्रिलोकप्रजल्पितम् । तथैवाकारि यज्ञाद्यं, सर्वं नो पतितं जलम् ॥४३॥
ततो ज्योतिष्ककाः केचि-न्महासत्त्वाश्च केचन । निश्चयं कर्तुमारब्धाः स्पर्धमानाः परस्परम् ॥४४॥
तत्र ज्योतिष्ककाः प्राहु-र्यद्यहो पञ्चमे दिने । पातयामो न तोयानि, मुञ्चामो खटिकां ततः ॥४५॥
एवं कैश्चिद्दिनं षष्ठं, सप्तमं चाष्टमं तथा । प्रतिज्ञातं न चाम्भांसि, निपतन्ति कथञ्चन ॥४६॥
ततश्च ये महासत्त्वाः, महासत्यश्च तत्र याः । स्थितास्ते ताश्च निश्चित्य, न च मेघः प्रवर्षति ॥४७॥
श्रुत्वेदमथ वृत्तान्तं, रससारः कुमारकः । समागत्य सभास्थानं, प्रणम्य च नराधिपम् ॥४८॥
एवं ब्रूते यथा देव !, मेघं प्रवर्षयाम्यहम् । अद्यैव निश्चितं नो चेत्, प्रविशामि हुताशनम् ॥४९॥
आकर्ण्येदं ततो राजा, ब्रूते लोकाः समन्त्रिणः । हा हा मा मा महाभाग !, भाणीरेवंविधं वचः ॥५०॥
जीव नन्द चिरं कालं, पालयस्व निजाः प्रजाः । भुङ्क्ष्व त्वं भो महाभोगान्, प्रजाभाग्यैः सुरक्षितः ॥५१॥
श्रुत्वेदं कुमरः प्राह, राजन् ! मा मा भयं कृथाः । एषोऽहं वर्षयाम्यद्य, देवं पश्य क्षणान्तरम् ॥५२॥
वारंवारं कृतारावं, जनानां वारयतामपि । दुर्निर्वाह्यां महासत्त्वः, प्रतिज्ञां कृतवानिमाम् ॥५३॥

१ BJC । मेघ मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशाम्यग्नौ प्रदीप्तेऽहं, यदि नाद्य धराधरम्। वर्षयामि यथावाञ्छं, युष्माकं पश्यतामहो! ॥५४॥

यतः- **आरंभो चिय न फुरइ, अहव समत्थाण फुरइ आरंभो।**
आरंभो य समप्पइ, अहव समत्था समप्पंति ॥५५॥

एवं च निश्चयं कृत्वा, यावदास्ते कुमारकः। तावत्क्षणान्तरात्प्रोच्चै-रभ्रैराच्छादितं नभः ॥५६॥
झम्पाभिरुत्थिता विद्यु-ज्जृम्भे गर्जिरञ्जसा। दृश्यन्ते पञ्चवर्णानि, पुरन्दरधनूंषि च ॥५७॥
अतीव स्थूलधाराभिः, प्रवृत्ता वर्षितुं घनाः। अन्धारिता दिशः सर्वाः, अभ्रवातैर्विसर्पिभिः ॥५८॥
केकिनश्च प्रमोदेन, केकायन्ते दिशोदिशम्। पूत्कुर्वन्ति च सानन्दाः, सर्वतोऽपि कृषीवलाः ॥५९॥
मालिता भूर्जलप्लावै-र्विसर्पद्भिरितस्ततः। पूरितानि पयःपूरैः, सरांसि सुमहान्त्यपि ॥६०॥
प्रवहन्निर्झरा-रावैः, श्रूयते नैव जल्पितम्। पीडयन्त्यस्तटान्युच्चै-र्वहन्ते सरितस्तराम् ॥६१॥
स्वस्थीभूतानि चेतांसि, सर्वेषामपि देहिनाम्। सप्रमोदा विशेषेण, जाता भिक्षाचरा नराः ॥६२॥
समन्तादुत्थितः प्रोच्चै-र्दर्दुराणां महारवः। शब्दमयमिदं सर्वं, कुर्वन्निव महीतलम् ॥६३॥
धान्यानि च समर्घाणि, सञ्जातानि झटित्यपि। जाता च जीवितव्याशा, नृणां [1]दरिद्राणां दृढम्॥
एवं सर्वप्रजानन्दे, चिरवृष्ट्या घने स्थिते। स्वस्थीभूते जने सर्वे, सानन्दे च नराधिपे ॥६५॥
निर्व्यूढस्वप्रतिज्ञोऽसौ, रससारकुमारकः। समुत्थाय ततः स्थाना-दायातः पितुरन्तिकम् ॥६६॥
ततः प्रणम्य राजानं, तदासन्नं निषण्णवान्। श्लाघितं च जनैः सर्वै-स्तस्य सत्त्वं मुहुर्मुहुः ॥६७॥
आस्तां तावन्निजो लोकः, सन्तो वा गुणरञ्जिताः। तस्य सत्त्वं दुराराध्यै-र्दुर्जनैरपि वर्णितम् ॥६८॥
एवं च सर्वदेशेषु, ग्रामे ग्रामे पुरे पुरे। वर्ण्यन्ते सद्गुणास्तस्य, सर्वलोकैः सविस्मयम् ॥६९॥
तत्रैके तस्य पुण्यानि, वर्णयन्ति महौजसः। अन्ये पुनर्महासत्त्व-मन्ये पुनः पराक्रमम् ॥७०॥
अन्ये वचनचातुर्य-मन्ये सद्रूपसम्पदम्। अन्ये सत्त्वप्रतिष्ठत्व-मौदार्यमपरे तथा ॥७१॥
अन्ये कलासु कौशल्यं, सौशील्यमपरे पुनः। अन्ये परोपकारित्वं, दाक्षिण्यं त्वपरे जनाः ॥७२॥
तस्यैवमासमुद्रान्तं, कुमारस्य महात्मनः। क्रमेणोल्लसिता कीर्तिः, शङ्खकुन्देन्दुनिर्मला ॥७३॥
एवं च श्लाघ्यमानोऽसौ, मान्यमानो महाजनैः। वल्लभो भूपतेर्बाढं, भुङ्क्ते विषयजं सुखम् ॥७४॥
अन्यदा स महीनाथो, गुणसारश्चिरं महीम्। पालयित्वा निजे राज्ये, निजं पुत्रं न्यवेशयत् ॥७५॥
रससारं गुणाधारं, सदाचारं सतां समम्। सम्मतं राजलोकानां, सर्वसामन्तमन्त्रिणाम् ॥७६॥
स्वयं पुनर्विनिर्गत्य, पुरादाभाष्य पौरवान्। कुलक्रमसमायातं, वनवासमशिश्रियत् ॥७७॥
रससारस्ततो राजा, सञ्जातश्चण्डशासनः। सूर्य इव प्रतापेन, समाक्रान्तरसातलः ॥७८॥
अन्यदा च महादेवी, नाम्ना सौभाग्यसुन्दरी। सर्वलक्षणसम्पूर्णं, पुत्ररत्नमजीजनत् ॥७९॥
कारितश्च ततः पित्रा, पुत्रजन्ममहोत्सवः। कृतसर्वजनानन्दः, पूरितार्थिमनोरथः ॥८०॥

---

१ दारिद्रिणां-BJC मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशाहे च संवृत्ते, महद्वर्योत्सवपूर्वकम् । **जयसार** इति ख्यातं, तस्य नाम प्रतिष्ठितम् ॥८१॥
अथासौ ववृधे बालो, धात्रीपञ्चकलालितः । शशीव प्रत्यहं लोक-लोचनानन्ददायकः ॥८२॥
क्रमेण यौवनस्थेन तेनोढा राजकन्यका । दत्त्वा छत्राद्यलङ्कारान्, पित्रा स युवराट् कृतः ॥८३॥
अन्यदा बहिरुद्याने **वनसुन्दर**नामनि । विहरन्तः समायाताः, सूरयः **श्रुतसुन्दराः** ॥८४॥
अवग्रहमनुज्ञाप्य, स्थाने साधूचिते स्थिताः । निर्गता वन्दनाद्यर्थं, नगरान्नागरा जनाः ॥८५॥
अथैवं हेलया लोकं, निर्गच्छन्तं पुराद्बहिः । दृष्ट्वा पप्रच्छ भूपालः, स्वं पुमान्सं सकौतुकः ॥८६॥
स प्राह मयका राजन् !, जल्पन्नेवं जनः श्रुतः । यथेह सूरयः केचि-दुद्याने बहिरागताः ॥८७॥
तेषामेष जनः सर्वो, वन्दनार्थं विनिर्गतः । श्रुत्वेदं रससारोऽपि, कृत्वा सामग्रिकां क्षणात् ॥८८॥
जगाम सिन्धुरारूढः कानने सूरिसन्निधौ । भक्त्याभिवन्द्य तं सूरिं, नातिदूरे निषण्णवान् ॥८९॥
ततः सदर्थगम्भीर-वरवाक्यैः सुकोमलैः । सूरिभिर्भूरिसंवेगैः, प्रारब्धा धर्मदेशना ॥९०॥
तद्यथा-यानपात्रं भवाम्भोधे-र्दुर्गतिद्वाररोधिका । दया धर्मस्य सर्वस्वं, कर्तव्या सर्वदा बुधैः ॥९१॥
सत्यं हितं प्रियं वाक्यं, वाच्यं सत्त्वसुखावहम् । सर्वदापि परित्याज्यं, चौर्यं दुःखनिबन्धनम् ॥९२॥
मातेव सर्वदा दृश्या, धार्मिकेण पराङ्गना । परित्याज्यः सदा धीरै-र्महारम्भपरिग्रहः ॥९३॥
संसारसौख्यवैमुख्यं, विधेयं सुधियाधिकम् । कार्यः सज्जनसंसर्गो, न कार्याऽनार्यसङ्गतिः ॥९४॥
इत्याद्यनेकधा धर्म-माचक्षाणं मुनीश्वरम् । नत्वा प्रस्तावमासाद्य, रससारोऽब्रवीदिदम् ॥९५॥
भगवन् ! किं मयाकारि ?, सुकृतं पूर्वजन्मनि । येनेदृक्षा मम स्फीताः, सञ्जाता राज्यसम्पदः ॥९६॥
सूरिः प्राह महाभाग !, कथ्यते शृणु सादरम् । इतो भवाच्चतुर्थे त्वं, भवे **हर्षपुरे** पुरे ॥९७॥
बभूव **दुर्गता** नारी, परकर्मकरी सदा । इतश्च नगरात्तस्मा-द्व्यूतान्तरसंस्थितम् ॥९८॥
आसीज्जनमनोहारि, काननं **कुन्दसुन्दरम्** । तत्र शुभ्राभ्रसङ्काशं, तुङ्गं जैनेन्द्रमन्दिरम् ॥९९॥
तस्य मध्ये शिवं शान्तं, बिम्बं जैनेश्वरं महत् । तत्सुतीर्थमिति ख्यातं, जनवाञ्छितपूरकम् ॥१००॥
तत्र चानेकदेशेभ्यः, समायाति बहुर्जनः । स्तोत्रं पूजां बलिं चैव, विदधाति निरन्तरम् ॥१०१॥
अथासौ दुर्गता नारी, कानने कुन्दसुन्दरे । कृता लोकैः प्रपापाली, जनं पाययते पयः ॥१०२॥
अन्यदा च समायाताः, श्रीमन्तो बहवो जनाः । महद्धूर्चा तैः समारब्धं, स्नात्रं तत्र जिनालये ॥१०३॥
सापि तत्र प्रपापाली, गता स्नात्रदिदृक्षया । स्नाप्यमानस्तया दृष्टो, जिनः कुम्भैः पयोभृतैः ॥१०४॥
ततो हर्षभरापूर्णा, मनस्येवं व्यचिन्तयत् । अहो धन्या इमे लोकाः, पुण्यवन्तः कृतार्थकाः ॥१०५॥
श्लाघ्यमेषामिदं जन्म, य एनं परमेश्वरम् । कुङ्कुमोदकसम्पूर्णैः, सत्कुम्भैः स्नपयन्त्यहो ॥१०६॥
अहमपुण्याऽधन्यैव, निष्पुण्या दुःखदुःखिता । दुर्गदारिद्र्यसन्दग्धा, किं कुर्वे धनवर्जिता ? ॥१०७॥
ममापि वसुधालभ्य-मत्र सम्पद्यते पयः । न च कुङ्कुमकर्पूर-श्रीखण्डादि धनं विना ॥१०८॥
अतोऽहं केवलेनापि, नीरेण परमेश्वरम् । स्नपयामि ममापीह, येन धर्मः प्रजायते ॥१०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचिन्त्यैवं पयःपूर्णं, कुम्भमादाय भक्तितः । स्नापयामास तद्बिम्बं, रोमाञ्चाञ्चितविग्रहा ॥११०॥
ततश्च स्थापयामास, पयःपूर्णं मनोहरम् । प्रत्यग्रं मृन्मयं कुम्भं, भावसारं तदग्रतः ॥१११॥
एवं चानेकधा तत्र, दृष्टं दुर्गतया तया । क्रियमाणं जिनेन्द्रस्य, स्नात्रं नानाविधैर्जनैः ॥११२॥
तयापि स्नापितं तत्र, तद्बिम्बं भूरिशो जलैः । पूजितं च मुधालभ्यैः, कुसुमैः काननोद्भवैः ॥११३॥
अथाऽसौ स्वायुषश्छेदे, दुर्गता स्त्री मृता सती । तस्मिन्नेव पुरे जाता, **सिंहसेन**महीपतेः ॥११४॥

चन्द्रश्रीकुक्षिसम्भूता, दुहिता **कुन्दकन्दली** ।
रूपसौभाग्यसम्पन्ना, लावण्यामृतकूपिका ॥११५॥

अथासौ वर्धते बाला, पुष्णन्ती सकलाः कलाः । क्रीडाभिश्च ह्यनेकाभिः, क्रीडन्ती हर्षनिर्भरम् ॥११६॥
अन्यदा च जगामासौ, सखीवृन्दसमन्विता । तत्रैव सर्वतो रम्ये, कानने **कुन्दसुन्दरे** ॥११७॥
इतश्चेतो भ्रमन्ती च, नानाक्रीडापरायणा । तमेवालोकयामास, पूर्वदृष्टं जिनालयम् ॥११८॥
ततस्तत्र प्रविष्टासौ, तद्बिम्बं च विलोकितम् । वीक्षितं च चिरं कालं स्निग्धमन्थरया दृशा ॥११९॥
तथासौ चिन्तयामास, क्व मन्ये दृष्टपूर्वकम् । जैनचन्द्रमिदं गेहं, बिम्बं चेदं मनोहरम् ॥१२०॥
काननं च मनोहारि वृक्षसन्दोहसङ्कुलम् । पत्तनं च जनश्चैष, क्व दृष्टोऽयं नराधिपः ॥१२१॥
एवं विचिन्तयन्त्याश्च, तस्याः शुद्धिविशेषतः । जातिस्मरणमुत्पन्नं, प्राचीनभवगोचरम् ॥१२२॥
तेनालोकि स्ववृत्तान्तः, सर्वः पूर्वभवोद्भवः । ततो मूर्च्छावशादेषा, पपात धरणीतले ॥१२३॥
ततश्चाकुलचित्तेन, सखीलोकेन सत्वरम् । वीजिता तालवृन्ताद्यैः, सिक्ता शीतलवारिणा ॥१२४॥
क्षणेन लब्धचैतन्या, स्वस्थीभूता समुत्थिता । वृत्तान्तमिममाकर्ण्य, तत्रायातो नरेश्वरः ॥१२५॥
ततः पृष्टा नरेन्द्रेण, मूर्च्छाकारणमादरात् । तयापि कथितः सर्व-स्तस्मै पूर्वभवो निजः ॥१२६॥
ततश्च विस्मितो राजा, शेषलोकश्च पौरवः । हृष्टः प्रशंसयामास, जिनपूजामहाफलम् ॥१२७॥
ततः समग्रसामग्र्या, सर्वैः सद्गन्धवस्तुभिः । महद्धर्या कारितं राज्ञा, स्नात्रं तत्र जिनालये ॥१२८॥
ततश्च कुन्दकन्दल्या, पूजितोऽसौ जिनेश्वरः । कर्पूरकुङ्कुमोन्मिश्र-सच्चन्दनविलेपनैः ॥१२९॥
पूजितश्च महामूल्य-वस्त्रपुष्पादिवस्तुभिः । ततः स्तोतुं समारब्धा, संवेगभरनिर्भरा ॥१३०॥

तद्यथा- **जय जय जिण तिजगुत्तम!, जय जय तेलोक्कमंगलपईव! ।**
जय जय सुरसयसंथुय! जय जय तेलोक्कसिरिनिलय! ॥१३१॥
जय जय गुणमणिरोहण !, जय जय पणयाण सयलसुहजणय! ।
जय जय तिहुअणबंधव!, जय जय पहु तिहुयणाणंद! ॥१३२॥
तुह थोविआवि भत्ती, महल्लकल्लाणकारणं होइ ।
होइ चिय बहुफलयं, थोवंपि सुखेत्तगयबीयं ॥१३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुह दंसणेण सामिय, मज्झ पणट्ठाइं असुहकम्माइं ।
किं गरुडदंसणेणं, नासंति न विसहरकुलाइं ॥१३४॥
तुह पूयामेत्तेणवि, जीवा पावंति सयलरिद्धीओ ।
अहवा सुयणंमि कयं, थोवंपि अणंतगुणफलयं ॥१३५॥
दिट्ठे तुमंमि संपइ, मणाओ मह नाह विहलिओ मोहो ।
किं न विलिज्जंतऽहवा हिमाइं रविकरपरद्धाइं ॥१३६॥
जो तुह रूवं सामिय, पेच्छंति सिणिद्धमंथरच्छीहिं ।
ते पेच्छिज्जंति इह, साणंदं तिहुयणसिरीए ॥१३७॥
पूइज्जसि जेहि तुमं, सुरहिवरकुसुमगंधमाईहिं ।
ते सव्वत्थवि जयगुरू!, वरपूयाभायणं होंति ॥१३८॥
भत्तिभरनिब्भरंगा, नमंति जे तुम्ह पायपउमाइं ।
ते सयलसुरवरेहिं वि, नाह नमिज्जंति अणवरयं ॥१३९॥
जे पइं थुणंति सामिय ! गंभीरपयत्थविरइयज्जएहिं ।
ते थुव्वंति सुरेहिंवि, उत्तमपयसंठिया पुरिसा ॥१४०॥
ससिसंखछत्तसत्थिय-कलसंकुसलंछियाण सुहयाण ।
वरमंगलनिलयाणं, नमो नमो तुज्झ पायाणं ॥१४१॥
सुरनरपहुपणयाणं, सरणागयवज्जपंजरसमाणं ।
पणयजणसुहयराणं, नमो नमो तुब्भ चलणाणं ॥१४२॥
तह पसियसु सामि तुमं, पणईयाण कप्पपायव जिणिंद ! ।
आसंसारं जह तुह करेमि पयपूयणं अहयं ॥१४३॥

एवं स्तुत्वा जिनाधीशं, सद्भक्त्या कुन्दकन्दली । निष्क्रान्तातीवसानन्दा जिनमन्दिरमध्यतः ॥१४४॥
गता राज्ञः सकाशे सा, निषण्णा च तदन्तिके । ततस्तत्र जनैः सर्वैः, कृता पूजा विशेषतः ॥१४५॥
एवं तत्र नराधीशः, समं लोकैर्महर्द्धिभिः । कारयित्वा जिनस्नात्रं, निजमन्दिरमागतः ॥१४६॥
जिनपूजाफलं तादृ-ग्दृष्ट्वा तत्र जनो बहुः । श्रीमज्जिनेन्द्रपूजायां, यत्नं चक्रे विशेषतः ॥१४७॥
अथासौ नरनाथस्य, मन्दिरे कुन्दकन्दली । अमन्दानन्दसन्दोह-मग्ना पूर्णमनोरथा ॥१४८॥
त्रिसन्ध्यं पूजयन्ती च, जैनबिम्बानि भावतः । कुर्वन्ती श्रावकं धर्मं, शृण्वन्ती च जिनागमम् ॥१४९॥
विदधती वरवात्सल्यं, सदा साधर्मिके जने । धर्मतत्त्वं च पृच्छन्ती, गमयामास वासरान् ॥१५०॥
प्राचीनभवसम्बन्धि-तीव्रदुःखपरम्पराम् । स्मृत्वा स्मृत्वा ददौ नैव, कामभोगेषु सा मनः ॥१५१॥
निर्विण्णा कामभोगाच्च, सुव्रतार्यासमीपके । जग्राह विधिना दीक्षां, सर्वकर्मक्षयङ्करीम् ॥१५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिक्षिता द्विविधा शिक्षा,-पठितं च बहु श्रुतम्। प्रतप्तं च तपस्तीव्रं, पालितं च व्रतं चिरम् ॥१५३॥
विधायाराधनामन्ते, सिद्धान्तोक्तविधानतः। ततो मृत्वा सुरो जातः, षष्ठे कल्पे महर्द्धिकः ॥१५४॥
भुक्त्वा तत्र सुखं दिव्यं, सागराणि चतुर्दश। ततश्च्युत्वेह सञ्जातो, रससारो भवानिति ॥१५५॥
श्रुत्वेमं निजवृत्तान्तं, पूर्वजन्मसमुद्भवम्। नरेन्द्रो रससारोऽपि, जातो जातिस्मरः क्षणात् ॥१५६॥
संवेगातिशयं बिभ्रत्, ब्रूते सूरिं कृताञ्जलिः। संसारवासतः स्वामि-न्निर्विण्णो नितरामहम् ॥१५७॥
कृत्वा सौस्थ्यं निजे राज्ये, ग्रहीष्ये युष्मदन्तिके। संसारोत्तारिणीं दीक्षां, सकलक्लेशनाशिनीम् ॥१५८॥
अत्रार्थे मा प्रमादीस्त्व-मित्युक्ते सति सूरिणा। सूरिं प्रणम्य भूपालो, निजमन्दिरमागतः ॥१५९॥
समस्तमन्त्रिसामन्त-सम्मतेन सतां मतम्। स्वराज्ये स्थापयामास, जयसारं निजाङ्गजम् ॥१६०॥
यदन्यदपि कर्तव्यं, तदशेषं विधाय सः। श्रुतसुन्दरसूरीणा-मन्ते दीक्षां गृहीतवान् ॥१६१॥
ततस्तेनाचिरादेव, संसारभयभीरुणा। गृहीता द्विविधा शिक्षा, ग्रहणासेवनरूपिका ॥१६२॥
षष्ठाष्टमार्धमासादि-तपस्तप्तं सुदुष्करम्। द्रव्याद्यभिग्रहैः सार्धं, पालितः संयमश्चिरम् ॥१६३॥
कृत्वा द्वादशवर्षाणि, संलेखनां विधानतः। पर्यन्तेऽनशनं कृत्वा, समभावसमन्वितः ॥१६४॥
मृत्वा च वैजयन्तेऽसौ, सञ्जातोऽनुत्तरः सुरः। ततश्च्युत्वा विदेहेषु, राजा भूत्वा महाबलः ॥१६५॥
लब्ध्वा चारित्रसल्लक्ष्मीं, पालयित्वा च निर्मलाम्। प्रलीनाशेषकर्मांशो, गतः सिद्धिं महापुरीम् ॥१६६॥

इत्यष्टम**पूजाफलकथानकं** परिसमाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तानि पुष्पाद्यष्टविधपूजाफलसूचकान्यष्टावपि कथानकानि,

अथ प्रकारान्तरेण पूजामेवाह–

अष्टस्वङ्गेषु वा पूजा, पुष्पैरष्टभिरर्हतः ।
विशुद्धप्रणिधानेन, कर्माष्टकक्षयङ्करी ॥६०॥
अष्टकर्मविनिर्मुक्त-पूज्यसद्गुणसूचिका ।
अष्टपुष्पी समाख्याता, फलं भावनिबन्धनम् ॥६१॥
एकेनापि हि पुष्पेण, पूजा सर्वविदः कृता ।
त्रिजगत्यपि तन्नास्ति, वस्तु सद्यन्न यच्छति ॥६२॥

इति श्लोकत्रयं स्पष्टं, नवरमष्टावङ्गान्यमूनि शीर्षं उरः उदरः पृष्टिः द्वौ बाहू द्वे उरुणी एतेष्वष्टस्वङ्गेषु एकैकपुष्पदानात्पुष्पाष्टकम् **अर्हतस्तीर्थकृतो विशुद्धप्रणिधानेन** निर्मलान्तःकरणेन **कर्माष्टकक्षयङ्करी** ज्ञानावरणाद्यष्टकर्मोच्छेदकारिणीति तथाऽ**ष्टकर्मविनिर्मुक्तपूज्य-सद्गुणसूचिके**त्यष्टकर्मविनिर्मुक्तश्चासौ पूज्यश्च तीर्थकृत्तस्य सद्गुणास्तेषां सूचिका प्रदर्शिका **अष्टपुष्पीति** संज्ञया समाख्याता कथिता फलं कार्यं **भावनिबन्धनं** शुभाध्यवसायनिमित्तं तथै**केनाऽपि हि पुष्पेणेति** श्लोकः सुगमः इति श्लोकत्रयार्थः ॥६०-६२॥

अथ विलेपनपूजामाह-

आदाय कुङ्कुमं रम्यं, कर्पूरोन्मिश्रचन्दनम् ।
विलेपनं जिनेन्द्रस्य धन्यैरेव विधीयते ॥६३॥

श्लोकोऽयं सुगमः

अथाभरणपूजाभिधित्सया श्लोकत्रयमाह–

नानारत्नसमाकीर्णै-र्हारिहाटकनिर्मितैः ।
कण्ठकैः कुण्डलैः कान्तैः, कङ्कटैः कर्णपूरकैः ॥६४॥
हारिहारैर्महामूल्यैः, कङ्कणैर्बीजपूरकैः ।
सद्रत्नस्वर्णपद्मादि-भूषणैर्भवभेदिनम् ॥६५॥
शान्तं कान्तं शिवं सौम्यं, जिनबिम्बं यैर्न भूषितम् ।
श्रीणां कर्मकरा मूढा-स्ते नरा मूर्खशेखराः ॥६६॥

नानारत्नसमाकीर्णैरनेकरत्नसङ्कुलैर्हारिहाटकनिर्मितैः शोभायमानस्वर्णनिष्पन्नैः **कण्ठकै**ः कण्ठाभरणैः कङ्कटैर्मुकुटैः कर्णपूरकैः कर्णाभरणविशेषैरिति श्लोकार्थः ॥६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हारिहारैः शोभयमानमुक्ताफलाद्याभरणविशेषैः **कङ्कणैर्हस्ताभरणैः बीजपूरकैः** [१]सुवर्णादिनिर्मितप्रसिद्धफलविशेषैः **सद्रत्नस्वर्णपद्मादिभूषणैः** प्रधानरत्नकनककमलाद्यनेकप्रवराभरणैर्भवभेदिनं संसारविदारकमिति ॥६५॥

शान्तं कान्तमित्यादि सुगममिति श्लोकत्रयार्थः ॥६६॥

अथ वीतरागस्य पुष्पादिपूजाया अनुपयोगित्वमाशङ्क्य परिहरन् श्लोकत्रयमाह–

यदि ब्रूयान्नरः कोऽपि, पूजया किं प्रयोजनम् ।
वीतरागस्य ? वाच्योऽसौ, सत्यमेव त्वयोदितम् ॥६७॥
शीतोष्णकालयोर्यद्व-ज्जनो यत्नेन सेवते ।
जलानलौ तयोर्नैव, गुणः कोऽपि प्रजायते ॥६८॥
तथापीहोपकारोऽस्ति, तत्सेवाकारिणामलम् ।
एवमेव स विज्ञेयो, जिनपूजाविधायिनाम् ॥६९॥

यदि ब्रूयाद्यदि वदेत् [**नरः**] मनुष्यः **कोऽपि** कश्चित्पूजया सपर्यया किमिति प्रश्ने **प्रयोजनं** कार्यं, **वाच्योऽसौ** वक्तव्योऽसौ, **सत्यमेवाऽवितथमेव त्वया** भवतोदितं भणितमिति, एवमाशङ्क्योत्तरमाह–

शीतोष्णकालयोः प्रतीतयोर्यद्वद्येन प्रकारेणजनो लोको **यत्नेनादरेण सेवते** आश्रयते **जलानलौ** सलिलज्वलनौ **तयोर्जलानलयोर्नैव गुणो** नैवोपकारः **कोऽपि** कश्चित्**प्रजायत** भवतीति ॥६७-६८॥

तथापीह तथाप्यत्रोपकारो गुणोऽस्ति विद्यते **तत्सेवाकारिणां** जलानलसेवाविधायिनां, तत्र जलम् सेवमानानां पङ्कदाहतृष्णापनोदलक्षणो गुणो जायते, अनलसेविनां पुनः शीतापगमादिक इति **एवमेवेत्थमेव** स उपकारः पुण्यबन्धलक्षणो **विज्ञेयो** ज्ञातव्यो **जिनपूजाविधायिनां** सर्वज्ञसपर्याकारिणामिति उक्तञ्च–

"पूयाए कायवहो, पडिकुट्ठो सो य नेय पुज्जाणं ।
उवगारिणित्ति तो सा, परिसुद्धा कह ? णु होइत्ति ॥१॥

---

१ सुवर्णादिफलप्रसिद्ध° BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भन्नइ जिणपूयाए, कायवहो जइवि होइ कहिंचि ।
तहवि तई परिसुद्धा, गिहीण कूयाहरणजोगा ।।२।।
असयारंभपवत्ता, जं च गिही तेण तेसिं विन्नेया ।
तन्निवित्तिफलच्चिय, एसा परिभावणीयमिणं ।।३।।
उवगाराभावंमि वि, पुज्जाणं पूयगस्स उवगासे ।
मंताइसरणजलणाइ-सेवणे जह तहेहंपि ।।४।।
देहाइनिमित्तंपि हु, जे कायवहंमि तह पयट्टंति ।
जिणपूयाकायवहंमि, तेसिमपवत्तणं मोहो ।।५।।
[पञ्चाशक प्र० ४/४१-४५] इति श्लोकत्रयार्थः ।।६९।।

अथ जिनपूजाकरणं प्रत्युपदेशं प्रयच्छन् श्लोकपञ्चकमाह–

रागद्वेषसमुद्भूत-ग्रन्थेरत्यन्तदुर्भिदः ।
यदि भो ! भेदने वाञ्छा, कुरुध्वं तज्जिनार्चनम् ।।७०।।
जिनार्चनान्महापुण्यं, महापुण्याच्च सम्पदः ।
सम्पदः शिष्टलोकस्य, स्वर्गमोक्षप्रसाधिकाः ।।७१।।
प्राणैः प्राहुणकप्रायैः, विशरारुणि शरीरके ।
करिकर्णचले वित्ते, चित्ते चिन्तासमाकुले ।।७२।।
एतदेव हि साफल्यं, जन्मजीवितयोर्जनाः ।
यज्जिने क्रियते पूजा, त्रिसन्ध्यं शुद्धचेतसा ।।७३।।
जिनं पूजयतो यस्य, यान्त्यहानि निरन्तरम् ।
तस्यैव सफलं वित्तं, स पुमान् स च पण्डितः ।।७४।।

इति श्लोकपञ्चकं सुगममेव ।।७०-७४।।

अथ जिनपूजाप्रणिधानमपि दर्शयन् श्लोकमेकमाह–

प्रणिधानमपि प्राहु-र्जिनपूजनगोचरम् ।
स्वर्गादिसाधनायालं, दुर्गताया इव स्त्रियः ।।७५।।

प्रणिधानमप्यभिप्रायोऽपि प्राहुर्ब्रुवते जिनपूजनगोचरं तीर्थकरार्चनविषयं स्वर्गादिसाधनायालं स्वर्गमर्त्यसुखसाधनायालं स्वर्गमर्त्यसुखसाधनाय समर्थं पारम्पर्येण सिद्धिशर्मप्रसाधनायाप्यलं भवतीति, दुर्गताया इव दारिद्र्योपद्रुताया इव स्त्रियो नार्या इति श्लोकसमुदायार्थः ।७५।। भावार्थः कथानकादवसेयस्तच्चेदं–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्गतानारीकथा

इह हि भक्तिनिर्भरानेकनाकनाकीननिकरानुगम्यमानमार्गोऽमरवरनिर्मितस्फुरदुरुरुचिरुचिरतरचारु-चामीकरप्रवरतरवारिरुहनिकरोपरिक्षिप्तप्रशस्तसमस्तस्वस्तिकाद्यतुललक्षणावलिकलितसरलसुकुमा-लविमलतरचारुचरणकमलयुगलो निजकतनुप्रभवप्रभास्वरप्रभामण्डलविदलिताखिलदिक्चक्रवालो-ज्जृम्भमाणतिमिरभवप्राग्भारः, सकलत्रैलोक्यप्रभुः, सकलसद्गुणरत्नरत्नाकरः, [1]श्रीमन्महावीर वर्धमानस्वामी ईक्ष्वाकुकुलनन्दनः प्रसिद्धसिद्धार्थपार्थिवपुत्रः पुत्रीयितनिखिल-भुवनजनो जनितजन-मनश्चमत्कारगुणग्रामो ग्रामाकरनगरपुरपूर्पृथ्वीं पृथिवीं विहरन्नन्यदा कदाचित्काकन्दीनामिकायां पुरि समाजगाम । तत्र चामरवरविसरविरचितसमवसरणमध्यवर्तिनि भगवति धर्मदेशनां विदधति, तथा नानाविधयानवाहनसमारूढप्रौढपत्तिपरिगते गन्धसिन्धुरस्कन्ध-मधिष्ठिते छत्रछन्ननभस्तले मागधोद्गीतगुणगणे भेरीभाङ्कारभरिताम्बरतले नरपतौ तथा द्विजवरवैश्यादिके पुरजने, तथा गन्धधूपपुष्पपटलप्रभृतिपूजापदार्थव्यग्रकरकिङ्करीनिकरपरिगते विविधवसनाभर- णरमणीयतरशरीरे नगरनारीनिकरे भगवतो वन्दनार्थं व्रजति सति एकया वृद्धदरिद्रयोषिता जलेन्धनाद्यर्थं बहिर्निर्गतया कश्चिन्नरः पृष्टः क्वायं लोक एकमुखस्त्वरितं याति तेनोक्तं जगदेकबान्धवस्य देहिनां जन्मजरामरणरोगशोकदौर्गत्यादिदुःखच्छिदुरस्य श्रीमन्महावीरस्य वन्दनपूजनाद्यर्थं । ततस्तच्छ्रवणात्तस्या भगवति भक्तिरभवदचिन्तयच्च, यथाहमपि भगवतः पूजार्थं यत्नं करोमि, केवलमहं दुर्गता पुण्यरहिता विहितपूजाङ्गवर्जितेति, ततोऽरण्यदृष्टानि मुधालभ्यानि सिन्दुवारकुसुमानि स्वयमेव गृहीत्वा भक्तिनिर्भराङ्गी अहो धन्या पुण्या कृतार्था कृतलक्षणाहं, सुलब्धं मम जीवितं, मनुष्यजन्मफलं वाहमवाप्तेतिभावनया पुलककण्टकितकाया प्रमोदजल- प्लवप्लावितकपोला भगवन्तं प्रति प्रयान्ती समवसरणकाननयोरन्तराल एव वृद्धतया क्षीणायुष्कतया च झगिति मृतिमुपागता, ततः साऽविहितपूजापि पूजाप्रणिधानोल्लसितमानसतया देवत्वमवाप्नवती, ततस्तस्याः कलेवरमवनीपीठलुठितमवलोक्यानुकम्पापरीतान्तःकरणो लोको मूर्च्छितेयमिति मन्यमानोम्भसा सिषेच, ततस्तामपरिस्पन्दामवलोक्य लोको भगवन्तं पप्रच्छ, भगवन्नसौ वृद्धा किं मृता ?, न जीवतीति ? भगवांस्तु व्याजहार यथा मृतासौ देवत्वं चावाप्ता ।

ततः पर्याप्तिभावमुपगत्य प्रयुक्तावधेः पूर्वभवानुभूतमवगम्य मद्वन्दनार्थमागतः स चायं मत्पुरोवर्ती देव इति । ततो भगवदभिहितमिदमनुश्रुत्य समस्तसमवसरणधरणीगतो जनः परमविस्मयमगमत्, यथा-अहो ! पूजाप्रणिधानमात्रेणापि कथममरतामवाप्तासाविति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो भगवान् गम्भीरां धर्मकथामकथयत्, यथा स्तोकोऽपि शुभाध्यवसायो विशिष्टगुणपात्रविषयो महाफलो भवति तथा च–

एक्कं पि उदगबिंदु जह पक्खित्तं महासमुद्दंमि ।
जाइ अक्खयमेवं, पूयावि हु वीयरागेसु ।।१।।
उत्तमगुणबहुमाणो, पयमुत्तसत्तमज्झयारम्मि ।
उत्तमधम्मपसिद्धी, पूयाए वीअरागाणं ।।२।। [पञ्चा. ४/४८]

ततो भगवांस्तत्सम्बन्धिनं [1]भाविव्यतिकरमकथयत्, स दुर्गतयोषाजीवो देवो देवलोकाच्च्युत्वा **कनकपुरे** नगरे **कनकध्वज**नामा राजा भविष्यति, स च जन्मान्तरोपार्जितपुण्यप्राग्भारवशेन सांसारिकसुखान्यनुभवन्नन्यदा शरत्काले शक्रमहोत्सवप्रदर्शनार्थं निर्गच्छन्नन्तरा सरःपरिसरे दर्दुरं भुजङ्गेन भुजङ्गमं कुररेण, कुररमजगरेण च ग्रस्यमानं दृष्ट्वा संवेगमापन्नो भवनिर्विण्णमना चिन्तयिष्यति, यथायं दर्दुरः स्वल्पबलो महाबलेन भुजङ्गमेन ग्रस्यते, भुजङ्गमोऽपि तदधिकबलेन कुररेण ग्रस्यते, कुररोऽप्यजगरेण चैवं कृषीवलो बलाधिपेन, बलाधिपोऽप्यमात्येन, अमात्योऽपि राज्ञा, राजापि चक्रवर्तिना चक्रवर्त्यपि मृत्युना यथाबलं बाध्यते, तदेवमसारोऽयं संसार इति वितर्कयन् संवेगमापन्नः प्राज्यं राज्यं तृणवत्परित्यज्य शब्दादिविषयान् विषविषमान् परिकलय्य प्रत्येकबुद्धो भविष्यति, स चाद्यदिन एव द्रव्यक्षेत्रकालभावभेदभिन्नानभिग्रहान् ग्रहीष्यति, दुष्करतरतपोभिर्निष्टप्तसर्वाङ्गो निरतिचारां [2]प्रव्रज्यां चिरकालं परिपाल्य प्रवर्धमानशुभपरिणामोऽयोध्यायां **शक्रावतार**चैत्योद्याने शुद्धभूतलेऽनशनं करिष्यति, मूलोन्मूलितघातिकर्मा समुत्पन्नदिव्यज्ञानः क्षपकश्रेणिमारुह्य निरुद्धयोगत्रिकः शैलेशीं प्रतिपद्य निःशेषिताशेषकर्मांशोऽष्टमे भवे निर्वाणं गमिष्यति, एवं च पूज्यपूजाप्रणिधानमपि महाफलमिति ।।७५।। किञ्च–

ऐश्वर्येणापि किं तेन, किं प्रभुत्वेन भूयसा ।
पाण्डित्येनापि किं तेन ?, जिनो यत्र न पूज्यते ।।७६।।

स्पष्टम् । इति धर्मरत्नकरण्डके जिनपूजाविषये

द्वितीयोऽधिकारः समाप्तः ।। श्रीरस्तु ।।

---

१ J । भाविभव्यति° BPC । भाविभवव्यति° पञ्चाशक वृत्तौ ।।

२ श्रमणत्वमुपगम्य देवत्वमवाप्स्यति । एवं भवपरम्परया अयोध्याया नगर्याः शक्रावतारनाम्नि चैत्ये केवलश्रियमवाप्य सेत्स्यति-इति पञ्चाशकटीकायाम् ४/४९ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुभक्त्यधिकारः ३

अथ गुरुभक्तिरिति तृतीयोऽधिकार आरभ्यते-अस्य चायमभिसम्बन्धः, अनन्तराधिकारे पूजाविधिरुक्तः, तत्र जिनस्य जिनपूजनस्य च स्वरूपं गुरुभक्तिप्रसादत एव ज्ञायते, इत्यतो गुरुभक्तिप्रशंसात्राभिधीयते, इत्यनेन सम्बन्धेनागतोऽयं व्याख्यायते, तत्र गुरुरिति कः शब्दार्थः ? उच्यते 'गृ निगरणे, इत्यस्य उणादिकउप्रत्ययान्तस्य गुरुरिति भवति, गृणाति प्रतिपादयति शिष्येभ्यः शास्त्रार्थमिति गुरुस्तस्य भक्तिः सेवा पर्युपासनेति पर्यायाः गुरुभक्तिस्तस्याः प्रशंसा श्लाघा, गुरुभक्तेरिहलौकिकपारलौकिकगुणोपवर्णनमित्यर्थः, गुरुभक्तिप्रशंसात्र वर्ण्यत इति सम्बन्धः, तत्रायमादिश्लोकः-

गुरुभक्तिर्भवाम्भोधे-स्तारिका दुःखवारिका ।
धन्यानां वर्तते चित्ते, प्रत्यहं नौरिव दृढा ।।७७।।

गुरुभक्तिर्धर्माचार्यबहुमानो भवाम्भोधेः संसारसमुद्रात्तारिका, तारणकारिका, दुःखवारिका शारीरमानसाशर्मनिषेधिका, धन्यानां धर्मधनलाभवतां वर्तते सन्तिष्ठते नौरिव बेडेव दृढा बलिष्ठेति श्लोकसमासार्थः ॥१॥

तत्र-गुरुलक्षणमिदं-

धर्मज्ञो धर्मकर्ता च, सदा धर्मप्रवर्तकः ।
सत्त्वेभ्यो धर्मशास्त्रार्थ-देशको गुरुरुच्यते ।।१।।

अथवा- **जो जेणं जंमि ठाणंमि, ठाविओ दंसणे च चरणे वा ।**
सो चेव तस्स भन्नइ, धम्मगुरू धम्मदाणाओ ।।२।।

इति प्रथमश्लोकभावार्थः ॥७७॥

अथ गुरुभक्तेः फलमाह-

यत्र शिष्टसमाचारो, यत्र धर्मव्यवस्थितिः ।
तत्राविगानतो दृष्टं, गुरुतत्त्वं विचक्षणैः ।।७८।।

यत्र कुत्रापि शिष्टजनसमाचारो धार्मिकजनसमाचारो [यत्र च धर्मस्य व्यवस्थितिर्व्यवस्था] तत्र, विगानं व्यभिचारः न विगानमविगानं तस्मादविगानतो निश्चयेन दृष्टमुपलब्धं गुरुतत्त्वं धर्माचार्यरहस्यं विचक्षणैर्विद्वद्भिरिति श्लोकार्थः ॥७८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ गुरुभक्तिफलमेव दृष्टान्तेन स्पष्टमाचष्टे-

प्रथमान्तिमतीर्थेशै-स्तीर्थकृन्नामकर्मणः ।
बीजं लब्धमटव्यां य-द्गुरुभक्तिस्तत्र कारणम् ॥७९॥

प्रथमान्तिमतीर्थेशैः प्रथमपश्चिमतीर्थनायकैः **प्रलब्धं** प्राप्तं **बीजं** कारणं कस्य ? **तीर्थकृन्नामकर्मणः** तीर्थकरैर्भूयते येन कर्मणा तत्तीर्थकृन्नामकर्म तस्य, कुत्र बीजं लब्धं? **अटव्यां** शून्यारण्ये **गुरुभक्तिर्धर्माचार्येतिकर्तव्यता, तत्र** तीर्थकृन्नामकर्मलाभे **कारणं** हेतुः ॥७७-८२॥

तथाहि **धनेन** वाणिज्यार्थं विनिर्गतेन वर्षाकालव्याहतगमनेनाटव्यां सन्तिष्ठता सीदतां साधूनां घृतप्रदानेन तीर्थकरत्वबीजमासादितम्। महावीरजीवेनाप्यपरविदेहे ग्रामचिन्तकेन सता राजादेशेन काष्ठनिमित्तं कान्तारमनुप्रविष्टेन सार्थपरिभ्रष्टा निरशना अटव्यां पर्यटन्तः साधवो दृष्टाः, समाहूय भक्तपानेन च प्रतिलाभिताः स्वस्थावस्था मार्गे चावतारिताः। ततश्च साधूनां तं प्रत्यनुकम्पा समजनि, धर्मदेशना कृता, बोधिबीजं च तेन प्राप्तमिति। यदाह-

अवरविदेहे गामस्स, चिंतओ रायदारुवणगमणं ।
साहूभिक्खनिमित्तं, सत्था हीणे तहिं पासे ॥१॥
दाणं दाउं पंथणयणं, अणुकंपगुरूण कहण सम्मत्तं ।
सोहम्मे उववन्नो, पलियाउ सुरो महिड्ढीओ ॥७९॥

[आवश्यकनि० भा० १४६ पृ० ७३]

व्यतिरेकमाह-

पापोपहतबुद्धीनां, येषां चेतसि न स्थिता ।
गुरुभक्तिः कुतस्तेषां, सम्यग्दर्शनमुत्तमम् ॥८०॥

पापेन पापाभिसन्धिनोपहता दूषिता मतिर्बुद्धिर्येषां ते पापोपहतबुद्धयस्तेषां **येषां** केषांचिच्चेतसि मनसि **न स्थिता** नावस्थानं कृतवती **गुरुभक्तिर्धर्माचार्येतिकर्तव्यता, कुतः** कस्मान्न कुतोऽपीति, **सम्यग्दर्शनं** सद्बोधलक्षणमुत्तमं प्रधानम् ॥८०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु सम्यग्दर्शनेन किं कार्यं ? चारित्रधर्म एव श्रेयानिति यो ब्रूयात्तस्य दूषणमाह–

तद्भावादुत्तरो धर्मः, साधुश्रावकलक्षणः ।
तस्मान्मिथ्यादृशः पापाः, साधुनिह्नवकारिणः ॥८१॥

तद्भावाद्दर्शनलाभभावादुत्तरो देशविरतिसर्वविरतिलक्षणो धर्मो दुर्गतिनिपतज्जन्तु-जातधरणप्रवणो जीवपरिणामः, यतः–

दुर्गतिप्रसृतान् जन्तून्, यस्माद्धारयते ततः ।
धत्ते चैतान् शुभे स्थाने, तस्मांद्धर्म इति स्मृतः ॥१॥

साधुश्रावकलक्षणो गृहियतिस्वरूपः **तस्मान्मिथ्यादृशो** विपरीतदृष्टयो न सन्ति दुष्षमायां साधव इति वादिनः ॥८१॥ यतः–

न विना साधुभिस्तीर्थं नाऽतीर्थे साधुसम्भवः ।
समं सत्ता तयोर्गीता, सर्वज्ञैः सर्वदर्शिभिः ॥८२॥

न विना न ऋते **साधुभिर्मुनिभिस्तीर्थं** संसारसागरसन्तरणतरण्डकल्पं, **न च नैवातीर्थे** जिनान्तरादौ **साधुसम्भवः** साधुसत्ता, **सममेककालं सत्ता** विद्यमानता **तयोः**साधुतीर्थयोर्गीता प्रतिपादिता, कैः? **सर्वज्ञैः** सर्ववस्तुस्तोमविशेषवेदिभिः **सर्वदर्शिभिः** समस्तवस्तुसामान्यावलोकिभिः ॥८२॥

ननु भवतु शुभकाले सुषमासुषमादावुभयसत्ता, साम्प्रतं श्रावकैरेव तीर्थं यातीति यो मन्येत तन्मतं निरस्यन् श्लोकमाह–

अद्यापि दुःषमाकाले, यावद्दुष्प्रसहप्रभुः ।
तावच्चरणसत्तापि, भगवद्वाक्यतः स्थिता ॥८३॥

अद्याप्यधुनापि **दुःषमाकाले** कालचक्रस्य पञ्चमेऽरके कियन्तं कालं यावदिति परिमाणार्थः **दुष्प्रसहो** दुष्प्रसहाभिधानः **प्रभुः** सूरिस्तावदिति तावन्तं कालं **चरणसत्तापि** चारित्रसम्भवोऽपि **भगवद्वाक्यतः** श्रीमन्महावीरवर्धमानस्वामिवचनात्**स्थिता** प्रतिष्ठिता ॥१॥

उक्तं च-**दुप्पसहंतं चरणं, जं भणियं भगवया इहं तित्थे ।**
आणाजुत्ताण इमं, न होइ अहुणत्ति वामोहो ॥१॥ [उपदेशपद ८०९]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परितुलियनियबलाणं, सत्तीए जहागमं जयंताणं ।
संपुन्नाचिय किरिया, दुप्पसहंताण साहूणं ॥२॥
एवं च सति-जो भणइ नत्थि धम्मो, न य सामाइयं न चेव य वयाइं ।
सो समणसंघबज्झो, कायव्वो समणसंघेण ॥३॥

इहच दुष्प्रसहसूरिवक्तव्यता एवमागमे श्रूयते, सा च मूलादारभ्य कथ्यते,
तदद्यथा-बायालवाससहसूणि-यत्तिए सेक्ककोडिकोडित्ति ।
गोयमवोत्थो कालो, एत्थ जिणा चक्किजुयलाइं ॥१॥
चउप्पन्नमहापुरिसा, चोत्थे अरयम्मि जंति गणनाह ।
चोत्थारयस्स सेसे, तिवासअद्धनवमाससेसेसु ॥२॥
मम सिद्धिगयस्स पुणो, पालगराया अवंतिनयरीए ।
होही तं रयणीए, सट्ठि वरिसाइं पुहइवई ॥३॥
तस्स पुट्ठीए नंदाए, पणपन्नसयं च होइ वासाणं ।
मरुयाणं अट्ठसयं, तीसच्चिय पूसमित्तस्स ॥४॥
बलमित्तभाणुमित्ता, सट्ठी होहंति वास रायाणो ।
नहवाहणो य राया, होही चत्ताउ वासाणं ॥५॥
तह गद्दहिल्लरज्जं, बावन्नसयं च पंचमासहियं ।
एयाणं अवसाणे, होही य पुणो सगो राया ॥६॥
छव्वाससएहिं, समं पंचपंचमासेहिं ।
सिद्धिगयस्स उ राया, सगोत्ति नामेण विक्खाओ ॥७॥
तेरसवाससएहिं, तेवीसइवासवट्टिमेहिं च ।
पाडलिपुत्ते राया, कक्की होइत्ति सगरन्नो ॥८॥
एगुणवीसवरिसाणं, सयगए अट्ठवीसवासाइं ।
वोलीणं पंच मासा, मम सिद्धिगयस्स गणनाह ! ॥९॥
होही चंडालकुले, कक्की रुद्दो य चेत्तमासम्मि ।
अट्ठमि विठीजाओ चउम्मुहो बीयनामेणं ॥१०॥
तम्मि दिणे महुराए, महुमहभवणं पडिस्सए तुंगं ।
कूरस्स तस्स उदए, देव य साहू निवारेही ॥११॥ [विचारसारप्र० ४९२-५००]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गावीरूवं काउं, अन्नह वच्चह एस पावोत्ति ।
सिस्सीहुंति कुलिंगा, चोरेहिं पया विलुप्पिहिहि ॥१२॥
रायडमरेहिं दलिया, गामा होहिंति नाममेत्तेण ।
तस्स उदएण भरहं, होही बहुदुक्खपडिपुन्नं ॥१३॥
हिंडंतो दट्ठूणं, पंचवि थूभे उ नंददव्वस्स ।
जाणेत्ता खणिऊणं, थूभे लेहिई तं दव्वं ॥१४॥
पासंडा फेडेही, भंजेवि करेहिं साहु पुण भिक्खं ।
पावो उ भोगवंतो, वारेही देवया तइया ॥१५॥
[1]निमिहीज्जिही पुरं सव्वं, सोएणं गरुयगंगावाहेणं ।
सत्तरस उ तत्थ दिणा, देवो वासेही निचिद्धं ॥१६॥
सो धणपरियणसहिओ, वलासिओ नंददविणकयनिचओ ।
छुट्टेही महपावो पउरं वुब्भिहिइ गंगाए ॥१७॥
पच्छा तेण धणेणं, पुरं समारित्तु भुंजिही रज्जं ।
पाडिवओ आयरिओ, छुट्टेही तत्थ जोगेणं ॥१८॥
नयरे मिम्मायंगी, देवो वरिसिही होइइ सुभिक्खं ।
पडिएणवि कुंभेणं, न किणंता तत्थ होहिंति ॥१९॥
पुणरवि सो साहूणं, गोवाडनिसेहणं करेऊणं ।
मग्गिही भिक्खभागं, अइलुद्धो पावपडिवद्धो ॥२०॥
आयरिओ पाडिवओ, कप्पववहारधारओ तइया ।
संघसहिओ महप्पा, सक्कस्स य देवरन्नस्स ॥२१॥
काउं काउस्सग्गं, अच्छिही ताव जाव सक्कस्स ।
होही आसणकंपो, आगंतू सो वहेसी य ॥२२॥
छासीसो वासाणं, महराया होइऊण एवमओ ।
गच्छेही पुण नरयं, कक्कीरायत्ति मे कहियं ॥२३॥
सक्केण कक्किपुत्तो, दत्तो अणुसासिऊण जिणधम्मे ।
ठविओ सो पुण रज्जे, होही जिणसाहुपूयरओ ॥२४॥
तइया इंदवयारे, दिट्ठे धम्मस्स गुरुपहावंमि ।
बहुलोओ जिणभत्तो, काही साहूण पूयाओ ॥२५॥

---

१ BJPC-निमिं नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो दत्तो महाराया, काही जिणभवणमंडियं वसुहं ।
होहिंति अवहिओ, समणा होहिंति सुव्वइणो ॥२६॥
दत्तसुओ जियसत्तू, होही तस्सवि य मेहघोसो त्ति ।
जिणपूयणरया लोगा, सक्कवयारेण होहिंति ॥२७॥
अन्नन्नरायवंसा, होहिंति य गोयमा ! वियाणेहि ।
जा विमलवाहणो नर-वइत्ति ता रायधम्मोत्ति ॥२८॥
दुप्पसहो जा साहू, होहिंति जुगप्पहाण आयरिया ।
अज्जसुहम्मपभिई, चउसहिया दोन्नि उ सहस्सा ॥२९॥
वासाण सहस्सेहिं य, एक्कवीसाइ इह भरहवासे ।
दसवेयालिया अत्था, दुप्पसहजइंमि नासिही ॥३०॥
ओसप्पिणी इमीसे अ, चत्तारि पच्छिमाइ इह भरहे ।
अंतंमि दूसमाए, संघस्स चउव्विहस्सावि ॥३१॥
[1]दुप्पसहो समणाणं, सच्चस्सिरी साहुणीण पच्छमिया ।
सड्ढो नाइलनामो, फग्गुसिरी सावियाणं च ॥३२॥
राया य विमलवाहण, सुहुमो नामेण तस्स य अमच्चो ।
इय दुसमाए काले, रायामच्चा य पच्छिमया ॥३३॥
दुप्पसहो फग्गुसिरी, सच्चसिरी नाइलो य राया य ।
इय दूसमचरिमंते, दो रयणी हुंति उड्ढाओ ॥३४॥
दुप्पसहो फग्गुसिरी, सच्चसिरी नाइलो य राया य ।
इय दूसमचरिमंते, वीसइवासाउया सव्वे ॥३५॥
छट्ठचउत्थं च तहा, होही उक्कोसगं तवोकम्मं ।
अणुसट्ठो इंदेणं, काही किल अट्ठमं भत्तं ॥३६॥
दसवेयालियधारी, पूज्जिसइ जह य चोदसियपुव्वी ।
सो पुण सुट्ठुतरागं, पुज्जिसइ समणसंघेण ॥३७॥
बारसवरिसे जम्मा, अट्ठ य वासाइं होइ परियाओ ।
कालं काही तइया अट्ठमभत्तेण दुप्पसहो ॥३८॥ [विचारसारप्र. ५३५]
उववज्जिहि विमाणे सागरनामंमि सो उ सोहम्मे ।
तत्तो य चइत्ताणं, सिज्झिही नीरओ भरहे ॥३९॥

---

१ दुप्पसहो समणाणं, फग्गुसिरि साहुणीण पच्छिमिया । नाइल्लु सावयाणं, सच्चसिरि सावियाणं च ॥
इति विचारसारप्रकरणे गा. ५३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं अइक्कमंते, वाससहस्सेहिं एक्कवीसाए ।
फिट्टिही लोगधम्मो, अग्गीमग्गो जिणक्खाओ ।।४०।।
पुव्वाए संझाए, वोच्छेओ होइ चरणधम्मस्स ।
मज्झन्ने राईणं, अवरण्णे जायतेयस्स ।।४१।।
पच्छिमसंझाए भवे, छेओ कुलधम्मदेसधम्माणं ।
एसो खलु वोच्छेओ,-दूसमचरिमंमि दिवसंमि ।।४२।।

तदिमां दुष्प्रसहसूरिवक्तव्यतामाकर्ण्य न वक्तव्यं सम्प्रति चारित्रं नास्तीति, तस्य दुष्प्रसह एव व्यवच्छेद इत्यागमोक्तिरिति। अथैवंविधेऽपि चारित्रप्रतिपादके सर्वजनप्रतीते सिद्धान्तवचने यो मन्येत न सन्ति सम्प्रति साधव इति तं प्रत्यभ्युच्चयमाह–

कृत्यमार्गोपदेष्टारो, यत्र सन्ति न साधवः ।
न तत्र धर्मनामापि, कुतो धर्मः कुतः क्रिया ?।।८४।।

कृत्यमार्गोपदेष्टारः शुभमार्गोपदेशका **यत्रैकान्ते** दुःषमादौ काले **न सन्ति** न विद्यन्ते **साधवो** मुनयः न नास्ति धर्मनामाप्यभिधानमात्रमपि तत्र देशादौ तर्हि कुतो धर्मः? कुतः क्रिया सदनुष्ठानात्मिका ? न कुतोऽपि कारणाभावादिति ।।८५।। साधूनेव स्तुवन्नाह–

क्षमादिब्रह्मपर्यन्त-गुणरत्नैरलङ्कृताः ।
साधवः कलिकालेऽपि, चलन्तः कल्पपादपाः ।।८५।।

कल्पपादपा वर्तन्ते कल्पोर्वीरुहा वर्तन्ते साधव इति योगः, कथम्भूताः ?, **चलन्तश्चङ्क्रमणशीलाः** क्व ?, **कलिकालेऽपि** दुःषमायामपि, कथम्भूताः साधवः ?, क्षमामार्दवार्जवसत्यशौचब्रह्मा- किञ्चन्यतपःसंयमा एव गुणाः, त एव रत्नानि मरकतादीनि, तैरलङ्कृता विभूषिताः ।।८५।।

एवंगुणेष्वपि साधुषु ये मत्सरोपहतबुद्धयो दोषग्राहिणस्तेषां दोषदर्शनायाह–

कल्पपादपतुल्येषु, ये [सु]साधुपराङ्मुखाः ।
आत्मद्रुहो निर्मर्यादा-स्ते नरा नरकोन्मुखाः ।।८६।।

कल्पपादपतुल्येषुकल्पोर्वीरुहसमानेषु **साधुषु** मुनिषु ये केचन **पराङ्मुखा**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्भक्तिका इत्यर्थः **आत्मद्रुह** आत्मद्रोहकारिणस्ते **निर्मर्यादाः** निर्मेरा पुरुषा **नरकोन्मुखा** दुर्गतिसन्मुखा इति ॥८६॥

किमिति साधुपराङ्मुखा एवं निन्द्यन्त इत्याह–

गौरव्या गुरवो मान्या, धर्ममार्गोपदेशकाः ।
सेवनीयाः प्रयत्नेन, संसाराम्बुधिसेतवः ॥८७॥

गौरव्या गौरवार्हा **गुरवो** धर्माचार्या **मान्या** बहुमानविषया **धर्ममार्गोपदेशका** ज्ञानदर्शनचारित्रमोक्षमार्गोपदेष्टारः **सेवनीयाः** पर्युपासनीया विशेषतः **संसाराम्बुधिसेतवः** संसारसमुद्रसमुत्तरणसेतवो मार्गकल्पाः ॥८७॥

[1]**[श्रोतव्यं शुद्धसिद्धान्त-सारं च साधुभ्यः सदा ।**
तथा तदनुसारेण, विधेया सदनुष्ठितिः ॥८८॥
कार्यश्च सदौदासीन्य-भावपरिहारस्तथा ।
निन्दाऽश्रवणं दोषेषु, मूकता दुष्टनिग्रहः ॥८९॥
सदाचारप्रमत्तानां, मतमेकान्तशिक्षणम् ।
यथाऽन्योऽपि न जानाति, तथा हितं मिताक्षरैः ॥९०॥]

तथा श्रोतव्यमित्यादिश्लोकत्रयं, **श्रोतव्यं शुद्धसिद्धान्तसारं** शुद्धसिद्धान्तः सारः प्रधानो यत्र तत्र केभ्यः ? **साधुभ्यस्तदनुसारेणागमानुसारेण विधेया** कार्या, का ? **सदनुष्ठितिः** शोभनानुष्ठानरूपा सुस्थचिन्ता च साबाधनिराबाधगवेषणा च, **सदा** सर्वदौदासीन्यभावपरिहारः प्रवर्तननिवर्तनलक्षणस्य वर्जनं परिहारः **तन्निन्दाऽश्रवणं** तेषां साधूनां निन्दा दोषग्रहणलक्षणा तस्या अश्रवणमनाकर्णनं, **दोषेषु** दोषोद्घटनेषु **मूकता** मूकीभावः कार्यः, **दुष्टनिग्रहो** दुष्टानां मिथ्यादृष्टीनां यथाशक्त्या निग्रहो निवारणमपकारकरणप्रवृत्तानामिति शेषः, तथा **सदाचारप्रमत्तानां** ज्ञानादिपञ्चप्रकाराचारचरणंप्रमादिनां **मतं** सम्मतमेकान्तशिक्षणं रहः शिक्षाप्रदानलक्षणं, **यथान्योऽपि** मिथ्यादृष्ट्यादिर्न **जानाति** न वेत्ति यदनेनेदं कुकर्म सेवितमिति, तथा **हितं मिताक्षरैस्तथा** तेन प्रकारेण हितान्यागामिनि काले पथ्यानि तानि परिमितानि वर्णरूपाणि तैः ॥८८-९०॥

---

१ इदं तु ध्येयं-सर्वासु हस्तलिखितप्रतिषु मुद्रिते च नोपलभ्यते इदं श्लोकयम् (८८-९०), अस्माभिस्तु टीकानुसारं संयोज्य अत्र योजितम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र श्रोतव्यं शुद्धसिद्धान्तसारमार्हतं वच इत्युपदिष्टं तत्र ये केचन भावसारं सार्वज्ञं वचः शृण्वन्ति तेषां तावदैहिकामुष्मिकसकलकल्याणपरम्परा भवत्येव, भावविकलानामपि केषांचिद्दैवयोगेन श्रवणपथमुपगतं सत् जैनेन्द्रं वचः सकलमपि समीहितं साधयति, यथा **रौहिणेयकचौरस्य** तत्कथानकं चात्र–

अस्तीह सर्वतो रम्यं, पुरं **राजगृहाभिधम्**। स्वर्गखण्डमिवोत्तुङ्ग-देववेश्मसमाकुलम् ॥१॥
आसीत्तत्र श्रियां धाम **श्रेणिको** नाम भूपतिः। बभूव तस्य सद्बुद्धिः सुप्रसिद्धोऽभयाभिधः॥
पुत्रो मन्त्री च निःशेष-गुणसन्दोहमन्दिरम्। तथा तत्रैव सच्छैलो, **वैभारगिरिनामकः**॥
नानावृक्षसमाकीर्णो, नानागह्वरसङ्कुलः। प्रोत्तुङ्गैः शृङ्गसन्दोहैः, संरुद्धगगनान्तरः ॥४॥
तत्रानेकगुहाकीर्णे, झरन्निर्झरसङ्कुले। बभूवाशेषसत्त्वानां, सदा सन्तापकारकः ॥५॥
नानावेषधरो धीरो, धर्मवार्ताबहिष्कृतः। वसत्यलक्षितो लोकै-स्तस्करो **रौहिणेयकः** ॥६॥
माया माता जनी यस्य, मृषा हृदयवासिनी। अदत्तग्रहणं मूल-नीवी नित्यं तदापणे ॥७॥
अभक्ष्यं विद्यते नास्य, नापेयं किञ्चिदप्यहो। अगम्यं विद्यते नैव, सर्वाशी सर्वलूषकः ॥८॥
वासरे नगरस्यान्त-र्बद्धपट्टपदद्वयः। शनैः शनैश्चरत्येष, खञ्जन् क्षीणस्वरं लपन् ॥९॥
यष्टचवष्टम्भतो धूर्तो, दुःखं दुःखेन गच्छति। कासन्ननारतं रीणः कष्टंकष्टेन जल्पति ॥१०॥
भालस्थजीर्णपट्टेन, स्थगितैकविलोचनः। बभ्राम हण्डिकाहस्तो, गृहदर्शनकाम्यया ॥११॥
सधनं निर्धनं चेद-मिदं पुंभिर्विवर्जितम्। इत्यादि सकलं ज्ञात्वा, निश्चक्राम ततः पुरात् ॥१२॥
कुभोजनं परित्यज्य, हित्वा दूरे च हण्डिकाम्। सुभोजनं समानीय बुभुजेऽसौ यथेच्छया ॥१३॥
अलक्षितश्च लोकेन, गत्वा **वैभार**पर्वते। तावदास्ते निलीनोऽसौ, यावदस्तं गतो रविः ॥१४॥
ततश्च पर्वतादेष, उत्ततार शनैः शनैः। दत्त्वा समन्ततो दृष्टिं, ततो निःशङ्कमानसः ॥१५॥
वीरवेषं विधायासौ, लोकमोषणवाञ्छया। नक्तं सुप्तेषु लोकेषु, सालमुल्लङ्घ्य लीलया ॥१६॥
प्रविश्य नगरं तूर्णं, मुषित्वा चिह्नितं गृहम्। निर्जगाम तथैवासौ, तस्करो रौहिणेयकः ॥१७॥
एवं दिने दिने तेन, कुर्वता निर्धनीकृतः। राजगृहजनः सर्वो, राज्ञोऽन्तिकमुपागतः ॥१८॥
विज्ञप्तो नृपतिस्तेन, देव ! दर्शय साम्प्रतम्। पानीयस्थानमस्माकं, वस्तुमत्र न शक्यते ॥१९॥
राज्ञोक्तं केन कार्येण, कथ्यतां स्वप्रयोजनम्। जनेनोक्तं महाराज ! सावधानैर्निशम्यताम् ॥२०॥
युष्मासु विद्यमानेषु, विद्यमानेषु मन्त्रिषु। केनापीदं पुरं राज-न्ननाथमिव मुष्यते ॥२१॥
ततः सञ्जातखेदेन, भूमिपालेन भाषितम्। कथ्यतां किं गतः क्वापि, भो लोका ! दण्डपाशिकः ? ॥
श्रुत्वेदं कोट्टपालेन, विधाय करकुड्मलम्। जल्पितमेष देवाह-मादेशो मम दीयताम् ॥२३॥
भणितं भूमिनाथेन, भद्र ! किं न श्रुतं त्वया ? । यदुक्तं पौरलोकेन, विरागविधुरं वचः॥२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्करं वा लभस्वाशु, लोकानां देहि वा धनम्। न लभ्यते मुधा मूढ !, त्विदमारक्षिकं पदम्॥२५॥
कृता गवेषणा तेन, बहिरन्तश्च सर्वतः। न लब्धस्तस्करः क्वापि, ततो राज्ञे निवेदितम् ॥२६॥
न दृष्टस्तस्करो देव !, न धनं मम विद्यते। यादृशं सर्वलोकानां, दीयते प्रभुवाक्यतः ॥२७॥
एते वयमिमे प्राणा, गृहसारोऽपि तावकः। कुरु यद्रोचते तुभ्यं, किमन्यैर्बहुजल्पितैः ॥२८॥
ततो राज्ञा समाहूतो, मन्त्री मन्त्रिपुरस्सरः। नाम्नाभयकुमारोऽथ, साक्षेपं च प्रभाषितः ॥२९॥
वत्स ! पञ्चाहमध्ये त्वं, तस्करं प्रकटीकुरु। नो चेत्तस्करदण्डस्ते, पतिता नास्ति संशयः ॥३०॥
यदादिशति तातो मे, तत्करोमि न संशयः। तिष्ठत सुस्थिता यूयं, भारोऽयं मयि सम्भृतः ॥३१॥
ततस्त्रिकचतुष्केषु, शून्यागारगृहेषु च। वेश्यागृहेषु सर्वेषु, ध्वजिनामापणेषु च ॥३२॥
नदीकूपतडागेषु, देवतायतनेषु च। निरूपितो न च दृष्टो, गूढचारी स तस्करः ॥३३॥
गतान्यहानि चत्वारि, पञ्चमे च समागते। यामिन्याश्चरमे यामे, ह्यभयेन विचिन्तितम् ॥३४॥
हुं विज्ञातो मया नैष, द्वारचारी मलिम्लुचः। तदस्य ग्रहणे कोऽप्यु-पायोऽन्यश्च विचिन्त्यते ॥३५॥
सालोपरेण कोऽप्येष, सञ्चरति न संशयः। तस्माच्छालं विशालेन, मालयामि पदातिना ॥३६॥
इदं विचिन्त्य विज्ञप्त-स्तेन राजा रहःस्थितः। पादातं मदधस्तात!, रात्रिमेकां विधीयताम् ॥३७॥
प्रतिपन्नं नरेन्द्रेण, वत्स ! किं याचितं त्वया। त्वदधीनं हि मे राज्यं, प्राणा अपि च तावकाः ॥३८॥
ततोऽभयकुमारेण, पादातेन समन्ततः। प्राकारो मालितः सर्वः, सावधानेन सर्पता ॥३९॥
इतश्च नगरासन्ने, ग्रामे [च] रौहिणीयकः। गतो बन्धूपरोधेन, स्थितश्च प्रहरत्रयम् ॥४०॥
वलितः सत्वरैः पादैः, प्राप्तो राजगृहे पुरे। एकतो धर्ममाचष्टे, महावीरो जिनेश्वरः ॥४१॥
अन्यतः पुरलोकेभ्यो, भयं तस्य विवर्धते। तदिदं हन्त सञ्जात-मितो व्याघ्र इतस्तटी ॥४२॥
कर्णयोरङ्गुलीर्दत्त्वा, वेगेन प्रपलायितः। विद्धो सव्येतरे पादे, शूलया धूलिछन्नया ॥४३॥
ततो गन्तुमशक्तेन, भीतभीतेन तेन सा। शूला दक्षिणहस्तेन, शीघ्रमेव समुद्धृता ॥४४॥
इतश्च लोकनाथेन, वदता देवलक्षणम्। न स्पृशन्ति भुवं देवा, निर्निमेषनिरीक्षिणः ॥४५॥
इत्यादि गदितं वाक्यं, प्रविष्टं तस्य कर्णयोः। भूयोऽपि चाङ्गुलीर्दत्त्वा, कर्णयोः प्रपलायितः ॥४६॥
वैभारपर्वते गत्वा, भुक्त्वा च वरभोजनम्। पीत्वा च वरवारीणि, निलीनो निभृतं स्थितः ॥४७॥
दिनं गतं निशा जाता, तमःस्तोमो विजृम्भितः। दृश्यं न दृश्यते वस्तु, लोकेन पुरतः स्थितम्॥४८॥
घूत्कृतं घूकसार्थेन, शिवाभिश्च ववासिरे। स्फीतफेत्कृतशब्देन, जनसन्त्रासकारिणा ॥४९॥
इतश्च मन्त्रिणा प्रोक्तः, पुररक्षाविधायकः। द्वाररक्षाद्य कर्तव्या, प्रतोलीनां प्रदानतः ॥५०॥
प्रतिपन्नमिदं तेन, क्रियया च तथा कृतम्। शालोऽपि मालितः सर्वो, निरन्तरं पदातिना ॥५१॥
पर्वतात्तूर्णमुत्तीर्ण-स्तस्करो रौहिणीयकः। वीरवेषधरो वीरः, सम्प्राप्तः शालसन्निधौ ॥५२॥
अज्ञातपुरवृत्तान्तः, करणाभ्यासयोगतः। शालमुल्लङ्घयन् बद्धः, शालस्थसुभटैर्दृढम् ॥५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽभयकुमारस्य, शीघ्रं नीत्वा स ढौकितः । तेनापि यन्त्रितं कृत्वा, सुप्रयत्नेन धारितः ॥५४॥
क्षपाक्षये दिनं जात-मुदितोऽरुणसारथिः । स्वकर्मधर्मसंयुक्ता, जज्ञिरे निखिला जनाः ॥५५॥
कृतप्रभातकर्तव्यः, श्रेणिको मगधाधिपः । सभासिंहासनासीनो, लोकेन परिवारितः ॥५६॥
यावदास्ते क्षणं ताव-दभयोऽपि समागतः । रौहिणीयकनामानं, गृहीत्वा तस्करं तकम् ॥५७॥
वयं निराकुला जाता-स्तात ! तीर्णभया यतः । प्रभूणां वचनं कृत्वा, सेवकाः शेरते सुखम् ॥५८॥
कृतालीकप्रकोपेन, श्रेणिकेन प्रजल्पितम् । सुबुद्धिरपि वत्स ! त्वं, निर्बुद्धिरिव लक्ष्यसे ॥५९॥
यदस्य नररत्नस्य, बन्धायोग्यस्य बन्धनम् । तदुनोति मनो वत्स !, मामकीनमनारतम् ॥६०॥
अनालोचितकारी हि, नरो नैव प्रशस्यते । ततो विबन्धनं कृत्वा, विमुञ्चैनं ममाग्रतः ॥६१॥
गतोऽसौ श्रेणिकेनापि, गाढं सावेशचेतसा । चिन्तितं यद्ययं नाम, रौहिणीयकसंज्ञकः ॥६२॥
सहते तदा करोम्यस्य, तीव्रदण्डेन शिक्षणम् । यथान्योऽपि बिभेत्युच्चैः, कुर्वाणः कर्म कुत्सितम् ॥६३॥
अभयोऽपि समायातः, कृत्वादिष्टं महीभुजः । दत्तं तस्मै सुतुष्टेन, स्वाङ्गलग्नं महीभृता ॥६४॥
वस्त्रादि भीतभीतेन, तेनापीदं प्रतीच्छितम् । ताम्बूलं च स्वहस्तेन, स्वासनं चासनाय च ॥६५॥
ततः सञ्जातशङ्केन, तस्करेण विचिन्तितम् । आश्चर्यमिदं भाति य-ददृष्टे कुरुते नृपः ॥६६॥
न कृतोऽवसरः कोऽपि, न चास्योपकृतं मया । वैवाहिको न सम्बन्धः, स्वाजन्यं न च तादृशम् ।६७॥
आदरश्च महानेष, क्रियते मे महीभुजा । महच्छङ्कापदं चेदं, विपाकोऽस्य न सुन्दरः ॥६८॥
मामयं न विजानाति, नाम च प्रकटं मम । तदयं जीवनोपायो, यत्स्वं नाम न कथ्यते ॥६९॥
प्रणम्य भणितो राजा, तस्करेण ससम्भ्रमम् । प्रसादः क्रियते कस्य, स्वामिनो वेद्यतां मम ॥७०॥
राजाह रौहिणीयस्य, तवायं वीरकर्मणः । स प्राहालं प्रसादेन, मुक्त्वा वस्त्रादिकं ततः ॥७१॥
ताम्बूलं च परित्यज्य, निषण्णः शुद्धभूतले । विषण्णवदनो दीन, उवाचेदं नृपं वचः ॥७२॥
विधातुर्विस्मृतो येन, न कृतं मे स्तनद्वयं । परनामोपजीवी यो, रामा सा न पुमानसौ ॥७३॥
वरं मृतो वरं दग्धो, मा सञ्जातो वरं नरः । परस्य नाम विक्रीय, प्रसादं यः प्रतीच्छति ॥७४॥

धान्यपूराभिधे ग्रामे, शिवशक्तिः कुटुम्बिकः ।
श्यामा भार्या तयोर्जातो, दुर्गशक्तिरहं सुतः ॥७५॥

तस्मै यद्देहि तद्देहि, नाहं हि रौहिणीयकः । श्रुत्वेदं भूभुजा मुक्तः, स्वीकृतो दण्डपाशिना ॥७६॥
आकारितो नरेन्द्रेण, मन्त्री मन्त्रिपुरस्सरः । अभयो भणितश्चेदं, नामाप्येष न मन्यते ॥७७॥
अप्रतिपन्ननामा च, कथं कष्टेन मार्यते? । तथा कुरु यथा नाम, स्वयं स प्रतिपद्यते ॥७८॥
ततो निर्व्याकुला यूयं, तीर्णभाराः समन्ततः । वयमेव करिष्यामो, यथा युक्तमतः परम् ॥७९॥
अभयेना पि सस्नेहं, राजाध्यक्षं स जल्पितः । प्रीतिवृद्धिकृते भद्र!, भोक्तव्यं मद्गृहे त्वया ॥८०॥
ददतां वर्धते प्रीतिः, समये प्रतिगृह्णताम् । गुह्यं कथयतां चैव, समये प्रतिशृण्वताम् ॥८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भुञ्जतां मित्रगेहेषु, प्रस्तावे च प्रतीच्छताम् । इत्येवं वर्धते प्रीतिः, प्राणिनां भववासिनाम् ॥८२॥
चौरेण चिन्तितं सोऽय-मन्तिकस्थो ममान्तकः । यद्गोपितं मया नाम, पृच्छतोऽपि महीपतेः ॥८३॥
तेनाहमर्पितो राज्ञा, बुद्धिगेहस्य मन्त्रिणः । येन तेन[1] प्रकारेण, नामविज्ञानहेतवे ॥८४॥
भवत्वात्मा न मोक्तव्यः, खेदोऽपि च न सङ्गतः । सोढव्यं पतितं सर्वं, वीरेणोन्नतचेतसा ॥८५॥
विधिरेष करोत्येवं, नानाकारा विडम्बनाः । स्वयं कृतानि कर्माणि, भुज्यन्ते स्वत एव हि ॥८६॥
भुज्यते यद्विधिर्दत्ते, विधिदत्तं च पीयते । गम्यते नीयते यत्र, विधिदत्ते च सुप्यते ॥८७॥
गम्यते किं विचारेण, नान्यथा बत मुच्यते । विचिन्त्यैवं ततस्तेन, प्रपन्नं मन्त्रिणो वचः ॥८८॥
ततोऽभयकुमारेणा-नीतः प्रीतिपुरस्सरम् । स्वगृहे दापितं तस्य, विशिष्टं बृहदासनम् ॥८९॥
केनोपायेन हन्तायं, निजं नाम वदिष्यति । हुं ज्ञातं मद्यपानेन, तत्र यत्नं प्रकुर्महे ॥९१॥
मद्यापणात्ततो मद्यं, हृद्यं जनमनोहरम् । आनीय च विधायोच्चै-र्गोष्ठीबन्धं समन्ततः ॥९२॥
भणितोऽभयकुमारेण, चारणश्चतुराननः । त्वया गीते समारब्धे, स्तोतव्यो रौहिणीयकः ॥९३॥
कृते तथैव तेनापि, चिन्तयामास तस्करः । सोऽयं मन्नामविज्ञान-हेतवे पाशकः कृतः ॥९४॥
तथा मद्यं पिबत्येवं, यथा नो जायते मदः । न च ब्रूते विरूपाणि, चेतना नैव मुह्यते ॥९५॥
पीयमानेषु मद्येषु, दूहवैकैः सह सुन्दरैः । नृत्यत्सु मदमत्तेषु, नरेषु रौहिणीयकः ॥९६॥
अलीककोपमाधाय, चौरो वदति चारणम् । रे चारण ! दुराचार !, कोऽयं भो रौहिणीयकः ॥९७॥
का माताः कः पिता तस्य, मूर्खस्त्वं मूढ ! लक्ष्यसे । नानृतं गायनं कार्यं, याहि याहि ममाग्रतः ॥९८॥

शिवशक्तिसुतं शान्तं, श्यामलाकुक्षिसम्भवम् ।
दुर्गाशक्तिं महाशक्तिं, गीतयोग्यं न गायसे ॥९९॥

ततश्चूर्णेन सन्मिश्रं, पायितो मन्त्रिणा सुराम् । तया निर्नष्टचेष्टोऽसौ, पपात भुवि चौर्यकृत् ॥१००॥
न वक्ति श्वसिति नापि, न पश्यति न जिघ्रति । निषिद्धेन्द्रियसञ्चारो, जातो योगीव निश्चलः ॥१०१॥
तथाविधं तकं दृष्ट्वा, मन्त्रिणा निजमन्दिरम् । उपरिष्टाच्च विमानस्य, सदृशं सपदि कारितम् ॥
पञ्चवर्णमहामूल्य-वस्त्रस्यूतवितानकैः । यन्मनांसि हरत्येव, यथास्थानं वितर्दितैः ॥१०३॥
मुक्ताहारार्धहारैश्च, चतुर्दिक्षु विलम्बितैः । हारिहीरकजालैश्च, मध्यभागे च मण्डितम् ॥१०४॥
नानापुष्पोपहारोण, सर्वतोऽपि विराजितम् । कर्पूरागुरुसन्मिश्र-धूपगन्धसमुद्धुरम् ॥१०५॥
[2]वरकस्तूरिकालिप्त-भित्तिस्थभ्रमराकुलम् । सारस्वस्तिकमालाभि-र्मालितं रत्नशालितम् ॥१०६॥
नव्यभव्यव्यवस्थेन, वरनेपथ्यधारिणा । रूपसौभाग्ययुक्तेन, लोकविस्मयकारिणा ॥१०७॥
नरनारीसमूहेन, युक्तं युक्तविधायिना । सुरपल्यङ्कतुल्येन, पल्यङ्केन समन्वितम् ॥१०८॥
कारितं च क्षणादेव, मन्त्रिणा निजमन्दिरम् । ततो भृत्यैः स उत्क्षिप्य, तत्र पर्यङ्कके वरे ॥१०९॥

१ BJPC । केन-मु. ॥ २ कर्पूरमृगमदा (dPC) लिप्तभित्तिकं लीनमधुकरं सार° BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवेश्य देवदूष्याभ-पटेनाच्छादितस्ततः । सञ्जातो मृतसङ्काश-स्तस्करो रौहिणीयकः ॥११०॥
यथास्थानं स्थितो लोको; मन्त्रिणैवं च शिक्षितः । यथा भो भो विधातव्यं, रौहिणीयकसञ्ज्ञितम् ॥
यथायं सहते नाम, नाम्नैव नः प्रयोजनम् । स्वयमेकान्तदेशे च, शृण्वन्नसौ व्यवस्थितः ॥११२॥
चौरेणापि जितश्चूर्ण-स्तत उद्घाटितं शिरः । विलोक्यादृष्टपूर्वं त-द्देहं रम्यजनं तथा ॥११३॥
चिन्तितं च किमेतद्भो, मन्नेत्रानन्दकारकम् । दृश्यते सर्वमेवात्र, मयानीक्षितपूर्वकम् ॥११४॥
यावदेष मनस्येवं, सर्वतः क्षिप्तलोचनः । विस्मितश्चिन्तयामास, तावदानन्दनिर्भरः ॥११५॥
जनोऽपि गातुमारब्धः प्रतीहारेण वारितः । रेरे कल्पं न जानीथ, स्थिरीभवत साम्प्रतम् ॥११६॥
स्थितेषु तेषु तेनोचे, यथा शृणु सुरप्रभो ! । सौधर्माख्यो ह्ययं स्वर्गो, विमानमरुणप्रभम् ॥११७॥
अनाथानां भवान्नाथो, जातो बृहन्मनोरथैः । शृणु कल्पं विमानेश !, मङ्गलं येन कुर्महे ॥११८॥
पिता माता निजं स्थानं, नाम कर्म च कथ्यताम् । पूर्वभवभवं सर्वं, क्रियते येन मङ्गलम् ॥११९॥
ततः सम्भ्रान्तचित्तेन, तस्करेण विचिन्तितम् । साम्प्रतं का गतिः कोऽपि, प्रकारो विस्मयावहः ॥
घटामाटीकते सर्वं, यदनेन प्रभाषितम् । स्वर्गः स्वर्गोद्गताश्चैता, इमे देवा अहं सुरः ॥१२१॥
देवविमानमेतच्चा-दृष्टं दृष्टिमनोहरम् । पित्रादिकर्मपर्यन्तः, परं प्रश्नो न सङ्गतः ॥१२२॥
याथातथ्येन किं सर्वं, कथ्यते गोप्यतेऽथवा । न जाने निश्चयं तेन, चेतो दोलायते मम ॥१२३॥
एवं संशयमापन्नो यावदास्ते मलिम्लुचः । तावच्चित्ते गतं तस्य, वचः सर्वज्ञभाषितम् ॥१२४॥
यदुक्तं वीरनाथेन, वदता देवलक्षणम् । न स्पृशन्ति भुवं देवा, निर्निमेषनिरीक्षिणः ॥१२५॥
रागद्वेषमहामोह-मूढचित्तस्य भाषितम् । न तदेकान्ततः सत्यं, सत्यासत्यं हि तद्वचः ॥१२६॥
रागद्वेषमहामोह-दोषमुक्तस्य जल्पितम् । सत्यं पाषाणरेखेव, यथैवोक्तं तथैव तत् ॥१२७॥
तदस्ति जीवनोपायो, ममाप्येष न संशयः । पश्यामि तावदेतेषां, देवानां दृष्टिलक्षणम् ॥१२८॥
सुप्ताऽऽसनं परित्यज्य, निषण्णाऽऽसनमाश्रितः । सनिमेषा इमे दृष्टा, लग्नपादाश्च भूतले ॥१२९॥
ततः संवादनाहेतोः कृतात्मनि परीक्षणा । यावद् दृष्टं चलं चक्षु-र्लग्नौ पादौ च भूतले ॥१३०॥
न स्वर्गो न सुरा एते, न देव्यो न विमानकम् । मायाविलसितं सर्व-मभयस्येति लक्ष्यते ॥१३१॥
मम नामपरिज्ञान-निमित्तमिति मे मतिः । इदं च चिन्तितं तेन, बहिश्चेदं प्रकाशितम् ॥१३२॥
भवद्भिर्यदहो पृष्टं, पित्राद्यं तन्निशम्यताम् । धान्यपूराभिधे ग्रामे, शिवशक्तेः कुटुम्बिनः ॥१३३॥
गृहिणी श्यामलानाम्नी, दुर्गाशक्तिरहं सुतः । दयादानसमायुक्तः, सर्वदर्शनभक्तिमान् ॥१३४॥
सदा स्वदारसन्तुष्टः, परद्रव्यपराङ्मुखः । अन्यदा च जनन्या मे, रजन्याः प्रहरे गते ॥१३५॥
गाढा विशूचिका जाता, जीवितव्यान्तकारिणी । ततोऽहं प्रेषितः पित्रा, वैद्यानयनहेतवे ॥१३६॥
यावत्तत्र गतस्ताव-त्पुरद्वारं नियन्त्रितम् । करणाभ्यासयोगेन, शालमुल्लङ्घयन्नहम् ॥१३७॥
शालस्थितनरैर्बद्धो, ढौकितोऽभयमन्त्रिणे । क्षपाक्षये च तेनापि, नीत्वा राज्ञे समर्पितः ॥१३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेनापि सादरं दृष्टो, गौरवेण धृतः क्षणम् । सादरं प्रीतिवृद्धयर्थ-मभयेन निमन्त्रितः ॥१३९॥
नीतस्तेन निजे गेहे, मद्यपानं च कारितः । मत्तश्च न तदा किञ्चि-ज्जानेऽहं गतचेतनः ॥१४०॥
ततो मृत्वा सुरो जातो, भवदीयविमानके । सम्पादयत सर्वाणि, मङ्गलानि द्रुतं द्रुतम् ॥१४१॥
कालक्षेपो न कर्तव्यः, कार्याणां त्वरिता गतिः । ततोऽभयकुमारेण, सर्वमेतन्महीभृते ॥१४२॥
कथितं न भवत्यैव, तातायं रौहिणीयकः । अज्ञानेन च किं तेन, मारितेन तपस्विना ॥१४३॥
दुःखेन लभ्यते तात !, मानुष्यं जन्म जन्तुना । राजाह रोचते यत्ते, तत्कुरुष्व यदृच्छया ॥१४४॥
ततोऽभयकुमारेण, स्वभृत्या भणिता यथा । रेरेऽर्धचन्द्रकं दत्त्वा, गृहीत्वा दक्षिणे करे ॥१४५॥
निष्कासयत तं तेऽपि, कृत्वैवं तं बभाषिरे । मुक्तोऽसि मन्त्रिणा भद्र, ! गच्छेतः सत्वरैःपदैः ॥१४६॥
पुनर्जातमिवात्मानं, मन्यमानोऽथ सोऽपि हि । अददद्दक्षिणे दृष्टिं, वामतः पृष्टतस्तथा ॥१४७॥
द्रुतं द्रुतं विनिर्गत्य, व्यजनं देशमाश्रितः । ततश्च चिन्तयामास, चौरः संवेगमागतः ॥१४८॥
ते धन्या येऽत्र शृण्वन्ति, वचः सर्वज्ञभाषितम् । यदनिच्छत एवेह, श्रोतुं मे कर्णयोर्गतम् ॥१४९॥
जीवितव्याय सञ्जातं, त्राणमन्येन नो कृतम् । नमः **श्रीवीरनाथाय**, वीरितान्तरशत्रवे ॥१५०॥
सुरासुरनमस्याय, संसारावनिसेतवे । पूर्वापराविरुद्धाय, जीवानां शुद्धिहेतवे ॥१५१॥
संसारसौधदीपाय, श्रीवीरवचसे नमः । यतोऽद्य कष्टयोगेन, यममुखाद्विनिर्गतः ॥१५२॥
तत्किं [स्यात्] सर्वदा क्षेमं, बिले प्रक्षिपतां करम् ॥१५२a॥
चराचरजगन्नाथः, पुत्रीयितजगत्त्रयः । त्राणं मे **श्रीमहावीरो**, यावज्जीवमतःपरम् ॥१५३॥
इति संवेगमापन्नो, भवान्निर्विण्णमानसः । चचाल श्रीमहावीर-पादवन्दनहेतवे ॥१५४॥
वन्दित्वा त्रिजगन्नाथं, निषण्णः शुद्धभूतले । भणितं किं जगन्नाथ !, ममास्ति व्रतयोग्यता ? ॥१५५॥
अस्तीति भणितस्तेन, शीघ्रमात्मा समर्पितः । भणितः प्रभुणा भद्र !, चित्तशुद्धिर्विधीयताम् ॥१५६॥
अत्रान्तरे समायात-श्चतुरङ्गबलान्वितः । वन्दनाय जिनेन्द्रस्य, श्रेणिको मगधाधिपः ॥१५७॥
प्रविश्य विधिना तत्र, दत्त्वा च भ्रामरीत्रयम् । वन्दित्वा च महावीरं, निषसादोचितासने ॥१५८॥
ततश्च लोकनाथेन, प्रारब्धा धर्मदेशना । कर्णामृतसमा सारा, संसारोच्छेदकारिणी ॥१५९॥
ततः प्रपेदिरे केचिद्, गृहिधर्मं सदर्शनम् । अन्ये च शुद्धचारित्रं, सफलाऽजनि देशना ॥१६०॥
समयं प्राप्य भूपेन, ततः पृष्टो जिनेश्वरः । रौहिणीयाह्वयो नाथ !, कुत्र तिष्ठति तस्करः ? ॥१६१॥
प्रकाशयास्य कर्माणि, नामापि प्रकटं प्रभो ! । परं निरूपितोऽस्माभि-र्न चासौ दृश्यते दृशा ॥१६२॥
उवाच भगवानेष, दक्षिणेन ममाग्रतः । तिष्ठति संलीनगात्रोऽसौ, निषण्णः शुद्धभूतले ॥१६३॥
सन्मुखो मोक्षमार्गस्य, पापकर्मपराङ्मुखः । नैनं प्रत्यशुभं चेतो, विधेयं श्रेणिक ! त्वया ॥१६४॥
शुभाशुभानि चेतांसि, दिनमध्येऽपि देहिनाम् । जायन्ते विस्मयोऽप्यत्र, न कर्तव्यो महीपते ! ॥१६५॥
मोक्षमार्गप्रपन्नस्य, वात्सल्यं तव सङ्गतम् । राजाह कुत्सितं कर्म, सुलभं दुर्लभं त्विदम् ॥१६६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मसद्धर्मकार्याणि, कुर्वतोऽस्य सहायकाः । स्वत एव वयं सुतरां, युष्मदादेशनोदिताः ॥१६७॥
इत्युक्त्वा स्वकरे कृत्वा, गच्छताभयमन्त्रिणा । सगौरवं गृहे नीतो, रौहिणीयकतस्करः ॥१६८॥
आतिथेयीं क्रियां सर्वां, पादप्रक्षालनादिकाम् । विधाय समये स्नपितो, वस्त्राणि परिधापितः ॥१६९॥
भोजनान्तरकालं च, विश्रान्तोऽभयमन्त्रिणा । निर्वेदकारणं पृष्टः, कथितं तेन यथास्फुटम् ॥१७०॥
अभयः प्राह भो भद्र ! चित्तशुद्धिपुरस्सरम् । प्रव्रज्याग्रहणं श्रेयः, सर्वेषां सुखकारणम् ॥१७१॥
यदत्र परसम्बन्धि, चित्तमालिन्यकारणम् । अदत्तं स्वीकृतं सर्वं, तत्तस्यैव [1]समर्पय ॥१७२॥
अज्ञातस्वामिकं द्रव्यं, तथा विस्मृतनायकम् । मृतनष्टधनं सर्वं, तच्च राज्ञे प्रदीयताम् ॥१७३॥
विशुद्धात्मा ततस्तूर्णं, कुरु धर्मं यथोदितम् । प्रतिपन्नमिदं तेन, क्रियया च कृतं द्रुतम् ॥१७४॥
ततोऽभयकुमारेण, कृतनिष्क्रमणक्रियः । महामहोत्सवेनैष, वीरनाथेन दीक्षितः ॥१७५॥
ततोऽसौ श्रमणो जातो, विनयाभरणभूषितः । सुदुष्करतपश्चारी, सर्वजीवदयापरः ॥१७६॥
निःसङ्गो निर्ममः शान्तः, प्रसिद्धो जगतीतले । [रौहिणीयो मुनीशश्च, विजहार यथागमम्] ॥१७७॥

उक्तं च- **कूरावि सहावेणं, विसयविसवसाणुगावि होऊण ।**
जिणवयणभावियमणा, तेलोक्कसुहावहा होंति ॥१७८॥

क्षमादिब्रह्मपर्यन्तं, धर्मं कृत्वा सुनिश्चलम् । उत्पाद्य केवलज्ञानं, जगाम परमं पदम् ॥१७९॥
अत्रैव जीवितं दत्तं, परत्र परमं पदम् । रौहिणीयकचौरस्य, श्रीवीरवचसा स्फुटम् ॥१८०॥

इति रौहिणीयककथानकं समाप्तम् ॥

---

१ समर्पितः - BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवं श्रीमन्महावीरवर्धमानस्वामिनः सत्कं वचनमाकर्ण्य रौहिणीयकस्य समीहितार्थसम्प्राप्तिरभवत् तदन्यस्यापि पित्रादेरेकान्तेनैवाप्तस्य गुरुस्थानीयस्य लोकद्वयहितं वचः श्रोतव्यं, श्रुत्वा च तदनुसारेण प्रवर्तितव्यम्, एवं च वर्तमानानां समस्तसमीहितार्थप्राप्तिरुपजायते पितुर्वचनानुसारतः प्रवर्तमानस्य वसुसारस्येव, अथ कोऽयं **वसुसार** इत्याशङ्कायां कथानकं कथ्यते–

बभूव भुवनख्यातं, **गम्भीराख्यं** महापुरम्। अनेकनैगमस्थानं, रम्ये तीरे महोदधेः ॥१॥
यत्र वेलाकुलं भाति, यानपात्रशतैरलम्। शुभसितपटाकीर्णैः, शैलैरिव समन्ततः ॥२॥
यत्र मुक्ताफलव्राताः, शङ्खव्राताश्च निर्मलाः। स्थाने स्थाने विलोक्यन्ते, फेनपुञ्जा इवोदधेः ॥३॥
तत्र राजाभवत् श्रीमान्, श्रेयोधाम पदं श्रियाम्। विक्रमाक्रान्तभूपीठः, **सिंहविक्रम**सञ्ज्ञितः ॥४॥
अपरित्यक्तमर्यादो, वाहिनीशतसेवितः। अनेकगुणरत्नौघ-युक्तः पतिरिवाम्भसाम् ॥५॥
[1]श्रेष्ठी चाऽभवत्तत्र, श्रेष्ठकार्यविधायकः। **वसुर्नाम्ना** यशोधामा, विश्वश्रीकुलमन्दिरम् ॥६॥
सदाचारो गुणाधारो, धीरो धर्मपरायणः। कृती सत्यप्रतिज्ञश्च, शुचिर्धीमान् सतां मतः ॥७॥
वसुकान्ता जनी तस्य, जनानन्दविधायिनी। प्रीतिपात्रं गुणक्षेत्रं, दानदाक्षिण्यमन्दिरम् ॥८॥
तयोर्भुञ्जानयोः सौख्यं, शब्दादिविषयोद्भवम्। कालक्रमेण सञ्जातः, सत्पुत्रस्तुष्टिकारकः ॥९॥
महामहोत्सवेनाथ, तस्य नाम प्रतिष्ठितम्। **वसुसार** इति ख्यातं, निःशेषैर्बन्धुभिर्मुदा ॥१०॥
अथासौ वर्धते बालो, लाल्यमानो यथेप्सितम्। सम्पद्यमाननिःशेष-समीहितमनोरथः ॥११॥
कालक्रमेण पित्रासौ, ग्राहितः सकलाः कलाः। यौवनं च समारूढ-स्तरुणीजनमोहनम् ॥१२॥
समानकुलशीलायाः, कन्यकाया महर्द्धितः। **वसुन्धरे**तिसञ्ज्ञायाः स पित्रा ग्राहितः करः ॥१३॥
अथैवं परमप्रीत्या, सार्धं पुत्रेण तिष्ठतः। श्रेष्ठिनो वसुसञ्ज्ञस्य, वव्रजुर्भूरिवासराः ॥१४॥
अन्यदा श्रेष्ठिना पुत्रो, वृद्धभावमुपेयुषा। शिक्षितः पेशलैर्वाक्यै-रेवं पुत्रहितैषिणा ॥१५॥
यथा वत्स सदा कालं, कार्या भक्तिर्जिनेश्वरे। सेव्यास्तदुक्तसिद्धान्त-वेदिनः साधवः सदा ॥१६॥
श्रोतव्यं च वचो जैनं, हितं पथ्यं तदन्तिके। तथा जीवदया कार्या, वार्या दुर्जनसङ्गतिः ॥१७॥
वक्तव्यं च वचः सत्यं, त्याज्यं चौर्यं च दूरतः। पारदार्यं परित्याज्यं, भाव्यं नात्यन्तलोभिना ॥१८॥
न भोक्तव्यं निशायां च, मांसमद्यादिकं तथा। तथा पुत्र विनीतेन, भाव्यं गुरुजने त्वया ॥१९॥
दाक्षिण्यं च सदा कार्यं, सर्वस्वजनबन्धुषु। इत्यादि श्रेष्ठिनो नित्यं, शिक्षयतः स्वनन्दनम् ॥२०॥
वसुसारं गुणाधारं, गतः कालः कियानपि। अन्यदा च शरीरेऽस्य, व्याधिर्जातः सुदारुणः ॥२१॥
दुःसाध्यः सर्ववैद्यानां, ततः श्रेष्ठी व्यचिन्तयत्। अहो मदीयमत्यन्तं, सञ्जातं विधुरं वपुः ॥२२॥
नाधुना मुच्यते मृत्योः, करोमि स्वहितं ततः। ददामि निजकं वित्तं, धर्मस्थाने यथोचितम् ॥२३॥

१ BJPC। श्रेष्ठिवर्योऽभ° मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भाषयामि निःशेष-बन्धुमित्रजनं निजम् । कुटुम्बं च यथास्थाने, सर्वं संस्थापयाम्यहम् ॥२४॥
तत्त्वं च वसुसारस्य, समाख्यामि वसूद्भवम् । इत्यालोच्य निजे चित्ते, सञ्जाते व्यजने गृहे ॥२५॥
वसुना वसुसारस्य, कर्णे तत्त्वं निवेदितम् । क्रमागता मया मुक्ता, लक्ष्मीर्वत्स ! तव गृहे ॥२६॥
चञ्चलैषा स्वभावेन, भवन्तं यदि मुञ्चति । तदा भूमिगृहस्यान्त-र्मञ्जूषादत्ततालकः तालकः (का) ॥
तदन्तर्लिखितं पत्रं, मयैवास्ते सविस्तरम् । तदादाय रहःस्थाने, वाचनीयं शनैः शनैः ॥२८॥
तदर्थो हृदये धार्यः, कर्तव्यं च क्रमागतम् । उपहासपरो लोको, यत्किञ्चन [1]वदेत्पुनः ॥२९॥
तद्वचो हृदये नैव, कर्तव्यं हितमिच्छता । प्रतिपन्नमनेनापि, तद्वचनं तथैव च ॥३०॥
सुपुत्राणां सुशिक्षाणां, नाप्तवाक्ये विचारणा । ततोऽसौ दर्शितो राज्ञः, स्वपदे च निवेशितः ॥३१॥
बद्धो भालतले पट्टो, दत्तं छत्रं महीभुजा । प्रथमासनिको जातः, सर्वेषां वणिजामयम् ॥३२॥
परिवारोऽपि सन्तुष्टः, पैत्र्यं पदमधिष्ठितम् । वसुना वसुसारस्य, दत्ता शिक्षा यथोचिता ॥३३॥
ततः स्वधर्मकर्माणि, चकार चतुराशयः । द्रव्यबीजं विधानेन, सप्तक्षेत्र्यां नियोजितम् ॥३४॥
ततः समुद्धृतं शल्यं, क्षमितक्षामितं कृतम् । कृता देवगृहे पूजा-ऽमारिश्चोद्घोषिता पुनः[2] ॥३५॥
निर्ममत्वं धृतं चित्ते, पञ्चधाराधना कृता । सर्वाहारनिरोधश्च, स्वीकृतो गुरुसाक्षिकः ॥३६॥
धर्मध्यानसमारूढो, मृत्वा स्वर्गं जगाम सः । विधाय मृतकार्याणि, स्वपितुर्बन्धुभिः सह ॥३७॥
गतशोकः स्वकार्याणि, कालेनासौ व्यचिन्तयत् । सम्मतः पुरलोकस्य, भूपस्यापि स सम्मतः ॥३८॥
सम्मतो राजलोकस्य, बन्धुवर्गस्य सम्मतः । गुणानुरागतो रक्ता-स्तद्गुणग्रहणोद्यताः ॥३९॥
वसुसारममन्यन्त, वसुसारमिति प्रजाः । एवं सरति संसारे, ह्यन्तराये पुरा कृते ॥४०॥
समीपमागते लक्ष्मी-र्जगाम तस्य मन्दिरात् । पराभूतिः समायाता, दारिद्र्येण समन्विता ॥४१॥
सम्प्राप्यावसरं को वा, जृम्भते न महीतले । सानुकूले विधावासी-दनुकूलं नृपादि यत् ॥४२॥
प्रतिकूले च तत्सर्वं, वर्तते मे प्रतिकूलम् । एवं सविषादचित्तेन, वसुसारेण चिन्तितम् ॥४३॥
अहो विधिप्रसादेन, दृष्टं जन्मद्वयं मया । पुरा धनेन संयुक्तं, साम्प्रतं धनवर्जितम् ॥४४॥
जात्यादिगुणसम्पूर्णं, परमार्थेन वर्जितम् । तृणादपि लघुं लोको, मन्यते निर्धनं जनम् ॥४५॥
जात्यादिभिर्गुणैर्मुक्तं, परलोकसमाश्रितम् । मेरोरप्यधिकं लोको, मन्यते सधनं जनम् ॥४६॥
क्षीणोपायेन तेनेदं, संस्मृतं पितृभाषितम् । उद्घाटिता च मञ्जूषा, पत्रकं स्वकरे कृतम् ॥४७॥
वाचितं च रहःस्थाने, मन्दनादं प्रमोदतः । हन्त लब्धो मयोपायः, सामग्री तस्य दुर्लभा ॥४८॥
स्वस्त्यस्ति गौतमो द्वीपः, समुद्रान्तर्महालयः । जलाविलो महाकच्छः, सुरभीणां समाश्रयः ॥४९॥
क्षेत्रानुभावतस्तत्र, तृणानामनुभावतः । अग्निसम्पर्कतस्तेषां, रत्नं हि छगणं भवेत् ॥५०॥
यानपात्रमतो भृत्वा, भस्मनस्तत्र गम्यते । वितीर्यते च सर्वत्र, भूतले भस्म भूरिशः ॥५१॥

---

१ भविष्यति-BJPC ॥ २ पुनः- BJPC नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नक्तं तत्र समागत्य, निषीदन्ते गवां गणाः । तद्विष्टां छाणिकां कृत्वा, भ्रियते यानपात्रकम् ॥५२॥
निजस्थाने समागत्य, भ्रियन्ते च गृहापणाः । समये चाग्निसम्पर्का-ज्जायन्ते रत्नराशयः ॥५३॥
हन्त तावदुपायोऽयं, सामग्री दुर्लभा पुनः । बुद्ध्यस्ति विभवो नास्ति, वाणिज्यं क्रियते कथम्? ॥५४॥
एवमुद्घोषयामास, प्रत्यहं शून्यमानसः । पुररथ्यासु सर्वासु, राजमार्गेण सन्ततम् ॥५५॥
पुरान्निर्गम्यमानेन, ह्यन्यदा धरणीभृता । दृष्टः पृष्टश्च तेनापि, पठितं भूपतेः पुरः ॥५६॥
हन्त लब्धो मयोपायः, सामग्री तच्च दुर्लभा । बुद्ध्यस्ति विभवो नास्ति, वाणिज्यं क्रियते कथम् ? ॥
राजाह कियता कार्यं, श्रेष्ठिपुत्र ! धनेन ते । सोऽवक्शतसहस्रेण, दीनाराणां महीपते ! ॥५८॥
दत्तो भूपेन लक्षोऽपि, गृहीत्वा गृहमागतः । गमनार्थं समारब्धा, सामग्री कर्तुमञ्जसा ॥५९॥
सम्बलानि विधीयन्ते, नानारूपाणि भूरिशः । जलेन्धनाद्विसामग्री, सर्वापि प्रगुणीकृता ॥६०॥
धीवराश्च समाहूताः, पृष्टाः प्रीतिपुरस्सरम् । जानीथ[1] गौतमं द्वीपं, तैरूचे विद्यस्तं वयम् ॥६१॥
परं निर्मानुषो द्वीपः,किं गतैस्तत्र साध्यते । श्रेष्ठ्याह किं विचारेण, गृह्यतामीप्सितं धनम् ॥६२॥
प्रतिपन्नं धीवरैः सर्वं, पोतोऽपि प्रगुणीकृतः । भ्रियते भस्मभाण्डेन, लोकाश्चोपहसन्ति तम् ॥६३॥
साधके तिथिनक्षत्रे, पूजयित्वा महोदधिम् । वसुसारः पोतमारूढो, मुक्तः पोतोऽपि धीवरैः ॥६४॥
वेगेन गन्तुमारब्धः, पृष्टतः पवनेरितः । मासैः कतिपयैरेव, द्वीपं सम्प्राप गौतमम् ॥६५॥
मुक्ता नङ्गरास्तत्र, पोतः स्थिरतरीकृतः । विज्ञप्तो धीवरैः श्रेष्ठी, द्वीपोऽयं गौतमाभिधः ॥६६॥
पोतादुत्तार्य तत्राथ, राशयो भस्मनः कृताः । विकीर्णं सर्वतस्तच्च, गवामावासभूमिषु ॥६७॥
यथास्थानं गते लोके, श्रेष्ठी जातो निराकुलः । एकं छगणमेकान्ते, दग्धं प्रत्ययहेतवे ॥६८॥
पर्यायान्तरमापन्नं, जातं रत्नमनुत्तमम् । ततः सञ्जाततोषेण, छगणानां राशयः कृताः ॥६९॥
शोषितास्तापयोगेन, भृतः पोतः समन्ततः । समये स्वयमारुह्य, मुक्तः पूजापुरस्सरम् ॥७०॥
गरुत्मानिव वेगेन, निजं स्थानमुपागतः । मुक्ता नङ्गरा मिलितो, लोकः सर्वोऽपि कौतुकी ॥७१॥
वसुसारोऽपि वेगेन, राजान्तिकमुपागतः । वद श्रेष्ठिन्! किमानीतं, छगणानीति जल्पितम् ॥७२॥
अन्तःप्रहसता राज्ञा, प्रकाशमुदितं वचः । उच्छुल्कमुत्करं भाण्डं, कुरुष्व क्रयविक्रयम् ॥७३॥
महाप्रसाद इत्युक्त्वा, वसुसारो गतो गृहम् । पोतादुत्तार्य सर्वाणि, भृत्यकर्मकरैर्नरैः ॥७४॥
छगणानि गृहस्यान्त-र्मुमोच वसुनन्दनः । [हृदि प्रमोदसंयुक्तो, हस्यमानो जनैस्तथा] ॥७५॥
भस्मभाण्डं महामूल्यं, नीतमेतेन गच्छता । आगच्छता समानीतं, प्रतिभाण्डं करीषकम् ॥७६॥
अहो वाणिज्यकौशल्य-महो बुद्धिरनिन्दिता । दत्तो निजे कुलेऽनेन, दारिद्र्यस्य जलाञ्जलिः ॥७७॥
इत्येवं हसते लोको, गृहेऽपि स्वजना निजाः । श्यामितास्या वदन्त्येवं, मा विनाशय मन्दिरम् ॥७८॥
छगणानां बहिः स्थानं, कर्तुं पुत्रक ! सङ्गतम् । न शक्यते मुखं धर्तुं, लोकानां हसतां बहिः ॥७९॥

---

१ जानीत- BJP ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मौनस्थितेन तेनापि, कर्तव्यं सकलं कृतम् । द्विगुणं वेतनं दत्त्वा, भृत्यवर्गो विसर्जितः ॥८०॥
गृहशालापणाः सर्वे, कृतास्तालकरक्षिताः । जल्पन्नुपेक्षितो लोकः, पत्रकं पुरतः कृतम् ॥८१॥
अन्यदा नक्तमेकान्ते, कृते छगणपुञ्जके । ज्वलज्ज्वलनसम्पर्का-द्रत्नीभूते मनोरमे ॥८२॥
स्थालकं रम्यरत्नानां, भृत्वा भूपाय ढौकितम् । पृष्टेन कथितं सर्वं, रञ्जितो हृदि भूपतिः ॥८३॥
मुद्रा राजवशा दत्ता, महामन्त्रिपदे कृतः । सम्मतः सर्वलोकानां, यथा शरदि चन्द्रमाः ॥८४॥
सुकृतं तत्कृतं तेन, यज्जल्पितं तथैव तत् । अमात्यपदमारूढः, परं राजायते गुणैः ॥८५॥
सर्वज्ञशासनासक्तो, भक्तः सर्वज्ञपादयोः । सुसाधुपुरतः शुद्ध-सिद्धान्तश्रवणे रतः ॥८६॥
कालमुल्लङ्घयामास, धर्मस्थो वसुसारकः । अयं चोपनयः कार्यः, श्रेष्ठी तीर्थकरोपमः ॥८७॥
वसुसारसमः सङ्घः, पत्रकं च जिनागमः । दीनारलक्षतुल्यं हि, मानुष्यत्वं जगुर्जिनाः ॥८८॥
मूलमेतदशेषाणा-मुत्तरोत्तरसम्पदाम् । भस्मभाण्डसमं ज्ञेय-मशुचीदं कलेवरम् ॥८९॥
अविवेको महासिन्धुः, सद्धर्मः पोतसन्निभः । द्वीपोपमश्च विज्ञेयः, प्रायः सद्गुरुसङ्गमः ॥९०॥
शुभध्यानं ज्वलद्वह्निः, कर्म गोमयसन्निभम् । तद्दाहे धर्मरत्नानां, ज्ञानादीनां समुद्भवः ॥९१॥
स्वर्गापवर्गसौख्यानि, भुज्यन्ते तत्प्रसादतः । एवमुपनयो ज्ञेयो, दृष्टान्तेऽत्र विशारदैः ॥९२॥
तदेवं वसुसारस्य, कुर्वाणस्य पितुर्वचः । जाता समीहिताऽशेष-कल्याणवरमालिका ॥९३॥

इति **वसुसारकथानकं** समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदहो रौहिणीयकचौरस्य वक्तव्यतां श्रुत्वा वसुसारस्य श्रेष्ठिनन्दनस्य च दृष्टान्तं निशम्य निःशेषरागादिदोषशत्रुसङ्घातविघातकारिण्यपारसंसारपारावारागाधमध्यनिमज्जज्जन्तु सन्तानसमुत्तरण-विधायिनि स्वर्गापवर्गसंसर्गसौख्यसन्दोहसम्पादके श्रीसर्वज्ञवचने तथैकान्ताप्तवचने च श्रद्धानं विधेयम्, तदनुसारेण च सदनुष्ठाने प्रवृत्तिः कार्या, इत्थं च कुर्वतां भव्यानां व्युच्छिद्यन्ते रागादयः, क्षीयन्ते क्लिष्टकर्माणि, प्रवर्धन्ते पुण्यप्रकृतयः, सिद्ध्यन्ते सकलसमीहितानि, व्रतश्च निरतिचारचारित्रसम्पत्त्या सकलकर्मक्षयलक्षणो मोक्षः प्राप्यत इति ॥८७॥

तथा यदुक्तं-सदाचारप्रमत्तानां, मतमेकान्तशिक्षणम् इति तद्दृष्टान्तद्वारेणाह–

अत्रार्थे श्रेणिको ज्ञात-मभयश्च महामतिः ।
धर्मदृढमना आढ्यो, द्वितीयः स्थिरकारकः ॥९१॥

धर्मे सम्यक्त्वादिमूलगुणोत्तरगुणरूपे पुण्यस्कन्धे दृढमना निश्चलचित्त **आढ्यः** श्रेणिकाभिधानो नृपः **द्वितीयस्तस्यैव** पुत्रोऽभयकुमारनामा **स्थिरकारको** धर्मे चलचित्तानां स्थैर्यसम्पादकः, ज्ञाते च यथाक्रममिति–

धर्मदृढतायां श्रेणिककथा

समस्ति मगधालङ्कारकारकं साधुसाध्वीश्रावकश्राविका चतुर्विधसङ्घपदप्रचारा-लङ्कृतत्रिकचतुष्कचत्वरं **राजगृहं** नाम पुरवरम् तत्र श्रीमन्महावीरपादपद्ममधुकरः क्षायिकसम्यक्त्वदर्शनी जिनशासने निष्प्रकम्पमानसो **हैहयान्वयसम्भवः श्रेणिको** नाम महाराजोऽभूत्, स चान्यदा सौधर्मदेवलोके सुधर्मायां सभायां शक्रसिंहासने आसीनेनानेकसुरकोटीपरिवृतेन **शक्रेण** प्रशंसितः, अहो यादृशी **श्रेणिकस्य** नैर्ग्रन्थे प्रवचने निश्चला भक्तिः सुरैरपि क्षोभयितुमशक्या न तादृश्यन्यस्य । एतच्च समाकर्ण्यैकः सुरः शक्रवचनमश्रद्दधानो **राजगृहनगर**माजगाम । कृत्वा च वैक्रियं साधुरूपं नगरनिर्गमासन्ने महाह्रदे जालकरो मत्स्यान् जग्राह, स च तेनान्तिकं गच्छता श्रेणिकेन ददृशे, अहो ! शारदीनशशधरसङ्काशं सर्वज्ञशासनमेष मलिनीकरोतीति वितर्क्य परिमितसहायः स तत्समीपमगमत् भणितश्चासौ राज्ञा भो भद्र ! किमिदं क्रियते ? तेनोचे मत्स्यग्रहणं, किमर्थं ? संयमोपग्राहार्थं नास्ति मे कम्बलः तेन च विना प्रदीपप्रभा-विद्युद्वारिधारासचित्तरजश्च निवारयितुं न शक्यते, मत्स्यान् वीथ्यां विक्रीय तद्वेतनेन कम्बलं ग्रहीष्यामि । राज्ञोक्तमलमनेन दुर्व्यवसायेन, अहं ते कम्बलं दास्यामि, प्रतिपन्नमनेन, दत्तश्च कम्बलः, प्रतिनिवृतश्च राजा हट्टमार्गेण, प्रत्यापणं संयती आपन्नसत्त्वा कपर्दकान् याचयन्ती दृष्टा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्टा च आर्ये ! किं करोषि ? तयोक्तं निश्चितस्त्वं परपीडां न जानासि गर्भवत्यहं प्रसवो भविता। तत्र च घृतगुडादिना प्रयोजनं, तच्च कपर्दकैर्विना न सम्पद्यते, तदर्थं चायमारम्भः । राज्ञोक्तमहं ते सर्वं करिष्यामि, आगच्छ मम गृहे, आगता धृता च विविक्ताश्रये, प्रसूता देवमायया, कारितं भूभृताऽऽप्तस्त्रिया सूतिकर्म, स्वयमपि समीपस्थो न कस्यापि प्रवेशं ददाति, प्रयुक्तावधिना च ज्ञातं देवेन यादृशोऽयं सुरस्वामिना वर्णितस्तादृश एव महात्मा, [ततोऽसौ] संयतीस्वरूपमुपसंहृत्य चलकुण्डलाभरणभूषितशरीरो देवो बभूव । अवादीच्च यादृशस्त्वं सौधर्मे शक्रेणानेकसुरसमक्षं निश्चलभक्तिः श्रेणिकः सर्वज्ञधर्मे देवेनापि चालयितुमशक्यस्तत्सत्यमेव, नात्र विचारः, तुष्टोऽहं तावद् गृहाण ममाष्टादशसरमष्टादशचक्रं च हाररत्नं गोलकयुगलं च । एवं तदुभयमपि दत्त्वा देवलोकं जगाम देवः । श्रेणिकोऽपि प्रीतिपात्रमिति कृत्वा हाररत्नं चेल्लणायै ददौ गोलकयुगलं च सुनन्दायै, तया च क्रोधानलदन्दह्यमानचित्तया गोलकयुगलं सभास्तम्भे प्रस्फोटितम् एकस्माद्गोलकात्कुण्डलयुगलं विनिर्गतं द्वितीयाच्च देवदुष्यवस्त्रयुगलं, प्रहृष्टचित्तया च गृहीतं सुनन्दयेति गतं **श्रेणिकज्ञातम्** अधुनाऽभयकुमारज्ञातमुच्यते–

बभूव दुर्गतः कोऽपि, पुरे राजगृहाभिधे । निःसन्तानो निराधारो, भिक्षाचरशिरोमणिः ॥१॥
काष्ठभारवहः क्वापि, तृणभारवहोऽपि च । जलाहरणकारीति, लोको वक्ति यदृच्छया ॥२॥
कण्डकः पाशकश्चैव, पादप्रक्षालकस्तथा । कुकर्म कुरुते सर्वं, पुरे तत्र गृहे गृहे ॥३॥
इतश्च विहरन् ग्रामा-नुग्रामं शिष्यसंयुतः । धर्मधामा दयासारो, विश्रुतः श्रुतकेवली ॥४॥
शिष्यः श्रीवीरनाथस्य, पञ्चमो गणनायकः । राजगृहे समायातः, परोपकृतिहेतवे ॥५॥
अवग्रहमनुज्ञाप्य, तस्थौ तत्र गणाधिपः । वन्दनार्थं समायाता, राजा पौराश्च भक्तितः ॥६॥
प्रारब्धा देशना रम्या, हृदयानन्दकारिणी । पपुः कर्णपुटैः सर्वे, पीयूषमिव देहिनः ॥७॥
अत्रान्तरे समायातः, कान्तारात्काष्ठवाहकः । काष्ठभारं क्षितौ क्षिप्त्वा, चिन्तयामास मानसे ॥८॥
नेहलोको न वा लोको-ऽपरोऽपि मम विद्यते । अजागलस्तनस्येव, मम जन्म निरर्थकम् ॥९॥
एवं वितर्क्य च रङ्को, वन्दनार्थं समागतः । वन्दितो गणभृद्भक्त्या, श्रुतो धर्मस्तदीरितः ॥१०॥
भावितो मानसे स्वस्य, क्षयोपशमयोगतः । प्रवर्धमानसंवेगः, प्रोवाच गणनायकम् ॥११॥
यूयं नाथा अनाथानां, विधायानुग्रहं मम । यद्यस्ति योग्यता मह्यं, तदा दीक्षा प्रदीयताम् ॥१२॥
भव्योऽयमिति विज्ञाय, दीक्षितस्तत्क्षणादसौ । जग्राह द्विविधां शिक्षां, ग्रहणासेवनात्मिकाम् ॥१३॥
गुरूपदेशतस्तत्र, विजहार गृहे गृहे । भक्तपानकृते नित्यं, गीतार्थमुनिभिः सह ॥१४॥
काष्ठभारवहो वारि-तृणभारवहोऽपि च । कण्डकः पीशकश्चैव, पादप्रक्षालकस्तथा ॥१५॥
इत्यादिकटुवाक्यानि, जनो जल्पति नर्मणा । अप्रीतिकथनं चक्रे, गुरुभ्यो रङ्कशिष्यकः ॥१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुभिश्चाभयोऽभाणि, विहर्तारो वयं प्रगे। अभयोऽप्याह नो पूर्णो, मासकल्पः किमुत्सुकाः ? ॥१७॥
कथितं कारणं तेन, भद्रं भावीति जल्पितम्। प्रातरेव समुत्थाय, पुञ्जिता राजवर्त्मनि ॥१८॥
रत्नानां कोटयस्तिस्रो, घोषितं डिण्डिमेन च। भो शृण्वन्तु जनाः ! सर्वे, ह्यभयस्य प्रभाषितम् ॥१९॥
लभ्यन्ते कोटयस्तिस्रो, वस्तुत्रयविसर्जनात्। श्रुत्वेदं मिलिता लोकाः, सर्वेऽपि धनवाञ्छया ॥२०॥
किमत्र कथ्यतां वस्तु, वर्जनीयं धनार्थिना। मन्त्रिणा भणिता लोकाः, सावधानैर्निशम्यताम् ॥२१॥
पानीयं न च पानीयं, यावज्जीवं सचेतनम्। अङ्गनावह्निसेवा च, वर्जनीया प्रयत्नतः ॥२२॥
श्रुत्वेदं विरतो लोको, यातो धनपराङ्मुखः। यत्रेदं त्रितयं त्याज्यं, तत्र किं रत्नराशिभिः ? ॥२३॥
रङ्कसाधुः समाहूतः, प्रोचे चाभयमन्त्रिणा। जलादित्रितयं त्यक्तं, त्वया किं नेति कथ्यताम् ? ॥२४॥
यावज्जीवं मया त्यक्तं, द्रव्यतो भावतोऽपि च। यद्येवं ते मया दत्ता-स्तिस्रोऽपि धनराशयः ॥२५॥
कामभोगप्रमुक्तस्य, किं कार्यं रत्नराशिभिः ? । रत्नराशित्रयत्यागी, रोरः कथमयं जनाः ! ॥२६॥
धन्यश्च पुण्यवानेष, वन्दनीयो महात्मभिः। पूजनीयो विशेषेण, सर्वजीवाभयङ्करः ॥२७॥
शिष्यः स्थिरीकृतो धर्मे, ह्यभयेन सुबुद्धिना। हसन्निवारितो लोकः, कलाकौशलशालिना ॥२८॥

इति धर्मस्थिरीकरणेऽभयकुमारदृष्टान्तः । पूर्वभवाभ्यासादेव प्राणिनस्तद्वासवासिता जायन्ते एतदेव दर्शयन्नाह-

तिलानां यादृशो वास-स्तैलस्यापि च तादृशः ।
एवंविधा च सङ्गीता, जिनैर्बोधिर्भवान्तरे ॥९२॥

तिलानां धान्यविशेषाणां यादृशो वासो वासना, तैलस्यापि तिलविकारस्यापि तादृश एव तत्प्रकार एव, दार्ष्टान्तिकमाह-एवंविधा चैतत्प्रकारा सङ्गीता प्रतिपादिता जिनैरर्हद्भिर्बोधिः प्रेत्यजिनधर्मावाप्तिर्भवान्तरेऽग्रेतनजन्मनि ॥९२॥
अत्रैवार्थे दृष्टान्तमाह-

चौरयुग्ममिह ज्ञातं, वासनाविषये मतम् ।
एकस्य सुलभा बोधि-र्द्वितीयस्य च दुर्लभा ॥९३॥

चौरयुग्मं चौरद्वन्द्वमिह प्रस्तुते ज्ञातमुदाहरणं वासनाविषये संस्कारगोचरे मतं सम्मतम् एकस्य गुणबहुमानिनः सुलभा सुप्रापा बोधिर्जिनधर्मप्राप्तिः द्वितीयस्य गुणमत्सरिणो दुर्लभा दुष्प्रापा बोधिरिति वर्तते ॥९३॥
चौरयुग्मज्ञातं त्वाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इहाभूतां नरौ कौचि-दन्योन्यं दृढसौहृदौ । युवानौ साहसोपेतौ, स्वचौर्यबलगर्वितौ ॥१॥
भोगलब्धौ समस्तेच्छा-पूरकद्रव्यवर्जितौ । तौ च चौर्यं व्यधासिष्टां, भोगवाञ्छाविडम्बितौ ॥२॥
दण्डपाशिकलोकेन, सम्प्राप्तावन्यदा तकौ । नीयमानौ च तौ तेन, वध्यस्थानं तपस्विनौ ॥३॥
दृष्टवन्तौ मुनीन्मान्या-न्मान्यमानवसंहतेः । साधूनां सत्क्रियां दृष्ट्वा, तयोरेको व्यचिन्तयत् ॥४॥
अहो धन्यतमा एते, मुनयो विमलक्रियाः । स्वकीयगुणसन्दोहा-ज्जगतां पूज्यतां गताः ॥५॥
वयं पुनरधन्याना-मधन्या धनकाङ्क्षया । विदधाना विरुद्धानि, वध्यतां प्रापिता जनैः ॥६॥
चोर्येणोपहतात्मानो, यास्यामः कां गतिं मृताः ? । ही जाता दुःस्वभावेन, लोकद्वयविरोधकाः ॥७॥
तदेवं साधु साधूनां, वृत्तं वारितकल्मषम् । विपरीतमतोऽस्माक-मस्मात्कल्याणकं कुतः ? ॥८॥
अन्यः पुनरुदासीनो, भवति स्म मुनीनभि । गुणिरागादवापैको, बोधिबीजं न चापरः ॥९॥
ततस्तनुकषायत्वा-द्दानशीलतया च तौ । नरजन्मोचितं कर्म, लब्धवन्तावनिन्दितम् ॥१०॥
मृत्वा च तौ समुत्पन्नौ, कौशाम्ब्यां पुरि वाणिजौ । जातौ चाऽनिन्दिताचारौ, वणिग्धर्मपरायणौ ॥
जन्मान्तरीयसंस्कारा-दाबालत्वात्तयोरभूत् । अत्यन्तमित्रताभावो, लोकाश्चर्यविधायकः ॥१२॥
रोचते च यदेकस्य, तदन्यस्यापि रोचते । ततो लोके गतौ ख्याति-मेकचित्ताविमाविति ॥१३॥
ततः कुलोचितं कर्म, कुर्वतोर्यान्ति वासराः । अन्यदा भुवनानन्दी, प्राप्तस्तत्र जिनेश्वरः ॥१४॥
भगवान् श्रीमहावीर, इक्ष्वाकुकुलनन्दनः । वाग्गीरर्जनसन्ताप-शमनेऽम्भोदसन्निभः ॥१५॥
विदधुस्तस्य गीर्वाणा, व्याख्याभूमिं मनोहराम् । तत्रासौ धर्ममाचख्यौ, सनरामरपर्षदि ॥१६॥
तमागतं समाकर्ण्य, कौशाम्बीवासिनो जनाः । राजादयः समाजग्मु-र्वन्दितुं तत्पदाम्बुजम् ॥१७॥
तावपि श्रेष्ठिसत्सूनू, कुतूहलपरायणौ । जनेन सार्थमायातौ, जिननायकसन्निधौ ॥१८॥
जिनस्तु देशयामास, मोक्षमार्गं सनातनम् । सत्त्वानां सर्वकल्याण-कारणं करुणापरः ॥१९॥
ततस्तयोर्वणिक्सूनो-रेकस्य तज्जिनोदितम् । श्रद्धानमार्गमायाति, भाव्यते च स मानसे ॥२०॥
स्फाराक्षो मस्तकं धुन्वन्, कर्णपर्णपुटार्पितम् । रोमाञ्चितः पिबत्युच्चै-र्जिनवाक्यं यथाऽमृतम् ॥२१॥
तदन्यस्य तदा भाति, वालुकाकवलोपम् । अन्योन्यस्य च तौ भावं, लक्षयामासतुस्तराम् ॥२२॥
व्याख्याभुवः समुत्थाय, जग्मतुर्भवनं निजम् । तत्रैको व्याजहारैवं भ्रातस्त्वं भावितः किल ॥२३॥
जैनवाचा न चाहं भो-स्तदत्र किमु कारणम् । एकचित्ततया ख्याता-वावां लोके इयच्चिरम् ॥२४॥
इदानीमत्र सञ्जातं, विभिन्नं चित्तमावयोः । तदत्र कारणं किं स्या-दन्यो वक्ति स्म विस्मितः ॥२५॥
सत्यमेव ममाप्यत्र, विकल्पः सम्प्रवर्तते । केवलं केवली नूनं, निश्चयं नः करिष्यति ॥२६॥
स एव प्रश्नितोऽत्रार्थे, तद्यावः श्वस्तदन्तिके । एवं तौ निश्चयं कृत्वा, प्रातर्यातौ जिनान्तिके ॥२७॥
पप्रच्छतुस्तमाराध्य, विनयेन स्वसंशयम् । सोऽप्युवाच पुरैकेन, साधवो वां प्रशंसिताः ॥२८॥
न चान्येन तदेतस्य, जातं बीजस्य सत्फलम् । सद्बोधेः पुनरन्यस्य, निर्बीजत्वेन नाऽभवत् ॥२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतां पूर्वभवां सेवां, जिनेनोक्तां सविस्ताराम् । निशम्यैकस्य सञ्जातं, स्वजातेः स्मरणं क्षणात् ॥३०॥
ततोऽसौ प्रत्यये जाते, जातः संवेगभावितः । भावितश्च जिनोद्दिष्टं, प्रपेदे शासनं शुभम् ॥३१॥
तत्प्रतिपत्तिसामर्थ्या-च्छुभकर्मानुभावतः । सिद्धिं यास्यत्यसौ काले-ऽपरः संसारमेव हि ॥३२॥

ननु किमित्येकः सुलभबोधिको जातो नेतर इत्याह–

सर्वदा मानसे येषां, गुरुभक्तिर्गरीयसी ।
पुण्यानुबन्धिपुण्येन, तेषां जन्मेह गीयते ॥९४॥

सर्वदा नित्यं **मानसे** चित्ते येषां पुण्यप्राणिनां **गुरुभक्तिर्**धर्माचार्येतिकर्तव्यतालक्षणा **गरीयसी** महती **पुण्यानुबन्धिपुण्येन** कुशलानुबन्धिकर्मणा **तेषां** जन्मिनां **जन्म** जातिरिह जगति **गीयतेऽ**भिधीयते इति ॥९४॥

साम्प्रतं पापानुबन्धिपुण्यवतां लक्षणमाह–

औदासीन्यं गुरौ येषा-मृद्ध्यादि च विलोक्यते ।
पापानुबन्धिपुण्येन, तेषां जन्म निगद्यते ॥९५॥

औदासीन्यमुदासीनता **गुरौ** धर्माचार्यविषये **येषां** जीवानाम**ृद्ध्यादि च विलोक्यते** सम्पदादि च दृश्यते **पापानुऽबन्धिपुण्येनाऽ**कुशलानुबन्धिकुशलकर्मणा **तेषां** देहिनां **जन्मो**त्पत्तिलक्षणं **निगद्यते** प्रतिपाद्यते ॥९५॥

साम्प्रतं पापानुबन्धिपापवतां लक्षणमाह–

अभक्तिर्मानसे येषां, गुरौ भवति भूयसी ।
पापानुबन्धिपापेन, तेषां जन्मेति लक्ष्यते ॥९६॥

अभक्तिर्गुरुकर्तव्यतापरिहारलक्षणा **मानसे** हृदये **येषा** मपुण्यवतां **गुरौ** धर्माचार्यविषये **भूयस्य**तिशयमहती **पापानुबन्धिपापेनाऽ**कुशलानुबन्ध्यकुशलेन **तेषां** पापात्मनां **जन्मो**त्पत्तिरित्येवं [**लक्ष्यते**] ज्ञायत इति ॥९६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुभक्तिर्भवद्भिः कर्तव्येति प्रतिपादिता सन्तो ये धृष्टोत्तरैस्तां शिथिलयन्ति तान् श्लोकद्वयेनाह–

पूर्वं कृता करिष्यामः, साम्प्रतं व्याकुला वयम् ।
गुरुभक्तिं प्रति प्रोचु-र्ये तेषां ननु विस्मृता ॥९७॥
कालरात्रिर्यकारूढा, अविज्ञातसमागमा ।
समाप्यते क्षणादेव, यस्यां कार्यपरम्परा ॥९८॥

पूर्वं कृता पश्चात्काले विहिता, **करिष्याम** आगामिनि काले विधास्यामः **साम्प्रतं** वर्तमानकाले **व्याकुला** गृहव्यापारपरम्पराकरणसमाकुलमानसा **गुरुभक्तिं** धर्माचार्येतिकर्तव्यताम्प्रति लक्ष्यीकृत्य **प्रोचुरुक्तवन्तो** ये केचन गुरुकर्माणस्तेषां **ननु** निश्चितं **विस्मृता** स्मृतिपथमतीता, का ? **कालरात्रिर्मरणक्षपा**, या काचिद्रूढा जगति प्रतीता प्रसिद्धा, **अविज्ञातसमागमा** अविज्ञातोऽलक्षितः समागमः समागमनं यस्याः सा तथा, **समाप्यते** निष्ठां याति **क्षणादेव** झटित्येव **यस्यां** कालरात्रौ **कार्यपरम्परा** समस्तप्रयोजनपद्धतिरिति, अमुमेवार्थमुपसंहरन्नाह– ॥९७-९८॥

किं बहुना विचारेण, यदि कार्यं सुखैर्जनाः ।
तत्सर्वकुग्रहत्यागा-द्गुरुभक्तिर्विधीयताम् ॥९९॥

किं ? न किंचिद्बहुना प्रभूतेन विचारेण जल्पेन ? यदीत्यभ्युपगमे **कार्यं** प्रयोजनं **सुखैः** सातैर्जनाः - लोकास्तत्तत्स्मात्कारणात्सर्वकुग्रहत्यागात्समस्तकुबोधपरिहारेण **गुरुभक्तिर्धर्माचार्यसेवाकरणलक्षणा विधीयतां** क्रियतामिति । ननु किमित्येवं गुरुभक्तेर्माहात्म्यमुपवर्ण्यते ? उच्यते, गुरूणां दुष्प्रतीकारत्वात् उक्तञ्च–

दुष्प्रतिकारौ माता-पितरौ स्वामी गुरुश्च लोकेऽस्मिन् ।
तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः ॥१॥ [प्रशमरति प्र. ७५]

आगमेऽप्युक्तं-**तिण्हं दुप्पडियारं समणाउसो ! तं जहा-अम्मापिउणो भट्टिस्स धम्मायरियस्स संपाओ वि य णं केइ पुरिसे अम्मापियरं सयपागसहसपागेहिं तेल्लेहिं अब्भिंगित्ता सुरहिणा गंधट्टेणं उव्वट्टित्ता तिहिं उदएहिं मज्जावेत्ता सालंकारभूसियं करेत्ता मणुन्नथालीपागसुद्धं अट्ठारसवंजणाउलं भोयणं भोयावेत्ता जावज्जीवं पिट्ठिवडिंसियाए परिवहेज्जा, तेणावि तस्स अम्मापिउस्स दुप्पडियारं, अहे णं से यं अम्मापियरं केवलिपन्नत्ते धम्मे आघवइत्ता पन्नवइत्ता ठावइत्ता भवति, तेणामेव अम्मापिउस्स सुप्पडियारं भवइ । समणाउसो ! केइ महच्चे दरिद्दं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुक्कसिज्जा, तते णं से दरिद्दे समुक्किठे समाणे पच्छा पुरं च णं विउलभोगसमिद्धिसमन्नागएयावि विहरेज्जा, तते णं से महच्चे अन्नया कयाइ दरिद्दीहूए समाणे तस्स दरिद्दस्स अंतियं हव्वमागच्छेज्जा, तते णं से दरिद्दे तस्स भट्टिस्स सव्वस्समवि दलयमाणे तेणावि तस्स भट्टिस्स दुप्पडियारं भवति अहेणं से तं भट्टि केवलिपन्नत्ते धम्मे आघवित्ता परूवइत्ता ठावइत्ता भवति तेणामेव तस्स भट्टिस्स सुप्पडियारं भवति, केइ तहारूवस्स समणस्स वा माहणस्स अंतियं एगमवि आयरियं सुवयणं सोच्चा निसम्म कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववन्नो, तेणं से देवे तं धम्मायरियं दुभिक्खदेसाओ सुभिक्खं देसं साहरेज्जा, कंताराओ वा निक्कंतारं करेज्जा, दीहकालिएण वा रोगायंकेणं अभिभूयं विमोएज्जा तेणावि तस्स धम्मायरियस्स दुप्पडियारं भवति अहेणं से तं धम्मायरियं केवलिपन्नत्ताओ धम्माओ भट्ठं समाणं भुज्जो केवलिपन्नत्ते धम्मे आघवित्ता जाव ठावइत्ता भवति तेणामेव तस्स धम्मायरियस्स सुप्पडियारं भवति ।

[स्थानाङ्ग सू. ३/१/१३५]

इदं चागमवचनमवगम्य सदैव गुरुभक्तौ प्रयत्नो विधेय इति गुरुभक्तिप्रशंसाकरणं समाप्तमिति।

इति तृतीयोऽधिकारः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोपकाराधिकारः ४

उक्तो गुरुभक्त्यधिकारस्तद्भक्तिकारिणा च परोपकार एव यत्नो विधेयोऽतोऽत्र परोपकारकारिणां प्रशंसोच्यते तत्र चायं श्लोकः–

उत्पद्यन्ते विनश्यन्ति, कोटिशः क्षुद्रजन्तवः ।
परार्थबद्धबुद्धीनां, सतां पुण्यैः समुद्भवः ॥१००॥

उत्पद्यन्ते जायन्ते **विनश्यन्ति** म्रियन्ते **कोटिशो** बहुशः **क्षुद्रजन्तवो**-ऽसारसत्त्वाः, उत्तरार्धेन तु विपर्ययमाह **सतां** सत्पुरुषाणां **पुण्यैः** कुशलकर्मभिः **समुद्भवः** समुत्पादः किंविशिष्टानां सतां ? [**परार्थबद्धबुद्धीनाम्**] परार्थे परप्रयोजने बद्धा दत्ता बुद्धिर्मतिर्यैस्ते तथा तेषामिति ॥१॥

सन्तश्च स्वल्पा एव भवन्तीति दर्शयन्नाह–

परोपकारप्रवणाः, सदा स्वार्थपराङ्मुखाः ।
क्वचित्क्वचिद्विलोक्यन्ते, विरलाः सज्जना जनाः ॥१०१॥

[**परोपकारप्रवणाः**] परेषामुपकार उपकृतिस्तत्र प्रवणाः प्रह्वाः **सदा** सर्वदा **स्वार्थपराङ्मुखाः** स्वप्रयोजनविमुखास्त एवंविधगुणभाजो **जनाः सज्जनाः** सन्तश्च ते जनाश्च सज्जनाः **क्वचित्क्वचिद्विलोक्यन्ते** प्रतिनियतदेशकालादौ, न सर्वत्र इति ॥१०१॥

यतस्त एवंविधा अत आह–

जन्मापि च प्रमोदाय, शोकाय च तदत्ययः ।
अशिष्टानां तु लोकाना-मुभयस्मिन् विपर्ययः ॥१०२॥

जन्माप्युत्पादोऽपि प्रमोदाय हर्षाय, आस्तां वृद्धिः **शोकाय च तदत्ययस्तेषां** सतामत्ययो विनाशः शोकाय दुःखाय जनानामिति गम्यते । **अशिष्टलोकाना**मसज्जनानामुभयस्मिन् जीविते मरणे च **विपर्ययो** हर्षाभावशोकाभावलक्षणः ॥१०२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु किमिति सन्तः स्तूयन्ते ? यतो धराधरादयोऽपि महत्त्वगाम्भीर्यादिगुणोपेता वर्तन्ते अत आह-

धराधरा महीयांसो, गम्भीरा वारिराशयः ।
तथापि च समं शिष्टै-रौपम्यं लेभिरे न ते ।।१०३।।

धरां धरणीं धरन्तीति धराधराः पर्वता हिमवदादयो महीयांसोऽतिशयमहान्तः, गम्भीरा वारिराशय इति, गम्भीरा अलब्धमध्या वारिराशयो जलाशया लवणसमुद्रादयः, यद्यप्येवंविधा एते तथापि, च समं शिष्टैरौपम्यं लेभिरे न ते इति, तथापि, अपिशब्दस्तेषां गुणाधिक्यसूचनार्थः, समं सार्धं शिष्टैः सद्भिः औपम्यं साम्यं लेभिरे लब्धवन्तो न नैव ते धराधरादय इति ।।१०३।।

ननु किमिति सन्तस्तेभ्योऽपि समतिरिच्यन्ते ? अत आह–

येषां चित्तं च वित्तं च, वचः कायो विनश्वरः ।
परेषामुपकाराय, वेधसेह विनिर्मितः ।।१०४।।

येषां सतां चित्तं मनो वित्तं धनं वचः वाणी कायो देहो विनश्वरः क्षणक्षयी परेषामुपकाराय अन्येषामुपकृतये वेधसेह विनिर्मितो वेधसा धात्रेह जगति विनिर्मितः कृत इति ।।१०४।।

साम्प्रतं सत्पुरुषाणामेव शाखिभिः सह साम्यमुपदर्शयन्नाह–

आत्मानं दुःस्थितं कृत्वा, परं कुर्वन्ति सुस्थितम् ।
यथा वृक्षास्तथा सन्तः, परोपकृतये रताः ।।१०५।।

आत्मानं स्वं दुःस्थितं कृत्वा दुःखितं विधाय परं कुर्वन्ति सुस्थितं, परमात्मव्यतिरिक्तं कुर्वन्ति विदधति सुस्थितं सुखितं यथा वृक्षास्तथा सन्त :, यथा येन प्रकारेण वृक्षा महीरुहास्तथा तेनैव प्रकारेण सन्तः सज्जनाः परोपकृतये रताः, परेषामुपकृतिरुपकारस्तत्र रता आसक्ता इति ।।१०५।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव भावयति–

छायया सुखयन्त्यन्यं, सहन्ते स्वयमातपम् ।
पुष्पन्ति च परस्यार्थे, फलन्ति च महाद्रुमाः ॥१०६॥

छायया सुखयन्त्यन्यं, छायया आतपाभावलक्षणया सुखयन्ति सुखिनं कुर्वन्त्यन्यं स्वव्यतिरिक्तं, **सहन्ते स्वयमातपं**, सहन्ते मर्षयन्ति स्वयमात्मना आतपमौष्ण्यं, **पुष्पन्ति च परस्यार्थे**, विकसन्ति च परस्यार्थे, आत्मव्यतिरिक्तस्य प्रयोजनाय, **फलन्ति च** फलवन्तो भवन्ति च परस्यार्थ इति सम्बन्धः, ते **महाद्रुमा** वृक्षा इति ॥१०६॥

ननु स्वोदरभरणमेव सङ्गतं, किमन्येनेत्याह–

स्वोदरं भ्रियते कष्टा-द्दिनान्ते वायसैरपि ।
परार्थकरणासक्तो, यो जीवति स जीवति ॥१०७॥

स्वोदरं स्वकीयमुदरं जठरं भ्रियते पूर्यते **कष्टा**द्दुःखाद्दिनान्ते दिनमध्ये **वायसैरपि** काकैरपि, परं ते जीवन्मृतकाः, यतोऽभ्यधायि–

जीवन्तो मृतकाः पञ्च, श्रूयन्ते किल भारते ।
दरिद्रो व्याधितो मूर्खः, प्रवासी नित्यसेवकः ॥१॥

अतः **परार्थकरणासक्तः** परप्रयोजननिष्पादनसमर्थो **यो जीवति** यः सत्पुरुषो जीवति प्राणान् धारयति स एव जीवति, शेषा जीवन्मृतका इति ॥१०७॥

साम्प्रतं सत्पुरुषाणामेव मेघैः सहोपमानमाह-

क्लेशेनोपार्ज्य वित्तानि, ददुर्धर्मे नरोत्तमाः ।
यथा लोकोपकाराय, पयः पीत्वा पयोधराः ॥१०८॥

क्लेशेनोपार्ज्य वित्तानि क्लेशेन दुःखेनोपार्ज्याऽर्जयित्वा च वित्तानि द्रव्याणि, तथा च-

अर्थानामर्जने दुःख-मर्जितानां च रक्षणे ।
आये दुःखं व्यये दुःखं, धिगर्थं दुःखकारणम् ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ददुर्धर्मे नरोत्तमा ददुरयच्छन् धर्मे पुण्यनिमित्तं नरोत्तमा उत्तमपुरुषाः, **यथा लोकोपकाराय** जनहितकृते पयो जलं पीत्वा आत्मसाद्विधाय **पयोधरा** मेघा इति ॥१०८॥

ननु किमिति सन्तः पुनः पुनः शस्यन्त इत्याह–

कथं सन्तो न शस्यन्ते, हिमांशुकिरणोज्ज्वलाः ।
येषां सदुपकारेण, जायन्ते सुखिनो जनाः ॥१०९॥

कथं केन प्रकारेण **सन्तः** सज्जना **न शस्यन्ते** ? न श्लाघ्यन्ते ? हिमांशुकिरणोज्ज्वलाः हिमांशुश्चन्द्रमास्तस्य किरणाः करास्तद्वदुज्ज्वला निर्मलाः, **येषां सदुपकारेण** येषां सतां सुन्दरोपकृत्या **जायन्ते** भवन्ति **सुखिनः** शर्मभाजो **जना** लोकाः तथाहि–

उपकर्तुं प्रियं वक्तुं, कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं, केनेन्दुः शिशिरीकृतः ? ॥१॥

अधुना सज्जनानां चन्दनचन्द्रयोश्च लोकानन्दविधायकत्वमाह–

सज्जनाश्चन्दनं चन्द्रो, यदि न स्युर्महीतले ।
तदा दुःखोपतप्तानां, किं स्यान्निर्वृत्तिकारणम् ॥११०॥

सज्जनाः शिष्टजनाश्चन्दनं मलयजं, चन्द्रः प्रसिद्धो **यदि न स्युर्महीतले** यदि चेन्न भवेयुः पृथ्वीतले, तदा तस्मिन् काले **दुःखोपतप्तानामसातसङ्घातपीडितानां किंस्यान्निर्वृत्तिकारणं** ? किं भवेत्स्वास्थ्यनिमित्तं ? न किंचिदित्यर्थ इति ॥११०॥

अथ रविकरैः सह सज्जनानां साम्यमुपदर्शयन्नाह–

अज्ञानध्वान्तसन्तान-विध्वंसनपटीयसः ।
रवेरिव कराः सन्तः, [1]परोपकृतिकारिणः ॥१११॥

अज्ञानमेव ध्वान्तमन्धकारं तस्य सन्तानः प्रवाहस्तस्य विध्वंसनं विनाशनं तत्र पटीयसोऽतिशयदक्षा **अज्ञानध्वान्तसन्तानविध्वंसनपटीयसो, रवेरिव करा** भानोरिव रश्मयः

१ परोपकृतिहेतवः BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्तः शिष्टजनाः **परोपकृतिकारिणः** स्वव्यतिरिक्तजनोपकारविधायिनः ॥१११॥

अथ सज्जनानामसाधारणं गुणमभिधित्सुराह–

अर्थाभावेऽपि दातारः, सत्यसन्धा निराकुलाः ।
सदारम्भाः सदा सन्तो, निर्भया व्यसनागमे ॥११२॥
कार्यशतेऽप्यसंमूढा, गूढमन्त्रा दिवानिशम् ।
परार्थमेव कुर्वन्ति, प्राणैरपि धनैरपि ॥११३॥

अर्थाभावेऽपि धनं विनापि दातारो दायकाः **सत्यसन्धाः** सत्यभाषिणो **निराकुला** निरुत्सुकाः **सदारम्भाः** सद्व्यापाराः **सदा** नित्यं **सन्तः** सज्जनाः, **निर्भया** निर्भीका **व्यसनागमे** विपदागमे ॥११२॥

तथा **कार्यशतेऽपि** प्रयोजनशतेऽप्यसंमूढा अविलुप्तधियो **गूढमन्त्रा** अनभिज्ञातपर्यालोचा **दिवानिशं** रात्रिन्दिवं **परार्थमेव** पप्रयोजनमेव **कुर्वन्ति** विदधति **प्राणैरुच्छ्वासादिभिर्दशप्रकारैः, धनैर्वित्तैः,** अपिशब्दः सतां परोपकारकरणैकचित्ततां सूचयति, यतः-

किं चन्द्रेण महोदधेरुपकृतं दूरेऽपि सन्तिष्ठता ।
वृद्धौ येन विवर्धते व्रजति च, क्षीणे क्षयं सागरः ।
आ ज्ञातं परकार्यनिश्चितधियां कोऽपि स्वभावः सताम् ।
स्वैरङ्गैरपि येन यान्ति तनुतां दृष्ट्वा परं दुःखितम् ॥१॥

कैः कैर्वा न प्रशस्यन्ते परोपकृतिकारिणः ।
कुर्वन्तो जनतानन्दं नरचन्द्रकुमारवत् ॥११४॥

श्लोकोऽयं स्पष्टः ॥११४॥

नरचन्द्रकुमारदृष्टान्तश्चायं, तद्यथा–

समस्ति भारते वर्षे रामाजनविराजिता । सत्पुरुषसमाकीर्णा, विस्तीर्णत्रिकचत्वरा ॥१॥
श्रीवासुपूज्यसर्वज्ञ-सत्कल्याणसुरागमा । मन्दिरैर्मन्दरोदारै-र्मण्डिता च समन्ततः ॥२॥
उद्दामकाननोद्यानैः, सदा मण्डितभूतला । सौराज्येन सुखावासा, **चम्पा**नाममहापुरी ॥३॥
केशेषु बन्धनं यस्यां, दण्डश्छत्रेषु श्रूयते । वाहनं वाजिनामेव, जने नैव विलोक्यते ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पालयति महीपाल-स्तां पुरीं पुरुषोत्तमः । नरसिंहाभिधो वीरः, सदा नीतिपरायणः ॥५॥
दुर्वारवैरिवारेण, रणेनैव विनिर्जितः । सत्त्ववर्जितया यस्तु, वृतो तोषाज्जयश्रिया ॥६॥
द्वितीयाचन्द्रलेखेव, जनानन्दविधायिनी । आसीत्प्रियतमा तस्य, चन्द्रलेखेति विश्रुता ॥७॥
भुञ्जानस्य तया सार्धं, विषयान्पञ्चविधानलम् । कतिचिद्वासरा जग्मु-र्धर्मार्थावपि सेवतः ॥८॥
अथ पुत्रः समुत्पन्नः, सल्लक्षणविराजितः । सौम्यो जनमनोमोद-दायी चन्द्रसमाननः ॥९॥
नरचन्द्राभिधो रक्त-कोमलकरपल्लवः । वर्धमानः शरीरेण, सञ्जातः स कलोचितः ॥१०॥
स्वधिया स्वल्पकालेन, गृहीताः सकलाः कलाः । यौवनं च समारूढो, लोकलोचनशोभनम् ॥११॥
उदग्रयौवनस्थोऽपि, कलाभ्यासपरायणः । कामबाणव्यथातीतो, निर्वाहयति वासरान् ॥१२॥
अन्यदा चिन्तयामास, नरचन्द्रः स्वमानसे । परोपकारिणामेव, सफलं जन्म मे मतिः ॥१३॥
कर्तव्योऽसौ सदा, सद्भि-र्जीवितेनापि सत्वरम् । जायन्ते जन्तवो येन, सुखिनो जगतीतले ॥१४॥
उपकारपराः सन्तो दुर्जनास्त्वपकारिणः । एतदेव स्फुटं लिङ्गं, तयोरिह निगद्यते ॥१५॥
आसाद्य मानुषं जन्म, सदा कार्यो मनीषिणा । उपकारः परो नित्य-मन्यथा जन्म हारितम् ॥१६॥
उपकारोऽपि विज्ञेयो, निराशंसेन चेतसा । विधीयते विशालेन, यः सदा न यथाकथम् ॥१७॥
यतोऽभ्यधायि-

अयं निजः परो वेति, गणना लघुचेतसाम् ।
उदारचरितानां तु, वसुधैव कुटुम्बकम् ॥१८॥

आनन्दबिन्दुसन्दोह-दायी कामिजनप्रियः । अवतीर्णस्तदा रम्यो, वसन्तसमयो जने ॥१९॥
मुञ्चन्ति मञ्जरीनिकरं, सहकारा मनोहरम् । पुष्पं किंशुका यत्र, रक्ता इव समन्ततः ॥२०॥
अशोकः पल्लवोल्लासी, कलकण्ठरवाकुलः । सकामकामिनीपाद-पातसञ्जातसंमदः ॥२१॥
किं बहुना समस्तापि, वनराजी विराजिता । वसन्तसमये जाते, रम्यया कुसुमश्रिया ॥२२॥
उत्फुल्लफुल्लकिञ्जल्क-पानसञ्जातसंमदाः । अलयस्तत्र गुञ्जन्ति, मन्दं श्रुतिसुखावहम् ॥२३॥
निर्गच्छन्ति महाभक्त्या, चर्च्चर्यः सुमनोहराः । आन्दोलिका विधीयन्ते, शाखिशाखासु सुन्दराः ॥२४॥
गायनाः क्वापि गायन्ति, रम्यमानन्दपूरिताः । पिबन्ति क्वापि मद्यानि, जना [1]हर्षोत्कर्षिताः ॥२५॥
कामुकाः क्वापि कान्ताभिः, समं जल्पन्ति नर्मणा । क्वापि देहस्य शृङ्गारं, कुर्वन्ति वसनादिभिः ॥२६॥
नैव लोके जनः कोऽपि, विद्यते यो न रञ्जितः । सरागकामदेवेन, वसन्ते तु विशेषतः ॥२७॥
उद्दामकाममत्तेभ-कुम्भनिर्भेदकेसरी । वसन्तसमये नूनं, निर्विकारो जिनेश्वरः ॥२८॥
नरचन्द्रो महासत्त्वो, राजसूनुः सुमानसः । आलोक्य तं पुरीलोकं, सारशृङ्गारशालिनम् ॥२९॥
स्फारचित्ततया स्पृष्ट-श्चिन्तां चक्रे विशालधीः । अस्मिन्नसारसंसारे, किं विलासैर्मनीषिणाम् ? ॥३०॥

१ BJPC । हर्षाकुला भृशम्-मु. ॥ २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तोकावस्थैर्विशेषेण, वसन्तोत्सवसम्भवैः[१] । बालक्रीडागृहप्रायै-र्विद्वज्जनजुगुप्सितैः ॥३१॥
तेऽपि वित्तेन यदि हीना, भूयसा स्युः सतामलम् । काकमांसमिवोच्छिष्टं, वर्जनीया विशेषतः ॥३२॥
तथाहि-काकमांसं तदुच्छिष्टं, तुच्छमत्यन्तदुर्बलम् । भक्षितेनापि किं तेन, तृप्तिर्येन न जायते ॥३३॥
एवं तुच्छेष्वसारेषु, यद्विलासेषु रज्यते । जनस्तत्राज्ञता हेतु-रथवाऽऽत्मभरणता ॥३४॥
शुभचित्तः समालोच्य, चेतसा रहसि स्थितः । कलाभ्यासपरः शान्तः, समास्तेऽसौ निराकुलः ॥३५॥
महाराजोऽथ पप्रच्छ, नरसिंहो जनं निजम् । किं नु भो नरचन्द्राद्या, लोका सर्वेऽपि मामकाः ॥३६॥
सञ्जातेऽथ मनोमोदे, मधुमासेऽतिशालिनि । क्रीडन्ति वा न वेत्यत्र, सत्यमेव निगद्यताम् ॥३७॥
ततो जनो जगादैनं, महीनाथं कृताञ्जलिः । तव पुत्रं विना नाथ ! शेषाः क्रीडन्ति मानवाः ॥३८॥
तद्वचनं समाकर्ण्य, शङ्कितो निजमानसे । उत्थाय सहसा स्नेहा-त्कुमारान्तिकमागतः ॥३९॥
कुमारोऽपि समुत्थाय, विनयानतविग्रहः । ऊचे कृतशिरःपाणिः, कार्यं तात ! निगद्यताम् ॥४०॥
राजाह सत्कुले जन्म, रूपं रोगविवर्जितम् । वयोऽतिसुन्दरं पुत्र!, वित्तं तव गृहेऽधिकम् ॥४१॥
परिजनो विनीतश्च, स्वाज्ञैश्वर्यं च सुन्दरम् । जनानुरागः सौभाग्यं, जातं ते पुण्ययोगतः ॥४२॥
विलासकारणे यूनां, वसन्ते समुपस्थिते । विलासविमुखेनेह, मुनिनेव किमास्यते ? ॥४३॥
कुमारः प्राह-श्रूयतां कारणं तात!, येन न क्रियते मया। विलासो यौवनस्थेन, वसन्तेऽपि समागते ॥४४॥
कायश्चकास्ति रूपेण, रूपं भाति सयौवनम् । शृङ्गारैर्यौवनं भाति, शृङ्गारा अपि सम्पदा ॥४५॥
अथवा-स्वगुणै रूपमाभाति, रूपं भाति सुशीलतः । शोभते सर्व एवेह, लोको लक्ष्म्या विशालया ॥
विवाहवृद्धियात्रासु, मित्राणां सङ्गमे तथा । जायते मानभङ्गो हि, मानिनामल्पसम्पदाम् ॥४७॥
यथाकाशं विना चन्द्रम्, सरोऽपि कमलैर्विना । शोभते नैव लोकेऽस्मिं-स्तथा भोगो धनं विना ॥४८॥
उन्नतिर्जायते लोके, निःसङ्गानां धनं विना । विलासिनां विना वित्तै-र्जायते मानखण्डनम् ॥४९॥
तस्मादलं विलासैर्नः, स्वल्पकालैः स्वपोषकैः । श्रुत्वेदं वचनं राजा, चिन्तयामास मानसे ॥५०॥
विलासचित्तो मत्सूनु-र्महेच्छोऽयं नरोत्तमः । नैवास्य जायते तोषो, विलासैर्दानवर्जितैः ॥५१॥
परोपकारो माध्यस्थ्यम्, दाक्षिण्यं दानशीलता । सतामुदारचित्तानां, यतोऽमी सहजा गुणाः॥५२॥
ततो राजा बभाणैवं, रञ्जितस्तद्गुणैरलम् । अस्ति वित्तं तवायत्तं, कुरु वत्स ! समीहितम् ॥५३॥
आदिदेश ततो राजा, भाण्डागारिकमञ्जसा । दातव्यं भोस्त्वया सर्वं, कुमारो यत्समीहते ॥५४॥
एवं सर्वं समादिश्य, राजा स्वार्थमशिश्रियत् । ततः कुमारवाक्येन, पुर्यामुद्घोषणे कृते ॥५५॥
समायाता जनाः सर्वे, युवानः सविशेषतः । कुमारशासनात्तुष्टा, मधुमासदिदृक्षवः ॥५६॥
कुमारस्तानथ प्रेक्ष्य, चिन्तयामास मानसे । आत्मतुल्यानिमान् कुर्वे, सद्वस्त्रादिप्रदानतः ॥५७॥
यौवनं जीवितं वित्तं, व्यापारो रूपमेव वा । तदेव शस्यते सद्भि-रुपकाराय देहिनाम् ॥५८॥

---

१ °सम्भवे-BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः समानताम्बूलं, तुल्याभरणभूषणम् । समानवस्त्रसत्पुष्पं, तुल्ययानादिवाहनम् ॥५९॥
तुल्यकर्पूरसन्मिश्र-श्रीखण्डादिविलेपनम् । कारयित्वा जनं सर्वं, कुमारो हृष्टमानसः ॥६०॥
विहितस्फारशृङ्गारः, पुरमध्याद्विनिर्ययौ । स्थाने स्थाने इमाः श्रव्याः, शृण्वन् वाचो जनोदिताः ॥६१॥
धन्योऽयं पुण्यवानेष, श्लाघ्यं जन्मास्य गण्यते । येनेप्सितार्थदानेन, सर्वोऽयं तोषितो जनः ॥६२॥
ततो गत्वा वरोद्याने, पुष्पसुन्दरनामनि । कुमारः सह लोकेन, प्रमोदभरनिर्भरः ॥६३॥
दीनानाथादिलोकेभ्यो, याचकादिजनाय च । वाञ्छातीतं ददद्द्रव्यम्, संक्रीडति यथेच्छया ॥६४॥
एवमर्थव्ययं वीक्ष्य, भाण्डागारनियुक्तकः । राज्ञे निवेदयामास ? सर्वं पुत्रविजृम्भितम् ॥६५॥
ददाति ते महाराज !, पुत्रो दानमनर्गलम् । सहस्रलक्षकोटीभि-र्दीनादिभ्यः कुबेरवत् ॥६६॥
कतिचिद्वासरानेष, यद्येवं देव ! दास्यते । तदा नूनं महाराज !, रिक्तः कोशो भविष्यति ॥६७॥
श्रुत्वेदं वचनं राजा, कोशक्षयनिवेदकम् । दूमितो मानसे बाढं, कुमारं प्रति रंहसा ॥६८॥
आहूय निष्ठुरैर्वाक्यै-रुपालब्धः कुमारकः । मूढबुद्धिर्न जानासि, धनानामर्जने श्रमम् ॥६९॥
किं दुर्गो हस्तिनो देशो, वाजिनो वातिसुन्दराः । इयद्वित्तव्ययात्सिद्धम्, यत्ते तन्मे निवेदय ॥७०॥
कुमारोऽपि समाकर्ण्य, सोपालम्भं वचः पितुः । समुत्थाय समायातो, दुःखितो निजमन्दिरम् ॥७१॥
तत्रापि शयने सुप्तो, रात्रौ चिन्तितवानसौ । मानभङ्गे हि यद्दुःखम्, तन्मृत्योरतिरिच्यते ॥७२॥
यतः-मरणे स्यात्क्षणं दुःख-माजन्मं मानखण्डने । विषहन्ते कथं नाम, मानिनो मानखण्डनम् ॥७३॥
सह्यतां मानभङ्गो हि, साधुभिर्मोक्षकाङ्क्षिभिः । मानिभिः सह्यते नैव, तद्धना एव येन ते ॥७४॥
सह्यते मानभङ्गो हि, निर्विज्ञानैर्नपुंसकैः । जन्मभूमिसमासक्तै-र्मण्डलैरिव मानवैः ॥७५॥
इत्यादि चिन्तयित्वाथ, खड्गपाणिर्निरुत्सुकः । रजन्यां निर्ययौ धीर, एकाकी सुविचक्षणः ॥७६॥
कथानकविशेषेण, पुरे पारेतकाभिधे । सायं सम्प्राप तत्रापि, सुप्तोऽसौ देवमन्दिरे ॥७७॥
अथ निद्राविरामेऽसा-वासन्ने गिरिगह्वरे । वह्निमालोकयामास, ज्वलन्तं मनुजोत्तमः ॥७८॥
किंकारणो भवेदग्निः, कौतुकाक्षिप्तमानसः । समुत्थाय ततो धीरो, ज्वलनाभिमुखं ययौ ॥७९॥
अपश्यद्वामतस्तत्र, धातुवादिजनान् बहून् । ताम्रयोगसमायुक्तान्, भूरिवित्ताभिलाषिणः ॥८०॥
आशीर्वादं ददौ तेभ्यः, सिद्धिरस्तु समीहिते । स्वागतं तेऽपि जल्पन्तः, कुमाराभिमुखं गताः ॥८१॥
अत्रान्तरे पुण्ययोगेन, सिद्धं स्वर्णमनुत्तरम् । अहो पुण्यवतां योगः, सर्वकल्याणकारणम् ॥८२॥
लात्वा स्वर्णं ततः प्रोचु-स्ते तुष्टाः कुमरं प्रति । गृहाणेदं महाभाग !, स्वपुण्यैः समुपार्जितम् ॥८३॥
यतः-एवंविधा समस्तापि, सामग्री हेमसाधिका । सञ्जाता न पुनर्जातं, जातरूपं त्वया विना ॥८४॥
ततोऽवोचत्कुमारस्तान्, स्वभावोदारया गिरा । युष्मदीयमिदं स्वर्णं, न ममास्ति प्रयोजनम् ॥८५॥
श्रुत्वेदं विस्मिताः सर्वे, चिन्तां चक्रुः स्वचेतसि । महीनाथसुतः कोऽपि परोपकृतिकारकः ॥८६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लात्वा स्वर्णं स्वके स्थाने, ततः सर्वेऽपि ते गताः ।
कुमारोऽपि महीं भ्राम्यन्, पुरे भोगपुरे गतः ॥८७॥
दृष्ट्वा तत्र वरोद्यानं, नानावृक्षसमाकुलम् । विश्रामहेतवे तत्र, प्रविष्टो हृष्टमानसः ॥८८॥
उद्यानदीर्घिकानीरे, स्नात्वा पीत्वा च तज्जलम् । अशोकवरवृक्षस्य, सच्छायायां स सुप्तवान् ॥८९॥
इतश्चापुत्रको राजा, मृतस्तत्र महापुरे । ततश्च पञ्च दिव्यानि, मन्त्रिभिरभिषेचिरे ॥९०॥
ततस्तानि चिरं भ्रान्त्वा, तत्र सर्वत्र पत्तने । निर्गत्य काननस्थस्य, कुमारस्यान्तिकं ययुः ॥९१॥
ततो राज्याभिषेकेणा-भिषिक्तः कुमरस्तकैः । हस्तिस्कन्धसमारूढो, महद्धर्चा पुरमाविशत् ॥९२॥
जातो राजा महाकोशः, प्रचण्डश्चण्डशासनः । ख्यातकीर्तिः प्रजानन्दः, साधिताशेषभूतलः ॥९३॥
अन्यदा ये पुरा दृष्टा, धातुवादकमानवाः । भूपेन ते समागत्य, नत्वा भूपं निषेदिरे ॥९४॥
ततः सन्मानिता राज्ञा, ताम्बूलादिप्रदानतः । पृष्ट्वा च कुशलोदन्तं भोजिता निजमन्दिरे ॥९५॥
ततो दत्तं धनं भूरि, प्रासादाश्च मनोहराः । उक्ताश्च मत्समीपे भोः, सन्तिष्ठत निराकुलाः ॥९६॥
श्रुत्वेदं तेऽपि सानन्दा-स्तस्थुर्विलसतो धनम् । पूजिता राजलोकेन, भूपतेरपि वल्लभाः ॥९७॥
अन्यदा भणिता[1] राज्ञा, भूरिद्रव्यार्थिना सता । यथा भो मम वाक्येन, स्वर्णसिद्धिर्विधीयताम् ॥९८॥
युष्माकं सर्वमेवात्र, साहाय्यं प्रकरोम्यहम् । क्रियतां सर्वसामग्री, पात्यतां भूरि काञ्चनम् ॥९९॥
ततस्तेऽपि विधायाशु, सामग्रीमखिलामपि । स्वर्णसिद्धिं प्रयत्नेन, प्रवृत्ता कर्तुमञ्जसा ॥१००॥
राज्ञः पुण्यानुभावेन, पातितं भूरि काञ्चनम् । तुष्टो राजा ततश्चैत-च्चिन्तयामास मानसे ॥१०१॥
वाञ्छितार्थप्रदानेन, विधाय निरृणां महीम् । करोमि सुस्थितं लोकं, साम्प्रतं सर्वमेव हि ॥१०२॥
विचिन्त्यैवं ततो राजा, समाहूय स्वमन्त्रिणः । बभाण भणितिप्रौढः, प्रौढवाक्यैरिदं मुदा ॥१०३॥
अहोऽहो मन्त्रिणः सर्वं, समाहूय जनं ततः । पृच्छचतां येन यावच्च, दातव्यं विद्यते धनम् ॥१०४॥
तत्तावद्दीयतां तस्मै, क्रियतां निरृणां महीम् । ततस्तूर्णं तथा चक्रे, मन्त्रिभी राजशासनम् ॥१०५॥
सर्वेषु चैव देशेषु, सर्वग्रामपुरादिषु । दत्तं यथेप्सितं द्रव्यं, सर्वलोकाय भूभुजा ॥१०६॥
सर्वपाखण्डिलोकानां, सर्वदीनादिदेहिनाम् । चकारोपकृतिं राजा, वाञ्छातीतं धनं ददन् ॥१०७॥
एवं च कुर्वतो राज्ञो, लोकं सर्वत्र सुस्थितम् । गतः कालो बहुर्जाता, कीर्तिः शुभ्रा जगत्त्रये ॥१०८॥
अन्यदा स्वर्गनाथेन, स्वर्गे स्वर्गौकसां पुरः । सदौदार्यगुणो राज्ञो, वारंवारं प्रशंसितः ॥१०९॥
यथा भो भोः सुराः ! श्रीमा-न्नरचन्द्रो नरेश्वरः । सर्वदा सर्वलोकाय, ददात्येव हि वाञ्छितम् ॥११०॥
वाक्यमेतत्सुरेन्द्रस्य, द्वावश्रद्दधतौ सुरौ । परीक्षार्थं समायातौ, राज्ञो भोगपुरं पुरम् ॥१११॥
तत्रैकः शक्ररूपेण, जगाम नृपसन्निधौ । जगादैवं स्फुटैर्वाक्यै-र्नराधीशं कृताञ्जलिः ॥११२॥

---

१ भाणिते-BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहं हि सूरराजस्य, सूरसेनाभिधः सुतः ।
श्रीमच्चन्द्रपुरस्वामी, सुप्रतीतो रिपुस्तव ॥११३॥

तावकीनैर्महादण्डै-र्निर्जितो लूषिता पुरी । सर्वं मम हृतं राज्यं, पुरमन्तःपुरं तथा ॥११४॥
वियोजितः स्वबन्धुभ्यो, भ्रंशितो राज्यसम्पदः । एकाक्येव चिरं भ्रान्तो, महीपीठे सुदुःखितः ॥११५॥
भ्राम्यता च मयाऽश्रावि, कीर्तिर्दानोद्भवा तव । ततो मया व्यचिन्त्येवं, किमन्यैस्तुच्छकैर्जनैः ॥११६॥
सेवितैर्याचितैर्वापि, कृपणैर्द्रव्यलोलुपैः । याचिता अपि ते दद्युः, शतं पञ्चशतानि वा ॥११७॥
तदौदार्यगुणोपेतं, नरचन्द्रनरेश्वरम् । दातारमीप्सितार्थस्य, शत्रुमप्याश्रयाम्यहम् ॥११८॥
एवं विचिन्त्य राजेन्द्र !, समायातस्त्वदन्तिके । न कार्यः प्रार्थनाभङ्गः, किञ्चित्तुच्छं प्रयच्छ मे ॥११९॥
भूपति प्राह याचस्व, यद्भवतः प्रतिभासते । स प्राह दीयतां तर्हि, राज्यं राजेन्द्र ! मे निजम् ॥१२०॥
ततश्च नरचन्द्रेण, भूभुजोदारचेतसा । तृणाय मन्यमानेन, तस्मै राज्यमदीयत ॥१२१॥

यतः- **कियती पञ्चसहस्री, कियती लक्षा च कोटिरपि कियती ।**
अनुकम्पामयमनसां, सा रत्नवती वसुमती कियती ? ॥१२२॥
किमत्र चित्रं यत्सन्तः, परानुग्रहकारिणः ।
न हि स्वदेहशान्त्यर्थं, जायन्ते चन्दनद्रुमाः ॥१२३॥

ततो राजा विनिष्क्रान्तः, पुरात्खड्गसहायकः । जगाम बहिरुद्याने, सानन्दो दैन्यवर्जितः ॥१२४॥
तत्रैवं चिन्तयामास, विशालोदारचेतसा । परोपकारतानिष्ठो, महेच्छः स्वच्छमानसः ॥१२५॥

तद्यथा- **पातालान्न विमोचितो बत बलिर्मृत्युर्न नीतो क्षयम् ।**
नो मृष्टं शशलाञ्छनस्य मलिनं नोन्मूलिता व्याधयः ।
शेषस्यापि धरां विधृत्य न कृतो भारापहारः क्षणं,
चेतः सत्पुरुषाभिमानकलुषं मिथ्यैव किं खिद्यसे ? ॥१२६॥

यावदेवं नराधीशः सन्तिष्ठति विचिन्तयन् । तावच्छशकव्याधस्य, रूपद्वयं विकुर्व्य सः ॥१२७॥
देवो द्वितीयकस्तूर्णं, समायातो नृपान्तिकम् । तत्रासौ शशकः शीघ्रं, राज्ञः पादान्तमाश्रितः ॥१२८॥
राजन् ! मां रक्ष रक्षेति, भक्ष्यमाणो भयातुरः । त्वमेवात्र मम त्राण-मत्राणत्राणकारकः ॥१२९॥
ततः प्रच्छादितः स्वीय-वस्त्रे तेन स भूभुजा । आयातस्तदनु व्याधो, बिभ्राणः सशरं धनुः ॥१३०॥
भूपस्य पुरतो भूत्वा, बभाणैवं स्फुटाक्षरैः । शशकोऽयं महाराज!, लब्धोऽत्यन्तक्षुधालुना ॥१३१॥
तदर्पयस्व येनैनं, भक्षयामि बुभुक्षितः । राजाह किं तवानेन, याचस्व द्रव्यमीप्सितम् ॥१३२॥
द्रव्येण लप्स्यसे मांस-मन्यद्वा वस्तु वाञ्छितम् । व्याधः प्रोवाच मे राज-न्ननेनैव प्रयोजनम् ॥१३३॥
राजाह मे वराकोऽयं, शशकः शरणागतः । तदेनं नार्पयाम्येव, किञ्चिदन्यत्प्रयाच्यताम् ॥१३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्येवं दीयतां ताव-त्स्वमांसं क्षुधिताय मे । तोल्यते शशको याव-द्यदि चेतसि ते कृपा ॥१३५॥
राज्ञोक्तं गृह्यतां मांसं, शशको मुच्यतामयम् । एवमुक्त्वा सहर्षेण नाराचः प्रगुणीकृतः ॥१३६॥
ततः शशकमेकत्र, तत्राक्षेप्य नरेश्वरः । उत्कृत्योत्कृत्य जङ्घातो, मांसं चिक्षेप सोऽन्यतः ॥१३७॥
यथा यथा क्षिपत्येष, स्वमांसं तत्र भूपतिः । तथा तथा महाभारः, शशको वर्धतेतराम् ॥१३८॥
एवं तत्र निजं मांसं, क्षिपन् राजा मुहुर्मुहुः । सञ्जातो मरणावस्थो, मूर्च्छया पतितः क्षितौ ॥१३९॥
तथापि तेन नो मुक्तं, निजं सत्त्वं मनागपि । महासत्त्वेन वीरेण, परोपकृतिचञ्चुना ॥१४०॥
ततो विज्ञाय तौ देवौ, राज्ञश्चित्तं सुनिश्चलम् । प्रकटीभूय भाषेते, श्लाघ्यमानौ नरेश्वरम् ॥१४१॥
अहो ते परमौदार्य-महो ते सत्त्वमूर्जितम् । अहो ते भूप ! गाम्भीर्य-महो ते वीर ! वीरता ॥१४२॥
अहो ते निर्मला कीर्ति-स्त्रैलोक्योदरचारिणी । शक्रेणापि सुराध्यक्षम्, यस्त्वं संश्लाघ्यसे नृप ! ॥१४३॥
एवं भूपगुणान् स्तुत्वा, कथयामासतुस्तकौ । राज्ञः सर्वं स्ववृत्तान्तं, शक्रश्लाघादिकं मुदा ॥१४४॥
ततस्तोषेण तौ देवौ, हारं त्रैलोक्यसुन्दरम् । भूपाय दातुमारब्धौ, न चासौ तं गृहीतवान् ॥१४५॥
ततस्ताभ्यां नृपः प्रोक्तो, भो भूप ! क्षमयस्व नौ । इयच्चिरं यदावाभ्यां, विना दोषं कदर्थितः ॥१४६॥
गच्छ राजन्निजे राज्ये, पालयस्व निजाः प्रजाः । जीव नन्द चिरं कालं, दुर्लभास्त्वादृशा जनाः ॥१४७॥
एवमुक्त्वा गतौ देवौ, स्वस्थानं तुष्टमानसौ । स्ववेश्मागत्य राजापि, प्राज्यं राज्यमपालयत् ॥१४८॥
अनेका वरभूपाल-कन्यकाः परिणीतवान् । भुक्ता भोगाश्चिरं कालं, जाताः पुत्रा मनोहराः ॥१४९॥
अन्यदा नरचन्द्राय, समानयनहेतवे । प्रेषिता नरसिंहेन, पित्रामात्या महत्तराः ॥१५०॥
आगत्य नरचन्द्रस्य, पितुर्वाक्यं निवेदितम् । यथा भो जनकेन त्वं, समाहूतोऽसि सादरम् ॥१५१॥
तद्राजन् ! गम्यतां तत्र, पितुर्वाक्यं विधीयताम् । ततश्च नरचन्द्रोऽपि, निजे राज्ये निजं सुतम् ॥१५२॥
निवेश्य नरधर्माख्यं, सर्वलोकस्य संमतम् । संभाष्य पौरवं लोकं, सन्मान्य च यथोचितम् ॥१५३॥
कृत्वा सामग्रिकां सर्वां, सान्तःपुरो नरेश्वरः । कुर्वन् सर्वजनानन्दं, समायातः पितुः पुरम् ॥१५४॥
आनन्दितस्ततो राजा, सर्वः परिजनस्तथा । नरचन्द्रे समायाते, जीमूत इव केकिनः ॥१५५॥
ततो राजा निजे राज्ये, नरसिंहो निवेश्य तम् । दत्त्वा धर्मे धनं भूरि, कृत्वा सर्वं यथोचितम् ॥१५६॥
धर्मार्थी स्वक्रमायातं, वनवासमशिश्रियत् । नरचन्द्रोऽपि सञ्जातः प्रजानन्दो महानृपः ॥१५७॥
प्रभूता साधिता पृथ्वी, प्रभूता जज्ञिरे गजाः । प्रभूता वाजिनो जाताः, प्रभूताः स्यन्दनास्तथा ॥१५८॥
बभूव भूरिपादातं, द्रव्यं जातं प्रभूतकम् । शत्रवो मित्रतां नीता, गुणग्राही जनः कृतः ॥१५९॥
उल्लसिता सिता कीर्ति-र्विश्वविश्वाभिगामिनी । पूरिता भूरिदानेन, समस्तार्थिमनोरथाः ॥१६०॥
एवं प्रकुर्वता तेन, नरचन्द्रेण भूभुजा । मध्ये परोपकर्तॄणां, स्वा रेखा धुरि वापिता ॥१६१॥

अन्यदा बहिरुद्याने चम्पकामोदनामनि ।
शीलसुन्दरनामानः, समायाता मुनीश्वराः ॥१६२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्ज्ञानसुविज्ञात-सर्वविज्ञेयविस्तराः । बहुशिष्यसमायुक्ता, भव्याम्भोरुहभास्कराः ॥१६३॥
तदागमं समाकर्ण्य, वन्दनार्थं बहुर्जनः । पुरमध्याद्विनिष्क्रान्तो, हेलया भक्तिनिर्भरः ॥१६४॥
राजाप्यागमनं ज्ञात्वा, सूरीणां ज्ञानशालिनाम् । जगाम वन्दनाद्यर्थं, समं सामन्तमन्त्रिभिः ॥१६५॥
अभिवन्द्य यथौचित्यं, सूरीनन्यमुनींस्तथा । निषण्णश्चोचिते स्थाने, ततः सूरिभिरञ्जसा ॥१६६॥
गम्भीरधीरनादेन, प्रारब्धा धर्मदेशना । मिथ्यात्वविततध्वान्त-ध्वंसनैकरविप्रभा ॥१६७॥

भो भो भव्या ! इमे जीवाः, सर्वेऽपि सुखलिप्सवः ।
सुखं च धर्मतस्तस्मा-द्धर्मे यत्नो विधीयताम् ॥१६८॥

धर्मस्तु स एवेह, यः सर्वज्ञैः प्ररूपितः । अहिंसादिगुणाधारः, सारः सर्वजगद्धितः ॥१६९॥
इत्याद्यनेकधा धर्म-माचक्षाणं मुनीश्वरम् । पप्रच्छावसरं प्राप्य, नरचन्द्रो नरेश्वरः ॥१७०॥
भगवन् ! किं मयाकारि, शुभं कर्मान्यजन्मनि । चिन्ताक्रान्ता ममाशेषा, येन पूर्णा मनोरथाः ॥१७१॥
सूरिः प्राह महाराज !, श्रूयतां सावधानतः । त्वमासीर्भो नराधीश !, कुञ्जरः पूर्वजन्मनि ॥१७२॥
विन्ध्याटव्यां सुभद्राख्य-श्चतुर्दन्तः सितप्रभः । सुरूपो भद्रजातीयो, हस्तियूथस्य नायकः ॥
अन्यदा च त्वया दृष्टः, साधुर्द्रष्टव्यदर्शनः । अवधिज्ञानसम्पन्नो, नभोगामी विहङ्गवत् ॥१७४॥
ततस्त्वं धावितो वेगा-त्तं प्रत्यारुष्टमानसः । गतस्तूर्णं तदासन्ने, सम्यगालोकितो मुनिः ॥१७५॥
ततस्तद्दर्शनादेव, कोपावेशं विमुक्तवान् । स्तम्भित इव सन्मन्त्रैः, स्थितस्तस्याग्रतो मुनेः ॥१७६॥
ततस्त्वं साधुना प्रोक्तो, गम्भीरोदारया गिरा । अहो पूर्वभवः किं ते, विस्मृतो वरकुञ्जर ! ?॥१७७॥
वाणिज्यं वा त्वयाकारि, मया सार्धं तदा गज[1] !। अथ त्वं धावितो भद्र !, दूरं रुष्टो ममोपरि ॥१७८॥
यदि ते विस्मृतं सर्वं, तदाकर्णय कथ्यते । त्वं चाहं च वरे द्वीपे, धातकीखण्डनामनि ॥१७९॥
पुरे राजपुरे हस्तिन् ! द्वावप्यावां वयस्यकौ । अभवाव वणिक्पुत्रौ, स्नेहवन्तौ परस्परम् ॥१८०॥
कृतवन्तौ सहैवावां, वाणिज्यं द्रविणार्थिनौ । वञ्चितोऽहं त्वया द्रव्य-लाभेनानेकधा तदा ॥१८१॥
तेन त्वं वञ्चनादोषा-न्मृत्वा जातोऽसि कुञ्जरः । कृतं हि कुत्सितं कर्म, [2]न मोघं जायते यतः ॥१८२॥
येन ते परमा प्रीति-स्तदाभवन्ममोपरि । मामालोक्य तव क्रोधः, प्रशान्तस्तेन हेतुना ॥१८३॥
सहसा येन दृष्टेन, कोपावेशः प्रशाम्यति । वर्धते प्रीतिरत्यर्थं, पूर्वबन्धुः स तस्य भोः ॥१८४॥
सहसा येन दृष्टेन, कोपावेशः प्रवर्धते । हीयते प्रीतिरत्यर्थं, पूर्वशत्रुः स तस्य हि ॥१८५॥
अहं पुनस्तदाभूवं, सदा दानपरायणः । किञ्चित्तनुकषायत्वा-त्प्राञ्जलिः सर्वकर्मसु ॥१८६॥

ततो मृत्वा समुत्पन्नः, पुरे राजपुराभिधे ।
श्रेष्ठिनश्चन्दनाख्यस्य, पुत्रः सुन्दरनामकः ॥१८७॥

क्रमेण यौवनं प्राप्तः, कामिनीजनमोहनम् । विशालवंशजां कन्यां, विभूत्या परिणीतवान् ॥१८८॥

---

१ जकत् । येन त्वं -BJPC ॥ २ नामोघं - BJC मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भुक्ता भोगास्तया सार्धं, जाता योग्याः सुता मम। सम्पालितः सुखेनैव, चिरं कालं गृहाश्रमः ॥१८९॥
आयाताः सूरयस्तत्र, **श्रुतसागर**नामकाः। धर्मं श्रुत्वा गृहीता च[1], प्रव्रज्येयं तदन्तिके ॥१९०॥
अधीतो भूरिसिद्धान्तः, सुष्ठु तप्तं तपश्चिरम्। सञ्जातमवधिज्ञानं, लब्धिश्चाकाशगामिनी ॥१९१॥
दृष्टश्च ज्ञानसद्दृष्ट्या, जातो हस्तितया भवान्। समायातश्च तेनाहं, त्वत्प्रतिबोधहेतवे ॥१९२॥
तदहो साम्प्रतं हस्तिन्, ! कोपं मुञ्चस्व सर्वथा। प्रतिपद्यस्व सद्धर्मं, तूर्णं स्वहितमाचर ॥१९३॥
श्रुत्वेदं स गजस्तत्र, जातो जातिस्मरः क्षणात्। ततस्तस्य मुनेः पार्श्वे, श्रावकत्वं प्रपन्नवान् ॥१९४॥
ततोऽसौ सुमुनिः सम्यग्, बोधयित्वा गजं तकम्। जगाम निजके स्थाने, कालेन च शिवालये ॥१९५॥
गजोऽपि श्रावकं धर्मं, पालयित्वा चिरं ततः। पर्यन्तेऽनशनं कृत्वा, मृत्वा सौधर्मनामनि ॥१९६॥
देवलोके सुरो जातो, महातेजा महर्द्धिकः। ततश्च्युत्त्वा भवानत्र, नरचन्द्रो नृपोऽजनि ॥१९७॥
श्रुत्वेदं सूरिसद्वाक्यं, भूपतिर्मूर्च्छितः क्षणम्। सस्मार पूर्वजां जातिं, शुभभावानुभावतः ॥१९८॥
ततः सूरिमुवाचैवं, संवेगोद्धुरया गिरा। भदन्ताहं निजे राज्ये, सुस्थं कृत्वा त्वदन्तिके ॥१९९॥
सर्वक्लेशहरीं दीक्षां, गृहीष्यामि मुनीश्वर !। एवमुक्त्वा गतो राजा, स्वगेहे सपरिच्छदः ॥२००॥
ततो राज्ये **सुसेना**ख्यं, निजपुत्रं न्यवेशयत्। कृत्वाऽन्यदपि यत्कृत्यम्, दत्त्वा दानं यथेप्सितम्।२०१।
कारयित्वा महापूजां, सर्वेषु जिनवेश्मसु। वस्त्रपात्रादिभिः सम्य-क्प्रतिलाभ्य मुनीन्नृपः ॥२०२॥
सूरिणामन्तिके [2]भूत्वा, गत्वा संविग्नमानसः। जग्राह विधिना दीक्षां, सर्वकर्मविमोचिनीम् ॥२०३॥
ततो गीतार्थसत्साधु-समीपे शुभभावतः। शिक्षिता द्विविधा शिक्षा, नरचन्द्रसुसाधुना ॥२०४॥
पालितः सुचिरं शुद्धः, संयमस्तपसा सह। सावशेषीकृतं कर्म, संसारश्च लघूकृतः ॥२०५॥
पर्यन्ते विधिना मृत्वा, सञ्जातोऽनुत्तरे सुरः। ततश्च्युत्त्वा विदेहेऽसौ, व्रतं लात्वा शिवं गतः ॥२०६॥
चरितमिदमुदारं सर्वलोकैकसारम्, नरपतिनरचन्द्रस्याद्भुतं भव्यलोकाः !
[3]त्रिभुवनजनतानां दत्तमोदं निशम्य, कुरुत निजकशक्त्या, सर्वलोकोपकारम् ॥२०७॥

इति **श्रीनरचन्द्रस्य** कथानकं परिसमाप्तम्

---

१ मे प्र°BJPC ॥ २ BJPC । तत्र-मु. ॥ ३ त्रिभुवनजनितानन्दमोदं-BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ परोपकर्तृनेव विशेषतः प्रशंसयन्नाह–

मिथ्येदं कूर्मशेषाभ्यां, यन्मही विधृता किल ।
परोपकर्तृभिः सद्भि-र्धृता भूरिति मे मतिः ॥११५॥

मिथ्या-अलीकमिदं जनजल्पितं **कूर्मशेषाभ्यां** कच्छप-नागराजाभ्यां यदिति [1]भाषायां **मही** मेदिनी **विधृता** विशेषेण धारिता,**किल** इत्यपवादे, तर्हि **कैर्धृतेत्याह-सद्भिः** सज्जनैः, **परोपकर्तृभिः** परोपकारनिष्ठैः, **धृता** धारिता, **भूर्भूमिरित्येवं मे** मम मतिर्बुद्धिरिति ॥११५॥

साम्प्रतं परोपकारिणां फलमुपदर्शयन्नधिकारं निगमयन्नाह–

परोपकारकर्तृणां, मृतानामप्यनर्गलम् ।
बम्भ्रमीति जगत्कृत्स्नं, कुन्देन्दुधवलं यशः ॥११६॥

परोपकारकर्तृणां परोपकृतिविधायिनां **मृतानामपि** परासुतां प्राप्तानामप्यनर्ग-लमनिवारितप्रसरं **बम्भ्रमीति** सर्वतोऽतिशयेन विचरति **जगल्लोकं कृत्स्नं** समस्तं **कुन्देन्दुधवलं** कुन्दचन्द्रनिर्मलं **यशः** सर्वदिग्गामीति परोपकाराधिकारः परिसमाप्तः ।

इति चतुर्थोऽधिकारः ॥

---

१ BJPC सम्भवनायां मही-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सन्तोषाधिकारः ५

सन्तोषवद्भिरेव सद्भिः परोपकारो विधीयत इत्यतः परोपकारसमनन्तरं सन्तोषाधिकार उच्यते तत्र सन्तोषवतः प्रशंसयन्नाह–

सर्वतोऽपि प्रसर्पन्ती, तृष्णावल्ली निरर्गला ।
यैः सन्तोषासिना छिन्ना, त एव सुखिनो जनाः ।।११७।।

सर्वतोऽपि समन्ततोऽपि **प्रसर्पन्ती** विसर्पन्ती **तृष्णावल्ली** वाञ्छावल्लरी **निरर्गला** अनिवारितप्रसरा **यैः** कैश्चन महानुभावैः **सन्तोषासिना** वाञ्छाविच्छेदिखड्गेन **छिन्ना** द्विधा कृता **त एव** नान्ये **सुखिनः** शर्मभाजो **जना** लोका इति ।।११७।।

न केवलं सन्तोषवन्तः सन्तः सुखिनो भवन्ति, राजादिष्वपि ते निःस्पृहाश्चेत्युपदर्शयन्नाह–

निःस्पृहस्य तृणं राजा, तृणं शक्रस्तृणं धनी ।
काञ्चनोऽपि तृणं मेरु-र्धनदोऽपि तृणायते ।।११८।।

निःस्पृहस्य गतलोभस्य **तृणं** वीरुणादि **राजा** नरेश्वरः **तृणं शक्रो** देवराट्, **तृणं धनी** धनवान्, तथा **काञ्चनोऽपि** स्वर्णमयोऽपि **तृणं मेरुर्मन्दरो, धनदोऽपि** समस्तनिधानाधिपतिरपि **तृणायते** तृणवदाचरति निःस्पृहं प्रतीति गम्यते ।।११८।।

न केवलं सन्तुष्ट इह लोक एव सुखी, संसारोऽपि तस्य कतिपयभवभाव्येवेति दर्शयन्नाह–

अनाद्यनन्तसंसार-मार्गस्तस्य सुखोत्तरः ।
वामेतरकरे यस्य, सन्तोषः सम्बलं वरम् ।।११९।।

न विद्यते आदिर्यस्य सः तथा न विद्यतेऽन्तो यस्य, सोऽनाद्यनन्तः–स चासौ संसारमार्गश्चानाद्यनिधनभवपन्थाः **तस्य** सन्तोषवतः **सुखोत्तरः** सुलङ्घ्यो, **वामेतरकरे** दक्षिणबाहौ **यस्य** कस्यापि **सन्तोषः** सन्तुष्टता **सम्बलं** पथ्यदनं **वरं** प्रधानमिति ।।११९।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु कथं धनं विना सन्तोषवतां सुखं भवतीत्याह–

सन्तोषामृततृप्तानां, यत्तेषां सुखमुत्तमम् ।
कुतस्तद्धनलुब्धानां, दिवारात्रौ च धावताम् ॥१२०॥

सन्तोषामृततृप्तानां सन्तोषपीयूषप्रीणितानां यदित्यनाख्येयं **तेषां** सन्तोषवतां **सुखं** शर्मोत्तमं प्रधानं भवति, **कुतः** ? न कुतोऽपीत्यर्थः तदिति सुखं **धनलुब्धानामर्थगृद्धिमतां दिवारात्रौ** वा रात्रिन्दिवं च धावतां प्रसर्पतामिति ॥१२०॥

साम्प्रतं यद्वशेन सत्त्वाः सुखिनो भवन्ति तं सन्तोषं नमस्कुर्वन्नाह–

दुःखदारुकुठाराय, बह्वाशापाशनाशिने ।
निःशेषसुखमूलाय, सन्तोषाय नमो नमः ॥१२१॥

दुःखदारुकुठारायेत्यशर्मदारुविदारणपरशवे, बह्वाशापाशनाशिने प्रभूत-वाञ्छाबन्धनविनाशकाय, **निःशेषसुखमूलाय** समस्तशर्मकारणाय **सन्तोषाय** सन्तुष्टये **नमो नमोऽतिशयेन** नमस्कारोऽस्तु ॥१२१॥

इह लोक एव सन्तोषफलमाह–

यद्दीनानि न जल्पन्ति, यत्सेवां नैव कुर्वते ।
यद्गुरुत्वं ययुर्लोकाः सन्तोषस्तत्र कारणम् ॥१२२॥

यदिति भाषायां, **दीनानि** तुच्छानि **न नैव जल्पन्ति** भाषन्ते, **यत्सेवां** परोपसर्पणलक्षणां **न कुर्वते** न विदधति, **यद्गुरुत्वं** महत्त्वं **ययुर्गता** उपलक्षणत्वाद्गच्छन्ति गमिष्यन्ति च **लोका** जनाः **सन्तोषो** निःस्पृहत्वं तत्र महत्त्वगमने **कारणं** बीजमिति ॥१२२॥

साम्प्रतं सन्तोषवतां सर्वमपि सुखायेत्युपदर्शयन् श्लोकद्वयमाह–

यद्वा तद्वा जलं येषां, यद्वा तद्वा च भोजनम् ।
आसनं शयनं यानं, जायते सुखकारणम् ॥१२३॥
तेषां दूरतरं दुःखं, सुखं च निकटस्थितम् ।
यतः सन्तोषसाराणि, सुखानि जगदुर्जिनाः ॥१२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्वा तद्वा यदेव तदेव सुन्दरासुन्दरमित्यर्थः, **जलं** पानीयं **येषां** सन्तोषतृप्तानां **यद्वा तद्वा च भोजनं** यदेव तदेव मनोरमामनोरममित्यर्थः **भोजनमभ्यवहार्यम्, आसनं** पट्टपीठकादि, **शय्यतेऽस्मिन्निति शयनं** सर्वाङ्गीणशय्या, **यानं** वेसरादि, **जायते** भवति **सुखकारणं** शर्मनिबन्धनमिति ॥१२३॥

तेषां सन्तोषिणां **दूरतरं** दवीयस्तरं **दुःखमसातं, सुखं** च सातं च **निकटस्थितं** समीपवर्ति, कुत एतदित्याह-यद्यस्मात्कारणात्**सन्तोषसाराणि** वाञ्छाविच्छेदप्रधानानि **सुखानि** सातानि जगदुरुक्तवन्तो जिनाः केवलिन इति तथा च–

जइ जत्थ व तत्थ व जह व ! तह व हे हियय ! निच्छुइं कुणसि ।
ता दुक्कह तुह जम्मंतरेवि दुक्खं चिय न होइ ॥१॥ ॥१२४॥

साम्प्रतं समस्तविशालवस्तूनां मध्ये निःस्पृहाणां विशालत्वमुपदर्शयन्नाह–

न च पृथ्वी तथा पृथ्वी, स्वयम्भूरमणोऽपि वा ।
ब्रह्माण्डमपि नो तादृ-ग्यादृशो निःस्पृहो जनः ॥१२५॥

न च नैव **पृथ्वी** वसुन्धरा **तथा सुसन्तुष्टवत्पृथ्वी** विस्तीर्णा, **स्वयम्भूरमणोऽपि वा** समस्तसमुद्रपर्यन्तवर्तिसमुद्रो वा अपिवाशब्दौ समुच्चयार्थौ, **ब्रह्माण्डमपि** जगदुत्पत्तिकारणमपि **नो तादृग्** न तादृशं **यादृशो** यद्विधो **निःस्पृहो** निराभिलाषो **जनो** लोक इति ॥१२५॥

इदानीं सन्तोषिण ऐहिकसुखमाह–

कृतं शेषगुणैस्ताव-त्सन्तुष्टस्येह देहिनः ।
एतावतैव पर्याप्तं, यदधीनो न कस्यचित् ॥१२६॥

कृतं परिपूर्णं **शेषगुणैरन्यगुणैस्तावदिति** क्रमे, **सन्तुष्टस्य** निरीहस्येह जगति **देहिनः** प्राणिनः, **एतावतैवामुनैव पर्याप्तं** कृतं, **यद्यस्मात्कारणादधीन** आयत्तो **न कस्यचिन्न** कस्यापीति ॥१२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदानीमसन्तुष्टानामिहैव दुःखपरम्परामुपदर्शयन् श्लोकद्वयमाह–

कुटुम्बककृते धाव-न्नितश्चेतश्च सन्ततम् ।
किं कृतं ? किं करिष्यामि ?, किं करोमीति ? चिन्तयन् ।।१२७।।
खिद्यते प्रत्यहं प्राणी, बह्वाशापाशपाशितः ।
वाञ्छाविच्छेदजं सौख्यं, स्वप्नेप्येष न विन्दति ।।१२८।।

कुटुम्बककृते गृहनिमित्तं धावन् पर्यटन्नितश्चेतश्च यतस्ततः **सन्ततमनवरतं, किं कृतमित्यतीतकाले, किं करिष्यामीति** भाविकाले, **किं करोमीति** वर्तमाने च **चिन्तयन्** वितर्कयन् ॥१२७॥

खिद्यते क्लिश्यते **प्रत्यहमनुदिनं प्राणी** जन्तुः **बह्वाशापाशपाशितः** प्रभूतमनोरथबन्धनबद्धो **वाञ्छाविच्छेदजमिच्छाविनिवृत्तिजं सौख्यं** शर्म **स्वप्नेऽपि** सुप्तजागरावस्थायामप्येष प्राणी न विन्दति न लभते ॥१२८॥

अत्रैवार्थे दृष्टान्तद्वयमाह–

असन्तोषो हि दोषाय, सन्तोषः सुखहेतवे ।
कपिलो ज्ञातमत्रार्थे, पिङ्गला च पणाङ्गना ।।१२९।।

असन्तोषोऽपरापरवस्तुसस्पृहता **दोषाय** दूषणहेतवे, **सन्तोषो** निरीहता **सुखहेतवे** शर्मनिमित्तं, **कपिलः** पुरोहितपुत्रो **ज्ञातं** निदर्शनमत्रार्थे सन्तोषसुखविषये, **पिङ्गला च** पिङ्गलाभिधाना च **पणाङ्गना** पणो मूल्यं तत्प्रधानाङ्गना पणाङ्गना मूल्यभोग्या वेश्येत्यर्थः ॥१२९॥

ज्ञाते च यथाक्रममिमे–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कपिलकेवलिकथा

बभूव नगरी रम्या, रम्यारामविराजिता। कौशाम्बी नाम विख्याता, वत्सादेशसुभूषणा ॥१॥
सुमनःसङ्घसंयुक्ता, मेरुचूलेव सुन्दरा। सुप्रतिष्ठा सुवर्णौघ-धारिका शर्मकारिका ॥२॥
जितशत्रुर्महाराज–स्तस्यामासीन्नरोत्तमः। समृद्धोदग्रसत्कोशः, प्रजापालनतत्परः ॥३॥
सम्मतः सर्वकार्येषु, तस्यासीच्च पुरोहितः। काश्यपाह्वः सदाचारो, गुणाधारो गुणिप्रियः ॥४॥
चतुर्दशमहाविद्या-स्थानसागरपारगः। राज्ञा वितीर्णसद्वृत्तिः सद्वृत्तः पार्वणेन्दुवत् ॥५॥
भार्या तस्य यशानाम्नी, विशालाक्षी मनःप्रिया। कपिलाह्वस्तयोः पुत्रः, सज्ञज्ञे कान्तलोचनः॥
बालत्वे वर्तमानस्य, कपिलस्य स काश्यपः। विधेः स्वच्छन्दकारित्वा-त्पञ्चत्वं समुपागतः ॥७॥
भूभुजा तत्पदं दत्तम्, तदन्यस्मै द्विजन्मने। ततोऽसावश्वमारूढ, आतपत्रविराजितः ॥८॥
एति गच्छति सानन्दम्, सदलङ्कारधारकः। [यशाया गृहपार्श्वाच्च, परिवार्युतः सदा] ॥९॥
अन्यदा तं तदा ऋद्ध्या, व्रजन्तं तं पुरोहितम्। प्रत्यासन्नं स्वगेहस्य, समालोक्य यशा ततः ॥१०॥
भूतपूर्वां निजां स्फीतिं, स्मृत्वारोदीत्सुदुःखिता। कपिलेन ततः पृष्टा, मातः किं शोककारणम् ? ॥११॥
सापि सर्वं स्ववृत्तान्तं, कपिलाय न्यवेदयत्। स प्राह किं न मे दत्तं, पदं पैत्र्यं महीभुजा ? ॥१२॥
तयोक्तं पुत्र ! सद्विद्या-हीनैस्तल्लभ्यते न हि। तेन प्रोक्तमधीयेऽहं, सद्विद्यामम्ब! साम्प्रतम् ॥१३॥
ततो यशाब्रवीदेवं, पुत्रवाक्येन रञ्जिता। भवन्तं पाठयिष्यन्ति, नेहवास्तव्यपण्डिताः ॥१४॥
तद्वत्स ! गच्छ वेगेन, श्रावस्तीं नगरीं यतः। समस्ति तत्र सद्विद्या-महासागरपारगः ॥१५॥
मित्रं तव पितुर्विद्वा-निन्द्रदत्ताभिधः सुधीः। मित्रस्नेहेन सोऽवश्यं भवन्तं, पाठयिष्यति ॥१६॥
श्रुत्वेदं वचनं मातुः, श्रावस्त्यां कपिलो गतः। उपाध्यायस्ततस्तेन, प्रणतो भक्तियोगतः ॥१७॥
निवेदितं यथा तात !, विद्यार्थमहमागतः। तेनोचे सुन्दरं भद्र !, विद्यायाः समुपार्जनम् ॥१८॥
विद्याहीना यतो लोके, मानवाः पशुभिः समा। [न शोभन्ते सभामध्ये, हंसौघे इव वायसाः] ॥१९॥
तथा चोक्तं-

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूजिता न हि धनं, विद्याविहीनः पशुः ॥२०॥
किं तेन जातु जातेन, यो न विद्वान्न धार्मिकः।
तया गवा हि किं कृत्यम्, या न धेनुर्न गर्भिणी ॥२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाने यशसि शौर्ये च, यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा, मातुरुच्चार एव सः ॥२२॥

विद्यायाः साधनानीह, विद्यन्ते मम मन्दिरे । केवलं भोजनं भद्र !, निर्धनत्वान्न विद्यते ॥२३॥

तानि चामूनि विद्यासाधनानि--

आरोग्यबुद्धिविनयोद्यमशास्त्ररागा, अभ्यन्तरा जगति पाठगुणा भवन्ति
आचार्यपुस्तकनिवाससहायवल्ला[1], बाह्याश्च पञ्च पठनं परिवर्धयन्ति ॥२४॥

तेनोचे भिक्षयित्वाहं, पठिष्ये भवदन्तिके । उपाध्यायस्ततः प्राह, वत्सैवं पठनं कुतः ? ॥२५॥
एवमुक्त्वा समं तेन, गतोऽसौ श्रेष्ठिनो गृहम् । शालिभद्राभिधानस्य, ततश्चैवमभाषत ॥२६॥
कौशाम्ब्या अयमायातो, विद्यार्थी सुहृदङ्गजः । तदस्य कुरु साहाय्यं, त्वमाहारप्रदानतः ॥२७॥
श्रेष्ठिनापि तकत्तोषा-त्प्रतिपन्नं गुरोर्वचः । भोजनाय ततस्तस्य, दासी तेन निरूपिता ॥२८॥
अधीते सोऽपि सानन्दो, हास्यशीलः स्वभावतः । मोहयौवनसंवास-दोषात्संमूढमानसः ॥२९॥
कामस्य दुर्जयत्वाच्च, तस्यां दास्यां प्रलग्नवान् । अवोचदन्यदा सा तं, स्नेहेन रहसि स्थितम् ॥३०॥
यद्यहं सह केनापि, वस्त्रमूल्याय संवसे । सोढव्यं तत्त्वया कान्त!, यतस्त्वं तद्विवर्जितः ॥३१॥
एवमस्त्विति तेनापि, तद्वचः प्रतिपद्यते । सखेदा चान्यदा तेन, दृष्टा पृष्टा च कारणम् ॥३२॥
तयोचे सर्वदासीनां, महः कल्ये भविष्यति । ताम्बूलादिविहीनाया, लाघवं भविता मम ॥३३॥
सोऽपि श्रुत्वा वचस्तस्या, विनिद्रो दुःखविह्वलः । अमुञ्चद्दीर्घनिःश्वासां-स्तदिच्छापूरणाशयः ॥३४॥

उक्तं च- **सीयंतपरियणब्भत्थियाण, पुरिसाण धणविहीणाण ।**
न हु नवरि कायराणं, गरुयाणवि चलइ मइविहवो ॥३५॥

बभाण सा ततः कान्तं, गच्छ त्वं धनमन्दिरम् । प्रातरेव समुत्थाय, यतोऽसावग्रजन्मने ॥३६॥
द्वौ माषौ जातरूपस्य, प्रथमाय प्रयच्छति । मायासीदपरः कश्चि-दर्धरात्रेऽपि निर्गतः ॥३७॥
चौरोऽयमिति मत्वा तै-र्गृहीतो दण्डपाशिकैः । आस्थानसन्निषण्णस्य, राज्ञस्तैरुपदर्शितः ॥३८॥
तेनाभाणि यथा विप्र !, किमु युक्तं तवेदृशम् । अमायी कथयामास, राज्ञः सत्यं स्वमाशयम् ॥३९॥
ततः सञ्जातकारुण्यो, राजा तुष्टस्तदार्जवात् । अवादीत्तं द्विजं मुग्धं, वरं वृणु यथेप्सितम् ॥४०॥
स प्राहालोच्य याचिष्ये, राजाहालोचयस्व भोः । गत्वैकान्ते ततश्चैव-मारब्धश्चिन्तितुं यथा ॥४१॥
राजा तुष्टो ददात्यद्य, द्रव्यं मे तावदीप्सितम् । माषद्वयेन किं कार्यं?, याचेऽहं माषपञ्चकम् ॥४२॥
नालं ताम्बूलमूल्येऽपि, नूनं तन्मे भविष्यति । दशमाषांस्ततो याचे, तेऽपि वस्त्राद्यसाधकाः ॥४३॥
मार्गयामि शतं नालं, तदप्याभरणाय मे । बन्धुवर्गसमेतस्य, सहस्रोऽपि दशायते ॥४४॥

---

१ BJPC । वस्त्रा-मु. । = वस्त्र J पार्श्वभागे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रार्थयामि ततो लक्षं, क्षितीशं वरदायिनम् । परोपकारकर्तृत्वे, लक्षमप्यक्षमं ततः ॥४५॥
कोटिं याचे सुवर्णस्य, दीनादेर्दानसाधिकाम् । हस्त्यश्वरथपादाति-साधने सापि नो सहा ॥४६॥
चिन्तावीचिचयोत्क्षिप्त-लोभसागरमध्यगः । स्थितः सञ्चिन्तयन्नेवं, क्षणं सन्तोषवर्जितः ॥४७॥
शुद्धत्वाज्जीवरूपस्य, चित्रत्वात्कर्मणां गतेः । जज्ञे सज्ज्ञानसंयोगः, कपिलस्य ततो दृढः ॥४८॥
ततः सज्ज्ञानसंयोगा-च्चिन्तयामास तत्क्षणम् । अहो लोभस्य माहात्म्य-मपूर्वं दुःखकारणम् ॥४९॥
यदि स्याद्रत्नसम्पूर्णो, जम्बूद्वीपः कथञ्चन । अपर्याप्तः प्रहर्षाय, लोभात्तस्य जिनैः स्मृतः ॥५०॥
अहो मया किमारब्ध-मज्ञानवशवर्तिना ? । विज्ञाय वचनं मातु-र्विद्यादातुश्च सुन्दरम् ॥५१॥
जानन्नपि यदासक्तः सामान्यायां स्त्रियामहम् । तदिदं सत्यतां नीतं, वचनम् मोहवर्तिना ॥५२॥

सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां,
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाक्षेपमुक्ताः श्रवणपथजुषो नीलपक्ष्माण एते,
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥५३॥

ताव फुरइ वेरग्गु, चित्ति कुललज्जवि तावहिं ताव ।
अकज्जहतणियसंक, गुरुयाणा वि भओ ताव ॥५४॥
तावेंदियह वसाइं- जसहसिरिन्हाइ तावहि ।
रमणीहिं मणमोहिणीहिं, पुरिस वसी होइ न जावहि ॥५५॥
सो सुकयकम्मु सो निउणमइ, सिवहमग्गि सो संघडिओ ।
परमोहणओसहिसरिसियहं,[1] जो बालियहं न पिट्ठि पडिओ ॥५६॥

तस्मादलं सुवर्णेन, विषयैरप्यलं मम । कृतं कान्ताप्रसङ्गेन, घोरसंसारहेतुना ॥५७॥
एवं चिन्तयतस्तस्य, जातिस्मरणमञ्जसा । संपन्नं शुद्धभावस्य, स्वयंबुद्धस्ततोऽजनि ॥५८॥
देवतादत्तलिङ्गोऽयं, स्वयं लुञ्चितकुन्तलः । प्रत्यक्षो धर्म एवैष, राजानं समुपस्थितः ॥५९॥
राज्ञोचे किं त्वयाचिन्ति, ततः सोऽपि न्यवेदयत । आत्मेच्छाविस्तरं सर्वं, नरेन्द्राय पठन्निदम् ॥६०॥

उक्तं च-**जहा लाहो तहा लोहो, लाहा लोहो पवड्ढइ ।**
दोमासं कणयकज्जं, कोडीएवि न निट्ठियं ॥६१॥

ददामि भद्र ! ते कोटिं, राज्ञोचे चारुचेतसा । मुनिनोक्तं मया सर्वम्, परित्यक्तं धनादिकम् ॥६२॥
यतः-अर्थानामर्जने दुःख-मर्जितानां च रक्षणे । आये दुःखं व्यये दुःखं, धिगर्थं दुःखकारणम् ॥६३॥
इत्यादिधर्ममाख्याय, कपिलाख्यो महामुनिः । विजहार महीपीठे, संयमी मुनिसत्तमः ॥६४॥
निर्ममो निरहङ्कारो, निरारम्भो निरालयः । निःसहायो निराशंसो निःसङ्गो निष्परिग्रहः ॥६५॥

---

१ BJPC । सरिसिय महिलाण पेम्मंति नो पडिओ-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युक्तः समितिभिर्नित्यं, सुगुप्तो गुप्तिभिस्तथा । क्षान्त्यादिसद्गुणोपेतः, सर्वशीलाङ्गधारकः ॥६६॥
षण्मासान्ते ततस्तस्य, ज्ञानमुत्पन्नमुत्तमम् । घातिकर्मक्षये जाते, लोकालोकावभासकम् ॥६७॥
इतश्च-अस्ति राजगृहस्येह, श्रावस्त्याश्च महापुरः । दुष्टश्वापदसङ्कीर्णा-पान्तराले महाटवी ॥६८॥
तस्यामिक्कडसञ्ज्ञानां, चौराणां शतपञ्चकम् । अस्त्येतत्प्रतिबोधार्थं, तदन्तः कपिलो गतः ॥६९॥
दृष्टः शाखिगतेनैष, दस्युना मुनिपुङ्गवः । श्रमणोऽयं समायाति, शेषाणां च निवेदितम् ॥७०॥
ततस्ते तं समादाय, निन्युश्चौराधिपान्तिकम् । तेनापि स मुनिः प्रोक्तो, नृत्यतां नृत्यतां मुने ! ॥७१॥
तेषां विज्ञाय स ज्ञान-चक्षुषा मोक्षकारणम् । इत्थमेव ततः प्राह, वादको भो! न विद्यते ॥७२॥
केलिना मिलिताः सर्वे, तालाः कुट्टन्ति दस्यवः । तेषां मध्यगतः साधु-ध्रुवकं गायतीदृशम् ॥७३॥

अधुवे असासयंमि, संसारंमि दुक्खपउराए ।
किं नाम होज्ज तं कम्मं, जेणाहं दुग्गइं न गच्छेज्जा ॥७४॥

[उत्तराध्ययनसू. ८/१]

एवं भगवतोद्गीते, तेऽपि गायन्ति दस्यवः । तालाश्च कुट्टयन्त्युच्चैः, सानन्दाः समचेतसः ॥७५॥
एवमुद्गीतिकाव्याजा-दनित्यत्वं प्रकाशयन् । सम्यक्संबोध्य तान् सर्वान्, दीक्षयामास सन्मुनिः ॥७६॥
ततस्ते साधवो जाताः, साधुसद्गुणधारिणः । जाता जातिस्मराः सर्वे, सर्वे संविग्नमानसाः ॥७७॥
कालेन केवलज्ञानं, सर्वेषामुदपद्यत । ततश्च क्षीणकर्मांशा, ययुः सर्वे शिवालयम् ॥७८॥

इति **कपिलाख्यानकं** समाप्तम् ।

---

१ = BJPC वस्त्रा-मु. । = वस्त्र J पार्श्वे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदानीं पिङ्गलाख्यानमुच्यते-

अव्यक्तलिङ्गधारीह, नरः सन्तोषसुन्दरः । केनापि वणिजा पृष्टः, को गुरुस्ते निवेद्यताम् ॥१॥
पिङ्गला कुररः सर्पः, सारङ्गास्त्रस्तलोचनाः । इषुकारकुमारी च, षडेते गुरवो मम ॥२॥
श्रुत्वेदं वणिजा प्रोक्तं, गुरुरेकः शरीरिणाम् । महत्कौतुकमेतच्च, गुरवः षट् कथं तव? ॥३॥
सन्तोषसुन्दरः प्राह, सावधानमनाः शृणु । एकस्यापि हि सञ्जाता, गुरवः षड् यथा मम ॥४॥
नानावर्णसमाकीर्णं, नानासौधसमाकुलम् । विशालशालसंयुक्तं, सुरसद्मविराजितम् ॥५॥
कामिनीमञ्जुमञ्जीर-स्वरञ्जितहंसकम् । समस्तमेदिनीपीठे, रम्यं रत्नपुरं पुरम् ॥६॥
तत्राहं भाण्डमादाय, गतो वाणिज्यकर्मणे । वाणिज्यं कुर्वता दृष्टा, पिङ्गलाख्या विलासिनी ॥७॥
ततो जातानुरागोऽहं, संवसामि तया सह । वाणिज्ये प्रतला बुद्धि-स्तत्राऽऽसक्तस्य मेऽजनि ॥८॥
अन्यदाहं गृहे तस्या, अर्धरात्रे समागतः । यावत्सा पिङ्गला सुप्ता, निश्चिन्ता सपरिच्छदा ॥९॥
अहो सुखं स्वपित्येषा, कृतकृत्या इवाधिकम् । विचिन्त्यैवं क्षणं चित्ते, श्लोकोऽयं पठितो मया ॥१०॥
आशा हि परमं दुःखं, निराशा परमं सुखम् । आशां निराशतां नीत्वा, सुखं स्वपिति पिङ्गला ॥११॥
प्रभाते पुनरायातः, पृष्टा सा पिङ्गला मया । किं कारणं विशालाक्षि!, निशीथे तव मन्दिरम् ॥१२॥
दत्तार्गलं निःशब्दं च, मया सुभ्रु! विलोकितम् । यदि कथ्यं तदा शीघ्रं, मम साधय कारणम् ॥१३॥
तयोक्तं साधयाम्येषा, निशामय निराकुलः । सज्जनेः कथितं कार्यं, गुणायैव प्रजायते ॥१४॥
एकदा जागराद्गाढं, सञ्जाता मे विसूचिका । जाताहं मरणावस्था, कष्टंकष्टेन जीविता ॥१५॥
ततस्तदा मयाकारि, प्रतिज्ञेयं सुखावहा । आद्ययामद्वयादूर्ध्वं, स्वप्तव्यं निश्चितं सदा ॥१६॥
आद्यमेवं च यामिन्या, जागर्मि प्रहरद्वयम् । ततः सन्तुष्टचित्ताहं, नित्यं स्वपिमि सुस्थिता ॥१७॥
असन्तोषो हि दुःखाय, सन्तोषः सुखकारणम् । असन्तोषोपतप्तानां, सन्तोषो नन्दनं वनम् ॥१८॥
असन्तुष्टस्य यद्दुःखं, सन्तुष्टस्य च यत्सुखम् । अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥१९॥
आद्ययामद्वये जातं, यद्वित्तं तेन मे धृतिः । एवं निश्चयमाधाय, तिष्ठामि सुखिता सदा ॥२०॥
तवापि सङ्गतश्चायं, सन्तोषः सर्ववस्तुषु । सुसन्तोषसमो बन्धु-र्न भूतो न भविष्यति ॥२१॥
प्रतिपद्याथ तद्वाक्यं, धर्मे दत्त्वा निजं धनम् । ततो मया गृहीतं भोः, सुसन्तोषव्रतं परम् ॥२२॥
स्थितस्तत्र सुसन्तुष्टः, कतिचिद्दिवसानहम् । एवं भो! मम सञ्जाता, सन्तोषे पिङ्गला गुरुः ॥२३॥
अन्यदा च ततः स्थाना-द्गच्छता बहिरीक्षितः । गृहीतमांसपेशीकः, कुरराख्यो विहङ्गमः ॥२४॥
हन्यमानस्तरां लुब्धैः, पक्षिभिर्मांसभक्षिभिः । चण्डतुण्डाभिघातेन, सर्वैरपि समन्ततः ॥२५॥
कथञ्चिद्दैवयोगेन, मांसपेशी तदाननात् । पतिता भूतले क्वापि, गृहीता काकपक्षिणा ॥२६॥
ततस्तं कुररं मुक्त्वा, सर्वे ते वायसं प्रति । धाविताः स पुनर्जातः, कुररो नितरां सुखी ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तत्कौतुकं दृष्ट्वा, मया चित्ते विचिन्तितम्। सामिषस्य सदा दुःखं, सौख्यमामिषवर्जनात् ॥२८॥
ततो मया परित्यक्तः, समग्रोऽपि परिग्रहः। तेन तस्य परित्यागे, कुररोऽपि गुरुर्मम ॥२९॥
ततोऽग्रे गच्छता दृष्टः, सर्पः सर्वभयङ्करः। भूमिस्त्रीवेणिसङ्काशः, परवेश्मकृताश्रयः ॥३०॥
ततोऽचिन्ति मया चित्ते, सुन्दरं व्रतिनां व्रतम्। गृहारम्भो हि पापाय, दुःखाय च शरीरिणाम् ॥३१॥
ततः प्रभृति जातोऽहं, परकृताश्रमसेवकः। ततः परकृतावासे, सर्पो मे गुरुतां गतः ॥३२॥
क्रमेण गच्छता दृष्टं, काननं विपदाननम्। तत्र लातुं समारब्धा, लुब्धकैः पाशबन्धनैः ॥३३॥
वागुरासु विचित्रासु, सारङ्गास्त्रस्तलोचनाः। [1]पातिता न च ते पतिता, अप्रमत्ततया तया ॥३४॥
नानाविधैरुपायैस्तै-र्व्याधैर्हन्तुं समीहिताः। रक्षिता निजमात्रेव, निष्प्रमादतया तया ॥३५॥
अप्रमादप्रसादेन, जातास्ते चिरजीविनः। निर्विण्णमनसो व्याधाः, सविषादास्ततो गताः ॥३६॥
ततो मया विचिन्त्यैव-मप्रमादो हि सौख्यदः। कर्तुं युक्तो ममाप्येष, तथैव कृतवानहम् ॥३७॥
एवं मे गुरवो जाताः, सारङ्गास्तत्र कानने। अप्रमादविधौ भद्र!, सदा चकितचेतसः ॥३८॥
ततोऽग्रे गच्छता दृष्टः, इषुकारः पुराद्बहिः। शरव्रातमृजूकुर्व-न्निश्चलीकृतमानसः ॥३९॥
अत्रान्तरे समायातः, पुमानेकस्तदन्तिके। तेनोक्तं किं त्वया दृष्टो, गच्छन् राजामुना पथा ॥४०॥
स प्राह न मया दृष्टः, स्वकर्मैकाग्रचेतसा। ततो मया व्यचिन्त्यैवं, न चायं विकलेन्द्रियः ॥४१॥
अथ चानेन नो दृष्ट-श्चतुरङ्गबलान्वितः। राजा गच्छन् समीपेन, महदेतत्कुतूहलम् ॥४२॥
यस्मात्स्वकार्यनिष्ठत्वा-देकचित्तैर्न दृश्यते। चलं वा स्थाणु वा वस्तु, समीपेऽपि शरीरिभिः ॥४३॥
एकाग्रचेतसामेव, स्वार्थसिद्धिरपि ध्रुवम्। तन्मयापि मनः कार्य-मेकाग्रं धर्मचिन्तने ॥४४॥
ततः प्रभृति भो भद्र!, संयम्येन्द्रियपञ्चकम्। जयाजयफलं तस्य, ध्यानस्थश्चिन्तयेद्यथा ॥४५॥
दिवसरजनिसारैः सारितं पक्षगेहम्, समयफलकमेतन्मण्डितं भूतधात्र्याम्।
इह हि जयति कश्चिन्मोक्षमक्षैर्विधेयै-रधिगतमपि चान्ये विप्लुतैर्हारयन्ति ॥४६॥
तदेकाग्रमनोध्याने, पञ्चेन्द्रियविनिग्रहे। इषुकारो गुरुर्जातो, ममैवमवधारय ॥४७॥
तथात्रैव पुरे दृष्टा, कण्डयन्ती कुमारिका। तण्डुलान् वलयाराव-खेदितश्रवणद्वया ॥४८॥
ततः सामुञ्चदेकैकं, वलयं शब्दशान्तये। तथापि तत्कृतारावो नोपशान्तो मनागपि ॥४९॥
ततो द्वे त्रीणि चत्वारि, न च शाम्यति तद्ध्वनिः। ततो विमुच्य शेषाणि, तदैकैकं धृतं तया ॥५०॥
शान्तः शब्दस्ततस्तस्य, जाता चित्तस्य निर्वृतिः। दृष्ट्वेदं सुखदा तेन, रुचितैकाकिता मम ॥५१॥
ततोऽहं बन्धुसम्बन्धि-मित्रवर्गं विमुच्य च। विचरामि सुखेनैव, सदैकाकी निराकुलः ॥५२॥
तदेवमेककत्वे मे, गुरुर्जाता कुमारिका। तदेवं मम भो भद्र! गुरवः षट् प्रजज्ञिरे ॥५३॥

---

१ B। पातिता ते च न पतिता अप्र° JP। परं ते पतिता नात्र ह्यप्र° मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्त्यस्तु साम्प्रतं तुभ्यं, स्वस्थानं समलङ्कुरु ।
[इत्युक्त्वा सोऽपि सम्प्राप, स्थानं स्वेष्टं तदा द्रुतम्] ॥५४॥

साम्प्रतमाशापिशाचिकाया जयोपायं, तज्जये च सुखमुपदर्शयन्नाह–

आशापिशाचिका नित्यं, देहस्था दुःखदायिनी ।
सन्तोषवरमन्त्रेण, स सुखी येन नाशिता ॥१३०॥

व्याख्या-**आशापिशाचिका** वाञ्छाव्यन्तरी **नित्यं** सर्वदा **देहस्था** शरीरस्था **दुःखदायिन्यशर्मप्रदा सन्तोषवरमन्त्रेण** निःस्पृहतापरममन्त्रेणासावनिर्दिष्टनामा **सुखी** शर्मवान् **येन** केनचिन्नाशिता देहाद् दूरीकृता ॥१३०॥

असन्तुष्टो हि जन्तुर्भवभ्रमणे दुःखितो भवतीति दर्शयन्नाह–

चिन्ताचक्रसमारूढो, योगदण्डसमाहतः ।
कर्माष्टककुलालेन, भ्राम्यते घटवन्नरः ॥१३१॥

चिन्ताचक्रसमारूढो विकल्पमालारथाङ्गारूढो **योगदण्डसमाहतो** मनोवाक्कायलकुटाहतः **कर्माष्टककुलालेन** ज्ञानावरणीयादिकर्माष्टककुम्भकारेण **भ्राम्यते** भ्रमणशीलः क्रियते **घटवत्कुम्भवन्नरो** मानवोऽसन्तुष्ट इति गम्यते ॥१३१॥

ननु वाञ्छासद्भावेऽपि जनः सुखी भविष्यति कोत्र विरोधः ? इत्याशङ्कापनोदाय श्लोकद्वयमाह–

आतपच्छाययोर्यद्व-त्सहावस्थानलक्षणः ।
विरोधस्तद्वदत्रापि, विज्ञेयः सुखवाञ्छयोः ॥१३२॥
वाञ्छा चेन्न सुखं जन्तो-स्तदभावे शर्म सन्ततम् ।
न भूतानि न भावीनि, सुखानि सह वाञ्छया ॥१३३॥

आतपस्तापश्च्छाया चातपाभावभाविनी तयोर्यद्वद्यथा **सहावस्थानलक्षणः** सममवस्थितिस्वरूपो **विरोधो** विपर्ययस्तदा तद्वत्तथाऽत्रापि प्रस्तुते **विज्ञेयो** वेदितव्यः **सुखवाञ्छयोः** शर्मेच्छयोः ॥१३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव दर्शयति **वाञ्छा** स्पृहा **चेद्यदि न सुखं नैव शर्म जन्तोर्देहिनः तदभावे** वाञ्छाविरहे **शर्म** सातं **सन्ततमविच्छेदं** एतदेव निगमयति-**न भूतानि न जातानि न भावीनि न** भविष्यन्ति उपलक्षणत्वान्न भवन्ति च **सुखानि** सातानि **सार्धं वाञ्छया** स्पृहया ॥१३३॥

साम्प्रतं सन्तोषफलमुपदर्शयन् सन्तोषाधिकारमुपसंहरन्नाह-

सन्तोषसुखशय्यायां, सद्विवेकपटावृताः ।
स्वपन्ति ये महात्मानः, शेरते ते निराकुलाः ॥१३४॥

सन्तोषसुखशय्यायां निरीहतामृदुपर्यङ्के **सद्विवेकपटावृता** निर्मलबोधपटावृता निर्मलबोधपटावगुण्ठिताः **स्वपन्ति** स्वापं विदधति ये केचन **महात्मानो** महापुरुषाः **शेरते** स्वपन्ति **ते** नरा **निराकुला** निरौत्सुक्या इति ॥१३४॥

तदेवंविधविविधामलगुणकलापभाजो भवन्ति सन्तोषकारिणो जनाः, ये सर्वत्रैवासन्तुष्टचेतसो भवन्ति ते परद्रव्यार्थिनः सन्तो व्यापादयन्ति प्राणिनः, वदन्ति मृषावादं, रचयन्ति कूटकपटानि, वञ्चयन्ति मित्रमण्डलानि, द्रुह्यन्ति निरन्तरं स्नेहपरानपि निजकगुरुजनबन्धुसम्बन्धिनः, आरम्भयन्ति महारम्भान्, मुष्णन्ति परद्रव्याणि, कुर्वन्ति न्यासापहारं, लोपयन्ति धर्मव्यवहारं, न गणयन्ति कुलाचारं, घातयन्ति ग्रामनगरादीनि, विलुम्पन्ति मार्गेषु भूरिद्रविणसम्भारसम्भृताननेकसार्थान्, कुर्वन्ति निष्करुणाः सन्तो भ्रूणहत्यां गोहत्यां ब्रह्महत्यां स्त्रीहत्यां च, किं बहुना ? यदेकान्तेन लोकद्वयविरुद्धं सकलबुधजननिन्दितं सर्वथा विवेकिनामतिदुष्करं निस्त्रिंशं निर्घृणं, निस्त्रपं निर्मर्यादं पातकानामपि महापापं स कर्ता । यत् श्रुतमात्रमपि लोमोद्धर्षकारकं तदपि कुर्वन्ति कियद्वाऽसन्तुष्टचित्तानां चेष्टितं कथ्यते, ये परद्रव्यं जिघृक्षवः कानि कानि कूटकपटानि न रचयन्ति ? यथा ताराचन्द्रसत्कं यानपात्रं भूरिद्रविणजातसम्भृतं समायातमाकर्ण्य लोभनन्द्यादिभिः पुरन्दरपुरवास्तव्यैरनेकानि कूटकपटानि कर्तुमारब्धानि तथापि नार्थसिद्धिः सञ्जातेति ताराचन्द्रस्य पोताधिपतेरुत्कटपुण्ययुक्तत्वात्, कथानकं चात्र-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताराचन्द्रकथा

बभूव विश्वविख्यातं पुरं **तारापुराभिधम्**। कैलासपर्वताकारं, तुङ्गप्राकारवेष्टितम् ॥१॥
तत्राभवच्छ्रियां धाम, **ताराचन्द्राभिधो** वणिक्। ख्यातकीर्तिर्जने मान्यः, सुहृदानन्दकारकः ॥२॥
तारप्रभा प्रिया तस्य, विनयादिगुणान्विता। प्रेमस्थानं परं चारु-शीलालङ्कारशालिनी ॥३॥
अर्थार्थिना महापोत-स्ताराचन्द्रेण चान्यदा। महार्घ्यभूरिभाण्डानां, भृतोऽन्यद्वीपयायिना ॥४॥
कृता सर्वापि सामग्री, सज्जीभूताश्च धीवराः। समारूढाश्च निःशेषा, वणिजः सुभटास्तथा ॥५॥
अथाशेषं निजं लोकं, सम्यक्सम्भाष्य सादरम्। विसर्जितवांश्च[1] सन्मान्य, ताम्बूलादिभिरञ्जसा ॥६॥
अनेकभटसंयुक्तः, शुभालङ्कारधारकः। भूरिद्रव्यप्रदानेन, पूरितार्थिमनोरथः ॥७॥
गत्वा पोते समारूढो, बन्दिगीतयशास्ततः। हेलया हतसत्तूर्य–शब्दैरापूरिताम्बरः ॥८॥
कृतपूजोपचारश्च, योषाभिर्गीतमङ्गलः। कृतकोलाहलो लोकै-र्यथास्थानस्थितप्रजः ॥९॥
छत्रच्छन्नमुखश्चारु-चामरैरुपवीजितः। उत्क्षिप्तनङ्गरो मुक्त-पोतः पूर्णमनोरथः ॥१०॥
शीघ्रं गन्तुं प्रवृत्तोऽसौ, पृष्टतः पवनेरितः। एष याति गतो दूरं, दृश्यते नैव लोचनैः ॥११॥
इत्युक्त्वा वलितो लोको, गतो निजनिजे गृहे। पोतोऽपि वायुवेगेन, लङ्घित्वा लघुसागरम् ॥१२॥
रत्नमेखलनामानं, द्वीपं प्राप्तस्ततो धृतः। पोतादुत्तार्य भाण्डानि, श्रेष्ठिना राशयः कृताः ॥१३॥
यथास्थानं स्थितो लोकः, श्रेष्ठी जातो निराकुलः। भुक्तेऽपि ते निराबाधे, जाते पोतजनेऽखिले ॥१४॥
पुरन्दरपुरावासी, **लोभनन्दि**रिति श्रुतः। वणिक् च नामतः श्रेष्ठी, कर्मतः पापकर्मकृत् ॥१५॥
अत्रैव च पुरे मन्त्री, काणो मायानिकेतनम्। वसति स्म दुराचारो, **लोभसागरसंज्ञितः** ॥१६॥
परद्रव्यापहारेच्छः, सदा संक्लिष्टमानसः। तत्रास्ते चर्मकारोऽपि, **मायामय** इति स्मृतः ॥१७॥
तथान्यो लोकविख्यातो, मान्यो विप्रगुणान्वितः। **आदित्यमन्दिरे** तत्र, द्विजो विगतलोचनः ॥
अविद्यमाननेत्रोऽपि, **त्रिलोचन** इति स्मृतः। होराबलेन[2] लोकानां दत्तादेशो विचक्षणः ॥१९॥
अथ बोहित्थमायातं, भूरिभाण्डसमाकुलम्। श्रुत्वानेकजनाकीर्णं, ताराचन्द्रं च तत्प्रभुम् ॥२०॥
लोभनन्दिर्गतो रात्रौ, तदन्ते वञ्चनेच्छया। कृतोचितोपचारश्च, निषण्णो दर्शितासने ॥२१॥
कुशलं ते शरीरस्य ?, पृष्टोऽसौ लोभनन्दिना। पूर्वाभ्यासमिदं चैव, सुलभं सज्जने जने ॥२२॥
किं भाण्डं वा कियद्वापि, पृच्छतो मम कथ्यताम्। तेनापि कथितं सर्वं, प्रायः प्राञ्जलचेतसा ॥२३॥
शिरो विधूय तेनापि, सखेदमिव जल्पितम्। प्रयास एव ते जातः कुभाण्डानयनादिह ॥२४॥
यस्मादेतस्य नास्त्यत्र, ग्राहकः कोऽपि सर्वथा। परं तथापि गृह्णामि, कीर्तिभङ्गभयादहम् ॥२५॥
दास्यामि प्रस्थकं त्वेकं, तुभ्यं वाञ्छितवस्तुनः। प्रतिपन्नमनेनापि, सत्यङ्कारश्च ढौकितः ॥२६॥

---

१ B। विसर्जितश्च-JP। विसृष्टवांश्च-मु. ॥ २ = निमित्तादिना-J पार्श्वे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साक्षिणो विहिता लोका, भाण्डं दृष्ट्वाहतं कृतम् । आगतः स्वगृहे श्रेष्ठी, प्रमोदभरनिर्भरः ॥२७॥
अहो ! मे धन्यता येन, परश्रीः स्ववशे कृता । द्वितीययामे यामिन्या, मन्त्री लोभपरायणः ॥२८॥
ताराचन्द्रान्तिकं प्राप्तो, निषण्णो बृहदासने । भणितो मन्त्रिणा श्रेष्ठिं-स्ताराचन्द्र! निशम्यताम् ॥२९॥
एकदा दण्डितो राज्ञा, कारागारे प्रवेशितः । कथञ्चिदन्तरं लब्ध्वा, नष्टोऽहं जीविताशया ॥३०॥
मुच्यमानो मया दृष्टः, पोतः पुण्यैः पुराकृतैः । तेनोत्तीर्य द्रुतं प्राप्तः, पुरे तारापुराभिधे ॥३१॥
तत्रापि मन्दिरे गत्वा, तावकीने चिरं स्थितः । अन्यदा भणितं राज्ञा, लक्षे दत्ते न ते भयम् ॥३२॥
मयापि त्वत्पितुः पार्श्वा-ल्लक्षो निजकरे कृतः । लोकाध्यक्षं मया मुक्तम्, ग्रहणे दक्षिणेक्षणम् ॥३३॥
लक्षं लात्वा समायात-स्तं दत्त्वा तोषितो नृपः । भूयोऽपि स्वं पदं लब्धम्, ते दरास्ते च मोचकाः ॥३४॥
अद्य त्वं पुनरायातो, मम पुण्यैः प्रणोदितः । लात्वा लक्षं स्वकं भद्र !, देहि मे दक्षिणेक्षणम् ॥३५॥
दत्ते च लोचने मह्यं, कर्तव्यो भाण्डविक्रयः । आहारे व्यवहारे च न लज्जा गुणकारिणी ॥३६॥
एवमुक्त्वा गतो मन्त्री, विषण्णः पोतनायकः । चिन्ताचक्रसमारूढः, किङ्कर्तव्यसमाकुलः ॥३७॥
खिन्नोऽदीनमनाः श्रान्तः, शून्यचेताः परिभ्रमन् । उपानत्सन्धनाहेतो-श्चर्मकारापणे गतः ॥३८॥
दृष्टो मायामयेनैष, चर्मकारेण लोभिना । नीतः सगौरवं गेहे, निषण्णो वरविष्टरे ॥३९॥
पृष्टश्च केन कार्येण, यूयमत्र समागताः । श्रेष्ठ्याह वर्ध्रसन्धान-हेतवे वयमागताः ॥४०॥
चर्मकारः पुनः प्राह, किं मे दास्यथ वेतनम् । श्रेष्ठ्याह किं विचारेण, कुरु कर्म निराकुलः ॥४१॥
तोषवन्तं करिष्यामि, भवन्तं भूरिदानतः । [1]वर्ध्रसन्धानतस्तेन, प्रगुणा प्राणहिता कृता ॥४२॥
वेतने काकिणी दत्ता, न तुष्टश्चर्मकर्मकृत् । रूपकार्धं ततो द्रम्म, एवं यावच्छतं गतः ॥४३॥
सहस्रलक्षकोटीभि-स्तेन [2]तोषमकुर्वता । भणितश्चर्मकारेण, श्रेष्ठिन् ! संस्मर जल्पितम् ॥४४॥
तव पोतगते द्रव्ये, निःशेषे मम मन्दिरे । प्रविष्टे यदि मे तुष्टिः, सन्तुष्टिर्नान्यथा मम ॥४५॥
ममाधीनं धनं सर्वं, भवान् कर्मकरो मम । न दातव्यं न भोक्तव्यं, रक्षणीयं प्रयत्नतः ॥४६॥
एवमुक्त्वा गतो गेहे, चर्मकारः प्रमोदभृत् । ताराचन्द्रो निजं स्थानं, गच्छन् श्रान्तः शनैः शनैः ॥४७॥
दृष्टो मदनमञ्जर्या, वेश्यया वरवेषया । निरूपितश्चिरं कालं, साभिलाषेण चक्षुषा ॥४८॥
दास्या स्वगृहमानीतो, ततो मकरदंष्ट्रया । स्नापितो भोजितो दत्त-ताम्बूलः सविलेपनम् ॥४९॥
नक्तं मदनमञ्जर्या, सह सुप्तोऽनुरक्तया । प्रभाते कथितं सर्वं, कुट्टिन्या तस्य हृष्टया ॥५०॥
यथैषा मे प्रिया पुत्री, नाम्ना मदनमञ्जरी । पुरुषद्वेषिणी भूत्वा, बभूव त्वयि तोषिणी ॥५१॥
तदिमां भवते दत्त्वा, सञ्जाताहं निराकुला । सुस्थितं जायते चेतो, योग्ययोगेन देहिनाम् ॥५२॥
उक्ता च सा यथा वत्से! त्वया भाव्यं विनीतया । विनयो हि कारणं येन, सर्वदा सर्वसम्पदाम् ॥५३॥
एवं च वसतस्तत्र, वव्रजुर्भूरिवासराः । स्वर्नाथस्येव सौधर्मे, सततं हृष्टचेतसः ॥५४॥

---

१ BJPC । °वर्ध्रासन्धानतस्तेनोपानहौ प्रगुणीकृतौ-मु. ॥ २ BJPC । तोषमगच्छता-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा च तया पृष्टः, कस्त्वं कस्मादिहागतः? । ततस्तस्यै स्ववृतान्तः, सर्वस्तेन निवेदितः ॥५५॥
तयोक्तं विपदेषा ते, परं खेदो न सङ्गतः । आपदः सम्पदश्चैव, समीपस्थाः शरीरिणाम् ॥५६॥
एवमुक्त्वा गता तूर्णं, कुट्टिनी भानुमन्दिरे । ततस्त्रिलोचनं भट्टं, प्रणम्योवाच सा यथा ॥५७॥
समयोऽस्ति न वा विप्र !, पृष्टव्यं मम किञ्चन । स प्राह समयो दत्त-श्चर्मकृच्छ्रेष्ठिमन्त्रिणाम् ॥५८॥
एवं विज्ञाय सा सर्वं, कुट्टिनी स्वगृहे गता । जामाता भणितो वत्स !, स्वल्पं हि व्यसनं तव ॥५९॥
यामिन्याः प्रथमे यामे, व्यतीते रविमन्दिरे । प्रच्छन्नीभूय तिष्ठ त्वं, शृण्वन् श्रेष्ठ्यादिजल्पितम् ॥६०॥
तेनापि च कृतं सर्वं, यथादिष्टं तथैव तत् । ततः श्रेष्ठी समायातो, यामिन्याः प्रहरे गते ॥६१॥
छात्रेणाभाणि कर्णान्ते, लोभनन्दिः समागतः । प्रवेशय द्रुतं वत्स !, द्वाररक्षापरो भव ॥६२॥
प्रविश्य श्रेष्ठिना भानु-रुपाध्यायश्च वन्दितः । आख्याय पूर्ववृत्तान्तं, श्रेष्ठिनेदं प्रजल्पितम् ॥६३॥
निरूपय निजां होरां, निर्वाहो भविता न वा । निरूप्य भणितं तेन, भद्र ! होरा न भद्रिका ॥६४॥
यदि वक्ष्यत्यसौ देहि, [1]प्रस्थकं मशकास्थ्नाम् । उत्तरानिलपूतानां, खण्डितानामुदूखले ॥६५॥
तदा ते सङ्कटं मन्ये, मौनमेवात्र सुन्दरम् । श्रेष्ठी प्राह किमीदृक्षी, बुद्धिस्तस्य भविष्यति ॥६६॥
इत्युक्त्वाऽथ गतः श्रेष्ठी, ततो मन्त्री समागतः । छात्रेणावेदितः सोऽपि, प्रविष्टो भानुमन्दिरे ॥६७॥
भानुमन्तं नमस्कृत्य, नतो भट्टस्त्रिलोचनः । ततश्चाभाणि तेनैव-माशीर्वादपुरस्सरम् ॥६८॥
नन्दमन्त्रिन् ! धनवान् भव ।
निषसाद ततो मन्त्री, लब्धाशीः शुद्धभूतले । कथितश्च स्ववृत्तान्तो, यो कृतो वणिजा सह ॥६९॥
युष्मत्पादप्रसादेन, कल्याणं समुपस्थितम् । निरूपय निजां होरां, चित्तनिर्वृत्तिहेतवे ॥७०॥
विभाव्य भणितं तेन, सखेदेन द्विजन्मना । अपूर्वं यदि कल्याणं, मन्त्रिन् ! होरा न सुन्दरा ॥७१॥
तेनोचे त्वत्प्रसादेन, सर्वं सुस्थं भविष्यति । इत्युक्त्वा च गतो मन्त्री, चर्मकारः समागतः ॥७२॥
छात्रेण भणितः सोऽपि, प्रविष्टो रविमन्दिरे । दूरस्थेन ततो भानुः, शिरोनमनपूर्वकम् ॥७३॥
उपाध्यायोऽपि तेनैव, क्रमेणानेन वन्दितः । विप्रः प्रोवाच भो भद्र!, किमागमनकारणम् ? ॥७४॥
सोऽवग् मयि कृपां कृत्वा, श्रूयतां कथयाम्यहम् । मया स्वबुद्धियोगेन, वचनच्छलनात्तथा ॥७५॥
ताराचन्द्राभिधः श्रेष्ठी, छलितः साम्प्रतं किल । तत्प्रश्नार्थमहं नूनं, सम्प्राप्तो युष्मदन्तिके ॥७६॥
सुप्रसादं मनः कृत्वा, स्वामिन् ! होरां निरूपय । विभाव्य भणितं तेन, रे ! रे ! होरा न सुन्दरा ॥७७॥
यदि वक्षत्यसौ श्रेष्ठी, रत्नसारस्य भूपतेः । अपुत्रस्य सुतो जात-स्तेन तुष्टो जनोऽखिलः ॥७८॥
त्वं तु तुष्टोऽथवा नेति, चर्मकार ! निवेदय । यदि ब्रूषे न सन्तुष्ट-स्ततो भूमिपतेर्भयम् ॥७९॥
सन्तुष्टश्चेद्धनं नैव, लभ्यं सन्तोष एव हि । तत् श्रुत्वा चर्मकारोऽपि, निरानन्दो गतो गृहे ॥८०॥
विप्रस्य निष्ठुरैर्वाक्यै-र्दूमितो मानसे यतः । वचसोऽनुकूलात्तुष्टि-रसत्यादपि जायते ॥८१॥

१ प्रस्थकं मसकास्थां-BC । प्रस्थकं मसकस्थ्नां-P । प्रस्थकं मशकस्थिनां-J । मे मशकास्थिप्रस्थकं-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवाहमङ्गलान्यत्र, प्रतीतानि निदर्शनम् । [असत्यान्यपि लोकानां, जायन्ते प्रीतिहेतवे] ॥८२॥
अथोद्गतो दिनाधीश-स्ताम्रचूडैर्ववासिरे । उत्थाय स्वक्रियाः कर्तुं, समारब्धो जनस्ततः ॥८३॥
ताराचन्द्रोऽपि वेगेन, निर्गतो रविमन्दिरात् । गतो वेश्यागृहे तोषात्, किञ्चिदुत्फुल्ललोचनः ॥८४॥
ततोऽसौ रात्रिवृत्तान्तं, पृष्टो मकरदंष्ट्रया । तेनापि कथितः सर्वो, यथा दृष्टो यथा श्रुतः ॥८५॥
स तया भणितो भद्र !, तथा कार्यं त्वयाधुना । यथा श्रुतं द्विजस्यान्ते, जयो येन प्रजायते ॥८६॥
एवमुक्त्वा गता वेश्या, पुरतो राजमन्दिरे । दृष्टा पृष्टा च भूपेन, किमागमनकारणम् ? ॥८७॥
तयोक्तं देव! कार्येण, समयश्चेन्निवेद्यते । अनुज्ञाता नरेन्द्रेण, वेश्या वक्तुं प्रचक्रमे ॥८८॥
हाहा कष्टं महीनाथ !, महत्खेदस्य कारणम् । कुतोऽपि वणिजः कोऽपि, पोतेनात्र समागतः ॥८९॥
श्रेष्ठिना मन्त्रिणा चैवं, तथा चर्मकरेण च । विनापि कारणं नाथ ! निर्नाथ इव खेद्यते ॥९०॥
द्वीपस्य नगरस्यास्य, तवापि च महीपते! । अकीर्तिर्महती तेन, स्वामिन् ! विज्ञप्यसे मया ॥९१॥
श्रुत्वेदं भूभुजाऽभाणि, रे रे नगररक्षक ! । गत्वा तं वणिजं लात्वा, शीघ्रमागच्छ मत्पुरः ॥९२॥
सोऽपि शीघ्रं समादाय, सम्प्राप्तो नृपतेः पुरः । पुण्यानुभावतस्तस्य, सानुकूलो नृपोऽजनि ॥९३॥
नत्वा नृपं निषण्णोऽसौ, सानन्दं वीक्ष्य भूभुजा । पृष्टस्त्वं कुत्र वास्तव्यः, ? किमानीतं त्वया वद ॥९४॥
तेनापि कथितं सर्वं, यथावृत्तं महीभुजे । ततः श्रेष्ठी समाहूतो, भूमिपालेन सत्वरम् ॥९५॥
आयातस्तं तथा दृष्ट्वा, जातः साशङ्कमानसः । विनम्य च महीनाथं, निषण्णश्चोचितासने ॥९६॥
रोषारुणितनेत्रेण, साक्षेपं धरणीभृता । भणितो भण्यसे किंचि-ल्लोभनन्दे ! निशामय ॥९७॥
हे श्रेष्ठिन् ! श्रेष्ठकर्माणि, कुर्वन् श्रेष्ठी निगद्यते । शेषस्तु नामतः श्रेष्ठी, भण्यते न तु कर्मतः ॥९८॥
किमराजमिदं स्थानं, न्यायो वाऽत्र न लभ्यते ? । येन सर्वाणि कार्याणि, क्रियन्ते स्वेच्छया त्वया ॥९९॥
दिगागतवणिजा सार्धं, विवादः केन हेतुना ? । किं कुकर्म कृतं तेन ? किञ्चानेन विनाशितम् ॥१००॥
श्रेष्ठ्याह श्रूयतां देव !, सावधानेन चेतसा । आतिथेयीं क्रियां कर्तु-मस्यावासे गता वयम् ॥१०१॥
संलापपूर्वकं पृष्टा, वयमेतेन साञ्जसम् । किमस्ति नास्ति वा मित्र !, भाण्डानामत्र निर्गमः ? ॥१०२॥
मयोक्तं दीर्घकालेन, ततो विषादिचेतसा । श्यामितास्येन संलप्त-मनेनेदं मुहुर्मुहुः ॥१०३॥
शीघ्रं निर्गममिच्छामो, न चिरं स्थास्नवो वयम् । मयाप्यागतचित्तेन, भणितो भद्र ! साम्प्रतम् ॥१०४॥
अस्त्युपायः परं मित्र !, भवते यदि रोचते । यत्किञ्चिद्रोचते तुभ्यं, प्रतिभाण्डं तत्प्रस्थकम् ॥१०५॥
भृत्वा शीघ्रं प्रयच्छामि, ततस्ते भाण्डनिर्गमः । प्रतिपन्नमनेनापि, सत्यङ्कारश्च ढौकितः ॥१०६॥
विधृताः साक्षिणो लोका, भाण्डं दृष्ट्वाहतं कृतम् । संव्यवहारमुद्रेति निषिद्धा भाण्डविक्रये ॥१०७॥
न चौर्यं छलनं नैव, व्यवहारो मया कृतः । यद्यस्यापि [1]निषिद्धोऽस्ति, वणिग्वर्गो गतस्तदा ॥१०८॥
राजाह सज्ञतं ब्रूते, श्रेष्ठी न्यायानुगं वचः । श्रेष्ठिना लभ्यमेवेदम्, यद्ययं मन्यते वणिक् ॥१०९॥

१ BPC । निषेधोऽस्ति वणिग्धर्मो गतस्तदा-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताराचन्द्रस्ततो ब्रूते, सत्यं सर्वमिदं नृप ! । गृह्णात्वयं निजं लभ्यम्, युष्माकं चरणाग्रतः ॥११०॥
ददातु प्रस्थकं मह्यं, नव्यानां मशकास्थ्नाम् । उत्तरानिलपूतानाम् खण्डितानामुदूखले ॥१११॥
ततो दातुमशक्तेन, जजल्पे श्रेष्ठिना वचः । विजितोऽहं महाभाग!, जयस्त्वयि व्यवस्थितः ॥११२॥
राजाध्यक्षं मया मुक्त; सभा सर्वात्र साक्षिणी । ततो मन्त्री समाहूत-स्तदा सोऽपि समागतः ॥११३॥
विनम्य च महीनाथं, निषसादोचितासने । भणितो भूमिपालेन, मन्त्रिन् ! मन्त्रो न सुन्दरः ॥११४॥
विवादः केन कार्येण, सञ्जातो वणिजा सह । साधयागतमात्रेण किञ्चानेन विनाशितम् ? ॥११५॥
व्यवहारनिरोधोऽपि, सहसैव कथं कृतः ? । कथितं किं न नः कार्यम्?, स्वच्छन्द इव लक्ष्यसे ॥११६॥
मन्त्र्याह श्रूयतां देव, ! सावधानेन चेतसा । एकदाऽहं हताशेन, विधिना बाढं विडम्बितः ॥११७॥
इतो नीतः समाकृष्य, पुरे तारापुरेऽन्यदा । अस्य पित्रा समं तत्र, जातं मे सख्यमुत्तमम् ॥११८॥
अन्यदा याचितो लक्षो, दत्तस्तेनापि सोज्झसा । तस्मै ग्रहणके दत्तं, दक्षिणाक्षि निजं मया ॥११९॥
वयमत्र समायाताः, संहृतः सोऽपि वेधसा । एषोऽप्यत्रागतो दृष्टः, साम्प्रतं भणितो मया ॥१२०॥
दत्त्वा लक्षं जनाध्यक्षं, गृह्णेऽहं दक्षिणेक्षणम् । व्यवहारोऽयं महाराज !, सम्मतो व्यवहारिणाम् ॥१२१॥
राज्ञोक्तं शोभनं वक्ति, मन्त्री नीतिविचक्षणः । तदहो मन्त्रिणो दोषो, विद्यते नात्र वस्तुनि ॥१२२॥
ताराचन्द्रस्ततः प्राह, सत्यमेतन्न संशयः । व्यवहारविलोपो हि, परिणामे न सुन्दरः ॥१२३॥
सन्ति प्रभूतलोकाक्षि-लक्षाणि ग्रहणे मम । तन्मध्ये मिलितं नैव लप्स्यते तव लोचनम् ॥१२४॥
तदर्पयाक्षि मे वामं, तत्तुल्यं वीक्ष्य येन ते । आनीयं च जनाध्यक्षं, दीयते दक्षिणेक्षणम् ॥१२५॥
[1]राजाह सज्ञतं वक्ति, ताराचन्द्रः सनीतिकम् । वामाक्षि मन्त्रिणा देयं, लभते येन दक्षिणम् ॥१२६॥
ततः सञ्जातखेदेन, चिन्तितं काणमन्त्रिणा । अहो मे मूर्खता येन, दीर्घं दृष्टं न चेतसा ॥१२७॥
अथ सङ्कटमायातं, लोकनीतिरियं पुनः । सर्वनाशे समुत्पन्ने, ह्यर्धं त्यजति पण्डितः ॥१२८॥
निर्जितोऽहं महाभाग !, बुद्धिस्ते भद्र ! भद्रिका । राजाध्यक्षं मया मुक्तो, व्यवहारं निजं कुरु ॥१२९॥
चर्मकारः समानीतो, भयभीतमना नरैः । ब्रूहि रे वणिग्भाण्डस्य, व्यापारः किं निवारितः ? ॥१३०॥
तेनापि कथितं सर्वं, यत्कृतं यच्च भाषितम् । सभ्यैरभाणि निर्दोष-श्चर्मकारोऽपि लक्ष्यते ॥१३१॥
ताराचन्द्रोऽप्युवाचेदं, मायामय ! निशामय । यच्च लोकान्मयाऽश्रावि, वचो विस्मयकारकम् ॥१३२॥
रत्नसारनरेन्द्रस्य, निष्पुत्रस्य सुतोऽजनि । तेन तुष्टो जनः सर्व-स्त्वं तुष्टः किं न कथ्यताम् ? ॥१३३॥
स प्राह सुतरां तुष्ट-स्तर्हि याहि निजे गृहे । न ते किंचिच्च दातव्यं, परितोषो हि वेतनम् ॥१३४॥
ताराचन्द्रो नरेन्द्रस्य, प्रणम्य पदपङ्कजम् । पाशत्रयविनिर्मुक्तो, व्यवहारपरोऽजनि ॥१३५॥
स्वल्पेनापि च कालेन, विक्रीतं वणिजा निजम् । भाण्डं [च] भूरिलाभोऽपि, लब्धः पुण्यानुभावतः ॥
दृष्टो राजा भृतः पोतः, प्रतिभाण्डस्य सर्वतः । गत्वा मकरदंष्ट्रापि, पृष्टा गमनहेतवे ॥१३७॥

---

१ BJPC । श्लोकोऽयं मुद्रिते नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रुद्धशब्दं रुदन्ती सा, लोचने गलदश्रुणी । बिभ्रती वक्तुमारब्धा, यथेयं मम पुत्रिका ॥१३८॥
प्राणेभ्योऽपि प्रिया वत्स !, दत्ता मदनमञ्जरी । आकृष्टयुवभृङ्गौघा, ह्याम्रद्रोरिव मञ्जरी ॥१३८॥
भद्रेण भवता भाव्यं, भद्रिकाया विशेषतः । प्रतिकूलेऽनुकूला ये, स्वल्पास्ते सज्जना जनाः ॥१३९॥
मयि स्नेहो न मोक्तव्य-स्ताराचन्द्र! सदा त्वया । यत्प्रतिपन्ननिर्वाहं, कुर्वन्ते विरला जनाः ॥१४०॥

उक्तं च- बहुवल्लहे वि कय-विप्पिए वि अन्नत्थ बद्धरागे वि ।
जंमि मणो न नियत्तइ, सो नेहो परिचओ सेसो ॥१४१॥

ताराचन्द्र ! चिरं जीव, यावच्चन्द्रदिवाकरौ । स्मर्तव्याऽहं सदाकालं, वत्से ! मदनमञ्जरी ॥१४२॥
इत्युक्ते दम्पती पोते, समारूढौ जनाकुले । पोतोऽपि गन्तुमारब्धो, गरुत्मानिव वेगतः ॥१४३॥
स्तोकैरेव दिनैस्तूर्णं, पूर्वपुण्यानुभावतः । प्राप्तो जलनिधेस्तीरे, पुरे तारापुराभिधे ॥१४४॥
नानाक्रयाणकाकीर्णं, श्रुत्वा तं पोतमागतम् । आनन्दितो नराधीशो, नागरिको जनस्तथा ॥१४५॥
ततस्तीरे धृतः पोतो, लम्बिता नङ्गरा द्रुतम् । उत्तीर्णश्च ततः पोता-त्ताराचन्द्रो भटान्वितः ॥१४६॥
ततः पणाङ्गनावृन्दैः, सानन्दैः कृतमङ्गलः । अनेकैर्बन्दिवृन्दैश्च, स्तूयमानगुणोत्करः ॥१४७॥
मानयन्मान्यलोकौघं, नमनीयान्नमन्नसौ । सम्भाषयंश्च सम्भाष्यान्, दानं ददत्तदर्थिनाम् ॥१४८॥
सम्प्राप्तो निजगेहं च, बद्धबन्धुरतोरणम् । निजस्य बन्धुवर्गस्य, सोत्कण्ठो [च] मिमिल सः ॥१४९॥
पुष्पताम्बूलवस्त्राद्यैः, सन्मानितो निजो जनः । गतश्च निजके स्थाने, ताराचन्द्रविसर्जितः ॥१५०॥
कृत्वा स्नानादिकं कृत्यं, ताराचन्द्रोऽपि सत्वरम् । गृहीत्वा प्राभृतं प्राज्यं, जगाम नृपमन्दिरम् ॥१५१॥
दृष्टो राजा ततस्तस्मै, ढौकितं प्राभृतं तथा । प्रोक्तश्च निजवृत्तान्तः, स्वपोताऽऽगमनादिकः ॥१५२॥
उच्छुल्कश्च कृतो राज्ञा, ततो वेलाकुले गतः । उत्तारितं ततो भाण्डं, नीतं च निजमन्दिरे ॥१५३॥
सर्वस्यापि स्वलोकस्य, दातव्यं च ददौ मुदा । ततोऽसौ बुभुजे भोगान्, प्रमोदभरनिर्भरः ॥१५४॥
सार्धं निजकभार्याभ्यां, पूर्णाखिलमनोरथः । [धर्मध्यानरतो नित्यं, सन्तोषैकमनाः खलु] ॥१५५॥
विज्ञायेदमसन्तोषं, सर्वदा त्यज्यतां जनाः । विधीयतां च सन्तोषः, सर्वकल्याणकारकः ॥१५६॥

सन्तोषाधिकारः समाप्तः
पञ्चमोऽधिकारः समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारासारताऽधिकारः ६

उक्तः सन्तोषाधिकारः, अथ संसाराधिकारः षष्ठः प्रारभ्यते, अस्य चायमभिसम्बन्धः पूर्वं सन्तोषवतां प्रशंसा कृता, सन्तोषत्वं च संसारासारताभावानात एव जायते। इत्यतः संसारासारताऽत्र प्रोच्यते। इत्यनेन सम्बद्धोऽयं व्याख्यायते, तत्रैते श्लोकाः-

यौवनं जरयाऽऽघ्रातं, रूपं रोगैरभिद्रुतम्।
जीवितं यमराजस्य, वशवर्ति क्व सारता ? ॥१३५॥
पर्वता अपि शीर्यन्ते, शुष्यन्ति च जलाशयाः।
यत्र तत्रान्यवस्तूनां, सारता कुत्र कल्प्यते ? ॥१३६॥
एवं सांसारिकाः सर्वे, भावा वैरस्य हेतवः।
रम्भास्तम्भोपमाः प्रायो, निस्साराः क्षणभङ्गुराः ॥१३७॥
जीवेनानन्तशः क्षुण्णे, चतुर्गतिगतागतैः।
तथाप्यलब्धपर्यन्ते, ह्यनादौ भवसागरे ॥१३८॥
अलब्धान्तःपरिस्पन्दे, दुःखश्वापदसङ्कुले।
व्याधिजन्मजरामृत्यु-वारिव्रारभयङ्करे ॥१३९॥
प्रमादमदिरामूढो, विचेता नष्टसद्गतिः।
कः प्राणी पतितो नात्र, व्यूढो विषयवीचिभिः ॥१४०॥
नानायोनिसमाकीर्णे, जीवः कर्मविनिर्मिताम्।
त्रैलोक्यरङ्गे नटव-द्धत्तेऽनेकस्वरूपताम् ॥१४१॥
क्वचिन्नारकभावेन, क्वचित्तिर्यग्योनिकः।
क्वचिच्च जायते मर्त्यो, दिवि देवः कदाचन ॥१४२॥
क्वचिद्राजा क्वचिद्रङ्कः, क्वचिद्दुःखी क्वचित्सुखी।
क्वचिन्निन्द्यः क्वचिद्वन्द्यः, क्वचिद् ज्ञानी क्वचिज्जडः ॥१४३॥
सुरूपः सुभगः क्वापि, कुरूपो दुर्भगः क्वचित्।
क्वचिद् द्वेष्यः प्रियः क्वापि, जीवो जगति जायते ॥१४४॥
प्रियाप्रयोजने केचि-त्केचिच्चापत्यचिन्तया।
नीरोगताकृते केचित्, केचिद्धनजिगीषया ॥१४५॥
खिद्यन्ते सर्वदा जीवा ! असम्पूर्णमनोरथाः।
रागद्वेषग्रहग्रस्ता, विवदन्तः परस्परम् ॥१४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]चिन्तितान्यपि जीवा.... ॥१४७॥
शुक्रशोणितसम्भूते, सप्तधातुमलाश्रये ।
त्वङ्मात्राऽऽवृते पुंसां, काये का रमणीयता ? ॥१४८॥
रमणीया रमणी या, निगद्यते काममोहितमनोभिः ।
तस्या अपि निस्सारं, शरीरकं पूतिमलगन्धि ॥१४९॥
संसारासारता येषा-मेषा नो मनसि स्थिता ।
भ्रमन्ति ते सदा त्रस्ता, भवारण्ये मृगा यथा ॥१५०॥
जनयित्री जनी यत्र, जनी च जनिका जायते ।
कुबेरदत्तया दत्तो, दृष्टान्तोऽत्र जिनागमे ॥१५१॥
संसारासारतामेनां, विभाव्य निजमानसे ।
ते धन्या येऽत्र संसारे, कुर्वते न रतिं जनाः ॥१५२॥

इति श्लोका अष्टादश प्रायः पाठसिद्धा एव, तथापि किञ्चिद्व्याख्यायते । तत्र **यौवनं जरयाऽऽघ्रातमिति** तरुणत्वं वृद्धत्वेन क्रोडीकृतं, **रूपं रोगैरभिद्रुतमिति** सुगमं, **जीवितं यमराजस्य वशवर्त्तीत्यायुष्कं** मृत्योरायत्तम्, अतः कारणात् **क्व सारता**, न कुत्रापीत्यर्थः । **पर्वता अपि शीर्यन्ते** इति श्लोकः सुगमः **एवं सांसारिकाः सर्वे** भावाः, इत्येवममुना प्रकारेण सांसारिकाः संसारोद्भवाः सर्वे समस्ता भावाः पदार्था **वैरस्य हेतव** इति विरसताकारणं **रम्भास्तम्भोपमा** इति कदलीस्तम्भसदृशाः **प्रायो निःसारा** इति प्रायेण साररहिताः **क्षणभङ्गुरा** इति क्षणविनश्वराः ।

जीवेनानन्तशः क्षुण्णे इत्यादिश्लोकान्वयः, तत्र कः प्राणी पतितो नात्र व्यूढो विषयवीचिभिरिति सम्बन्धः, **जीवेन** जन्तुनाऽनन्तशोऽनन्तवारान् **क्षुण्णे** व्याप्ते **चतुर्गतिगतागतै**रितिनारकतिर्यग्नरामरलक्षणे गतिचतुष्टये गमनागमनैः, तथाऽपि तेनापि प्रकारेणानन्तकृत्वः परिभ्रमणलक्षणेनाप्राप्तावसाने **अनादौ** आदिरहिते **भवसागरे** संसारसागरेऽलब्धान्तःपरिस्पन्देऽप्राप्तमध्यविभागे, **दुःखश्वापदसङ्कुले** अशर्मदुष्टजलचरजीवाकुले, **व्याधिजन्मजरामृत्युवारिवारभयङ्करे** इति व्याधिजन्मजरामृत्यव एव वारिवारो जलव्रातस्तेन भयङ्करे भयानके, **प्रमादमदिरामूढ** इति।

---

१ इदं तु ध्येयं-मु. JP मध्ये नास्त्ययं श्लोकः BC प्रत्योरेतावान् एव पाठः दृश्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाद एव मदिरा सुरा तया मूढो विगतकृत्याकृत्यविवेको **विचेता** नष्टचित्तः **नष्टसद्गतिर्नष्टसन्मार्गः, कः प्राणी पतितो नात्र संसारे व्यूढः प्रेरितो विषयवीचिभिः** शब्दादिविषयकल्लोलैः ? अपि तु सर्वोऽपीत्यर्थः । तथा **नानायोनिसमाकीर्णे** अनेकजीवोत्पत्तिस्थानाकुले **जीवः** प्राणी [**कर्मविनिर्मितां**] कर्मनिष्पादितां **त्रैलोक्यरङ्गे** त्रिभुवनरङ्गभूमौ **रङ्गश्च** नर्तनस्थानं **नटवन्नट** इव **धत्ते** धारयत्यनेक[**स्व**]रूपतां नानाप्रकाररूपतामिति ।

एतदेव व्यनक्ति, **क्वचिन्नारकभावेनेत्यादिश्लोकास्त्रयः** सुखावबोधा एव, किञ्च संसारवर्तिनो जीवाः सर्वदा दुःखिता एवेति दर्शयन्नाह-**प्रियाप्रयोजने केचिदित्यादि श्लोकास्त्रयः** सुखावबोधा एव, तथा शरीरेषु सारताबुद्धिं निरस्यन्नाह-**शुक्रशोणितसम्भूत** इत्यादि, शुक्रं पितुः सम्बन्धिरेतः शोणितं मातुः सम्बन्धिरक्तं, ताभ्यां सम्भूते निष्पन्ने **सप्तधातुमलाश्रये** त्वग्रक्तमांसमेदास्थिमज्जाशुक्रलक्षणमलस्थाने **त्वङ्मात्राऽऽवृते** छविमात्राच्छादिते **पुंसां** पुरुषाणां **काये** शरीरे **का** ? न काचिदित्यर्थः **रमणीयता** रम्यत्वमिति, तथा **रमणीया** रम्या **रमणी** कामिनी **या** यका **निगद्यत** उच्यते **काममोहितमनोभिः** मदनव्यामोहितमानसैस्तस्या **अपि** चारुत्वेनाभिमताया अपि रमण्याः **निःसारं** साररहितं **पूतिमलगन्धि** कुत्सितमलयुक्तम् **शरीरकम्** । अथोपसंहरन्नाह-**संसारासारता येषामित्यादिश्लोकास्त्रयः** सुगमा एव ॥१३५-१५२॥

कुबेरसेनादृष्टान्तः पुनरयं-

अस्तीह भारते क्षेत्रे, धरारामावतंसकः । सरःसरित्पुरग्राम-विहारारामराजितः ॥१॥
सूरसेनाभिधो देशो, जनताऽऽनन्दकारकः । प्रमोदकारकानेक-वस्तुस्तोमसमाकुलः ॥२॥
बभूव तत्र विख्याता, **कुबेरपुरसन्निभा**। नित्यं पुण्यजनाकीर्णा, **मथुरानाम** सत्पुरी ॥३॥
रेजुर्यत्र सपद्मानि, मनोहारीणि सर्वतः । मध्ये शुभ्रोच्चगेहानि, बहिश्चारुसरांसि च ॥४॥
प्रियालपनसाराणि, सुमनःशोभितानि च । यत्रान्तः साधुवृन्दानि, काननानि बहिर्बभुः ॥५॥
परं प्रार्थयते लोकं, यत्र साधुजनो भृशम् । दुःखैरेव गुणो यत्र, दोषाय खलु कल्प्यते ॥६॥
गुणस्य बाधिका वृद्धि-र्यत्रेष्टा शब्दशासने । आगमस्यापि नित्यत्वं, यत्र तत्रैव सम्मतम् ॥७॥
स्त्रीलोचनेषु लोलत्वं, कृशत्वं यदि विग्रहे । पक्षपातः पतङ्गेषु, पत्रचिन्ता च योषिषु ॥८॥
कामिनां दूतसञ्चारो, रात्रेर्दोषाभिधेयता । भ्रूलतासु विलासिन्याः, कौटिल्यं यत्र बिभ्रति ॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसीत्तत्र विशालाक्षी, विदग्धा विदग्धप्रिया। नाम्नाकुबेरसेनेति, सुप्रसिद्धा विलासिनी॥
या सर्वकामशास्त्रेषु, सकलासु कलासु च। निःशेषरतचेष्टासु, प्रावीण्यमधिकं दधौ ॥११॥
शृङ्गाररसभृङ्गारो, विलासरसकूपिका। सल्लावण्यपयःकुण्डं, सारसौन्दर्यमन्दिरम् ॥१२॥
सच्चन्दनद्रुमालीव, भुजङ्गौघनिषेविता। प्रावृट्कालनभःश्रीवद्, घनोत्तुङ्गपयोधरा ॥१३॥
भुजङ्गराजराजीव्, महाभोगविराजिनी। मीनकेतुपताकेव, जगन्मोहविधायिनी ॥१४॥
समग्रकामशास्त्रोक्ता-ऽऽलिङ्गनादिगुणव्रजे। सर्वातिशायिनैपुण्यं, दधार चतुरानना ॥१५॥
एवं वेश्याजने प्राज्यं, प्राधान्यं प्रवितन्वती। मान्या सा राजलोकस्य, पौरलोकस्य चाधिकम् ॥१६॥
नरेन्द्रामात्यपुत्राद्यै-स्त्यागिभिर्भोगिभिः सह। भुञ्जाना सुन्दरान् भोगान्, निन्ये कालं यथासुखम् ॥१७॥
अन्यदा जठरे तस्या, गर्भः प्रादुरभूत्किल। तेनासौ वर्धमानेन, नितरां पीडिता सती ॥१८॥
स्वमातुः कथयामास, यथा मातर्ममाधुना। सञ्जाता दारुणा पीडा, जठरान्तः सुदुःसहा ॥१९॥
तयाप्याशु समाहूय, वैद्यस्यासौ प्रदर्शिता। तेनापि क्षणमालोक्य, पृष्टं रोगस्य कारणम् ॥२०॥

यथेयं किं सदा भुङ्क्ते, पिबत्यम्बु च कीदृशम्।
स्थाने वा कीदृशे शेते, व्यापारं वा करोति कम् ॥२१॥

इत्यादि प्रश्निते कृत्स्ने, तेन वैद्येन मूलतः। मातः कुबेरसेनाया-स्तस्मै सर्वं न्यवेदयत् ॥२२॥
ततश्चासौ परामृश्य, कराग्रेण समं ततः। सम्यक्सम्यक् तदुदरं, गर्भदोषमबुध्यत ॥२३॥
ततो निश्चित्य तां पीडां, बभाणैवं भिषग्वरः। यथास्या जठरे पीडा, युग्मगर्भसमुद्भवा ॥२४॥
तस्मादस्यै ददामीदं, नानाद्रव्यं शुभौषधम्। मनाक् सञ्जायते येन, शरीरेऽस्याः सुखासिका ॥२५॥
प्रदत्तं च तकं तेन, वैद्येन विधिपूर्वकम्। ईषत्कुबेरसेनाया, उपशान्ता च वेदना ॥२६॥
ततः सन्मान्य ताम्बूल-पुष्पादिवरवस्तुभिः। सस्नेहं सप्रणामं च, तया वैद्यो विसर्जितः ॥२७॥
ततश्च कुट्टिनी प्राह, यथा वत्से! व्यथाकरम्। गालयामि प्रयोगेण, युग्मगर्भमिमं तव ॥२८॥
अन्यथा तेऽस्य गर्भस्य, वर्धमानस्य दोषतः। अत्यन्तं दारुणा पीडा, भविष्यति सुदुःसहा ॥२९॥
अतोऽयं गाल्यतां गर्भः, क्रियतां मामकं वचः। यद्यस्ति जीविताशा ते, नो चेत्पुत्रि! विनङ्क्ष्यसि ॥३०॥
कुबेरसेनयापीदं, श्रुत्वा मातुः प्रभाषितम्। दयार्द्रचित्तयाऽवाचि, माभाणीर्मातरीदृशम् ॥३१॥
महापातकमेतद्धि, विशिष्टजननिन्दितम्। यद्गर्भपातनं नाम, भ्रूणहत्येति तद्विदुः ॥३२॥
तस्मान्न गालयाम्येनं, गर्भं प्राणात्ययेऽपि हि। किं भूरिजल्पितेनाथ, यद्भाव्यं तद्भविष्यति ॥३३॥
अथोवाह तकं गर्भं, कुर्वन्तमपि वेदनाम्। दिवसेषु च पूर्णेषु, सासूत युगलं वरम् ॥३४॥
दारको दारिका चेति, सुरूपं डिम्भकद्वयम्। कदलीगर्भसंकाशं, सर्वावयवसुन्दरम् ॥३५॥
अथाभाणि हितार्थिन्या, जनन्या सा निजाङ्गजा। यथा डिम्भकयुग्मं ते, नेदं सुन्दरि! सुन्दरम् ॥३६॥
यतस्ते जनिता तेन, गर्भस्थेनापि वेदना। अत्यन्तं दुःसहा वत्से!, तदिदं त्यज्यतामिति ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयावाचि करिष्यामि, जननि! तावकं वचः । किन्तु प्रपालयाम्येत- त्कतिचिद्दिवसानहम् ॥३८॥
दशाहोत्सवमेतस्य, तावदम्ब! करोम्यहम् । पश्चाच्च पूरयिष्यामि, सर्वांस्तव मनोरथान् ॥३९॥
एवं तर्हि विधेहीति, प्रतिपन्ने तया ततः । तदपत्ययुगं सापि, पालयामास यत्नतः ॥४०॥
समग्राभीष्टसम्पत्त्या, हृद्यैर्मितहिताशनैः । पालयन्त्यास्ततस्तस्या, दिनानां दशकं गतम् ॥४१॥
अथाकारि तयोः कृत्यं, दशाहोत्सवसम्भवम् । सर्वं सर्वजनानन्द-कारकं सुमहर्द्धिकः ॥४२॥
ततः कुबेरदत्तेति, नामाङ्कं मुद्रिकाद्वयं । कारयित्वा तया बद्धं, कण्ठे बालकयोस्तयोः ॥४३॥
ततश्च चारुमञ्जूषा, प्रत्यग्रा प्रगुणीकृता । विस्तीर्णमध्यभागोरु-विन्यस्तमृदुतूलिका ॥४४॥
तूलिकोपरि तद्युग्मं, शायितं च ततस्तया । अश्रुपातं विमुञ्चन्त्या, वरवस्त्रसमावृतम् ॥४५॥
ततश्च पिहितद्वारा, सा मञ्जूषा सुसंवृता । नीरन्ध्रीकृतसर्वाङ्गा, तालिका बद्धशृङ्खला ॥४६॥
ततश्चासौ समुत्पाट्य, नीत्वा पुम्भिः कृतादरैः । यमुनायां महानद्यां, सन्ध्याकाले प्रवाहिता ॥४७॥
वीचिवन्नीरपूरेण, महावेगप्रवाहिणा । उह्यमानाथ सा प्रातः प्राप्ता सौरिकपत्तने ॥४८॥
अथ शरीरचिन्तार्थ-मागतौ सरितस्तटे । सौरिकपुरवास्तव्यौ-श्रेष्ठिनौ श्रेष्ठचेष्टितौ ॥४९॥

नाम्नैको यक्षदत्ताख्यो, महेश्वराभिधोऽपरः ।
नदीतीरोपकण्ठं च, यावच्छौचार्थमागतौ ॥५०॥

तावत्तौ नीरपूरेण, प्रेर्यमाणां मनोहराम् । दृष्टवन्तौ नदीमध्ये, मञ्जूषां मङ्क्षुगामिनीम् ॥५१॥
समीक्षमाणयोरेव, तयोस्तत्र सकौतुकम् । हस्ताभ्यामिव क्षणादेव, वेगेनैव समाययौ ॥५२॥
ततस्ताभ्यां धृता शीघ्रं, गच्छन्ती करपल्लवैः । नीता च तीरदेशे सा, तथोद्घाट्य निरीक्षिता ॥५३॥
ततोऽवलोकितं ताभ्यां, तन्मध्ये बालकद्वयम् । कङ्केल्लिपल्लवच्छायं, सुकुमारशरीरकम् ॥५४॥
देहोद्भूतप्रभाजालै-रुद्योतयद्दिशो दश । कुर्वद्भूपातिरेकेण, लोकानां लोचनोत्सवम् ॥५५॥
ततो महेश्वरः प्राह, तद्रूपाक्षिप्तमानसः । भोः श्रेष्ठिन्! पश्य पश्येदं, सुन्दरं डिम्भकद्वयम् ॥५६॥
अहो लावण्यसम्पूर्णो, रूपवानेष दारकः । अहो समग्रसौन्दर्य-राशिरेषापि दारिका ॥५७॥
अथोक्तं यक्षदत्तेन, केनापीदं समुज्झितम् । म्रियतामापदं वापि, प्राप्नुयादिति वाञ्छया ॥५८॥
अतोऽनयोर्गृहाणैकं, यत्तव प्रतिभासते । गृह्णाम्यहं द्वितीयं तु, श्रेष्ठिन्! यत्त्वं विमुञ्चसि ॥५९॥
ततो महेश्वरः प्राह, बालिका मे भवत्विति । बालकं त्वं गृहाणेम-मेवमस्त्विति सोऽवदत् ॥६०॥
तल्लाभहृष्टसन्तुष्टौ, लात्वा तद्डिम्भयुग्मकम् । तदालोकनतन्निष्ठौ, गतौ गेहे निजे निजे ॥६१॥
दारको यक्षदत्तेन, स्वभार्यायै समर्पितः । अयं पुत्रस्तवेत्युक्त्वा, यत्नतः पाल्यतामिति ॥६२॥
महेश्वरोऽपि सस्नेह-मर्पयामास दारिकाम् । गेहिन्यास्तव पुत्रीयं, यत्नेन प्रतिपालय ॥६३॥
अथेदं वर्धते तत्र, धात्रीपञ्चकलालितम् । क्षीरपानाभिषेकाङ्क-धारणक्रीडनादिभिः ॥६४॥
सद्भोज्यैर्लेह्यपेयाद्यै-र्नानालङ्करणादिभिः । तस्यैवं लाल्यमानस्य, वर्षाण्यष्टौ क्रमाद्ययुः ॥६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः शब्दादिविद्यानां, ग्रहणाय युगं ततः । पुष्पालङ्कारवस्त्राद्यैः, प्रविभूषितविग्रहम् ॥६६॥
श्रेष्ठिभ्यां कृतपूजस्य, वरवस्त्रफलादिभिः । एकस्यैव च सानन्द-मुपाध्यायस्य ढौकितम् ॥६७॥
एकत्रैव प्रयत्नेन, गृह्णतः सकलाः कलाः । परां कोटिं समारूढा, तस्य (तयोः) प्रीतिः परस्परम् ॥६८॥
एवं स्नेहानुरक्तस्य, पठतः क्रीडतस्तथा । क्रमेणोपात्तविद्यस्य, सञ्जातं नवयौवनम् ॥६९॥
अथ महेश्वरेणोक्तं, पश्याहो यक्षदत्तक! । परस्परमिदं युग्मं, जातं प्रेमानुरक्तकम् ॥७०॥
अयं कुबेरदत्ताख्यः, पुत्रस्तेऽतीववल्लभः । मत्पुत्रिकावियोगेन, प्राणानुज्झति निश्चितम् ॥७१॥
इयं कुबेरदत्तापि, मत्पुत्री बन्धुवत्सला । निजात्मनो वियोगेन, नूनं प्राणैर्विमुच्यते ॥७२॥
तद्धो यक्षदत्तात्र, सङ्गतमिदमेव हि । अन्योन्यमनयोरेव, यद्विवाहो विधीयते ॥७३॥
अथानन्दितचित्तोऽसौ, यक्षदत्तोऽब्रवीदिदम् । साधु साधु त्वया प्रोक्तं, श्रेष्ठिंस्तत्क्रियतामिति ॥७४॥
ततश्चोभयसंमत्या, निजकापत्ययोस्तयोः । कारितं सर्वसामग्र्या, पाणिग्रहणमङ्गलम् ॥७५॥
अथैवं तिष्ठतोस्तत्र, सम्पादितविवाहयोः । अन्योन्यं परमप्रेम-तन्तुभिर्बद्धचेतसोः ॥७६॥
नित्यं नानाप्रकाराभिः, क्रीडाभिः क्रीडतोरलम् । सम्पद्यमाननिःशेष-तुङ्गभोगोपभोगयोः ॥७७॥
अखण्डसुखसन्दोह-समुद्रान्तर्निमग्नयोः । अतियान्ति तयोः कालः, स्वर्गे स्वर्गौकसामिव ॥७८॥
अन्यदा द्यूतसक्ताभ्यां, ताभ्यां ग्रहणके किल । सञ्चारिते स्वनामाङ्के, स्वे मुद्रिके परस्परम् ॥७९॥
ततः कुबेरदत्तोऽसौ ददर्शाथ कथञ्चन । सत्कां कुबेरदत्ताया-स्तां नामाङ्कितमुद्रिकाम् ॥८०॥
ततो विचिन्तयामास, यथेयं ननु मुद्रिका । मन्मुद्रिकासमानैव, वर्णाङ्कघटनादिभिः ॥८१॥
भाव्यं च कारणेनात्र, ननु केनापि निश्चितम् । अतः पृच्छामि गत्वाहं, वृत्तान्तं पितरं निजम् ॥८२॥
सञ्चिन्त्यैवं निजे चित्ते, द्यूतक्रीडां विमुच्य च । गत्वा पितुः समीपेऽसौ, तं वृत्तान्तमपृच्छत् ॥८३॥
यक्षदत्तोऽपि निर्बन्धं, ज्ञात्वा तस्यानिवर्तकम् । मूलादारभ्य निःशेषं, तं वृत्तान्तं न्यवेदयत् ॥८४॥
ततः श्रुत्वा पितुः पार्श्वे, सर्वं व्यतिकरं निजम् । पाणिग्रहणपर्यन्तं, मञ्जूषादर्शनादिकम् ॥८५॥
स एवं चिन्तयामास, नूनमेषा मम स्वसा । भार्याभावोऽपि नैवास्या-मभून्मम कदाचन ॥८६॥
इदमेव सुन्दरं जातं, यदकृत्यं न सेवितम् । मया मोहविमूढेन, सहोदर्या तया सह ॥८७॥
अहो दुरन्त एवायं, घोरः संसारसागरः । यन्मध्यवर्तिनः सत्त्वाः, प्राप्नुवन्ति विडम्बनाम् ॥८८॥
मातापि वत्सला भूत्वा, भार्या यत्र प्रजायते । भार्याऽपि मातृभावेन, धिक्संसारविडम्बनाम् ॥८९॥
स्वसा भूत्वा जनी यत्र, जनी भूत्वा स्वसा भवेत् । माता सुता सुता माता, यत्रासौ निर्गुणो भवः ॥९०॥
एवमादि विचिन्त्यासौ, संसारासारतां गतः । गत्वा कुबेरदत्तायाः, सर्वमाख्यद्यथा श्रुतम् ॥९१॥
उक्तवांश्च यथा भद्रे!, खेदं चेतसि मा कृथाः । यत ईदृश एवायं, नानानर्थभृतो भवः ॥९२॥
इत्यादिभिः प्रियैर्वाक्यै-र्भववैरस्य दीपकैः । प्रतिबोध्य पितुर्गेहे, प्रेषयामास तामसौ ॥९३॥
ततश्च पितरं पृष्ट्वा, द्रव्योपार्जनहेतवे । कृत्वावशेषसामग्रीं, जगाम मथुरां पुरीम् ॥९४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहरन्नसौ तत्र, विविधक्रयविक्रयैः । प्रभूतमर्जयामास, द्रव्यं पुण्यानुभावतः ॥९५॥
अथ कुबेरसेनाख्यां, वेश्यामपश्यदन्यदा । ख्यातकीर्तिं स्वकामेव, जननीं पूर्ववर्णिताम् ॥९६॥
ततस्तस्याः स्वरूपत्वा-त्कामाकुलितमानसः । काले गच्छति तामेव, चक्रे च स्वपरिग्रहे ॥९७॥
तत्रैव विदधत्सर्वं, भोजनस्नपनादिकम् । पुत्रमुत्पादयामास, तस्यामेव स्वमातरि ॥९८॥
इतश्च-अथ कुबेरदत्तापि, वसति स्म पितुर्गृहे । कुर्वन्ती धर्मकार्याणि, यथाकामं यथाबलम् ॥९९॥
तमेव निजवृत्तान्तं, चिन्तयन्ती दिवानिशम् । संसारस्य च वैरस्यं, भावयन्ती क्षणे क्षणे ॥१००॥
शुश्राव सुव्रताख्यायाः, गणिन्याश्चरणान्तिके । सर्वज्ञभाषितं धर्मं, भावतः प्रतिवासरम् ॥१०१॥
अन्यदा जातवैराग्या, संसारोच्छेदकारणम् । गणिन्याः सुव्रताख्यायाः समीपे व्रतमाददे ॥१०२॥
ततः श्रुतमधीयाना, संवेगातिशयादियम् । षष्ठाष्टमादिकं तेपे, तपस्तीव्रं सुदुष्करम् ॥१०३॥
एवं सर्वां प्रकुर्वन्त्याः, सामाचारीं यथोदिताम् । संसारसारतां चैव, भावयन्त्या विशेषतः ॥१०४॥
वर्धमानशुभात्यन्त-परिणामातिरेकतः । क्षयोपशमतश्चैव, सदाचरणकर्मणः ॥१०५॥
तस्याः कुबेरदत्तायाः, विशिष्टगुणहेतुकम् । अवधिज्ञानमुत्पन्नं, रूपिवस्तुप्रकाशकम् ॥१०६॥
तेन प्रलोकयन्ती च, भारतं क्षेत्रमञ्जसा । क्रमेणोपयुजे सर्वं, मथुरां नगरीं प्रति ॥१०७॥
ददर्श भ्रातरं तत्र, कलत्रीकृतमातरम् । बालवत्सं तयोरेव, पुत्रं चाचिन्तयत्ततः ॥१०८॥
अहो! सुरौद्रमज्ञानं, महादुःखौघकारणम् । महाविडम्बनाहेतु-र्महामूलं महापदाम् ॥१०९॥
अज्ञानोपहता जीवा, न बुद्ध्यन्ते हिताहितम् । हेयोपादेयतां चैव, धर्माधर्मस्वरूपताम् ॥११०॥
भक्ष्याभक्ष्यादिकं वस्तु, पेयापेयादिकं तथा । कृत्याकृत्यविभागं च, गम्यागम्यं शुभाशुभम् ॥१११॥
अज्ञानेन हि जीवानां दीर्घः संसारसागरः । दीर्घा कर्मस्थितिश्चैव, दीर्घा दुःखपरम्परा ॥११२॥
अज्ञानादेव कुर्वन्ति, जीवाः कर्मातिनिर्घृणम् । गोहत्यां भ्रूणहत्यां च, स्त्रीहत्यां ब्रह्मघातनम् ॥११३॥
जल्पन्ति च मृषावादं, परद्रव्यं हरन्ति च । परदारांश्च सेवन्ते, लुभ्यन्ति च परिग्रहे ॥११४॥
भक्षयन्ति च मांसानि, मद्यानि च पिबन्त्यलम् । भुञ्जते च दिवारात्रौ, पशुवन्नियमं विना ॥११५॥
तस्मादज्ञानमेवेह, सर्वानर्थप्रवर्तकम् । शिष्टसंमतनिःशेष-व्यवहारस्य बाधकम् ॥११६॥
एवं विचिन्त्य सा चित्ते-ऽनुज्ञाप्य मणिनीं तथा । क्रमेण सह साध्वीभि-र्जगाम मथुरां पुरीम् ॥११७॥
ततः कुबेरसेनाया, गेह एव गतस्मया । ययाचे सर्वदोषौघ-विनिर्मुक्तमुपाश्रयम् ॥११८॥
दत्तस्तयापि सानन्दं, निरवद्य उपाश्रयः । तस्थौ तत्रैव सा तुष्टा, तत्प्रतिबोधहेतवे ॥११९॥
अन्यदा च रुदन्तं तं, वीक्ष्य स्वभ्रातृपुत्रकम् । गत्वा वेगेन तद्देशे, जग्राह करसम्पुटे ॥१२०॥
तयोः समक्षमेवैनं, निवेश्याङ्के निजे ततः । एवं प्रोवाच सा वाक्यैः, परस्परविरोधिभिः ॥१२१॥

यथा त्वं मम पुत्रोऽसि, भ्राता च मे सहोदरः ।
भ्रातृव्योऽसि च मे वत्स!, मम त्वं देवरोऽसि च ॥१२२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तव पितापि यो वत्स!, स मे भ्राता पिता पतिः । ममायं श्वशुरश्चैव, भवत्येव न संशयः ॥१२३॥
येयं ते जननी वत्स!, माता श्वश्रूः स्वसा मम । सपत्नी भ्रातृजाया च भवत्येषा सुनिश्चितम् ॥१२४॥
इत्थमुल्लापयन्ती तं, बालकं च मुहुर्मुहुः । श्रुत्वा कुबेरदत्तोऽपि, तदन्तिकमुपागतः ॥१२५॥
उवाच च यथार्ये! त्वं, किमित्येवं प्रभाषसे । वचनानि विरुद्धानि, मदीयं पुत्रकं प्रति ॥१२६॥
एवमुक्ता सती सापि, तं प्रत्याह प्रबुद्धधीः । विरुद्धं नैव भाषेऽहं, धर्मशीला कदाचन ॥१२७॥
यन्मया भाषितं भद्र!, तदेतत्सत्यमेव हि । यथा च सत्यमेवेदं, तथाकर्णय कथ्यते ॥१२८॥
ततः प्रकथ्य वृत्तान्तं, मूलतः सर्वमेव हि । बभाण नात्रकाणां च, सा सम्बन्धाभिधित्सया ॥१२९॥
येनाहं जनताध्यक्षं, परिणिन्ये त्वया किल । तेनायं मे शिशुः पुत्रो, भवतीत्यवगम्यताम् ॥१३०॥
मम मातुः सुतो येन, तेन भ्राता भवत्ययम् । येन पुत्रो मम भ्रातु-स्तेन मे भ्रातृजोऽपि हि ॥१३१॥
येन भ्राता मम भर्तु-स्तेनायं देवरो मम । इत्येतैरेष सम्बन्धी, चतुर्भिर्मम नात्रकैः ॥१३२॥
पितापि पुनरेतस्य, मातुर्मे येन नन्दनः । तेनायं भवति भ्राता, येनोढा तेन मे पतिः ॥१३३॥
सपत्न्या जात इत्येष, पुत्रो मे तेन बालकः । मन्मातुर्येन भर्तायं, जनकोऽपि च तेन मे ॥१३४॥
माता या बालकस्यास्य, माता सैव ममापि हि । येनैष जननीभर्तु-स्तेन श्वश्रूरियं मम ॥१३५॥
येन भ्रातुश्च भार्येयं, भ्रातृजाया च तेन मे । येन भार्या च मे भर्तुः, सपत्नीयं ततो मम ॥१३६॥
ततः कुबेरदत्तोऽपि, समाकर्ण्यार्यिकावचः । अत्यन्तं खेदमापन्न-श्चिन्तयामास मानसे ॥१३७॥
अरेरेऽहं महामूढो, महादुष्कृतकारकः । पापानामप्यहं पापो, जघन्यानां जघन्यकः ॥१३८॥
यन्मयेदमकर्तव्यं, लोके शास्त्रे च निन्दितम् । मातर्यपि महापापं, महापापेन सेवितम् ॥१३९॥
अहो ह्यज्ञानमूढेन, कामाकुलितचेतसा । कृतं कुकर्म कीदृक्षं, मया दुर्गतिगामिना ॥१४०॥
एवंविधदुराचार-घोरावर्जितकर्मणः । मन्ये श्वभ्रेऽपि नैवास्ति, निवासो निर्घृणस्य मे ॥१४१॥
केनोपायेन नो जाने, लोकधर्मविरोधिनः । अमुतः पातकाद् घोरा-च्छुद्धिर्मम भविष्यति ॥१४२॥
एवमात्मानमत्यन्तं, निन्दन्तं पापभीरुकम् । कुबेरदत्तमार्यापि, वचो भूयोऽब्रवीदिदम् ॥१४३॥
किं त्वं महानुभावैवं, खेदं वहसि मानसे । यतस्ते सर्वमेवेदं, जातमज्ञानदोषतः ॥१४४॥
अज्ञानान्धितबुद्धीनां, यज्जीवानां विडम्बनाः । भवन्त्येवंविधा घोरा-स्तदत्राहो किमद्भुतम् ॥१४५॥
कृत्याकृत्यमजानाना, जीवा अज्ञानदोषतः । हिंसादिभ्यो न कुर्वन्ति, विनिवृत्तिं कदाचन ॥१४६॥
अनिवृत्ताश्च ते तेभ्यो, विदधत्यसमञ्जसम् । तस्मादज्ञानतः सर्वा, जीवानां हि विडम्बना ॥१४७॥
यत्त्वया चिन्तितं भद्र!, पातकादमुतः कथम् । शुद्धिर्जायेत मे तत्र, तवोपायः प्रकथ्यते ॥१४८॥
सर्वेषामपि पापानां, प्रव्रज्या शुद्धिकारिका । जिनोदिता ततः सैव, कर्तव्या शुद्धिमिच्छता ॥१४९॥
ददति ब्राह्मणादिभ्य, एके पापविशुद्धये । गोदानं स्वर्णदानं च, भूमिदानान्यनेकधा ॥१५०॥
आत्मशुद्धचर्थमेवान्ये, कारयन्ति क्रतूनपि । जुह्वत्यग्नौ पशूंस्तत्र, ह्यश्वादींश्च सहस्रशः ॥१५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमेध्यभुग्गवामेके, पृष्ठभागं स्पृशन्ति च। गवां मूत्रं पिबन्त्यन्ये, ह्यन्ये पञ्चगवं तथा ॥१५२॥
शुद्ध्यर्थं स्नान्ति तीर्थेषु, विशन्त्यन्ये हुताशने।
तथापि नैव शुद्ध्यन्ति, विना दीक्षां जिनोदिताम् ॥१५३॥
किञ्च शौचं विना शुद्धि-र्जायते न कदाचन। सत्त्वाहिंसादिकं तच्च, यतः प्राहुर्मनीषिणः ॥१५४॥

सर्वजीवदया शौचं, शौचं सत्यप्रभाषणं।
अचौर्यं ब्रह्मचर्यं च शौचं सन्तोष एव च ॥१५५॥
कषायनिग्रहः शौचं, शौचमिन्द्रियनिग्रहः।
प्रमादवर्जनं शौचं, ध्यानं शौचं तथोत्तमम् ॥१५६॥
दुष्टयोगजयः शौचं, शौचं वरविवेकिता।
तपो द्वादशधा चैव, शौचमाहुर्मनीषिणः ॥१५७॥
सर्वज्ञोक्तेन वृत्तेन, तत्सर्वं च दयादिकम्।
शौचं सम्पूर्णमेवास्ति, सदान्तरात्मशुद्धिकृत् ॥१५८॥

अथ कुबेरदत्तोऽपि, श्रुत्वा चैतत्तदन्तिके। जगाद संस्तुवन्नेवं, तां परमोपकारिणीम् ॥१५९॥
त्वमार्ये! धर्ममातासि, त्वमेव मे सहोदरी। कल्याणमालिका मूला, त्वमेव मम सद्गुरुः ॥१६०॥
अकृत्यागाधगर्तायां, दुर्गमायां निमज्जतः। दत्तो हस्तावलम्बो मे, त्वयैव हितकारिणि! ॥१६१॥
अकृत्यसेवनोपात्त-पापपङ्कमनन्तकम्। धर्मोपदेशनीरेण, प्रक्षालितं त्वया मम ॥१६२॥
त्वमज्ञानमहाध्वान्त-ध्वंसनैकरविप्रभा। कल्पपादपशाखेव, सङ्कल्पितफलप्रदा ॥१६३॥
समग्रसम्पदां मूलं, सर्वदोषविषापहम्। सद्विवेकस्फुरद्रत्नं, दत्तं मेऽद्य त्वयैव हि ॥१६४॥
अतो मे तावकं वाक्यं, रुचितं हितभाषिणि!। ग्रहीष्येऽहमिमां दीक्षां, सर्वपापप्रणाशिनीम् ॥१६५॥
ततस्तां च प्रणम्यासौ, समुत्थाय च सत्वरम्। गत्वा गृहे निजं लोकं, समाकारितवानिति ॥१६६॥
ततस्तं सर्वमापृच्छ्य, सन्मान्य च यथोचितम्।
कृत्वा चास्य कुटुम्बस्य, सर्वस्यापि च सुस्थितम् ॥१६७॥
धर्मस्थानेषु निःशेषं, स्वं द्रव्यं विनियोज्य च। दीनादिभ्यो यथाशक्त्या, दानं दत्त्वानुकम्पया ॥१६८॥
तथा कुबेरसेनां च, भवनैगुण्यदर्शकैः। हितैः पथ्यैः प्रियैर्वाक्यैः सन्तोष्य च सविस्तरम् ॥१६९॥
इत्यादि सकलं कृत्वा, कृत्यं तत्समयोचितम्। मित्रपुत्रकलत्रादौ, स्नेहं मोहं विमुच्य च ॥१७०॥
ततो जग्राह सद्दीक्षां, सर्वं सङ्गं विमुच्य सः। तथाविधसुसाधूनां, समीपे समतायुतः ॥१७१॥
अथ कुबेरसेनापि, तद्वियोगेन दुःखिता। अनुभूतश्रुतसंसार-नानारूपविडम्बना ॥१७२॥
तस्याः कुबेरदत्ताख्य-व्रतिन्याश्चरणान्तिके। नित्यं शुश्राव सद्धर्मं, सर्वं कल्याणकारकम् ॥१७३॥
अन्यदा सा बभाणैवं, यतिधर्मोऽतिदुष्करः। नाहमेनं क्षमाकर्तुं, गेहवासाभिनन्दिता ॥१७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतः श्रावकधर्मो मे, सुकरः प्रतिभासते । तेदेनमेव मे देहि, कृत्वानुग्रहमञ्जसा ॥१७५॥
ततः सम्यक्त्वमूलं सा, पञ्चाणुव्रतसंयुतम् । सप्तशिक्षाव्रतोपेतं, गृहिधर्मं सदुत्तमम् ॥१७६॥
ददौ तस्यै विधानेन, सापि जग्राह भावतः । द्रव्याद्यभिग्रहांश्चैवं, प्रतिपन्ना तदन्तिके ॥१७७॥
गृहीत्वा ब्रह्मचर्यं च, यद्भुवनेऽपि दुष्करम् । पालयन्ती प्रयत्नेन, कामभोगेषु निःस्पृहा ॥१७८॥
सस्पृहा मोक्षसौख्येभ्यः, सदनुष्ठानतत्परा । संसारवासनिर्विण्णा, गमयति स्म वासरान् ॥१७९॥
ततः कुबेरदत्तापि, साध्वी साध्वीसमन्विता । तत्रत्यभूरिलोकानां, कृत्वानुग्रहमुत्तमम् ॥१८०॥
कुर्वन्ती चन्द्रिकेवोच्चै-र्भव्यकैरवबोधनम् । परोपकारताहेतो-र्विजहार महीतले ॥१८१॥

एनां समाकर्ण्य कुबेरसेना-वक्तव्यतां भव्यविवेकदात्रीम् ।
निरस्य निःशेषभवाभिनन्दितां, सुसाधुधर्मे कुरुतादरं जनाः ॥१८२॥

उक्तः **संसारासारताधिकारः**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोकाधिकारः ७

अस्य चायमभिसम्बन्धः, अनन्तरं संसारासारता भणिता । अभावितसंसारस्वरूपास्तु शोकेनाबध्यन्ते तदपनोद इहोच्यते ।

अथ शोकाधिकार उच्यते, तत्र श्लोकाष्टकं तावदाह–

अज्ञातभववैरस्याः, कील्यन्ते शोकशङ्कुना ।
अतस्तदपनोदार्थं, किञ्चिदेवोपदिश्यते ॥१५३॥
स्वबन्धुनाशे जीवानां, हृदयं शोकशङ्कुना ।
कील्यते कुशलस्यापि, निर्विवेकस्य किं पुनः ? ॥१५४॥
तथापि निष्प्रतीकारे, सर्वसाधारणे सदा ।
किमर्थं क्रियते शोको, मरणे समुपागते ॥१५५॥
सममेव प्रवृत्तानां, गन्तुमेकत्र पत्तने ।
यद्येकः पुरतो याति, का तत्र प्रतिवेदना ? ॥१५६॥
शोकोऽपि युज्यते कर्तुं, स्वस्य वा तस्य वा गुणम् ।
यदि कुर्यात्कृतः किंचि-न्नो चेदेष निरर्थकः ॥१५७॥
आयातः स कुतोऽपीह, स्थित्वाऽहानि कियन्ति च ।
न ज्ञायते गतः क्वापि, का तत्र प्रतिबन्धधीः ? ॥१५८॥
यथैकत्र द्रुमे रात्रा-वुषित्वा पक्षिणः प्रगे ।
दिशो दिशं प्रयान्त्येव-मेकगेहेऽपि जन्तवः ॥१५९॥
शक्रचक्रिसहस्राणि, राजरङ्कशतानि च ।
मूर्खपण्डितलक्षाणि, क्षुण्णानि समवर्तिना ॥१६०॥

अज्ञातभववैरस्या अविदितसंसारनैर्गुण्याः **कील्यन्ते** नियन्त्र्यन्ते **शोकशङ्कुना** शोककीलेन, **अतः** कारणात्**तदपनोदार्थं** शोकापनयनार्थं **किञ्चित्** स्तोकम्**उपदिश्यते** उपदेशो दीयते, इति प्रथमश्लोकार्थः, शेषश्लोकसप्तकं सुगममेव ॥१५३-१६०॥

अथ मृत्योः समवर्तित्वलक्षणमुपदर्शयन् श्लोकमेकमाह–

समं च वर्तते येन, सर्वेषां प्राणिनामयम् ।
[1]समवर्ती भण्यते तेन, निर्गुणस्याप्ययं गुणः ॥१६१॥

१ BJP । समवर्त्युच्यते-मु.॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समं च तुल्यं च वर्तते चेष्टते येन कारणेन समवर्ती भण्यते कथ्यते तेन प्रकारेण निर्गुणस्यापि गुणरहितस्यापि मृत्योरयं गुणः समवर्तित्वलक्षण इत्युक्तम् । तथा च–

मेहाण जलं चंदाण चंदिमं दिणयराण करपसरो ।
मरणं इट्ठवियोगो, सामन्नं सयललोयस्स।।१।।

इति श्लोकार्थः ॥१६१॥

अथात्यन्तशोककारिजनानुपालम्भयन् श्लोकत्रयमाह–

आसतां बहवस्ताव-देकैकस्यापि देहिनः ।
येऽतीताः पितरस्तेषां, सङ्ख्यां कः कर्तुमीश्वरः ? ॥१६२॥
रे मूढाः ! किं समारब्धं, रुद्यते यदहर्निशम् ।
मृतः किं कोऽपि नो दृष्टः ?, [1]स्वगृहे परगृहेऽपि वा ॥१६३॥
आगच्छद्भिर्विगच्छद्भि-र्जीवैः कर्मकदर्थितैः ।
न कदापि हि शून्यैषा, घोरा संसारवर्तिनी ॥१६३॥

आसतां तिष्ठन्तु बहवः प्रभूतास्तावदिति क्रम एकैकस्यापि देहिनः शरीरिणो येऽतीताः पूर्वकाले मृताः पितरो जनकास्तेषां [2]सङ्ख्यां परिमाणं कः ? न कोऽपीत्यर्थः कर्तुं विधातुमीश्वरः समर्थ इति ॥१६२॥

रे ! इत्युपालम्भे आमन्त्रणे वा, इत्यादि सुगममिति श्लोकत्रयार्थः ॥१६३-१६४॥

अथोत्तममध्यमजघन्यजना यद्विदधति तथा दर्शयन्नाह–

पण्डिता नैव शोचन्ति, मुञ्चन्त्यश्रूणि मध्यमाः ।
नीचास्त्वर्थप्रदानेन, रोदयन्ति रुदन्ति च ॥१६५॥

पण्डिता विवेकिनो नैव शोचन्ति शोकं न कुर्वन्ति, महत्यपि शोकस्थान इति गम्यते, मुञ्चन्त्यश्रूणि नयनवारिबिन्दून् मध्यमा अविदितसंसारस्वरूपाः, नीचा निर्विवेकास्तु पुनरर्थे, अर्थप्रदानेन इष्टे विनष्टे [अर्थे] द्रव्यं दत्त्वान्यान् रोदयन्ति स्वयं च रुदन्तीति श्लोकार्थः ॥१६५॥

---

१ BJPI स्वगृहेऽन्यगृहे-मु. ॥ २ संख्यापरिं° BPJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ शोककारिणामुपालम्भपूर्वकं हितोपदेशमाह–

भो जना ! वोऽपि नैकट्ये, परलोकप्रयाणकम् ।
धर्मसम्बलमादाय, प्रगुणैः किं न भूयते ? ॥१६६॥

भो अहो जना लोका वोऽपि युष्माकमपि नैकट्ये प्रत्यासन्ने परलोकप्रयाणकं परलोकगमनं मरणमित्यर्थः, वर्तत इति गम्यते, [अतो] धर्मसम्बलं धर्मपाथेयमादाय गृहीत्वा प्रगुणैः प्रज्ञैः किं न भूयते ? भवद्भिरिति गम्यते । धर्मसम्बलयुक्ता हि तत्र न सीदन्ति यत-उक्तं

[1]धम्मं जिणपणियं घणु, जे संवल कर लेंति ।
ते परलोयपयाणडे, पहिय न दुत्थिय होंति ॥१॥

इति श्लोकार्थः ॥१६६॥

किञ्च स्वप्रयोजननिष्ठेषु सत्त्वेषु केयं बन्धुबुद्धिरित्यावेदयन्नाह–

स्वकार्यासिद्धितः क्रुद्धः, पुत्रः शत्रूयतेतराम् ।
अतो बन्धुरबुद्धीनां, बन्धुबुद्धिरतात्त्विकी ॥१६७॥

स्वकार्यासिद्धितः स्वप्रयोजनाऽनिष्पन्नें क्रुद्धो रुष्टः पुत्रःसूनुः शत्रूयते शत्रुरिवाचरति, अतोऽस्मात्कारणाद्बन्धुरबुद्धीनां सुन्दरमतीनां बन्धुबुद्धिः स्वजनबुद्धिरतात्त्विकी अपारमार्थिकीति श्लोकार्थः ॥१६७॥

किं बहुनाऽपि शोचितेन ? न कोऽपि गुणः सम्पद्यते, इति दृष्टान्तद्वयेनाह–

युगादिदेवनिर्वाणे, सह शक्रेण चक्रिणा ।
भरतेन भूरिशब्देन, रुदता रोदिता मही ॥१६८॥
तथापि वालितो नैव, तेन स्नेहवतापि हि ।
श्रीमदादिजिनाधीशः, सर्वलोकैकबान्धवः ॥१६९॥
पुत्राणां मरणं श्रुत्वा, द्विजादाकस्मिकं नृपः ।
प्रभुः प्रभूतमेदिन्याः, सगरः शोकविह्वलः ॥१७०॥

---

१ पत्ति पयत्ति न देवि घणु, जे संबलु कर - BJV॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षणमात्रं मूर्च्छितः स्थित्वा, महाऽऽक्रन्दं चकार सः ।
तथापि रुदता तेन, स्वौरसा नैव वालिताः ॥१७१॥
तस्माच्छोकं परित्यज्य, तत्कर्तव्यं मनीषिणा ।
भूयो न भूयते येन, संसारे शुभकर्मणा ॥१७२॥

अस्य श्लोकपञ्चकस्य व्याख्या **युगादिदेवनिर्वाणे** ऋषभजिनसिद्धिगमने **सह** सार्धं **शक्रेणेन्द्रेण चक्रिणा** चक्रवर्तिना **भरतेन** भरताभिधेन **भूरिशब्देन** बृहद्ध्वनिना **रुदता** रोदनं कुर्वता **रोदिता** रोदनं कारिता **मही** पृथ्वी, **तात्स्थ्यात्तद्व्यपदेश** इति तत्रस्था लोकाः । तथेत्यादिश्लोकचतुष्टयं सुगममेव, नवरं **स्वौरसाः** स्वपुत्रा इति श्लोकपञ्चकार्थः ॥१६८-१७२॥

इह **भरतचक्रवर्तिकथानकं** सुप्रसिद्धमिति कृत्वा न लिख्यते **सगरचक्रवर्तिकथानकं** पुनरिदम्-

अस्तीह सुन्दरानेक-वस्तुसन्दोहसङ्कुला । **अयोध्या**नाम विख्याता, पुरी शक्रपुरोपमा ॥१॥
तां च सर्वगुणोपेतौ, पालयामासतुर्नृपौ । **जितशत्रुसुमित्राख्यौ** भ्रातरौ प्रीतमानसौ ॥२॥
यथासङ्ख्येन सद्रूपे, तयोर्भार्ये बभूवतुः । **विजयावैजयन्त्याख्ये**, सौजन्यादिगुणान्विते ॥३॥
अन्यदा च सुखं सुप्ते, पर्यङ्के रत्नराजिनि । दृष्टवत्यौ महास्वप्ना-निमान्निशि चतुर्दश ॥४॥
गजेन्द्रं वृषभं सिंह-मभिषेकं सुमस्रजः । चन्द्रं सूर्यं ध्वजं कुम्भं, रम्यं पद्मसरस्तथा ॥५॥
समुद्रं वरविमानं च, रत्नराशिं हुताशनम् । मुखेन विशतो दृष्ट्वा, स्वप्नानेतान्निजोदरे ॥६॥
प्रतिबुद्धे च ते सत्यौ, शिष्टवत्यौ यथाविधि । भर्तृभ्यां परमानन्दं, वहन्त्यौ निजमानसे ॥७॥
ताभ्यामपि च त उक्ते, यथा युवकयोः सुतौ । [1]भविष्यतः सुन्दराकारौ, सर्वलक्षणसंयुतौ ॥८॥
इत्थं ते पेशलैर्वाक्यैः, पतिभ्यामभिनन्दिते । जग्मतुर्निजकस्थाने, हर्षापूरितमानसे ॥९॥
ततः प्रातः समाहूय, भूपतिः स्वप्नपाठकान् । सम्पूज्य प्रश्नयामास, स्वप्नानां फलमादरात् ॥१०॥
तैरवाचि महाराज !, महास्वप्नानिमान् किल । पश्यन्ति मातरो नूनं, जिनानां चक्रिणां तथा ॥११॥
अतस्तावकभार्याया, भ्रातृजायाश्च ते नृप ! । तीर्थेशश्चक्रवर्ती च, भवितेत्यवगम्यते ॥१२॥
ततः सम्पूज्य ताम्बूल-पुष्पवस्त्रादिवस्तुभिः । विसर्जिता नरेन्द्रेण, सादरं स्वप्नपाठकाः ॥१३॥
अथ स्थितिक्षयाच्च्युत्वा, **विजया**ख्यविमानतः । उत्पन्नो विजयादेवी-गर्भेऽजितजिनेश्वरः ॥
वैजयन्त्यास्तु सञ्ज्ञे, चक्री **सगर**नामकः । अथ स्वकं स्वकं गर्भ-मूहतुर्मुदितानने ॥१५॥

१ BJP । भविष्यतो वराकारौ-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथातीतेषु मासेषु, नवस्वर्धाष्टमेषु च। दिनेषु विजयादेवी, जनयत्यजितं जिनम् ॥१६॥
उद्योतयन्तमङ्गोत्थ-प्रभाभिः सकला दिशः। कुर्वन्नानन्दसम्पूर्णं, जीवलोकं चराचरम् ॥१७॥
ततश्च दिक्कुमारीभिः, सर्वाभिः सर्वसम्पदा। सर्वं सर्वप्रयत्नेन, जन्मकर्म व्यधीयत ॥१८॥
ततो जन्माभिषेकश्च, चक्रे सानन्दमानसैः। देवेन्द्रैः श्रीजिनेन्द्रस्य, सुमेरौ सपरिच्छदैः ॥१९॥
ततः शक्रो जिनं नीत्वा, मुमोच विधिपूर्वकम्। मातुः समीपके पश्चा-ज्जगामानन्दितो दिवि ॥२०॥
राजापि सर्वसामग्र्या, समं सर्वैः स्वबन्धुभिः। सर्वद्धर्या सादरं चक्रे, वर्धापनकमुच्चकैः ॥२१॥
येनेह श्रीनराधीशो, जिने गर्भस्थिते सति। निःशेषनिजकारातीन्, प्रजयत्यजितानपि ॥२२॥
तेन चक्रे स्वपुत्रस्य, नाम द्वादशमे दिने। अजित इति व्याख्यातं, सन्महोत्सवपूर्वकम् ॥२३॥
अथासौ सुषुवे राज्ञी, वैजयन्त्यपि चक्रिणम्। कुर्वन्तं बन्धुवर्गस्य, परमानन्दमुच्चकैः ॥२४॥
राजा तथैव तस्यापि, चकारोत्सवपूर्वकम्। सगर इति सन्नाम, सानन्दो विश्वविश्रुतम् ॥२५॥
एवं तौ तत्र वर्धेते, सार्धं सर्वगुणश्रिया। कुमारावद्भुतोल्लासि-लावण्यश्रीविभूषितौ ॥२६॥
प्राप्तौ च क्रमतो लोक-लोचनानन्ददायकम्। यौवनं सर्वतो रम्यं, कामिनीजनमोहनम् ॥२७॥
ततो विशालवंशोत्थ-बालिकानां नराधिपः। ग्राहयामास तौ पाणिं, महद्धर्या शोभने दिने ॥२८॥
एवं च तौ प्रभुञ्जाते, कामभोगान्निरन्तरम्। प्रेयसीभिः समं ताभिः, पूर्णाशेषमनोरथौ ॥२९॥
अन्यदाऽऽलोक्य वृद्धत्वं, स्वस्यायातं क्रमान्नृपः। जितशत्रुः स्वराज्यस्य, योग्यत्वं च कुमारयोः॥
राज्ये निवेशयामास, स्वपुत्रमजिताभिधम्। सगरं युवराजत्वे, सुमित्रात्मजं मुदा ॥३१॥
अजितोऽपि जिनाधीशो, भुङ्क्ते राज्यवरश्रियम्। तीर्थप्रवर्तनाकाले, सञ्जाते क्रमशस्ततः ॥३२॥
संस्थाप्य सगरं राज्ये, दत्त्वा दानं किमिच्छितम्। देवैर्लोकान्तिकैः प्रोक्तो, यथा तीर्थं प्रवर्तय ॥३३॥

द्वात्रिंशद्भिः (चतुःषष्टि-) सुराधीशैः, कृते निष्क्रमणोत्सवे।
स बाह्याभ्यन्तरं ग्रन्थं, त्यक्त्वा दीक्षां प्रपन्नवान् ॥३४॥

तप्यमानस्तपस्तीव्रं, शुक्लध्यानकृशानुना। निर्दह्य घातिकर्माणि, प्रलेभे केवलश्रियम् ॥३५॥
ततश्च केवलज्ञान-प्रभाभिः प्रतिबोधयन्। भव्यपद्माकरानर्हन्, विजहार महीतले ॥३६॥
सगरोऽपि नराधीशो, वरविक्रमनयान्वितः। चक्ररत्ने समुत्पन्ने, साधयामास मेदिनीम् ॥३७॥
उत्पन्नानि च रत्नानि, शेषाण्यपि त्रयोदश। निधयश्च नवाप्यस्य, बभूवुर्वशवर्तिनः ॥३८॥
मदोन्मत्तगजेन्द्राणां, स्यन्दनानां च जज्ञिरे। चतुःसमन्विताऽशीति-लक्षाणि लक्ष्मधारिणाम् ॥३९॥
जाता अष्टादशोत्तुङ्ग-तुरङ्गाणां च कोटयः। षण्णवतिर्वरग्राम-कोटीनामभवन्निति ॥४०॥
चतुःषष्टिसहस्राणि, नवयौवनयोषिताम्। क्षिपन्तीनां स्वलावण्य-रूपलक्ष्माः सुराङ्गनाः ॥४१॥
इत्यादि सकले सिद्धे, षट्खण्डेऽपि महीतले। भुङ्क्ते स्म सगरो भोगान्, सुरखेचरनृपार्चितः॥४२॥
अथ षष्टिसहस्राणि, पुत्राणां जनयत्यसौ। सर्वलक्षणयुक्तानां, रूपलावण्यशालिनाम् ॥४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां ज्येष्ठो गुणैः श्रेष्ठो, जह्नुनामा कुमारकः । गीतद्यूतादिनिःशेष-कलाकौशलसंयुतः ॥४४॥
अन्यदा क्रीडता तेन, द्यूतेन विजितः पिता । ततस्तुष्टः सुतं ब्रूते, यथा वत्स ! वरं वृणु ॥४५॥
जह्नुः प्राह यथा तात, यदि तुष्टोऽसि मेऽधुना । तदत्र यदहं याचे, तद्देयं सर्वथा त्वया ॥४६॥
राजाऽवोचदहो वत्स !, मनोऽभीष्टं प्रयाच्यताम् । स प्राह सर्वरत्नानि, चक्रादीनि प्रयच्छ मे ॥४७॥
येनाहं भ्रातृभिः सार्धं, सर्वैः सर्वबलान्वितः । पूजयन् वन्दमानश्च, जैनबिम्बानि भक्तितः ॥४८॥
पश्यन्नानाविधान् देशान्, पुरग्रामादिसङ्कुलान् । बम्भ्रमीमि यथाकामं, षट्खण्डेऽपि महीतले ॥४९॥
ततस्तं प्राह राजेन्द्रः, प्रमोदभरनिर्भरः । एवं कुरु निजान् वत्स !, सम्पूरय मनोरथान् ॥५०॥
ततस्तातप्रसादेन, इत्युक्त्वा पितरं निजम् । प्रणम्य च ययौ जह्नुः, कुमाराणां समीपके ॥५१॥
तानुवाच यथा भो भो, वयं सर्वेऽपि संहताः । गृहीत्वा सर्वरत्नानि, पश्यामो मेदिनीतलम् ॥५२॥
तैरुक्तं युक्तमेवेदं, क्रियतामविलम्बितम् । ततः पितरमापृच्छ्य, बन्धुवर्गं च सादरम् ॥५३॥
कृत्वा च सर्वसामग्रीं, सर्वे पुर्या विनिर्ययुः । कुमाराः सहिता भूरि-सेनया चतुरङ्गया ॥५४॥
प्रवृत्ताश्च परिभ्रमितुं, कौतुकाकुलमानसाः । नदीनगपुरग्रामैः, सङ्कुलं मेदिनीतलम् ॥५५॥
भ्राम्यद्भिश्च महीपीठे, सर्वास्तै रक्षिताः प्रजाः । पालिताः शिष्टलोकाश्च, निर्जिताः सर्वशत्रवः ॥५६॥
पूजिताः पूजनीयाश्च, माननीयाश्च मानिताः । दृष्टानि सर्वतीर्थानि, सद्भक्त्या वन्दितानि च ॥५७॥
महद्धर्चा सर्वचैत्येषु, कृता यात्रामहोत्सवाः । वस्त्रपात्रादिभिः सर्वैः, सङ्घश्च प्रतिलम्भितः ॥५८॥
प्रदत्तं च महादानं, दीनादिभ्यो यथेप्सितम् । कृताश्च बहवो मित्र-बन्धवः स्वजना जनाः ॥५९॥
अर्थिनामर्थदानेन, पूरिताश्च मनोरथाः । एवं ते कुमराः सर्वे, भ्राम्यन्तः सर्वतो महीम् ॥६०॥
प्रपश्यन्तः पुरग्राम-विहारनगराकरान् । नानानगनदीकूप-वापीपद्मसरोवरान् ॥६१॥
खेटकर्बटमडम्बानि, नानावेलाकुलानि च । सम्प्राप्ताः सर्वतो रम्य-**मष्टापदम**हागिरिम् ॥६२॥
नानाविधद्रुमाकीर्णं, नानागोकुलसङ्कुलम् । क्वापि रिष्टकवैडूर्य-सन्मरकतशोभितम् ॥६३॥
क्वापीन्द्रनीलसन्दोह--रश्मिराजिविराजितम् । कुत्रापि पद्मरागादि, रक्तरत्नचयाञ्चितम् ॥६४॥
कुत्रापि चम्पकच्छाय-मणिमण्डलभासुरम् । कुत्रापि चन्द्रकान्ताङ्क-हीरकावलिनिर्मलम् ॥६५॥
कुत्रापि सुन्दरानेक-निर्झरारावसङ्कुलम् ।क्वापि स्वर्णमयानेक-शिलासीननभश्चरम् ॥६६॥
क्वापि पुष्पफलोपेत-वरारामममनोहरम् । क्वापि स्वच्छजलापूर्णैः, पद्मखण्डादिमण्डितैः ॥६७॥
नानारत्नमनोहारि-स्वर्णसोपानशोभितैः । क्रौञ्चसारसहंसादि-नानापक्षिसमाकुलैः ॥६८॥
नानाद्रुमादिभी रम्यैः, सरोभिरभिशोभितम् । रत्नरञ्जितसौवर्ण-भित्तिसोपानराजिभिः ॥६९॥
विस्तीर्णाभिरनेकाभि-र्वापीभिः समलङ्कृतम् । क्वापि सङ्गीतकासक्तै-र्विद्याधरकदम्बकैः ॥७०॥
समध्यासितसौवर्ण-सुविशालशिलातलम् । क्वापि स्वर्गागतायुक्तै-र्नानालङ्कारधारिभिः ॥७१॥
सुरूपैः सुरसन्दोहै-र्देहद्युतिप्रभासुरैः । विक्रीडद्भिर्यथाकामं, सप्रमोदमनेकधा ॥७२॥
स्वर्गखण्डमिवाभाति, हारिभिर्भूरिवस्तुभिः । इत्यादिसुमनोहारि-नानाऽऽश्चर्यसमाकुलम् ॥७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्यन्ति कुमराः शैलं, विस्मयोत्फुल्ललोचनाः । समारूढाः क्रमात्तस्य, गिरेः शृङ्गं मनोहरम् ॥७४॥
दृष्टवन्तश्च तत्रोच्चं, रम्यं जैनेन्द्रमन्दिरम् । चतुर्विंशतिजैनेन्द्र-बिम्बसन्दोहसुन्दरम् ॥७५॥
स्वर्णरत्नमयं दिव्यं, भरतेन विधापितम् । पद्मरागमयोदार-तारसोपानराजितम् ॥७६॥
श्वेतरत्नमयोत्तुङ्ग-वेदिकासमलङ्कृतम् । सूर्यकान्तमयोत्प्रेङ्ख-दुत्तुङ्गशिखरान्वितम् ॥७७॥
नानारत्नचयाकीर्ण-सौवर्णस्तम्भभित्तिकम् । सन्मरकतमाणिक्य-मण्डितोद्भटकुट्टिमम् ॥७८॥
चन्द्रकान्तमयोद्भास्व-त्तुङ्गप्राकारराजितम् । चारुचामीकरोदार-[1]निर्यूहकशतान्वितम् ॥७९॥
तस्मिंश्च पञ्चवर्णाभ-मणिखण्डाभिमण्डिताः । स्वर्णरत्नमयाः कान्ताः, शान्ताः शान्तिप्रदायिकाः ॥
चतुर्विंशतिजैनेन्द्र-प्रतिमाः सुमनोहराः । कारिता वर्णमानैश्च, युक्ताः सर्वैर्निजैस्तथा ॥८१॥

बाहुबले राज्ञश्च, चक्रिणो भरतस्य च ।
सुन्दर्याश्च तथा ब्राह्म्याः, स्वकभ्रातृशतस्य च ॥८२॥

कारिताः पर्युपासीनाः, प्रतिमास्तत्र सुन्दराः । मणिरत्नविराजिन्यः, कान्तकाञ्चननिर्मिताः ॥८३॥
चतुर्योजनविस्तीर्णे, योजनाष्टकमुच्छ्रिते । भरतेन गिरौ तत्र, कारितं जिनमन्दिरम् ॥८४॥
नानास्तम्भसमाकीर्णं, नानोत्तुङ्गसुतोरणम् । नानारूपकसङ्कीर्णं, नानाध्वजपटाकुलम् ॥८५॥
इत्यादिपरमाश्चर्य-कारिभिर्भूरिकौतुकैः । देवानां मानवानां च, नेत्रानन्दविधायकम् ॥८६॥
ततस्ते विस्मयापन्नाः, सानन्दाः सकुतूहलाः । मध्ये च कुमरास्तत्र प्रविष्टा जिनवेश्मनः ॥८७॥
दृष्टाश्च प्रतिमा रम्या-श्चतुर्विंशतिरर्हताम् । ऋषभादिमहावीर-पर्यन्तानां मनोहराः ॥८८॥
सद्गन्धपुष्पवस्त्राद्यैः, पूजिता भक्तियोगतः । संस्तुताश्च स्तुतिस्तोत्रैः, संवेगरसदायिभिः ॥८९॥
ततस्ते प्रश्नयामासु-र्विस्मिता मन्त्रिणो निजान् । यथेदं कारितं केन, जिनमन्दिरमीदृशम् ॥९०॥
सर्वरत्नमयं तुङ्गं, तुङ्गतोरणसंयुतम् । कस्येयं शाश्वती कीर्ति-श्चरत्यद्यापि निर्मला ॥९१॥
ततश्च मन्त्रिभिः प्रोक्तं, यथा भो भोः कुमारकाः । कथयामः श्रूयतां सम्य-ग्युष्माभिः सावधानकैः ॥
आसीदाद्यजिनेन्द्रस्य, ज्येष्ठः पुत्रो गुणालयः । अस्यामेव महापुर्यां, चक्रेशो भरताधिपः ॥९३॥
तेनेदं कारितं तुङ्गं, सुन्दरं जिनमन्दिरम् । सर्वरत्नमयानेक-बिम्बसन्दोहसङ्कुलम् ॥९४॥
श्रुत्वेदं जह्नुना प्रोक्त-मस्माकमिति भूरियम् । स्वायत्ताः सर्वरत्नानि, ते सर्वे निधयोऽपि हि ॥९५॥
तदेव चक्रवर्तित्वं, तथैवाज्ञाकराः सुराः । तस्मादन्विष्यतां तूर्ण-मष्टापदसमं गिरिम् ॥९६॥
येनाहमपि विस्फूर्ज-न्मणिरत्नविनिर्मितम् । कारयामि समुत्तुङ्ग-मीदृशं जिनमन्दिरम् ॥९७॥
आकर्ण्येदं ततो दिक्षु, सकलास्वपि मन्त्रिभिः । गिरेर्गवेषणार्थाय, प्रेषिताः पुरुषा निजाः ॥९८॥
ततस्तेऽपि गताः शीघ्रं, भ्रान्ताश्चाखिलभूतले । न चाष्टापदसङ्काशः, शैलः कोऽपि विलोकितः ॥९९॥
ततो जह्नुकुमाराय, तैरागत्य निवेदितम् । यथा नास्तीदृशः शैलो, यस्तुल्योऽष्टापदाद्रिणा ॥१००॥
ततो जह्नुर्वदत्येवं, तान् सर्वांश्च नराधिपान् । यद्यन्यो नास्त्यहो क्वापि, शैलोऽष्टापदसन्निभः ॥१०१॥

१ = द्वार J पार्श्वभागे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततोऽस्यैव गिरेः श्रीम-ज्जिनवेश्मयुतस्य भोः । रक्षां कुर्मः प्रयत्नेन, वयं सर्वेऽपि संहताः ॥१०२॥
यतः श्रेयस्करं लोके, दानात्तत्परिपालनम् । भविष्यन्ति च निर्धर्माः, प्रायः पापपरा नराः ॥१०३॥
तद्यावन्मर्त्यलोकोऽयं, यावच्चैष धराधरः । अस्माकमपि सत्कीर्ति-स्तावन्नूनं भविष्यति ॥१०४॥
इत्युक्त्वा नृपतीन् जह्नु-र्दण्डरत्नमुपाददे । अष्टापदस्य रक्षार्थं, सार्धं सर्वैः स्वबन्धुभिः ॥१०५॥
ततः खातुं समारब्धा, दण्डरत्नेन मेदिनीं । परितस्तस्य शैलस्य, त्वरितं खातिका कृता ॥१०६॥
दण्डरत्नं च तत्तीक्ष्णं, द्विधा कुर्वन्महीतलम् । योजनानां सहस्रं तु, पातालं विशति द्रुतम् ॥१०७॥
ज्वलनप्रभसञ्ज्ञस्य, नागराजस्य मेदिनीम् । सम्प्राप्तं भवनान्युच्चै-र्भनक्त्याशु समन्ततः ॥१०८॥
मह्यां विदार्यमाणायां, दण्डरत्नेन सत्वरम् । निपेतुर्लेष्टवस्तत्र, सपाषाणाः सपांशवः ॥१०९॥
सर्वतो नागवेश्मानि, समं पृथ्व्या चकम्पिरे । प्रससार समुद्योतो, भानुरश्मिसमुद्भवः ॥११०॥
अथ नागकुमारास्ते, दृष्ट्वाकस्मिकविड्वरम् । अत्यन्तादृष्टपूर्वं च, भीताः सम्भ्रान्तलोचनाः ॥१११॥
सङ्क्षुब्धाः कम्पमानाङ्गाः, नश्यन्ति स्म दिशोदिशि । किमेतदिति जल्पन्त्यः, सन्त्रस्ताश्च तदङ्गनाः ॥
त्यक्त्वा मानं भयोद्भ्रान्ता, आश्लिष्यन्ति निजान् पतीन् । रक्षत रक्षतेत्याशु, कुर्वन्त्यः करुणारवम् ॥
जज्ञिरे च समुल्लापाः, नागलोके समन्ततः । किं किं किमिदमित्येवं, तुमुलारवसङ्कुलाः ॥११४॥
अथालोक्य महारौद्र-मुपप्लवमुपस्थितम् । सम्भ्रान्तं नागलोकं च, नागेन्द्रो ज्वलनप्रभः ॥११५॥
सम्प्रयुक्तावधिर्ज्ञात्वा, कुमाराणां विचेष्टितम् । तूर्णं रोषभरापूर्णो, विनिष्क्रान्तो रसातलात् ॥११६॥
सम्प्राप्तः कुमराभ्यासे, साक्षेपं सोऽब्रवीदिदम् । यथा भो भोः ! किमारब्ध-मस्मल्लोकव्यथाकरम् ॥
युष्माभिर्दण्डरत्नेन, भिन्दानैर्मेदिनीतलम् । कृत्वा पूर्वस्थितेर्लोपं, किं लब्धं कथ्यतां मम ॥११८॥
अथवात्मवधायैव, जायते तुच्छताङ्गिनाम् । मानापूरितचित्तानां, बलं बलवतामपि ॥११९॥

यतः- **अप्पवहाए नियय, होइ बलं उत्तुणाण भुवणम्मि ।**
नियपक्खबलेणं चिय, पडइ पयंगो पईवम्मि ॥१२०॥
होइ विणीओ गरुओ, गुरुत्तणं संपयाए पढमंगं ।
अविणीओवि हु लहुओ, लहुत्तणं आवईए य ॥१२१॥
एसावि जये लच्छी, सोहइ मग्गट्ठियाण पुरिसाण ।
इयराणं पुण सिग्घं, नासइ आसयविणासेण ॥१२२॥
जे हुंति महापुरिसा, ते ठिइभंगं कुणंति न कयाइ ।
उवलद्धो किं केणइ, मग्गोतिन्नो रहो रविणो ॥१२३॥
ते हुंति सत्तवंता, ते संतो ते महायसा भुवणे ।
जे नेंति सिरिं सुपइट्ठिएण सप्पुरिसमग्गेण ॥१२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सगुणेहिं चिय पुरिसा, पयडा चूडामणीव विक्खाया ।
वुज्झंति सिरेण जए, सयलजणसलाहणिज्जा य ।।१२५।।
इयरे जं किंचि गुणं, लहिऊण समुच्छलंति तुच्छप्पा ।
दुब्बलपक्खपरिग्गह-गहिआ सलहव्व भुवणंमि ।।१२६।।
इय नियचरिएहिं चिय, पुरिसा नज्जन्ति कुलगुणसमेया ।
मज्जायक्कमणेण, जेण लहुइंति अप्पाणं ।।१२७।।

अन्यच्च विदिता यूयं, पुत्राः सगरचक्रिणः । तन्नेदं भवतां युक्तं, कर्तुं गोत्रकलङ्कनम् ।।१२८।।

यतः- **ते पुत्ता जे पिउणो, चित्तेण पहेण सइ पयट्टंति ।**
तेसिं गुणगहणेणं, पियावि सलहिज्जइ जयंमि ।।१२९।।
दुस्सीलेहिं सुएहिं, विलहइ वयणिज्जयं पिया सययं ।
किरणातवम्मि भुवणं, लोओ सूरस्स रूसेइ ।।१३०।।

तद्यावद्भज्यते नैव, चूला मामकवेश्मनः । तावद्विश्राम्यतां दण्ड-रत्नमेतत्समुद्यतम् ।।१३१।।

यतः- **कज्जं कुणंति नियय, उवरोहं नेय कस्सइ जणंति ।**
गुणवंतयाण कप्पो, भमराण व होइ कमलेसु।।१३२।।

श्रुत्वेदं जह्नुना प्रोचे, नास्माभिस्तव वेश्मनः । भङ्क्तुमार्थमियं चक्रे, परिखा परितो गिरेः ।।१३३।।
तदस्माकं न कोऽप्यत्र, दोषोऽस्ति भुजगाधिप ! । रक्षाष्टापदशैलस्या-स्माभिरेषा कृता यतः ।।१३४।।
तद्भो ! संहर संरम्भं, न कुर्मः पुनरीदृशम् । श्रुत्वेदं शान्तकोपाग्नि-र्गतोऽसौ निजकाश्रयम् ।।१३५।।
तस्मिन् गतेऽथ भूयोऽपि, ब्रूते जह्नुकुमारकः । कृतापि खातिका दुर्गा, नेयं भाति जलं विना।१३६।
तदहो क्रियतां तूर्ण-मेतस्या नीरपूरणम् । इत्युक्ते दण्डरत्नं तद्, गृहीतं राजसूनुभिः ।।१३७।।
गत्वा च संहतैः सर्वैर्दण्डरत्नेन भूतलम् । भिन्दानैर्हिमवच्छृङ्गा-न्निष्क्रान्ता निर्मलोर्मिका ।।१३८।।
नानाजलचराकीर्ण-नीरपूरप्रवाहिनी । समाकृष्टा महागङ्गा, परिखाभिमुखं जवात् ।।१३९।।
सा च रङ्गत्तरङ्गौघै-र्भुजगगतिगामिनी । वेगतः परिखामध्ये, समानीय प्रवेशिता ।।१४०।।
तस्या नीरमहापूरं, सम्पूर्य परिखां भृशम् । प्लावयामास नागेन्द्र-भवनानि रसातले ।।१४१।।
दृष्ट्वा विशज्जलं नागै-र्भणितो भुजगाधिपः । किमेष जृम्भते स्वामि-न्नपूर्वः सलिलप्लवः ।।१४२।।
यतः-दृश्यते नागिनीवृन्द-मुह्यमानं जलप्लवैः । प्लाव्यमानानि चाशेष-भवनानि समन्ततः ।।१४३।।
अथ प्रोवाच सावेशः, श्रुत्वेदं ज्वलनप्रभः । विद्यन्ते सगराख्यस्य, चक्रिणो दुष्टसूनवः ।।१४४।।
यैर्दण्डरत्नमादाय, भित्त्वा दूरं रसातलम् । गङ्गानदीजलप्लावैः, प्लावितानि गृहाणि नः ।।१४५।।
कृतमेव मया साम, तेषां दुर्नयकारिणाम् । नूनं दुष्टाशयत्वेन, तत्परिणतमन्यथा ।।१४६।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः- **माणुन्नयाणवि फुडं, सामं गरुयत्तणं पयासेइ ।**
दंडसहायं इहरा, नराण दीणत्तणं कुणइ ॥१४७॥
दो चेव नवर नीईओ, होंति पुरिसाण गुणमहग्घाण ।
सामं च [1]विणयपिसुणं, दंडो व्व पयावत्थारो ॥१४८॥

एभिस्तावत्समालोकि, सामनीतिर्मदीयका । सम्प्रत्यदृष्टपूर्वां च, दण्डनीतिं प्रदर्शये ॥१४९॥
एवं सञ्चिन्त्य नागेन्द्रो, रुषारुणितलोचनः, । आदिदेश महाघोरान्, दृष्टिविषमहोरगान् ॥१५०॥
यथातित्वरितं गत्वा, तान् सगरसुतानहो । विनाशयत निःशेषान्, दूरं दुर्नयकारिणः ॥१५१॥
ततस्तैर्विषपूर्णाक्षै-र्विनिर्गत्य रसातलात् । नीताः सर्वे क्षणादेव, भस्मपुञ्जावशेषताम् ॥१५२॥
एवं च भस्मपुञ्जेषु, जातेषु नृपसूनुषु । जातो हाहारवो घोरः, क्षुब्धं तद्राजसैन्यकम् ॥१५३॥
किङ्कर्तव्यतया मूढाः, प्रलपन्ति स्म भूभृतः । यथा भोः ! कुत्र गच्छामः, कस्य वा कथयामहे॥
युध्यामहे समं केन, सर्वथाऽदृष्टवैरिणा । कथं वा दर्शयिष्यामो, मुखं सगरभूपतेः ? ॥१५५॥
यावदेवं च तत्सैन्यं, निस्त्राणं शोकविह्वलम् । नानाविधकृताक्रन्दं, जातं संमूढमानसम् ॥१५६॥
तावद् ज्ञात्वा स्वभर्तृणां, मृत्युमाकस्मिकं क्षणात् । प्रवृत्तं रोदितुं प्रोच्चै-रन्तःपुरं महारवैः ॥१५७॥
हा हा कृतान्त ! निस्त्रिंश !, निर्विवेकातिनिर्दय ! । संहृत्य मामकान् भर्तॄन्, लब्धं मूढ ! किमु त्वया ? ॥
हा धातरेककाले किं, सर्वनाशस्त्वया कृतः ? । किं वेदमिन्द्रजालं वा, किं वास्मन्मतिविभ्रमः ? ॥
किं वापि सत्यमेवेदं, सञ्जातं श्रूयते यथा ? । किमेकदैव वैधव्य-मस्माकमिदमागतम् ? ॥१६०॥
तदहो ! किं वयं कुर्मः ? क्व यामः कं श्रयामहे ? । कस्येदं वा समाख्यामः ?, किं कृतं सुकृतं भवेत् ? ॥
इत्यादि प्रलपन्तीभि-रन्तःपुरीभिरुच्चकैः । ताडयन्तीभिरत्यर्थं, कराघातैरुरोऽभितः ॥१६२॥
त्रोटयन्तीभिरुद्दाम-मुक्ताहारान् कचांस्तथा । वस्त्राणि पाटयन्तीभि- र्लुठन्तीभिर्महीतले ॥१६३॥
मुञ्चन्तीभिर्मुखाल्लोल-लालाजालानि भूरिशः । सिञ्चन्तीभिः कदम्बाभै-रश्रुपातैरुरःस्थलम् ॥१६४॥
कुर्वन्तीभिर्महाक्रन्दान्, भूरिशो रुदितं तथा । यथा भोः श्वापदान्युच्चै, रोदितानि वनान्तरे ॥१६५॥
एवं च करुणारावै-रन्तःपुरं रुदद् भृशम् । सैन्यं च दुःखितं सर्वं, सन्धीर्यतेऽथ मन्त्रिभिः ॥१६६॥

एवं प्रभाषमाणैश्च, यथा भो भो नराधिपाः ! ।
भो भोः स्वस्वामिनो भक्ता !, योधाः ! सेनाधिपाः ! जनाः ! ॥१६७॥
कुमाराणां कृते भद्राः, किमर्थमिह रुद्यते । यतस्तैः सर्वमेवोच्चैः, कर्तव्यं कृतमञ्जसा ॥१६८॥
जैनेन्द्रवेश्मयुक्तस्य, कृताष्टापदभूभृतः । रक्षा स्वजीवितेनैवं, कुर्वद्भिः खातिंकामिमाम् ॥१६९॥
अस्माभिर्भोः पुनस्तेषां, विश्वोपकृतिकारिणाम् । नैवेहोपकृतं किञ्चि-द्वह्निप्रदानतोऽपि हि ॥१७०॥
तस्मात्प्रदीयतां भो भोः, शीघ्रमेव प्रयाणकम् । प्रदत्तं च क्षणादेव, प्राप्ताश्च निजकां पुरीम् ॥१७१॥

---

१ विणेय-B मु. । विण्णेयं- J ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सचिवसामन्तै-र्मिलित्वैकत्र मन्त्रितम् । अहो सर्वकुमाराणां, जातं मरणमेकदा ॥१७२॥
कथं नाम नरेन्द्राय, दुःश्रव्यं कथयामहे ? । सर्वथैव दुराख्येयं, दुर्घटं किमु कुर्महे ? ॥१७३॥

यतः- **अच्छउ ता नियपहुणो, परेण वावायणं समक्खं जं ।**
कीरइ अन्नेसिं पियमरणं न सहंति तं धीरा ॥१७४॥
एवं निवेयणं पुण, पहुणो वावायणस्स न हु जुत्तं ।
हुंति चिय संसारे, कज्जाइं एत्थ कुडिलाइं ॥१७५॥
तं किंपि पडइ कज्जं, पुव्वज्जियदुट्ठदेव्वजोएण ।
मरणेवि जेण गरहा, जीयं पुण पावपरिणामो ॥१७६॥

तदहो शक्यते नैव, सञ्चिन्तयितुमप्यदः । किं पुनर्भूपतेः साक्षा-त्समाख्यातुं स्फुटाक्षरैः ॥१७७॥
किन्त्वस्माकमपि श्रेयो, वह्नौ ज्वालासमाकुले । पतङ्गमरणं कर्तु-मेव दुःखप्रणाशकम् ॥१७८॥
न पुनः सर्वथा सर्व-पुत्रमृत्युनिवेदनम् । अथवा भाव्यमस्माक-मकीर्त्या स्फुटमेतया ॥१७९॥
इत्थं मन्त्रयतामेव, तत्र सामन्तमन्त्रिणाम् । अत्यन्ताकुलचित्ताना-मेको विप्रः समागतः ॥१८०॥
उक्ताश्च मन्त्रिणस्तेन, किमेवं भोः समाकुलाः । विषादमिह मुञ्चध्वं, गृह्णीध्वं च सुधीरताम् ॥१८१॥
त्यज्यतां शोकसम्भारो, भाव्यतां च भवस्थितिः । संसारवर्तिजीवानां, कियन्मात्रमिदं यतः ॥१८२॥
एतदपि च नात्यन्त-माश्चर्यं प्रतिभासते । यत्तु षष्टिसहस्राणि, पञ्चतामेकदा ययुः ॥१८३॥

यतः- **कालम्मि अणाईए, जीवाणं विविहकम्मवसगाणं ।**
तं नत्थि संविहाणं, संसारे जं न संभवइ ॥१८४॥

इत्युक्त्वा ब्राह्मणस्तूर्णं, मन्त्रिवर्गसकाशतः । अनाथमृतकं लात्वा, प्राप भूपस्य मन्दिरम् ॥१८५॥
कुर्वाणः करुणारावान्, बृहच्छब्दैर्दुतं द्रुतम् । मुष्टो मुष्टोऽहमित्युच्चै-स्तव राज्येऽपि भूपते !॥१८६॥
आकर्ण्येदं ततो राज्ञा, शीघ्रमाकारितो द्विजः । उक्तश्चैवं यथा केन, मुष्टोऽसि मम कथ्यताम् ॥१८७॥
द्विजः प्राह यथा राजन् !, मुष्टोऽहं हतवेधसा । पुत्रो मे एक एवायं, दष्टो दुष्टमहाहिना ॥१८८॥
निश्चेष्टो भूप ! सञ्जातः, सर्वथा नष्टचेतनः । तदमुं मामकं पुत्रं, जीवापय महीपते ! ॥१८९॥
अत्रान्तरे समायाता-स्तेऽपि सामन्तमन्त्रिणः । आस्थाने राजराजस्य, शोकाकुलितचेतसः ॥१९०॥
कृत्वा विमनसो राज्ञः, प्रणामं नम्रमौलयः । उपविष्टाश्च ते सर्वे, सस्नेहं दापितासनाः ॥१९१॥
अथादिष्टो महावैद्यः, श्रीमत्सगरचक्रिणा । यथा द्विजस्य पुत्रोऽयं, निर्विषः क्रियतामिति ॥१९२॥
ततः प्रभाषते वैद्यो, विज्ञातसुतमृत्युकः । राजेन्द्र ! यदि यत्रेह, गृहे गोत्रे कुलेऽपि वा ॥१९३॥
न मृतो जन्म सम्प्राप्य, कोऽपि क्वापि कदाचन । तस्मादेहात्समानीत-मात्रेण भस्मना नृप ! ॥१९४॥
सर्वथा निर्विषं कृत्वा, जीवापये द्विजाङ्गजम् । अथ प्राह नृपं मन्त्री, सर्वनीतिविशारदः ॥१९५॥
किमस्ति देव ! संसारी, जीवः कोऽपि जगत्त्रये । सञ्जाते यस्य नैवेहा-नन्तशो मृत्युजन्मनी ॥१९६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृत्यौ स्वर्वधू(तद्वधू)लोकस्य, भवं निन्दन्ति मानवाः ।
कियच्चिरं च शोचित्वा, स्वामिकार्याणि कुर्वते ॥१९७॥

किं कोऽपीह त्वया दृष्टः, श्रुतो वापि बहुश्रुतात् । यस्य नो मृत्युजन्मानि, बभूवुर्भवसागरे ? ॥१९८॥
अत एवंविधे घोरे प्रकृत्या निर्गुणे भवे । किं जायते गुणः कोऽपि, शोचितैर्बहुधापि हि ॥१९९॥
श्रुत्वेदं स द्विजः प्राह, यद्येवं मनुजाधिप ! । तथापि मामकं पुत्रं, जीवापयस्व सर्वथा ॥२००॥

अपि च- **जेऊण हयकयंतं, मज्झ सुयं देव देसु ! सयराहं ।**
तुह पोरुसं महाजस !, जेणामलिणं पवित्थरइ ॥२०१॥
कज्जं विणावि भुवणे, अब्भुद्धरणं करेंति जे धीरा ।
ते वंदणिज्जचरिया, वरपहु ! तुम्हारिसा विरला ॥२०२॥
दीणाण समुद्धरणं, भयम्मि रक्खा, गुरूण तह विणओ ।
दप्पुद्धराण समणं, दाणं दालिद्दतवियाणं ॥२०३॥
सव्वस्स पियं वयणं, बंधुसिणेहो कयन्नुया सव्वं ।
सप्पुरिसाण महायस-सययं चिय होइ किं भणिमो ॥२०४॥

ततः प्राह नराधीशः, परित्रातुं क ईश्वरः ? । सततं प्राणिसन्दोहं, मृत्योः संहरतः सतः ॥२०५॥

यत उक्तं- **सो नत्थि चिय भुवणेवि, कोइ जो खलइ तस्स माहप्पं ।**
सच्छंदचारिणो सव्व-वेरिणो हयकयंतस्स ॥२०६॥
सीयंति सव्वसत्थाइं, तत्थ न पहवंति मंतिणो मंता ।
अदिट्ठपहरपहरं-तयम्मि तम्मि किं पोरुसं कुणइ ॥२०७॥
न बलेण तस्स केणइ, पडियारो नेय तंतजुत्तिए ।
आसेहिं रहवरेहिं च, अत्थो निरत्थओ तत्थ ॥२०८॥
इय अप्पडियारे हय-विहिंमि संसारवत्तिणो जीवा ।
वट्टंति तस्स आणाए, एत्थ को कीरउ उवाओ ॥२०९॥

किञ्च- **जइ तस्स चेव एक्कस्स, होज्ज संसारगोयरगयस्स ।**
मरणं न उणो अन्नस्स, जंतुणो हयकयंताओ ॥२१०॥
ता जुज्जइ रोयणपिट्ट-णाइयं काउमस्स लोगस्स ।
एक्कस्स जओ मह परि-भवोत्ति सयलम्मि जियलोए ॥२११॥
अह पुण ससुरनरासुर-विज्जाहरकिंनरेंदपमुहाणं ।
सामन्नं चिय मरणं, ता इमिणा किं पलत्तेण ॥२१२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च-सन्ति षष्टिसहस्राणि, ममापि जितविद्विषाम्। पुत्राणां रूपलावण्य-नवयौवनशालिनाम्॥२१३॥
तेषामपि कृतान्तेन, त्रैलोक्यस्यापि वैरिणा। सततं ग्रस्यमानानां, त्राणं कः कर्तुमीश्वरः॥२१४॥
तस्माच्छोकं विमुञ्चस्व, मा मा रोदीर्द्विजोत्तम!। चिन्तयस्व स्वकार्याणि, सर्वथात्महितं कुरु।२१५।
यावत्त्वमपि नाद्यापि, ग्रस्यसे हतमृत्युना। यतोऽयं सर्वजीवानां, वर्तते निकटे सदा॥२१६॥
वैद्येन याचितं यच्च, भस्माऽमृत्युकुलोद्भवम्। सम्प्राप्तिस्तस्य नैवेह, विद्यते त्रिजगत्यपि॥२१७॥
किञ्चास्मदीयवंशेऽपि, सङ्ख्यातीता नराधिपाः। ग्रासीकृताः कृतान्तेन, का वार्ता शेषजन्तुषु॥२१८॥

यतः- **सव्वेवि हु नेरईया, तिरिया नरखयरसुरवरगणा य।**
मरणं पावेंति जए, नियमं चिय नत्थि संदेहो॥२१९॥
जम्माउ होइ मरणं, नियमं मरणाउ तह य उप्पत्ती।
संसारे नत्थि थिरो, जाव न मोक्खं न उ (सयं) पत्तो॥२२०॥

तथा- **सव्वस्सवि एस गई, होही कालेण जीवलोयम्मि।**
नियकम्मज्जियवसगस्स, जंतुणो किं व रुन्नेण॥२२१॥
सव्वस्स होइ समभूवि-ओ य करणम्मि पच्चलो धणियं।
संजोयं न उण कुणइ, पाणिणं पावपरिणामो॥२२२॥
दुक्खं अवणेइ फुडं, राया जो तस्स गोयरे पडइ।
एयस्स ण देवेहिं वि, न तीरए नियमवणेउं॥२२३॥

इत्यादि बहुधा भूपं, जल्पन्तं प्राह स द्विजः। किमहो सत्यमेवेदं, यद्भवताभिधीयते॥२२४॥
ज्ञात्वा सत्यमिदं सर्वं, संसारस्य विजृम्भितम्। मा कृथास्तत्र भोः शोकं, यदहं कथयामि ते॥२२५॥
श्रद्धातुं वा कथं शक्यं, कथ्यमानमिदं मया। यद्वा तन्नास्ति संसारे, सम्भवति यदत्र नो॥२२६॥
हस्त्यश्वरथसामन्त-योधैः, परिवृता अपि। सर्वे ते तावकाः पुत्रा, युगपत्पञ्चतां गताः॥२२७॥
सर्वे दग्धाः फणीन्द्रेण, विषसम्पूर्णचक्षुषा। तद् ज्ञात्वाऽनित्यतामेनाम्, शोकः कार्यस्त्वयापि नो।२२८।
श्रुत्वेदं मनुजेन्द्रोऽपि, वज्राहत इव द्रुमः। मूर्च्छया नष्टसच्चेष्टः, पपाताशु महीतले॥२२९॥
ततोऽपि गतमूर्च्छश्च, क्षणात् सम्प्राप्तचेतनः। प्राकृतनरवत्प्रोच्चै-राक्रन्दमुखराननः॥२३०॥
भूरिहाहारवैर्घोरै-र्व्याप्ताखिलदिगन्तरः। एवं सान्तःपुरो राजा, प्रवृत्तो रोदितुं भृशम्॥२३१॥

हा हा हतविधे! पाप!, महापापविधायक!।
अकर्तव्यं त्वयाकारि, यदहारि(र्षीः) ममाङ्गजाः(जान्)॥२३२॥

अकर्तव्यतरं त्वेत-द्यन्नैकोऽपि ममाङ्गजः। तेभ्यो मुक्तस्त्वया क्रूर!, किमु त्वं मम वैरिकः?।२३३।
एकस्मिन्नपि भोः पाप!, मत्पुत्रे पन्नगाधिप!। किं त्वया निरनुक्रोश!, निर्लज्ज! न कृता कृपा?।२३४।
कथं ते मारयामीति, चिन्तितं निजमानसे। चिन्तयित्वा कथं वाचा, घातयामीति जल्पितम्॥२३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जल्पितं च कथं व्यूढौ, करौ ते तेषु घातने । कथं त्वयेदृशं कर्म, कृतं! निर्घृण! निर्घृणम् ॥२३६॥
अहो कथमकाण्डेऽपि, यमराजेन चेष्टितम् । यदेकदैव मे पुत्रा, नीताः सर्वेऽपि पञ्चताम् ॥२३७॥
किं विदधाम्यहं तत्र, शूरो वीरोऽपि बुद्धिमान् । अत्यन्तादृश्यमानेऽत्र, विधौ दुष्टविचेष्टिते ॥२३८॥
इत्यादि विविधं राजा, प्रलपन् भूरिनिःस्वनैः । उक्तस्तेन द्विजेनैवं, राजेन्द्र ! कुरु धीरताम् ॥२३९॥
विमुञ्चैनं महाशोकं, धर्महानिकरं दृढम् । सम्भाषय निजं लोकं, कुरु धर्मपरं मनः ॥२४०॥
कुत्र ते तद्वरं ज्ञानं ?, कुत्र ते सा विवेकिता ? । कुत्रोपदेशदातृत्वं ?, क्व वा सा तव धीरता ? ।२४१।

अपि च- **परवसणम्मि सुहेणं, संसाराणिच्छियं कहइ लोए ।**
नियबंधुयणविणासे, सव्वस्स चलंति बुद्धीओ ॥२४२॥
तुम्हारिसावि पुरिसा, जइवि छलिज्जंति दइवसोएण ।
ता कत्थ थिरं होही, धीरत्तमनिंदियं भुवणे ॥२४३॥
वसणम्मि ऊसव्वम्मि य, एगसहावा हवंति सप्पुरिसा ।
जारिसओ चिय उदए, अत्थमणे तारिसो सूरो ॥२४४॥

यथा- **उदये सविता रक्तो, रक्तोऽस्तसमये तथा ।**
सम्पत्तौ च विपत्तौ च, महतामेकरूपता ॥२४५॥
सप्पुरिसचिय वसणं, सहंति गरुयंपि निग्गयपयावा ।
धरणिचिय सहइ जए, वज्जनिवायं न उण तंतू ॥२४६॥
होइ गरूयाण वसणं, न उणो इयराण सुप्पसिद्धमिणं ।
ससि-सूर चिय घेप्पंति, राहुणा न उण ताराओ ॥२४७॥
सप्पुरिसे चिय निवडंति, आवया न उण पयइपुरिसम्मि ।
लक्खिज्जइ मलिणं सस-हरम्मि न उणो विडप्पम्मि ॥२४८॥
कुणइ वियारं कालो, विवेयपुरिसाण गुणमहग्घाणं ।
सिसिरत्तणं न सिसिरो,विकुणइ जलणस्स पहवंतो ॥२४९॥
वसणम्मि समावडिए, पयइं न हु कहवि सुपुरिसो [1]मुयइ ।
राहुमुहगहियमुक्को-वि तवइ सूरो धरापीठं ॥२५०॥

इति विज्ञाय राजेन्द्र !, विरसं भवचेष्टितम् । विमुच्य सर्वथा शोकं, धीरवीरत्वमाश्रय ॥२५१॥
युष्मादृशां नृपाशेष-भवासारत्ववेदिनाम् । शिक्षणं कः क्षमः कर्तुं, मुक्त्वान्यः स्वविवेकिताम् ।२५२।
इत्युक्त्वाथ नृपं तेन, प्रोक्ताः सामन्तमन्त्रिणः । यथा भो! कथ्यतां सर्वं, यथावृत्तं महीभुजे ॥२५३॥
तैरपि मूलतः सर्वं, खातिकाखननादिकम् । कुमारकविनाशान्तं, समाख्यातं सविस्तरम् ॥२५४॥

---

१ चयइ- इति 'मणोरमाकहा' ग्रन्थे पृ. २११ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरे च सम्प्राप्तु-र्लोका आसन्नवासिनः । अष्टापदस्य शैलस्य, प्रणम्योचुर्नरेश्वरम् ॥२५५॥
अष्टापदमहाशैले, याऽऽनीता च तवाङ्गजैः । महागङ्गा तया भृत्वा, खातिकां भूरिवारिभिः ॥२५६॥
प्रत्यासन्नाः पुरग्राम-गोकुलनगराकराः । कदर्थ्यन्ते पयःपूरैः, सर्वतोऽपि विसर्पिभिः ॥२५७॥
तन्नाथ वार्यातां गङ्गा-नीरपूरः सुदुर्धरः । आकर्ण्येदं ततो भूपो, भागीरथ्यभिधं सुतम् ॥२५८॥
आहूय प्रवदत्येवं, यथा त्वं वत्स! सादरम् । नागराजं समाराध्य, सर्वैराराधनाक्रमैः ॥२५९॥
दण्डरत्नं समादाय, गङ्गां प्रापय सागरे । ततो भागीरथिर्गत्वाऽष्टापदे मन्त्रिभिः समम् ॥२६०॥
ततश्चाष्टमभक्तेन, तेनाराधि फणिप्रभुः । ततः सोऽपि विनिर्गत्य, क्षणादेव रसातलात् ॥२६१॥
समायातः स्फुरत्स्फार-नानाभुजगभूषणः । एवं भागीरथिं प्राह, वत्स ब्रूहि प्रयोजनम् ॥२६२॥
तेनापि च स विज्ञप्तः, कृत्वा मूर्ध्नि कराञ्जलिम् । नागेन्द्र! त्वदनुज्ञातो, गङ्गां सिन्धौ नयाम्यहम् ।२६३।
फणीन्द्रेणापि स प्रोचे, सस्नेहं तुष्टचेतसा । यथा वत्स! निराशङ्को, विधेहि स्वसमीहितम् ॥२६४॥
ततो भागीरथिस्तूर्णं, कृत्वा सामग्रिकां क्षणात् । दण्डरत्नेन भिन्दानः, समुद्राभिमुखां महीम् ॥२६५॥
नानाविधपुरग्राम-नानाकारमहीभृताम् । नानाजनपदानां च, मध्येनात्यन्तवेगतः ॥२६६॥
नानाजलचराकीर्ण-जलकल्लोलसङ्कुलाम् । निनाय नीतिमानेवं, तदा गङ्गां महोदधौ ॥२६७॥
आनीता जन्हुना येन, हिमाद्रेर्जाह्नवी ततः । यद्भागीरथिना नीता, भागीरथ्यपि तेन सा ॥२६८॥
भागीरथिस्ततस्तुष्टः, समं सामन्तमन्त्रिभिः । पितुराज्ञां विधायाशु, समायातो निजां पुरीम् ॥२६९॥
जनकतनुजमृत्यौ चक्रतुः शोकमुच्चै-र्भरतसगरचक्रस्वामिनौ भूरिशब्दैः ।
तदपि च न हि ताभ्यां सद्गुणः कोऽपि लेभे, परमजनि नितान्तं धर्मकामार्थहानिः ॥२७०॥
इति सुकृतरिपुत्वं सुष्ठुशोकस्य मत्वा, त्यजत सकलशोकम् सर्वथा बन्धुनाशे ।
श्रयत च जिनधर्मं श्रेयसामेकपात्रं, भवजलनिधिमज्जद्देहिनां यानपात्रम् ॥२७१॥

इति **सगरचक्रवर्तिकथानकं** समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कषायाधिकारः ८

उक्तः शोकाधिकारः सप्तमः अथ कषायाधिकारोऽष्टम उच्यते, अस्य चायमभिसम्बन्धः पूर्वत्र शोकवतां शोकापनोदः कृतः, शोकश्च कषायवतामेव सम्भवति, तदत्र कषायस्वरूपमुच्यत इति, तत्र श्लोकानां सप्तविंशतिरियं–

शोकेन चाभिभूयन्ते, कषायवशवर्तिनः ।
अतः फलं कषायाणां, तन्यमानं निशम्यताम् ॥१७३॥
वनवह्निर्यथा दीप्तो, भस्मसात्कुरुते वनम् ।
क्रोधानलस्तथा दीप्तो, [1]दहत्येव तपोवनम् ॥१७४॥
यस्मादुत्तिष्ठते वह्नि-र्दहत्येव तदाश्रयम् ।
क्रोधोऽपि क्रोधिनं पूर्वं, दहत्येव न संशयः ॥१७५॥
जितरोषरयाः सन्तो, नीचाः कोपेन निर्जिताः ।
जितेन ये जितास्तेषां, तैः समं का विरोधिता? ॥१७६॥
अपकारिणि कोपश्चे-त्कोपे कोपो विधीयताम् ।
मित्रद्रुहि कृतोद्वेगे, चित्तसन्तापकारिणि ॥१७७॥
सर्वकार्याणि सिद्ध्यन्ति, अर्थसाराणि तस्य नुः ।
सुरङ्गधूलिवत्कोपो यस्य न प्रकटो भवेत् ॥१७८॥
बुद्ध्या कार्याणि साध्यन्ते, सा तु क्रुद्धस्य नश्यति ।
तस्मात्क्षमा क्षमैवोच्चैः, सर्वकार्यप्रसाधिका ॥१७९॥
न नमस्यति देवेभ्यो, वरिवस्यति नो गुरुन् ।
अहङ्कारग्रहग्रस्तः पितॄनपि न मन्यते ॥१८०॥
अहं दाता अहं भोक्ता, रूपवान् धनवानहम् ।
एवं सर्वगुणाधारं, स्वमानी मन्यते स्वयम् ॥१८१॥
अमानमानमारुढ-स्तृणतुल्यं मन्यते जगत् ।
मेरोरप्यधिकं मूढः, पश्यत्यात्मानमात्मना ॥१८२॥
अहो मानस्य दौरात्म्यं, येन प्राप्तो न केवलम् ।
सुनन्दानन्दनः साधु-र्यावन्मानं न मुक्तवान् ॥१८३॥

---

१ टीकानुसारी अयं पाठः । भस्मसात्कुरुते वनं- BJVCP । भस्मसात्कुरुते नरं-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अद्विजिह्वाः फणभृतो, बहिःश्लक्ष्णा भयङ्कराः ।
अन्तर्विषभृतो दूरं, वर्जनीयाः शठा जनाः ॥१८४॥
शठानि यस्य मित्राणि, शठा यस्य गृहे स्त्रियः ।
उन्नतिस्तस्य दूरस्था, जीवितव्येऽपि संशयः ॥१८५॥
येषां योगत्रयस्यापि, संवादो नैव दृश्यते ।
तेषां शठात्मनां कार्ये, संवादः केन मृग्यते ॥१८६॥
यदि मायाहतो धर्मो, हतं सत्यं शठात्मनः ।
सर्वाविश्वासहेतुश्च, मायावी जायते नरः ॥१८७॥
निर्दोषोऽपि च मायावी, जनसन्त्रासकारणम् ।
अथवाऽहेर्मृतस्यापि, किं न बिभ्यति देहिनः ? ॥१८८॥
ततो माया परित्याज्या, सर्वथा धार्मिकैर्जनैः ।
ततो धर्मस्ततः सत्यं, ततः सर्वेऽपि सद्गुणाः ॥१८९॥
नदीनाथं तरन्त्येके, विशन्त्यन्ये रसातलम् ।
खनन्त्येके खनिं लोका, लोभः सर्वत्र कारणम् ॥१९०॥
रङ्गभूमौ च वंशाग्रे, कृतनानाविडम्बना ।
नृत्यन्ति यन्नराः केचि-ल्लोभस्तत्रापि कारणम् ॥१९१॥
यत्सेवां कुर्वते केचि-त्खड्गव्यग्रकरा नराः ।
जीव नन्देन्ति जल्पन्तो, हेतुस्तत्रापि नापरः ॥१९२॥
वञ्चयति पिता पुत्रं, पुत्रोऽपि पितरं निजम् ।
यत्रलोभो न तत्रान्यो, धिग्धिग्लोभमहो जनाः ॥१९३॥
[1]स ज्ञानलाभकालेऽपि, लोभः कष्टात्प्रलीयते ।
शेषेष्वपि कषायेषु, तिलतैलमिव स्थितः ॥१९४॥
त्रैलोक्यगतजीवानां, चित्ते चित्ते व्यवस्थितः ।
एकधा बहुधा लोभो, दृश्यते जलचन्द्रवत् ॥१९५॥
अहो! लोभस्य साम्राज्यं, यदधीनोऽखिलो जनः ।
तत्र तत्र प्रयात्येव, यत्र कुत्रापि नीयते ॥१९६॥
यदटन्ति महीमेके, समारोहन्ति रोहणम् ।
तृषार्ताः क्षुधिता दीना, लोभस्तत्रापि जृम्भते ॥१९७॥

१ टीकानुसारी अयं पाठः । केवलज्ञानलाभे (काले-मु.) ऽपि लोभः कष्टेन वेद्यते-BJPमु. । वेद्यते=प्रलयं नीयते J पार्श्वे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ये नराः क्रोधसन्दग्धा, ये नरा मानविह्वलाः ।
ये च मायामयाः केचि-द्ये च लोभवशं गताः ॥१९८॥
तेषामिहैव दुःखानि परलोकेऽधमा गतिः ।
दृष्टान्तोऽत्र कषायार्त्तं रुद्रदेवकुटुम्बकम् ॥१९९॥

- इति श्लोकानां सप्तविंशतिः प्रायः सुगमैव, तथापि शिष्यहितार्थं किञ्चिद्विव्रियते-**शोकेन** मनः सन्तापेनाभिभूयन्त बाध्यन्ते **कषायवशवर्तिनः** क्रोधादिकषायवशगाः अतःकारणात्**फलं** विपाकं **कषायाणां** कथ्यमानं निशम्यतामिति सुगमम् ॥१७३॥

वनवह्नि र्दावानलो यथा येन प्रकारेण **दीप्तो** ज्वलितो **भस्मसात्कुरुते वनं** दहतीत्यर्थः **क्रोधानलः** कोपवह्निस्**तथा** तेन प्रकारेण **दीप्तः** प्रज्वलितो **दहत्येव तपोवनं** तप एव वनमरण्यं तद्दहतीत्यर्थः ॥१७४॥

वह्निकोपयोः साम्यं दर्शयन्नाह यस्मात्स्**थानादुत्तिष्ठते** प्रभवति **वह्निरग्निर्दहत्येव तमाश्रयं** निजस्थानं, **क्रोधोऽपि** कोपोऽपि **क्रोधिनं** क्रोधवन्तं **पूर्वं** प्रथमं **दहति** भस्मसात्करोति, **नात्र संशयः**, स्वाश्रयादपरत्र बलवदादौ सन्देहः ॥१७५॥

न सन्तः कोपेन बाध्यन्ते किन्तु नीचा एवेति दर्शयन्नाह-**जितरोषरया** निर्जितक्रोधवेगाः **सन्तः** सत्पुरुषा भवन्तीति गम्यते **नीचा** जघन्या कोपेन निर्जिताः अतो **विजितेन** सत्पुरुषजितेन कोपेन **ये जिता** ये निर्जितास्तेषां जघन्यानां **तैः** सद्भिः **समं** सार्धं **का विरोधिता** ? का प्रतिस्पर्धा ? न काचिदित्यर्थः ॥१७६॥

किञ्च-**अपकारिणि कोपश्चेत्कोपे कोपो विधीयतां** किंविशिष्टे कोपे ? **मित्रद्रुहि** सुहृल्लोकघातके,, **कृतोद्वेगे** विहितसन्त्रासे **चित्तसन्तापकारिणि** ॥१७७॥

इह विदुषा तावत्तथा यतितव्यं यथा क्रोध उदयमेव नागच्छति, ये तूदितमपि क्रोधं निरुन्धन्ति तेषामर्थसिद्धिं दर्शयन्नाह-**सर्वकार्याणि** सर्वकर्तव्यानि **सिद्ध्यन्ति** निष्पद्यन्ते **अर्थसाराणि** प्रयोजनप्रधानानि तस्य क्रोधनिरोधकस्य **नुर्नरस्य सुरज्ञा-धूलिवत्प्रच्छन्नदरिरेणुरिव कोपो यस्य न प्रकटो भवेत्** न प्रकाशीस्यादिति ॥१७८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यच्च-**बुद्धचा** प्रज्ञया **कार्याणि** प्रयोजनानि **साध्यन्ते** विधीयन्ते, **सा तु सा** पुनर्बुद्धिः **क्रुद्धस्य** कोपवतो **नश्यत्यपयाति** तस्मात्कारणात्**क्षमा** समर्था **क्षमैव** क्षान्तिरेव **सर्वकार्यप्रसाधिका** समस्तप्रयोजनविधायिकेत्यर्थः ॥१७९॥

दर्शितः कोपविपाकः, अथ मानविपाकं दर्शयन्नाह-**न नमस्यति देवोभ्यो** देवानपि न नमति **वरिवस्यति नो गुरुन्** गुरुनपि न पर्युपास्ते, **अहङ्कारग्रहग्रस्तो** मानग्रहगृहीतः **पितृनपि** जनकानपि **न मन्यते** न गणयति ॥१८०॥

[१]अनग्रः पर्वताकार इति श्लोकः सुगमः

अहं दातेत्ययमपि सुगमः, नवरं स्वमानीति स्वमात्मानं मन्यते इत्येवंशीलः स्वमानी मन्यते बुद्धयते स्वयमात्मना, **अमानमानमप्रमाणाहंकारमारूढ** आश्रितस्तृणतुल्यं तृणसदृशं **मन्यते** गणयति **जगद्** भुवनं, **मेरोरपि** सुरगिरेरप्यधिकमर्गलं मूढो मोहवान् **पश्यति** वीक्षते **आत्मानं स्वमात्मना** स्वयमेव ॥१८१-१८२॥

मानस्य दुष्टतां प्रकटयन्नाह-अहो इत्याश्चर्ये **मानस्याहङ्कारस्य दौरात्म्यं** दुष्टता, **येन** कारणेन **न प्राप्तो** न लब्धवान् **केवलं** केवलाख्यं ज्ञानं **सुनन्दानन्दनो** बाहुबलिः **साधुर्यतिरिति यावन्मानं** यावदहङ्कारं **न मुक्त्वान्न**त्यक्तवानिति ॥१८३॥

उक्तो मानविपाकः, इदानीं मायाविनां स्वरूपमाह-**अद्विजिह्वा** एकजिह्वाः फणभृतः सर्पा **बहिः** श्लक्ष्णा बहिःसुकुमारा **भयङ्करास्त्रासजनका अन्तर्विषभृतो** मध्ये विषधारिणो **दूरं** दूरादेव **वर्जनीयाः** परिहरणीयाः **शठा** मायाविनो जना लोकाः ॥१८४॥
शठसङ्गतिकारिणामिहैव दोषमाह-**शठानि यस्य मित्राणी**तिश्लोकः सुगमः ॥१८५॥

किञ्च-**येषां** शठानां **योगत्रयस्यापि** मनोवाक्कायव्यापारत्रिकस्यापि **संवादो** मीलनं **नेह दृश्यते** नात्रावलोक्यते **तेषां शठात्मनां कार्ये** प्रयोजने **संवादो** मीलनं **केन मृग्यते** ? केन निभाल्यते ? न केनापीत्यर्थः ॥१८६॥

अन्यच्च-**यदि माया** यदि शाठ्यं **हतो** विनाशितो **धर्मः** सदनुष्ठानं, **हतं सत्यं** सत्यवचनं **शठात्मनोऽशुद्धपरिणामस्य, सर्वाविश्वासहेतुश्च** सर्वाविश्रम्भकारणं च **मायावी जायते नर** इति ॥१८७॥

---

१ श्लोक सप्तविंशतौ [१७३-१९९] नास्ति एव एतादृशः श्लोकः, ग्रन्थकृतैव पश्चान्निष्काशितः सम्भाव्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्दोषोऽपि निरपराधोऽपि च मायावी जनसन्त्रासकारणं लोकोद्वेगहेतुः किं चाहेः फणिनो मृतस्यापि न बिभ्यति भयं [न] कुर्वन्ति ? कुर्वन्त्येव ॥१८८॥

येनैवंविधदोषवती माया अतः परित्याज्येति श्लोकः सुगमः ॥१८९॥

दर्शितो मायाविनां दोषः, अथ लोभवतामाह- नदीनाथं तरन्त्येके इति श्लोकः सुगमः, नवरं खनिः सुवर्णाद्याकरः ॥१९२-१९३॥

रङ्गभूमौ च वंशाग्रेऽयमपि श्लोकः सुगमः, । नवरं रङ्गभूमौ नर्तनस्थाने ॥१९१॥

यत्सेवां कुर्वत इति श्लोकद्वयं सुगमम् ॥१९२-१९३॥

अथ लोभस्य दुर्जयत्वमाह-स ज्ञानलाभकालेऽपि पञ्चमज्ञानप्राप्तिसमयेऽपि कष्टाद् दुःखेन लोभश्चतुर्थः कषायः प्रलीयते प्रलयं नीयते, शेषेष्वपि कषायेषु तिलतैलमिव स्थितः शेषांस्त्रीनपि कषायान् व्याप्य व्यवस्थित इत्यर्थः, अस्यैव सामर्थ्यमाह अहो इति विस्मये लोभस्य चतुर्थकषायस्य साम्राज्यं, आज्ञेश्वरत्वं यस्य लोभस्याधीन आयऽत्तोखिलः समस्तः जनो लोकः, कोऽर्थः ? लोभायत्तः संस्तत्र तत्र प्रयात्येव यत्र कुत्रापि नीयत इति सुगमम्, इदमेव समर्थयति-यदटन्ति महीमेक इति सुगमः, नवरं रोहणाभिधानं रत्नाधारधराधरं तृडार्ता तृषिता बुभुक्षिता दीना दैन्योपेताः । कषायाधिकारं निगमयन्नाह-ये नराः क्रोधसंदग्धा इति श्लोकद्वयं सुगममेव, इति श्लोकसप्तविंशतेः समासार्थः ॥१८९-१९९॥

इह च बाहुबलिकथानकं सुप्रसिद्धमिति कृत्वा न कथ्यते, रुद्रदेवकथानकं पुनरिदं-

इह द्वीपसमुद्राणां, सर्वेषां मध्यवर्तिनि । जम्बूद्वीपाभिधे द्वीपे, जम्बूवृक्षविराजिते ॥१॥
भरताभिधसुक्षेत्रे, पवित्रे धर्मयोगतः । सुक्षेत्रे गुणशस्यानां, चक्रवर्त्यादिभूषिते ॥२॥
अस्त्यनेकजनाकीर्णं, देवेन्द्रपुरसन्निभम् । विबुधानन्ददं रम्यं, प्रवृत्तसततोत्सवम् ॥३॥
समाकीर्णं महाभोगैः, पातालमिव भोगिभिः । महेश्वरकृतावासं, कैलाशमिव सर्वतः ॥४॥
नानावर्णसमाकीर्णं, चित्रकर्मोरुतुष्टिकृत् । पुरपौरगुणोपेतं, नाम्ना विजयवर्धनम् ॥५॥
समदृष्टिजनानन्दैः, सन्मार्गैः सुप्रविस्तरैः । सुदीर्घैर्यत्र भूभागो, भाति साधुजनैस्तथा ॥६॥
प्राकारो यत्र सद्वृत्त-स्तुङ्गश्च सुमनोहरः । लब्धसाधुप्रतिष्ठश्च, सज्जनश्च विराजते ॥७॥
सत्त्वयुक्ताऽतिगम्भीरा, सुसंवृत्तपयोधरा । सीतेव परदुर्लङ्घ्या, परितः परिखा बभौ ॥८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनारामवद्भान्ति, काननानि समन्ततः । हिमाद्रिशृङ्गतुल्यानि, रेजुर्देवकुलानि च ॥९॥
यस्मिंश्च सागरायन्ते, विस्तीर्णानि सरांस्यलम् । पुष्पायुधप्रियायन्ते, नवयौवनयोषितः ॥१०॥ किंबहुना–
पुरन्दरपुरस्पर्धि, तत्पुरं सत्समृद्धितः । नरवृन्दारकाकीर्णं, कीर्णरत्नोपराजितम् ॥११॥
रुद्रदेवाभिधस्तत्र, बभूव प्रवरो द्विजः । ब्राह्मणीयसमाचार-समासेवनतत्परः ॥१२॥
ऋग्-**यजुर्वेद**-**साम**-**वेद**विशारदः । तथाऽथर्वणवेदादि-श्रुतसागरपारगः ॥१३॥
यजनयाजनाध्याया-ध्यापनादिकृतादरः । जलज्वलनभस्मादि-सदाशौचपरायणः ॥१४॥
एवमादिद्विजातीय-गुणग्रामविराजितः । पिङ्गाक्षः पिङ्गकेशश्च, पिङ्गच्छविशरीरकः ॥१५॥
परं वह्निरिवात्यन्तं, क्रुद्धः स्वपरतापकः । यस्मादसौ स्वभावेन, रोषणो दारुणस्तथा ॥१६॥
यद्वा तद्वा समाकर्ण्य, यद्वा तद्वा समीक्ष्य च । यद्वा तद्वा समासृत्य, रुष्यत्येष मुहुर्मुहुः ॥१७॥
यत्र वा तत्र वा स्थाने, येन वा तेन वा सह । कार्यं विनैव रोषेण, युध्यमानः प्रदृश्यते ॥१८॥
समं स्वमित्रपुत्रैश्च, बन्धुसम्बन्धिभिस्तथा । व्यर्थं कलहयत्येष, कोपकम्पितविग्रहः ॥१९॥
ग्रहग्रस्त इवात्यन्तं-महावातास्तधीरिव । धर्मलोकविरुद्धानि, भाषते च करोति च ॥२०॥
अतस्तस्य गुणग्रामः, शशाङ्कधवलोऽपि हि । एकेन रोषदोषेण, समग्रोऽपि तिरोहितः ॥२१॥
द्विजस्य तस्य सज्ज्ञे, यज्ञकार्यविचक्षणा । विशालशीलसंपन्ना, विशालवरवंशजा ॥२२॥
अग्निशिखेति विख्याता, नामतः कर्मतस्तथा । सर्वभार्या गुणोपेता, प्रवरप्रीतिमन्दिरम् ॥२३॥
सद्योगभोगसत्त्याग-भाग्यसौभाग्यसङ्गता । स्त्रीजनोचितकृत्येषु, सर्वेषु प्रविशारदा ॥२४॥
देवानां ब्राह्मणानां च, भक्तिकृद्भर्तृवत्सला । सा ब्राह्मणकुलाचार-समासेवनतत्परा ॥२५॥
परं सापि स्वभावेन, रोषदोषविदूषिता । अनेकगुणयुक्तापि, प्रशंसामाप नो जने ॥२६॥
रोषविषभरापूर्णा, सर्पिणीवातिदारुणा । रुष्टा सती दुरालोका, जनतोद्वेगकारिणी ॥२७॥
एवं समानशीलौ तौ, दम्पती बत वेधसा । निर्मितौ येन कोपान्धौ, द्वावपि कलहप्रियौ ॥२८॥
द्वावपि त्यक्तमर्यादा-वसमञ्जसभाषिणौ । जानन्तावपि संमूढौ, वर्तेते सर्वकर्मसु ॥२९॥
द्वावपि दुष्टवाक्यानि, प्रभाषेते निरर्थकम् । द्वावपि रुष्यतो नित्य-मेवमेव परस्परम् ॥३०॥
कदाचिद्युध्यमानौ तौ, प्रकुर्वाते अजेमनम् । द्वावपि कुरुतोऽकस्मा-त्केशाकेशि कदाचन ॥३१॥
मुष्टामुष्टि विधत्तश्च, दण्डादण्डि तथैव च । एवं च कुर्वतस्तस्य, कालो याति द्वयस्य च ॥३२॥
नूनं तस्य द्वयस्यापि, समानगुणकर्मणः । आनुरूप्यं समालोक्य, विधिना सङ्गमः कृतः ॥३३॥
वैषयिकसुखासक्तौ, प्रीत्या तौ किल दम्पती । एकस्वभावमापन्नौ, निन्यतुः कालमञ्जसा ॥३४॥
तयोः सांसारिकं सौख्य-मेवमासेवमानयोः । पुत्रत्रयं समुत्पन्नं, सुन्दराकारधारकम् ॥३५॥
प्रथमः पर्वतो नाम, **कुडङ्गा**ख्यस्तथापरः । तृतीयः **सागरो** नाम, सर्वेऽशाश्वतनामकाः ॥३६॥
तत्र पर्वतनामासौ, स्तब्धः सन् पर्वतायते । अनम्रः सर्वलोकाना-मुच्चैःशिरा मदोद्धतः ॥३७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहं ज्ञानी च मानी च, त्यागी भोग्यहमेव च। सुरूपः सुचिरं चेत्थ-महङ्कारं चकार सः ॥३८॥
देवानप्येष नो नौति, गुरूनपि पितृनपि। किं बहुना न कस्यापि, स्वकं नामयते शिरः ॥३९॥
द्वितीयस्तु कुडङ्काख्यो, यः कुटिलः कुडङ्गवत्। मायामय इवात्यन्तं, विधिनैष विनिर्मितः ॥४०॥
स्थानं कपटकूटानां, वञ्चनानां च मन्दिरम्। निकृतिशब्दसद्धाम, महामायामहाश्रयः ॥४१॥
सागरस्तु महालोभो, यस्य वाञ्छामहाह्रदः। अर्थाम्भसातिदुष्पूरो, नदीभिरिव सागरः ॥४२॥
चक्रवर्तिसमृद्ध्यापि, स्वर्गस्वामिश्रियापि च। सर्वत्रैलोक्यलक्ष्म्यापि, यस्तृप्तिं नाप्नवानिति ॥४३॥
स्वगृहेऽन्यगृहे वापि, वीक्ष्य वस्तु शुभाशुभम्। वाञ्छितवान् महावाञ्छ-स्तन्मे सम्पद्यतामिति।४४।
एषां पुनरिमा भार्या, यथासङ्ख्येन जज्ञिरे। शीलेति निकृतिश्चैव, सञ्चयेति च नामभिः।४५।
तत्र शीलाभिधा येयं, गृहिणी पर्वतस्य सा। तथा विनयहीना च, भूरिगर्वा स्वभर्तृवत् ॥४६॥
या पुनर्निकृतिर्नाम, सा कुडङ्गस्य गेहिनी। सर्वत्रानतिगूढात्मा, घनवंशकुडङ्गवत् ॥४७॥
या चेयं सञ्चयानाम, सागरस्य तु गेहिनी। स्वभर्तेव महालोभा, लुब्धा सर्वेषु वस्तुषु ॥४८॥
एवं समानशीलत्वं, द्वन्द्वे द्वन्द्वे विनिर्मितम्। तुल्यवस्तुसमायोग-विशेषज्ञेन वेधसा ॥४९॥
तदिदं संहतं सर्वं, रुद्रदेवकुटुम्बकम्। कुर्वन्निजनिजाचारं, गमयति स्म वासरान् ॥५०॥
अन्यदा रुद्रदेवेन, वृद्धभावमुपेयुषा। अग्निशिखा द्विजा भार्या, भणिता श्रूयतां प्रिये! ॥५१॥
अत्यन्तजरयाक्रान्ता-वावां विगतविक्रमौ। लोचने ध्यामलीभूते, न श्रोतुं श्रोतसी क्षमे ॥५२॥
पुत्राश्च यौवनारूढाः, स्वच्छन्दप्रविचारिणः। भक्षयन्ति यथाकामं, मयोपार्जितसम्पदम् ॥५३॥
न कुर्वन्ति मदीयाज्ञां, वीक्षन्ते मामवज्ञया। तत्प्रिये ! नैव पश्यामि, सुन्दरं पुत्रचेष्टितम् ॥५४॥
तदहं ते प्रयच्छामि, दीनाराणां सहस्रकम्। सम्यक्सङ्गोप्यतामेत-दाशाबन्धस्य हेतवे ॥५५॥
एवमस्त्विति सङ्कल्पा, समादाय ततस्तकत्। निष्क्रम्य च ततः स्थाना-देकान्ते निचखान सा॥५६॥
द्वे दीनारसहस्रे तु, निखाते चात्र तिष्ठतः। मृतस्य मे प्रिये ! दद्या, धर्माय विधिपूर्वकम् ॥५७॥
एतत्सर्वं च शुश्राव, कुडङ्गो निकृतिस्तथा। ततो निकृतिरागत्य, सञ्चयायै न्यवेदयत् ॥५८॥
सञ्चयाप्यर्थसंलुब्धा, निकृतिं प्रत्यभाषत। सकिंचना च नः श्वश्रूः, कथञ्चिन्मुष्यतामिति ॥५९॥
निकृतिः प्राह सानन्दा, नानानिकृतिकारिणी। किं सुगमेऽपि संमूढा, भगिन्यत्र प्रयोजने ॥६०॥
विषमकार्यलक्षेषु, निर्व्यूढाया अनेकशः। स्वश्वश्रूवञ्चनोपायो, न मे भाति सुदुष्करः ॥६१॥
हे संचये ! महामुग्धे !, द्रविणसंचयार्थिनि !। तत्कुरु यदहं भाषे, कार्यं येन प्रसिद्ध्यति ॥६२॥
इयं हि जरसाघ्राता, स्नेहाभ्यङ्गादिकाङ्क्षिणी। कर्कशक्रिययाराध्या, सद्भावं नौ प्रयास्यति ॥६३॥
इत्यादिकं समालोच्य, गत्वा श्वश्रूसमीपके। ऊचतुः स्वयमेवैते, तामेवं प्रियया गिरा ॥६४॥
यथा त्वमम्ब! वृद्धासि, न च ते कोऽपि पालकः। अतस्त्वां वारकेणावां, पालयावः स्वशक्तितः।६५।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा प्रोवाच यथैवोक्तं, युवाभ्यामेवमेव तत् । जराक्रान्तं शरीरं मे, [1]पालयेतं तदादरात् ॥६६॥
ततो द्वे अपि यत्नेन, तांमासेवितुमुद्यते । उचिताभ्यङ्गनस्नान-भोजनाच्छादनादिभिः ॥६७॥
एवं च नित्यमेताभ्या-मतिकर्कशसेवया । सेव्यमाना च सा वृद्धा, परं तोषमुपागता ॥६८॥
ततः सा चिन्तयामास, ताभ्यामाराधिता सती । अहो मदीयके वध्वौ, मद्भक्ते च विनीतके ॥६९॥
अहो गुरुजने भक्ति-रहो गुरुषु नम्रता । अहो शीलमहो लज्जा, अहो लोकज्ञताऽनयोः ॥७०॥
एते हि मम शुश्रूषां, कुरुतः सर्वयत्नतः । तदहं बाढमेताभ्यां, सद्विनयेन रञ्जिता ॥७१॥
एवं गमयते काल-मत्यन्तप्रीतमानसा । निजवधूगुणग्रामं, चिन्तयन्ती मुहुर्मुहुः ॥७२॥
अथान्यदा तया प्रोक्तं, ते समाहूय साञ्जसम् । यथाहं किञ्चिदाख्यामि, भवतीभ्यां रहस्यकम् ॥७३॥
त आहतुः प्रसादो नौ, कथ्यतां कथ्यतामिति । वृद्धाह पुत्रिके अन्यः, कश्चिदत्र न तिष्ठति ? ॥७४॥
त ऊचतुर्न कोऽपीति, श्रूयतां तर्हि सादरम् । कथयामि युवयोर्यच्च, वृद्धोवाचेति साञ्जसम् ॥७५॥
आशाबन्धकृते मह्यं, दीनाराणां सहस्रकम् । भर्त्रा दत्तं मया तच्च, गृहीतं परितुष्टया ॥७६॥
मञ्चकस्यास्य वामस्य, पादस्याधः प्रयत्नतः । दूरं रसातले सम्यक्, निखातमवतिष्ठते ॥७७॥
अतो यदि ममाकस्मा-दज्ञातं मरणं भवेत् । ततस्तद् द्रविणं ग्राह्यं, युवाभ्यामेव मामकम् ॥७८॥
इति श्रुत्वा निकृत्योक्तं, निकृत्यैव सविस्मयम् । मा वोच ईदृशं वाक्यं, चिरं जीव ममासुभिः ॥७९॥
इत्यादिमधुरैर्वाक्यैः, श्वश्रूं सम्बोध्य सादरम् । स्वस्वव्यापारनिष्ठे च, जाते निकृतिसञ्चये ॥८०॥
अन्यदा च समालोच्य, ताभ्यां कृत्वा च निश्चयम् । उत्खातं तत्ततो द्रव्यं, विजनं वीक्ष्य सत्वरम् ।८१॥
नीत्वान्यत्र निखातं च, दूरैकान्तमहीतले । आवयोरेव चास्त्वेत-दित्यकारि च निश्चयः ॥८२॥
श्वश्रूं प्रति च निःशेषो, ह्रासितो विनयः किल । क्रमेणाभ्यङ्गनस्नान-भोजनाच्छादनादिकः॥८३॥
अथ पूर्वप्रयुक्तस्य, हानिं विनयकर्मणः । स्थविरा समीक्ष्य साशङ्का, मनस्येवं व्यचिन्तयत् ॥८४॥
वध्वावेते यथाकालं, पूर्वं सर्वप्रयत्नतः । चक्रतुर्विनयं सर्वं, चरणक्षालनादिकम् ॥८५॥
साम्प्रतं सर्वकृत्येषु, मयि मन्दादरे भृशम् । सञ्जाते नैव जानामि, किमत्र बत कारणम् ? ॥८६॥
हुं ज्ञातं च यदाख्यातं, स्वद्रव्यं मुग्धया मया । मन्ये तल्लब्धमेताभ्यां, तेनैवायमनादरः ॥८७॥
एवमाशङ्कमाना च, यावत्तत्र निरीक्षते । तावन्नैवेक्ष्यते किंचि-त्ततोऽत्यर्थं शुशोच सा ॥८८॥
पृष्टे च ते तया वध्वौ यथा तन्मामकं वसु । नेक्ष्यते स्थानके तत्र, कथ्यतां किमु कारणम् ? ।८९।
त आहतुर्विदीनास्ये, निकृत्या साश्रुलोचने । यथावां नैव जानीवः, शपथश्च तवोपरि ॥९०॥
एवं कलुषितस्वान्ता, विश्वासस्नेहवर्जिताः । श्वश्रूर्वध्वौ च तिस्रोऽपि, जाताः साशङ्कमानसाः ॥९१॥
इतश्च पितृवृत्तान्तो, निखातद्रव्यगोचरः । निवेदितः कुडङ्गेन, सागराय सविस्तरः ॥९२॥
पर्वताय च निःशेषो, यथापूर्वमुपश्रुतः । ततस्ते द्रव्यलोभेन, प्रोचुरेवं परस्परम् ॥९३॥

---

१ पालयेत्थं- BJPC । पालयेथं-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सहिरण्य एव नस्तात, तस्मादाराध्यतामिति । एवमिति प्रतिज्ञातं, सर्वैः सानन्दमानसैः ॥९४॥
कपटेनार्थलोभेन, पादप्रधावनादिकम् । कुडङ्ग-सागरौ सर्वं, विशेषात्कुरुतः पितुः ॥९५॥
पर्वतः पर्वत इव, स्तब्धो लोहकुशीव सः । स्वपितुर्विनयं किञ्चि-न्न करोति कदाचन ॥९६॥
कुडङ्गसागराभ्यां च, नित्यं कर्कशसेवया । परवञ्चनदक्षाभ्यां, पितुरावर्जितं मनः ॥९७॥
ततश्च रुद्रदेवेन,-बाढं रञ्जितचेतसा । कुडङ्गसागरौ द्रव्यं, सर्वमेव प्रदर्शितम् ॥९८॥
पर्वतः पुनरत्यन्त-मनम्रत्वादुपेक्षितः । निर्गुणेषु हि लोकेषु, नूनं युक्तमुपेक्षणम् ॥९९॥
अन्यदा च कुडङ्गेन, सार्धं सागरबन्धुना । तत उत्पाट्य तद् द्रव्यं, गृहीत्वान्यत्र गोपितम् ॥१००॥
क्रमेणैव पितुः सर्वं, त्यक्तं विश्रामणादिकम् । तेनापि च सशङ्केन, द्रव्यस्थानं निभालितम् ॥१०१॥
न दृष्टं तत्र तद् द्रव्यं, पृष्टौ तेन निजाङ्गजौ । तावाहतुर्न जानीवो, हृतं केनापि पापिना ॥१०२॥
श्रुत्वेदं रुद्रदेवोऽपि, जाताशङ्कः सुतानभि । आकारसंवरं कृत्वा, तूष्णींभावमुपागतः ॥१०३॥
अन्यदाग्निशिखायै स, रुद्रदेवेन मूलतः । स्वद्रव्यनाशवृत्तान्तः, समग्रोऽपि निवेदितः ॥१०४॥
अग्निशिखापि वृत्तान्तं, द्रव्यप्रणाशगोचरम् । रुद्रदेवाय सन्त्रस्ता, समाख्यच्च सविस्तरम् ॥१०५॥
श्रुत्वेदं च ततः क्रुद्धो, रुद्रदेवो जनीं प्रति । अत्यन्तासत्यदुर्वाक्यै-स्तामाक्रोशितवांश्च सः ॥१०६॥
हे मूर्खे मुग्धके पापे, ज्ञानविज्ञानवर्जिते !। वधूभ्यां किं त्वया द्रव्यं, मामनापृच्छ्य दर्शितम्? ।१०७।
एतत् श्रुत्वातिरोषेण, सापि तं प्रत्यभाषत । त्वयापि किं स्वपुत्राभ्यां, स्वकं द्रव्यं प्रकाशितम्।१०८।
एवमादि मिथो बाढ-मसमञ्जसभाषणैः । चिरं वाक्कलहं घोरं, दण्डादण्डिं च चक्रतुः ॥१०९॥
रुद्रदेवो वदत्येक-मग्निशिखा द्वयं ततः । यदि घातं ददात्येष, तदा सापि जिघांसति ॥११०॥
एवं च युध्यमानेन, रुद्रदेवेन रोषतः । ताडिताग्निशिखा क्वापि, गाढघातेन मर्मणि ॥१११॥
मृता च दैवयोगेन, मृत्वा तत्रैव मन्दिरे । आर्तध्यानवशादेषा, जाता घोरभुजङ्गिनी ॥११२॥
अधिष्ठितं च मूर्च्छात-स्तया स्वं तन्निधानकम् । आस्ते तत्रैव सा नित्यं, विषसम्भृतदंष्ट्रिका ॥११३॥

अन्यदा निकृतिः शाठ्या-द्वञ्चित्वा किल सञ्चयाम् ।
गृह्णामीति निधानं त-दुत्खनन्ती द्रुतं द्रुतम् ॥११४॥

सन्दष्टा दुष्टसर्पिण्या, विषवेगातुरा सती । मृत्वा तत्रैव सञ्जाता, नकुली धनगृद्धितः ॥११५॥
ततो द्वे अपि कोपान्धे, प्रयुध्येतां प्रतिक्षणम् । तस्यैव स्वनिधानस्य, प्रत्यासन्ने परस्परम् ॥११६॥
सञ्चयापि विसर्पन्ती, निधानासन्नमन्यदा । दष्टा तया भुजङ्गिन्या, दृढं द्रविणलुब्धया ॥११७॥
तस्मिन्नेव निजे गेहे, महामोहविमोहिता । मृत्वार्तध्यानयोगेन, शुनिका समजायत ॥११८॥
इतश्च सागरेणापि, निधानाबद्धगृद्धिना । मारितो विषयोगेन, कुडङ्गो दुष्टबुद्धिना ॥११९॥
मृत्वाऽजनि भुजङ्गोऽसौ, तस्मिन्नेव निजे गृहे । अधितस्थौ च लोभेन, तदेव स्वं निधानकम् ॥१२०॥
सागरोऽपि च निःशङ्को, गृह्णामीति खनंस्तकत् । दष्टस्तेन भुजङ्गेन, मृत्वा च नकुलोऽजनि ॥१२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तौ च निधानार्थं, द्वावप्याबद्धमत्सरौ । प्रत्यहं कृतसंयुद्धौ, कथञ्चिन्न विरेमतुः ॥१२२॥
अन्यदा रुद्रदेवोऽपि, बहिष्टादागतो गृहे । कृतपर्यस्तिकं पुत्रं, ददर्श पर्वताभिधम् ॥१२३॥
ततः प्रयोजने क्वापि, सत्वरं तमुवाच सः । रे रे उत्थीयतां शीघ्रं, क्रियतां मामकं वचः ॥१२४॥
सोऽप्यन्यत्यमनग्रत्वा-त्सगर्वत्वान्निसर्गतः । मूकक इव तूष्णीको, न ददौ पितुरुत्तरम् ॥१२५॥
ततः पित्रा सुदुर्वाक्यै-र्निर्भर्त्सितो मुहुर्मुहुः । रे रे जघन्य ! निश्चेष्ट !, व्यवसायविवर्जित ! ॥१२६॥
नैवात्मापि च रे भर्तुं, त्वयका पाप पार्यते । आस्तामन्यस्य कस्यापि, कार्यं किञ्चित्करिष्यसि ।१२७।
सोऽपि प्रोवाच हे तात !, त्वयापि क्रियते न किम् । कोपावेशेन येनैवं, रारटीसि निरर्थकम् ॥१२८॥
ममाज्ञाभङ्गकारीति, प्रत्युवाच च सन्मुखम् । रुद्रदेवस्ततः क्रुद्धः, सावेशः पर्वतं प्रति ॥१२९॥
एवं च पितृपुत्राभ्यां, स्वपरक्लेशकारकः । वर्धितः कलहो दूरं, जल्पितप्रतिजल्पितैः ॥१३०॥
अथ प्रयुध्यमानौ च, भुजङ्गनकुलावुभौ । गृहाङ्गणे समायातौ, बद्धामर्षौ परस्परम् ॥१३१॥
अनेनैव प्रकारेण, सर्पिणी नकुली तथा । युध्यमाने समायाते, तस्मिन्नेव गृहाङ्गणे ॥१३२॥
अथ कार्येण केनापि, निधानासन्नमागता । शिलापि तत्र तिष्ठन्त्या, दष्टा शुनिकया तया ॥१३३॥
शिलयापि च सा रोषा-ल्लुकुटेनाहता दृढम् । मुक्त्वा राटिं ततो नंष्ट्वा, गता तत्र गृहाङ्गणात् ॥१३४॥
शिलापि शुनिकादंश- वेदनार्दितमानसा । आक्रन्दन्ती समागत्य, तस्मिन्नेवाजिरेऽपतत् ॥१३५॥
अथ तादृशमाश्चर्यं, विलोक्यादृष्टपूर्वकम् । प्रभूतो मिलितो लोकः, कौतुकाक्षिप्तमानसः ॥१३६॥
अत्रान्तरे वरज्ञानी, भिक्षां भ्राम्यन् समागतः । ज्ञानगर्भाभिधः साधुः, साधुधर्मे कृतोद्यमः ॥१३७॥
पृष्टोऽसौ रुद्रदेवेन, तदाश्चर्यनिबन्धनम् । यथा भोः ! कथ्यतां मह्यं, किमेवमसमञ्जसम् ॥१३८॥
युद्धचमानौ विलोक्येते, द्वावेतौ नकुलोरगौ । सर्पिणी नकुली चैते, शुनिका च शिला तथा ॥१३९॥
किमर्थं युद्धमेतेषां, साधो साधय साधय । साधुराह महाभाग, कथ्यते ते निशामय ॥१४०॥
ततः सर्वोऽपि वृत्तान्तो-ऽग्निशिखामरणादिकः । कथितो रुद्रदेवाय, मूलादारभ्य साधुना ॥१४१॥
तथा महाप्रबन्धेन, तस्मै शेषजनाय च । संवेगार्थं समाख्यातं, महामोहविजृम्भितम् ॥१४२॥
तद्यथा–

कर्मणा मोहनीयेन, मोहितं सकलं जगत् । धन्या मोहं समुत्सृज्य, तपस्यन्ति विमुक्तये ॥१४३॥
अहो मोहस्य महात्म्यं, विद्वांसोऽपि यतो नराः । मुह्यन्ति धर्मकृत्येषु, रताः कामार्थयोर्दृढम् ॥१४४॥
क्रोधो मानस्तथा माया, लोभश्चेति महाद्विषः । बाधयन्ति सदा लोकं, निरालोकं निरुद्यमम् ॥१४५॥
एतैर्हि निर्जिता याव-त्तावत्सौख्यं कुतो नृणाम् । धर्मवार्ता तु कौतस्त्या, शरीरस्थैरिमैरहो ॥१४६॥
एते हि तस्करा घोरा, भवाटव्यां प्रतिक्षणम् । मुष्णन्ति धर्मसर्वस्वं, शीघ्रमेव प्रमादिनाम् ॥१४७॥
नास्ति क्रोधसमो वह्नि-र्नास्ति मानसमोऽचलः । आपन्मायासमा नास्ति, नोदधिर्लोभसन्निभः ॥१४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागद्वेषातुरो जीवः, कामक्रोधवशं गतः । लोभमोहमहाविष्टः संसारे संसरत्यसौ ॥१४९॥
संसारे पर्यटन् जन्तु-र्योनिलक्षसमाकुले । शारीरमानसं दुःखं, सम्प्राप्नोत्यतिदारुणम् ॥१५०॥
आर्त्तरौद्रमना मूढो, न करोत्यायतौ हितम् । तेनासौ सर्वतः क्लेशं, परत्रेह च गच्छति ॥१५१॥
कषायविषयार्तानां, देहिनां नास्ति निर्वृतिः । तेषां च विगमे सौख्यं, जायते सततं परम् ॥१५२॥
कषायविषयातङ्कै-रात्मायं पीडितः सदा । चिकित्सनीयो यत्नेन, जिनवाक्सारभेषजैः ॥१५३॥
विषयोरगदष्टस्य, कषायविषवेगिनः । संयमो हि महामन्त्र-स्त्राता सर्वत्र देहिनाम् ॥१५४॥
कषायकलुषो जीवो, रागाकुलितमानसः । चतुर्गतिमहाम्भोधौ, पाषाण इव मज्जति ॥१५५॥
विषयेषु रतो जीवः, कर्म बध्नाति दारुणम् । तेनासौ क्लेशमाप्नोति, भ्राम्यन् भीमे भवोदरे ॥१५६॥
कषायविजये सौख्य-मिन्द्रियाणां च निग्रहे । जायते परमं स्नात-मात्मनो भवभेदकम् ॥१५७॥
कषायान् शत्रुवत्पश्ये-द्विषयान् विषवत्तथा । मोहं च परमं व्याधि-मेवमूचुर्जिनेश्वराः ॥१५८॥
कषायशत्रवो बाढं, धर्मकार्यजिघांसवः । वैराग्यतीक्ष्णखड्गेन, खण्डनीया महाबलैः ॥१५९॥
इत्यादि भवसंवर्धि, कषायाणां सुदारुणम् । विपाकं कटुकास्वादं, कथयित्वा मुनिः स्थितः ॥१६०॥
आकर्ण्येमां मुनेः पार्श्वे महामोहविडम्बनाम् । लोकः संवेगमापन्नो, धर्मे बहु मनो ददौ ॥१६१॥
तथा बभ्रुर्भुजङ्गश्च, नकुली च भुजङ्गिनी । शुनी च शिलया चैव, सर्वाण्यपि विशेषतः ॥१६२॥
भीतान्यतीवदुर्वार-कषायारातिसंहतेः । संवेगरससन्दोह-शीतीभूतवपूंषि च ॥१६३॥
जातजातिस्मराण्युच्चै-स्त्यक्त्वा वैरानुबन्धनम् । गृहीत्वानशनं मृत्वा, सर्वाण्यपि दिवं ययुः ॥१६४॥
रुद्रदेवोऽपि संविग्नो, ह्युद्विग्नश्च भवभ्रमात् । सपुत्रः सह तेनैव, ज्ञानगर्भेण साधुना ॥१६५॥
श्रुतसागरसंज्ञस्य, गत्वा सूरेः पदान्तिके । जग्राह भावतो दीक्षां, संसारोच्छेदकारिणीम्।१६६।
साधुभिः शिक्ष्यमाणश्च, साधुकृत्येषु केषुचित् । तेभ्यः पूर्वप्रयोगेण, रुद्रदेवः प्रकुप्यति ॥१६७॥
पर्वतोऽपि न कस्यापि, करोति प्रणतिं किल । गाढं तु भण्यमानौ तौ, कलहं कुरुतोऽधिकम् ॥१६८॥
अयोग्याविति विज्ञाय, ततस्तौ गुरुणा गणात् । निष्कासितौ गतौ पश्चा-दन्यत्र च गणान्तरे ॥१६९॥
तत्रापि च तथैवैतौ, वर्तेते प्रतिवासरम् । निष्कासितौ च तौ गच्छा-त्तथैव गुरुणा निजात् ॥१७०॥
एवमनेकगच्छेषु, कृतसङ्क्रमनिष्क्रमौ । कालेनैकाकिनौ जातौ, सुखशीलौ विशेषतः ॥१७१॥
अन्यदाग्निशिखादेवः, प्रतिबोधकृते तयोः । कृत्वा चाग्निशिखारूपं निशि तत्र समाययौ ॥१७२॥
पृष्टा च रुद्रदेवेन, कुतोऽसि त्वमिहागता! । स्वर्गमनादिवृत्तान्तं, सापि तस्मै न्यवेदयत् ॥१७३॥
स प्राहाऽविरतापि त्वं, किमित्यावां न वन्दसे । सा बभाण न वन्देऽहं, संयमविकलान्मुनीन् ॥१७४॥
रोषदोषेण दुष्टस्त्वं, मानदोषेण पर्वतः । कुतो युवकयोः क्षान्तिः, कुतो वा बत मार्दवम् ॥१७५॥
कुतस्तपः कुतो धर्मः, कुतो वा वरसंयमः । तद्भो युवां समीहेथे, वन्दनं केन हेतुना ? ॥१७६॥
दया क्षान्तिस्तपः सत्यं, संयमश्चैव वन्द्यते । युवयोश्च न सन्त्येते, वन्दे वां तदहं कथम् ॥१७७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि बहु सञ्जल्प्य, जगामाग्निशिखासुरः । रुद्रदेवोऽपि संविग्नः, पर्वतं प्रत्यभाषत ॥१७८॥
रे रे आवां न कस्यापि, कदापि क्वापि सङ्गतौ । स्वकीयेनैव दोषेण, मानी त्वं क्रोधवानहम् ॥१७९॥
तस्मादेतौ परित्यज्य, गत्वा स्वगुरुसन्निधौ । मूलादालोचनां कृत्वा, कुर्वः संयममुत्तमम् ॥१८०॥
तथैव कृतवन्तौ तौ, जातौ च गुरुसंमतौ । साधूचितेषु कृत्येषु, वर्तेते शुभभावतः ॥१८१॥
समाराधितवन्तौ च, क्षमया विनयेन च । तपःसंयमशीलैश्च, सबालस्थविरं गणम् ॥१८२॥
अन्यदोल्लासितोद्दाम-विशुद्धध्यानवह्निना । निर्दह्य घातिकर्माणि, प्रापतुः केवलश्रियम् ॥१८३॥
पालयित्वा चिरं चारु, चारित्रं च यथोदितम् । भवोपग्राहिकर्माणि, क्षपयित्वा शिवं गतौ ॥१८४॥
एवं च गुणहीनौ तौ, पूर्वं भूत्वा तथाविधौ । पश्चात्सर्वगुणोपेतौ, जातौ सर्वजनोत्तमौ ॥१८५॥

यतोऽत्यन्तमचिन्त्येयं, शक्तिर्जीवस्य विद्यते ।
द्रागेव सर्वकर्माणि, येनासौ क्षपयत्यलम् ॥१८६॥
इति मत्वा न कर्तव्या, हीला कस्यापि देहिनः ।
निर्गुणोऽपि यतो भूत्वा, जायते सगुणो नरः ॥१८७॥

इति **रुद्रदेवकथानकं** समाप्तं

[अष्टमः **कषायाधिकारः** समाप्तः]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकविरुद्धाधिकारः ९

कषायविपाकवेदिभिर्लोकविरुद्धान्यपि परिहियन्ते, [अतः]दनन्तरं लोकविरुद्धाधिकार उच्यते–

लोकः सर्वोऽप्ययं बोको, ध्यान्ध्यादन्धायतेतराम् ।
सन्मार्गपदन्यासे च, प्रस्खलन्नापराध्यति ।।२००।।
राजानो न प्रजापाला, मन्त्रहीनाश्च मन्त्रिणः ।
आचार्या नाममात्रेण, वाचका वाचनां विना ।।२०१।।
इत्येवं सर्वलोकस्य, निन्दको निन्द्यते जने ।
राजादिहीलकः कोऽपि, कारागारे प्रवेश्यते ।।२०२।।
ऋजुधर्मस्य कर्तारं, प्राणिनं वीक्ष्य पापभाक् ।
हसत्येव यथा तस्य, धर्मभ्रंशः प्रजायते ।।२०३।।
सर्वलोकविरुद्धेन, नरेण सह सङ्गतिम् ।
कुरुते सोऽपि तत्तुल्यो-ऽशेषलोकेन गण्यते ।।२०४।।
यत्रावासस्तदाचार-चातुर्यं शस्यते जने ।
अतीवोल्बणवेषो हि, विरुद्धः प्रतिभासते ।।२०५।।
पुरग्रामप्रवेशेषु, निर्गमेषु च दीयते ।
यद्दानं कीर्तिकामेन, लोके तदपि हस्यते ।।२०६।।
साधूनां व्यसनं दृष्ट्वा, [1]हृष्यते तन्न सङ्गतम् ।
प्रतीकारं तु सामर्थ्ये, सति न कुरुतेऽपि यः ।।२०७।।
साधुभक्ता जना येन, तन्निन्दा नैव सङ्गता ।
ये तु तामपि कुर्वन्ति, ते नूनमधमाधमाः ।।२०८।।
समस्ति जीवनोपायो, येषामन्योऽपि कोऽप्यहो ।
स्वस्तुतिं परनिन्दां च, कथं कुर्वन्ति ते जनाः ? ।।२०९।।
महापापवतामेत-न्महल्लिङ्गं प्रकीर्तितम् ।
एकं परजने निन्दा, स्वप्रशंसा द्वितीयकम् ।।२१०।।
यदि धर्मः कर्तुमारब्धः, स एव क्रियतां जनाः !
परनिन्दा महापापा, कथ्यतां क्वोपयुज्यते ! ।।२११।।

---

१ टीका । हस्यते - BPJC मु. ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुष्ठानानि तान्येव, स एव च जिनागमः ।
परमाजीविकाहेतो-र्दण्डादण्डिसमर्गलम् ॥२१२॥
यो यथा कुरुते पुण्यं, स तथा लभते फलम् ।
किमिदं क्रियते लोकाः !, केशाकेशि निरर्थकम् ? ॥२१३॥
स्वपक्षपरपक्षाभ्यां, सम्बद्धाः क्षेत्रभूमयः ।
बहुभिर्बहुधा तत्र, वसतामेषणा कथम् ? ॥२१४॥
अन्यत्रान्यत्र तत्रैव, तिष्ठतां कारणं विना ।
का वैदग्धी कुतो धर्मो, मुक्त्वैकं मुग्धमोहनम् ? ॥२१५॥
सर्वलोकविरुद्धानि, जल्पन्ति दुर्जना जनाः ।
धार्मिकाः कथमुच्यन्ते, स्वपरोद्वेगकारिणः ? ॥२१६॥
एतस्मिन् दुःषमाकाले, विप्रकीर्णवचस्विनाम् ।
तत्पक्षपातिनां चैव, पर्यन्तोऽपि न लभ्यते ॥२१७॥
सङ्क्लेशपरिहारेण, धर्मो वीरेण दर्शितः ।
तापसाश्रममुत्सृज्या-ऽसमयेऽन्यत्र गच्छता ॥२१८॥
धर्मलोकविरूद्धानि, शक्त्या यः परिवर्जयेत् ।
सोऽर्थसिद्धिं सुकीर्तिं च, लभते शुभसङ्गवत् ॥२१९॥
धर्मलोकविरुद्धानि, निःशङ्को यः समाचरेत् ।
सोऽर्थहानिमकीर्तिं च, लभतेऽत्र कुसङ्गवत् ॥२२०॥
तस्माल्लोकविरुद्धानां, परिहारः पुण्यकारणम् ।
तत्रादरो महान् कार्यो, विदुषा धर्ममिच्छता ॥२२१॥

इति श्लोकद्वाविंशतिः प्रायः सुगमैव, तथापि शिष्यहितार्थं किञ्चिदुच्यते-तत्र **लोको** जनः प्रायशः प्राचुर्येण **बोको** जडो ध्यान्ध्यान्मतिमान्द्यादन्धायते [तराम्]-अन्ध इवाचरतितरामतिशयेन **सन्मार्गपदन्यासे** प्रस्खलन्नापराध्यति ॥२००॥

लोकविरुद्धवाचकत्वमेव दर्शयति-**राजानो** महीपतयो न **प्रजापाला** न जनचिन्तकाः, **मन्त्रहीना** मन्त्रविकला **मन्त्रिणो** मन्त्रकर्तारः, **आचार्याः** सूरयो नाममात्रेण नाम्नैव, **वाचका** उपाध्याया **वाचनां** पाठनां विनान्तरेणापि, ॥२०१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्येवममुनोल्लेखेन निन्दको दूषको निन्द्यते दूष्यते जने लोके, किं च सर्वजननिन्दकस्येहैव दोषमाह-राजादिनिन्दको भूपादिहीलक इहैवास्मिन्नेव जन्मनि कोऽप्यतिमुखरः कारागारे गुप्तिगृहे प्रवेश्यते प्रक्षिप्यते ॥२०२॥

ऋजुधर्मस्य प्राञ्जलधर्मस्य कर्तारं विधातारं प्राणिनं देहिनं वीक्ष्याऽवलोक्य [पापभाक्] पापप्रकृतिर्हसत्येव प्रकटया गिरा, यथा तस्य ऋजुधर्मकर्तुर्धर्मभ्रंशो धर्मापगमो [प्र]जायते भवति ॥२०३॥

सांप्रतं लोकविरुद्धवादिना सह सङ्गोऽपि न कार्य इति दर्शयन्नाह-सर्वलोकविरुद्धेनेति सुगमं, नवरं गण्यते मन्यते तत्तुल्यो विरुद्धवादिनः समानः ॥२०४॥

किंच-यत्रावासो यत्र निवसनं तदाचारचातुर्यं नैपुण्यं शस्यते श्लाघ्यते जने लोके, अतीवातिशयेनोल्बणवेषः षिड्गवेषो विरुद्धः प्रतिभासतेऽसङ्गतः प्रतिभासते ॥२०५॥

अन्यच्च-पुरग्रामप्रवेशेष्वित्यादि सुगमं, नवरं कीर्तिकामेन कीर्तिवाञ्छया, येन जनो जानात्ययमत्र दातेति ॥२०६॥

साधूनां शिष्टानां व्यसनमापदं दृष्ट्वाऽवलोक्य हृष्यते हृष्टो भवति तन्न सङ्गतं न युक्तं, प्रतीकारं च प्रतिविधानं च न कुरुते न विदधाति सति सामर्थ्ये सत्यां शक्तौ तदपि न सङ्गतमिति शेषः ॥२०७॥

साधुभक्ताः शिष्टभक्ता जना लोका येन कारणेन तन्निन्दा नैव सङ्गता नैवोचिता, ये तु तामपि कुर्वन्ति ते नूनं निश्चितमधमाधमाः, जघन्यानामपि जघन्या इत्यर्थः ॥२०८॥

समस्ति विद्यते जीवनोपायः प्राणनोपायः, स्वस्तुतिमात्मश्लाघां परनिन्दां च परदोषग्रहणात्मिकां कथं कुर्वन्ति ते जनाः ? न सङ्गतमेतदिति ॥२०९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतद् द्वयमप्यत्यन्तदुष्टमिति दर्शयन्नाह-**महापापवतां** कल्मषाकुलचेतसां **लिङ्गं** चिह्नं देवकुलस्येव पताकिका **प्रकीर्तितं** भणितम्, **एकं** प्रथमं **परजने** आत्मव्यतिरिक्तलोके **निन्दा** दोषग्रहणलक्षणा, **स्वप्रशंसात्मश्लाघा** द्वितीयकमपरम् ॥२१०॥

किंच-यदि धर्मः **कर्तुमारब्धो** विधातुमारब्धः **स एव क्रियतां** स एव विधीयतां **जना** लोकाः, **परनिन्दा महापापा** महापापजनयोग्यत्वात् **कोपयुज्यते** ? न कापीत्यर्थः ॥२११॥

अन्यच्च-**अनुष्ठानानि** क्रियाकाण्डानि **तान्येव** तुल्यानि यान्येकस्य द्वितीयस्यापि तान्येव **परं** केवलमाजीविकाहेतोः स्वोदरभरणकृते **दण्डादण्डिसमर्गलं** दण्डैश्च दण्डैश्च प्रहृत्य युद्धप्रवर्तनं दण्डादण्डि समर्गलं समधिकम् ॥२१२॥

यो यथा जघन्यमध्यमोत्कृष्टभेदेन **कुरुते** विधत्ते **पुण्यं** श्रेयः **स** पुमांस्तथा तदनुसारेण **लभते फलं** विपाकं शुभाशुभकर्मणामिति शेषः, तदेवं व्यवस्थिते भो जना भो लोकाः **किमिदं क्रियते केशाकेशि** निरर्थकं, केशेषु च केशेषु च गृहीत्वा युद्धप्रवर्तनं केशाकेशि, निरर्थकं निष्प्रयोजनम्, अयमप्यव्ययीभाव एव समासः ॥२१३॥

किञ्च **स्वपक्षः** साधुसाध्वीलक्षणः **विपक्षस्तापसादिः**, ताभ्यां **सम्बद्धाः** सङ्कीर्णाः **क्षेत्रभूमयः** क्षेत्रविभागाः, [**बहुभिः**] बहुपरिवारैर्बहुधानेकधा **तत्र** क्षेत्रे **वसतां** निवसता**मेषणा** कुतः ? न कुतोऽपीत्यर्थः ॥२१४॥

किंच ये मुग्धविप्रतारणायात्मनि पात्रबुद्धिं समारोपयन्तो विनापि कारणमपरपरिग्रहाणि प्रत्युपेक्षन्ते तानुपालम्भयन्नाह-**का वैदग्धी** का विदग्धता ? **कुतो धर्मः** ? न कुतोऽपीत्यर्थः, **मुक्त्वा** विहाय **मुग्धमोहनमञ्जनविप्रतारणम्** ॥२१५॥

परमार्थतस्ते धार्मिका एव न भण्यन्ते इति दर्शयन्नाह-**सर्वलोकविरुद्धानीति** सुगमः श्लोकः ॥२१६॥

किंच-**एतस्मिन् दुःषमाकाले** पञ्चमारकलक्षणे **विप्रकीर्णवचस्विना**-मर्दवितर्दवादिनां तत्पक्षपातकारिणां **पर्यन्तोऽपि** सीमापि **न लभ्यते** न प्राप्यते, बहुत्वादेवंविधवादिनां तत्पक्षपातिनां च कालदोषादिति हृदयम् ॥२१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतं कृत्यमुपदिशन्नाह-सङ्क्लेशपरिहारेण चित्तखेदपरित्यागेन धर्मः पुण्यं वीरेण चरमतीर्थकरेण दर्शितः प्रतिपादितस्तापसाश्रमं तापसकुटीरकमुत्सृज्य परित्यज्याऽसमयेऽप्यप्रस्तावेऽप्यन्यत्र वर्धमानपुरे गच्छता विहरता ॥२१८॥

अथ लोके विरुद्धवर्जनावर्जनयोर्गुणदोषौ दर्शयन् श्लोकद्वयमाह-धर्मलोकविरुद्धानीत्यादि सुगमावेतौ, नवरं शुभसङ्गवदिति शुभसङ्गाख्यवणिक्पुत्र इव, तथा कुसङ्गवदिति कुसङ्गाभिधवणिक्सुत इव ॥२१९-२२०॥

अथ लोकविरुद्धाधिकारं निगमयन्नाह-तस्माल्लोकविरुद्धानां परिहार इत्यादि श्लोकः सुगम एव ॥२२१॥

इति श्लोकद्वाविंशतिसमासार्थः, अत्र च पराप्रैतिकपरिहारार्थं वर्षास्वेव तापसाश्रयमुत्सृज्य भगवान् श्रीमन्महावीरस्वाम्यस्थिकग्राममुपगतवानिति कथानकादवसेयं, तच्चैवं-

श्री महावीरप्रभु जीवन प्रसङ्गः

जिनः श्रीमन्महावीरो, वीरितान्तरशात्रवः । प्राज्यं राज्यं परित्यज्य, प्रव्रज्यां प्रत्यपद्यत ॥१॥
निःसङ्गोऽपि महासत्त्वः, सत्त्वानां रक्षणोद्यतः । ग्रामादिसङ्कुलां पृथ्वीं, छद्मस्थो विहरन्नसौ ॥२॥
मयूराकाभिधं ग्रामं, सम्प्राप्तस्तत्र चाश्रयः । दूयमानाभिधानानां, पाखण्डिगृहिणामभूत्।३।
तेषां कुलपतिर्मित्र-मासीद्भगवतः पितुः । महावीरमसौ दृष्ट्वा, सम्भ्रमेण समुत्थितः ॥४॥
स्नेहादालिङ्गनार्थाय, श्रीजिनस्य ततो जिनः । बाहुं प्रसारयामास, तं प्रति प्राक्प्रयोगतः ॥५॥
सोऽवोचत्सन्ति वेश्मानि, योग्यान्यत्राश्रमे तव । ततः कुमार ! तिष्ठ त्व-मत्राथ जिननायक ! ॥६॥
एकां तत्र स्थितो रात्रि-मन्यत्र गतवांस्ततः । गच्छन्तं च प्रभुं स्नेहा-दवोचत्तापसाधिपः ॥७॥
यदत्र रोचते तुभ्यं, तदागत्य विधीयताम् । वर्षावासो जनस्यास्या-नुग्रहार्थं त्वया मुने ! ॥८॥
मासानष्टौ विहृत्याथ, तं ग्राममागमज्जिनः । उपागतासु वर्षासु, मठं चैकमुपाश्रितः ॥९॥
प्रारम्भे प्रावृषस्तत्रा-ऽ प्राप्नुवन्ति नवं तृणम् । गोरूपाणि मठानां त-त्प्रचखादुः पुरातनम् ॥१०॥
तापसा वारयन्ति स्म, तानि ते दण्डपाणयः । भट्टारकः पुनस्तानि, निःसङ्गत्वादुपेक्षते ॥११॥
ततस्ते तापसाः स्वस्य, नायकस्य न्यवेदयन् । यथैष भवतामिष्टो, गोभ्यो नावति ते मठम् ॥१२॥
ततः कुलपतिर्गत्वा, बभाण श्रीजिनं प्रति । कुमार ! भो न युक्तं ते, मठस्योपेक्षणं यतः ॥१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शकुन्तोऽपि निजं नीडं, रक्षत्येव यथाबलं। त्वया गावो निवार्यास्त-न्नाशयन्त्यो मठं स्वकम् ॥१४॥
इत्येवं शिक्षयामास, तापसः सोऽथ तं जिनम्। ततः स्वामी तदप्रीतिं, ज्ञात्वा निर्गतवांस्ततः ॥१५॥
प्रावृषोऽतिगते पक्षे, सोऽस्थिकग्राममाययौ। अप्रीतिपरिहाराय, यतेतैवं यथा जिनः ॥१६॥
एवं विज्ञाय सर्वत्र, पराप्रीतिकमुच्चकैः। विवेकिभिः परित्याज्य-मात्मनो हितकाङ्क्षिभिः ॥१७॥

शुभसङ्ग-कुसङ्गकथा

अथ शुभसङ्गकुसङ्गदृष्टान्तः कथ्यते, स चायम्-
अस्तीह सर्वतो रम्यं, पुरं जयपुराभिधम्। तत्र श्रेष्ठी सदाचारो, बभूव मतिसागरः ॥१॥
शुभसङ्गकुसङ्गाख्यौ, तस्य पुत्रौ बभूवतुः। अन्यदा तौ हितैर्वाक्यैः, श्रेष्ठिना शिक्षितौ यथा ॥२॥
भो भो वत्सौ! सदा कार्यं, कार्यं सद्बुद्धिपूर्वकम्। सद्बुद्ध्या स्वार्थसंसिद्धिः, स्वार्थहानिः कुबुद्धितः।३।
सद्बुद्धियोगतो यातः, सर्वकल्याणभाजनम्। सुविद्यो वैद्यसत्पुत्रः, पूर्वमेवं मया श्रुतम् ॥४॥
आसीदत्र सुविख्यातः, पुरे शंखपुराभिधे। शुभचन्द्राभिधो वैद्य-श्चिकित्साशास्त्रकोविदः ॥५॥
सुभद्रा नाम तत्पत्नी, सुविद्यो नामतः सुतः।
पाठ्यमानोऽपि पित्रासौ, न पपाठ कथञ्चन ॥६॥
परं चित्ते सुबुद्धित्वाद्, दृष्टमात्रमपि स्फुटम्। दृष्टश्चानेकधा तेन, पिता कुर्वन् चिकित्सनम् ॥७॥
व्याधिमज्जन्तुजातानां, नानाशास्त्रवरौषधैः। अथान्यदा सुविद्यस्य, लघोरपि मृतः पिता ॥८॥
कृतानि मृतकृत्यानि, सुविद्यस्तत्पदे स्थितः। अथ तं मूर्खमालोक्य, सुभद्रा निजनन्दनम् ॥९॥
स्मृत्वा सर्वगुणान् भर्तृ, रुरोद प्रतिवासरम्। सुविद्योऽपि विलोक्यैवं, रुदन्तीं निजमातरम् ॥१०॥
पृच्छति स्म यथा मातः!, किमेवं रुद्यते त्वया ?। सा प्राह ते पिता वत्स!, सर्वशास्त्रविशारदः।११।
बभूव त्वं पुनर्मूर्ख-स्तेनाहं वत्स! रोदिमि। तेनोचे मा कृथाः खेदं, सम्प्रत्यपि पठाम्यहम् ॥१२॥
सा प्राह वत्स! यद्येवं, गच्छ त्वं श्रीपुरे पुरे। तत्रास्ते सुन्दरो नाम, सुप्रसिद्धो भिषग्वरः।१३।
राज्ञोऽमात्यः पितृव्यस्ते, चिकित्साशास्त्रकोविदः। श्रुत्वेदं वचनं मातु-र्गतोऽसौ श्रीपुरं क्रमात् ॥१४॥
प्रणम्य सुन्दरं तत्र, निषण्णो दर्शितासने। सुन्दरेण ततः पृष्टा, क्षेमवार्ता प्रजल्पितम् ॥१५॥
निवेदयाथ मे वत्स!, किमागमनकारणम् ?। तेनापि कथितं सर्वं, ततः प्रोवाच सुन्दरः ॥१६॥
सुन्दरं ते कृतं वत्स!, यदायातो ममान्तिकम्। ममान्ते वैद्यपुत्राणा-मधीते शतपञ्चकम् ॥१७॥
तदधीष्व त्वमप्यत्र, निश्चितं स्वगृहे यथा। ततस्तत्र पपाठैष, सुविद्यः सुन्दरान्तिके ॥१८॥
समं वैद्यसुतैर्नित्यं, ययौ च नृपमन्दिरे। श्रीविलासो नृपस्तत्र, भूरिश्रीकुलकेतनम् ॥१९॥
प्रत्यहं वैद्यपुत्राणां, दर्शयति निजं वपुः। एवं च कुर्वतो राज्ञो, गतः कालः कियानपि ॥२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा च समायातो, रात्रौ व्याधिर्नृपान्तिकम् । स ब्रूते तव देहेऽहं, प्रविशामि कदाचन ॥२१॥
यदि ते रोचते भूप !, सम्प्रत्यपि विशाम्यहम् । वृद्धत्वे तु प्रवेक्ष्यामि, त्वच्छरीरे न संशयः ॥२२॥
भूपः प्राह समालोच्य, ददामि तव निर्णयम् । स प्राहैवं विधेहीति, ततो राज्ञी महीभुजा ॥२३॥
पृष्टा सा च बभाणैवं, सम्प्रत्येव नरेश्वर ! । विशत्वेष महाव्याधि-र्विदधातु समीहितम् ॥२४॥
यतस्ते वैद्यपथ्यादि-सामग्री विद्यतेऽधुना । आदेशकारिणः सर्वे, वैद्यामात्यादयो जनाः ॥२५॥
राज्ञीवाक्यं प्रपद्यैवं, व्याधिरुक्तो महीभुजा । सम्प्रत्येव मदीयाङ्गे, प्रविश त्वं यथारुचि ॥२६॥
तेनापि च तथा चक्रे, ततः प्रातर्विशेषतः । दर्शितं वैद्यपुत्राणां, कीदृशं मे शरीरकम्? ॥२७॥
तैरूचे काञ्चनच्छायं, सर्वरोगविवर्जितम् । ततस्तत्सर्वतो वीक्ष्य, सुविद्येन प्रजल्पितम् ॥२८॥
राजन् सर्वरुजाघ्रातं, लक्ष्यते ते शरीरकम् । वैद्यपुत्रैस्ततः प्रोचे, किं त्वं जानासि रे शिशो ! ॥२९॥
येनैवं पुरतो राज्ञः, पाण्डित्यं नाटयस्यहो । एवमादि प्रजल्पन्तः, सुविद्यं वैद्यपुत्रकाः ॥३०॥
राज्ञा निष्कासिताः सर्वे, निर्भर्त्स्य कटुकोदितैः । गत्वैकान्ते ततः पृष्टः, सुविद्यो हृष्टचेतसा ॥३१॥

साध्यः किं तेऽस्त्ययं व्याधिः ?, साध्य एवेति सोऽवदत् ।
परं लक्षद्वयं राजन् !, दीनाराणां प्रयास्यति ॥३२॥

राज्ञोक्तं च गृहाण त्वं, द्रव्यजातं सुबह्वपि । विधेहि मामकं देहं, सर्वथा रोगवर्जितम् ॥३३॥
सुविद्योऽपि ततो द्रव्यं, गृहीत्वा ससहायकः । गत्वा नानाप्रकारेषु, पर्वतेषु वनेषु च ॥३४॥
भ्रान्त्वा लात्वा समायातः, कन्दमूलवरौषधीः । ततः पक्वं वरं तैलं, लक्षपाकाभिधानकम् ॥३५॥
कृत्वा कचोलके राज्ञः, सुविद्येन तदर्पितम् । उक्तश्चासौ यथा राजन् !, जिघ्रेदं वरतैलकम् ॥३६॥
भूभुजापि तथा चक्रे, ततो व्याधिरभाषत । नाहं शक्तोऽस्य तैलस्य, सोढुं गन्धं सुदुष्षहम् ॥३७॥
ततो राजेन्द्र ! यास्यामि, मुक्त्वा तव शरीरकम् । राजाह यदि मे देहे, पश्चादपि प्रवेक्ष्यसि ॥३८॥
तन्मा यासीरहो व्याधे !, तिष्ठ तिष्ठ निराकुलः । स प्राह सर्वथा नैव, त्वच्छरीरे विशाम्यहम् ॥३९॥
ततो मुत्कलितो राज्ञा, कृत्वा शपथशापितः । गतो व्याधिनरेन्द्रोऽपि, नीरोगोऽजनि तत्क्षणात् ॥४०॥
ततो राज्ञा सुतुष्टेन, सुविद्यो वैद्यनायकः । कृतो दत्तं बहु द्रव्यं, सद्वस्त्राभरणादि च ॥४१॥
महती च कृता वृत्ति-र्गतोऽसौ पूज्यतां जने । आनीता च निजा माता, तत्र बन्धुजनस्तथा ॥४२॥
श्लाघ्यमानो जनैः सर्वै-र्बुभुजे निजसम्पदम् । सर्वेषामपि तत्रत्य-सुवैद्यानां धुरि स्थितः ॥४३॥
तदेवं भो ! सुविद्योऽसौ, सर्वकल्याणभाजनम् । जातः सद्बुद्धियोगेन, सुबुद्धिस्तेन मन्यते ॥४४॥
कुबुद्धया तु निजा लक्ष्मी-र्नाशिता श्रेष्ठिसूनुना । यथा तथा समाख्यामि, पुत्रकौ ! श्रूयतामिति ।४५।
अस्त्यत्र मेदिनीपीठे, पुरं कुम्भपुराभिधम् । आसीत्तत्र गुणश्रेष्ठः, श्रेष्ठी भूरिधनालयः ॥४६॥
धनेश्वर इति ख्यातः, ख्यातकीर्त्तिः सुधीरधीः । धनचन्द्रः सुतस्तस्य, सर्वदाज्ञाविधायकः ।४७।
अन्यदा जनकेनैष, प्रोक्तः शिक्षां प्रयच्छता । मदुपदेशमेकाग्रः, शृणु वत्स ! क्षणान्तरम् ॥४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वया वत्स ! सदाकालं, भोक्तव्यं मिष्टभोजनम् । सुप्तव्यं च सुखेनैव, यथा निद्रा समेति ते ।४९।
दत्त्वा कलान्तरेण स्वं, याचितव्यं धनं न हि । वृतिर्दन्तमया कार्या, पार्श्वतो निजवेश्मनः ॥५०॥
रुष्टेन यदि हन्तव्या, निजा भार्या कथञ्चन । तदा बद्धवा दृढैर्बन्धै-र्हन्तव्या पुत्र ! नान्यथा ॥५१॥
कारणीयाश्च ते वत्स !, ग्रामे ग्रामे पुरे पुरे । प्रासादाः सुन्दरास्तुङ्गाः, सर्वलोकमनोहराः ॥५२॥
तथा त्वं खानयेर्वत्स !, गङ्गाधस्तान्महासरः । एवं ते कुर्वतो नित्यं, सर्वश्रेष्ठं भविष्यति ॥५३॥
इत्थं कृतेऽपि हे पुत्र !, यदि नश्यति ते धनम् । तदा गच्छेः पितृव्यस्य, पार्श्वे स्वर्णपुरे पुरे।५४।
एवं शिक्षयतः पुत्रं, श्रेष्ठिनो यान्ति वासराः । अन्यदा च मृतः श्रेष्ठी, पुत्रस्तस्य पदेऽजनि ॥५५॥
कालेनापेतशोकश्च, गृहचिन्तां चकार सः । ततः स्मृत्वा पितुर्वाक्यं, कारयामास सुन्दरम् ॥५६॥
आहारं घृतपूर्णाढ्यं, बुभुजे भूरिशः सदा । जीर्यते च न तत्तस्य, बुभुक्षापि न जायते ॥५७॥
ततो रोगैः समाघ्रातः, क्षीयते प्रतिवासरम् । सुष्वाप च सुखस्पर्शं, चारुतूलीषु सन्ततम् ॥५८॥
न च निद्रामतिस्वापा-ल्लभतेऽसौ सुखप्रदाम् । दत्ते कलान्तरेणैष, स्वं द्रव्यं याचते न हि ॥५९॥
गच्छद्भिर्दिवसैरेवं, स्तोकीभूतं ततस्तकत् । वृतिर्दन्तमया तेन, कारिता निजवेश्मनः ॥६०॥
सर्वतोऽपि समुत्तुङ्गा-स्तत्र द्रव्यं गतं बहु । रुष्टेन प्रहता भार्या, बद्धवा निबिडरज्जुभिः ॥६१॥
बहुधा हन्यमाना सा, गता रुष्टा पितुर्गृहे । कारिताश्च समुत्तुङ्गाः प्रासादा नगरादिषु ॥६२॥
क्रियमाणेषु तेष्वेवं, जातो भूरिधनक्षयः । खानितं तेन विस्तीर्णं, गङ्गाधस्तान्महासरः ॥६३॥
तच्च गङ्गाम्बुपूरेण, प्लाव्यते प्रतिवासरम् । एवं खानयता तेन, प्रतिवर्षं च तत्सरः ॥६४॥
क्षयं नीतं निजं द्रव्यं, जातो दरिद्रशेखरः । ततोऽभिभूयते [दुःखं, सदा तेन] बुभुक्षया ॥६५॥
अथासौ चिन्तयामास, विषण्णो दीनमानसः । अहो मया पितुर्वाक्यं, सर्वं निःसंशयं कृतम् ॥६६॥
नष्टा तथापि मे लक्ष्मीः, कुलक्रमसमागता । पिता च मेऽभवद् दूरम्, सद्बुद्धिः पुत्रवत्सलः ॥६७॥
हितश्च सर्वलोकानां, मामाश्रित्य विशेषतः । कृतं च तद्वचः सर्वं, धनं च निधनं गतम् ॥६८॥
कारणेनात्र भो भाव्यं, यन्मुक्तोऽहं निजश्रिया । एवं चिन्तयतस्तस्य, पितुर्वाक्यं हृदि स्थितम् ॥६९॥
यथाहं निर्धनीभूतः, पित्रा सम्प्रेषितः किल । समीपे स्वपितृव्यस्य, पुरे स्वर्णपुराभिधे ॥७०॥
तदेतदपि निशङ्कः, पितुर्वाक्यं करोम्यहम् । गच्छामि तत्र पश्यामि, पितृव्यं बुद्धिबन्धुरम् ॥७१॥
विचिन्त्यैवं गतस्तत्र, स्थितोऽसौ कानने बहिः । दृष्टश्चापि पितृव्येन, नीतो गेहे सगौरवम् ॥७२॥
स्नापितो भोजितस्तेन, पृष्टश्चैकान्तमाश्रितः । तेनापि कथितः सर्वः, स्ववृत्तान्तः सविस्तरः ॥७३॥
कुर्वन्नपि पितुर्वाक्यं, तातहं दुर्गतोऽभवम् । आकर्ण्येदं शिरो धुन्वन्, बभाषे बुद्धिबन्धुरः ॥७४॥
यथा मद्भ्रातृवाक्यार्थः, सम्यग्बुद्धो न हि त्वया । तत्तदर्थं तवाख्यामि, शृणु श्रुत्वावधारय ॥७५॥
यदुक्तं तव तातेन, भोक्तव्यं मिष्टभोजनम् । तस्यार्थोऽयं यथा वत्स !, भुज्यते यद् बुभुक्षितैः ॥७६॥
सरसं विरसं वापि, तत्सर्वं मिष्टमेव हि । सुप्यते च सुखेनेह, यदा निद्रा समेत्यहो ॥७७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र वा तत्र वा स्थाने, सुखमेव न संशयः । भूरिकोमलतूलीषु, सततं शायिनां न हि ॥७८॥

यतः[1] **छुह मिट्टी तिस सीयली, मउई निद्द न मंति ।**
जा रुच्चइ सा रूयडी, छेयाए उ भणंति ॥७९॥

यच्च दत्त्वापि नो याच्य-मस्यार्थोऽयं विबुध्यते । कदाचिदपि नो देयं, द्रव्यं ग्रहणकं विना ॥८०॥
वृतिर्दन्तमयी कार्या, यदुवाच पिता तव । तस्यार्थोऽयं वृतिः कार्या, सत्सुभटमया गृहे ॥८१॥
हन्तव्या यज्जनी बद्ध्वा, तस्यार्थः कथ्यते तव । पुत्रबन्धनबद्धा हि, हन्तव्या निजका जनी ॥८२॥
प्रासादाः कारणीयाश्च, ग्रामे ग्रामे पुरे पुरे । यदुक्तं तव तातेन, तस्यार्थोऽयं प्रकथ्यते ॥८३॥
सर्वत्र स्वजनाः कार्या, दानसन्मानपूजिताः । ते प्रासादा अपि स्वीया, मन्तव्याः परमार्थतः ॥८४॥
यदुक्तं खानयेर्वत्स !, गङ्गाधस्तान्महासरः । तस्यार्थं न विजानेऽह-माख्यास्यामि विमृश्य ते ॥८५॥
तदहो तव सद्बुद्धि-र्दत्ता पित्रा सुखावहा । त्वया तु बुद्धिहीनेन, सान्यथैवावधारिता ॥८६॥
तद्वत्स ! मा कृथाः खेदं, सर्वं श्रेष्ठं भविष्यति । सुष्ठु श्रेष्ठं त्वयाकारि, यदायातो मदन्तिके ॥८७॥
एवं संस्थाप्य तं श्रेष्ठी, सद्वाक्यैर्बुद्धिबन्धुरः । तत्रैव धारयामास, मासमेकं सगौरवम् ॥८८॥
ततो विज्ञप्य राजानं, याचित्वाश्वरथादिकम् । सामग्रीं महतीं कृत्वा, गतः कुम्भपुरे पुरे ॥८९॥
धनचन्द्रो धृतो द्वारि, गतो राजकुले स्वयम् । दत्तं राज्ञो धनं भूरि, विज्ञप्तश्च यथा नृप ! ॥९०॥
श्रेष्ठिनो धनदत्तस्य, धनचन्द्राभिधः सुतः । उपार्ज्य भूरिवित्तौघ-मायातो द्वारि तिष्ठति ॥९१॥
सुप्रसादं मनः कृत्वा, तदायातु नरेश्वरः । सन्मुखं तस्य येनासौ, पुरमध्ये प्रवेश्यते ॥९२॥
तथा कृतं नरेन्द्रेण, ततोऽत्यन्तं महर्द्धितः । गजारूढो ददद्दानं, पुरमध्ये प्रवेशितः ॥९३॥
वाद्यमानैर्वरैस्तूर्यै-र्गीयमानैः सुमङ्गलैः । इत्थं भूत्या गतो गेहे, राज्ञा शेषजनैः सह ॥९४॥
पूजितो वरवस्त्राद्यै, राजा शेषजनस्तथा । ततः सन्मान्य नत्वा च, नरनाथो विसर्जितः ॥९५॥
यथार्हं शेषलोकश्च, गतो गेहे निजे निजे । ततो गेहं समारब्धं सुधया धवलीकृतम् ॥९६॥
मण्डितं चित्रितं चित्रै, राजवेश्मसमं कृतम् । गवाक्षजालिकायुक्तं, स्तम्भमण्डलमण्डितम् ॥९७॥
ततो येभ्यो धनं लभ्यं, ते समाहूय सत्वरम् । एवमुक्ता यथा भो भो, श्रूयतां मामकं वचः ॥९८॥
येन यावद्धनं देयं, सोऽधुना सकलान्तरम् । स्वयं ददातु मे नो चे-द्दण्डग्राह्यो भविष्यति ॥९९॥
एवं श्रुत्वा जनैः सर्वैः, स्वयमेव भयातुरैः । यद्दातव्यं तदानीय, प्रदत्तं सकलान्तरम् ॥१००॥
एवं भूयोऽपि स श्रीमान्, बुद्धिबन्धुरबुद्धितः । जातः कीर्तिं परां प्राप, लोकमध्ये च पूज्यताम् ।१०१।
अन्यदा धनचन्द्रं तं, बभाषे बुद्धिबन्धुरः । किं भो तव गृहे पूर्वं, काचिद्गङ्गाभिधानिका ॥१०२॥
बभूव महिषी गौर्वा, कुम्भिका घोटिकापि वा । वाटिका क्षेत्रिका वापि, गन्त्रिका चापरापि वा ।१०३।
स प्राह मेऽभवत्तात !, गङ्गाख्या वरघोटिका । श्रेष्ठी प्रोवाच सा कुत्र, स्थाने पूर्वमबद्धयत ॥१०४॥

---

१ BPJC । श्लोकोऽयं मु. नास्ति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेनोदीरितमेतस्यां, श्रेष्ठिन्! कुटयां सदैव सा। बद्धयमाना बभूवाथ, जनानन्दविधायिनी।१०५।
श्रेष्ठी प्रोवाच भो सेयं, पित्रा ते यदधः किल। खानितस्त्वं सरो वत्स, न सा गङ्गाम्बुवाहिनी॥१०६॥
तदत्र विद्यते द्रव्यं, निखातमिति तर्कये। तद्गच्छ सर्वतः कुटयाः, खान्यते मेदिनीतलम् ॥१०७॥
तथैव खानितं तूर्णं, निष्क्रान्तं द्रविणं बहु। तल्लाभे धनचन्द्रोऽसौ, सानन्दोऽजनि मानसे ॥१०८॥
तदेवं धनचन्द्रस्य, सद्बुद्धया बुद्धिबन्धुरः। सर्वत्र सुस्थतां कृत्वा, जगाम निजके पुरे ॥१०९॥
तदहो पुत्रकौ! नृणां, सद्बुद्धिः कार्यसाधिका। कुबुद्धिः किल लोकेऽस्मिन्, सर्वकार्यविनाशिनी।११०।
मत्वेदं सर्वदा वत्सौ !, युवाभ्यां सर्वकर्मसु। सम्यगालोच्य सद्बुद्धया, वर्तितव्यं हि नान्यथा।१११।
तथा पुत्रौ ! न कर्तव्या, निन्दा कस्यापि देहिनः। निन्द्यमानो जनो येन, सुस्निग्धोऽपि विरुद्धयते।११२।
मत्वेदं सर्वदा वत्सौ !, गुणरत्नविभूषिताः। निन्दनीया जना नैव, यन्निन्दा धर्मनाशिनी ॥११३॥
तथा भो पुत्रकौ ! नित्य-मुपहासो न कस्यचित्। कार्यः स्वपरयोर्येन, स प्रद्वेषविधायकः ॥११४॥
न चावज्ञा विधातव्या, लोकपूज्ये जने सदा। सा हि लोकद्वयेऽप्युच्चै-र्धर्मार्थप्रतिघातिनी ॥११५॥
बहुलोकविरुद्धेन, लोकेन सह सङ्गतिः। न कार्या सर्वदा सा हि, सर्वानर्थनिबन्धनम् ॥११६॥
विधातव्यं सदा नैव, देशाद्याचारलङ्घनम्। सुप्रशान्तः सदा वेषो, धारणीयो न चोद्भटः ॥११७॥
धर्मे भोगे निधौ भृत्ये, देयं लाभोचितं धनम्। एवं तौ शिक्षयन् श्रेष्ठी, गमयामास वासरान् ॥११८॥
अन्यदा स मृतः श्रेष्ठी, जातौ तौ गृहचिन्तकौ। शुभसङ्गकुसङ्गाख्यौ, प्रीतियुक्तौ सहोदरौ ॥११९॥

तत्र च स शुभसङ्गः, स्वभावेनैव सुशीलः, शुद्धसमाचारः शिष्टजनसंसर्गप्रियः सलज्जो धर्मलिप्सुः पापभीरुर्दयादानदाक्षिण्यसौजन्यसदौदार्यगाम्भीर्यधैर्यादिसद्गुणकलापकलितः, प्रकृत्यैव शुभप्रशान्त-विमलविशालाशयः, शशीव सुभगसुप्रशान्तमूर्तिः, सुसाधुरिव सुप्रशान्तवेषधारी, सर्वदाऽपि धर्मलोकविरुद्धानि परिहरन् सदा शिष्टजनाचरितं देशाचारं कुलाचारं धर्माचारं च समाचरन्, निजकुलक्रमायातन्यायवृत्त्या व्यवहरन् कालमतिवाहितवानिति, कुसङ्गः पुनः स्वभावेनैव दुःशीलो दुष्टसमाचारो दुष्टजनसंसर्गकारकश्च, एवं च शुभसङ्गगुणास्तस्य विपरीता भावनीयाः एकेनैव जनकेन जातावप्येकमातृकुक्षिसमुत्पन्नावपि तौ विषमशीलौ जातौ। कर्मानुसार्येव प्राणिनां गुणकलापो न प्रायो जात्यादिकमपेक्षते,

यतः- **एकोदरसमुत्पन्ना, एकनक्षत्रजातकाः।**
न भवन्ति समशीला यथा बदरीकण्टकाः ॥१॥

एवं च तयोः सरति संसारे धनं निधनमुपगतं, दारिद्र्यं च समागतं, भोजनमात्रमपि कष्टेन सम्पद्यते, ततस्तौ तत्र परप्रेष्यादि कर्तुमशक्नुवन्तावनिर्वहन्तौ च देशान्तरं सम्प्रस्थितौ, गच्छन्तौ च सम्प्राप्तावटवीमध्ये। तत्रैकत्र ताभ्यां दृष्टा बहवः पुरुषाः, तदासन्ने गोधनं च प्रभूतं, ते च गामेकां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यापाद्य मांसं पक्तुमारब्धाः । ततः कुसङ्गः प्राह भ्रातरत्रैव तावत्क्षणान्तरं विश्राम्यावः, शुभसङ्गेनोक्तं वत्सैवं ते पुरुषा न सङ्गता मम प्रतिभासन्ते नावयोः सङ्गतमत्रावस्थानं, तदग्रतो व्रजावः , स प्राह किमेते करिष्यन्ति ? किमेतेषां पातकमुत्पत्य लगिष्यति ? तदत्रैव स्थास्याव इत्यादि लपन् भूयो भूयोऽपि शुभसङ्गेन स कुसङ्गो वार्यमाणोऽपि तत्रैव स्थितः, शुभसङ्गः पुनरग्रतो गतः । तत्रैव च तेन **सुधनसार्थवाह**स्यावासो दृष्टः प्रविष्टश्च तत्र, यावत्क्षणान्तरं सार्थवाहसमीपे तिष्ठति तावत्ते पूर्वव्यावर्णितचौराः कुट्टिकैरागत्य बद्धाः, तेनान्तेन चालिताः, सोऽपि कुसङ्गस्तन्मध्यगत एव बद्धो नीयते, दृष्टश्च शुभसङ्गेन, कथितं च सार्थवाहस्य यदुतायं निर्दोष एव बद्धो नीयते, श्रुत्वेदं मोचितस्तेन, मिलितो भ्रातुः, शिक्षितश्च तेन यथा वत्स ! कुसंसर्गस्त्यावदेवंविधानेकानर्थकारणमिति मत्वा न कर्तव्यस्त्वयेत्यादि ।

ततो द्वावपि प्रस्थितावग्रतो गन्तुं यावत्तावदेकत्र दृष्टा आपानमण्डलीमवाप्य मद्यं पिबन्तो मांसं च भक्षयन्तो बहवो मत्तपालकाः, ततो भणितं कुसङ्गेन भ्रातरत्रापि तिष्ठावः क्षणमात्रं, ततश्च गमिष्यावः, शुभसङ्गेनोक्तं न युक्तमत्रावस्थानं, गम्यतामग्रत इति वार्यमाणोऽपि स्थितः कुसङ्गः, गतः शुभसङ्गः, ततोऽसौ कुसङ्गस्तैर्मत्तपालकैः समाहूय निमन्त्रितो मद्यमांसाभ्यां, ततस्तेनापि लौल्यवशेन पीतं मद्यं, भक्षितं मांसं, मत्तश्च क्षणान्तरेण नष्टचित्तोऽसमञ्जसं चेष्टितुमारब्धः, कुरुते गीतं, विधत्ते नृत्यं, दत्ते गालीः, समुत्तिष्ठति युद्धाय, प्रलपत्यसम्बद्धम् ।

अथैवं तेषां मत्तपालकानामसम्बद्धप्रलापिनां परस्परं विवदमानानां लग्नं युद्धं, प्रवृत्ताश्च ते कर्तुं दण्डादण्डि केशाकेशि मुष्टामुष्टि । ततोऽसौ कुसङ्गस्तैर्मत्तपालकैः कदर्थ्यमानो नष्टः प्रवृत्तश्च गन्तुं शुभसङ्गाभिमुखं, लग्नाश्च ते तत्पृष्ठतः, गृहीतश्च तैः पश्चादागत्य केशेषु । ततस्तं सुचिरं कदर्थयित्वा गतास्ते मत्तपालकाः । कुसङ्गोऽपि साध्वसवशेन कम्पमानाङ्गयष्टिर्गतः शुभसङ्गसमीपं, पृष्टश्च तेन यथा किमहो भयातुरः ? तेनोक्तं यत्त्वदीयं वचनं न कृतं तस्य फलमिदमिति ।

ततस्तौ द्वावपि संहतावेव गतौ **सिंहपुर**नगरं, स्थितौ च तत्र **धनपाल**श्रेष्ठिनः समीपे, जाता च तेन सार्धं प्रीतिः, अर्पितश्च तयोरापण एकः, दत्तं च व्यवहारयोग्यं द्रविणजातं, प्रवृत्तौ च व्यवहर्तुम्, आसादयतश्च यथोत्तरं लाभं। ततोऽसौ कुसङ्गस्तत्रापि कुरुते चौरपारदारिकद्यूतकारादिभिः षिङ्गालोकैः सह सङ्गं, ततः क्वापि निर्दोषोऽपि स चौर इति कृत्वा कदर्थ्यते नगरारक्षकैः, क्वापि पारदारिक इति कृत्वा विडम्ब्यते, क्वापि द्यूतकार इति कृत्वा निन्द्यते जनैः, कुत्रापि मत्तपालक इति कृत्वा जुगुप्सास्पदमास्कन्दति । एवमनेकधा तत्र स कुसङ्गः कुसंसर्गदोषेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकविरुद्धान्याचरन्विविधं विडम्बितः । अन्यदाऽसौ मिलितश्चौराणां, गृहीतो नगरारक्षकेण, बद्ध्वा विडम्ब्य च प्रवेशितो गुप्तौ तत्र दुरन्तदुःखपरम्परामधिसहन् मृत्वा दुर्गतिं गत इति ।

शुभसङ्गः पुनः कुरुते शिष्टैः सह सङ्गं, विधत्ते च तदुपदेशान्, वन्दते वन्दनीयान्, नमति नमनीयान्, किं बहुना ? सर्वत्र सदाचारपर एव वर्तते । ततो राज्ञा राजलोकेन शेषलोकेन च मान्यते पूज्यते च । ततोऽसाविहलोक एव शिष्टसङ्गवशेन धर्मलोकविरुद्धपरिहारेण व्यवहरन् समं कीर्त्या भूरिसम्पदमासाद्य विपुलकल्याणभाजनं जातः । दानादिधर्माचरणेन च पुण्यमुपार्ज्य मृत्वा सुगतिं गतवानिति ।

मत्वेदं सर्वदा सद्भिः कर्तव्या शिष्टसङ्गतिः । परित्याज्यः कुसंसर्गः सर्वानर्थप्रवर्तकः ॥१॥

इति **लोकविरुद्धाधिकारः** समाप्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानाऽधिकारः १०

उक्तो लोकविरुद्धपरिहाराधिकारः, अथ दानादिचतुर्विधधर्माधिकार उच्यते, अस्य चायमभिसम्बन्धः अनन्तराधिकारे लोकविरुद्धपरिहार उक्तः, स च धार्मिकैरेव शक्यते कर्तुं, धर्मः पुनर्दानादिभेदश्चतुर्धेति, अतोऽत्र दानादिचतुष्टयं प्रतिपाद्यत इति । तत्र तावदार्य-देशादिदुर्लभत्वप्रदर्शनपूर्वकं धर्मोपदेशं ददत् श्लोकत्रयमाह–

धर्माधारार्यदेशेषु, मानुष्यं प्राप्य दुर्लभम् ।
तत्रापि शासनं जैनं, सद्रत्नमिव निर्मलम् ॥२२२॥
वाताहतवीचीवच्चञ्चलं वीक्ष्य जीवितम् ।
कल्याणमित्रसत्साधु-सामग्रीमवाप्य च ॥२२३॥
विपदाकुलमालोक्य, वित्तं चित्तं च चञ्चलम् ।
पुण्यपुष्टिकरे धर्मे किं साम्प्रतमुदासितुम् ? ॥२२४॥

धर्मस्य श्रुतचारित्रलक्षणस्याधारभूताश्च ते आर्यदेशाश्च पञ्चदशकर्मभूमिलक्षणास्तेषु मानुषत्वं मनुष्यत्वं प्राप्य लब्ध्वा दुर्लभं दुष्प्रापं, तत्रापि मानुषत्वेऽपि सति शासनं प्रवचनं जैनमार्हतं दुर्लभमिति वर्तते सद्रत्नमिव चिन्तारत्नमिव निर्मलं मलरहितम् ॥२२२॥

तथा वाताहतवीचीवत्पवनप्रेरितजलकल्लोलवच्चञ्चलं चपलं वीक्ष्यावलोक्य जीवितमायुष्कं, कल्याणमित्रसामग्रीं सत्साधुसामग्रीं हितकारिविशिष्टपरिजन-परिपूर्णतामवाप्यासाद्य च ॥२२३॥

तथा विपदाकुलमालोक्य व्यापदाकीर्णं समीक्ष्य वित्तं द्रव्यं, चित्तं च मनश्च चञ्चलं पुण्यपुष्टिकरे श्रेयोवृद्धिविधायके धर्मे सदनुष्ठाने किमित्युपालम्भे साम्प्रतं युक्तमुदासितुमुदासीनैः स्थातुमिति श्लोकत्रयार्थः ॥२२४॥

अथ धर्मस्यैव भेदमाह–

सोऽपि दानादिभेदेन, चतुर्भेदो भवान्तकृत् ।
तत्रापि प्रथमं दानं तीर्थनाथैः प्ररूपितम् ॥२२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽपि धर्मो दानादिभेदेन वितरणादिप्रकारेण चतुर्भेदश्चतुर्विधो भवान्तकृद्भवोच्छेदकारकः, तत्रापि भेदचतुष्टयेऽपि प्रथममाद्यं दानं वितरणं तीर्थनाथैः प्ररूपितं कथितमिति श्लोकार्थः ॥२२५॥

अथ दानस्यैव फलं भेदांश्चाह–

यद्गृहे पेशला सम्प-द्यच्च लोकेषु मान्यता ।
सत्पुत्राः सत्कलत्राणि, यदन्यदपि सुन्दरम् ॥२२६॥
तदेतद्दानतः सर्वं, तच्च दानं त्रिधा मतम् ।
विज्ञानाभयभेदेन, धर्मोपग्रहतस्तथा ॥२२७॥

यद्गृहे मन्दिरे पेशला सुन्दरा सम्पल्लक्ष्मीः, यच्च लोकेषु जनमध्ये मान्यता गण्यमानता, सत्पुत्राः प्रधानतनयाः, सत्कलत्राणि प्रवरभार्याः, यदन्यदपि सुन्दरं यदपरमपि श्रेष्ठं, तदेतत्तदिदं दानतो दानेन सर्वं समस्तं लभ्यत इति शेषः,उक्तं च–

"दाणेणं भूरिभोगा पवरसुहसहा रायलच्छी मयच्छी,
दाणेणं दिव्वलद्धी भुवणभरसहा सुद्धबुद्धिसमिद्धी ।
दाणेणं दिव्वसत्ति धवलियभुवणा देहदित्तिसुकित्ति,
दाणेणं कज्जसज्जा विपुलमणहरा होइ विज्जाणवज्जा" ॥१॥
"दाणेणं जंति नासं गुविलगुरुतरा घोरवेराणुबंधा,
दाणेणं होंति सव्वे, पयडमिहवसो वत्तिणो भूयसंघा" ।
"दाणेणं चंडदंडा विसमिव विसमा हुंति सत्तू वि मित्ता,
दाणेणं रायपुत्ता विणयनयसिरा किंकरायंति निच्चं" ॥२॥
"किं तेन जातु जातेन, जीवितेनापि जन्तुना ।
जनानां यो न दीनानां प्रदानप्रवणः सदा" ॥३॥
"कुलीनेनापि किं तेन, तेन किं शीलशालिना ।
विशालविभवेनापि, तेन किं यो न दायकः" ॥४॥

तच्च दानं तत्पुनर्वितरणं त्रिप्रकारं मतं सम्मतं तद्विदामिति गम्यते । त्रैविध्यमेव दर्शयति- विज्ञानाऽभयभेदेन ज्ञानाऽभीतिप्रकारेण धर्मोपग्रहतो धर्मोपग्रहमाश्रित्य तथा तेन प्रकारेणेति श्लोकद्वयार्थः ॥२२६-२२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ ज्ञानदानफलमाह–

किं किं दत्तं न तेनेह, किं किं नोपकृतं नृणाम् ।
येनागणितखेदेन, ज्ञानसत्रं प्रवर्तितम् ।।२२८।।

किं किं दत्तं न ? अपितु सर्वमेव तेनानिर्दिष्टनाम्ना जन्तुनेह लोके किं नोपकृतं ? अपितु सर्वमेव नृणां नराणां, येन केनचिदगणितखेदेनाप्यहस्तितप्रयासेन ज्ञानसत्रं ज्ञानमयसत्रागारं प्रवर्तितं विहितमिति ।

उक्तं च- **स्यादन्धस्य यथा चक्षु-र्दिग्मूढस्य च दिग्यथा ।**
मार्गो मार्गच्युतस्येव, ज्ञानमज्ञानिनस्तथा ।।१।।
इदं पुण्यं पापं भवति तदुपादानममुतो,
विजानीते सर्वं निहितगुरुविज्ञानबलतः ।
प्रवृत्तः पुण्याय प्रसभमप्रवृत्तस्तदितरा-
न्नरः संसाराब्धेरपसरति वेगात्प्लव इव ।।२।।
न ज्ञानदानाधिकमत्र किंचि-द्दानं भवेद्विश्वकृतोपकारम् ।
ततो विदध्याद्धि पुनः स्वशक्त्या, विज्ञानदाने सततप्रवृत्तिम् ।।३।।
पठति पाठयते पठतामसौ, वसनभोजनपुस्तकवस्तुभिः ।
प्रतिदिनं कुरुते य उपग्रहं, स इह सर्वविदेव भवेन्नरः ।।४।।२२८।।

अथाभयप्रदानदातुर्माहात्म्यमुपदर्शयन् तत्त्वतस्तदेवाह–

सर्वजीवाभयं भावा-दत्तं येन दयालुना ।
यद्दातव्यं तकत्सर्वं, दत्तं तेन महात्मना ।।२२९।।

सर्वजीवाभयं समस्तसत्त्वाभीतिर्भावाच्छुद्धान्तःकरणाद्दत्तं वितीर्णं **येन** केनचिद्दयालुना कृपालुना, **यद्दातव्यं** यत्किञ्चिद्वितरणीयं **तकत्सर्वं** तत्सकलमेव दत्तं वितीर्णं **तेनाभयदानदात्रा महात्मना** बृहदान्तरसत्त्वयुक्तेनेति ।

उक्तं च-**वित्तव्ययो भवति नात्र न चाऽऽत्मपीडा,**
नाऽऽदीयते किमु मुधा पृथुपुण्यराशिः ।
यस्मादनेकविभवव्ययवस्तुदाने-
ष्वेतद्विशिष्टतरमेव जिनैः प्रणीतम् ।।१।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यो यत्रातिकठोरकर्मवशगो जातौ समुत्पद्यते,
दुःखार्तोऽपि स तत्र नन्दति चिरं जीवस्वभावो ह्ययम् ।
इत्थं यः करुणापरेण मनसा स्वस्मिन्निवैतेष्वपि,
क्षेमार्थं यतते स एव भुवने जातो जगद्रक्षकः ॥२॥
मार्यमाणस्य हेमाद्रिं, राज्यं वाऽथ प्रयच्छतु ।
तदनिष्टं परित्यज्य, जीवो जीवितुमिच्छति ॥३॥
रसातलं यातु, यदत्र पौरुषं, कुनीतिरेषा शरणो ह्यदोषवान् ।
प्रहन्यते यद्बलिनाऽपि दुर्बलो हहा महाकष्टमराजकं जगत् ॥४॥

तथा च-**गोभूमिसुवन्नहिरण्ण-माइदाणाइं दिंति बहुया वि ।**
जे दिंति अभयदाणं, ते वीरला जीवलोगम्मि ॥५॥
पढिया वेया चउरो, जट्ठा जन्ना य तह तवो तविओ ।
जइ नत्थि जीवरक्खा, ता तं तुसकंडणं सव्वं ॥६॥
तं नाणं तं दाणं, सो य तवो तं च परमकोसल्लं ।
सव्वपयत्तेण सया, जीवाणं रक्खणं जत्थ ॥७॥
ता देह जहासत्तिं, अभयपयाणं जियाण सव्वाणं ।
जइ महह महंतसुहे, सव्वं सिद्धालये गंतुं ॥८॥

किंच-**दीहाउओ सुरूवो, सुहिओ सव्वंगसुंदरायारो ।**
सव्वत्थ होइ जीवो, अभयपयाणाणुभावेणं ॥९॥२२९॥

धर्मोपग्रहदानं स्वरूपतो भेदतश्च बिभणिषुः श्लोकद्वयमाह, तद्यथा-

धर्मोपग्रहदानं, यदुपष्टम्भात्करोति शुभकर्म ।
तेन च तारयति यति-र्भवाब्धेर्दायकं स्वं च ॥२३०॥
तच्च चतुर्धा वीरैः, शिवसुखफलसाधकं समाख्यातम् ।
दातृग्राहकशुद्धं, शुद्धं कालेन भावेन ॥२३१॥

धर्मोपग्रहदानं धर्मोपकारकं वितरणं **यदुपष्टम्भाद्यद्बलेन करोति** विधत्ते **शुभकर्म** शोभनानुष्ठानं, **तेन च** शुभकर्मणा **तारयति यतिः** साधुर्भवाब्धेर्दायकं दातारं **स्वं** चात्मानं च, **तच्च** तत्पुनश्चतुर्धा चतुष्प्रकारं **वीरैस्तीर्थकरादिभिः शिवसुखफलसाधकं** मोक्षसौख्यफलनिवर्तकं **समाख्यातं** कथितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दातृग्राहकशुद्धं शुद्धं कालेन भावेन दातृशुद्धं ग्राहकशुद्धं कालशुद्धं भावशुद्धं चेत्यर्थः, उक्तं च–

दत्तेन येन यतिधर्मशरीरयात्रा, निस्तारमेति तदुपग्रहदानमुक्तम् ।
तच्चान्नपानसदनौषधवस्त्रपात्र-शय्यासनादि कथितं विधिवद्विचित्रम् ॥१॥

दायकशुद्धं तदपि, ग्राहकशुद्धं च कालशुद्धं च । भावविशुद्धं दानं, विमुक्तये स्याच्चतुःशुद्धम् ॥२॥२३०-२३१॥

अथ भेदचतुष्टयमेव विवृण्वन्नाह–

यः प्रयच्छति पुण्यार्थं, यतिभ्यः शुद्धभावतः ।
सर्वाशंसाद्विनिर्मुक्तं, दातृशुद्धं तदुच्यते ॥२३२॥

स्पष्ट एवायं श्लोक उक्तं च–

रोमाञ्चाञ्चितविग्रहोऽमदमतिर्यः शुद्धवस्तुप्रदः,
प्रत्याशाविकलः कलङ्कविकलो ध्यायन्निदं चेतसि ।
धर्माधारशरीरधारणकृते पात्रप्रदत्तेन मे,
पूर्वोपार्जितकर्मणामनुदिनं स्यान्निर्जरानिर्वृतिः ॥१॥
इदं पात्रमिदं वित्त-मिदं चित्तं निरन्तरम् ।
सम्पन्नं यस्य मे सोऽहं, कृतार्थोऽस्मीति दायकः ॥२॥

अथ ग्राहकशुद्धमाह–

चराचरजगज्जन्तु-जातसन्त्राणकारिणे ।
ज्ञानदर्शनचारित्र-धारिणे ब्रह्मचारिणे ॥२३३॥
एवंभूताय शान्ताय, गुप्ताय च तपस्विने ।
दानं ग्राहकसंशुद्धं, जगाद जगतां गुरुः ॥२३४॥

चराचरा, जङ्गमस्थावरास्ते च जगज्जन्तवश्च विश्वजीवाश्च, तेषां जातानि सङ्घातास्तेषां सन्त्राणं रक्षणं तत्कारिणे तत्करणशीलाय चराचरजगज्जन्तुजातसन्त्राणकारिणे, ज्ञानदर्शनचारित्रधारिणे ब्रह्मचारिणे चेति सुगमम् ॥२३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंभूतायैवंप्रकाराय **शान्ताय** कषायोपशमात् **गुप्ताय** सम्यक्गुप्तियुक्तत्वात्, **चः** समुच्चये, **तपस्विने** द्वादशविधतपोनिरताय, दानमन्नपानादिवितरणं, यद्दीयत इति शेषः. तद् **ग्राहकशुद्धं**, ग्राहकः साधुस्तमाश्रित्य[1] शुद्धं निष्कलङ्कं **जगाद** कथयामास **जगतां** भुवनानां **गुरुर्धर्म**प्रतिपादकः सर्वज्ञ इत्यर्थः, इति श्लोकद्वयार्थः ॥२३४॥

अथ कालशुद्धमाह–

यत्काले दीयते दानं, तस्यार्घोऽपि न विद्यते ।
अकाले तु वितीर्णस्य, ग्राहकोऽपि न सम्भवी ॥२३५॥

व्यक्तार्थ एवायं श्लोकः, कालशुद्धमाश्रित्यान्यैरप्युक्तं-

यस्मिन्नेव हि काले, यतेः शरीरोपकारकं भवति ।
तस्मिन्नेव हि देयं, प्रतिदिवसं दानमनवद्यम् ॥१॥
तथा-**कालदिन्नस्स पहे-णयस्स अप्पो न तीरए काउं ।**
तस्सेवाथक्कपणा-मियस्स गिह्णंतया नत्थि ॥२॥

अथ भावशुद्धमाह–

आत्मनः स्वधनादेश्च, साफल्यमिति चिन्तयन् ।
यो दत्ते शुद्धभावेन, भावशुद्धं तदीरितम् ॥२३६॥

आत्मनः स्वस्य धनादेश्च द्रव्यादेश्चादिशब्दाज्जन्मजीवितपुत्रकलत्रपरिवारादिपरिग्रहः, **साफल्यं** सफलतामित्यमुना प्रकारेण चिन्तयन् तर्कयन् यः कश्चिद्दत्ते प्रयच्छति **शुद्धभावेन** निर्मलान्तःकरणेन **भावशुद्धं**आशयविशुद्धं तद्दानमीरितं कथितमिति उक्तं च-

तदिदमुचितपात्रं पुण्यसंपत्तिसाध्यं, धनमपि रमणीयं तद्यदेतस्य योग्यम् ।
अहह गृहनिवासः सार्थको मेऽद्य जात, इति हृदयविशुद्धिर्यत्र-तद्भावशुद्धम् ॥

अथ दातारं प्रशंसयन्नाह–

आसन्नसिद्धिकः कोऽपि, दानधर्मे सदा रतः ।
शेषस्य सङ्कुचत्येव, मनो दानभयाद् द्रुतम् ॥२३७॥

---

१ न साधुसमाश्रित्य- BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शूराणां पण्डितानां च, वाग्मिनां काव्यकारिणाम् ।
सर्वेषामपि चैतेषां, दानदाताऽतिदुर्लभः ॥२३८॥

श्लोकद्वयं सुगमम् ॥२३७-२३८॥ अथ दानफलं दर्शयन् दृष्टान्तानाह–

श्रेयांसश्चन्दना धन्या, कृतपुण्यकवाणिजः ।
इत्येवमादयो दृष्टा, दृष्टान्ता दानगोचराः ॥२३९॥

सुगमोऽयं श्लोकः ॥२३९॥

अथ प्रकरणं निगमयन् प्रायो गृहिणो दानमेवैकं संसारोत्तारकारीति दर्शयन्नाह–

अमुं भवाम्भोधिमगाधमुल्बणं, गृही कथङ्कारमपारमुत्तरेत् ।
निराश्रवे पोत इवाविनश्वरे, स दानधर्मे न कृतादरो यदि ॥२४०॥

अमुमिमं **भवाम्भोधिं** संसारार्णवमगाधमलब्धमध्यमुल्बणमुद्भटं **गृही** गृहस्थः **कथं** केन प्रकारेणा**पारम**विद्यमानपरतीर**मुत्तरेत्**परतीरं गच्छेन्निराश्रवे निश्छिद्रे **पोत इव** बोहित्थ इवा**विनश्वरे** विनाशरहिते **दानधर्मे न कृतादरो यदि** दाने विहितोद्यमो न स्यादित्येकविंशतिश्लोकसङ्क्षेपार्थः ॥२४०॥

श्रेयांसचन्दनार्यकृतपुण्यकादिकथानकान्यमूनि–

श्रेयांसकुमारकथा

बभूव भारते क्षेत्रे जम्बूद्वीपसमाश्रिते । कुरोर्जनपदस्यान्तः, पुरं **गजपुराभिधम्** ॥१॥
कुन्देन्दुशङ्खशुभ्रैश्च, यत्प्रासादैः समन्ततः । शरदम्भोदसङ्घातै-र्व्योमेव प्रविराजते ॥२॥
यत्र प्रधानरत्नौघ-खचितोच्चगृहावलिः । स्वर्णस्तम्भयुता भासा, हसतीवामरीं पुरीम् ॥३॥
यत्रेन्द्रनीलवैडूर्य-पद्मरागमया रुचः । अकालेऽपीन्द्रचापस्य, श्रियं तन्वन्ति जालकाः ॥४॥
रूपवन्तः सुभोगाढ्या, आदेयाः सुभगास्तथा । यत्र धर्मफलं शुद्धं, सञ्चयन्ति स्फुटं नराः ॥५॥
क्रीडावाप्यः शुभा यत्र, सदारामा गृहे गृहे । लीलाविलासयोग्यानि, शुभस्थानानि भोगिनाम् ॥६॥
तत्रेक्ष्वाकुकुलोत्पन्नो, राजा **सोमप्रभो**ऽभवत् । बाहुबलिनरेन्द्रस्य, पुत्रो भूरिगुणालयः ॥७॥
नमन्ननेकभूपाल-मौलिमालार्चितक्रमः । समस्तभुवनव्यापि-कीर्तिसरिन्महोदधिः ॥८॥
यः केलिमन्दिरं नीतेः, पुण्यानामनघाश्रयः । समुद्रो गुणरत्नानां, कलानां विपुलालयः ॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यो दुष्टनिग्रहव्यग्र; शिष्टानुग्रहणाग्रही । समग्रसुभगग्राम-ग्रामणीरग्रिमः सताम् ॥१०॥
आसीत्तस्य नरेन्द्रस्य, जनतानन्दकारकः । श्रेयसां सततस्थानं, **श्रेयांस** इति विश्रुतः ॥११॥
चन्द्रमेव कलाधारः, सद्वृत्तो यशसोज्ज्वलः । परं दोषाकरो नैव, न कलङ्ककलङ्कितः ॥१२॥
तथा तत्रैव वास्तव्यो, पुरश्रेष्ठी महर्द्धिकः । बुद्धया निर्जितवागीशो-ऽभवत् **सुबुद्धि**नामकः ॥१३॥
एवं सोमप्रभो राजा, बुभुजे प्रीतमानसः । सार्धं स्वपुत्रमित्राद्यैः, प्राज्यसाम्राज्यसम्पदम् ॥१४॥
अथैकदा सुधाशुभ्रे, प्रासादे सुमनोहरे । रत्नराजिनि पर्यङ्के, कुमरः सुप्तजागरः ॥१५॥
श्रेयांसाख्यः सतां मुख्यः, सुकृती सुन्दराकृतिः । रात्रौ सूचितकल्याण-मपश्यत्स्वप्नमुत्तमम् ॥१६॥
यथा किलातिविच्छायो, ध्यामित इव वह्निना । दवदग्ध इव स्थाणु-र्निःश्रीकः कनकाचलः ॥१७॥
मयकामृतकुम्भेन, सिक्तः स तु विशेषतः । सर्वतः शोभमानोऽसौ, दधौ चारुतरश्रियम् ॥१८॥
तथा **सुबुद्धिना** स्वप्ने, नगरश्रेष्ठिना किल । दृष्टं स्वस्थानतो भ्रष्टं, तिग्मांशो रश्मिमण्डलम् ॥१९॥
समुद्धृत्य कुमारेण, स्वस्थाने तन्निवेशितम् । ततो भास्वद्रुचां चक्रं, दधानं शुशुभेऽधिकम् ॥२०॥
सोमप्रभाभिधानेन, राज्ञापि ददृशे तथा । शत्रुसैन्यसमारब्धः, स्वप्ने कोऽपि महान्नरः ॥२१॥
कुमारस्तस्य साहाय्यं, ददौ तेनापि विद्विषः । हतविप्रहतान् कृत्वा, नाशितास्ते दिशोदिशि ॥२२॥
ततः प्रातः समुत्थाय, स्वप्नदर्शनविस्मितौ । श्रेयांसश्च सुबुद्धिश्च, जग्मतू राजमन्दिरे ॥२३॥
कृत्वा राज्ञः प्रणामादि, उपविष्टौ तदन्तिके । [1]तद्वा चोक्तं कुमारेण, विस्मयोत्फुल्लचक्षुषा ॥२४॥
यथा तात ! मया रात्रौ, दृष्टः स्वप्ने महाचलः । सर्वतोऽपि गतश्रीको, विच्छायश्च विरूपकः ।२५।
मयाभिषेचि सौवर्ण-कुम्भैरमृतपूरितैः । ततोऽतीव रराजासौ, विस्फुरद्भूमिमण्डलः ॥२६॥
एवं स्वप्नो निजो राज्ञा, श्रेष्ठिना च निवेदितः । ततश्च स्वस्वबुद्धया ते, विचारयितुमुद्यताः ॥२७॥
परं सम्यग्न जानन्ति, स्वप्नानां कीदृशं फलम् । ततो बभाण राजेन्द्रो, भो भो आकर्ण्यतामिति ।२८।
स्वप्नानामहमेतेषां, जाने सामान्यतः फलम् । कुमारस्यैव कल्याणं, किमप्येतदुपस्थितम् ॥२९॥
एवं स्वप्नविचारं ते, कृत्वा विस्मितमानसाः । तत उत्थाय सर्वेऽपि, ययुर्गेहे निजे निजे ॥३०॥
अथ युगादिभूपालो, युगादियतिपुङ्गवः । युगादिभिक्षुकश्चैव, युगादिश्रीजिनेश्वरः ॥३१॥
विंशतिपूर्वलक्षाणि, सुराधीशनतक्रमः । योऽद्भुतरूपसंपन्न-स्तस्थौ कौमारवासके ॥३२॥
सुरेन्द्रकृतसाम्राज्या-भिषेको नरपुङ्गवः । आकरः सर्वनीतीनां, सर्वविद्यासमाश्रयः ॥३३॥
यश्च प्रदर्शयामास, प्रजानां हितवाञ्छया । कुम्भकारादिशिल्पानि, लोकव्यवहारांस्तथा ॥३४॥
त्रिषष्टिपूर्वलक्षाणि, दर्शयन् सकलाः कलाः । प्रजानां यः प्रजापालः, प्राज्यं राज्यं प्रभुक्तवान् ॥३५॥
अथ विभज्य पुत्रेभ्यः, पृथ्वीग्रामादिसङ्कुलम् । दत्त्वा संवत्सरं याव-न्महादानं किमिच्छया ॥३६॥
त्यक्त्वा प्राज्यं महाराज्यं, सम्पूर्णं सर्वसम्पदा । प्रतिपद्य च सद्दीक्षां, सर्वसत्त्वसुखावहाम् ॥३७॥

---

१ सोऽवाचि - BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा कच्छमहाकच्छ-प्रमुखप्रौढभूभुजाम्। सार्धं चतुःसहस्रचा च, विनीताया: पुरस्तत: ।३८।
निर्गत्य निर्जिताशेष-दुर्वारान्तरशात्रव: । कच्छादिभि: परित्यक्तो, मौनस्थत्वादिति क्रमात् ॥३९॥
दिने दिने परिभ्राम्यन्, भिक्षाहेतोर्गृहे गृहे । भिक्षां कदापि नो लेभे, वस्त्राद्यैश्च न्यमन्त्र्यत ॥४०॥
यतो भिक्षुकलोकस्या-भावादेव न जायते । तदा भिक्षाप्रचारोऽपि, तेन भिक्षा न लभ्यते ॥४१॥
एवं च श्रीजिनाधीशो, नाभेयो भुवनप्रभु: । नीरागो निरहङ्कारो, निःसङ्गो निष्परिग्रह: ॥४२॥
विजहार विनाऽऽहारं, मौनवृत्त्या निरुत्सुक: । पूर्णसंवत्सरं याव-त्पुरग्रामाकुलां महीम् ॥४३॥
एवं विहरमाणोऽसौ, हस्तिनागपुरं गत: । भिक्षार्थं च पुरे तत्र, प्रविवेश महाप्रभु: ॥४४॥
विनाहारेण विच्छायो, ददग्ध इवाचल: । शशीव घनसञ्छन्न:, सन्मणिवदसंस्कृत: ॥४५॥
अतीव जीर्णविच्छायो, महास्तूप इवोच्चलन् । विवर्णाकृतसंस्कार:, सत्प्रासाद इवाथवा ॥४६॥
क्षेत्रं सद्गुणशस्यानां, सन्मित्रं सर्वदेहिनाम् । धर्मसत्रं तु भव्यानां, पात्रं विततत्तप: श्रियाम् ॥४७॥
पञ्चधाचारसम्पन्न:, पञ्चाश्रवविवर्जक: । महाव्रतानि पञ्चापि, दुर्धराणि दधद् भृशम् ॥४८॥
पुण्यराशिरिवाध्यक्ष-श्चिन्तामणिरिवातुल: । श्रीमदादिजिनाधीश:, प्राविशन्निजमन्दिरे ॥४९॥
दृष्ट: स्वस्थोपविष्टेन, निजगेहगवाक्षके । श्रीश्रेयांसकुमारेण, दिगालोकं प्रकुर्वता ॥५०॥
दृष्ट्वा भगवन्नेपथ्यं, कुमारोऽथ व्यचिन्तयत् । दृष्टपूर्वमिदं मन्ये, कथं कुत्र कदेति वा ? ॥५१॥
तस्येत्थं कुर्वतस्त्वीहा-पोहमार्गगवेषणम् । श्रेयांसस्य समुत्पन्नं जातिस्मरणमुत्तमम् ॥५२॥
तेनाऽऽलोकि जिनेन्द्रस्य, स्वस्यापि च भवाष्टकम् । अतीतकालसम्बन्धि, ततश्चैवमचिन्तयत् ॥५३॥
प्रतिपितामहस्याढच-रूपमालोकि यादृशम् । तादृशमेव मया दृष्ट-मितस्तृतीयके भवे ॥५४॥
पुर्यां पुण्डरिकिण्यां च, जिनलिङ्गमुपेयुष: । बहुधा वैरसेनस्य, श्रीमत्तीर्थकृतस्तदा ॥५५॥
तदेष भगवानत्र, भिक्षाहेतोर्गृहे मम । समेत्यज्ञजने नित्य-मलब्धाहारदुर्बल: ॥५६॥
स यावच्चिन्तयत्येवं, तावदेको नर: किल । आगत: कुम्भमादाय, वरेक्षुरससम्भृतम् ॥५७॥
अत्रान्तरे कुमाराय, रत्नशोभिगृहाङ्गणे । श्रीमदादिजिनाधीश:, कल्पवृक्षमिवागत: ॥५८॥
श्रेयांसोऽपि समायात-स्तत्रानन्दितमानस: । तमिक्षुरससम्पूर्ण-कुम्भमादाय सत्वरम् ॥५९॥
[1]न्यमन्त्रयच्च सानन्दं, रसकुम्भेन तेन स: । भगवन्! कल्पते तेऽयं, ततो भगवतापि हि ॥६०॥
सर्वलक्षणसम्पूर्णो, निजपाणि: प्रसारित: । तेनाऽक्षेपि रसस्तत्र, न पपात महीतले ॥६१॥
यतो यत्क्षिप्यते वस्तु, तीर्थनाथकराञ्जलौ । अर्केन्द्वोस्तच्छिखा याति, न पतत्येव भूतले ॥६२॥
ततोऽसौ तीर्थनाथेन, पारितो मधुरो रस: । अरक्तद्विष्टचित्तेन, सर्वत्रैलोक्यबन्धुना ॥६३॥
अत्रान्तरे कुमारस्य, प्रासादप्राङ्गणेऽपतन् । अर्धत्रयोदशस्वर्ण-कोट्यो देवैरितादिति ॥६४॥
उल्ललास महानाद:, सुरदुन्दुभिसम्भव: । चेलोत्क्षेपश्च सानन्दै-स्तत्राकारि नरामरै: ॥६५॥

---

१ निमन्त्र° BPJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सद्गन्धोदकवृष्टिश्च, मुक्ता पांशुप्रशान्तिकृत् । दशार्धवर्णसद्गन्ध-पुष्पवृष्टिस्तथैव च ॥६६॥
धन्योऽयं पुण्यवानेष, कृतार्थोऽयं विवेकवान् । जन्म सुलब्धमेतस्य, श्लाघामित्याप लोकतः॥६७॥
अहो दानमहो दान-मेवं दत्तं फलावहम् । अहो धन्यः सुपुण्योऽय-मित्येवं मुखराननः ॥६८॥
आगत्य मिलितो भूयान्, विस्मयोत्फुल्ललोचनः । जनो नगरवास्तव्यः, श्रेयांसस्य गृहाङ्गणे ॥६९॥
तथा कच्छमहाकच्छ-प्रमुखास्ते च तापसाः । जिनपारणकं श्रुत्वा, श्रेयांसगृहमागताः ॥७०॥
सोमप्रभमहीपाद्या, अन्ये च बहवो नृपाः । श्रुत्वाऽऽगता गृहे तत्र, सानन्दाश्च सकौतुकाः ॥७१॥
पृष्टवन्तश्च तत्सर्वं, कुमारमतिविस्मिताः । यथैवं दीयते भिक्षा, कथं ज्ञातमिदं त्वया ? ॥७२॥
सोऽप्याह श्रूयतां भो भो!, मद्वचः सावधानकैः । यथैवंविधपात्रेभ्यो, भक्त्या भिक्षैव दीयते ॥७३॥
न हिरण्यसुवर्णानि, नो वस्त्राभरणानि च । न चाश्वगजकन्यादि, कदाचिदपि दीयते ॥७४॥
दत्तया भिक्षयैवात्र, जायते पुण्यमुत्तमम् । सुसाधुभ्यः प्रदत्तेन, स्वर्णादिना न किञ्चन ॥७५॥
तथोक्तं यच्च युष्माभि-र्ज्ञातमेतत्त्वया कथम् ? । तदपि श्रूयतां सर्वं, कथ्यमानं मयाऽधुना ॥७६॥
मयाऽऽलोक्य जगन्नाथं, जिनं भिक्षार्थमुद्यतम् । जातिस्मरणमुत्पन्नं, ज्ञातं पूर्वभवाष्टकम् ॥७७॥

तद्यथा-अहं **स्वयंप्रभा** देवी, भगवान् **ललिताङ्गकः** ।
ईशानसंज्ञके कल्पे, देवोऽभवन्महर्द्धिकः ॥७८॥

च्युत्वा महाविदेहे नौ, **श्रीमतीवैरजङ्घकौ** । आस्व सर्वर्द्धिसम्पन्नौ, तत्परं मिथुनौ ततः ॥७९॥
देवौ सौधर्मकल्पे तु, **केशवो** वैद्यपुत्रकः । जिनो जज्ञेऽभयसेनो-ऽहं जातः श्रेष्ठिनन्दनः ॥८०॥
ततश्चाच्युतकल्पे नौ, देवौ जातौ महर्द्धिकौ । ततः **पुण्डरिकिण्यां** च, सारथिचक्रवर्तिनौ ॥८१॥
चक्रिणा **वैरनाभेन**, तदा प्रव्रजता सता । प्रव्रजितः सहैवाहं, **वैरसेनजिनान्तिके** ॥८२॥
श्रुतं च मयका तत्र, यथासौ वैरनाभकः । प्रथमो भारते क्षेत्रे, तीर्थनाथो भविष्यति ॥८३॥
ततः कृत्वा चिरं कालं, तपः संयममुत्तमम् । मृत्वा देवौ विमाने नौ, जातौ सर्वार्थनामनि ॥८४॥
तदेष भगवांस्तत्र, ततश्च्युत्वा जिनोऽजनि । अहं श्रेयांसनामात्र, भवतामपि विश्रुतः ॥८५॥
इत्यादि सर्ववृत्तान्तं, स्वभवाष्टकगोचरम् । कुमारः कथयामास, यथा दृष्टं यथा श्रुतम् ॥८६॥
आकर्ण्येदं जनः सर्वो, विस्मयाकुलमानसः । कुमारं श्लाघयामास, हृष्टचित्तो मुहुर्मुहुः ॥८७॥
धन्योऽयं पुण्यवानेष, कृतार्थोऽयं किमुच्यते । अस्यैव श्लाघ्यतमं मन्ये, गोत्रं जन्म च जीवितम्।८८।
यतो येनाज्ञलोकस्य, मध्ये भिक्षां प्रयच्छता । श्रीमदादिजिनेन्द्रस्य, पण्डितायितमुच्चकैः ॥८९॥
अथाह पुनरप्येवं, कुमारस्तं जनं प्रति । पूर्वोपलब्धस्वप्नानां, श्रूयतामधुना फलम् ॥९०॥
यन्मयामृतकुम्भेन, स्वप्ने सिक्तः सुराचलः । विच्छायः संस्ततोऽत्यर्थं, दधौ शोभां समन्ततः ॥९१॥
तस्यार्थोऽयं विनाहारं, विच्छायः सन् जिनेश्वरः । मयेक्षुरसकुम्भेना-भिषिक्तः शुशुभेऽधिकम् ॥९२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तातेनापि यदालोकि, स्वप्ने [1]महाप्रमाणतः । युद्ध्यमानो नरः सार्धं, शक्रसैन्येन भूयसा ॥९३॥
तस्यार्थो युद्ध्यमानस्य, सार्धं कर्मभिरष्टभिः । जिनस्यादायि साहाय्यं, ददतेक्षुरसं मया ॥९४॥
श्रेष्ठिनापि यदालोकि, रवेः रश्मिसहस्रकम् । भ्रश्यत्तन्निजकस्थाने, मयोद्धृत्य निवेशितम् ॥९५॥
तस्यार्थः केवलज्ञानं, भ्रस्यद्भक्तादिना विना । समुद्धृतं मयैवैतत्, पारयता परमेश्वरम् ॥९६॥
श्रुत्वेदं स्तोतुमारब्धः, कुमारं विस्मितो जनः । ज्ञानदाक्षिण्यदानादि-सद्गुणाकृष्टमानसः ॥९७॥
अहो ते कुमर! ज्ञान-महो ते सुविवेकिता । अहो ते वाक्यचातुर्य-महो दानमहो यशः ॥९८॥
यथा तीर्थकृतां मध्ये, वृषभो भुवनप्रभुः । कुमार त्वं तथैवाद्यो, दातृणामिह गीयसे ॥९९॥
त्रैलोक्यरङ्गमध्ये च, वरदानपताकिका । सुरासुरनराध्यक्ष-महारि कुमर ! त्वया ॥१००॥
त्वया कुन्देन्दुसंकाश-यशसा पूरितं जगत् । रसेन श्रीजिनाधीश[2]-आत्मा न्यवेशि निवृतौ ॥१०१॥
इत्थं कुमारसम्बन्धि-सद्गुणग्रामसम्पदम् । स्तुवन्नेवं गतो लोकः, सर्वो निजनिजेगृहे ॥१०२॥
भगवानपि निसङ्ग-स्ततो निर्गत्य धीरधीः । विजहार पुरग्राम-ग्रामाकुलमहीतलम् ॥१०३॥

श्रेयांसकथानकं परिसमाप्तमिति ॥

---

१ मु. J । महाप्रमाणः BPC ॥
२ BPC । धीश-स्यात्मा न्यँ मु. । धीशः आत्मन्य J ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्दनबाला कथा

अस्त्यत्रैव जगत्ख्याते, जम्बूद्वीपे शुभालये। प्रसिद्धे भारते क्षेत्रे, गङ्गासिन्धुविभक्तके॥
अङ्गाजनपदे रम्ये, सरःशैलादिसङ्कुले। अलकेव धनिस्थानं, चम्पानाममहापुरी॥२॥
तत्राभवद्धराधीशो, दातृ(दधि)वाहननामकः। सूर इव प्रतापेन, य आक्रामन्महीतलम्॥३॥
बभूव तस्य रूपादि-गुणरत्नौघधारिणी। धारिणीनाम सद्देवी, चेटकराजपुत्रिका॥४॥
अन्यदा सा तमिस्रायां, सुप्ता चरमयामके। कल्पवृक्षलतां स्वप्ने, समुल्लासिसुपल्लवाम्॥५॥
पुष्पफलर्द्धिसंयुक्तां, भूरिलोकोपकारिणीम्। निजश्रीनिर्जिताशेष-शाखिसन्दोहसम्पदम्॥६॥
समालोक्य प्रबुद्धा च, निजभर्त्रे न्यवेदयत्। तेनावाचि यथा भद्रे!, कल्पवृक्षलतेव ते॥७॥
सर्वस्याश्रितलोकस्य, सम्पूरितमनोरथा। नारीजनगुणग्राम-रत्नराजिविराजिता॥८॥
सर्वसौन्दर्यसम्पूर्णा, पूर्णसौभाग्यशालिनी। [1]शालिसुकोमलालापा, भविष्यति सुपुत्रिका॥९॥
श्रुत्वा भर्तुरिदं वाक्यं, परमानन्दनिर्भरा। तमुद्वाह सा गर्भं, कालेऽसूत च दारिकाम्॥१०॥
कुलाचारविधानेन, निवृत्ते सूतिकर्मणि। महद्धर्चा विहितं नाम, वसुमतिरिति स्फुटम्॥११॥

इतश्च-वत्साजनपदस्योच्चैः, सारालङ्कारसन्निभा।
स्वश्रीजितसुरावासा, कौशाम्बी नाम सत्पुरी॥१२॥

तत्र त्रासितपरानीकः, शतानीको नृपोऽभवत्। शौर्यवीर्यसदौदार्य-गाम्भीर्यादिगुणोदधिः॥१३॥
अभून्मृगावती नाम, प्रीतिकृत्तस्य सत्प्रिया। दुहिता चेटकस्यैव, रक्ता सर्वज्ञशासने॥१४॥
द्वयोरपि तयोर्वैरं, बभूवाऽऽबद्धरोषयोः। दातृवाहनभूपाल-शतानीकाह्वयोर्मिथः॥१५॥
अन्यदा च शतानीको, गतश्चम्पापुरीं प्रति। अवस्कन्देन बाधायै, दातृवाहनभूभुजः॥१६॥
ततो बाढं बलिष्ठोऽपि, शतानीकेन भूभुजा। अलक्षमागतत्वेन, नाशितो दातृवाहनः॥१७॥
चम्पायां लुट्यमानायां, सर्वतो लुण्टकैर्जनैः। यो यद् गृह्णाति यद् ग्राहे, तत्तस्यैवेति घोषिते॥१८॥
स्वगेहं प्रति धावन्ती, धारिणी सुतया सह। एकेनौष्ट्रिकपुंसाऽसौ, गृहीता दैवयोगतः॥१९॥
लात्वा चम्पां शतानीके, निवृत्ते सह सेनया। पप्रच्छे औष्ट्रिको मार्गे, केनाप्येवं कुतूहलात्॥२०॥
यथा भो भोः किमेताभ्या-मबलाभ्यां करिष्यसि ?। स प्राह बृहती येयं, सा मे भार्या भविष्यति।२१।
इमां तु बालिकां नीत्वा, विक्रेष्यामि स्वके पुरे। ततो मे मनसोऽभीष्टं, भूरिद्रव्यं भविष्यति॥२२॥
श्रुत्वेदं धारिणी देवी, तद्वचः श्रुतिदुःखदम्। शोकविह्वलसर्वाङ्गा, रुदन्तीदमचिन्तयत्॥२३॥
हा हा हतक विधातः !, किं तव युक्तमीदृशम्। विधातुं कर्म निस्त्रिंश-मस्मिन् जने निरागसि॥
हा हा हताश ! हे धातः !, किं त्वया कृतमीदृशम्। यदेषोऽपि पदास्पृश्यः, कलत्रं मां चिकीर्षति॥२५॥

---

१ सालीनकोऽ BPC॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वियोजिता स्वबन्धुभ्यो, भ्रंसिता राज्यसम्पदः ।
एतावता न तुष्टोऽसि, शीलं मे भङ्क्तुमिच्छसि ! ॥२६॥

एवं विचिन्तयन्त्याश्च, रुदन्त्याश्च मुहुर्मुहुः । लपन्त्या दीनवाक्यानि, शोचयन्त्या अनारतम् ॥२७॥
निन्दन्त्या निजकर्माणि, पूर्वजन्मकृतान्यलम् । दिशो दिशि क्षिपन्त्याश्च, भीत्या तरललोचने ॥२८॥
शीलभङ्गभयोद्भूत-दुःखसन्तप्तचेतसः । पश्यन्त्या एव धारिण्याः, पुद्गस्तेन पापिना ॥२९॥
वसुमतिर्भयोद्भ्रान्त्या, सुकुमारशरीरका । मार्गे गन्तुमशक्तासौ, ताडिता कम्बया दृढम् ॥३०॥
दृष्ट्वेदं धारिणी देवी, गाढं दूनितमानसा । घ्नन्तं वसुमतिं भूय-स्तं पुमांसमभाषत ॥३१॥
हे भ्रातर्हे महाभाग !, हे बन्धो ! बन्धुवत्सल ! । मत्पुत्रिकामिमामेवं, मा मा हंसीर्दयापरः ॥३२॥
इत्यादिचाटुवाक्यानि, लपन्त्या एव सोऽधमः । भूयोऽपि ताडयामास, तां बालां विगतत्रपः ॥३३॥
नराधमस्य तस्येवं, दृष्ट्वा तद्दुष्टचेष्टितम् । सञ्जातचित्तसङ्क्षुब्धा, प्राणांस्तत्याज धारिणी ॥३४॥
अथासौ पुरुषो दृष्ट्वा, देवीमृत्युमतर्कितम् । निन्ये वसुमतिं मार्गे, संस्थापयन् प्रियोदितैः ॥३५॥
क्रमेण प्राप कौशाम्ब्यां, गतवांश्च निजे गृहे । भोजनादिक्रियां कृत्वा, ततो विक्रयहेतवे ॥३६॥
हसन्ती निजरूपेण, रूपश्रियं रतेरपि । लावण्याम्बुप्रवाहेण, प्लावयन्ती महीतलम् ॥३७॥
पूरयन्ती दिशां चक्रं, देहोत्थरुचिमण्डलैः । स्वसौन्दर्यश्रिया सर्वाः, क्षिपन्ती सुरसुन्दरीः[1] ॥३८॥
सम्पूर्णपूर्णिमाचन्द्रं, निरस्यन्ती मुखश्रिया । दन्तद्युत्या सुगत्या च, हसन्ती हंसमण्डलम् ॥३९॥
चकितचञ्चलप्रांशु-प्रेङ्खच्चारुविलोकनैः । सर्वाः पराभवन्ती च, भयद्रुतमृगाङ्गनाः ॥४०॥
आनीय तेन सा बाला, दातृवाहनपुत्रिका । तृणानि मस्तके दत्त्वा, हट्टमार्गेऽवतारिता ॥४१॥
ततस्तत्र तथावस्थां, तामालोक्य जनो बहुः । मिलितः कौतुकाक्षिप्तो, ययाचेऽथ यथेच्छया ॥४२॥
अथ धनावहाख्येन, श्रेष्ठिना श्रेष्ठचेतसा । तत्राऽऽयातेन सा दृष्टा, दृष्टेरानन्ददायिका ॥४३॥
चिन्तितं च यथैतस्या, दृश्यते सुन्दराकृतिः । तथा महत्कुले कस्मि-न्नुत्पत्तिरनुमीयते ॥४४॥
तस्मादेनां यथालाभं, सङ्गृह्णामि प्रयत्नतः । सर्वलक्षणसम्पूर्णां, सर्वावयवसुन्दराम् ॥४५॥
एतत्सङ्ग्रहणे नूनं, प्रवरं प्रीतिकारणम् । अस्याः पित्रादिभिः सार्धं, सम्बन्धो मे भविष्यति ॥४६॥
विचिन्त्येदं यथालाभं, श्रेष्ठिना जगृहे च सा । नीत्वा वेश्मनि मूलायाः, श्रेष्ठिन्याश्च समर्पिता ॥४७॥
उक्ता च श्रेष्ठिना मूला, यथेयं बालिका प्रिये ! । पुत्रिकेव मया तुभ्यं, प्रदत्ता पाल्यतामिति ॥४८॥
तयाप्येवं करोमीति, प्रतिपन्नं सहर्षया । ततो वसुमतिस्तत्र, ववृधे स्वगृहे यथा ॥४९॥
कोमलालापसौजन्य-विनयादिगुणश्रिया । शीतलं कुर्वती लोकं, चन्द्रिकेव महीतलम् ॥५०॥
यथार्थगुणनिष्पन्नं, श्रूयमाणं सुखप्रदम् । प्राप चन्दनबालेति, विख्यातं नाम चापरम् ॥५१॥
एवमीप्सितसम्पत्त्या, वर्धमाना दिने दिने । कलाभिः सह लावण्यं, सर्वाङ्गेषु पुपोष सा ॥५२॥

---

१ °न्दरी- BPJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा बहिरायातो-ऽपराह्णेऽसौ धनावहः । गेहे च न तदा कोऽपि, विद्यते दैवयोगतः ॥५३॥
एका चन्दनबालैव, क्रीडन्ती तत्र तिष्ठति । पितरं बहिरायातं, दृष्ट्वा ततः समुत्थिता ॥५४॥
[१]दाकवारकमादाय, ददावभ्युक्षकं पितुः । आसनं च यथासन्नं, निषण्णस्तत्र सोऽपि च ॥५५॥
ततस्तस्याः पितुः पादौ, क्षालयन्त्याः कथञ्चन । केशपाशस्तदायासात्, सञ्जातस्त्यक्तबन्धनः ॥५६॥
प्रलम्बत्वान्महीपीठे, श्रेष्ठिना प्रलुठन्नसौ । लीलायष्ट्या समुद्धृत्य, तत्पृष्टे विनिवेशितः ॥५७॥
मूलयाऽलोकि निःशेष-मेतच्छ्रेष्ठिविचेष्टितम् । तिष्ठन्त्या निजगेहस्य, रम्ये जालगवाक्षके ॥५८॥
चिन्तितं च निजे चित्ते, यथेदं नैव सुन्दरम् । दुहितेयममुष्याद्य, कल्ये भार्या भविष्यति ॥५९॥
अहं हि जरसाऽऽक्रान्ता, हीयमाना दिने दिने । इयं तु नितरां रम्ये, समारोहति यौवने[२] ॥६०॥
तदयं नास्ति मे श्रेष्ठी, न जनो न च मन्दिरम् । इयमेतस्य गेहस्य, स्वामिनीति वितर्कये ॥६१॥
तद्यावन्नैव निःशेष-कार्यनाशः प्रजायते । तावन्निपातयाम्येना-मुपायेनैव केनचित् ॥६२॥
चिकित्सितुं सतां युक्तो, व्याधिः कोमल एव हि । प्रवृद्धस्य तु तस्येह, चिकित्सा हि सुदुष्करा ॥६३॥
चिन्तयन्त्या इदं चित्ते, मूलाया असमञ्जसम् । प्रयोजनवशाच्छ्रेष्ठी, बहिर्भूयोऽपि निर्ययौ ॥६४॥
ततोऽवतीर्य साक्षेपं, शिरोगेहाद् द्रुतं द्रुतम् । वहन्त्या मत्सरं घोरं, मूलयाऽनर्थमूलया ॥६५॥
आकार्य नापितं तत्र, मुण्डयित्वा च तच्छिरः । क्षिप्ता च पादयोर्गाढं, बलवन्निगडावलिः ॥६६॥
नीत्वाऽपवरकेऽत्यन्त-मन्धकारे भयानके । समुत्सार्याऽन्नपानादि, क्षिप्ता चन्दनबालिका ॥६७॥
दत्तं च तालकं तत्र, जनः सर्वोऽपि वारितः । यथा भो ! श्रेष्ठिनो नेदं, समाख्येयं कदाचन ॥६८॥
यः पुनः कोऽपि तस्येदं, कथयिष्यति मन्दधीः । अयमेव हि तस्यापि, दण्डः कार्यो मया ध्रुवम् ॥६९॥
एवं विधाय सा मूला, मूलं पातकसन्ततेः । जाताऽस्वच्छस्वभावेन, निजव्यापारतत्परा ॥७०॥
अथागते द्वितीयेऽह्नि, भोजनावसरे तथा । सम्पृष्टः श्रेष्ठिना तत्र, सर्वः परिजनो निजः ॥७१॥
यथा भो दृश्यते नात्र, किमु चन्दनबालिका ? । कथ्यतां कथ्यतां मह्यं, क्रियते येन भोजनम् ॥७२॥
न तस्य पृच्छतः कोऽपि, कथयामास मानवः । अनर्थमूलमूलाया, भयसन्त्रस्तमानसः ॥७३॥
चिन्तितवांस्ततश्चित्ते, यथा सा रमते क्वचित् । स्नानादि कुरुते किञ्चि-त्सुप्ता वा क्वापि तिष्ठति ॥७४॥
एवमेव तृतीयेऽपि, विगते खलु वासरे । चतुर्थे च समायाते, श्रेष्ठिनाऽकारि निश्चयः ॥७५॥
अद्य चन्दनबालायां, दृष्टायामेव भुज्यते । नान्यथा कथ्यतां तथ्यं, तददर्शनकारणम् ॥७६॥
श्रुत्वेदं चिन्तयामास, वृद्धा नारी दयापरा । इयं हि सुचिरं बाला, जीवत्वेव ममासुभिः ॥७७॥
अहं तु जरसाऽऽघ्राता, किं करिष्यामि जीविता । इत्यालोच्य तया सर्वं, सत्यमेव निवेदितम् ॥७८॥
ततः शीघ्रं समागत्य, श्रेष्ठिना तत्र कुञ्चिकाम् । गृहीत्वोद्घाटितं द्वारं, तदन्तः प्रविवेश च ॥७९॥
दृष्टा च सा तथावस्था, पृष्टा च स्निग्धया गिरा । यथा ते बाधते किं नु, बुभुक्षेति बभाण सा ॥८०॥

१ BJPC । जलपात्रं समानीय, चरणक्षालनाय सा । आसनं च तथाऽयच्छ-न्निं मु. ॥ २ °नं BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोजनं ते ददामीति, वीक्षितं तत्र सर्वतः । न किञ्चित्तादृशं दृष्टं, मूलयाऽपहृतं यतः ॥८१॥
विशेषतो वीक्ष्यमाणेन, तत्र स्थाने समन्ततः । दृष्टा पर्युषिता माषाः, सूर्पकोणव्यवस्थिताः ॥८२॥
आनीय श्रेष्ठिना शीघ्रं, ततस्तस्यै समर्पिताः । एतेऽपि भुज्यतां ताव-त्क्रियतां प्राणधारणम् ॥८३॥
इत्युक्त्वा तत्पदप्रोत-निगडोद्दलनहेतवे । वेगेन गतवान् श्रेष्ठी, लोहकारस्य मन्दिरम् ॥८४॥
अथ चन्दनबालापि, दृष्ट्वाऽवस्थां तथा निजाम् । युवावस्थां च संस्मृत्य, चिन्तयामास मानसे ॥८५॥
यदि मे निर्मितं जन्म, विशाले राजमन्दिरे । मुदिते सर्वर्द्धिसम्पन्ने, सम्पूज्ये महतामपि ॥८६॥
धात स्ततः प्रमथ्यैवं, किं कृतेयं विडम्बना ? । महापराभवंस्थानं, दासैरपि सुदुःसहा ॥८७॥
यदिदमीप्सितं कर्तुं, त्वया मामभि हे विधे ! । तद्गर्भस्थाऽपि किं नाहं, प्राणेभ्यो व्यपरोपिता ? ॥८८॥
किं न च्युताऽस्मि गर्भाद्वा, मृता वा किं न शैशवे । किं वा कृतं मया पूर्वं, दुष्कृतं व्यसनावहम् ॥८९॥
येनेदृशं सतां शोच्यं, जनकारुण्यकारणम् । निरागसोऽपि सञ्जातं, व्यसनं मम सम्प्रति ॥९०॥
इत्यादि सा निजं जन्म, निन्दित्वा बहुधा ततः । क्षुत्क्षाम कपोलं च, निधाय करपल्लवे ॥९१॥
तेषु सूर्पककोणस्थ-कुल्माषेषु निजां दृशम् । पातयित्वा विशेषेण, शोचयामास चन्दना ॥९२॥
षष्ठस्य पारणे मेऽद्य, कुल्माषाः समुपस्थिताः । बुभुक्षाबाधिता बाढं, तदेतानपि पारये ॥९३॥
यतः-सर्वेषामपि जन्तूनां, बाधितानां बुभुक्षया । सरसं विरसं वापि, भोजनं प्रतिभासते ॥९४॥
परं यदा स्वगेहस्था, तपस्तेपेऽतिलघ्वपि । तदाऽहं सर्वसङ्घाय, दत्ते चाश्नामि नान्यथा ॥९५॥
ततोऽद्य यदि कोऽपीह, समेति सगुणोऽतिथिः । तस्मै माषानिमान् दत्त्वा, पारयामि सुनिर्वृता ॥९६॥
एवं चिरं विचिन्त्यैषा, दानैकरसमानसा । ऊर्ध्वीकृत्य शिरः किञ्चि-द्गेहद्वारं प्रलोकते ॥९७॥
इतश्च–
तस्यामेव हि कौशाम्ब्यां, **महावीरो** जिनेश्वरः । निर्जिताखिलदुर्वार-परीषहमहारिपुः ॥९८॥
विशेषतः किल जग्राह, चतुर्विधमभिग्रहम् । द्रव्यतः क्षेत्रतश्चैव, कालतो भावतस्तथा ॥९९॥
द्रव्यतः सूर्पकोणस्था, माषाः पर्युषिता मम । कल्पन्ते नान्यथेत्येवं, प्रतिज्ञां कृतवानसौ ॥१००॥
क्षेत्रतो यदि सा दात्री, गेहोदुम्बरसंस्थिता । एकं पादं बहिः कृत्वा, मध्ये चैकं प्रयच्छति ॥१०१॥
कालतस्तु समायाते, दिवायामे तृतीयके । भिक्षुकेषु निवृत्तेषु, सर्वेष्वपि समन्ततः ॥१०२॥
भावतस्तु महाराज-विशालकुलसम्भवा । महादुर्गदशावस्था, व्यपनीतशिरोरुहा ॥१०३॥
बलवन्निगडश्रेणि-नियन्त्रितपदद्वया । रुदन्ती शोचयन्ती च, निन्दन्ती च स्वदुष्कृतम् ॥१०४॥
यद्येवं व्यसनं प्राप्ता, राजपुत्री प्रदास्यति । तदा ग्राह्या मया भिक्षा, नान्यथेति कथञ्चन ॥१०५॥
इत्थं कृतप्रतिज्ञोऽसौ, **वर्धमानो** जिनेश्वरः । बम्भ्रमीति निराशंस-स्तस्यां पुरि दिने दिने ॥१०६॥
भिक्षां कदापि नो लेभे, निर्गूढाभिग्रहो यतः । अन्यदा हिण्डमानस्तु, प्रविष्टो मन्त्रिणो गृहे ॥१०७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुगुप्ताख्यस्य तत्रास्मै, दास्या भिक्षोपढौकिता । अगृहीत्वैव निष्क्रान्त-स्तां भगवांस्ततो गृहात् ॥
दृष्टमिदममात्यस्य, सुनन्दाभिधभार्यया । पृष्टा च सा यथा भिक्षां, जिनः किं न गृहीतवान् ? ॥१०९॥
तयोक्तमेवमेवासौ, निर्गच्छति दिने दिने । मासश्चतुर्थकश्चास्य, निराहारस्य वर्तते ॥११०॥
ततः सुनन्दयाऽभाणि, कुर्वन्त्या खेदमुच्चकैः । भगवतोऽभिग्रहः कोऽपि, भविष्यतीति मे मतिः ॥१११॥
निवेदितममात्यस्य, सोपालम्भमिदं तया । यथा किं सचिवत्वेन, किं वा तव मनीषया ! ॥११२॥
यदि त्वं नैव जानासि, जिनेन्द्राभिग्रहागमौ । मन्त्री प्राह न मे ज्ञातो, विहरन् भगवानिह ॥११३॥
तेन नाकारि तत्तप्ति-र्नाऽभक्तिर्मे जिनेश्वरे । सुरासुरनराधीश-पूजनीयपदाम्बुजे ॥११४॥
साम्प्रतं तु यथाशक्त्या, यतिष्ये निश्चितं प्रिये! । यथा विज्ञायते शीघ्रं, जिनस्यायमभिग्रहः ॥११५॥
मृगावतिप्रतीहारी, तत्र प्रयोजनागता । विजया नाम श्रुत्वेदं, न्यवेदयन्मृगावतेः ॥११६॥
अस्या अपि बभूवोच्चै-रधृतिर्जिनभक्तितः । एतन्निवेद्य भूपाय, राज्ञी भूयोऽप्यभाषत ॥११७॥
आयातमपि नो वेत्सि, यद्यत्र जिनपुङ्गवम् । यदि वाभिग्रहं तस्य, न पूरयसि किं त्वया ? ॥११८॥
पूरयामि तमित्युक्त्वा, समुत्थाय नरेश्वरः । आस्थानमण्डपं गत्वा, समाकार्य [च] मन्त्रिणम् ॥११९॥
बभाणेदं यथा मन्त्रि-न्नाकारयाखिलानपि । पाखण्डिनोऽत्र वास्तव्यान्, सचिवेनाऽपि तथा कृतम् ॥
अथ पाखण्डिनः सर्व, आयाता नृपसन्निधौ । पृष्टा नियमसारूप्यं, तेऽप्याचक्षुः सविस्तरम् ॥१२१॥
ततो लोकः समग्रोऽपि, समादिष्टो महीभुजा । एवं प्रदातुमारब्धो, भक्तपानं पदे पदे ॥१२२॥
द्रव्यतश्चित्रद्रव्याणि, मण्डकप्रभृतीन्यलम् । क्षेत्रतो विविधस्थान-स्थायिनो दानदायिनः ॥१२३॥
कालतो दिवसस्याद्य-मुहूर्तप्रहरादिषु । भावतो हास्यगीतादि, कुर्वन्नाक्रन्दनानि वा ॥१२४॥
प्रत्यहं ददतोऽप्येवं, लोकस्यासौ मुनीश्वरः । न किञ्चिदेव गृह्णाति, ततो लोकैर्विचिन्तितम् ॥१२५॥
अहो वयमिहाधन्या, नूनं पुण्यविवर्जिताः । अस्माकं जीवितं जन्म, विभवोऽपि निरर्थकः ॥१२६॥
येनास्मदीयकं वस्तु, भक्तपानादि किञ्चन । सद्गुणरत्नपात्रस्य, न जिनस्योपयुज्यते ॥१२७॥
एवं तत्र जनः सर्वः, पुरमन्तःपुरं धनम् । जीवितं जन्म गोत्रं च, सर्वं व्यर्थममन्यत ॥१२८॥
अथ पञ्चदिनोने च, सम्पूर्णे मासषष्ठके । अदीनो विहरन्नेवं, महावीरो महामुनिः ॥१२९॥
निःसङ्गो निरहङ्कारो, निर्विकारो निराश्रयः । नीरागो निरलङ्कारो, निराहारो निरामयः ॥१३०॥
निर्मोहो निर्ममीकारो, निराकाङ्क्षो निराश्रवः । जगद्वीरो जगन्नाथो, जगदानन्दकारकः ॥१३१॥
जगद्वन्द्यो जगज्ज्येष्ठो, जगज्जन्तुदयापरः । श्रीमद्धनावहश्रेष्ठि-मन्दिरेऽसौ प्रविष्टवान् ॥१३२॥
अथ सा चन्दना पूर्व-व्यावर्णितदशान्तरा । समालोक्य महावीरं, प्रविशन्तं व्यचिन्तयत् ॥१३३॥
धन्याऽहं कृतपुण्याऽहं, कृतार्था कृतलक्षणा । यथा ममाष्टमस्यान्ते, आजगाम महामुनिः ॥१३४॥
यद्येष कुरुते मह्यं, माषैरभिनुग्रहम् । तदा ददामि निःशेष-दुःखानां हि जलाञ्जलिम् ॥१३५॥
यावद्विचिन्तयत्येवं, तावत्तत्र समागतः । वीरः समीरिताशेष-दुर्जयान्तरशात्रवः ॥१३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुत्र सर्वोत्तमं पात्रं, क्व च दातव्यमीदृशम्। इति साश्रु सखेदं च, चन्दना गद्गदस्वरम् ॥१३७॥
बभाषे भगवन्नेते, कल्पन्ते तव माषकाः। जिनोऽप्युपयुजे सम्यक्, स्वकीयाभिग्रहं प्रति ॥१३८॥
पूर्यते सर्व एवायं, मदीयोऽभिग्रहोऽधुना। एवं विचिन्त्य वीरेण, ततः पाणिः प्रसारितः ॥१३९॥
चन्दनयाऽपि सानन्दं, विशुद्धाध्यवसायया। तत्रस्थया समुत्थाय, भगवान् प्रतिलम्भितः ॥१४०॥
अत्रान्तरे समुद्भूतानि, पञ्च दिव्यानि तत्क्षणम्। सुवर्णवृष्टिः [1]सुराकृष्टिः, सुरदुन्दुभिनिःस्वनः ॥१४१॥
पुष्पगन्धोदवृष्टिश्च, चेलोत्क्षेपश्च पञ्चमः। सुरैरकारि केशाश्च, तस्या मूर्ध्नि पुनर्नवाः ॥१४२॥
कुर्वन्ति तारझङ्कारं, पादयोर्निगडान्यपि। सर्वरत्नमयोत्प्रेङ्ख-न्नूपुराणि प्रजज्ञिरे ॥१४३॥
अध्यासितं विशेषेण, तद्वपुः सर्वतः श्रिया। श्रुत्वेदमागतः श्रेष्ठी, राजा मन्त्री जनस्तथा ॥१४४॥
दृष्टं च श्रेष्ठिनो गेहं, स्वर्णवृष्ट्यादिशोभितम्। चन्दना च लसत्कान्त्या, सश्रीकं दधती वपुः ॥१४५॥
राजा च वक्तुमारब्धो, विस्मयोत्फुल्ललोचनः। यथा त्वमेव भो श्रेष्ठिन्, ! धन्यः पुण्यः कृतार्थकः ॥१४६॥
यस्येदृशी तवाशेष-गुणसम्पूर्णपुत्रिका। श्रीवीरस्य ययाऽकारि, पारणकं जगत्प्रभोः ॥१४७॥
अहमत्र महीपाल-स्त्वं श्रेष्ठी जनविश्रुतः। तथापि श्रीजिनेन्द्रेण, तवैवानुग्रहः कृतः ॥१४८॥
स एव सकलश्रीभिः, सानन्दमवलोक्यते। यस्यैवं भूष्यते पादै-र्जैनचन्द्रैर्गृहाङ्गणम् ॥१४९॥
यावदेवं नृपस्तत्र, श्रेष्ठिनमभिनन्दति। अन्तःपुरमहल्लेन, तावद् दृष्टाऽर्यचन्दना ॥१५०॥
क्षणेन प्रत्यभिज्ञाता, पतित्वा पादयोस्ततः। रोदितुं च प्रवृत्ताऽसौ, मनोदुःखौघनिर्भरः ॥१५१॥
तथा रुदन्नसौ पृष्टो, राज्ञा विस्मितचेतसा। यथा भो रुद्यते केन, हेतुना कथ्यतां मम ॥१५२॥
स जगाद यथा राज-न्नियं वसुमतिसञ्ज्ञिता। चम्पाधिपस्य सत्पुत्री, धारिणीदेहसम्भवा ॥१५३॥
अत्राऽऽयाता महीनाथ !, न जाने केन हेतुना। एतत्पूर्वतरावस्थां, स्मृत्वा स्नेहाच्च रोदिमि ॥१५४॥
चन्दनापि ततो राज्ञा, पृष्टा सर्वं तयाऽपि हि। निवेदितं नरेन्द्राय यावद्वीरस्य पारणम् ॥१५५॥
ततो राज्ञा निजोत्सङ्गे, चन्दनाऽभिनिवेशिता। चुम्बिता मूर्धदेशे च, मृगावत्या तथैव च ॥१५६॥
अथ चन्दनयाऽवाचि, संसारभ्रान्तिभीतया। यथा राजंस्त्वया देव्या, तातेन च विशेषतः ॥१५७॥
सस्नेहं समनुज्ञाता, संसारोच्छेदहेतवे। धर्मं विधातुमिच्छामि, तन्मां मुञ्चत साम्प्रतम् ॥१५८॥
यतोऽयं घोरसंसारो, महादुःखो महाभयः। सद्भिः सदैव सन्त्याज्यः, स्वात्मनः सुखमिच्छुभिः ॥१५९॥
ततः प्रोक्तं नरेन्द्रेण, धर्मो वत्से! सुदुष्करः। तदत्रैव यथाकामं, भोगान् भुङ्क्ष्व गृहे मम ॥१६०॥
इत्यादि वदतो राज्ञः, शक्रः प्राह यथा नृप !। इयं हि चन्दना चारु-चन्द्रचन्दनशीतला ॥१६१॥
आद्या श्रीवर्धमानस्य, भविष्यति प्रवर्तिनी। तस्मात्तावत्त्वमेवैनां, पालयस्व नरेश्वर ! ॥१६२॥
यावदुत्पद्यते ज्ञानं, लोकालोकप्रकाशकम्। केवलाख्यं जिनेन्द्रस्य, त्रैलोक्यश्रीशिरोमणेः ॥१६३॥
तथास्या एव निःशेषं, द्रव्यमेतन्महीपते !, । स्वेच्छया यस्य कस्यापि, ददातु लातु वा स्वयम् ॥१६४॥

१ सुरोत्कृष्टिः - BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्रस्येदं समाकर्ण्य, वाक्यं श्रुतिसुखावहम् । प्रददौ श्रेष्ठिने सर्वं, द्रव्यं वसुमतिर्निजम् ॥१६५॥
ततो निन्ये शतानीक-श्चन्दनां निजमन्दिरे । दीनादिभ्यो महादानं, ददती हृष्टमानसा ॥१६६॥
प्रवेशिता च भूपेन, कन्यान्तःपुरमन्दिरे । समीहितार्थसम्पत्त्या, पाल्यमाना च तिष्ठति ॥१६७॥
वीरस्य केवलज्ञाने, समुत्पन्ने च चन्दना । दीक्षामादाय सम्पूर्णां, सम्पाल्य च शिवं ययौ ॥१६८॥

इति **चन्दनाऽऽर्याकथानकं** समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतं **कृतपुण्यकथानकं** कथ्यते–

अस्ति वरविजयकलितः, सम्पूर्णो वाहिनीशतसहस्रैः । पृथ्वीधरकृतसेवो, **जम्बूद्वीपो** नरेन्द्र इव ॥१॥
तत्रास्ति भरतवर्षे, ग्रामाकरनगरसङ्कुलो रम्यः । **मगधाख्यजनपदः** खलु, नानाविधपत्तनाकीर्णः ॥२॥
तत्र च नगरं रम्यं, **राजगृहं** नाम वरगृहोपेतम् । तत्पालयति नरेशः, **श्रेणिकनामा** निहतशत्रुः ॥
रूपेण रतिसमाना, इष्टाः कान्ताः प्रिया मनोज्ञाश्च । तस्याऽऽसन् वरभार्याः, पतिभक्ताश्चेल्लणाप्रमुखाः ॥
ताभिः सह वरभोगान्, भुङ्क्तेऽसौ निहितराज्यगुरुभारः ।
मन्त्रिप्रवरे मन्त्रिणि निजपुत्रेऽभयकुमाराख्ये ॥५॥
इतश्च जनपदे तस्मि-न्नेकस्मिन्नस्ति सुन्दरे ग्रामे । एका तर्णकपाली, गुरुतरदारिद्र्यदुःखार्ता ॥६॥
तस्याश्च सुतो बाल-स्तर्णकपरिरक्षणं प्रकुर्वाणः । एकत्रारण्येऽसौ, यतिजनयोग्ये शुभे देशे ॥७॥
पश्यत्येकं साधुं, कायोत्सर्गेण संस्थितं सन्तम् । तपसा शोषितदेहं, तत एवमसौ विचिन्तयति ॥८॥
अस्यैव जन्मजीवित-मानुष्यादीनि जगति सफलानि । यश्चैवमरण्यस्थः, कुरुते विविधं तपःकर्म ॥९॥
मन्येऽस्ति पुण्यलेशो, ममापि येनैव दर्शनं प्राप्तः । तस्मादभिवन्द्यैनं, करोमि पूतं निजात्मानम् ॥१०॥
सञ्चिन्त्यैवं प्रणतो, मुनिवरपदपङ्कजं भक्तियुक्तः । इत्थं दिने दिनेऽसौ, तं साधुं वन्दते भक्त्या ॥११॥
प्रतिदिवससाधुदर्शन-वशेन शुभशुद्धचमानभावस्य । तस्यान्यदा कदाचि-ज्जातस्तत्रोत्सवः कोऽपि ॥
अथ याचित्वा दुग्धा-दि तत्र नारीजनाच्च तन्मात्रा । निजपुत्रकृते राद्धा, क्षीरेयी प्रवररसयुक्ता ॥१३॥
उपविष्टाय च भोक्तुं, सुताय गेहाङ्गणे वरस्थालम् । दत्तं घृतगुडसंयुत-वरपायससम्भृतं कृत्वा ॥१४॥
प्रविवेश च गृहमध्ये, यावत्प्रयोजनेन तज्जननी । तावत्स मुनिः प्राप्तो, यः पूर्वं वन्दितस्तेन ॥१५॥
आलोक्य तमायातं, भक्तिवशोल्लसितबहलरोमाञ्चः । चिन्तयितुं संवृत्तो, हर्षाश्रुजलप्लुतालोकः ॥१६॥
कृतपुण्यसञ्चयोऽहं, त्रीण्यपि यस्येह ममाद्य मिलितानि । सच्चित्तं सद्वित्तं, गुणरत्नयुतं च सत्पात्रम् ।१७।
अहमेव सकलकल्याण-मालिकास्थानमद्य सञ्जातः । यस्येह ममेदृक्षा, जाता सामग्रिका सकला ॥१८॥
एवं च चिन्तयित्वा, कृत्वा रेखाद्वयं निजस्थाले । दास्यामीति त्र्यंशं, भावयन् समुत्थितो बालः ॥१९॥
गत्वा साधुसमीपे, ब्रूते यदि कल्पते तदादत्स्व । विज्ञाय [1]शुद्धभावं, मुनिनापि धृतं ततः पात्रम् ॥२०॥
तत्र त्रिभागमात्रं, क्षिप्त्वा भूयो विचिन्तयत्येवम् । अत्यन्तस्तोकमिदं, द्वितीयभागं पुनः क्षिपति ॥२१॥
चिन्तितमनेन पुनरपि, यद्यत्र पतेत्किञ्चिदम्ब्लादि । एतत्तदा विनश्यति, दत्ते तदपि त्रिभागं सः ॥२२॥
अभिवन्द्य तमुपविष्टः, स्थाने तत्रैव पुनरपि तथैव । साधौ गते च जननी, गृहमध्यान्निर्जगाम बहिः ॥२३॥
दृष्टं तदवस्थं त-न्नूनं, प्रभुक्तमनेन तत्सर्वम् । एवं परिचिन्त्य तया, पुनरपि परिपूरितं स्थालम् ॥२४॥
रङ्कत्वेन च भुक्तं, सर्वं तेनापि तस्मिन्नजीर्णे । रात्रौ मृत्वा शुभभाव-योगतो राजगृहे नगरे ॥२५॥

---

१ शुद्धिभावो- BJ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इभ्यधनपालगेहे, कुक्षौ भद्राभिधानभार्यायाः । उदपादि ततो लोकः, प्रभाषते एष कृतपुण्यः ॥
यश्चैवंविधगेहे, धनधान्यसमृद्धिबन्धुरे धनिकम् । उत्पत्स्यते महात्मा, प्रसूतिसमयेऽथ सञ्जाते ॥२७॥
सूते भद्रा सर्वाङ्ग-सुन्दरं दारकं प्रसृतकान्तिम् । वर्धापितश्च दास्या, सुतोत्पादेन धनपालः ॥२८॥
अथ गीतनृत्यवादित्र-चित्रवस्त्रादिवस्तुविस्तारम् । श्रेष्ठिजनतुष्टिकरं, सुतजन्ममहोत्सवं कुरुते ॥२९॥

कृतपुण्यक इति भणितो, लोकेनायं यदत्र गर्भस्थो ।
तेन कृतमस्य जनकैः, 'कृतपुण्यक' इति वरं नाम ॥३०॥

क्रमशः प्रवर्धमानः, सकलकलाकौशलान्वितो जातः । तरुणीजनमोहकरं, नवयौवनमथ समारूढः ॥
इभ्यवरबालिकायाः, समानवररूपयौवनगुणायाः । जनकैः प्रशस्तदिवसे, विधानतो ग्राहितः पाणिम् ॥
यावन्न ददाति मनो, विषयेषु कलासु रसिक इति कृत्वा । भद्रा बभाण ताव-द्धनपालमभीदृशं वचनम् ॥
स्वामिन्नयमकृतार्थः, सर्वो धनविस्तरो यतश्चैषः । पुत्रो निःस्पृहचित्तः, प्रदृश्यते कामभोगेभ्यः ॥
तस्मान्नाथ! तथा कुरु, यथा श्रयत्येष कामजसुखेषु । अमुना धनेन किं नो, विलसति यन्नेह कृतपुण्यः ॥
धनपालेनाभिहितं, भद्रे! मा वाक्यमीदृशं भाणीः । यस्माद्विनाऽपि शिक्षा-मेतानि भवन्ति यत उक्तम् ॥
आहारभयपरिग्रह-मैथुनसंज्ञा विनोपदेशेन । गृह्णन्ति सर्वसत्त्वा-स्तदत्र किं शिक्षया भद्रे ! ॥३७॥
किञ्च स्वभावतोऽपि हि, मदनाग्निरङ्गिनां ज्वलत्येव । को वा नाम सकर्णो, दीप्तेऽग्नौ क्षिपति तृणभारम् ॥
भद्राऽपि ततो ब्रूते, यदपीदं प्रियं तथापि मम तोषः । भवतीत्थमेव यस्मा-त्तदेतदविचारितं क्रियताम् ॥
निश्चयमवेत्य तस्या-स्ततोऽपि दुर्ललितगोष्ठिमध्येऽसौ । क्षिप्तस्तेन कुमार-स्तया च सह सर्वतो भ्रमति ॥
प्रेक्षणकमण्डपादिषु, काननवापीसरोवरादिषु च । भ्राम्यन्नसौ प्रविष्टः, कदाचिद्वेश्याजनगृहेषु ॥४१॥
तत्र च **वसन्तसेना**-गणिकाया रूपयौवनयुतायाः । गेहे सुन्दरसुरतो-पचारचातुर्ययुक्तायाः ॥४२॥
यावच्च तया क्षिप्तः, कामोत्कोचनकथाभिरत्यन्तम् । तावत्तन्मित्रजनो, द्रागेव बहिर्विनिष्क्रान्तः ॥४३॥

स तया निजविज्ञानै-स्तथा तथा रञ्जितः सुरतकाले ।
अजनि यथा तच्चित्तो, विनिवृत्त्य मनोऽन्यतः स्वीयम् ॥४४॥

भुङ्क्ते तया च सार्धं, यथेच्छया विविधविषयवरसौख्यम् । द्रव्यं च यथाकामं, तत्पितरौ प्रेषतः सततम् ॥
इत्थं तत्रावसतो, गातानि पञ्चत्वमस्य जनकानि । ज्ञातानि न तेन ततः, प्रेषयति धनं च तद्भार्या ॥
अथ वर्षे द्वादशमे, धनदाश्रमसंनिभं तकद्गेहम् । द्रव्यक्षयेण जातं, दुर्गतगेहं यथा शून्यम् ॥४७॥
क्षीणे द्रव्ये सर्वे, ततस्तया प्रेषितं निजाभरणम् । तद् दृष्ट्वा कुट्टिन्या, निजचित्ते चिन्तितं चैवम् ।४८।
नूनमयं निःसारः, सम्प्रति जातस्तया तदाभरणम् । रूपकसहस्रकलितं, पुनरपि सम्प्रेषितं तस्याः ।४९।
भणिता वसन्तसेना, भद्रे ! परिमुञ्च कामुकमिमं तु । आकृष्टाशेषधनो, यदेष जातोऽतिनिःसारः ।५०।
अस्माकमेवमेव हि, कुलधर्मो यदुत निर्धनस्त्याज्यः । तत्पुत्रि ! कुलाचारं, मा मुञ्च भजस्व धनवन्तम् ॥
सा जल्पति मा मात-र्भाणीरेवं यतोऽमुना मह्यम् । दत्तं प्रभूतवित्तं, को वाऽन्यो दास्यते चैवम् ॥५२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आसन्नमश्रेण्या अपि, पर्याप्तकं भविष्यतीदं नः । परमप्यन्यद्दास्यति, मातरयं मामको नाथः ॥५३॥
न च कुलधर्मेणापि तु, निन्द्यजनासेवितेन मम कार्यम् ।
किञ्चाम्ब ! मत्प्रियोऽयं, गुणरत्नविभूषितो धनिकः ॥५४॥
दुहितुर्निश्चयमेनं, विज्ञायाऽऽकारसंवरं कृत्वा । कार्यं हृदये धृत्वा, तूष्णीका संस्थिता धूर्ता ॥५५॥
रात्रौ तु जने सुप्ते, पर्यङ्के सुप्तमेव निजपुम्भिः । मोचयते देवकुले, वसन्तसेनां समभिवञ्च्य ॥५६॥
निद्राक्षये विबुद्धो, विलोकयत्येष तत्र दिक्चक्रम् । ननु किमिदमिन्द्रजालं, किंवा मतिविभ्रमो मेऽयम् ? ॥
किं वापि स्वप्नोऽयं, जातः किं मे विपर्ययश्चैषः । इति चिन्तयंश्च भणितो, निकटस्थितदासचेटचाऽसौ ॥
मा ! कुरु विकल्पजालं, [1]त्वं च तया स्वकुलधर्ममनुसृत्य ।
निष्कासितो बलादपि, हे सुभग ! वसन्तसेनया ॥५९॥
तद्गच्छ निजे गेहे, येन गृहीत्वा व्रजामि पर्यङ्कम् । श्रुत्वेदं स विषण्णो, निजकं प्रति प्रस्थितो गेहम् ॥
तेन च विलोकितं त-न्मनुष्यवर्जितमरण्यमिव घोरम् । असुवर्णालङ्कारं, कुकविजनरचितमिव काव्यमृत ॥
पितृवनमिव भीषणं, वनमिव दवदग्धमपगतश्रीकम् । सर इव हिमहतकमलं, गतसारं सैन्यमिव राज्ञः ॥
एवंविधं प्रपश्यन्, यावदसौ विशति तत्र साशङ्कः । तावदभ्युत्थितोऽसौ विलोक्य निजभार्यया शीघ्रम् ॥
दत्तासन उपविष्टः, पादौ च क्षालितौ ततश्च सा पृष्टा । जननीजनकगृहादिक-मशेषवृत्तान्तकं निजकम् ॥
कथितस्तयाश्रुपातं, कुर्वन्त्या मूलतः स वृत्तान्तः । श्रुत्वा तदस्य दुःखं, सञ्जातं नरकगतिसदृशम् ॥
सन्धीर्य चात्मानं, स्वयमेवापृच्छते ततो भार्याम् । किं किञ्चिदस्ति वित्तं, तया तदाभरणमादर्शि ॥
तच्चैव भाण्डमूल्यं, प्रादाय प्रस्थितः स दिग्यात्राम् । स्थित्वा कतिपयदिवसान्, गृह एव च मित्रलज्जातः ॥
कृत्वास्याः फलबन्धं, सार्थे सम्प्रस्थिते ततः सोऽपि । सार्थासन्ने सुप्तः, पर्यङ्के शून्यदेवकुले ॥६८॥
इतश्च -
तत्रैव पत्तनवरे, **सुधन**नामा समस्ति वित्ताढ्यः । भार्या च तस्य **महिमा**, मायासद्बुद्धिदुर्ललिता ॥
धनदत्तो नाम सुत-स्तस्या वररूपयौवनसमेतः । पित्रा ततो विभूत्या, समानवररूपकलितानाम् ॥
इभ्यकुलबालिकानां, चतसृणां ग्राहितः करं यावत् । तावज्जनकः पञ्च-त्वमुपगतो दैवयोगेन ॥७१॥
धनदत्तोऽपि कदाचि-द्देशान्तरगमनहेतवे नित्यम् । लोभं दर्शयमानै-र्वनिश्चयं कारितो मित्रैः ॥७२॥
शोभनदिने गृहीत्वा, चतुर्विधं भाण्डमुदधितीरेऽसौ । तैरेव समं मित्रैः, सम्प्राप्तः सुभटशतयुक्तः ॥७३॥
आरुह्य यानपात्रं, परतीरं प्राप्य लब्धबहुलाभः । स्वपुरं प्रति विनिवृत्तः, प्राप्तो यावज्जलधिमध्ये ॥७४॥
तावन्मृदुभाजनमिव, गिरिशिखरं प्राप्य यानपात्रं तत् ।
भग्नं तस्मिन् सोऽपि च, धनदत्तः प्राप्तवान् निधनम् ॥७५॥
उद्धरितेनैकेन च, गत्वा पुरुषेण तत्र महिमायै । प्रच्छन्नमिदं गुह्यं, कथितं सम्यक् स च तयापि ॥७६॥

---

१ त्वमं च या- BJ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दानेन सङ्ग्रहीतुं, भणितः प्रच्छन्नमेव गुह्यमिदम्। कर्तव्यं तेनापि च, प्रतिपन्नं झटिति तद्वचनम्॥७७॥
चिन्तयति च सा चित्ते, मम वध्वो भर्तृविरहितास्तावत्।
अन्यमपि पतिममूषां, करोमि सुतसन्ततिनिमित्तम्॥७८॥
इति सञ्चिन्त्य बहिष्टा-द्रात्रौ नगराद्विनिर्गता साथ। दृष्टश्च सुखं सुप्तः, कृतपुण्यो देवकुलिकायाम्॥७९॥
उदपाटि ततश्च तया, पर्यङ्कारूढ एव निजपुरुषैः। मुक्तो निजगृहमध्ये, क्रमेण यावद्विबुद्धश्च॥८०॥
कण्ठे ततो लगित्वा, क्षणं रुदित्वा च सा वदत्येवम्। बालोऽपि हृतस्त्वमितो, वत्सक! मम मन्दपुण्यायाः॥
अन्वेषितश्च सकले, भूपीठे पुरनगादिदेशेषु। वार्तापि नैव लब्धा, तेनाहं दुःखिता पुत्र!॥८२॥
अथ पुनमर्म कथित-स्त्वागमो वत्स! मतिमता मुनिना। गेहाच्च निर्गताहं, रात्रौ लब्धश्च सत्पुण्यैः॥८३॥
दृष्टश्च कल्पवृक्षः, स्वप्ने गृहमागतो मया पुत्र!। तन्मे त्वयाद्य सार्धं, सञ्जातं दर्शनं पुण्यैः॥८४॥
तत्कुत्र वर्धितस्त्वं?, कालमियन्तं स्थितश्च वा कुत्र?।
किं चापि सुखं दुःखं?, त्वयानुभूतं तदाचक्ष्व॥८५॥
अथवेदं मम हृदयं, वज्रशिलासञ्चयेन ननु घटितम्। यत्तव विरहेऽपि दृढं, न गतं शतखण्डमेवेदम्॥
याहं तव विरहेऽपि तु, जीवामि सुनिर्घृणा महापापा। अवतारणकं तु कृता, गुणसागर! तव शरीरस्य॥८७॥
त्वं पुत्र! देवगुरुभिः, कालमियन्तं सुरक्षितो विधुरे। मज्जीवितेन तदलं, कल्पायुर्भव महाभाग!॥८८॥
सत्तेजसा सतीनां, प्रभावतः सर्वदेवतानां च। परिवर्धय निजवंशं, विलस तथा विभवविस्तारम्॥८९॥
देशान्तरे विपन्नो, भ्रातृजनीनां च पतिरमूषां तु। तच्चतसृणामपि त्वं, कुलभूषण! भव चिरं स्वामी॥९०॥
इति तस्या मतिवैभव-वशरञ्जितमुणितगूढचरितोऽपि। प्रतिपद्यते वचोऽस्या, विस्मयरसकौतुकापूर्णः॥
अथ ता वध्वोऽपि तया, भणिता नीत्वा रहस्यके स्थाने। एवं स्थिते च कार्ये, विधत्त भर्तारममुमेव॥९२॥
यद्वेदेष्वपि भणितं, क्लीबप्रव्रजितगतमृतेषु रमणेषु। [यौवनवती]रमणीनां, क्रियते पतिरन्यतम एव॥
तत्क्षेत्रजमपि पुत्रं, जनयित्वा कुरुत निजकुले रक्षाम्। युष्मत्सत्कं द्रव्यं, मा राजकुले [1]गच्छतु॥९४॥
कुन्त्याश्च महासत्याः, पुत्रा अन्यान्यपतिभिरुत्पन्नाः। श्रूयन्ते तद्वत्साः, प्रतिपद्यध्वं मम वचांसि च॥
इत्यादि तया धूर्त्या, तथा तथा शास्त्रलोकयुक्त्योघैः। भणिता यथा तकाभिः, प्रतिपन्नं तन्निर्विचाराभिः॥
अथ तस्य समं ताभि-र्निबिडतरप्रेमतन्तुबद्धाभिः। भुञ्जानस्य सुभोगान्, सुरलोके सुरवरस्येव॥९७॥
जाताः सुन्दरपुत्रा-स्तासां चतसृणामपि सुरूपाः। क्रमशः समतिक्रान्ता, द्वादश संवत्सराश्चैवम्॥९८॥
अथ ता बभाषे महिमा, परपुरुषमिमं हलाः परित्यजत। सिद्धे स्वकीयकार्ये, सम्प्रति किमनेन विधृतेन?॥
प्रतिभाषितं वधूभि-र्माभाणीर्मातरीदृशं वचनम्। येन वयं परिभुक्ताः, कथमिव नो भवति भर्ता सः?॥
रचिता च तया भृकुटि-स्तकाभिरपि तां विलोक्य संरुष्टाम्।
भयकम्पितहृदयाभिः, प्रतिपन्नं झगिति तद्वचनम्॥१०१॥

---

१ गमत्सर्वै-BJ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृष्टा च ततः श्वश्रू-र्यथाम्ब ! तव सम्मतेन सम्बलकम् ।
एतस्य किमपि कुर्मो, यथेप्सितं कुरुत साऽवोचत् ॥१०२॥

ताभिस्ततः सहर्षं, सुन्दररत्नानि मोदकेष्वतः । क्षिप्तानि प्रच्छन्नं, सुखी भवत्विति विकल्पेन ॥१०३॥
कृत्वा मोदकपूर्णा, स्थपिकास्य निवेशिता शिरोदेशे । श्वश्वा प्रपाय्य मद्यं, सुखसुप्तक एव कृतपुण्यः ॥
उत्पाट्य खट्वया सह, नीत्वा तत्रैव पुनरपि स मुक्तः । यत एव च देवकुला-दानीतः पूर्वमासीच्च ॥
अत्रान्तरे स सार्थः, समागतस्तत्र रात्रिरिति कृत्वा । न विवेश नगरमध्ये, विहितावासश्च सन्तस्थौ ॥
ज्ञात्वा समागतं तं, निजकान्तोदन्तबोधनार्थाय । यावत्तत्र तदीया, भार्या शीघ्रं समायाता ॥१०७॥
तावत्तथैव सुप्तं, पश्यति पर्यङ्क एव निजकान्तम् । सच्छायं च सुवेषं, नितान्तमुपचितशरीरं च ॥१०८॥
तं तदवस्थं दृष्ट्वा, सहर्षचित्ता भृशं समुत्थाप्य । आदाय ततः खट्वा-स्थपिकां च गता निजे गेहे ॥
कृतपुण्यकोऽपि सुविदित-भावार्थो निजकमन्दिरं प्राप्तः । पश्यति वसन्तसेनां, तत्र गतोऽबद्धवेणीकाम् ॥
यावच्छतपाकादिभि-रभ्यञ्जनमस्य कर्तुमारब्धम् । तावत्तत्पुत्रः किल, समागतो लेखशालायाः ॥
पतितश्च जनकपदयो-र्बुभुक्षितो भोजनं च मार्गयति । न च तत्र किञ्चिदन्नं संसिद्ध्यति तादृशं तावत् ॥
दृष्ट्वा रुदन्तमेनं, वसन्तसेना ततः समाकृष्य । स्थपिकातो वरमोदक-मस्मै तोषाय दत्तवती ॥११३॥
सोऽपि गतः सन्तुष्टो, मोदकमादाय लेखशालायाम् । पश्यति च तस्य मध्ये, सुन्दररत्नं महामूल्यम् ॥
दृष्ट्वा तदसावानन्द-निर्भरो घुण्टको मया लब्धः । दर्शितवानन्येभ्यो, मणिरयमिति निगदितं छात्रैः ॥
तदमुं दद्यः कुल्लु-रिकाय वरमण्डकादि येनासौ । दत्ते प्रतिदिनमस्म-भ्यमिति भणित्वा ददुस्तस्मै ॥११६॥
प्रक्षिप्तस्तेनापि च, निकटस्थितनीरकुण्डमध्येऽसौ । तस्य प्रभावतस्त-त्स्थलमिव प्रतिभासते नीरम् ॥
तदसौ तेन ज्ञातो, यथैष जलकान्तसन्मणिर्नूनम् । सङ्गोप्यः ततः सम्यग्, दत्तं तेभ्यो यथायोग्यम् ॥११८॥

इतश्च-कृतपुण्यकाय कथितं, प्रियङ्गुलतिकाभिधानया चेट्या ।
स्वामिन् ! यदा विमुक्तो, वसन्तसेनाजनन्या त्वम् ॥११९॥
तदवेत्य सर्वतोऽपि च, गवेषितो न च प्रवृत्तिमात्रमपि ।
युष्माकं विज्ञातं, विदधाति ततः स्वामिनी चैतत् ॥१२०॥

वेणीबन्धं सितवस्त्र-निवसनं माल्यगन्धपरिहारम् । अतिदुर्धरगतपतिका-व्रतं चरन्ती स्थितवतीयम् ॥
कालमियन्तं तव गेह-संस्थिता तुच्छकान्नकृतवृत्तिः । आकर्ण्येदं तामभि, भूयोऽजनि सानुरागोऽसौ ॥
अथ चान्यदा प्रपातुं, नीरं नद्या जले समवतीर्णः । सेचनकराजहस्ती तन्तुकजीवेन निगृहीतः ॥१२३॥
पूत्कृतं नृपपुंभिः-स्तत् श्रुत्वा व्याकुलो नृपो जातः । ब्रूते चाभयकुमारो, देव ! क्षिप तत्र जलकान्तम् ॥
यावद्भाण्डागारात्, स कृष्यते लगति तावदुत्सूरम् । अत्यहितं च करिणो, भवति दृढं ननु विमर्देन ॥
अथ शीघ्रप्रापणार्थं, जलकान्तमणेर्मनुष्यनाथेन । सकलनगरेऽपि तूर्णं, सहसैवं दापितः पटहः ॥१२६॥
भो भो ! जलकान्तमणिं, शीघ्रमानीय यः समर्पयति । तस्य नृपो राज्यार्धं, दत्ते वरकन्यकासहितम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकर्ण्येदं वाक्यं, शीघ्रं कण्डूयकस्तमानीतवान्। क्षिप्तश्च नदीमध्ये, स्थलोऽयमिति तन्तुको नष्टः॥
तदुपद्रवाद्विमुक्तः, सेचनककरी समागतो गेहे। पृष्टं च ततो राज्ञा, केनैष मणिः समानीतः॥१२९॥
कण्डूयकः प्रकथित-स्ततश्च चिन्तापरो नृपो ब्रूते। अभय! कथं दातव्या?, कन्यास्माभिरस्य नीचस्य॥
अभयोऽपि प्रतिजल्पति, गेहेऽस्य न सम्भवन्ति रत्नानि। अयमेव समुत्पत्तिं, प्रपृच्छ्यतामस्य रत्नस्य॥
राज्ञापि ततः पृष्टः, सत्यं भो ब्रूहि कथमिव तवायम्। तेनापि नरेन्द्रभया-द्यथास्थितं सर्वमाख्यातम्॥
आहूय ततो राज्ञा, दत्ता कृतपुण्यकाय सा कन्या। राज्यस्यार्धेन समं, तेनाप्यूढा महद्धर्द्धा तु॥१३३॥
अभयेन ततो भणितं, भवन्ति रत्नाकरेषु रत्नानि। कण्डूयकोऽपि राज्ञा, विसर्जितः समुचितं दत्त्वा॥
भुङ्क्ते विशिष्टभोगा-नभयकुमारेण सह सदा विलसन्। अन्यदिने वचनमिदं ब्रूतेऽभयकुमारमनुसृत्य॥
अत्रैव पुरवरेऽन्या-श्चतस्रः सन्ति मम वरा भार्याः। सुतवत्यः स्नेहपरा, न च गेहमहं विजानामि॥
उक्तमभयेन कथमिव, कथितं तेनापि मूलतः सर्वम्। वयमपि बुद्ध्या विजितास्तयेत्यभयो वदत्येवम्॥
एवंविधमपि कार्यं, कृत्वैषात्रैव निवसते यस्मात्। अस्माभिरपि न विदिता, अहो सुनैपुण्यमेतस्याः॥
तत्तिष्ठ निश्चितस्त्वं, सम्प्रति जानामि तव कलत्राणि। इत्युक्त्वा देवकुलं, द्विद्वारं कारितं रम्यम्॥१३९॥
यक्षप्रतिमा तत्र तु, कृतपुण्यकरूपधारिणी विहिता। उद्घोषितं च नगरे, यथा सपुत्रा सकलनार्यः॥
यक्षस्य पूजनार्थं, पूर्वेणायान्त्वपरतो यान्तु। विपरीतकृते तासां, भविता-भवं घोर उपसर्गः॥१४१॥
एवं श्रुत्वा सर्वः, स्त्रीवर्गो बालडिम्भपरिकीर्णः। आगतवानथ ता अपि, तत्रायाताः समं डिम्भैः॥१४२॥
अथ यक्षप्रतिमाया-स्तस्यास्ते डिम्भकाः समुत्सङ्गे। आरूढा जल्पन्त-स्तातस्तातोऽयमिति तुष्टाः॥

एकान्तदेशसंस्थौ, निष्क्रान्तावभयकुमारकृतपुण्यौ।
अपि सम्प्रेक्ष्य तकौ [ता], लज्जातोऽधोमुखा जाताः॥१४४॥

अभयेनाहूयासौ, वृद्धा निर्भर्त्सिता खरवचोभिः। गाढं यथा तथा सा, पपात पदयोर्द्वयोरपि हि॥
इति सप्तभिः प्रियाभिः, सह भुञ्जानस्य विषयसुखमुच्चैः। भूयान् गतः कालो, राजश्रीभूषिताङ्गस्य॥
अत्रान्तरे च वीरः, सुरवरनरविसरविनतपदयुगलः। गुणवत्साधुचतुर्दश--सहस्रपरिवारितः श्रीमान्॥
वरविमलकेवलकरै-र्मथितमहामोहविततितिमिरौघः। गुणशीलके सुरवर-कृतसमवसृतावागतो वीरः॥
अथ वर्धापकपुंसा, शीघ्रमागत्य जिनवरागमनम्। आख्यातं नरपतये, कृतपुण्याऽभयसमेताय॥१४९॥

आकर्ण्य जिनागमनं, हर्षवशोल्लसितबहलरोमाञ्चाः।
सर्वेऽपि समयविधिना-ऽभिवन्द्य तत्रैव जिननाथम्॥१५०॥

वर्धापकपुरुषाय च, दत्त्वा बहु पारितोषिकं दानम्। तत्समयसमुचितां ते, कृत्वा सामग्रिकां सर्वाम्॥
सर्वद्धर्द्धा सम्प्राप्ता, जिनान्तिकं समभिवन्द्य विधिपूर्वम्। उपविविशुरुचितदेशे, सर्वे शुश्रूषवो धर्मम्॥
अथ कर्णसुखदसलिल-जलधरगम्भीरधीरघोषेण। प्रारेभे भुवनगुरु-र्भवहरणीं देशनामेवम्॥१५३॥
भो भो भव्याः! भवसागरेऽत्रपततां शरीरिणामुच्चैः। सद्धर्म एव कुरुते, तारणमिह सादरं विहितः॥१५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मः सर्वार्थानां, प्रसाधको मोक्षसौख्यलक्ष्म्याश्च ।
धर्मो दारिद्र्यमहा-चलस्य निर्दलनवरकुलिशम् ॥१५५॥

धर्मेण पूर्वसुकृतेन सुन्दरा भवति भोगसल्लक्ष्मीः । तदहो स एव कार्यः, शिवसुखसम्पत्तिमिच्छद्भिः ॥
श्रुत्वेदं सर्वापि हु, पर्षत्संवेगमागता धनिकम् । कृतपुण्यकोऽपि पृच्छति, शीर्षे संस्थाप्य करकमलम् ॥
भगवन् ! किं पूर्वभवे, कृतं मया येन संपदीदृक्षा । भोगाश्च सुन्दरतराः, सञ्जाताः सान्तराया मे ? ॥
भगवांस्ततस्तस्मै, कथयति निःशेषमेव तच्चरितम् । श्रुत्वेदं कृतपुण्य-स्ततो गतः परमसंवेगम् ॥१५९॥
संस्मृत्य पूर्वजातिं, भणति विशेषेण विस्मयापन्नः । एवमिदं भुवनगुरो !, जातिस्मरणान्मया ज्ञातम् ॥
सम्प्रत्यपि तत्स्वामिन् !, पृष्ट्वा राजादिकान् ग्रहीष्येऽहम् । निःशेषसौख्यमूलं, प्रव्रज्यां भूरिभवहरणीम् ॥
मा कार्षीः प्रतिबन्धं, जिनेन भणिते ततो गृहं गत्वा । राजादीनापृच्छ्य च, कृत्वा सामग्रिकां सर्वाम् ॥
विनियोज्य निजं द्रव्यं, चैत्यसङ्घादिके शुभे स्थाने । तदसौ नृपादिलोकैः, सर्वैरनुगम्यमानश्च ॥१६३॥
सप्तभिरपि प्रियाभिः, सहैव शिबिकोत्तमां समभिरूढः । सम्प्राप्तश्च जिनान्ते, प्रणम्य वीरं भणत्येवम् ॥
भवशतसहस्रमथनीं, जननीं स्वर्गापवर्गसुखलक्ष्म्याः । ताभिः सह प्रियाभि-र्दीक्षां मे दीयतां नाथ ! ॥
भगवानपि तां दत्ते, सहानुशिक्षां ततः समर्पयति । तं गणधरस्य साधुं, व्रतिन्यश्च चन्दनार्यायाः ॥१६६॥
तदनु गृहीत्वा शिक्षां, द्विविधामपि दुष्करं तपः कृत्वा । संलिख्य निजं देहं, समं कषायैर्विशेषेण ॥१६७॥
अन्ते समाधिनाऽसौ, मृत्वा सर्वर्द्धिसङ्गतविमाने । सुरलोके शक्रसमः, समजनि देवो महातेजाः ॥१६८॥
यदतुलधनयुक्ते जन्म जातं कुलेऽस्य, निरूपमगुणयुक्ता यच्च भार्या बभूवुः ।
यदपि सुरसमाना जज्ञिरे भूरिभोगा-स्तदिह फलमशेषं साधुदानस्य तस्य ॥१६९॥
यदकृत रसयुक्ते पायसस्थालकेऽसौ, मुनिवितरणकाले तत्र रेखाद्वयं सः ।
झटिति घटितशुद्धस्वीयभावानुभावा-ज्जनविदितमभूवन् सान्तरास्तेन भोगाः ॥१७०॥
इति विभवसुभोगाभोगसौभाग्यकारि, फलमविकलमेवं साधुदाने विलोक्य ।
विपुलतरगुणश्रीपात्रपात्राय लोका, वितरत वरभक्त्या भक्तपानादि शुद्धम् ॥१७१॥

इति **कृतपुण्यकथानकं** परिसमाप्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्ताः प्रकरणकारसूचिताः श्रेयांसादिदृष्टान्ताः अथादिशब्दसूचिताः **शालिभद्रादिदृष्टान्ताः** प्रदर्श्यन्ते तत्र **शालिभद्रदृष्टान्तः** संक्षेपतस्तावदयं–

अस्त्यत्र **मगधादेशे**, पुरं **राजगृहाभिधम्**। तत्रासीत् **श्रेणिको** राजा, **चेल्लणा** तस्य सत्प्रिया।
इतश्च **धन्यका** नाम, नारी व्युच्छिन्नवंशका। **सङ्गमाख्यं** सुतं लात्वा, **शालिग्राममुपागता**॥
तत्र च वत्सरूपाणि, चारयति स सङ्गमः। तावद्यावददौ भक्त्या, साधवे वरपायसम् ॥३॥ यसं।३।
भूरि स्वयं च तद् भुक्त्वा, मृत्वा **राजगृहे** पुरे। **गोभद्रधनिभद्राऽऽख्य**-भद्रागर्भे समागतः॥
जातः पित्रा कृतं नाम, **शालिभद्र** इति स्फुटम्। द्वात्रिंशत्कन्यका याव-त्परिणीता मनोरमाः॥५॥
यावच्च तत्पिता मृत्वा, जातो देवो महर्द्धिकः। सर्वांश्च शालिभद्रस्य, पूरयति मनोरथान् ॥६॥
यावत्कम्बलवृत्तान्तात्, श्रेणिको तद्गृहे ययौ। यावत्प्रभुरिति श्रुत्वा, शालिभद्रो व्यचिन्तयत् ॥७॥
यावद्धर्मः श्रुतस्तेन, **धर्मघोषपदान्तिके**। यावदेकैकशो नित्यं पत्नीनां प्रविमोचनम् ॥८॥
दीक्षा यावच्च **धन्यस्य**, जाता वीरजिनान्तिके। यावच्च शालिभद्रोऽपि प्रवव्राज जिनान्तिके॥
यावत्स्वमातृहस्तेन, सञ्जातं तस्य पारणम्। विधायानशनं यावद्गत्वा **वैभारपर्वते** ॥१०॥
पादपोपगमं कृत्वा, शालिभद्रश्च धन्यकः। स्थितौ तौ तत्र यावच्च, माताऽऽयाता नृपस्तथा ॥११॥
अथ द्वावपि तौ साधू, कालं कृत्वा समाधिना। उत्पन्नावुत्तमौ देवौ, **सर्वार्थाख्यविमानके** ॥१२॥
सिद्धिसौख्योपमं तत्र, भुक्त्वा सौख्यं निरन्तरम्। सागराणि त्रयस्त्रिंश-त्ततश्च्युत्वात्र सेत्स्यतः ॥१३॥
इति परमपवित्रं शालिभद्रस्य साधो-श्चरितमिदमुदारं सारसंवेगकारि।
विहितभविकमोदं सम्यगाकर्ण्य लोकाः, कुरुत विरतिमुच्चै र्गेहसङ्गं विमुच्य ॥१४॥

॥ इति **शालिभद्रकथानकं** समाप्तम् ॥

एवमन्येऽपि विधिदानमाश्रित्य वसुतेजःप्रभृतयो द्रष्टव्याः। उक्तं च–

वसुतेओ धणधम्मो, धरणिधरो चेव बंधुधम्मो य।
बुहजणपसिद्धगाई, विहिदाणे होंति नायाइं ॥१॥

इमानि ज्ञातानि पुनर्हरिभद्रसूरिकृतकथानककोशादवसेयानि

इति **दानाधिकारः** परिसमाप्तः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शीलाधिकारः ११

उक्तो दानाधिकारः। सम्प्रति शीलाधिकार उच्यते। अस्य चायमभिसम्बन्धः पूर्वत्र दानं सप्रभेदं वर्णितं, दानं पुनरुदाराशयैरेव क्रियते, शीलमप्युदारचित्तैरेव पालयितुं शक्यते, नेतरैरतोऽत्र शीलमुच्यते, तत्र शीलं भेदतो दर्शयन् श्लोकद्वयमाह–

शीलं चित्तसमाधानं, तच्च द्वेधा प्रकीर्तितम्।
सर्वतो देशतश्चैव, सर्वतः साधुसत्क्रिया ॥२४१॥
देशतः सदनुष्ठानं, श्रावकाणां जिनोदितम्।
अथवा शीलशब्देन, ब्रह्मचर्यं निगद्यते ॥२४२॥

तत्र **शील समाधा**विति धातुपाठात् शील्यते सर्वसत्त्वानामबाधया सूत्रानुसारेण प्रवर्तनादात्मा समाधाने स्थाप्यतेऽनेनेति **शीलं** चारित्रं, **चित्तसमाधानं** कषायतापविरहाच्चित्तनिर्वाणं, **तच्च** तत्पुनर्द्वेधा द्विप्रकारं **प्रकीर्तितं** कथितं **सर्वतः** सर्वं हेयं वस्तु समाश्रित्य, **देशतो** देशेन हेयमाश्रित्य। **चैवेति** समुच्चये, तत्र **सर्वतः साधुसत्क्रिया** साधुसदनुष्ठानमित्यर्थः **देशतो** देशमाश्रित्य **श्रावकाणां सदनुष्ठानं** देशविरतिलक्षणं **जिनोदितं** जिनप्रणीतं, **अथवेति** प्रकारान्तरसूचकः, **शीलशब्देन** शीलध्वनिना **ब्रह्मचर्यं** चतुर्थव्रतं **निगद्यते** कथ्यत इति श्लोकद्वयार्थः ॥२४१-२४२॥

अथास्य पर्यायशब्दानाह–

शीलं वृत्तं च चारित्रं, विरतिश्चरणं तथा[1]।
धर्मः संयम इत्याद्याः, शब्दा एकार्थवाचकाः ॥२४३॥

श्लोकोऽयं सुगम एव ॥२४३॥

अस्यैव शीलस्य ये पालकास्तान् दर्शयन् श्लोकद्वयमाह–

पालयन्ति पुनश्चैत-द्विशुद्धं सर्वसाधवः।
पञ्चधा चरणोद्युक्ताः, पञ्चधाऽऽचारकारिणः ॥२४४॥
कालोचितक्रियासक्ताः, सामाचारीत्रयोद्यताः।
परीषहोपसर्गाणां, जेतारो विजितेन्द्रियाः ॥२४५॥

---

१ शीलं - BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पालयन्ति सेवन्ते पुनश्च: समुच्चये एतदिदं शीलं विशुद्धं सर्वोपाधिविशुद्धं, भावसाधव इति, किंविशिष्टा: ? पञ्चधा चरणोद्युक्ता: पञ्चधा पञ्चप्रकारे चरणे चारित्रे उद्युक्ता उद्यमवन्त इति, चारित्रस्य पञ्चविधत्वं पुन: सामायिकादिभेदेन, उक्तं च-

सामाइयं च पढमं, छेओवट्ठावणं भवे बीयं ।
परिहारविसुद्धीयं, सुहुमं तह संपरायं च ।।१।।
तत्तो य अहक्खायं, खायं सव्वंमि जीवलोगम्मि ।
जं चरिऊण सुविहिया, वच्चंति अयरामरं ठाणं ।।२।।

[नवतत्त्व प्र. ३२/३३]

सच्चमिणं सामइयं, छेयाइ विसेसओ पुणो भिन्नं ।
अविसेसियसामइयं ?, चियमिह सामन्नसन्नाए ।।३।।
सावज्जजोगविरइत्ति तत्थ सामाइयं दुहा तं च ।
इत्तरमावकहं चिय, पढमं पढमंतिमजिणाण ।।४।।
तित्थेसु अणारोविय-वयस्स सेहस्स थोवकालीयं ।
सेसाणमावकहियं, तित्थेसु विदेहगाणं च ।।५।।
परियायस्स य छेओ-[1]जुत्तोवट्ठावणं वएसुं च ।
छेओवट्ठावणमिह, तमणाइयारेयरं दुविहं ।।६।।
सेहस्स निरइयारं, तित्थंकरसक्खमेव होज्जा ।
मूलगुणघाईणो, साइयारमुभयं च ठियकप्पो ।।७।।
परिहारेण विसुद्धं, सुद्धो व तवो जहिं विसेसेण ।
तं परिहारविसुद्धं, परिहारविसुद्धियं नाम ।।८।।
तं दुवियगप्पं निव्वि-समाणनिव्विट्ठकाइयवसेण ।
परियाणुपरिहारि-याण कप्पट्ठियस्स चिय ।।९।।
परिहारो पुण परिहा-रियाण सो गिम्हसिसिरवासासु ।
पत्तेयं तिविगप्पो, चउत्थयाई तवो नेउं ।।१०।।
गिम्हसिसिरवासासु, चउत्थयाईणि बारसंताणि ।
अट्ठोकंतीए जहन्न-मज्झिमुक्कोसयतवाणं ।।११।।
सेसाओ नियमभत्ता पायं भत्तं च ताणमायामं ।
होइ नवण्हवि नियमा, न कप्पए सेसयं सव्वं ।।१२।।

---

१ अत्तो° विशेषावश्यकभाष्ये । आत्मन: इति तत्रैव वृत्तौ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिहारियाणुपरिहा-रियाण कप्पठियस्स चिय भत्तं ।
छम्मासा होइ तवो, अट्ठारसमासिओ कप्पो ।।१३।।
कप्पसम्मत्तीए तयं, जिणकप्पं वा उवेंति गच्छं वा ।
ठियकप्पे चिय नियमा, दो पुरिसजुयाइं ते होज्जा ।।१४।।
कोहाइसंपराओ, तेण जओ संपरीइ संसारं ।
तं सुहुमसंपरायं, सुहुमो जत्थावसेसो सो ।।१५।।
सेढिं विलग्गओ तं, विसुज्झमाणं तओ चयंतस्स ।
तह संकिलिस्समाणं, परिणामवसेण विन्नेयं ।।१६।।
अह सद्दो जहत्थो, आ अभिविहिणा कहियमक्खायं ।
चरणमकसायमुइयं, तमहक्खायं जहक्खायं ।।१७।।
तं दुविगप्पं छउमत्थ-केवलिविहाणओ पुणेक्केकं ।
खयसमजसजोयाजोय केवलिविहाणओ दुविहं ।।१८।।
[विशेषावश्यकभाष्य १२५७-१२६१, १२६५, १२६७-१२७७]

तथा **पञ्चधाचारकारिण:** पञ्चधा पञ्चप्रकारमाचारं कुर्वन्तीत्येवंशीला ये ते तथा । आचारश्च पञ्चधा ज्ञानादि: प्रसिद्ध एव । तथा **कालोचितक्रियासक्ता:** कालानुरूपक्रियाकारिण इत्यर्थ:, यत:-

कालोचियजयणाए, मच्छररहियाण उज्जमंताणं ।
जणजत्तारहियाणं, होइ जइत्तं जईण सया ।।१।।
तथा- **ता तुलियनियबलाणं, सत्तीए जहागमं जयंताणं ।**
संपुन्नचिय किरिया, अज्ज सरागाण साहूणं ।।१।।

तथा **सामाचारीत्रयोद्यता** इति समाचारस्य भाव: सामाचारी तस्यास्त्रयं तत्रोद्युक्ता उद्यमपरा इति सामाचारीत्रयं पुनरिदम्-ओघसामाचारी दशविधसामाचारी पदविभागसामाचारी चेति । तत्रौघसामाचारीयं-

पडिलेहणा[१], पमज्जण[२], भत्तिरिया[३], ऽऽ लोय[४], भुंजणा[५]चेव ।
पत्तगधुवण[६]वियारा[७], थंडिल[८]मावस्सयाईया[९] ।।१।। [पञ्चवस्तुके २३०]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदिशब्दात्कालग्रहस्वाध्यायादिपरिग्रहः दशविधसामाचारी पुनरेवं-

इच्छा मिच्छा तहक्कारो, आवसिया य निसीहिया ।
आपुच्छया य पडिपुच्छा, छंदणा य निमंतणा ।।१।।
[भगवतीसूत्रे २५/७/८०१]

उवसंपया य काले [उत्तरा. नि. ४८२, पञ्चाशक १२/३] इत्यादि । पदविभागसामाचारी त्वेवं-

आलोयण पडिक्कमणे, मीस विवेग तहा विउस्सग्गे ।
तव छेय मूल अणव-ट्ठया य पारंचिए चेव ।।१।। [आव.नि. १४१८]

अस्य च सामाचारीत्रयस्य भावार्थः स्वस्वस्थानादेवावसेय इति तथा **परीषहोपसर्गाणां जेतार** इति, तत्र परि समन्तात् सह्यन्त इति परीषहा अत्यन्तं व्याकुलताहेतवोऽप्यसंयमभीरुतया [१]आधाकर्माद्यप्राशुकानेषणीयभक्तपानादिवाञ्छाविनिवर्तनेन सम्यक् सह्यन्त इत्यर्थः । ते च क्षुधादयो द्वाविंशतिपरिमाणाः, उपसर्गा दिव्यादयः षोडश, तेषां जेतारो निहन्तारः, तथा **विजितेन्द्रिया** निगृहीतेन्द्रियाः । तत्र द्वाविंशतिपरीषहा एवम्-

खुहा पिवासा सीउण्हं, दंसा चेला रइ इत्थीओ ।
चरिया निसीहिया सेज्जा, अक्कोस वह जायणा ।।१।।
अलाभ रोग तणफासा, मल सक्कार परीसहा ।
पन्ना अन्नाण सम्मत्तं ई बावीस परीसहा ।।२।। [नवतत्त्व प्र. २७/२८]

सुगममिदं श्लोकद्वयं, नवरमरतिः संयमे कथञ्चिदुत्पन्ना भवेत् सा च सम्यक् सोढव्या, स्त्री रामा तद्रूपालोकनेऽपि तदभिलाषनिवर्तनेन परिषह्यमाणत्वात् स्त्रीपरीषहः, चर्या ग्रामानुग्रामविहारात्मिका, नैषेधिकी श्मशानादिका स्वाध्यायभूमिः, शय्या उपाश्रयः, आक्रोशो दुर्वाक्यैः, वधो लकुटादिभिस्ताडनं, याचना प्रार्थना, अलाभोऽभीष्टवस्तुविषयः, रोगः कुष्ठादिः, तृणस्पर्शो दर्भादिस्पर्शः, मलः प्रतीतः, सत्कारो वस्त्रादिभिरुपलक्षणत्वात्पुरस्कारश्च द्रष्टव्यः, स चाभ्युत्थानादिसम्पादनं, प्रज्ञा स्वयं विमर्शपूर्वको वस्तुपरिच्छेदः, ज्ञानं मत्यादि, तदभावादज्ञानं सम्यक्त्वं दर्शनं तदेव क्रियादिवादिनां विचित्रमतश्रवणेऽपि सम्यग् परिषह्यमाणं निश्चलचित्ततया धार्यमाणं सम्यक्त्वपरीषह इति । तथा-

---

१ आहारवाक्यप्राशुं BJC ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुयारो खलु दुविहो, पयडीपुरिसेसु चेव नायव्वो ।
एएसिं नाणत्तं, वोच्छामि अहाणुपुव्वीए ।।१।।
नाणावरणे वेए, मोहंमि य अंतराइए चेव ।
एएसु कम्मेसु, बावीस परीसहा होंति ।।२।।
पन्नाऽनाणपरीसह, नाणावरणंमि होंति दोन्नेए ।
एक्को य अंतराये, अलाभपरीसहो होइ ।।३।।
अरई अचेल इत्थी, निसीहिया जायणा य अक्कोसे ।
सक्कारपुरक्कारे, चरित्तमोहम्मि सत्तेए ।।४।। [भगवतीसू. ८/८/२८]
अरइ दुगंछा य पुं-वेय भयस्स चेव माणस्स ।
कोहस्स य लोहस्स य, उदएण परीसहा सत्त ।।५।।
दंसणमोहे दंसण-परीसहो नियमसो भवे एक्को ।
सेसा परीसहा खलु, एक्कारस वेयणिज्जंमि ।।६।।
पंचेव आणुपुव्वी, चरिया सेज्जा वहे य रोगे य ।
तणफासजल्लमेव य, एक्कारस वेयणिज्जंमि ।।७।। [भगवती सू. ८/८/२७]
बावीसं बायरसंप-राए चउदस य सुहुमरागंमि ।
छउमत्थवीयराए, चउद्दस एक्कारस जिणंमि ।।८।। [उत्तराध्ययननि. ७२-७९]

उपसर्गास्तु षोडशैवं-

दिव्वा माणुस्सा तेरिच्छा आयसंचेयणिया, तत्थ दिव्वा चउव्विहा, तं जहा-हासा पउसा विमंसा पुढोविमाया पृथग् विविधा मात्रा, तत्र भवा वैमात्रिका: कोऽर्थ: ? यत्र हास्यप्रद्वेषविमर्शैर्वा उपसर्गा: क्रियन्त इत्यर्थ:, **माणुस्सा चउव्विहा पन्नत्ता तं जहा-हासा पउसा वीमंसा कुसीलपडिसेवणाओ य** [स्थानाङ्ग, सू. ४/४]

कुत्सितं शीलं कुशीलं तस्य प्रतिसेवना, अयमभिप्राय:—कश्चिद्रागातुरो बलादपि शीलभङ्गाय प्रवर्तत इत्यर्थ:,

तेरिच्छा चउव्विहा तं जहा-[1]
भया कोहा आहारहेऊ अवच्चलेणं संरक्खणयाए,

---

१ तं जहा घट्टणता पवडणता थंभणता लेसणता-इति स्थानाङ्गे । घट्टनता घट्टनया वा यथाऽक्षिणि रज: पतितं ततस्तदक्षि हस्तेन मलितं दु:खितुमारब्धमथवा स्वयमेवाक्षिणि गले वा मांसाङ्कुरादिजातं घट्टयतीति ।। स्थानाङ्ग टीका प. २८१ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयसंचेयणीया चउव्विहा पन्नत्ता तं जहा-
पवडणया थंभणया लेसणया घट्टणया [स्थानाङ्ग सू. ४/४]

प्रपतनं भूम्यादौ, स्तम्भो हस्तपादादेः, श्लेषणं पङ्कादौ खुप्पणंति वुत्तं हवइ घट्टनं पाषाणादावात्मन इति, ॥२४४-२४५॥

अथ ब्रह्मचर्यस्य शीलत्वेन लोकोत्तरव्यापित्वमाह–

ब्रह्मचर्यं पुनः सर्व-व्रतेष्वप्यतिदुश्चरम् ।
लोके लोकोत्तरे चैव, ख्यातं शीलमिति स्फुटम् ॥२४६॥

ब्रह्मचर्यं चतुर्थव्रतं **पुन**रिति विशेषद्योतकः, **सर्वव्रतेषु** समस्तप्राणातिपातविरमणादिष्वतिदुश्चरं नितरां दुष्करं, उक्तं च-

अक्खाण रसणी, कम्माण मोहणी तह वयाण बंभवयं ।
गुत्तीण य मणगुत्ती, दुक्खं चउरो वि जिप्पंति ॥१॥

लोके लोकोत्तरे चैवेति व्यक्तं, **ख्यातं** प्रसिद्धं **शीलमिति स्फुटं** प्रकटमिति श्लोकार्थः ॥२४६॥

अथ शीलवतां स्वरूपं शीलमाहात्म्यं च वर्णयन् श्लोकसप्तकमाह–

यौवनेऽपि समारूढा, वृद्धायन्ते विवेकिनः ।
अनाचारे न वर्तन्ते, शीलमालिन्यभीरवः ॥२४७॥
वधबन्धनदुःखानि, नानाकाराः कदर्थनाः ।
राजादिलोकतो नैव, लभन्ते शीलशालिनः ॥२४८॥
विश्वासकारणं शीलं शीलमुन्नतिकारणम् ।
सर्वसौख्यकरं शीलं, शीलं कीर्तिकरं परम् ॥२४९॥
शीलाभरणेन ये नित्यं, सवाङ्गेषु विभूषिताः ।
किमन्यैर्भूषणैस्तेषां, भारभूतैनिरर्थकैः ॥२५०॥
करिकेशरिशार्दूल-सर्प्पाऽनल जलान्यमी ।
स्तम्भयन्ति क्षणादेव, सुशीलाः शीलमन्त्रतः ॥२५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहासनायते शूला, कालकूटं सुधायते ।
मालायन्ते च शस्त्राणि, येषां शीलं समुज्ज्वलम् ॥२५२॥
शीलसारगुणाऽऽकृष्ट-चेतसोऽमृतभोजिनः ।
आगच्छन्ति स्मृताः सन्तो, व्रजन्ति च विसर्जिताः ॥२५३॥

यौवनेऽपि समारूढा इति व्यक्तम्, वृद्धायन्ते वृद्धा इवाचरन्ति, **विवेकिनो** विवेकवन्तः, **अनाचारे** ब्रह्मचर्यभङ्गरूपे, न प्रवर्तन्ते न सजन्ते, **शीलमालिन्यभीरवः** शीलकलङ्कताभीता इत्यर्थः ॥२४७॥

वधबन्धने त्यादि श्लोकः सुगम ॥२४८॥

विश्वासकारणमिति विश्वासो विस्रम्भः, तस्य कारणं शीलमित्यादि सुगमम् ॥२४९॥

तथा **शीलाभरणेन** इति, शीलमेवाभरणं तेन ये नित्यमित्यादिस्पष्टम् ॥२५०॥

तथा **करीत्यादि, करी-केशरि-शार्दूल-सर्प्पाऽनलजलानि** हस्ति-सिंह व्याघ्र-भुजङ्ग-ज्वलन- पयांसि, **अमी** एते प्रत्यक्षाः शीलवन्तः, **स्तम्भयन्ति** शक्तिभ्रंशेन दूरस्थान्येव नियन्त्र्य धारयन्ति, **सुशीलाः शीलमन्त्रत** इति व्यक्तम् ।

उक्तञ्च-**थंभेइ सीह-सद्दूल-गयवरे सप्प जलण सलिलाइं ।**
निम्मलसील गुणड्ढो, पुरिसो वरसीलमंतेण ॥१॥ ॥२५१॥

तथा सिंहासनायते, सिंहासनमासनविशेषः, तद्वदाचरति **शूला** कीलकविशेषः प्रतीत एव, **कालकूटं** विषं **सुधायते**ऽमृतमिवाचरति, **मालयन्ते** मालाः पुष्पादिस्रजस्ता इवाचरन्ति **शस्त्राणि** खड्गादीनि, उपचाराच्छस्त्रप्रहारा अत्र गृह्यन्ते, **येषां** प्राणिनां **शीलं समुज्ज्वलमिति** ॥२५२॥

तथा शीलेत्यादि शीलमेव सारगुणस्तेनाकृष्टचेतसः **शीलसारगुणाकृष्टचेतसोऽमृतभोजिनो** देवा **आगच्छन्त्यायान्ति स्मृता** ध्याताः **सन्तो व्रजन्ति** गच्छन्ति, **चः** समुच्चये, **विसर्जिता** मुत्कलिताः सन्त इति उक्तं च-

देविंददाणविंदा, खयरिंदनरिंदचंददिणइंदा ।
पणमंति भत्तिसारं, पयजुयलं सीलवंताणं ॥१॥

इति श्लोकसप्तकार्थः, ॥२५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ शील एव दृष्टान्तद्वयं सूचयन् वृत्तमाह–

विशालशीले सरलः सुरूपः, सुदर्शनः श्रेष्ठिसुतो निदर्शनम्, ।
महासती पालितशुद्धशीला, ज्ञातं द्वितीयं त्विह शीलसुन्दरी।२५४।

वृत्तमिदं सुगमं नवरं **ज्ञात**मिति दृष्टान्तम् उदाहरण आहरणमिति पर्यायाः ॥२५४॥

इदं च दृष्टान्तद्वयं ब्रह्मचर्यलक्षणं शीलमधिकृत्य वेदितव्यं, तत्र तावत् **सुदर्शनश्रेष्ठिदृष्टान्तः** कथ्यते, तद्यथा–

अस्त्यत्र भारते वर्षे, पुरग्रामादिसङ्कुलः । **अङ्ग**नामवरो देशो, भूमिस्त्रीतिलकोपमः ॥१॥
तत्रास्ति सर्वतो रम्यै-रुत्तुङ्गैः सुरमन्दिरैः । रम्या सुरपुरीवोच्चै-श्चम्पा नाम महापुरी ॥२॥
बभूव तत्र भूपालो, **दातृवाहन**नामकः । नम्राशेषमहीपाल-मौलिमालार्चितक्रमः ॥३॥
देवी **तस्याऽभया**नाम, धाम सौभाग्यसम्पदाम् । पदं कलाकलापस्य, रूपश्रीकुलमन्दिरम् ॥४॥
तस्याश्च **पण्डिता** नाम, धात्री विज्ञानशालिनी । पण्डिता सर्वकार्येषु, दक्षा परप्रतारणे ॥५॥
आसीच्च तत्र जैनेन्द्र-धर्मकर्मपरायणः । श्रेष्ठी **वृषभदास**ाख्यः, ख्यातः सर्वत्र सद्गुणैः ॥६॥
अर्हद्दासीति विख्याता-ऽभवत्तस्य सुगेहिनी । पत्यौ भक्ता गुणैर्युक्ता, रक्ता सर्वज्ञशासने ॥७॥
श्रेष्ठिवृषभदासस्य, महिषीरक्षकोऽभवत् । धर्मप्रियः प्रकृत्यैव, **सुभग**ाख्यः शुभाशयः ॥८॥
अन्यदासौ समादाय, महिषीर्गतवान् बहिः । तत्रापश्यत्तपोलक्ष्म्या, युक्तं गुप्तजितेन्द्रियम् ॥९॥
कायोत्सर्गस्थितं शान्तं, निशान्तं गुणसम्पदा । पादैरस्पृष्टभूभागं, विद्याचारणसन्मुनिम् ॥१०॥
तं दृष्ट्वा चिन्तयन्नेवं, धन्योऽयं पुण्यवानयम् । एतस्य श्लाघ्यते जन्म, जगाम मुनिसन्निधौ ॥११॥
आसन्नभविकत्वेन, प्रादुर्भूतशुभाशयः । भक्त्याभिवन्द्य तं साधुं, पर्युपास्ते क्षणान्तरम् ॥१२॥
विकाल इति विज्ञाय, गृहीत्वा महिषीस्ततः । स्मरन्नेव मुनिं चित्ते, गतोऽसौ निजमन्दिरे ॥१३॥
विधाय निजकं कर्म, महिषीदोहनादिकम् । सुष्वाप स्वोचिते स्थाने, विबुद्धश्चिन्तयत्यदः ॥१४॥
अहो अद्य पतत्युच्चैः, शीतं जीवितनाशकम् । गृहेऽपि प्रावृतस्यापि, येन मे कम्पते वपुः ॥१५॥
स पुनः सन्मुनिस्तत्र, शून्यारण्ये व्यवस्थितः । अप्रावृतो निराधारः, कथं शीतं सहिष्यते ? ॥१६॥
इत्यादि ध्यायतस्तस्य, रात्रिः क्षयमुपागता । तत उत्थाय कृत्वा च, कृत्यं तत्समयोचितम् ॥१७॥
गतः पूर्वक्रमेणासौ, साधोस्तस्य पदान्तिकम् । भक्त्यावनतगात्रश्च, ववन्दे तं मुनीश्वरम् ॥१८॥
अत्रान्तरे दिशां चक्रं, प्रद्योतयन् दिवाकरः । समुद्गतस्तिरस्कृत्य, तमिस्रातिमिरोत्करम् ॥१९॥
नमोऽर्हद्भ्य इति प्रोच्य, सोऽपि साधुः समाहितः । सुभगस्येक्षमाणस्य, प्रोज्जगाम विहायसा ॥२०॥
तेनाचिन्ति महामन्त्र-मुच्चचार कमप्ययं । गतस्तेन महावेगा-त्क्षणादेव नभस्तलम् ॥२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ममाप्यम्बरचारित्वं, भवितास्य प्रभावतः । नमोऽर्हद्भ्य इतीयन्ति, सञ्जग्राहाक्षराणि सः ॥२२॥
ततस्तद्घोषयत्युच्चै-र्यत्र वा तत्र वा स्थितः । भोजनाद्यपि कुर्वाणो, नो विरमति घोषणात् ॥२३॥
अन्यदा श्रेष्ठिना प्रोक्तः किमुच्छिष्टः पठस्यमुम् । महामन्त्रं महाभाग, ! सर्वकल्याणकारणम् ॥२४॥
अयं हि सर्वमन्त्राणां, विद्यानां शुभसम्पदाम् । कल्याणानां च सर्वेषां, परमं कारणं मतः ॥२५॥
तदहो शोभने स्थाने, शुचीभूतेन यत्नतः । ध्यातव्योऽयं महामन्त्र, आत्मनो हितमिच्छता ॥२६॥
बभाण सुभगो नाहं, शक्नोम्यासितुं क्षणम् । विना श्रेष्ठिन्नमुं मन्त्रं, प्राणेभ्योऽप्यतिवल्लभम् ॥२७॥
तन्मा भाणीः किमप्यत्र, कार्ये कार्यविचक्षण ! । श्रेष्ठिना भणितं वत्स !, मनोऽभिरुचितं कुरु ॥२८॥
अयमर्हन्नमस्कारः, पवित्रो मङ्गलालयः । भविता श्रेयसे तुभ्यं, तन्मा त्याक्षीः कथञ्चन ॥२९॥
इत्युक्ते श्रेष्ठिना तूष्णी-भावं कृत्वा व्यवस्थितः । ततः स्वपूर्वकार्याणि, सर्वाण्यपि करोत्यसौ ॥३०॥
गृहीत्वा महिषीः सोऽपि, गतवान्नन्यदा बहिः । कथञ्चित्ताश्चरन्त्यश्च, गङ्गापरतीरं ययुः ॥३१॥
तासां निवारणायाथ[1], तन्नमस्कारपूर्वकम् । ददौ गङ्गाजले झम्पां, तटीतः सुभगो जवात् ॥३२॥
विद्धोऽतितीक्ष्णकीलेन, निपतन् क्वापि मर्मणि । मृतश्च दैवयोगेन, स्मरन् पञ्चनमस्कृतिम् ॥३३॥
वृषभदासभार्यायाः, कुक्षौ समुदपादि सः । अर्हद्दास्यभिधानायाः, सुन्दरस्वप्नसूचितः ॥३४॥
अथ पञ्चसु मासेषु, गतेषु समजायत । अर्हद्दास्याः जिनाधीश-पूजाकरणदोहदः ॥३५॥
श्रेष्ठिनापि च विज्ञाय, स्वविभवानुसारतः । अमारिघोषणार्थं च, भूरिदानं प्रयच्छता ॥३६॥
सङ्घं पूजयता सर्वं, सर्वचैत्येषु सन्ततम् । अष्टौ दिनानि सम्भूत्या, चक्रे महामहोत्सवम् ॥३७॥
इत्थं विदधता तेन, सर्वचैत्यमहामहम् । पूरिते दोहदे पश्चा-त्तुष्टा गर्भमुवाह सा ॥३८॥
कालक्रमेण सञ्जात-स्तस्याः शोभनवासरे । दारकः स्वप्रभाजालैः, प्रद्योतयन् दिशो दश ॥३९॥
द्वादशाहे च सम्पूर्णे, महामहपुरस्सरम् । सुदर्शन इति ख्यातं, तस्य नाम प्रतिष्ठितम् ॥४०॥
वपुषा सत्कलाभिश्च, वर्धमानो दिने दिने । सितपक्षे यथा चन्द्रो, जनतानन्दकारकः ॥४१॥
आरुरोह पुरस्त्रीणां, मनःसङ्क्षोभकारकम् । कृतलोकलोचनानन्दं सुन्दरं नवयौवनम् ॥४२॥

अथ सागरदत्ताख्य-श्रेष्ठिनो वरकन्यकाम् ।
मनोरमाभिधां पित्रा, विभूत्या परिणायितः ॥४३॥

श्रेष्ठिना गृह्णता दीक्षां, स्थापितो निजके पदे । सुदर्शनः सतां मान्यः, सर्वदैव सुदर्शनः ॥४४॥
यो बुद्ध्या त्रिदशाचार्यं, रूपेण मकरध्वजम् । सुविशुद्धचरित्रेण, विचिक्षेप मुनीनपि ॥४५॥
लसल्लावण्यसम्पूर्णं, सारसौन्दर्यसंयुतम् । यदीयं वपुरालोक्य, सञ्चुक्षुभुः पुरस्त्रियः ॥४६॥
यस्यास्यं सत्यवाक्येन, सद्विवेकेन मानसम् । शरीरं च मनोहारि, रूपलक्ष्म्या विभूषितम् ॥४७॥
दाक्षिण्यादिगुणग्रामो, यस्य शङ्खसमुज्ज्वलः । अशेषं धवलयत्युच्चैः, परिभ्राम्यन् जगत्त्रयम् ॥४८॥

---

१ °णाय-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वज्ञशासनात्यन्त-प्रेमरागेण भूयसा । सुतरां रक्ततां नीता, यस्यास्थिमिञ्जिका अपि ॥४९॥
अन्तरङ्गमहाशत्रु-सैन्यसन्त्रासकारकम् । सुदर्शनं समं लक्ष्म्या, विष्णुरिव दधार यः ॥५०॥
यश्च द्वादशधा धर्मं, सुश्रावकनिषेवितम् । सम्पूर्णं सर्वदा चक्रे, निष्कलङ्कं कृतादरः ॥५१॥
स इत्थं सुन्दराचारः, सुशीलः प्रियभाषकः । राजादीनां महामान्यः, परां ख्यातिमवाप्तवान् ॥५२॥
तस्य भार्यापि जैनेन्द्र-धर्मरत्नविभूषिता । न नाम नामधेयेन, वपुषापि मनोरमा ॥५३॥
यस्या मनोरमं शीलं, दाक्षिण्यं सुमनोरमम् । मनोज्ञाश्च दयादान-सद्विवेकादिका गुणाः ॥५४॥
सापि सद्धर्मकर्माणि, विदधे सर्वयत्नतः । सर्वज्ञशासने रक्ता, सक्ता साधुजनार्चने ॥५५॥
सुदर्शनस्य सन्मित्रं, बभूव **कपिलाभिधम्** । षट्कर्मा शुचिसमाचारो, नृपतेश्च पुरोहितः ॥५६॥
कपिला नाम तद्भार्या, रूपयौवनगर्विता । स्त्रीजनोचितविज्ञान-चतुरा चतुरानना ॥५७॥
अन्यदा वर्णितो बाढं, कपिलेन तदग्रतः । सुदर्शनगुणग्राम-श्चानुरूपादिकोऽखिलः ॥५८॥
कपिलापि समाकर्ण्य, तद्रूपादिगुणश्रियम् । दृढं जातानुरागा च, दिदृक्षति सुदर्शनम् ॥५९॥
अन्यदा प्रेषिता धात्री, श्रेष्ठिनो मन्दिरे तया । मम वाक्येन गत्वैवं, प्रभणैवं सुदर्शनम् ॥६०॥
यथाद्य तव मित्रस्य, शरीरापाटवं दृढम् । तद्विलम्बं विना तत्र, श्रेष्ठिन्नागम्यतामिति ॥६१॥
गत्वा तस्मै तया सर्वं, तथैव च निवेदितम् । सुदर्शनोऽपि वेगेन, मित्रमन्दिरमागतः ॥६२॥
पप्रच्छ कपिलां श्रेष्ठी, भट्टः कुत्रावतिष्ठते । तयोदितं गृहस्यास्य, मध्ये सुप्तः प्रतिष्ठते ॥६३॥
भवानपि च तत्रैव, समागच्छतु सत्वरम् । इत्युक्ते गतवान् सोऽपि, न च पश्यति तत्र तम् ॥६४॥
पृष्टा सा तेन भद्रेऽसौ, ब्राह्मणः किं न दृश्यते ? । ततस्तस्मै समग्रोऽपि, सद्भावः कथितस्तया ॥६५॥
यथाहं तव रूपादि-गुणानाकर्ण्य सुन्दरान् । तव दर्शनमिच्छन्ती, कष्टं तस्थावियच्चिरम् ॥६६॥
साम्प्रतं यदि नैव त्वं, मामिच्छसि दयापर ! । मदनानलसन्तप्ता, मरिष्यामि तवाग्रतः ॥६७॥
निर्वापयस्व मे देहं, सङ्गमामृतवारिणा । यावत्कामहुताशेन, भस्मतां नीयते न हि ॥६८॥
तेनोक्तमयि मुग्धासि, भद्रे !किं न श्रुतं त्वया । यथाहं नरवेषेण, बम्भ्रमीमि नपुंसकः ॥६९॥
आकर्ण्येदं विरक्ता द्राक्, ब्रूते सा लज्जिता सती । यदेवं गम्यतां गेहे, क्षन्तव्यो मम दुर्नयः ॥७०॥
स आत्मानं विमोच्यैवं, जगाम निजमन्दिरम् । ततोऽचिन्ति च कीदृक्षे, सङ्कटे पतिता वयम् ॥७१॥
गन्तव्यं परगेहेषु, न मयातिप्रयोजनम् । गत्वापि नैवमेकान्तं, प्रवेष्टव्यं कदाचन ॥७२॥
अन्यदा च महाभूत्या दातृवाहनभूपतिः । गतः क्रीडितुमुद्याने, समं सामन्तमन्त्रिभिः ॥७३॥
सुदर्शनादिभिः पौरै-र्भूरिलोकैः समन्वितः । द्विजैश्च शान्तिकर्मज्ञैः, प्रभूतैः कपिलादिभिः ॥७४॥
तदनु प्रस्थिता गंतुं, कपिलाब्राह्मणीयुता । रथारूढाभयादेवी, विभूत्या सपरिच्छदा ॥७५॥
मनोरमापि सश्रीक-सालङ्कारविशालिनी । सालङ्कारैः समं पुत्रै-श्चतुर्भिः सुमनोहरैः ॥७६॥
मनोहारिरथारूढा, मनोहारिपरिच्छदा । सज्जनितजनाक्षेपा, प्रतस्थे गन्तुमञ्जसा ॥७७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च क्रमशस्तासां, गच्छन्तीनां सुलीलया । पप्रच्छ कपिलादेवी, कस्येयं वरगेहिनी ॥७८॥
श्रेष्ठिसुदर्शनस्येयं, प्रियास्ति हि मनोरमा । इत्यादि कथिते देव्या, कपिला चाप्यभाषत ॥७९॥
अहो वणिगिणीनां तु, कीदृशं पश्य कौशलम् । या नपुंसकजन्याऽपि, [1]जनयत्येवमात्मजान् ॥८०॥
अभया प्राह हे मुग्धे !ज्ञातं कथमिदं त्वया । सापि पूर्वं स्ववृत्तान्तं, समाख्याति तदग्रतः ॥८१॥
ततोऽभया वदत्येवं, सहसा कपिलां प्रति । मूर्खाणामपि मूर्खा त्वं, मुग्धानामपि मुग्धका ॥८२॥
सत्यं डोडगिणी चैव, कामशास्त्रविवर्जिता । ययैतदपि न ज्ञातं, प्रसिद्धं जगतीतले ॥८३॥
अयं हि परकीयासु, महिलासु नपुंसकः । सर्वदापि न तु स्वेषु, दारेषु मनुजोत्तमः ॥८४॥
तद्भद्रे ! वञ्चितासि त्वं, छलात्तेन महात्मना । ततः कपिलयाभाणि, सख्यहं तावदीदृशी ॥८५॥
कामशास्त्रसुनैपुण्य-कलाकौशलवर्जिता । स्वामिनि ! तादृशी चाहं, विज्ञाता यादृशी त्वया ॥८६॥
त्वं पुनः सर्वविज्ञान-कामशास्त्रविशारदा । कुशला सर्वकार्येषु, दक्षा सर्वकलास्वपि ॥८७॥
जानामि यद्यमुं स्वामि-न्येकदापि सुदर्शनम् । रमयसे तदा त्वं तु, लोके पण्डितपण्डिता ॥८८॥
श्रुत्वेदमभयादेवी, साक्षेपं प्रत्यभाषत । रमये यद्यहं नैनं, तदास्मि ब्रह्मचारिणी ॥८९॥
इत्थं विधाय सा गर्वं, प्रतिज्ञामतिदुर्वहाम् । गतोद्याने यथाकामं, सङ्क्रीडच्च गृहमागता ॥९०॥
ततश्च पण्डिता नाम, स्वधात्री भणिता तया । भद्रे ! तथा कुरु शीघ्रं, शीघ्रं सर्वप्रयत्नतः ॥९१॥
सुदर्शनेन मे सार्धं, सङ्गमो जायते यथा । तयोक्तं च यथा पुत्रि !, न त्वया सुन्दरं कृतम् ॥९२॥
यतोऽसौ दृढसम्यक्त्वः, सुश्रावको दृढव्रतः । सदा स्वदारसन्तुष्टः, कथं त्वां कामयिष्यति ?॥९३॥
कथं चेह स आनेय,: पुत्रीदमतिदुष्करम् । ततो देव्याभिधाय्येवं, प्रतिज्ञेयं मया कृता ॥९४॥
समं कपिलभट्टिन्या, निर्वोढव्या यथा तथा । अतः कर्तव्यमेवेदं, निर्विचारं त्वयाम्बिके !॥९५॥
आख्यातुमपि नान्यस्मै, शक्यतेऽदस्त्वया विना । ततः सा क्षणमेकाग्रा, चिन्तयित्वा च मानसे ॥९६॥
ब्रूते यथैककस्ताव-न्मयोपायः समीक्षितः । तयोक्तमम्ब ! कीदृक्षः, सा प्राह शृणु पुत्रिके ! ॥९७॥
अयं हि पौषधं पूर्णं, कुरुते पर्ववासरे । कायोत्सर्गेण रात्रौ तु, तिष्ठति चत्वरादिषु ॥९८॥
तद्वत्से ! तत्र गत्वाहं, चेटिकावृन्दसंयुता । तिष्ठन्तं मूकभावेन, वस्त्रैः संवेष्टच्च सर्वतः ॥९९॥
द्वारपालांश्च वञ्चित्वा, कन्दर्पप्रतिमाच्छलात् । तमुत्पाटच्च ततः स्थाना-दानयामि तवान्तिकम् ॥१००॥
एवं विधीयतां मात-र्देव्या प्रत्युदिते सति । पस्तावमीक्षमाणासौ, नित्यं तिष्ठति पण्डिता ॥१०१॥
अन्यदा चाष्टमीरात्रौ, कायोत्सर्गे व्यवस्थितः । वीक्षितो हट्टमार्गेऽसौ, तया श्रेष्ठी सुदर्शनः ॥१०२॥
नानाविधसुरार्चानां, नयनानयनच्छलात् । मदनप्रतिबिम्बस्य, व्याजेनासौ प्रवेशितः ॥१०३॥
अन्तःपुरे ततो हृष्टा-भयादेवी समीक्ष्य तम् । क्षोभितुं च समारब्धा, सामतो दण्डतस्तथा ॥१०४॥
गृहीत्वा सोऽपि साकारं, प्रत्याख्यानं विशेषतः । धर्मध्याने महासत्त्वो बभूव सुविनिश्चलः ॥१०५॥

१ तनयन्त्येवं JC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभयापि यथाशक्त्या, रजनीं सकलामपि । क्षोभयामास नैवासौ, क्षुभितश्च मनागपि ॥१०६॥
प्रभाते च निजो देहः, पाटितो नखकोटिभिः । पूत्कर्तुं च समारेभे, महद्भिर्भूरिनिःस्वनैः ॥१०७॥
यथैष मां बलादेव, कामयते सुदर्शनः । दारयति नखाग्रैश्च शीघ्रं धावत धावत ॥१०८॥
श्रुत्वेदं तत्र वेगेन, समायातो महीपतिः । पप्रच्छ तं प्रयत्नेन, वृत्तान्तः क एष इति ॥१०९॥
सोऽपि संशुद्धचित्तत्वा-न्मनागपि न भीतवान् । निष्प्रकम्पः शुभध्यानः, स्वप्रतिज्ञां लुलोप न ॥११०॥
न ददावुत्तरं किंचि-त्ततो रुष्टेन भूभुजा । वध्यत्वेन समादिष्टो, यथास्य छिद्यतां शिरः ॥१११॥
राजादेशाद् गृहीतोऽसौ, पुम्भिर्नगररक्षकैः । गाढं विडम्बयित्वा च, पुर्या मध्ये समन्ततः ॥११२॥
पश्चात्पितृवने नीत्वा, वध्यदेशे निवेश्य च । वाहितः कण्ठदेशेऽस्य, खड्गो नगररक्षकैः ॥११३॥
देवतायाः प्रभावेन, स प्रहारोऽसिसम्भवः । शोभां च कुर्वती कण्ठे, सञ्जाता पुष्पमालिका ॥११४॥
पुष्पगन्धोदवृष्टिश्च, प्रपपात नभःस्थलात् । सञ्जनितजनाश्चर्यः, सञ्जज्ञे देवतागमः ॥११५॥
आकर्ण्येदं ततो राजा, समारुह्य महागजम् । संयुक्तो भूरिलोकेन, शीघ्रं तत्र समागतः ॥११६॥
पतितः पादयोस्तस्य, क्षामितश्च मुहुर्मुहुः । हस्तिस्कन्धं समारोप्य, नगर्यां च प्रवेशितः ॥११७॥
सम्पूजितश्च वस्त्राद्यै-र्नरेन्द्रेण सुदर्शनः । पुरे देशे च सर्वत्र, साधुवादमवाप च ॥११८॥
लोकैः संस्तूयमानश्च, जगाम निजमन्दिरे । कुटुम्बसुस्थतां कृत्वा, चैत्यादिपूजनं तथा ॥११९॥
राज्ञा स्वजनलोकैश्च, वार्यमाणोऽपि वीरधीः । संवेगादादद्दे दीक्षां, गीतार्थगुरुसन्निधौ ॥१२०॥
अथ सुदर्शनश्रेष्ठि-प्रभावं विश्वविश्रुतम् । समाकर्ण्याभयादेवी, भयसम्भ्रान्तमानसा ॥१२१॥
आत्मानं दृढमुद्बद्ध्य, तत्क्षणं सा मृता सती । जाता पाटलिपुत्रस्य, श्मशाने व्यन्तरी किल ॥१२२॥
नरनाथभयोत्त्रस्ता, तथा धात्र्यपि पण्डिता । चम्पापुर्या विनिर्गत्य, पाटलिपुत्रमगच्छत ॥१२३॥
देवदत्ताभिधानाया, वेश्याया गृहमाश्रिता । ततः सा देवदत्तायाः, स्ववृत्तान्तं न्यवेदयत् ॥१२४॥
एवमाख्यायमानासौ, प्रत्यहं तत्तदग्रतः । यावत् सुखेन तत्रास्ते, तावदन्यत्र वासरे ॥१२५॥
अथ सोऽपि महासत्त्वो, मुनिः सुदर्शनाभिधः । तपःशोषितसर्वाङ्गो, विहरन् मेदिनीतले ॥१२६॥
तत्रैव च समायातः, क्रमेण वरपत्तने । शान्तमूर्तिर्लसत्कीर्तिः, सद्वृत्तो मुनिसत्तमः ॥१२७॥
आगमोक्तविधानेन, भिक्षार्थं पर्यटन्नसौ । प्रविलोकितस्तया धात्र्या, देवदत्तासमेतया ॥१२८॥
कथितं च यथा सोऽयं, भगवान् श्रीसुदर्शनः । ततस्तं देवदत्तापि, क्षणं वीक्ष्य सुविस्मिता ॥१२९॥
चेटिकां प्रेषयामास, तदानयनहेतवे । गत्वा तदन्तिके सापि, नत्वा तं प्रति भाषते ॥१३०॥
यथा भो एहि मद्गेहे, भिक्षामादत्स्व सन्मुने ! । सोऽप्यायातस्ततस्ताभि-र्गेहमध्ये प्रवेशितः ॥१३१॥
दत्त्वा द्वारं च गेहस्य, क्षोभितः सकलं दिनम् । नानाप्रकारचेष्टाभिः, प्रकामं देवदत्तया ॥१३२॥
सशृङ्गारैः सकामैश्च, जल्पितेक्षितचेष्टितैः । न शशाक च तं सर्वैः, क्षोभितुं कामशास्त्रगैः ॥१३३॥
ततो रात्रौ स चेटीभि-स्त्यक्तो नीत्वा श्मशानके । सोऽपि विशुद्धभावस्थः, कायोत्सर्गेण संस्थितः ।१३४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः सा व्यन्तरी तस्य, चक्रे वैरानुबन्धतः । उपसर्गान् महाघोरान्, सप्ताहानि निरन्तरम् ॥१३५॥
तस्यापि सहमानस्य, तांश्च मध्यस्थया धिया । वासरे सप्तमे ज्ञान-मुत्पन्नं केवलाभिधम् ॥१३६॥
ततो भक्तिसमाकृष्टाः, समायाताः सुरासुराः । चक्रिरे केवलज्ञान-महिमां तस्य सन्मुनेः ॥१३७॥
आगतस्तत्र भूयांश्च, पौरो जानपदो जनः । सद्भक्त्या वन्दनार्थाया-ऽनुवृत्त्या कौतुकेन च ॥१३८॥
ततः पद्मासने रम्ये, सुखासीनो मुनीश्वरः । प्रारब्धो देशनां कर्तुं, भव्यसत्त्वसुखावहाम् ॥१३९॥
भो भो भव्या ! महाभीमः, संसारोऽयं शरीरिणाम् । नानाविडम्बनाहेतु-र्नानादुःखसमाकुलः ॥१४०॥
नानादुःखौघरूपश्च, नानादुःखानुबन्धकृत् । रागादिमूलनिःशेष-कर्मसन्ताननिर्मितः ॥१४१॥

इह हि नारकतिर्यग्नरामरगतिलक्षणसंसारेऽनेकपुद्गलपरावर्ताचरणचतुरोऽयं जीवो महता क्लेशेन मानुषत्वमासाद्य तत्त्वार्थाश्रद्धानलक्षणमिथ्यात्वग्रहगृहीतविग्रहो न जानाति कार्याकार्यं, न लक्षयति भक्ष्याभक्ष्यविशेषं, न निरीक्षते पेयापेयं, नावधारयति गम्यागम्यविभागं, न गणयति सुगुणदोषान्तरमित्येवं च भ्रान्तमनाश्चिन्तयत्यसौ नास्ति परलोकसत्ता, न विद्यते शुभाशुभकर्मणां फलसद्भावः, न सम्भवति पञ्चभूतातिरिक्तः कश्चिद्भात्मा, न युज्यते समस्तवस्तुविस्तारवेदी सर्वज्ञः, दूरत एव तदुपदिष्टकष्टानुष्ठानप्राप्योऽपवर्ग इति । ततः परलोकासद्भावादेव दोदूयते चराचरजन्तून्, जञ्जल्प्यते परोपतापकारिवचनानि, जरीगृह्यते रारटच्यमानानां परेषां धनानि, बोभुज्यते परकलत्राणि, बोभूयतेऽपरिमितधनकनकलम्पटैः, आस्वादयेन्नितरां मांसानि, पिबत्यतिशयेन मांसरसमदिरादिकं, न जिघृक्षति मुमुक्षुभिक्षूपदेशं, ततः संचिनोति ज्ञानावरणादिक्लिष्टकर्मकदम्बकं, पतति तत्परवशतया घोरान्धकारनरकेषु, तत्र च पतितो विपाट्यते तीक्ष्णकरपत्रैः, आरोप्यते वज्रकण्टकनिचितशाल्मलीषु, पच्यते कुम्भीपाकेन, पाय्यते तप्तं त्रपु, भोज्यते स्वशरीरोत्कर्तितपिशितानि, तार्यते क्वथितपूयरुधिरादिजम्बालपूर्णां वैतरणीं, छिद्यते पूर्वभवोपात्तकर्मवायुप्रेरितै-रसिचक्रकुन्तादिप्रहरणैरसिपत्रवनेष्विति । ततः पीडानुगतो हा मातर्हा भ्रातस्त्रायध्वं त्रायध्वमिति करुणमाक्रोशति, न चासौ तत्र त्रातारमाप्नोति । ततोऽपि कथञ्चिदुद्धृतः [स] तिर्यक्त्वमासादयति, तत्रापि वाह्यते पृष्टारोपितं क्रन्दन्महाभारं, भक्ष्यते स्वशरीरोद्भवैः कृमिजालैः, पीड्यते क्षुत्पिपासाशीतोष्णाद्युपद्रवशतैरिति । तस्मादपि कथञ्चिन्निर्गतो यद्यवाप्नोति मनुष्यभावं, तत्रापीष्टवियोगानिष्टसम्प्रयोगादिजनितैः सन्तापैस्तापितशरीरो न लभते धृतिं, कार्यते प्रेष्यादिकं, कदर्थ्यते जराविकारैः, मार्यते परधनहरणादि कुर्वन्नधन्यतया, आक्रम्यते काशशोषभगन्दरकुष्ठज्वरादिरोगैः, उन्मूल्यते कतिपयदिनमध्ये समवर्तिना । ततो रूढितबहुकर्मतया कथञ्चिदवाप्तामरभावोऽप्याज्ञाप्यते पुरन्दरादिभिः, क्षीयते प्रचुरापरर्द्धिदर्शनेन, जीर्यते पूर्वजन्मकृतप्रमादस्मरणेन, पीड्यते भविष्यद्भवगर्भसम्भवचिन्तनेन, इत्येवं पर्यालोच्यमानं न किञ्चित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसारे सुखमस्ति। एतस्य च मूलबीजं मिथ्यात्वम्, अतः संसारसागरमुत्तितीर्षता तदुच्छेदाय यतितव्यं, कथं ? प्रतिपत्तव्यार्हन् देवता, अङ्गीकर्तव्या तन्निदेशवर्तिसाधुदक्षिणा, न हन्तव्याः प्राणिनः, न वक्तव्यं परपीडाकरं वचः, न लातव्यमदत्तं परकीयं, न भोक्तव्या परयुवतिः, विधातव्यं परिग्रहपरिमाणं, न भोक्तव्यं रजन्यां, प्रवर्तितव्यं दानादौ, परिहरणीयं पिशितलौल्यं, न पातव्यं मदिरादि, ततोऽनेन क्रमेणोत्तरोत्तरगुणप्रतिपत्त्या कर्मशत्रोर्गलपादिकयावाप्यते निरतिशयं शिवसुखमिति।

ततः समाकर्ण्य कर्णामृतस्यन्दिनीमिमां सुदर्शनमुनिदेशनां प्रबुद्धाः प्रभूतजन्तवो यथार्हं प्रतिपद्य धर्मं निजस्थानमुपागताः, सापि व्यन्तरी प्रशान्तवैरानुबन्धा प्रबुद्धा, पण्डितापि धात्री देवदत्ता च। सुदर्शनमहामुनिरपि तत्रैवमनेकभव्यसत्त्वोपकारं कृत्वा ततोऽन्यत्र विजहार। चिरं च परिपाल्य सम्पूर्णसंयमराज्यं, प्रबोध्य च प्रबलविपुलकेवलज्ञानपुरस्सरवागंशुजालैरंशुमालीव प्रभूतभव्यपद्माकरान्, समासाद्य शैलेश्यवस्थां, क्षपयित्वा भवोपग्राहिकर्मचतुष्टयं परमानन्दसुखसम्पदास्वादसुन्दरं शिवसदनशिखरमासादितवानिति।

इमं समाकर्ण्य सुदर्शनस्य, शुद्धस्य शीलस्य महाप्रभावम्। निःशेषकल्याणकरे ततो जनाः, शीले विशुद्धे कुरुतादरं सदा ॥१॥

इति **सुदर्शनाख्यानकं** समाप्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ **शीलसुन्दरीकथानकं** कथ्यते, तद्यथा–

अस्तीह **भारते** क्षेत्रे, **सुशर्माख्यं** महापुरम्। तत्रासीद्धनचन्द्राख्यः, श्रेष्ठी श्रेष्ठश्रियां गृहम् ॥१॥
सुरूपा शीलसम्पन्ना, तद्भार्या **शीलसुन्दरी**। लसल्लावण्यसम्पन्ना, नवयौवनहारिणी ॥२॥
अन्यदा धनचन्द्रेण, देशान्तरयियासुना। द्रविणोपार्जनाहेतो-र्भणिता निजगेहिनी ॥३॥
यथा प्रिये ! निजं गेहं, रक्षणीयं प्रयत्नतः। स्वकीयं शीलरत्नं च, देवानामपि दुर्लभम् ॥४॥
इत्थमुक्त्वा गतः श्रेष्ठी, सम्प्राप्तश्चेप्सितं पुरम्। निवासोऽजनि तत्रैव, कुर्वतः क्रयविक्रयम् ॥५॥
शीलसुन्दर्यपि स्वीयं, रक्षन्ती वेश्म यत्नतः। सुन्दरं शीलरत्नं च, गमयति स्म वासरान् ॥६॥
अन्यदा च समायाते, वसन्ते चूतचारुणि। उद्यानसम्पदं द्रष्टुं, चतुरङ्गबलान्वितः ॥७॥
हस्तिस्कन्धं समारूढो, नरेन्द्रश्चन्द्रशेखरः। निर्गच्छन्नगरादुच्चै-रपश्यच्छीलसुन्दरीम् ॥८॥
निजगेहे गवाक्षस्थां, लसत्सर्वाङ्गसुन्दरीम्। दृष्ट्वैनां भूपतिर्बाढं, सञ्जातो मदनातुरः ॥९॥
ततश्चागमदुद्यानं, शून्येनैव हि चेतसा। मित्रानुरोधतश्चैव, विलोक्य च वनश्रियम् ॥१०॥
रमयित्वा क्षणं तस्मि-न्नायातो निजमन्दिरे। ततो विसर्जयामास, सामन्तादिपरिच्छदम् ॥११॥
निषण्णश्च ततो गत्वा, पर्यङ्के सुमनोहरे। गृहीतश्च [स] कन्दर्प-विकारैर्दुःखदायिभिः ॥१२॥
ततश्च चिन्तयामास, नराधीशः स्वमानसे। यदिदं कथ्यते साक्षा-न्मन्त्रिणां लाघवं तदा ॥१३॥
विचिन्त्यैवं ततो राज्ञा, चन्द्रनामा निजः पुमान्। आकार्य विजनं कृत्वा, कृतोऽभिन्नरहस्यकः ॥
तेनोक्तं यदि सा राजन् !, सानुरागा त्वयि स्फुटम्। कार्यसिद्धिस्ततो नूनं, सर्वा हस्तगतैव हि ॥१५॥
समर्पयाथ मे देव !, लेखं स्वाकूतसूचकम्। येन तस्या गृहं गत्वा, सादरं तं समर्पये ॥१६॥
लिखितश्च नरेन्द्रेण, लात्वा सोऽपि द्रुतं गतः। पश्चिमद्वारतस्तत्र, प्रविष्टश्च क्रमादसौ ॥१७॥
दृष्टा च चन्द्रशाला या-मुपविष्टा शीलसुन्दरी। लेखः समर्पितस्तेन, तस्याः प्रणामपूर्वकम् ॥१८॥
तयोक्तं भद्र ! केनायं, लेखः सम्प्रेषितो मम ?। स प्राह किं विचारेण ?, लेखो हि कथयिष्यति ॥१९॥
तत उद्वेष्टितो लेखो, गृहीत्वा नखकोटिभिः। दृष्टा तया च तत्रैका, गाथेयं सुन्दराक्षरा ॥२०॥

न लहइ गेहम्मि, रइं न बाहिरे नवि य पवरपल्लंके।
सुंदरि तुज्झ समागम-समूसुओ अंतरप्पा मे ॥२१॥

वाचिता च तया तूर्णं, गाथार्थोऽवगतस्तथा। चन्द्रेणापि ततः प्रोचे, सादरं व्यक्तया गिरा ॥२२॥
लेखस्तावदयं राज्ञः, सन्देशकं त्विमं शृणु। यथा त्वां खलु दृष्ट्वाहं, विद्धो बाणैर्मनोभुवा ॥२३॥

हारो दहइ सरीरं, दहइ जलद्दावि देहसंलग्गा।
ससिकिरणा तणुतवणा, पल्लंको मुम्मुरग्गिसमो ॥२४॥
ता तह करेसु जह कह - वि होइ महदंसणं तए सद्धिं।
एत्तियमेत्तं भणिमो, जं जुत्तं तं करिज्जासु ॥२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तयाभाणि श्रुतो भद्र !, सन्देशको महीपतेः । तदद्यैव तमिस्राया-मेकाक्येव समेतु सः ॥२६॥
इत्युक्त्वा शीलसुन्दर्या, सन्मान्य च यथोचितम् । चन्द्रो विसर्जितः सोऽपि, गत्वावोचन्नराधिपम् ॥२७॥
यथा देव ! त्वमद्यैव, समाहूतस्तया निशि । श्रुत्वेदं कृतसन्मान-श्चन्द्रो राज्ञा विसर्जितः ॥२८॥
स्वयं च कृतशृङ्गारो, रात्रावेकक एव हि । जगाम शीलसुन्दर्या, गेहे रत्नचयान्विते ॥२९॥
आरूढश्चन्द्रशालां च, रत्नराजिविराजिनीम् । ददर्श तत्र पर्यङ्के, प्रसुप्तां शीलसुन्दरीम् ॥३०॥
सापि राजानमालोक्य, सम्भ्रमेण समुत्थिता । दत्ते भद्रासनं तस्मै, नानारत्नप्रभासुरम् ॥३१॥
राज्ञोक्तमिदमेवाहं, पर्यङ्कं समाश्रये । तयावाचि महाराज !, मनोऽभीष्टं व्यधीयताम् ॥३२॥
निषण्णस्तत्र राजेन्द्र-स्ततस्तयापि सादरम् । प्रतिप्रत्तिः कृता सर्वा, पादप्रक्षालनादिका ॥३३॥
उपविष्टा ततस्तस्य, पुरतः शुद्धभूतले । राज्ञोक्तममुमेवाशु, पर्यङ्कं समाश्रय ॥३४॥
तया प्रोचे महीनाथ !, कथं गोमायुगेहिनी । मृगेन्द्राध्यासितं स्थानं, निःशङ्का श्रयति ध्रुवम् ॥३५॥
राजा प्राह किमेतेन, विचारेण कृतेन ते । प्रतिपन्नं त्वमेवाशु, साम्प्रतं कुरु सुन्दरि ! ॥३६॥
तयोक्तं क्रियते देव ! केवलं श्रूयतां क्षणम् । यदहं ते समाख्यामि, महाराज ! कथानकम् ॥३७॥
राजाह कथ्यतां भद्रे !, साप्याह श्रूयतामिति । अस्तीह पुष्पचङ्केरं, पुरं देवकुलाकुलम् ॥३८॥
बभूव मालिकस्तत्र, कुन्दकेत्वभिधानकः । तस्यारामो वरोऽनेक-वनराजिविराजितः ॥३९॥
अन्यदा वल्लफल्यर्थं, तस्य गेहे निजः पुमान् । श्रेष्ठिना वसुसारेण, सम्प्रेषितो गतश्च सः ॥४०॥
याचितो मालिकस्तेन, देहि वल्लफलीरिति । मालिकः प्राह वल्लाना-मकालो वर्ततेऽधुना ॥४१॥
यद्यहो भद्र ! कालः स्या-त्तदैति कस्तवान्तिकम् । इत्युक्त्वा निजके गेहे, जगामाशु पुमानसौ ॥४२॥
ततो गतो निजारामे, कुन्दकेतुरपि द्रुतम् । आदिदेश निजान् वण्ठान्, युष्माभिर्भो यथाविधि ॥४३॥
निष्पावा वृत्तिपर्यन्तं, भूपीठे उप्यतां भृशम् । सिच्यतां च जलैर्नित्यं, तथैवाकारि तैरपि ॥४४॥

सिच्यमानाश्च तैर्नित्यं, जाताः पुष्पफलप्रदाः ।
अन्यदा च मनाक् वल्लान्, भक्षितान् वीक्ष्य मालिकः ॥४५॥

सर्वतोऽपि परिभ्राम्य-न्निजारामं व्यलोकयत् । न चाऽलाकि पदं तेन, गवादेस्तत्र कस्यचित् ॥४६॥
द्वितीयेऽह्नि ततः सम्यक्, स्वयमेव व्यलोकयत् । भक्षयन्ती भृशं वल्लान्, वृत्तिरेव विलोकिता ॥४७॥
ततस्तेन विचिन्त्यैवं, विस्मयाकुलचेतसा । मया वृत्तिः कृता रक्षा-हेतवे लूषिकाजनि ॥४८॥

जे चेव रक्खगा लुंपगावि ते चेव जत्थ जायंति ।
भयभीओ सरणत्थी, तत्थ जणो कं समल्लियउ ? ॥४९॥
जा वल्लरक्खणकए, कहकहवि विणिम्मिया वाडी ।
सचिय वल्लविणासं, करेइ हा कत्थ वच्चामि ? ॥५०॥

विचिन्त्यैवं ततस्तस्थौ, विधायाकारसंवरम् । कुन्दकेतुस्तदाश्चर्यं, जनानां कथयन्नृपः ॥५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्राजन् ! यादृशा वल्ला-स्तादृशो मादृशो जनः । यादृशा च वृतिस्तत्र, तादृशस्त्वं महीपते ! ॥५२॥
निर्मितो वेधसा नूनं, प्रजानां परिपालकः । यदि त्वमपि मर्यादा-व्यतिक्रान्तं करिष्यसि ॥५३॥
तस्मादन्यस्य कस्येदं, कथयिष्यामि भूपते ! । य एव रक्षको लोके, स एवाजनि भक्षकः ॥५४॥
स्थित्यतिक्रान्तिभीरूणि, स्वस्थान्यकलितानि च। तोयानि तोयराशीनां, मनांसि च मनस्विनाम्॥५५॥
एवं स्थिते महाराज! तुभ्यं यदभिरोचते । तद्विधेहि स्वयं चैव, भाषेऽहं किमतः परम् ॥५६॥
आकर्ण्येदं ततो बिभ्रन्, पश्चात्तापं स्वमानसे । तां ब्रवीति स्तुवन्नेवं, तद्गुणै रञ्जितो यथा ॥५७॥

धन्नासि तुमं सुंदरि, पत्तपडाया सईण मज्झंमि ।
नियसीलरयणरक्खण-समुज्जमो जीय तुह एसो ॥५८॥
अज्जवि वट्टइ धम्मो, अज्जवि सच्चं वयंति पाणिगणा ।
अज्जवि संति सईओ, सच्चवियमिणं तए वयणं ॥५९॥
नियकुलकलंकजणयं, मज्जायाविलोयकारयं भणियं ।
अविलंबिऊण कापुरिस-चेट्ठियं जं मए भणियं ॥६०॥
तं सव्वं खमसु तुमं, संपइ सूरुग्गमो समासन्नो ।
वच्चामि नियभवणं, अलक्खओ चेव लोएण ॥६१॥

ततश्च शीलसुन्दर्या, भाषितं मृदुभाषया । एवं विधेहि भो राजन् !, निजं गेहमलङ्कुरु ॥६२॥
ततो यावच्छिरोगेहा-दुत्तरति स्म भूपतिः । तावद्देशान्तरात्तत्र, धनचन्द्रः समागतः ॥६३॥
एकाकी पश्चिमे भागे, द्वारेण प्रविशन् गृहम् । निजगेहान्नराधीशं, निर्गच्छन्तं प्रपश्यति ॥६४॥
ततश्च धनचन्द्रोऽपि, तस्य मार्गं विमुक्तवान् । निर्गच्छतस्ततो राज्ञः, साशङ्कस्य द्रुतं द्रुतम् ॥६५॥
नामाङ्कं च पपाताशु, मुद्रारत्नमलक्षितम् । गतश्च स्वगृहे राजा, लज्जितो निजचेष्टितैः ॥६६॥
धनचन्द्रोऽपि तन्मुद्रा-रत्नमादाय सत्वरम् । जगामोपरिवर्तिन्यां, भूमिकायां स्ववेश्मनः ॥६७॥
तत्र चालोकयामास, प्रतिस्तम्भनिवेशितान् । रत्नराशींस्तथा पुष्प-प्रकराञ्चितकुट्टिमम् ॥६८॥
वासभवनं च तद्व-द्वस्त्राद्युल्लोचसुन्दरम् । भोगाङ्गयुक्तपर्यङ्क-सुप्तां च शीलसुन्दरीम् ॥६९॥
ततोऽसौ विस्मयं चित्ते, विषादं च वहन् भृशम् । हाहा किमेतदित्येवं, तस्थौ तत्रैव चिन्तयन्॥७०॥
धनचन्द्रं तथालोक्य, शीलसुन्दर्यपि द्रुतम् । ससम्भ्रमं समुत्थाय, पर्यङ्कादासनं ददौ ॥७१॥
चरणक्षालनार्थं च, गृहीत्वा जलमागता । विलोक्य च सहर्षां तां, धनचन्द्रो व्यचिन्तयत् ॥७२॥

जसु निमित्तु हयहीयडा, पइं जलनिहि तरिओ ।
तं कलत्तु एवंविह-दुन्नयसयभरिओ ॥७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एउ अपुव्वु जं पेक्खे, विलज्जवि नवि करेइ ।
हरिसुल्लसियमुहुल्लउ, महु[1] अग्गइ धरेइ ॥७४॥
वरवेल्लिओ मातियवइ, दुसव्वइ जाह पलंति ।
जो एक्कसि वेढेंति तरु, सो मरणेहि मुंचंति ॥७५॥
बहुविहकवडकुहेडय-संसयसयमंदिरं हवइ महिला ।
कह मइलियं नियकुलं, नरवइणा पुरिससीहेण ॥७६॥

किमिदानीं प्रकुर्वेऽहं, किं कृतं सुकृतं भवेत् । किमित एव गच्छामि, गेहं मुक्त्वा वनान्तरम् ॥७७॥
किं वाहं तर्जयाम्येनां, नाम्नैव शीलसुन्दरीम् । अथवेह न कर्तव्यं, मन्दालोचितकं मया ॥७८॥

यतः- **मंदालोइयकज्जे, सहसचिय जे नरा पयट्टंति ।**
बज्झंति ते वराया, दीवसिहाए पयंगुव्व ॥७९॥

अतः कार्यमिदं सम्यक्-पूर्वापर्येण सर्वथा । कृत्वा पश्चादहं सर्वं, करिष्यामि यथोचितम् ॥८०॥
विचिन्त्यैवं तया दत्तं, स आसनमशिश्रियत् । पृष्टा च सा यथैषा किं, गृहश्रीः प्रकटीकृता? ॥८१॥
द्वारेण पश्चिमेनैष, को वा विनिर्गतः पुमान् । प्रोक्तस्तयापि वृत्तान्तो, भूपालागमनादिकः ॥८२॥
श्रेष्ठिनावाचि गम्भीरं, कार्यमेतद्धि बालिके ! । पूर्वापर्येण विज्ञातुं, सङ्केपेण न शक्यते ॥८३॥
बहिश्च मामकः सार्थः, सङ्गोपितोऽवतिष्ठते । तस्मात्तत्र व्रजामीति, भणित्वा गतवानसौ ॥८४॥
स सार्थस्त्वरितस्तेन, नगरान्तः प्रवेशितः । दत्त्वा द्रव्यं निजं सर्वं, विससर्ज परिच्छदम् ॥८५॥
ततः कृत्वा स्वके स्थाने, समग्रं द्रव्यसञ्चयम् । गृहीत्वा प्राभृतं भूरि-मुद्रारत्नेन संयुतम् ॥८६॥
जगाम भूपतेर्गेहं, प्रविष्टश्चोपविष्टवान् । राजापि चिन्तयत्युच्चै, रजनीव्यतिकरं यथा ॥८७॥

न कुलं न यावि सीलं, न पोरुसं न चिय कज्जसंसिद्धी ।
हद्धी विडंबणचिय, अपत्तपुव्वा मए पत्ता ॥८८॥
अवियारिऊण कज्जं, तं किंपि करेइ एस दुट्ठप्पा ।
जेणप्पणोवि लज्जइ, जाजीवं सुमरणेणावि ॥८९॥
संगोणंगेण जिओ, लोहसरो कुसुमबाणवसगोहं ।
नियअक्खाणवि अपहू, कहं पहू होमि अन्नाण ॥९०॥
सच्चं वयंति विउसा, नत्थि पिओ जस्स सो जए सुहिओ ।
पियसंगो जेण कओ, सो नणु दुक्खक्खणी जाओ ॥९१॥

यावत्क्षणान्तरादूर्ध्वी-कृत्यास्यं वीक्षते नृपः । मूर्ध्नि बद्धाञ्जलिं तं च, धनचन्द्रं व्यलोकयत्॥९२॥
मुद्रारत्नयुतं भूरि-प्राभृतं च तदन्तिके । ततश्च लज्जितश्चित्ते, नरेन्द्रश्चाब्रवीदिदम् ॥९३॥

---

१ JC । मुहु-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा भद्र ! चिराद् दृष्टः, कुत्र तस्थावियच्चिरम् । धनचन्द्रस्ततः प्राह, राजानं विनयानतः ॥९४॥
राजेन्द्र ! येन नैवास्ति, मनुष्येण प्रयोजनम् । पार्श्वेऽपि वर्तमानोऽत्र, दृश्यते स कथं विभो ! ॥९५॥
महती मे वर्तते वेला, देवदृष्टचभिलाषिणः । राजाह सर्वमेवेदं, क्षन्तव्यं भवता मम ॥९६॥
राज्यप्रयोजनेनाहं, व्यग्रस्तस्थौ क्षणान्तरम् । तेन त्वमागतोऽप्यत्र, श्रेष्ठिन्नैव मयेक्षितः ॥९७॥
ततः कृतप्रणामेन, धनचन्द्रेण भूपतेः । ढौकितं प्राभृतं मुद्रा-रत्नयुक्तं प्रयत्नतः ॥९८॥
प्राभृतोपरि तद् दृष्ट्वा, मुद्रारत्नं नृपोऽपि च । लात्वाऽङ्गुलौ प्रचिक्षेप, श्रेष्ठिनं चाब्रवीदिदम् ॥९९॥

यथा भद्र ! त्वया भ्रान्ता, देशा नानाविधाश्चिरम् ।
किं तेषु विलोकितं किञ्चि-दाश्चर्यं विस्मयावहम् ॥१००॥

श्रेष्ठी प्राह यथा राजन् !, दृष्टमत्रैव पत्तने । एकत्र स्वच्छनीरौघ-परिपूर्णतडागिका ॥१०१॥
तस्यां सिंहो मया दृष्टः, प्रविष्टोम्बुपिपासया । निर्गच्छंश्च परं तत्र, तत्त्वं नावगतं मया ॥१०२॥
राज्ञाचिन्ति मनस्येव-मुपालम्भो ह्ययं मम । तस्मादुत्तारयाम्यस्य, शङ्काविषं स्फुटोदितैः ॥१०३॥
एवं विचिन्त्य स श्रेष्ठी, विहस्याभाणि भूभुजा । अहो विज्ञातभावार्थो वृत्तान्तस्यास्य निश्चितम् ॥१०४॥

यतः- **सिंहो तत्थ पविट्ठो, खणं निविट्ठो न चेव परितुट्ठो ।**
तिसिओवि य सासंको, विणिग्गओ लज्जिओ चेव ॥१०५॥

तदहो न त्वया श्रेष्ठिन्, शङ्का कार्यात्र वस्तुनि । नामतो ह्यर्थतश्चैव, सत्यं सा शीलसुन्दरी ॥१०६॥
श्रुत्वेदं भूपमानम्य, स श्रेष्ठी स्वगृहं गतः । आनन्दनिर्भरश्चैवं, भाषते शीलसुन्दरीम् ॥१०७॥
यथा त्वं सत्यमेवेह, सर्वथा शीलसुन्दरी । तवैव निर्मला कीर्ति-स्त्वमेव च महासती ॥१०८॥
इत्युक्त्वा रत्नराजीनि, प्रवराभरणान्यसौ । ददौ तस्यै प्रभूतानि, स वेश्मप्रभुतां तथा ॥१०९॥
इत्थं सा निजगेहस्य, स्वामिनी भर्तृवल्लभा । जाता शीलप्रभावेण, कालेन च शिवं ययौ ॥११०॥

इति **शीलसुन्दरीकथानकं** समाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदिह निखिलदोषव्रातघाते पटिष्ठं, सकलगुणगणानां यद्वरिष्ठं वरिष्ठम् ।
तदमरनरवन्द्यं सर्वकल्याणमूलं, स्वहितनिरतलोकाः पालयध्वं सुशीलम् ॥१॥

यतः- **जह सुरगिरिणो चूला, जह सुरकरिणो कओलमयलेहा ।**
जह फणिवइणो य मणी, जियाण तह भूसणं सीलं ॥२॥
दाणं धणस्स विणओ, सुयस्स खंती तवोवहाणस्स ।
सीलं पुण सव्वेसिं, गुणाण परमो अलंकारो ॥३॥
नाणं वरविन्नाणं, रूवं विणओ नओ य विहवो य ।
पवरो परक्कमो तह, सीलेण विणा न रेहंति ॥४॥

सीलं कित्तिकरं जए जसकरं, कल्लाणमालाकरं । सीलं सिद्धिकरं समीहियकरं निस्सेससोक्खाकरं ।
सीलं संतिकरं कुलुन्नइकरं सव्वंगसोहाकरं । सीलं सोहिकरं परं पियकरं सोहग्गलच्छीकरं ॥५॥
सीलं दुट्ठगरिट्ठनिट्ठुरमहारिट्ठोहनिट्ठावणं । सीलं दुग्गदुरंतदूसहमहादारिद्दविद्दावणं ।
सीलं भूयपिसायजोइणिमहावेतालवित्तासणं । सीलं दुत्तरदुग्गदुग्गइमहादुक्खाण निन्नासणं ॥६॥
सीलं पावपयंगपूगदहणे चंडप्पईवोवमं । सीलं भीमभवोरुसिंधुतरणे सज्जाणवत्तोवमं ।
सीलं कम्मकलंकपंकहरणे सन्नीरपूरोवमं । सीलं दोसगिरिंदविंददलणे दंभोलिजालोवमं ॥७॥
सीलं इंदनरिंदचंदपयवीसंपावणे पच्चलं । सीलं भूरिभयद्दुयाण परमं भव्वाण मं भीसणं ।
सीलं सव्वगुणाणमुत्तममहो सीलं परं भूसणं । सीलं सिद्धिपुरंधिसंगममहासोक्खाण संसाहणं ।८।

इति **शीलाधिकारः** समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तपोऽधिकारः १२

उक्तः शीलाधिकारः, अथ तपोऽधिकार उच्यते, अस्य चायमभिसम्बन्धः-अनन्तराधिकारे शीलमुक्तं, शीलवतामेव तपोऽपि प्रशंसास्पदमास्कन्दति, अतोऽत्र तप उच्यते, तत्र तपोमाहात्म्यं सप्रशंसं श्लोकनवकेनाह–

तपः प्रतप्यमानस्य, क्षीयन्ते कर्मसञ्चयाः ।
[1]तत्क्षयाच्च निर्वाणं, परमानन्दसुखं ततः ॥२५५॥
षट्खण्डमहीनाथा, यन्नमन्ति कृतादराः ।
प्राकृतस्यापि सत्त्वस्य, तपस्या तत्र कारणम् ॥२५६॥
यन्नीचकुलजातोऽपि, देवानां पूज्यतां गतः ।
हरिकेशबलः साधु-स्तपस्तत्र निबन्धनम् ॥२५७॥
हीनजातितयोत्पन्नौ, नानालब्धिसमन्वितौ ।
चित्रसम्भूतिनामानौ, तपसा पूज्यतां गतौ ॥२५८॥
तपस्विनस्तपस्येव, वसन्तीह निरन्तरम् ।
शापानुग्रहसामर्थ्यं, तेषां तदनुभावतः ॥२५९॥
भूरिभोगकरं दानं, शीलं श्लाघादिकारकम् ।
तपश्चाचिन्त्यसामर्थ्यं, यस्माच्छक्रोऽपि शङ्कते ॥२६०॥
यथा तेपे तपः कोऽपि, महाटव्यां महातपाः ।
क्षोभाय प्रेषयामास, भीत इन्द्रः सुरस्त्रियः ॥२६१॥
येन तीव्रं तपस्तप्तं, संयम्येन्द्रियपञ्चकम् ।
मनोऽपि मारितं येन, भवाब्धिस्तस्य गोष्पदम् ॥२६२॥
मोहं निहन्त्यशुभतानवमातनोति,
भिन्ते च संसृतिभयं भविनां भविष्णु ।
नागेन्द्रचन्द्रसुरराजपदं विधत्ते,
तप्तं तपस्तनुभृतां किमु यन्न दत्ते ? ॥२६३॥

इति श्लोकनवकं सुगममेव, तथापि किञ्चिदुच्यते–

तत्र प्रथमश्लोकः सुगम एव ॥२५५॥

---

१ BJC । तत्क्षयाच्चाऽस्ति निर्वाणं-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षट्खण्डमहीनाथाश्चक्रवर्तिनो यद्यस्मान्नमन्ति नमस्यन्ति **कृतादरा** विहितादराः **प्राकृतस्यापि** नीचस्यापि **सत्त्वस्य** जीवस्य **तपस्या** तपः **कारणं** निमित्तम् ॥२५६॥

यन्नीचकुलजात इति श्लोकद्वयं स्पष्टम् ॥२५७-२५८॥

तपस्विनस्तपोधनास्तपस्येव तपस्यायामेव **वसन्ति** निवसन्ति **निरन्तरं** सततं, **शापानुग्रहसामर्थ्यं**, शापो म्रियस्वेत्यादिभणनं, अनुग्रहः पुनर्जीवेति भणनं, तयोः सामर्थ्यं शक्तिस्तेषां तपस्विनां **तदनुभावतस्तपः**प्रभावात् ॥२५९॥

भूरिभोगकरं दानमिति श्लोकः सुगमः, नवरं **यस्माच्छक्रोऽपि शङ्कत** इति लौकिकदृष्टान्तमाह ॥२६०॥

यथा तेपे तप इति सुगमम् ॥२६१॥

येन तीव्रं तपस्तप्तमिति व्यक्तं, नवरं मनो मारितमिव मारितं तथा तेपे तप इति सुगमम्। धर्मशुक्लध्यानाध्यासादेकाग्रतां नीतं, भवाब्धिर्भवसमुद्रस्तस्य जन्तोर्गोष्पदं नितरां लघुरित्यर्थः ॥२६२॥

मोहं मिथ्यात्वमोहनीयं चारित्रमोहनीयं च कर्म **निहन्ति** विनाशयति, **अशुभतानवमशुभकर्मप्रकृतिकृशत्वमातनोति** विस्तारयति, तथा **संसृतिभयं** संसारभीतिं **भविनां** संसारिणां **भविष्णु** भविष्यत्कालभावि **भिन्ते** नाशयति, **नागेन्द्र** इत्यादि स्पष्टमेव ॥२६३॥

चित्रसम्भूतिनाम्नोर्मातङ्गदारकयोश्चरितं **हरिकेशमातङ्ग**चरितं च कथानकाभ्यामवसेयं, ते चेमे, तद्यथा–

अस्तीह विश्वविख्यातं, पुरं **साकेत**नामकम्। नानाकौतुकसंकीर्णं, सम्पूर्णं भूरिसम्पदा ॥१॥
बभूवाखिलभूपाल-मौलिमालार्चितक्रमः। पुत्रश्चन्द्रावतंसस्य, **मुनिचन्द्राख्य**भूपतिः ॥२॥
अथासौ कामभोगेभ्यो, निर्विण्णो भवभीरुकः। मुनेः **सागरचन्द्रस्य**, समीपे व्रतमग्रहीत् ॥३॥
अन्यदा गुरुभिः सार्धं, कुर्वन्नुग्रतरं तपः। सम्प्रवृत्तः सुसार्थेन, दूरदेशान्तरं प्रति ॥४॥
अथासौ मुनिचन्द्राख्यो, महाटव्यास्तटस्थितम्। ग्राममेकं तु भिक्षार्थं, प्रविवेश समाहितः ॥५॥
ततो भिक्षां समादाय, प्रस्थितः सार्थपृष्ठतः। भ्रष्टस्ततो महाटव्या-मितश्चेतश्च पर्यटन् ॥६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्भिः क्षुत्पिपासार्त्तो, दृष्टो गोपालदारकैः । तत्कालोचितमाधाय, ततो भक्त्याभिवन्दितः ॥७॥
कृता च देशना तेन, साधुना साधुधर्मगा । प्रतिबुद्धास्ततः सर्वे, प्रव्रज्यां प्रतिपेदिरे ॥८॥
तप्यमानास्तपस्तीव्रं, विहरन्ति स्म भूतले । चक्रतुश्च मुनी द्वौ तु, जुगुप्सां धर्मगोचराम् ॥९॥
पालयित्वा चिरं दीक्षां, ततस्तौ त्रिदिवं गतौ । ततश्च्युत्वा पुरे रम्ये, **दशार्णपुरनामनि** ॥१०॥
साण्डिल्यब्रह्मिसम्बन्धि-दासीकुक्षावुपागतौ । तस्यां द्विजेन तेनैव, जातौ यमलकौ तकौ ॥११॥
क्रमाद्यौवनमापन्नौ, रम्यं रामाभिरामकम् । अन्यदा क्षेत्ररक्षार्थ-मटव्यां तौ गतौ किल ॥१२॥
तत्राधो वटवृक्षस्य, रात्रौ सुप्तौ ततोऽहिना । एको दष्टः सुहृष्टेन, निष्क्रम्य वटकोटरात् ॥१३॥
सर्पोपलम्भनार्थाय, भ्राम्यंस्तत्र प्रदेशके । द्वितीयोऽपि हि तेनैव, दष्टः सर्पेण रोषतः ॥१४॥
तत्राकृतप्रतीकारौ, मृत्वा **कालिञ्जरे** नगे । मृग्यां युगलभावेन, सञ्जातौ मृगशावकौ ॥१५॥
एकत्रैव चरन्तौ तौ, पूर्वसम्प्रीतियोगतः । व्याधेनैकशरेणैवा-न्यदा व्यापादितौ ततः ॥१६॥
गङ्गातीरे समुत्पन्नौ, युग्मत्वेनैव हंसकौ । कालेन यौवनं प्राप्तौ, स्नेहादेकत्र चारिणौ ॥१७॥
एकेन मत्स्यबन्धेन, गृहीत्वा पाशकेन तौ । कन्धरां वालयित्वा च, रटन्तौ विनिपातितौ ॥१८॥
ततो **वाणारसी**पुर्यां, मातङ्गस्यार्थशालिनः । **भूतदत्ता**भिधानस्य, सञ्जातौ पुत्रकौ तकौ ॥१९॥
चित्रसम्भूतिनामानौ, तथैव प्रीतिसंयुतौ । सर्वाङ्गसुन्दराकारौ, लावण्यामृतकूपकौ ॥२०॥

इतश्च-तस्यामेव महापुर्यां, शङ्खो नाम नरेश्वरः ।
नमुचिर्नामतः मन्त्री, राज्यकार्याण्यचिन्तयत् ॥२१॥

स चान्यदाऽऽगसि कापि, राज्ञा रोषात्समर्पितः । मातङ्गभूतदत्ताय, प्रच्छन्नं वधहेतवे ॥२२॥
मातङ्गस्तमुवाचैवं, यदि भो मामकौ सुतौ । पाठयसि रहःस्थायी, तदा जीवसि नान्यथा ॥२३॥
ततश्च जीविताकाङ्क्षी, तद्वाक्यं प्रतिपद्य सः । तिष्ठन् भूमिगृहे तस्य, पुत्रौ पाठितवानिति ॥२४॥
एवं च तिष्ठते तस्मै, ददती भोजनादिकम् । गेहिनी भूतदत्तस्य, लग्ना तत्रैव मन्त्रिणि ॥२५॥
मत्वैवं भूतदत्तोऽपि, तं व्यापादितुमुद्यतः । विद्यागुरुरिति ताभ्यां, दारकाभ्यां स नाशितः ॥२६॥
पश्चाच्च पुण्ययोगेन, पुरे **गजपुरा**भिधे । नमुचिः प्राप मन्त्रित्वं, **सनत्कुमार**चक्रिणः ॥२७॥
इतश्च तावपि प्रौढ-मारूढौ नवयौवनम् । चित्रसम्भूतिनामानौ, मातङ्गवरदारकौ ॥२८॥
प्रोल्लसल्लास्यगीतादि-कलासु सकलास्वपि । जनतानन्ददात्रीषु, परं प्रकर्षमागतौ ॥२९॥
गायन्तौ सुस्वरं गेयं, वेणुवीणादिसंयुतम् । वाराणसीजनं सर्वं, चक्रतुर्हृतचेतसम् ॥३०॥
अन्यदा च जनानन्दे, सञ्जाते मदनोत्सवे । प्रवृत्तासु प्रभूतासु, जनताचर्चरीष्वलम् ॥३१॥
नृत्यन्तीषु पुरन्ध्रीषु, तरुणीषु नरेषु च । निर्गता चित्रसम्भूत-[1]पाणानामपि चर्च्चरी ॥३२॥
ततः सातिशयं श्रुत्वा, गीतनृत्यादिकं तयोः । वाराणसीजनः सर्व-स्तत्समीपमुपागतः॥३३॥

---

१ JB । वीणयोश्चाऽपि चर्चरी-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषेणागतास्तत्र, सानन्दास्तरुणस्त्रियः । प्रविशन्ति स्म तन्मध्ये, निःशङ्काः कौतुकाकुलाः ॥३४॥
ततश्चेर्ष्यालुकत्वेन, लोकेन ब्राह्मणादिना । शङ्खाय नरनाथाय, वृत्तान्तोऽयं निवेदितः ॥३५॥
यथा मातङ्गपुत्राभ्यां, देवायं नगरीजनः । विटालितः समग्रोऽपि, यद्विजानासि तत्कुरु ॥३६॥
ततस्तयोर्नृपेणापि, प्रवेशो वारितः पुरि । एवं च विहिते तत्र, गतः कालः कियानपि ॥३७॥
अथान्यदा च सञ्जाते, कौमुदीसुमहोत्सवे । लोलेन्द्रियतया बाढं, कौतुकाकुलमानसौ ॥३८॥
विस्मार्याज्ञां नरेन्द्रस्य, विमुच्य च स्वभूमिकाम् । प्रविष्टौ नगरीमध्ये, तौ चित्रकसम्भूतकौ ॥३९॥
एकत्र प्रेक्षणं रम्यं, तयोः सम्प्रेक्ष्यमाणयोः । श्रुत्वान्यजम्बूकध्वानं, जम्बूकानामिवोच्चकैः ॥४०॥
रसिकत्वान्मुखं भङ्क्त्वा, गीतं निर्गतमञ्जसा । प्रगातुं च समारब्धौ, निजवस्त्रावृताननौ ॥४१॥
कर्णामृतरसस्यन्दि, सङ्गीतं सुमनोहरम् । श्रुत्वा तौ भूरिलोकेन, परितः परिवेष्टितौ ॥४२॥
गीतेनानेन नः केन, श्रवणामृतवर्षिणा । बाढमुत्पादितं सौख्य-मित्युक्तं च जनैर्मिथः ॥४३॥
समाकृष्य ततस्तूर्ण-मुत्तरीयाणि तन्मुखम् । वीक्षितं तेन लोकेन, विज्ञातौ च तकौ ततः ॥४४॥
तावेवैतौ हि मातङ्ग-दारकौ पापकारकौ । अहो यष्टचादिभिर्बाढं, हन्यतां हन्यतामिति ॥४५॥
ततो लताचपेटाद्यै-र्हन्यमानौ पदे पदे । लोकेनाकृष्यमाणौ च, नगरीतो विनिर्गतौ ॥४६॥
प्राप्तौ च बहिरुद्याने, ततो दूनितचेतसौ । संचिन्तयितुमारब्धौ, निन्दन्तौ च निजं कुलम् ॥४७॥
अहोऽत्यर्थो गुणग्रामः, समग्रोऽपि च मामकः । रूपयौवनसौभाग्य-गीतनृत्यकलादिकः ॥४८॥
मातङ्गजातिदोषेण, येनायं दूषितोऽखिलः । तेनैव च पराभूतौ, लोकेनावां पदे पदे ॥४९॥
अनाख्यायैव बन्धूनां, वैराग्यं दधतौ महत् । दक्षिणां दिशमाश्रित्य, प्रवृत्तौ मृतिहेतवे ॥५०॥
गतौ दूरतरं देशं, दृष्टश्चैको महागिरिः । [१]आरूढावथ तौ तस्मि-न्नथैकत्र शिलातले ॥५१॥
प्रलम्बितभुजद्वन्द्वं, ध्यायन्तं ध्यानमुत्तमम् । कायोत्सर्गेण तिष्ठन्तं, मुनिमेकमपश्यताम् ॥५२॥
तं दृष्ट्वा जातहर्षौ तौ, गतौ तच्चरणान्तिकम् । सद्भक्त्या वन्दितस्ताभ्यां, साधुः साधितसत्क्रियः ॥५३॥
ध्यानं समाप्य तेनापि, धर्मलाभं प्रदाय च । पृष्टौ तौ भो युवामत्र, किमागमनकारणम् ॥५४॥
ताभ्यामपि स्ववृत्तान्त-समाकर्णनपूर्वकम् । तस्मै सुसाधवे सर्वः, स्वाभिप्रायो निवेदितः ॥५५॥
यथा साधो ! मरिष्यावः, पतित्वातो महागिरेः । श्रुत्वेदं साधुनाभाणि, संवेगरसपेशलम् ॥५६॥
यथा भो भद्रकौ ! नेदृ-ग्युक्तं कर्तुं भवादृशाम् । बाढं बन्धुरबुद्धीनां, प्राकृतजनचेष्टितम् ॥५७॥
शारीरमानसानेक-दुःखानलघनावली । सर्वज्ञभाषिता दीक्षा, भवद्भ्यां क्रियतामिति ॥५८॥
ततो बृहत्तरव्याधि-पीडितैरिव रोगिभिः । वैद्यस्येव मुनेस्तस्य, वाक्यं ताभ्यां प्रतीप्सितम् ॥५९॥
योग्याविति [च] विज्ञाय, तेनापि तौ [च] दीक्षितौ । कालक्रमेण गीतार्थौ जातौ गुरुप्रसादतः ॥६०॥
षष्ठाष्टमादिरूपेण, विकृष्टतपसौ ततः । भावयन्तौ निजात्मानं विहरन्तौ महीतले ॥६१॥

---

१ आरोहतौ च तौ- JB ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालान्तरेण सम्प्राप्तौ, पुरे गजपुराभिधे। स्थिते च बहिरुद्याने, स्थाने साधुजनोचिते ॥६२॥
अन्यदा च पुरस्यान्त-र्मासक्षपणपारणे। सम्प्रविवेश भिक्षार्थं, मुनिः सम्भूतिनामकः ॥६३॥
अथोच्चनीचगेहेषु, तं भ्राम्यन्तं पथान्तिके। स मन्त्री नमुचिर्नाम, स्वगेहस्थो व्यलोकयत् ॥६४॥
विज्ञातश्च यथा सोऽय-महो मातङ्गदारकः। कथयिष्यति मामेष, भूभुजेऽन्यजनाय च ॥६५॥
इत्याशङ्कितचित्तेन, तेन तस्य महामुनेः। पुर्या निष्काशनार्थाय, प्रेषिताः पुरुषा निजाः ॥६६॥
गत्वा तैरपि तत्राशु, यष्टिमुष्ट्यादिभिर्भृशम्। स साधुः कटुवाक्यैश्च, नानाकारं कदर्थितः ॥६७॥
ततस्तैर्हन्यमानस्य, मुनेस्तस्य निरागसः। तेषां वधाय निष्क्रान्ता, तेजोलेश्या मुखाम्बुजात् ॥६८॥
ततश्च धूममालाभिः, कृष्णाभ्रपटलैरिव। व्योमेव नगरं सर्वं, सर्वतोऽप्यन्धकारितम् ॥६९॥
अथागता जनाः पौराः, कौतुकेन भयेन च। वन्दित्वा पादयोर्लग्ना-स्तं शमयितुमुद्यताः ॥७०॥
तथा सनत्कुमारोऽपि, चक्री तत्र समागतः। तं मुनिं शमयत्युच्चै-र्यावन्नासौ प्रशाम्यति ॥७१॥
तावदाकर्ण्य लोकेभ्यो, नगरं च समन्ततः। भूरिधूमाकुलं दृष्ट्वा चित्राख्यो मुनिरागतः ॥७२॥
तं मुनिं शमयत्युच्चै-र्यावन्नासौ प्रशाम्यति ! विध्यापितः स चित्रेण, तस्य क्रोधदवानलः ॥७३॥
सम्भूतोऽपि ततो भूरि-वैराग्यातिशयं दधत्। निवर्तितस्तदुद्देशा-त्तदुद्यानं ततो गतौ ॥७४॥
चिन्तितं च मनस्याभ्या-मावां संलिखिताङ्कौ। तस्मादनशनं कर्तुं, सम्प्रति युक्तमावयोः ॥७५॥
विचिन्त्यैवं निजे चित्ते, स्थितावनशनेन तौ। ज्ञात्वा नमुचिवृत्तान्तं, सनत्कुमारचक्रिणा ॥७६॥
रुष्टेन रज्जुभिर्बद्धो, नीतोऽसौ मुनिसन्निधौ। ताभ्यामपि भयोद्भ्रान्तः, कारुण्यात्स विमोचितः ॥७७॥
गत्वा सनत्कुमारोऽपि, ववन्दे तौ महामुनी। सार्धमन्तःपुरेणैव, सानन्दो भक्तिपूर्वकम् ॥७८॥
स्त्रीरत्नस्य सुनन्दायाः, पतन्त्याः पादयोस्ततः। बभूवालकसंस्पर्शः, सम्भूतस्य पदद्वये ॥७९॥
ततश्चालकसंस्पर्श-मनुभूयातिकोमलम्। वार्यमाणोऽपि चित्रेण, मुनिः सम्भूतिनामकः ॥८०॥
यद्यस्ति तपसोऽमुष्य, फलं तेन भवान्तरे। भूयासं चक्रवर्तीति, निदानमकरोदसौ ॥८१॥
ततो मृत्वा समुत्पन्नौ, सौधर्मे द्वावपि सुरौ। तत्रानुभूय देवर्द्धिं, चित्रजीवस्ततश्च्युतः ॥८२॥
पुरे पुरिमतालाख्ये, इभ्यपुत्रतयाजनि। च्युत्वा सम्भूतिजीवोऽपि, काम्पिल्याभिधपत्तने॥
राज्ञो ब्रह्माभिधानस्य, चुलनीगर्भसम्भवः। चतुर्दशमहास्वप्न-सूचितोऽजनि दारकः ॥८४॥
विभूत्या विहितं नाम, ब्रह्मदत्त इति स्फुटम्। देहोपचयतो वृद्धिं, कलाभिश्च समं ययौ ॥८५॥
तस्य च ब्रह्मभूपस्य, बभूवुः सुवयस्यकाः। चत्वारश्चतुरालापा, विशालकुलशालिनः ॥८६॥

काशीजनपदाधीशो, भूपालः कटकाभिधः।
श्रीमत्कणेरदत्ताख्यो, राजा गजपुराधिपः ॥८७॥

कोशलाविषयाधीशो, दीर्घो नाम नरेश्वरः। आसीच्चम्पापुरीनाथः पुष्पचूलाभिधानकः।८८।
ते च परस्परं सर्वे, वियोगाऽनभिकाङ्क्षया। वर्षमेकैककं याव-द्गाढस्नेहानुरागतः ॥८९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्थुर्निजनिजे राज्ये, क्रमात् समुदिताः किल। भोगान् वरविलासांश्च, भुञ्जानाः सुमनोहरान् ॥९०॥
अन्यदा तिष्ठतां तेषां, सानन्दं ब्रह्ममन्दिरे। समुत्पन्नः शिरोरोगो, दुःसाध्यो ब्रह्मभूपतेः ॥९१॥
ततस्तेन समाकार्य, कटकादीन् वयस्यकान्। तेषामुत्सङ्गके मुक्तो, ब्रह्मदत्तो निजाङ्गजः ॥९२॥
उक्ताश्चैते यथा भो भो, युष्माभिः सर्वथाप्ययम्। कारयितव्यः प्रयत्नेन, राज्यमात्मीयपुत्रवत् ॥९३॥
एवं कृत्वा निजे राज्ये, सौस्थ्यं कालगतो नृपः। कृतं च वयस्यैस्तस्य, मृतकार्यं यथोचितम् ॥९४॥
ततः कटकादिभिः प्रोक्तं, यावदेष कुमारकः। भवेद्राज्यधुरं धर्तुं, शक्तस्तावदिदं किल ॥९५॥
राज्यं पाल्यमस्माभि-रेवमालोच्य मानसे। दीर्घं तत्र च संस्थाप्य, स्वराज्येष्वितरे गताः ॥९६॥
गतेषु तेषु दीर्घोऽपि, राज्यं पालयतेऽखिलम्। प्रपश्यत्यश्वहस्त्यादि, विशत्यन्तःपुरेऽपि सः ॥९७॥
चुलन्या च समं राज्य-कार्यं चिन्तयते मिथः। ततोऽतिदुर्निवारत्वा-दिन्द्रियाणां स्मरस्य च ॥९८॥
अपकर्ण्य च कौलीन्यं, मुक्त्वा च ब्रह्मसौहृदम्। सम्प्रलग्नश्चुलन्यैव, सार्धं कामविमोहितः ॥९९॥
एवं च वर्धमानाति-प्रेम्णोर्विषयसक्तयोः। व्रजन्ति वासरा गाढं, महामोहविमूढयोः ॥१००॥
ततो ब्रह्मनरेन्द्रस्य, धनुःसंज्ञितमन्त्रिणा। चुलनीदीर्घवृत्तान्तो, ज्ञातः सर्वः परिस्फुटम् ॥१०१॥
तेन चाचिन्ति यः पापः, करोत्यकृत्यमीदृशम्। स कथं ब्रह्मदत्तस्य, कल्याणं चिन्तयिष्यति ॥१०२॥
विचिन्त्यैवं स्वपुत्रस्य, वरधनोर्निवेदितम्। यथा पुत्र ! कुमारस्य, मातेयं दुष्टशीलका ॥१०३॥
तदस्य ज्ञापयस्वेमं, वृत्तान्तं रहसि स्फुटम्। तेनापि स च निःशेषं, कुमाराय निवेदितः ॥१०४॥
कुमारोऽप्यसहन्नेत-त्स्वमातुर्दुष्टचेष्टितम्। तस्यास्तद्ज्ञापनायैव, क्रीडया कृतवानिदम् ॥१०५॥
काककोकिलयोर्युग्मं, गृहीत्वा जननीपुरः। रटद्व्यापादयामास, दुश्चारीदं रुषा वदन् ॥१०६॥
अन्योऽपि कोऽपि यश्चैवं, मद्राज्ये प्रकरिष्यति। तस्यैवं निग्रहं घोरं, करिष्येऽहं न संशयः ॥१०७॥
अथासौ वासरेऽन्यत्र, गृहीत्वा भद्रहस्तिनीम्। सङ्कीर्णहस्तिना सार्ध-मायातो राजमन्दिरे ॥१०८॥
ततस्तं हस्तिनं रुष्टो, व्यापादयितुमुद्यतः। निवारितश्च तत्रस्थ-राजलोकैः कथञ्चन ॥१०९॥
ततो दीर्घो विदन्नेवं, बभाण चुलनीं यथा। अहं काकः कृतोऽनेन, त्वं पुनः कोकिला प्रिये ! ॥११०॥
श्रुत्वेदं चुलनी प्राह, बालकोऽयं कुमारकः। यद्वा तद्वा लपत्येवं, मान्यथा त्वं विचिन्तय ॥१११॥
दीर्घः प्रोवाच नैवेद-मन्यथा भवति प्रिये ! । व्यापाद्यतां कुमारोऽयं, रतिसौख्यविघातकृत् ॥११२॥
स्वाधीने मयि तेऽन्येऽपि, भविष्यन्ति हि पुत्रकाः। ततस्तयापि तद्वाक्यं, प्रतिपन्नं विमूढया ॥११३॥
तयोक्तं यद्ययं नाथ ! व्यापाद्यते कुमारकः। अलक्षितो जनैः सर्वैं-स्तदेदं सुन्दरं भवेत् ॥११४॥
दीर्घेणोक्तमिदं कार्यं, स्तोककं सुकरं तथा। क्रियतेऽत्र कुमारस्य, विवाहोऽतिप्रपञ्चतः ॥११५॥
तत्सामग्र्या सहानेक-स्तम्भराजिविराजितम्। महज्जतुगृहं गूढ-निर्गमादि विधाप्यताम् ॥११६॥
विवाहानन्तरं तत्र, वह्निदानप्रयोगतः। अलक्षितमिदं कार्यं, क्रियतामिति मे मतिः ॥११७॥
समालोच्यैवमेकस्य नृपस्य दुहिता वृता। प्रारब्धा च विवाहार्थं, ततः सामग्रिकाखिला ॥११८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च ब्रह्मदत्तस्य, कार्यावहितचेतसा । गत्वा दीर्घो नराधीशो, विज्ञप्तो धनुमन्त्रिणा ॥११९॥
यथैष वरधनुर्जातः, समर्थो राज्यचिन्तने । अहं तु कर्तुमिच्छामि, धर्मं सम्प्रति भूपते ! ॥१२०॥
ततोऽसौ कैतवेनैव, बभाण धनुमन्त्रिणम् । विधेहि धर्ममत्रैव, किमन्यत्र गतेन ते ? ॥१२१॥
तेनाऽपि प्रतिपद्येदं, गङ्गातीरे महाप्रपा । कारिता दीयते तत्र, दीनादिभ्योऽन्नपानकम् ॥१२२॥
ततः सद्दानसन्मान-सङ्गृहीतैः स्वपौरुषैः । सुरङ्गा खादिता भद्रा, गव्यूतद्वयगामिनी ॥१२३॥
नीत्वा जतुगृहे मुक्ता, समायाता च सा वधूः । अभूद्विवाहनेपथ्या, महर्द्ध्या पुरमाविशत् ॥१२४॥
सुमहर्द्ध्या च संवृत्तो, विवाहोऽतिमनोहरः । विसर्जितस्तदायातो, लोकः सन्मानपूर्वकम् ॥१२५॥
तदूर्ध्वं च तया सार्धं, कुमारः प्रेषितो निशि । तद्गेहे च गतः सोऽपि, विसर्जितपरिच्छदः ॥१२६॥
वधूवरधनुभ्यां च, सार्धं तत्रावतिष्ठतः । कुमारस्य गतं याव-द्यामिनीप्रहरद्वयम् ॥१२७॥
ततो दीर्घोदितैः पुम्भि-र्ज्वालितं जतुमन्दिरम् । ततः प्रोच्छलितस्तत्र, रौद्रो हाहारवो भृशम् ॥१२८॥
ततः किमु करोमीति, मूढचित्तकुमारकः । किमेतदिति भो मित्र !, वरधनुं स पृष्टवान् ॥१२९॥
अभाणि तेन भो भद्र !, नेयं सा राजपुत्रिका । अन्या काचिदियं तस्मा-न्मा कृथाः सङ्गमत्र भोः ! ॥१३०॥
पार्ष्णिदृढप्रहारेण, स्थानमेतद्धि हन्यताम् । निर्गच्छाव इतो येन, तेनापि च तथा कृतम् ॥१३१॥
ततो भित्त्वान्तरस्थानं, विनिर्गत्य सुरङ्गया । वरधनुः कुमारश्च, सुरङ्गाद्वारमागतौ ॥१३२॥
इतश्च धनुना तत्र, पूर्वमेव नियोजितौ । सुजात्यतुरगारूढौ, प्रच्छन्नौ पुरुषौ निजौ ॥१३३॥
अथ सङ्केतकस्ताभ्यां, वरधनोः प्रमेलितः । तत आरुह्य तावश्वौ, प्रवृत्तौ गन्तुमुच्चकैः ॥१३४॥
गतौ वेगविमुक्ताश्वौ, पञ्चाशद्योजनानि तौ । अथ दीर्घाध्वखेदेन, मह्यामश्वौ निपेततुः ॥१३५॥
सम्प्रवृत्तौ ततो गन्तुं, पादाभ्यामेव सत्वरम् । प्राप्तौ **कोटचभिधानं** च, ग्राममेकं क्रमादमू ॥१३६॥
अथाभाणि कुमारेण, भो भो वरधनोऽधुना । तृषा मां बाधते बाढं, परिश्रान्तोऽस्मि सर्वथा ॥१३७॥
ततो वरधनुर्गत्वा, ग्राममादाय गण्डकम् । समायातः कुमारस्य, ततो मुण्डापितं शिरः ॥१३८॥
कषायरक्तवस्त्राणि, कुमारः परिधापितः । श्रीवत्सालङ्कृतं वक्षः, पट्टेनाच्छादितं तथा ॥१३९॥
चक्रे वेषपरावर्तं, वरधनुरपि स्वयम् । ग्रामस्यान्तः प्रविष्टौ तौ, यावत्तावद् द्विजालयात् ॥१४०॥
निर्गत्यैकेन दासेन, सादरं तौ प्रभाषितौ । यथेहागत्य भो विप्रौ, भुज्यतां तातमन्दिरे ॥१४१॥
ततो गतौ तकौ तत्र, भुक्तौ च प्रतिपत्तितः । तदन्ते च वरैका स्त्री, ब्रह्मदत्तस्य मूर्धनि ॥१४२॥
बन्धुमतीं समुद्दिश्य, प्रक्षिपत्यक्षतान् वरान् । ब्रवीति चैष भर्तास्याः, कन्यकाया भवत्विति ॥
एतदाकर्ण्य साकूतं, ब्रूते वरधनुस्ततः । किमेतस्य कृते मूर्ख-बटोरेवं प्रखिद्यसे? ॥१४४॥
ततः प्राह गृहस्वामी, श्रूयतां कथ्यते तव । नैमित्तिकेन मे येन, समादिष्टं यथा किल ॥१४५॥
यः पटाच्छादितोरस्कः, समित्रस्तव मन्दिरे । भोक्ष्यते च स एवैनां, कन्यकां परिणेष्यति ॥१४६॥
इत्यादि सर्वमावेद्य, तस्मिन्नेव हि वासरे । कुमारः कारितस्तेन, पाणिग्रहणमुच्चकैः ॥१४७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो वरधनुर्ब्रूते, द्वितीये वासरे यथा। गन्तव्यं दूरमावाभ्यां, किं कुमार! विलम्ब्यते ? ॥१४८॥
बन्धुमत्या निजं सर्व-मभिप्रायं निवेद्य च। निर्गच्छावो यथाशक्त्या, स्वाभिप्रेतं दिगन्तरम् ॥१४९॥
तथा कृत्वा गतौ तस्मा-त्स्थानाच्च ग्राममेककम्। प्रविष्टस्तत्र नीरार्थं, वरधनुस्ततः क्षणात् ॥१५०॥
आगत्य प्रवदत्येवं, ग्राममध्ये श्रुतं मया। सुरङ्गया प्रयातस्य, ब्रह्मदत्तस्य सर्वतः ॥१५१॥
दीर्घेण निजकैः पुम्भि-र्मार्गा बन्धापिताः किल। तत्कुमारोत्पथेनावां, प्रगच्छावस्तथा कृतम् ॥१५२॥
उन्मार्गेणाथ गच्छन्तौ, प्रविष्टौ तौ महाटवीम्। ततो न्यग्रोधवृक्षाधो, मुक्त्वातीव तृडर्दितम् ॥१५३॥
कुमारमगमन्नीर-हेतोर्वरधनुः स्वयम्। भ्राम्यंस्तत्र दिनस्यान्ते, दीर्घनिर्युक्तकैर्नरैः ॥१५४॥
यमदूतैरिवालोकि, वरधनुस्ततस्तकैः। हन्यमानश्च दूरस्थैः, सङ्केतं कृतवानसौ ॥१५५॥
ब्रह्मदत्तस्ततस्तूर्णं, नष्टवांस्तत्प्रदेशतः। पतितश्च महाभीम-मरण्यमतिदुर्गमम् ॥१५६॥
ततस्तृषाक्षुधाक्रान्तो, व्यतिक्रम्य महाटवीम्। तृतीये दिवसेऽपश्य-त्तत्रैकं किल तापसम् ॥१५७॥
तद्दर्शनेन सञ्जाता, जीविताशा ततस्तकम्। पप्रच्छ च यथा कुत्र, भगवन्नाश्रमस्तव ॥१५८॥
तेनाप्यावेद्य नीतश्च, पार्श्वे कुलपतेरसौ। नतः कुलपतेः पाद-पद्मयुग्मं नताङ्गकः ॥१५९॥
पृष्टस्तेन यथा वत्स !, कथमत्रागमस्तव। तेनापि मूलतः सर्वो, वृत्तान्तः कथितो निजः ॥१६०॥
ततः कुलपतिः प्राह, भो! वत्सक!, पितुस्तव। भवामि ब्रह्मभूपस्य, पितृव्योऽहं कनिष्ठकः ॥१६१॥
अतस्तदीय एवाय-माश्रमो वत्स! सर्वथा। तस्मात्तिष्ठ त्वमत्रैव, सोऽपि तस्थौ तथैव च ॥१६२॥
तिष्ठंस्तत्र सुखेनासौ, धनुर्वेदादिका किल। तापसस्वामिना तेन, ग्राहितः सकलाः कलाः ॥१६३॥
तावच्च वृषभाह्वादी, शरत्कालः समाययौ। निष्पन्नशस्यसम्पद्भि-स्तोषिताशेषपामरः ॥१६४॥
अन्यदा च समाचेलु-स्ते तापसकुमारकाः। कन्दमूलफलाद्यर्थं, विकटामटवीमभि ॥१६५॥
तैश्च सार्धं कुमारोऽपि, वार्यमाणोऽपि तापसैः। गतस्तत्र महारण्ये, कौतुकाक्षिप्तमानसः ॥१६६॥
पुष्पफलसमृद्धानि, वीक्षमाणो वनानि सः। तत्र हस्तिनमद्राक्षी-न्मत्तं वनप्रचारिणम् ॥१६७॥
तं दृष्ट्वा दूरविस्तारि, चकार गलगर्जितम्। तत्समाकर्ण्य वेगेन, चलितस्तन्मुखं गजः ॥१६८॥
कुमारोऽपि ततस्तस्य, गजस्याभिमुखं जवात्। कृत्वा विण्टलिकां स्वीय-मुत्तरीयकमक्षिपत् ॥१६९॥
करिणापि कराग्रेण, तत्समादाय सत्वरम्। व्योमनि क्षिप्तमत्यर्थ-मित्येवं स पुनः पुनः ॥१७०॥
नीतः खेदं कुमारेण, यावत्कोपवशं गतः। तावदुत्पत्य तत्स्कन्ध-मारूढः प्रौढविक्रमः ॥१७१॥
ततो नानाप्रकाराभिः, क्रीडाभिः कुमरश्चिरम्। तं गजं श्रममानीय, मुमोच गतकौतुकः ॥१७२॥
ततः प्रतिपथेनैव, प्रविष्टो गन्तुमुच्चकैः। मूढपूर्वादिदिग्भाव, इतश्चेतश्च पर्यटन् ॥१७३॥
प्रेक्षते स्म नदीतीरे, पुरमेकं पुरातनम्। पतितानेकगेहौघ-भित्तिमात्रोपलक्षितम् ॥१७४॥
यावत्तद्दर्शनोद्भूत-कौतुकः प्रविलोकयन्। सर्वतो याति वेगेन, कुमारस्तावदीक्षते ॥१७५॥
पार्श्वमुक्तासिमुद्दाम-विस्फुर्जच्चन्द्रखेटकम्। नीलाभं सुन्दराकार-मेकं वंशकुडङ्गकम् ॥१७६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तेन तदादाय, खड्गरत्नं कुतूहलात् । तत्रैव वाहितं वंश-कुडङ्गे लीलया किल ॥१७७॥
एकेनैव प्रहारेण, छिन्ना सा वंशजालिका । ततो वंशान्तरस्थायि-वेपमानोष्ठसम्पुटम् ॥१७८॥
पपातैकं मनोहारि, शिरःकमलमुद्भटम् । दृष्ट्वा च तत्ततो हा! हा!, दुष्ठु दुष्ठु मया कृतम् ॥१७९॥
धिग्मे व्यवसितेनेति, निन्दितमात्मपौरुषम् । सखेदो दृष्टवांस्तत्र, वीक्षमाणः कबन्धकम् ॥१८०॥
ऊर्ध्वबद्धपदद्वन्द्वं, धूमपानातिलालसम् । तदालोक्य च सञ्जाता, तस्याधृतिर्विशेषतः ॥१८१॥
पुनश्च भ्रमता तत्र, दृष्टमुद्यानमेककम् । तत्र प्रविशता तेना-ऽशोकपादपवेष्टितम् ॥१८२॥
सप्तभूमिकमालोकि, प्रासादं च मनोरमम् । ततश्च तं समारूढो, यावत्सप्तमभूमिकम् ॥१८३॥
दृष्टवांश्च मनोहारि-रूपां तत्र वरस्त्रियम् । पृष्टा च सा यथा भद्रे ! का त्वं किं चात्र तिष्ठसि ॥१८४॥
ततः ससाध्वसा सापि, वक्तुमेवं प्रचक्रमे । यथा भो भो महाभाग ! मामकी महती कथा ॥१८५॥
त्वमेव तावदाचक्ष्व, कुतो वा यासि कुत्र वा ? । सुतारमधुरोदार-तद्वाक्याक्षिप्तचेतसा ॥१८६॥
सर्वोऽपि निजवृत्तान्तः, कथितस्तेन तदग्रतः । सुन्दरि ! ब्रह्मभूपस्य, पञ्चालाधिपतेरहम् ॥१८७॥
पुत्रोऽस्मि ब्रह्मदत्ताख्य, एवं यावदिहागतः । ततो हर्षाश्रुपूर्णाक्षा, तदुक्तवागनन्तरम् ॥१८८॥
शीघ्रं साभ्युत्थिता बाला, पतिता तस्य पादयोः । रोदितुं च प्रवृत्ता सा, बृहच्छब्देन तत्पुरः ॥१८९॥
तेनापि मुखमुन्नाम्य, मा रोदीरिति जल्पता । संस्थापिता कृपातः सा, वचोभिरतिकोमलैः ॥१९०॥
पृष्टा च का त्वमत्रेति, ततश्चेत्थं तयोदितम् । कुमार! पुष्पचूलस्य, मातुलस्य तवैव हि ॥१९१॥
दुहिताहं प्रदत्ता च, तुभ्यमेव गुणाकर! । गृहे प्रतीक्षमाणाह-मासं विवाहवासरम् ॥१९२॥
गृहोद्याननदीरम्य-पुलिने क्रीडती सती । दुष्टविद्याधरेणात्र, समानीता दुरात्मना ॥१९३॥
स्वबन्धुविरहेणाहं, यावत्तिष्ठामि दुःखिता । तावदचिन्त्यसौवर्ण-वृष्टितुल्यः समागतः ॥१९४॥
जाता च जीविताशा मे, यत्त्वं दृष्टोऽसि सुन्दर! । ततोऽवाचि कुमारेण, कुत्रासौ मम वैरिकः ॥१९५॥
येनाहं तस्य पापस्य, परीक्षे भुजयोर्बलम् । तयोदितं गतो विद्या-साधनाय स ते रिपुः ॥१९६॥
वंशकुडङ्गकेऽस्यैव, प्रासादस्य समीपके । विद्यां प्रसाध्य मामेष, कुमारः परिणेष्यति ॥१९७॥
विद्या च किल तस्याद्य, सेत्स्यतीति सुनिश्चितम् । श्रुत्वेदं ब्रह्मदत्तेन, पुष्पवत्यास्ततोऽखिलः ॥१९८॥
तद्वधापादनवृत्तान्तः, कथितो हृष्टचेतसा । तयाभाणि कृतं सुष्ठु, त्वयेति यदसौ हतः ॥१९९॥
गन्धर्वकविवाहेन, ततस्तां परिणीतवान् । स्थितवांश्च तया सार्धं, कञ्चित्कालं प्रमोदतः ॥२००॥
अन्यदा च श्रुतस्तेन, संलापो वरयोषिताम् । पृष्टा सानेन कस्यायं, शब्दः कर्णामृतोपमः ॥२०१॥
तयोक्तमार्यपुत्रैते, तस्य तावकवैरिणः । खण्डविशाखनाम्न्यौ च, स्वंसारौ हि कुमारिके ॥२०२॥
समादाय विवाहार्थ-मुपस्कारमिहागते । अतो यूयमतः स्थाना-दपक्रामत सत्वरम् ॥२०३॥
भावोपक्रमणं याव-देतयोः प्रकरोम्यहम् । यदि प्रेमानयोः प्रौढं, युष्मानभि भविष्यति ॥२०४॥
ततोऽहमार्यपुत्रस्य, प्रासादस्य शिरः स्थिता । चालयिष्यामि रक्ताभां, पताकामन्यथेतराम् ॥२०५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुत्वा चेदमुपक्रान्तः, कुमारः कियतीं भुवम्। त अप्यागच्छतां तत्र, विद्याधरकुमारिके ॥२०६॥
लक्षितश्च तयोर्भावः, पुष्पवत्या ततो द्रुतम्। हर्षातिरेकतो भ्रान्त्या, चेले शुक्लपताकिका ॥२०७॥
तामालोक्य कुमारोऽपिं, त्वरितं तत्प्रदेशतः। अपसृत्य गतो दूरे, गम्भीरे गिरिगह्वरे ॥२०८॥
गच्छता च ततो दृष्टं, रम्यमेकं सरोवरम्। प्रविष्टस्तत्र सानन्दं, मज्जितश्च यथाविधि ॥२०९॥
पश्चिमेन च तीरेण, समुत्तीर्णो गतश्रमः। दृष्टा च तेन तत्रैका, सुरूपा वरकन्यका ॥२१०॥
चिन्तितं च मनस्येव-महो मे पुण्यमालिका। येनेयं बालिका दृष्टा, लोचनोत्सवदायिनी ॥२११॥
प्रलोकितश्च सानन्दं, तयापि कुमरश्चिरम्। पश्यन्ती तं ततः स्थाना-न्मन्दं मन्दं चचाल सा ॥२१२॥
क्षणान्तरात्समायाता, तया प्रेषितचेटिका। ताम्बूलवरपुष्पादि-वरवस्त्रयुगान्विता ॥२१३॥
अर्पयित्वा तकत्तस्मै, कुमारो भणितस्तया। भो भो भद्र ! त्वया दृष्टा, कन्यका या सरस्तटे ॥२१४॥
तयेदं प्रेषितं तुभ्यं, पुष्पाद्युक्तवती च माम्। हले वनलते ! भद्रे, त्वं तस्याद्य महात्मनः ॥२१५॥
शयनादिस्थितिं सर्वां, कारयाऽमात्यमन्दिरे। तदेहि गम्यतां तत्र, क्रियतां भोजनादिकम् ॥२१६॥

जगामासौ ततः प्रोक्त-स्तया मन्त्री यया ह्ययम्।
प्रेषितो भूपतेः पुत्र्या, श्रीकान्तया त्वदालये ॥२१७॥

द्रष्टव्यः सादरं चैष, मन्त्रिणापि तथा कृतम्। द्वितीये च दिने नीतः, कुमारो नृपसन्निधौ ॥२१८॥
राज्ञाप्यभ्युत्थितः सम्य-ग्दापितं चासनं धुरि। पृष्टश्च सर्ववृत्तान्तो, भोजितश्च सगौरवम् ॥२१९॥
भुक्त्वा तेनोदितं राज्ञा, कुमार! तव मादृशैः। नान्यत्किञ्चित्तथारूपं, विधातुं शक्यतेऽधुना ॥२२०॥
इत्यावेद्य प्रदत्ता सा, श्रीकान्ता निजपुत्रिका। प्रशस्तेऽहनि वृत्तश्च, विवाहो वरमङ्गलैः ॥२२१॥
अन्यदा च कुमारेण, प्रश्निता सा यथा प्रिये!। किमर्थं त्वं प्रदत्तेह, मह्यमेकाकिनेऽपि हि ॥२२२॥
तयोक्तमार्यपुत्रायं, तातो मे निजगोत्रिकैः। बलिष्ठैः प्रेर्यमाणोऽस्यां, पल्ल्यां विषममाश्रितः ॥२२३॥
अयं च नगरग्रामान्, हत्वा श्रयति दुर्गकम्। श्रीमत्याख्या च तातस्य, प्रेयसी प्रेममन्दिरम् ॥२२४॥
पुत्रचतुष्टयस्योर्ध्व-महं जातैकपुत्रिका। वल्लभा बन्धुवर्गस्य, तातस्य तु विशेषतः ॥२२५॥
यौवनस्था च तातेन, प्रोक्ता वत्से ! नृपा मम। सर्वे विरुद्धका येन, तिष्ठन्त्यास्तदिहैव हि ॥२२६॥
वरो मनोरमो यस्ते, स आवेद्यो मम त्वया। ततः पल्ल्या विनिर्गत्य, गत्वा चैतन्महासरः ॥२२७॥
पश्यामि पुरुषान्नित्यं, यावत्त्वं पुण्ययोगतः। दृष्टोऽत्र कामरूपश्री-स्तातो मां तेन ते ददौ ॥२२८॥
ततः संसारसौख्यानि, भुञ्जानस्य तया सह। सुरलोके सुरस्येव, व्यतिक्रामन्ति वासराः ॥२२९॥
अन्यदा पल्लीनाथोऽसौ, भूरिभटान्वितो गतः। हन्तुं ग्रामं कुमारोऽपि, तेनैव च समं गतः ॥२३०॥
तावद्वरधनुस्तेन, दृष्टो ग्रामस्य बाह्यतः। रम्ये पद्मसरस्तीरे, प्रत्यभिज्ञातवान् क्षणात् ॥२३१॥
सोऽपि तं प्रत्यभिज्ञाय, प्रवृत्तो रोदितुं ततः। निवारितः कुमारेण, समीपे चोपवेशितः ॥२३२॥
ततो वरधनुः प्राह, भो कुमार ! किमु त्वया। मद्वियोगे समासादि, समावेदय मेऽधुना ॥२३३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रोक्तस्तेन स्ववृत्तान्तः, पृष्टो वरधनुस्ततः । मत्परोक्षेऽनुभूतं किं, सुखदुःखं त्वयापि हि ॥२३४॥
ततोऽसौ वक्तुमारब्धः, शृणु भो ब्रह्मनन्दन! । त्वां न्यग्रोधतले मुक्त्वा, गतोऽहं जलहेतवे ॥२३५॥
दृष्टं चाटाट्यमानेन, मया रम्यं महासरः । ततोम्भःपुटकैः कृत्वा, यावदेमि तवान्तिकम् ॥२३६॥
तावच्च सहसा दृष्टो, भटैराबद्धकङ्कटैः । रुष्टैर्निर्भर्त्सनापूर्वं, ताडितश्च मुहुर्मुहुः ॥२३७॥
रे रे वरधनो ! क्वास्ते, ब्रह्मदत्तः प्रकथ्यताम् । एवं विवदमानेषु, न वेद्मीति मयोदितम् ॥२३८॥
ततस्तैस्ताड्यमानेन, भूयोभूयस्तरं मया । उक्तं भो भक्षितो दुष्ट-व्याघ्रकेण कुमारकः ॥२३९॥
यद्येवं तर्हि तद्देशं, दर्शयस्व ततो मया । शाठ्येनेतस्ततो भ्रान्त्वा, समेत्य च त्वदन्तिकम् ॥२४०॥
नश्यतामिति सञ्ज्ञायां, कृतायां त्वं प्रणष्टवान् । मयापि गुटिका क्षिप्ता, परिव्राजार्पिता मुखे ॥१४१॥
जातश्च तत्प्रभावेण, काष्ठवद्गतचेतनः । मृतोऽयमिति विज्ञाय, गतास्तेऽपि भटास्ततः ॥२४२॥
मयापि सा समाकृष्टा, गुटिका मुखरन्ध्रतः । अन्विष्टस्त्वं मया भ्रान्त्वा, न च क्वापि विलोकितः ॥२४३॥
ततो मया महीपीठे, भ्राम्यता च विलोकितः । परिव्राट् सुन्दराकारो, गतश्चाहं तदन्तिके ॥२४४॥
उक्तं च तेन भो वत्स!, वयस्योऽहं पितुस्तव । वसुभागाभिधस्तस्मा-दागच्छात्रोपविश्यताम् ॥
तथा न ज्ञायते वत्स !, नष्टः क्वापि पिता तव । म्रियता च तव दीर्घेण, क्षिप्ता मातङ्गपाटके ॥२४६॥
श्रुत्वेदं महता दुःख-प्राग्भारेण गृहीतवान् । ततः काम्पिल्यमागत्य, कृत्वा कापालिकाकृतिम् ॥२४७॥
वञ्चयित्वा च मातङ्गान्, संहृत्य जननीं ततः । मुक्त्वैकत्र वरे ग्रामे, तातमित्रस्य मन्दिरे ॥२४८॥
देवशर्माभिधानस्य, ब्राह्मणस्य यथाविधि । मातुः सौस्थ्यं विधायैवं, तदन्वेषणतत्परः ॥२४९॥
महीपीठे भ्रमन्नद्य, कुमारेह समागतः । इत्थं च सुखदुःखादि, तत्र चिन्तयतोस्तयोः ॥२५०॥
समायातः पुमानेक-स्तेन चेदमुदीरितम् । भो भो कुमारकावत्र, ग्रामे दीर्घमहीपतेः ॥२५१॥
आगता भटसन्दोहा, युष्मदन्वेषणाकृते । अतोऽत्रैव युवाभ्यां तु, स्थातव्यं सुष्ठु गुप्तकम् ॥२५२॥
श्रुत्वेदं तौ ततः स्थाना-द्विनिष्क्रान्तौ शनैः शनैः ! भ्राम्यन्तौ च महीपीठं, कौशाम्बीपुरमागतौ ॥
कियन्त्यहानि तत्रापि, तिष्ठद्भ्यां च श्रुतं यथा । अहो कुमारमन्वेष्टुं, दीर्घयोधा इहागताः ॥२५४॥
ततश्चैतत्समाकर्ण्य, कौशाम्ब्या अपि निर्गतौ । भ्रमन्तौ च क्रमात्प्राप्तौ, पुरे राजगृहाभिधे ॥२५५॥
तद्बाह्यभूमिभागस्थे, एकस्मिन् सन्निवेशके । दृष्टं स्तम्भशताकीर्ण-मेकं वेश्मसुधासितम् ॥२५६॥
प्रविष्टौ च तकौ तत्र, दृष्टे च द्वे वरस्त्रियौ । प्रौढं यौवनमारूढे, रूपश्रीकुलमन्दिरे ॥२५७॥
ताभ्यामपि समालोकि, सानन्दं ब्रह्मनन्दनः । वक्तुं च ते समारब्धे, स्वोपालम्भकया गिरा ॥२५८॥
युक्तं किं नु महापुंसां भ्रान्तुमेवं भवादृशाम् । सन्त्यज्य मादृशं लोकं, पत्यनुरक्तचेतसम् ॥२५९॥
अथोक्तं ब्रह्मदत्तेन, जनकोऽयमहो मया । त्यक्तोऽनुरक्तकोऽप्युच्चै-र्भ्राम्यता मेदिनीतले ॥२६०॥
ताभ्यामुक्तं महाभाग !, कुर्वावयोरनुग्रहम् । आसनग्रहणात्ताव-त्तेनापि हि तथा कृतम् ॥२६१॥
ततः कृत्वास्य सन्मानं. स्नानभोजनगोचरम् । उक्तं ततः स्ववृत्तान्तं, कथयावोऽवधार्यताम् ॥२६२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्त्यत्र भारते क्षेत्रे, गिरिर्वैताढ्यनामकः। तस्य च दक्षिणश्रेण्यां, नगरं शिवमन्दिरम्।२६३।
तत्र वह्निशिखो राजा, देवी विद्युच्छिखाभिधा।
तस्या द्वे पुत्रिके आवां, बन्धुलोकस्य वल्लभे ॥२६४॥
ज्येष्ठश्च ह्यावयोर्भ्राता, नाटचोन्मत्ताभिधानकः। अन्यदा मत्पिता याव-त्सार्धं मित्रेण तिष्ठति॥
गोष्ठ्या चाग्निशिखाख्येन तावद्व्योमनि वीक्षते। अमरासुरसन्दोह-मष्टापदाद्रिसन्मुखम्॥
वन्दनार्थं जिनेन्द्राणां, प्रगच्छन्तमथ द्रुतम्। तं दृष्ट्वा सममावाभ्यां, तातोऽपि मित्रसंयुतः ॥२६७॥
चलितः क्रमतः श्रीमान्, सम्प्राप्तोऽष्टापदाचलम्। कर्पूरागुरुसत्पुष्प-सद्गन्धधूपनादिभिः ॥२६८॥
सम्पूज्य जिनबिम्बानि, वन्दितानि विधानतः। त्रिश्च प्रदक्षिणीकृत्य दृष्टं निर्गच्छता ततः ॥२६९॥
एकमशोकवृक्षाध-श्चारणप्रतियुग्मकम्। तत्सम्प्रणम्य सद्भक्त्या, सन्निषण्णस्तदन्तिके ॥२७०॥
साधुभ्यां च ततो धर्म-लाभेनानन्द्य पर्षदम्। संवेगजननीप्राज्या, प्रारब्धा धर्मदेशना ॥२७१॥
यथा भो भो जना ! एष, भीमः संसारसागरः। जन्ममृत्युजरारोग-जलकल्लोलसङ्कुलः ॥२७२॥
नानाप्रकारदुःखौघ-नक्रचक्रभयानकः। दूरपारो दुरुत्तारो, दुःखदायी निराश्रयः ॥२७३॥
तथेह देहिनामायु-र्वायुवेगातिचञ्चलम्। जरारोगाद्यपायौघैः समाघ्रातं च यौवनम् ॥२७४॥
कायोऽपि निकटापाय-प्रतिध्वंसनकर्मठः। किम्पाकफलसङ्काशाः, कामभोगाश्च दारुणाः ॥२७५॥
शक्रचापानुकारीदं, सौख्यं च विषयोद्भवम्। अस्थिरो बन्धुसम्बन्धः, सम्पदो विपदां पदम् ॥२७६॥
दुर्लभः सौख्यसंसर्गः सुप्राप्तो दुःखसङ्गमः। तदहो क्रियतां नित्यं, जैनधर्मे समुद्यमः ॥२७७॥
एवमाकर्ण्य संलब्ध-सत्सम्यक्त्वादिसद्गुणाः। सर्वे निजनिजे स्थाने, गतवन्तः सुरादयः ॥२७८॥
ततः प्रस्तावमासाद्य, तातमित्रेण जल्पितम्। अग्निशिखाभिधानेन, संयोज्य करपल्लवम्॥२७९॥
भगवन् ! कः पुमान्नेते, परिणेष्यति बालिके। साधुः प्राहैतयोर्भ्रातृ-घातं यः प्रकरिष्यति ॥२८०॥
तत एवं समाकर्ण्य, तातः श्याममुखोऽभवत्। अत्रान्तरे सखेदाभ्या-मावाभ्यामपि जल्पितम्॥२८१॥
तातधुनैव साधुभ्यां, प्रोक्तं संसारचेष्टितम्। तदलं कामसौख्येन, दुरन्तेनेदृशाऽऽवयोः ॥२८२॥
कस्याप्यावां न दातव्ये, त्वयका तात ! सर्वथा। शुश्रूषां प्रकरिष्यावो, भ्रातुः स्वगृह एव हि ॥२८३॥
तातेनाप्यावयोर्वाक्यं, प्रतिपन्नमिदं मुदा। ततश्चावां निजभ्रातृ-स्नेहतन्तुनियन्त्रिते ॥२८४॥
तस्यैव प्रत्यहं स्नान-भोजनादितनुस्थितिम्। विदधत्यौ च तिष्ठावो, यावदन्यत्र वासरे॥२८५॥
अस्मद्भ्रात्रा महीपीठे, भ्राम्यता प्रविलोकिता। कन्यका पुष्पवत्याख्या, तव मातुलपुत्रिका॥२८६॥
तद्रूपादिगुणाक्षिप्त-स्तां हृत्वा द्रागिहागतः। असहिष्णुश्च तद्दृष्टिं, विद्यां साधयितुं गतः ॥२८७॥
अत ऊर्ध्वं प्रविज्ञात-वृत्तान्ता यूयमेव हि। तथा भो भो महाभाग ! तस्मिन् काले त्वदन्तिके॥
पुष्पवत्या समागत्य, सामपूर्वकमावयोः। कथितो भ्रातृवृत्तान्त-स्तं श्रुत्वा शोकनिर्भरे ॥२८९॥
प्रवृत्ते रोदितुं प्रोच्चै, रोदयन्त्यौ रिपूनपि। संस्थापिते च सद्वाक्यैः, पुष्पवत्या सुकोमलैः ॥२९०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथान्यच्च तया प्रोचे, धर्मोपदेशपूर्वकम् । यथा संस्मर्यतां सख्यौ, सन्मुनेस्तस्य तद्वचः ॥२९१॥
मन्यतां भर्तृभावेन, ब्रह्मदत्तोऽधुना ध्रुवम् । ततो जातानुरागाभ्या-मावाभ्यां तत्प्रतिश्रुतम् ॥२९२॥
पुष्पवत्या ततो गत्वा, शीघ्रं हर्षातिरेकतः । पताकायां सिताभायां, चालितायां मतिभ्रमात् ॥२९३॥
प्रस्थितेषु ततः स्थाना-द्युष्मास्वन्यत्र कुत्रचित् । नानाविधपुरग्राम-सरिच्छैलादिसङ्कुले ॥२९४॥
चिरं महीतले भ्रान्त्वा, युष्मदन्वेषणाकृते । यदनालोकिता यूयं, ताक्दुद्विग्नमानसे ॥२९५॥
अत्रायाते महाभाग !, त्वद्विरहाग्नितापिते । अत्र चातर्कितप्रेङ्ख-दृत्तदृष्टिसमप्रभम् ॥२९६॥
पूरिताशं जनस्यास्य, सञ्जातं तव दर्शनम् । [आनन्ददायकं चात्र, बहुकालविलोकितम्] ॥२९७॥
तदहो यत्तदा काले, पुष्पवत्या प्रजल्पितम् । स्मर्यतां तन्महाभाग !, पूर्यतां नौ मनोरथाः ॥२९८॥
एवमाकर्ण्य सानन्द-स्तदमंस्त कुमारकः । परिणिन्ये च गन्धर्ब-विवाहेन च ते द्रुतम् ॥२९९॥
स्थितो रात्रौ समं ताभ्यां, परमानन्दनिर्भरः । प्रभाते च बभाणैवं, कुमारस्ते वराङ्गने ॥३००॥
भद्रे ! पुष्पवतीपार्श्वे, इतः सम्प्रति गम्यताम् । स्थेयं तावच्च मे याव-द्राज्यलाभः प्रजायते ॥३०१॥
एवं नाथ ! करिष्याव, इत्युक्त्वा त अगच्छताम् । कुमारं प्रेरयन्नेवं, ब्रूते वरधनुस्ततः ॥३०२॥
यथा भो भो महासत्त्व!, शौर्यरत्नमहोदधे ! । कियन्तं कालमेवेत्थं, स्थातव्यं मुक्तविक्रमैः ॥३०३॥
तयोश्चिन्तयतोरेवं, परस्परमनेकधा । गन्तुमुत्सुकयोश्चैवं, मधुमासः समागतः ॥३०४॥
ततो महाप्रबन्धेन, प्रवृत्ते मदनोत्सवे । गते च नगरीलोके, रम्यारामवनादिषु ॥३०५॥
ततस्तावपि सानन्दं, गतौ तत्र कुतूहलात् । अथ क्रीडारसोत्कर्षे, प्रवृत्ते सुष्ठु निर्भरे ॥३०६॥
क्रीडत्यनेकधा लोके, नानाक्रीडाभिरुच्चकैः । अत्रान्तरे मदोद्रेका-द्राजहस्ती विलोठितः ॥३०७॥
आलानस्तम्भमाभज्य, पातयित्वा च मेण्ठकम् । उर्ध्वीकृतकरो हट्ट-गेहादीनि प्रभञ्जयन् ॥३०८॥
उन्मूलयंश्च वृक्षादी-नुच्छृङ्खलो निरङ्कुशः । इतश्चेतश्च वेगेन, भ्राम्यंस्तत्र समागतः ॥३०९॥

जाते कोलाहले रौद्रे, नष्टो लोको दिशो दिशि ।
इत्थं च सम्भ्रमे जाते, लोकानां हलबोलके तथा ॥३१०॥

तत्रैका कन्यका रूप-लसल्लावण्यशालिनी । भीतभीता प्रपश्यन्ती, चलत्तरलतारकम्[1] ॥३११॥
त्राणं विमार्गयन्ती च, वेपमानाङ्गयष्टिका । गता तस्य यमस्येव, हस्तिनो दृष्टिगोचरे ॥३१२॥
ततो हाहारवो लोकैः, कृतस्तद्देशवर्तिभिः । पूत्कृतं च बृहच्छब्दै-स्तल्लोकेन ससाध्वसम् ॥३१३॥
अत्रान्तरे मनाक् तस्यां, गृहीतायां स वारणः । तर्जितः पुरतः स्थित्वा, कुमारेण सुनिष्ठुरम् ॥३१४॥
विमोचिता च सा कन्या, ततो दुष्टमहागजात् । वलितश्च कुमारस्या-भिमुखं मत्सरी करी ॥३१५॥
ततः सपदि सम्पिण्डच्य, कुमारेणोत्तरीयकम् । क्षिप्तं सोऽपि तदादायो-त्क्षिप्तवान् गगनाङ्गणे ॥३१६॥
क्षणान्निष्पतितं भूमौ, तस्मिन् परिणते गजे । कुमारोऽप्यतिदक्षत्वा-दारूढस्तस्य कन्धरम् ॥३१७॥

---

१ BPJC । °रका-मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बद्धासनेन साक्रोशं, कुम्भदेशे स ताडितः । ततश्च मधुरैर्वाक्यै-र्मत्सरं च विमोचितः ॥३१८॥
साधुकारं ततः प्राप, उद्घुष्टं बन्दिभिस्तथा । निःशेषजनमध्येऽत्र, कुमारो जयवानिति ॥३१९॥
आलानस्तम्भमानीतो, हस्ती मोचितमत्सरः । आयातश्च नृपस्तत्र, विस्मयाबद्धमानसः ॥३२०॥
अनन्यरूपलावण्य-मनन्यवरविक्रमम् । राजा कुमारमालोक्य, जगादेदं सुविस्मितः ॥३२१॥
भो भो कोऽयं महासत्त्वो, महाभागो महायशाः । गाम्भीर्यधैर्यशौर्यादि-गुणरत्नमहोदधिः ॥३२२॥
ततः कुमारवृत्तान्त-मर्मविज्ञेन मन्त्रिणा । तदीयो नरनाथाय, प्रोक्तो व्यतिकरोऽखिलः ॥३२३॥
ततो राज्ञा सुतुष्टेन, स नीतो निजमन्दिरे । सगौरवं वरस्नान-भोजनादि च कारितः ॥३२४॥
भुक्त्यन्ते च कुमाराय, राज्ञा दुहितरो निजाः । दत्ता वृत्तो विवाहश्च, महद्धर्द्धा शोभनेऽहनि ॥३२५॥
इत्थं सन्तिष्ठते याव-त्स वरधनुकः किल । दिनानि कतिचित्तत्र, ब्रह्मदत्तो यथासुखम् ॥३२६॥
तावदेका समागत्य, प्रौढा नारीदमब्रवीत् । यथा भो भो कुमारास्ति, किञ्चिद्वक्तुं त्वया सह ॥३२७॥
कुमारेणोदितं ब्रूहि, ततः सापि प्रगल्भवाक् । वक्तुमेवमुपक्रान्ता, सुष्ठुपेशलया गिरा ॥३२८॥
अस्त्यत्रैव पुरे सार्थ–वाहो वैश्रमणाभिधः । तत्सुता श्रीमतिर्नाम, सर्वावयवसुन्दरा ॥३२९॥
आबालकालतः सा च, मयैव प्रतिपालिता । कुमार ! या त्वया हस्ति-सम्भ्रमात्परिरक्षता ॥३३०॥
तया च मुक्तया तस्मा-द्भूजोपद्रवतस्तदा । मम जीवितदातेति, सस्नेहं त्वं प्रलोकितः ॥३३१॥
कलाकौशलसच्छौर्य-रूपादिगुणसम्पदाम् । प्रकर्षोऽयमिति ज्ञात्वा, त्वयि तस्याः सुनिर्भरः ॥३३२॥
अनुरागो दृढं जात-स्ततस्त्वामभि सत्वरम् । स्निग्धैरनिमिषैर्नेत्रैः, पश्यन्ती क्षणमेककम् ॥३३३॥
लिखितस्तम्भितेवासौ, स्थितैकाग्रमनास्ततः । गेहं नीता स्वलोकेन, व्यतीते हस्तिसम्भ्रमे ॥३३४॥
तत्रापि कुरुते नैव, भोजनादितस्थितिम् । केवलं मौनवृत्ते सा, स्थितास्ति वरबालिका ॥३३५॥
ततश्च सा मयाभाणि, किमप्रस्ताव एव हि । मुक्तस्वभाविका जाता, केन त्वं पुत्रि ! कोपिता ? ॥३३६॥
ममापि येन नैवं त्वं, दत्से वत्से समुत्तरम् । ततश्चेदं तयावाचि, हसित्वा सविलक्षकम् ॥३३७॥
युष्माकमपि किं मातः !, किञ्चिदस्ति रहस्यकम् । किन्त्वहं लज्जया वक्तुं, प्रशक्नोमि न किञ्चन ॥
तस्माच्च श्रूयतामम्ब !, स्वाकूतं कथ्यते तव । येनाहं मोचिता हस्ति-हस्तग्रासाच्छुभंयुना ॥३३९॥
स मे भर्ता महाभागो, यद्यम्ब ! न भविष्यति । तदा त्वरितमेवाहं, मरिष्यामि न संशयः ॥३४०॥
ततो मयेदमाकर्ण्य, तस्याः पित्रे निवेदितम् । तेनापि त्वत्समीपेऽहं, प्रेषिता राजनन्दन ! ॥३४१॥
तत्तस्याः पूरयस्व त्वं, बालिकाया मनोरथान् । प्रतिश्रुतं च तत्तेन, [दाक्षिण्यैकहृदा तदा ॥३४२॥
दम्पत्योश्च तयोरेवं,] ततोऽन्यदा शुभेऽहनि । वृत्तं विवाहमाङ्गल्यं, [1]प्रवृत्तश्च महोत्सवः ॥३४३॥
तथा सुबुद्धचमात्येन, दत्त्वा नन्दाख्यकन्यकाम् । रम्यं विवाहमाङ्गल्यं, कृतं वरधनोरपि ॥३४४॥
एवं द्वयोरपि प्राज्यं, वैषयिकं सुखं तयोः । भुञ्जानयोर्यथाकामं, गतः कालः कियानपि ॥३४५॥

१ प्रवृत्तः सुमनोत्सवं- BJPC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उच्छलिता तयोर्वार्ता, सर्वदेशेष्वपि क्रमात् । ततो राजगृहादेतौ गतौ वाणारसीं पुरीम् ॥३४६॥
ब्रह्मदत्तं बहिर्मुक्त्वा, स्वयं वरधनुर्गतः । पुरीमध्ये समाख्यातुं, पार्श्वे कटकभूपतेः ॥३४७॥
ततस्तुष्टो विनिष्क्रान्तो, राजा सबलवाहनः । उद्यानस्थकुमारस्य, समीपे वेगतो गतः ॥३४८॥
आरोहितो गजस्कन्ध- मानीतो निजमन्दिरम् । दत्ता कटकावतीनाम, कुमाराय निजाङ्गजा ॥३४९॥
अनेकरथहस्त्यश्व-भाण्डागारसमन्विताम् । प्रशस्तेऽहनि वृत्तश्च, विवाहः सुमहोत्सवः ॥३५०॥
एवं च तत्र संस्थिष्ठ-न्नापृच्छच्च कटकादिकान् । दूतं सम्प्रेषयामास, पुष्पचूलाय ब्रह्मभूः ॥३५१॥
सोऽपि वाराणसीं शीघ्र-मागतः स्वबलान्वितः । राजा कणेरदत्तश्च, सचिवश्चागतो धनुः ॥३५२॥
अन्ये च भवदत्ताख्य-चन्द्रसिंहादयो नृपाः । प्रभूता आगतास्तत्र, कुमारस्य सहायकाः ॥३५३॥
ततो वरधनुं कृत्वा, महासैन्यस्य नायकम् । प्रेषितः सर्वसामग्री-युक्तो दीर्घनृपोपरि ॥३५४॥
प्रवृत्तश्च ततो गन्तुं, निरन्तरप्रयाणकैः । अत्रान्तरे च दीर्घेण, दूतः सम्प्रेषितो निजः ॥३५५॥
कटकादिनरेन्द्राणां, स च निर्भर्त्सितस्तकैः । ततस्ते गन्तुमारब्धाः, काम्पिल्यनगरं प्रति ॥३५६॥
चलन्तश्चागतास्तत्र, वेष्टितं च समन्ततः । कृत्वा निरुद्धसञ्चार-मनिर्गमप्रवेशकम् ॥३५७॥
ततो व्यचिन्तयद्दीर्घो, यथा किल कियच्चिरम् । बिले प्रविष्टकैः स्थेयं, साहसं क्रियतेऽधुना ॥३५८॥
इत्यालोच्य कृतोदग्र-सामग्रीको भृशं पुरात् । विनिर्गत्य परानीके, हेलया निपपात सः ॥३५९॥
ततो जातं महद्युद्धं, द्वयोरपि हि सैन्ययोः । क्षणान्तरात् समालोक्य, सम्भग्नं निजसैन्यकम् ॥३६०॥
दीर्घराजः स्वयं चैव, सम्प्रहर्तुमुपस्थितः । ततश्च तं समालोक्य, सन्धुक्षितक्रुधानलः ॥३६१॥
तस्याऽभिमुखं बला-च्चलितो ब्रह्मनन्दनः । लग्नमायोधनं भीमं, ततस्तयोः परस्परम् ॥३६२॥
अथ प्रहत्य तेनास्त्रैः, खड्गकुन्तादिभिश्चिरम् । विमुक्तं ब्रह्मदत्तेन, चक्रं दीर्घनृपोपरि ॥३६३॥
छिन्नं च तच्छिरस्तेन, त्रुटितं च महीतले । ततो दीर्घबलं सर्वं, ब्रह्मदत्तमशिश्रियत् ॥३६४॥
ततश्चायं जगत्यत्र, चक्रवर्तीति सर्वतः । उल्ललास जनानन्दं, ददज्जयजयारवः ॥३६५॥
पुष्पवृष्टिस्ततो मुक्ता, सिद्धगन्धर्वखेचरैः । उद्घुष्टं च यथैषोऽत्र, चक्रेशो द्वादशोऽजनि ॥३६६॥
ततो जानपदैर्लोकै-र्नागरिकजनैस्तथा । नन्द्यमानः सदासीभिः[1], प्रविष्टः क्रमतः पुरम् ॥३६७॥
निजं च मन्दिरं पश्चा-त्तस्य सामन्तमन्त्रिभिः । सर्वैश्चक्रे महाचक्र-वर्तिराज्याभिषेचनम् ॥३६८॥
ततश्च पूर्वचक्रेश-नीत्या सर्वं प्रसाधितम् । हिमवत्सिन्धुपर्यन्तम्, षट्खण्डमपि भूतलम् ॥३६९॥
अन्तःपुरं च निःशेषं, पुष्पवत्याद्यमागतम् । एवं च चक्रवर्तित्वं, कुर्वतो यान्ति वासराः ॥३७०॥
अन्यदा च नटेनेदं, विज्ञप्तो नृपतिर्यथा । नाटचं मधुकरीगीत-नामकं तव दर्शये ॥३७१॥
ततोऽपराह्णकालेऽसौ, प्रारब्धः कर्तुमुच्चकैः । नाट्यं विभ्रमबिब्बोक-हावभावमनोहरम् ॥३७२॥
अत्रान्तरे नरेन्द्राय, दासचेट्या समर्पितम् । सुगन्धं सुन्दराकार-पुष्पदामोरुगण्डकम् ॥३७३॥

---

१ JC । सदाशीर्भिः - मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तत्प्रेक्षमाणस्य, श्रव्यं गीतं च शृण्वतः । विकल्पो ब्रह्मदत्तस्य, मनस्येवमजायत ॥३७४॥
यथेदृशं मया नाट्यं, मन्येऽहं दृष्टपूर्वकम् । कुत्र दृष्टमिदं कुत्रे-त्येवं चिन्तयतः सतः ॥३७५॥
उत्पन्नं ब्रह्मदत्तस्य, जातिस्मरणमुत्तमम् । तेन ज्ञातं यथा कल्पे, मया **सौधर्म**नामनि ॥३७६॥
विमाने **पद्मगुल्माख्ये**, तिष्ठतेदं प्रलोकितम् । एवं [च] चिन्तयंस्तत्र, राजा मूर्च्छां जगाम सः ॥
पतितश्च महीपीठे, ततश्च पार्श्ववर्तिना । मन्त्रिसामन्तलोकेन, सरसैश्चन्दनादिभिः ॥३७८॥
तालवृन्तादिवातैश्च, स नीतः स्वस्थतां क्षणात् । ततःपूर्वभवभ्रातु-श्चित्रस्यान्वेषणाकृते ॥३७९॥
रहस्यं कुर्वता गुप्त-मुक्तो वरधनुर्यथा । श्लोकस्यार्धमिदं मन्त्रिन् !, लिखित्वा वरपत्रके ॥३८०॥
पुरस्यान्तर्बहिष्टाच्च, लम्बयित्वा त्रिकादिषु । घोषयस्व निजैः पुम्भि-र्यथा भो श्रूयतां जनाः ! ॥३८१॥
श्लोकस्यैतस्य यः पश्चा-दर्धं सम्पूरयिष्यति । नरेन्द्रस्तस्य राज्यार्धं, निश्चयेन प्रयच्छति ॥३८२॥
ततो बहुप्रदेशेषु, लम्बितं पत्रकं तकत् । सर्वत्राऽऽघोषणं कर्तुं, नित्यं प्रारब्धमुच्चकैः ॥३८३॥
अत्रान्तरे स चित्राख्यः, पूर्वजन्मसहोदरः । पुरे **पुरिमताला**ख्ये, भूत्वा सचिवपुत्रकः ॥३८४॥
स्मृत्वा पूर्वभवं स्वीयं, प्रव्रज्यामभिगृह्य च । काम्पिल्यपुरमागत्यो-द्याने **मनोरमा**भिधे ॥३८५॥
शुद्धे [च] प्राशुकस्थाने, पात्रकादि विमुच्य सः । कायोत्सर्गेण सन्तस्थौ, धर्मध्यानपरायणः ॥३८६॥
अथारघट्टिकेनैवं, श्लोकार्धं पठ्यमानकम् । आकर्णितमिदं[1] तत्र, तेन तत्साधुना यथा ॥३८७॥

आस्व दासौ मृगौ हंसौ मातङ्गावमरौ तथा ।
एवं श्रुत्वा ततः साधुः प्रोवाचेदं स्फुटाक्षरम् ॥३८८॥
एषा नौ षष्ठिका जाति-रन्योन्याभ्यां वियुक्तयोः ।
ततः श्लोकार्धमेतद्धि, लिखित्वैकत्र पत्रके ॥३८९॥

शीघ्रं राजकुले तुष्टः, स आरघट्टिको गतः । पठितस्तेन सम्पूर्णः, स श्लोको नृपतेः पुरः ॥३९०॥
ततः स्नेहातिरेकेण, गतो मूर्च्छां महीपतिः । लुठितश्च महीपीठे, ततस्तत्पार्श्ववर्तिना ॥३९१॥
क्रुद्धेन राजलोकेन, संलपतेदमुच्चकैः । एतद्वाक्येन राजाय-मवस्थामीदृशीं ययौ ॥३९२॥
तदयं नष्टसच्चेष्टो, ह्येनं तु हन्यतामिति । ततो यष्टिचपेटाद्यैः, स आरघट्टिको हतः ॥३९३॥
हन्यमानेन तेनोचे, श्लोकोऽयं मयका न हि । पूरितस्तत्किमर्थं मां, ताडयत निरागसम् ॥३९४॥
तैरुक्तं तर्हि केनायं, पूरितः कथ्यतामहो ? । स प्राहोद्यानमध्यस्थो, मुनिरेवास्य पूरकः ॥३९५॥
ततोऽमात्यादिलोकेन, मोचितः स कदर्थनात् । अथ श्रीखण्डसेकाद्यै-र्भूपतिर्लब्धचेतनः ॥३९६॥
विज्ञातमुनिवृत्तान्तो, भक्तिस्नेहवशात्ततः । हेलयोल्लसितस्फाररोमाञ्चाञ्चितविग्रहः ॥३९७॥
सार्धं निजकलोकेन, जगाम मुनिसन्निधौ । सद्भक्त्या वन्दितः साधु-र्निषण्णश्च तदन्तिके ॥३९८॥
मुनिनापि समारब्धा सुन्दरा धर्मदेशना । दर्शितं भवनैर्गुण्यं, वर्णिताः कर्महेतवः ॥३९९॥

---

१ समाकर्णितमिदं तेन (ते J) साधुना यथा - BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लाघितो मोक्षमार्गश्च, ख्यापितं मोक्षजं सुखम्। ततः पर्षत्समस्तापि, संविग्ना भाविता तथा ॥४००॥
ब्रह्मदत्तस्तु संवेग-निर्वेदादिकैरपि। वाक्यैर्वरमुनेस्तस्य, न मनागपि भावितः ॥४०१॥
ततः प्राह सविश्रम्भं, सादरं विनयान्वितम्। करसम्पुटमायोज्य, राजेन्द्रस्तं मुनिं प्रति ॥४०२॥
यथा स्वसङ्गमेनाहं, भवतानन्दितो मुने!। तथानन्दं कुरुष्वाद्य, राज्यस्वीकरणेन मे ॥४०३॥
पश्चाच्च सममेवावां, श्रयिष्यावस्तपःश्रियम्। निःशेषसुखसन्दोह-कारणं करुणाकर ! ॥४०४॥
मुनिराह यथा राजन् !, युक्तं कर्तुमिदं मम। युष्माकमुपकाराय, सततोद्यतचेतसः ॥४०५॥
किं त्वत्र प्राणिनां भूयो, मानुषत्वं सुदुर्लभम्। सन्ध्यारागसमा लक्ष्मी, राज्यं सततपातुकम् ॥४०६॥
अनवस्थायिनी चैषा, धर्मबुद्धिश्च देहिनाम्। विपाककटवः सर्वे, शब्दादिविषया नृप ! ॥४०७॥
ध्रुवश्च नरके पात-स्तदभिषक्तचेतसाम्। दुष्प्रापं मोक्षबीजं च, भूयोऽपि विरतिस्तथा ॥४०८॥
संयमं च परित्यज्य, घोरसंसारकारणम्। त्वद्राज्याश्रयणं नैव, रञ्जयति सतां मनः ॥४०९॥
तदयं मुच्यतां राजन् !, विद्वन्निन्द्यः कदाशयः। स्मर्यतां पूर्वजन्मानु-भूतां दुःखपरम्पराम् ॥४१०॥
श्रवणाञ्जलिभिर्नित्यं, पिब जैनवचोऽमृतम्। गच्छ तदुक्तमार्गेण, नृजन्म सफलीकुरु ॥४११॥
श्रुत्वेदं भूपतिः प्राह, राज्ये मूर्च्छितमानसः। यथा भो सन्मुने ! दृष्टं, त्यक्त्वेदं सुन्दरं सुखम् ॥४१२॥
यददृष्टसुखे वाञ्छा, सा मे भाति न सुन्दरा। तदहो गृह्यतां राज्यं, क्रियतां मे समीहितम् ॥४१३॥
मुनिः प्राह व्रतत्यागा-त्त्वद्राज्यं मे न रोचते। एवमादि स भूपालो, जल्पितप्रतिजल्पितैः ॥४१४॥
यदा सम्बुद्धयते नैव, तदा साधुर्व्यचिन्तयत्। अहो ! चक्रे यदेतेन, निदानं पूर्वजन्मनि ॥४१५॥
मया निवारितेनापि, तदिदानीं विजृम्भते। अतो गुरुककर्माय-मसाध्योऽकालदष्टवत् ॥४१६॥
जैनेन्द्रवाक्यसन्मन्त्र-तन्त्रादीनामिति स्फुटम्। गतो मुनिवरोऽन्यत्र, सिद्धः कालान्तरेण च ॥४१७॥
राज्ञोऽपि चक्रिसौख्यानि, भुञ्जानस्य यथेप्सितम्। कालः कश्चिदतिक्रान्तः, प्रोवाचैकोऽन्यदा द्विजः॥
यथा भो राजराजेन्द्र !, श्रद्धा मे वर्ततेऽधुना। जानामि यदि भुञ्जेऽहं, भोजनं नृप ! तावकम् ॥४१९॥
राजा प्राह न मां मुक्त्वा, भोजनं मामकं द्विज !। तीव्रोदरानिलस्यापि सम्यगन्यस्य जीर्यति ॥४२०॥
विप्रः प्राह नृप ! प्राज्य-राज्यलक्ष्मीं धिगस्तु ते। यस्त्वं भोजनमात्रेऽपि, विकल्पाकुलमानसः ॥४२१॥
ततश्चाक्षमया राज्ञा-नुज्ञातं भोजनं निजम्। भोजितश्च कलत्रादि-तत्कुटुम्बान्वितो द्विजः ॥४२२॥
स च भुक्त्वा गतो गेहे, रजनी च समागता। ईषत्परिणितिं याति, तस्मिंश्चक्रेशभोजने ॥४२३॥
सर्वमेवावशीभूतं, तद्ब्राह्मणकुटुम्बकम्। उन्मादोद्रेकतः सर्व-कृत्याकृत्यविमूढकम् ॥४२४॥
मुक्तमातृदुहित्रादि-शिष्टलोकव्यवस्थकम्। अकार्यं कर्तुमारब्धं, परस्परमशङ्कितम् ॥४२५॥
जीर्णे चान्ने ततः प्रात-र्गते च मदनज्वरे। रात्रिव्यतिकरं मत्वा, स विप्रो लज्जितो दृढम् ॥४२६॥
तदीयपरिजनः प्रोच्चैः, समग्रो व्रीडया मिथः। न शशाक स्वकीयानि, दर्शयितुं मुखान्यपि ॥४२७॥
ततोऽकीर्तिभयाद्विप्रो, नगरादपि निर्गतः। [वि] चिन्तितं च तेनैवं, कथं नाम महीभुजा ॥४२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकसमक्षमेवाह-मेतेन तु विडम्बितः । ततोऽतिरुष्टचित्तेन, कान्तारे हिण्डताऽन्यदा ॥४२९॥
तेन व्यलोक्यजापालो, हस्तन्यस्तशरासनः । मृदुगोलिभिरेकत्रा-ऽश्वत्थपत्राणि काणयन् ॥४३०॥
चिन्तितं च ततस्तेन, यश्चायं पशुपालकः । मद्विवक्षितकार्यस्य, भविष्यति प्रसाधकः ॥४३१॥
एवं विचिन्त्य तद्योग्य-भोजनाच्छादनादिभिः । उपचर्य निजाकूतं, तस्मै तेन निवेदितम् ॥४३२॥
सोऽप्युपरोधतो विप्रा-भिप्रेतं प्रतिपन्नवान् । अन्यदा पशुपालोऽसौ, कुट्यान्तरितविग्रहः ॥४३३॥
अमोघबाणघातस्य, ब्रह्मदत्तस्य चक्रिणः । निर्गच्छतः पुरादेक-गोलिकयैव लोचने ॥४३४॥
द्वे अप्युत्पाटयामास, हेलयैव स पापभाक् । [अहो ! दुर्बुद्धिलोकानां, विवेको नैव विद्यते] ॥४३५॥
ततो राज्ञापि निःशेषं, विज्ञाय द्विजचेष्टितम् । क्रुद्धेन स महापापः, सकुटुम्बोऽपि घातितः ॥४३६॥
अन्यानपि बहून् विप्रान्, घातयित्वाह मन्त्रिणम् । यथा चक्षूंषि विप्राणां, समुत्पाट्य मदग्रतः ॥४३७॥
स्थाले कृत्वा निधेहि त्वं, येनाहं निजहस्तकैः । मर्दयित्वा यथाकामं, करोमि सुखमात्मनः ॥४३८॥
मन्त्रिणाप्यतिसङ्क्लिष्ट-कर्मौघपरतन्त्रताम् । ज्ञात्वा तस्य ततः सार्ध-माखोटकफलान्वितम् ॥४३९॥
ढौकितं स्थालकं सोऽपि, तानि चक्षुर्धिया ततः । प्रत्यहं मर्दयामास, रौद्रध्यानपरायणः ॥४४०॥
इत्थं स्वस्य सुखं कुर्वन्, गमयति स्म वासरान् । ततश्च षोडशाग्राणि, सप्तवर्षशतानि सः ॥४४१॥
अनुपाल्य निजायुष्कं, कृत्वा कर्म च पापकम् । प्रवर्धमानदुर्वार-रौद्रध्यानवशं गतः ॥४४२॥
मृत्वा च दुःखसंसार-भारितः सप्तमक्षितौ । उत्पन्नो नारकत्वेन, समुत्कृष्टकृतस्थितिः ॥४४३॥
निदानं यत्तदा तत्र, चक्रे सम्भूतिनामना । तदिह ब्रह्मदत्तस्य, जातं दुर्गतिकारणम् ॥४४४॥
चक्रिणा चित्रसम्भूती, मातङ्गावपि यत्तदा । वन्दितौ सावरोधेन, सपौरेण च भक्तितः ॥४४५॥
तदहो सुप्रतप्तस्य, समग्रं तपसः फलम् । इति ज्ञात्वा सदा सम्य-क्तप्यतां निर्मलं तपः ॥४४६॥

इति **चित्रसम्भूतिकथानकं** परिसमाप्तम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ **हरिकेशकथानकं** यथा–

अस्तीह **मथुरा**नाम-पुरी शक्रपुरीसमा । तस्यां **शङ्ख**ाभिधो राजा-शेषराजार्चितक्रमः ॥१॥
स च जैनेन्द्रसद्धर्म-सदनुष्ठानसंयुतम् । त्रिवर्गसुन्दरं भुक्त्वा, चिरं सांसारिकं सुखम् ॥२॥
सौस्थ्यं कृत्वा निजे राज्ये, कामभोगेषु निःस्पृहः । अन्तिके सद्गुरूणां तु, विभूत्या व्रतमग्रहीत् ॥३॥
कालक्रमेण सञ्जातो, गीतार्थः कृतयौगिकः । भ्राम्यंश्च भूतलं प्राप्तः, पुरे **गजपुराभिधे** ॥४॥
तत्र भिक्षाकृते भ्राम्यन्, **सोमदेव**पुरोधसम् । हुतवहाख्यरथ्यायाः, समीपस्थमपृच्छत ॥५॥
यथा भो ! भो ! किमेतेन, पथा विप्र ! व्रजाम्यहम् । तेनाप्यनेन मार्गेण, गच्छन्तं दह्यमानकम् ॥६॥
पश्याम्यहमिमं साधुं, गच्छ गच्छेति जल्पितम् । प्रवृत्तो गन्तुमन्त्यन्त-मीर्यया समितो मुनिः ॥७॥
ब्राह्मणोऽपि समारूढो, गत्वा प्रासादमूर्धनि । ततोऽत्यन्तोपयुक्तं तं, प्रगच्छन्तं शनैः शनैः ॥८॥
मुनिं दृष्ट्वा गतस्तेन, यथा सोऽपि पुरोहितः । यावन्मार्गः स सञ्जात-स्तुषारकणशीतलः ॥९॥
ततश्चिन्तितमेतेन, मयाहो पापकर्मणा । अतीवक्लिष्टचित्तेन, विहितं कर्म पापकम् ॥१०॥
द्रष्टव्यश्च महात्मायं, यत्तपसः प्रभावतः । अग्नितुल्योऽप्ययं मार्गो, जातो हिमकणोपमः ॥११॥
विचिन्त्यैवं गतस्तस्य, सन्मुनेरन्तिके द्विजः । वन्दितश्च मुनिर्भक्त्या, कथितं च स्वचेष्टितम् ॥१२॥
मुनिनापि ततस्तस्य, दर्शिता भवतुच्छता । प्रकाशितः कषायाणां, विपाकोऽन्त्यन्तदारुणः ॥१३॥
स्वर्गापवर्गदातृत्वं, जैनधर्मस्य शंसितम् । निन्दितं दुर्गतौ दुःखं, श्लाघितं निर्वृतौ सुखम् ॥१४॥
सर्वथातिप्रबन्धेन, शिष्टः सम्यक्त्वमूलकः । साधुधर्मस्तदासेवि-सर्वकल्याणकारकः ॥१५॥
ततोऽसौ देशनां श्रुत्वा, भवनिर्वेदकारिणीम् । संविग्नो भवभीतश्च, जातोत्साहो व्रतं प्रति ॥१६॥
कृत्वा कुटुम्बसौस्थ्यादि-कृत्यं तत्समयोचितम् । मुनेस्तस्यान्तिके दीक्षां, जग्राह विधिपूर्वकम् ॥१७॥
गृहीता द्विविधा शिक्षा, पालितः संयमश्चिरम् । कृत्वा च कर्मदोषेण, जातिरूपादिकं मदम् ॥१८॥
मृत्वा समाधियोगेन, [सं] प्राप्तस्त्रिदशालयम् । तत्र भुक्त्वा सुरस्त्रीभिः, सार्धं भोगाननुत्तरान् ॥१९॥
पल्योपमान्यनेकानि, ततश्च्युत्वा स्थितिक्षयात् । गङ्गातीरेऽस्ति मातङ्गो, **बलकोट्ट**ाभिधानकः ॥
गौरी नाम जनी तस्य, तस्याः कुक्षावजायत । सर्वतः पुष्पितं चूतं, चैत्रलक्ष्म्या विशोभितम् ॥२१॥
स्वप्ने दृष्ट्वा प्रबुद्धा सा, स्वस्मै भर्त्रे न्यवेदयत् । तेनापि कथितः स्वप्नः, स्वप्नशास्त्रप्रवेदिनाम् ॥२२॥
तैरप्युत्तमपुत्रस्य, समुत्पत्तिर्निवेदिता । कालक्रमाच्च सासूत, मातङ्गी वरदारकम् ॥२३॥
अपि च–

जाईमयाऽवलेवा, मायंगकुलम्मि एस उप्पन्नो ।
सोहग्गरूवरहिओ, नियवंधूणं पि हसणिज्जो ॥२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य बल्ल इति प्राज्यं, कृतं नाम स्वबन्धुभिः । वर्धमानश्च कुर्वाणः, कलहं भण्डनं वृथा ॥२५॥
सर्वेषां विषशाखीव, जात उद्वेगकारकः । अन्यदा च क्रमाज्जाते, रम्ये मधुमहोत्सवे ॥२६॥
पानभोजननृत्यादि-सक्तस्वजनबन्धुषु । अकस्माद्भण्डनं चक्रे, स मातङ्गो बलाभिधः ॥२७॥
ततो निष्काशितो रुष्टैः, स तैरापानभूमितः । तानि च रममाणानि, दूरमास्ते विलोकयन् ॥२८॥
क्षणान्तराच्च तन्मध्ये, समायातो भुजङ्गमः । व्यापादितः स तै रुष्टै-स्ततो दीवक आगतः ॥२९॥
स तु व्यापादितो नैव, विलोक्येदं ततो बलः । अचिन्तयद्यथा भो ! भोः !, स्वदोषेणैव देहिनः ॥३०॥
भवन्ति विपदां स्थानं, सम्पदां तु गुणोदयात् । हतोऽहिः सविषो यस्मा-न्न तथा दीवकोऽविषः ॥३१॥
स्वकैरेव गुणैर्दोषैः, सम्पदो विपदो यतः । जायन्ते प्राणिनां तस्मा-दर्जयामि गुणानहम् ॥३२॥

अपि च- **एवं भावेमाणो, धम्मं सोऊण साहुमूलम्मि ।**
निच्छिण्णभवपवंचो मायंगो महरिसी जाओ ॥३३॥

विधिनोपात्तनिःशेष-साधुक्रियाकलापकः । षष्ठादितुर्यमासान्तं, तपस्तीव्रं चकार सः ॥३४॥
तपसैवंविधेनाथ, कृशीभूतशरीरकः । क्रमतो विहरन् प्राप्तः, पुरीं वाणारसीमसौ ॥३५॥
स्थितः साधूचिते स्थाने, उद्याने तिन्दुकाभिधे । तत्र चावसते यक्षो, गण्डितिन्दुकनामकः ॥
स च साधुगुणग्रामैः, समावर्जितमानसः । तमेव प्रत्यहं साधुं, शुश्रूषन्नभितिष्ठति ॥३७॥

अन्यदान्येन यक्षेण, स यक्षः प्रश्नितो यथा ।
भो ! भोः ! किं दृश्यसे न त्वं, तेनोक्तं कथ्यते शृणु ॥३८॥

वयं भोः पर्युपासीनाः, साधुमेवमिहास्महे । त्रिलोकस्यापि सम्पूज्यं, व्रजामो न हि कुत्रचित् ॥३९॥
श्रुत्वेदं सर्वमत्यर्थं, साधोश्चरितमुत्तमम् । प्रतिबुद्धस्ततः सोऽपि, यक्षः साध्वनुभावतः ॥४०॥
ततश्च तिन्दुकं यक्षं, स प्रोवाच प्रहर्षितः । धन्यस्त्वं कानने यस्य, वसत्येष महामुनिः ॥४१॥

अपि च- **दट्ठुं मुणिस्स चरियं, पडिबुद्धो सो वि तिंदुगं भणइ ।**
तं चिय मित्त ! कयत्थो, जस्स वणे वसइ तव एसो ॥४२॥
मज्झवि वसंति मुणिणो, उज्जाणे ता खणंतरं एक्कम् ।
गंतूण तेवि सरिसा, वंदामो भाणिउं पत्ता ॥४३॥
दिट्ठा य तेहिं मुणिणो, कहवि पमा[या]ओ विगहमाणाओ ।
ताहे गाढयरागं, अणुरत्ता तंमि ते जक्खा ॥४४॥

[तुला-संवेग रंगसाला ६१९७-६१९९]

एवं तिन्दुकयक्षस्य, स्तुवतस्तं महामुनिम् । सद्भक्त्याकृष्टचित्तस्य, व्यतिव्रजन्ति वासराः ॥४५॥

अपि च- **भावेण वंदमाणस्स, महारिसिं तस्स पूयपावस्स ।**
वच्चइ सुहेण कालो, हरिणोव्व जिणं थुणंतस्स ॥४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र च पद्मपत्राक्षी, **कौशलिक**महीपतेः । **भद्रा** नाम वरा कन्या, रूपयौवनगर्विता ॥४७॥
समं सद्गन्धपुष्पादि-पटलव्यग्रपाणिना । चेटिकाचक्रपालेन, यक्षायतनमागता ॥४८॥
तं यक्षं पूजयित्वा सा, प्रयच्छन्ती प्रदक्षिणाम् । तन्महामुनिमद्राक्षी-न्मलक्लिन्नाङ्गधारिणम् ॥४९॥
अतीवमलिनस्यूत-जीर्णोपकरणान्वितम् । प्रणष्टरूपलावण्यं, तपःशोषितविग्रहम् ॥५०॥
दृष्ट्वा च तं महासाधु-मतिबीभत्सदर्शनम् । तया निष्ठीवितं तत्र, महामोहविमूढया ॥५१॥
पापा केयमहो कन्या, या निन्दति महामुनिम् । एवं विचिन्त्य यक्षेण, तच्छरीरमधिष्ठितम् ॥५२॥
ततोऽसमञ्जसैर्वाक्यैः, प्रलपन्ती विसंस्थुलम् । कथञ्चिदेव कष्टेन, नीता सा राजमन्दिरे ॥५३॥
दृष्ट्वा तां तादृशीं राज्ञा-त्यन्तमातुरचेतसा । अनेके व्याहृता ज्योति-र्मन्त्रतन्त्रादिवादिनः ॥५४॥

अपि च- **जो विरडिं पि न जाणइ, नरवइणा सो वि तत्थ वाहरिओ ।**
नेहाउलाण अहवा, केत्तियमेत्तं व पुरिसाण ? ॥५५॥

ततस्तस्याः समारब्धा, धन्वन्तरिसमप्रभैः । क्रिया चतुर्विधा वैद्यै-र्यथाज्ञानं प्रयत्नतः ॥५६॥
तथापि नैव सञ्जातो, गुणः कोऽपि मनागपि । पुनश्चानेकधा मन्त्र-तन्त्र-यन्त्रादयः कृताः ॥५७॥
तेऽप्यूषर इव न्यस्ताः, सर्वे विफलतां ययुः । अथवा दैविके विघ्ने, किं करोतीह मानवः ? ॥५८॥

अपि च- **इय जाहे विगुत्ता, सव्वे विज्जाइणो तओ जक्खा ।**
जंपइ पत्तंमि ठिओ, एयाए निंदिओ साहू ॥५९॥
ता जइ वरइ तस्सेव, देहं मुंचामि नन्नहा मोक्खो ।
रन्ना वि जीवउ त्ति य, पडिवन्नं जक्खवयणं ति ॥६०॥

ततः स्वस्थशरीरा सा, सर्वालङ्कारभूषिता । विवाहयोग्यसद्वस्त्र-व्यग्रपाणिसखीयुता ॥६१॥
जगामातिमहाभूत्या, मुनेस्तस्य पदान्तिके । पतित्वा पादयोः स्वीयै-र्महल्लकैः समं ततः ॥६२॥
विज्ञप्तः स तया भक्त्या, यथा भो ! भो ! महामुने ! । स्वयंवरागताया मे, गृहाण करपल्लवम् ॥६३॥
मुनिर्बभाण हे भद्रे !, पर्याप्तं कथयानया । निन्दनीयं ध्रुवं लोकै-स्तन्मा वोचस्त्वमीदृशम् ॥६४॥

अपि च- **इत्थीइ समं वासंपि, जे न इच्छंति एकवसहीए ।**
कह ते नियएकरेहिं, रमणीण करे गहिस्संति ? ॥६५॥
सिद्धिवहुवद्धरागा, असुईपुन्नासु कह णु जुवईसु ।
रज्जंति महामुणिणो, गेवेज्जयवासिदेवव्व ॥६६॥

[तुला-संवेग रंगसाला ६२११-१२]

ततो नानाप्रकाराणि, विकुर्व्य च रूपाणि सा । प्रच्छाद्य साधुरूपं च, यक्षेणातीवधर्षिता ॥६७॥
विमानिता निशां सर्वां, नानाकारं यथेच्छया । प्रभातसमये याव-न्नालोकयति तं मुनिम् ॥६८॥
ततः स्वप्नमिवाशेषं, मन्यमानातिदुर्मनाः । स्वलोकेनानुयाता च, जगाम निजमन्दिरम् ॥६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ विज्ञपयामास, महीनाथं पुरोहितः । राजन् ! मुनीशपत्नीयं, मुनिना प्रोज्झिता सती ॥७०॥
भवतु पत्नी विप्राणां, तस्मात्तेभ्यः प्रदीयताम् । प्राप्तकालमिदं चैवे-त्याकलय्य महीभुजा ॥७१॥
प्रदत्ता **रुद्रदेवाय**, तस्मै चैव पुरोधसे । [अत्राहो खलु संसारे, कर्मणां गतिरीदृशी] ॥७२॥

अपि च- **पावनिमित्तं काउं, जा रिसिणा उज्झिया नरिंदसुया ।**
सा वि पुरोहिएणं, गहिया सुहकारणं काउं ॥७२॥

एवं पुरोधसस्तस्य, तया सार्धं यथेप्सितम् । भुञ्जानस्य महाभोगान्, कालः कोऽपि व्यतीतवान् ॥७३॥
अन्यदा रुद्रदेवेन, यज्ञं प्रयजता सता । विहिता यज्ञपत्नी सा, विधिना राजपुत्रिका ॥७४॥
तत्र च भट्टचट्टाद्या, नानादेशान्तरागताः । अनेके मिलिताः स्वर्ण-गोदानादिजिघृक्षया ॥७५॥
इतश्च स मुनिर्भ्राम्यन्, भिक्षार्थं मासपारणे । समितः सुष्ठु गुप्तश्च, यज्ञपाटकमागतः ॥७६॥
प्रविष्टश्च मुनिस्तत्र, धर्मलाभपुरस्सरम् । भट्टादीनां पुरोभूय, देशे साधूचिते स्थितः ॥७७॥
ततस्तपःकृशीभूत-देहं भूरिमलाविलम् । प्रणष्टरूपलावण्यं, प्रान्तवस्त्रादिधारिणम् ॥७८॥
दृष्ट्वा तं मुनिमारब्धा, हसितुं ते द्विजादयः । निन्दागर्भैरसभ्यैश्च, दुर्वचोभिर्विरुद्धकैः ॥७९॥

अपि च- **जंपिंतिं भट्टचट्टा, कीस तुमं एत्थ आगमो पाव ! ।**
ता तुरियं एयाओ, [1]थामाओ वच्चसु हयास ॥८०॥
एत्थंतरंमि जक्खो, रिसिणो देहंमि पविसिउं भणइ ।
भिक्खत्थमागओ हं, ता दिज्जउ मज्झ भो भिक्खा ॥८१॥
जाईकुलेसु विसिट्ठा, वेयविहन्नू सकम्मसंतुट्ठा ।
ताण दियाणं तु इमो, दिज्जिस्सइ वच्च तं पाव ! ॥८२॥
हिंसालियचोरिक्के मेहुन्नपरिग्गहाओ हं विरओ ।
समसत्तुमित्ततणु[2] लेट्ठुकंचणो विगयऽहंकारो ॥८३॥
परिचत्तगिहावासो, उग्गमउप्पायएसणासुद्धं ।
जाएमि भिक्खमित्तं, गिहे गिहे तेण पत्तोऽम्हि ॥८४॥
एसो य कओ पागो, विविहो तुम्हेहिं नियकज्जेण ।
ता एयाओ मज्झ वि, धम्मट्ठा देह भो ! भिक्खं ॥८५॥
जाव दिएहिं न भुत्तो, पढमं जलणे वि जाव नो छूढो ।
ताव न दिज्जइ एसो, सुद्दाणं वच्च तं समण ! ॥८६॥
जह कालम्मि सुखित्ते, विहिणा वीयं सुवावियं फलयं ।
जायइ तह पिइवंभण-जलणम्मि निवेसियं दाणं ॥८७॥

---

१ थाम न. [दे. ठाण] स्थान, जगह - इति पाइअसद्दमहण्णवकोशे ।
२ °मित्त धण- इति उपदेशमालागतवर्धमानसूरिकथायां प. २५९ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह मुणिणा ते भणिया, जाईमित्तेण हुंति नो विप्पा ।
तुम्हारिसव्व पावा, हिंसालियमेहुणाऽऽसत्ता ॥८८॥
जलणोवि पावहेऊ, कह तम्मि निवेसियं सुहं कुणइ ।
पिउणो वि परभवगया, इह दिन्नं कह णु गेण्हंतु ? ॥८९॥

[संवेगरंगसाला ६२२३-६२२६]

ततश्च- प्रतिकूलविभाषीति, ब्राह्मणानामयं मुनिः ।
तं साधुं प्रति ते चट्टा, गालिघातैरुपस्थिताः ॥९०॥

लातलेष्टुलतायष्टि-कषाकम्बादिलक्षणैः । यक्षेण स्तम्भिताः सर्वे, ते चित्रलिखिता इव ॥९१॥

अपि च- "छिन्नतरुणोव्व ताणं, निवाडिया केवि तेण जक्खेण ।
अन्ने पहरेहिं हया, अन्ने पुण वामिया रुहिरं ॥९२॥ [संवेग. ६२२८]
दट्ठूणं ते चट्टे, मुणिणा उड्डाइए तहारूवे ।
भयवेपमाणहियया, भट्टा ते भणइ सह पइणा ॥९३॥
एसो सो जेण तया, सयंवरा उवणया अहं चत्ता ।
सिद्धिवहुरागरत्तो, नेच्छइ सुरसुंदरीओ वि ॥९४॥
अइघोरतवपरिक्कम-वसीकयासेसतिरियनरदेवो ।
तेलोक्कपणयचलणो, नाणाविहलद्धिसंपन्नो ॥९५॥ [संवेग. ६२३०-१]
जियकोहमाणमाओ, जियलोभपरीसहो महासत्तो ।
निट्ठवियपावपसरो, तियसासुरपणयपयकमलो ॥९६॥
जलणोव्व दहइ भुवणं, कुविओ तं चेव रक्खए तुट्ठो ।
ता एयं तज्जिंता, वच्चिस्सह अंतयघरम्मि ॥९७॥ [संवेग. ६२२३]
पाएसु निवडिऊणं, एयं तोसेह महरिसिं तुब्भे ।
जइ जीविएण कज्जं, एवं भट्टाए ते भणिया ॥९८॥
रागाइएहिं जं भे, अवरद्धं तं खमाहि णो भयवं ।
पणिवइयवच्छलचिय, हवंति लोगम्मि वरमुणिणो ॥९९॥
अह ते मुणिणा भणिया, संसारनिबंधणस्स कोवस्स ।
को अवगासं दिज्जा, विसेसओ मुणियजिणवयणा ॥१००॥[संवेग६२३५-६]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महभत्तिपरेण इमे, चट्टा जक्खेण वारिआ दूरं ।
ता तं चिय संभासह, जेण कया एरिसा तुब्भे ॥१०१॥

ततश्च मुनिना सार्धं, बहुधा विज्ञप्तेन ते । यक्षेण शान्तचित्तेन, सर्वेऽपि प्रगुणीकृताः ॥१०२॥
अत्रान्तरे च शुद्धेन, वराहारेण सादरम् । राज्ञः पुत्र्या समं भर्त्रा, स मुनिः प्रतिलम्भितः ॥१०३॥
ततो गन्धोदकं तत्र, निपपात नभोङ्गणात् । दशार्धवर्णसत्पुष्प-वृष्ट्या सार्धं समन्ततः ॥१०४॥
आहता गगने देवै-र्भूरिदुन्दुभयो भृशम् । पपात वसुधाराध-श्चेलोत्क्षेपः कृतो जनैः ॥१०५॥
मुनेर्माहात्म्यमालोक्य, धर्मदेशनया तया । सम्बुद्धाः प्राणिनोऽनेके, धर्मं च प्रतिपेदिरे ॥१०६॥
तदेवं हरिकेशेन, मातङ्गेनापि दुष्करम् । तथा तप्तं तपो येन, त्रिदशैरपि पूजितः ॥१०७॥

इति **हरिकेशकथानकं** समाप्तम्

तदिदमिह तपोमाहात्म्यमालोक्य लोका- श्चरत गुरुतपांसि व्यस्य गेहादिसङ्गम् ।
भवशतकृतकर्मारण्यकं येन दग्ध्वा, सपदि विशदसौख्यां मोक्षलक्ष्मीं लभध्वम् ॥१०८॥

ओल्लसइ जसो वित्थरइ, गुणगणो गलइ पावपब्भारो ।
वियलइ कम्मकलंको, तवलच्छीविभूसियंगाण ॥१०९॥
ओसरइ दुरियनियरो, वित्थरइ महंतसोक्खसंदोहो ।
पसरइ जणाणुरागो, नराण तवलच्छिकलियाणं ॥११०॥

तथा- **पवरजडिलमूलोद्दाममिच्छत्तमूलो दढकढिणकसायाणेगसाहासमूहो ।**
विसयविसरफुल्लो मोहरुक्खो महल्लो तवहुयवहजालालंकिओ जाइ नासं ॥
घणतुहिणणिवाओ पावपंकेरुहाणं, सियकुलिसनिवाओ दुक्खदुग्गाचलाणं ।
खरनहरमइंदो दोसदोघट्टयाणं, जयइ तवसुरूवो सुद्धधम्मो सुरम्मो ॥११२॥
भवभमणभुयंगुच्चाडणे चारुमंतो, सिवपहपहियाणं सत्थवाहो महंतो ।
कुगइदुहदुमाणं खंडणे खग्गतुल्लो, जयउ तवसमूहालंकिओ साहुधम्मो ॥११३॥
वररयणनिहाणं निद्धणाणं जणाणं, अमरनरगयाणं कारणं संपयाणं ।
मुणिजणअवयंसो सच्चकल्लाणकोसो, जयउ तवसिरीए लासलीलाविलासो ॥

इति **तपोऽधिकारः** समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावनाधिकारः १३

अथ भावनाधिकार उच्यते, अस्य चायमभिसम्बन्धः पूर्वत्र तप उक्तं, तपश्च भावसारमेव क्रियमाणं कर्मक्षयाय प्रभवतीत्यतोऽत्र भावना भण्यते, तत्र भावनायाः
स्वरूपं माहात्म्यं च प्रदर्शयन् श्लोकदशकमाह, तद्यथा–

भो भव्या ! भावना भाव्या, निर्मूल्या शर्मसाधिका ।
भावनयैव भव्यानां, भवान्तो जायते यतः ।।२६४।।
द्रव्येण दीयते दानं, शीलं सत्त्वेन पाल्यते ।
तपोऽपि तप्यते कष्टं, स्वाधीना भुवि भावना ।।२६५।।
भावनातोऽपि ये भ्रष्टा-स्ते भ्रमन्ति भवोदधौ ।
नात्मलाभं लभन्ते ते, बीजाभावादिवाङ्कुराः ।।२६६।।
भावनातः क्षयं याति, भवकोटीभिरर्जितम् ।
संसारनिम्बवृक्षस्य, कटुबीजं कर्म देहिनाम् ।।२६७।।
सुबह्वपि तपस्तप्तं, चारित्रं च चिरं कृतम् ।
यदि भावो न सञ्जात-स्तदा तत्तुषकण्डनम् ।।२६८।।
अधीतानि च शास्त्राणि, लोकानां देशना कृता ।
कृतानि दिव्यकाव्यानि, जिता वादे च वादिनः ।।२६९।।
भावना यदि नो जाता सद्गतिद्वारकुञ्चिका ।
स्वकार्यासाधकत्वेन, तदा सर्वं निरर्थकम् ।।२७०।।
रथकारः स्वयं दाता, गृहीता पात्रमुत्तमम् ।
निकटस्थो भावनासार-मनुमन्ता [1]मृगस्तथा ।।२७१।।
वाताहतार्धच्छिन्नेन, वृक्षेण पतता सता ।
त्रयोऽपि चूर्णिताः सन्तो, ब्रह्मलोकमुपागताः ।।२७२।।
हृदयगिरिगुहान्तःसंसृतं यत्तमिस्रं,
तदपनयनदक्षः केवलज्ञानभानुः ।।
स पुनरुदयमेति कृत्स्नदोषावसाने,
तदपि च न दुरापं वर्तते भावनायाः ।।२७३।।

---

१ मृगो मुधा- JC ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति श्लोकदशकं कण्ठ्यं, नवरं भो इत्यामन्त्रणे, **भव्या** मुक्तिसुखलब्धारः ! **भावना** शुभभावरूपा **भाव्या** भावनीया, **निर्मूल्या** मुधिकालभ्या, **शर्मसाधिका** सुखकारिका, **भावनयैव** भावनात् एव **भव्यानां भवान्तो** भवनाशो **जायते** भवति, **यतो** येन कारणेन, शेषं श्लोकाष्टकं स्पष्टमेव । हृदयमेव गिरिगुहा तस्या अन्तर्मध्यं तत्र संसृतं स्थितं यत्तमिस्रमिव तमिस्रमज्ञानं, तस्य तमिस्रस्यापनयनं विनाशस्तत्र दक्षः पटुः, केवलज्ञानमेव भानुरिव भानुरादित्यः, स पुनः **केवलज्ञानभानुरुदयमेत्यभ्युदयं** गच्छति, **कृत्स्नदोषावसाने** सकलरागादिदोषक्षये, **तदपि** च कृत्स्नदोषावसानं न दुरापं न दुष्प्रापं **वर्तते** भवति ॥२६४-२७३॥

भावनायाः शुभाध्यवसायस्योपरि रथकारदानानुमोदनपर**मृगकथानकं** त्विदम्-

अत्रैव भारते वर्षे, तुङ्गप्राकारवेष्टिता । सर्वस्वर्णमया रम्या, नगरी **द्वारिकावती** ॥१॥
स्वर्णरत्नमयानेक-शुभ्रप्रासादसङ्कुला । कुलकोटीभिराकीर्णा, रम्या च रम्यवस्तुभिः ॥२॥
द्वादशयोजनायामा-नवयोजनविस्तृता । रम्यवस्तुपरिपूर्णा, दिव्या देवविनिर्मिता ॥३॥
तां च पालयते **कृष्ण**-वासुदेवोऽर्धचक्रभृत् । **बलभद्रस्तु** तद्भ्राता, तथा **जरत्कुमारकः** ॥
द्वावपिच तकौ ज्येष्ठौ, पिता **वसुदेवो**ऽनयोः । ते च **प्रद्युम्नशाम्बादि**-दुर्ललितकुमारकाः ॥५॥
अन्ये च **वसुदेवाद्या**, यादवा बलगर्विताः । यथाविचिन्तिताशेष-सम्पूर्णस्वमनोरथाः ॥६॥
भुञ्जाना आसते कामं, कामभोगान् मनोहरान् । अन्यदा च समायातः, **श्रीमन्नेमिजिनेश्वरः** ॥७॥
भव्याम्बुजप्रबोधाय, केवलज्ञानभास्करः । समवसरणं रम्यं, देवादिभिर्विनिर्मितम् ॥८॥
आगताश्च सुरास्तत्र, **केशवाद्याश्च** मानवाः । कृता च स्वामिना धर्म-देशना मोहनाशिनी ॥९॥
ततो धर्मकथान्ते च, वासुदेवेन जल्पितम् । स्वामिन्नस्याः पुरः प्रोच्चैः, समृद्धाया धनादिभिः ॥१०॥
तथा यादवकुलस्यास्य, ममेतरजनस्य च । क्षयः केन निमित्तेन, कुतो वा पुरुषान्तरात् ? ॥११॥
कियतः कालतो वापि, जगत्प्रभो ! भविष्यति ? । जिनेन जल्पितं कृष्ण !, शृणुतां कथयामि भोः ॥
अस्ति **द्वीपायनो** नाम, परिव्राजक एंककः । स च मद्यमदोन्मत्तैः, **शाम्बादिभिः** कुमारकैः ॥
दुर्वाक्ययष्टिमुष्टचाद्यै-र्नानाकारं खलीकृतः । विनाशयिष्यते सर्वां, वह्निना द्वारिकावतीम् ॥१४॥
यादवान् शेषलोकांश्च, सर्वान् संवर्तयिष्यति । अस्य चैवं समुत्पत्तिः, सञ्जाता कथ्यते शृणु ॥१५॥
पूर्वं **पराशरो** नाम, शौरिकः पुरबाह्यतः । बभूव तत्र विख्यात-स्तापसस्तापसाश्रमे ॥१६॥
तेनैका कन्यका प्राप्ता, स्वच्छन्दा दुष्टचारिणी । तामादाय समायातो, **यमुना**सरितस्तटे ॥१७॥
तत्र चायं तयोर्जातः, पुत्रो **द्वीपायन**नाभिधः । स च यौवनमारूढो, ब्रह्मचर्यं प्रपन्नवान् ॥१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपवासद्वयान्ते च, पारयामास सर्वदा। तेन च तिष्ठता तत्र, श्रुतं जनप्रवादतः ॥१९॥
यथा भगवतारिष्ट-नेमिनेदं प्रभाषितम्। नगर्या द्वारिकावत्याः, समं च यादवैः खलु ॥२०॥
भविता सर्वथा नाशो, द्वीपायनसकाशतः। तदिदं निर्घृणं कर्म, करिष्येऽहं कथं बत ? ॥२१॥
विचिन्त्यैवं सखेदोऽसौ, वनान्तरमशिश्रियत्। तथा भो यत्त्वया पृष्ट-मात्ममरणकारणम् ॥२२॥
तदिदं कथ्यते तुभ्यं, श्रूयतां केशवाधुना। योऽयं ज्येष्ठस्तव भ्राता, जरादेवीवरात्मजः ॥२३॥
नन्दनो वसुदेवस्य, जरत्कुमारनामकः। एतस्मान्निश्चितं कृष्ण !, मृत्युस्तव भविष्यति ॥२४॥
श्रुत्वेदं यादवानां तु, तस्मिन् जरत्कुमारके। हेलया पतिता दृष्टिः, सविकारातिरोषतः ॥२५॥
ततो जरत्कुमारेण, मनस्येवं विचिन्तितम्। अहो कष्टमहो कष्टं, सञ्जातं कीदृशं कथम् ? ॥२६॥
अहं हि वसुदेवस्य, पुत्रो भूत्वापि नृप्रियः। कथं स्वभ्रातरं मूढो, मारयिष्ये कनिष्ठकम् ? ॥२७॥
अहो पापं महाताप-महो निर्घृणता मम। चिरं चित्ते विचिन्त्यैव-मापृच्छ्य च निजं जनम् ॥२८॥
जनार्दनस्य रक्षार्थं, वनवासमुपागतः। अथ नेमिः पुनः प्रोचे, यथा भो भो जनार्दन! ॥२९॥
वत्सरे द्वादशे पुर्या, अस्या नाशो भविष्यति। [श्रुत्वेति जिनवाक्यं ते, गताः शोकं जनाः समे] ॥३०॥
ततस्ते यादवाः सर्वे, गते जरत्कुमारके। शून्यमिव निजात्मानं, मन्यन्ते शोकविह्वलाः ॥३१॥
ततो नत्वा जिनं नेमिं, सर्वेऽप्युद्विग्नचेतसः। संसारानित्यतां चैव, चिन्तयन्तः सुदुःखिताः ॥३२॥
पुर्याश्च द्वारिकावत्याः, सर्वनाशं विशेषतः। प्रविष्टा नगरीमध्ये, शोकाकुलितमानसाः ॥३३॥
ततश्च वासुदेवेन, कारिता घोषणा पुरि। यथा भो भो जना ! नीत्वा, वने कादम्बनामनि ॥३४॥
समग्रान्यपि मद्यानि, परित्यजत सत्वरम्। श्रीमता नेमिनाथेन, यतश्चैवं प्ररूपितम् ॥३५॥
यथा मद्यप्रसङ्गेन, शाम्बादयः कुमारकाः। द्वीपायनपरिव्राजः, करिष्यन्ति कदर्थनाम् ॥३६॥
श्रुत्वा चैवं ततो लोकैः, कादम्बकमहावने। शिलाकुण्डेषु मद्यानि, सन्त्यक्तान्यखिलान्यपि ॥३७॥
ततः कादम्बसञ्छन्न-शिलागुहासु सम्भृता। कादम्बरीति विख्याता, सा सुरा भण्यते जने ॥३८॥
अत्रान्तरे च रामस्य, भ्राता सिद्धार्थनामकः। सारथित्वं तु तस्यैव, स्नेहाद्यः प्रतिपन्नवान् ॥३९॥
श्रुत्वा यादवलोकस्य, नगर्या सह सङ्गयम्। रामं भणितुमारब्धो, नम्रो मधुरया गिरा ॥४०॥
रामायं नेमिनाथेन, शिष्टः संसारसागरः। जन्मव्याधिजरामृत्यु-जलकल्लोलसङ्कुलः ॥४१॥
नानादुःखमहारौद्र-नक्रचक्रादिदुस्तरः। क्षणध्वंसीनि शिष्टानि, वस्तून्यत्राखिलान्यपि ॥४२॥
अस्माकं तु विशेषेण, दर्शिता सर्वनाशिता। तदहं राम ! निर्विण्ण, इतः संसारचारकात् ॥४३॥
समीपे नेमिनाथस्य, प्रव्रजामि विसर्जय। रामेणाप्यतिनिर्बन्धं, विज्ञायासौ विसर्जितः ॥४३॥
उक्तश्च प्रतिबोध्योऽहं, त्वयका व्यसने क्वचित्। वाक्यं रामस्य तेनापि, तत्तथैव प्रतिश्रुतम् ॥४४॥
ततः पृष्ट्वा निजं लोकं, गत्वा नेमिजिनान्तिके। संसारोत्तारिणीं दीक्षां, जग्राह सुविधानतः ॥४५॥
ततः कृत्वा तपस्तीव्रं, षण्मासं यावदुत्तमम्। आलोचितप्रतिक्रान्तो, देवलोकं जगाम सः ॥४६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च-कादम्बरीगुहायां तु, शिलाकुण्डेषु या सुरा।
सा हेमन्तादिभिः षड्भि-र्मासैः पक्करसाऽजनि ॥४७॥
सुस्वादा सुन्दरा हृद्या, कर्केतनसमप्रभा। इतश्च गतवांस्तत्र, व्याध एकः परिभ्रमन् ॥४८॥
सद्यः शाम्बकुमारस्य, वारुणीं तां विलोक्य सः। आस्वादयितुमारब्धो, यतः स्वादुरसा हि सा॥४९॥
पपौ च तां यथाकामं, स्वपाणिपुटकैस्ततः। वीक्षमाणेन तत्रैव, मृगास्तेन विलोकिताः ॥५०॥
यावत्तेऽपि हि सुस्वस्थाः, सुरापानमदोद्धुराः। क्रीडन्तस्तत्र तिष्ठन्ति, निर्भयास्तुष्टचेतसः ॥५१॥
ततः शाम्बकुमाराय, गत्वा तेन निवेदितम्। गतश्च तत्र शाम्बोऽपि, पीता सा तेन वारुणी ॥५२॥
विचिन्तितं च किं युक्त-महो मे कर्तुमीदृशम्। यत्किञ्चित्सुखदुःखादि, सह्यते कुमरैर्विना ? ॥५३॥
तस्मादत्र प्रगे सर्वा-नानयामि कुमारकान्। तथैव तेन ते सर्वे, आनीतास्तत्र कानने ॥५४॥
दृष्टा च सा तकैर्हृद्या, सुस्वादा सुन्दरा सुरा। आदिष्टाश्च स्वका भृत्या-स्तदानयनहेतवे ॥५५॥
यथैनां सुन्दरां शीघ्रं, समानयत वारुणीम्। तैरपि च समानीता, ततः सानन्दचेतसः ।५६॥
गताः सुन्दरमुद्यानं, नानावृक्षोपशोभितम्। नानापुष्पफलोपेतं, गन्धलुब्धालिसङ्कुलम् ॥५७॥
ततश्चाभाणि शाम्बेन, यथा भो भोः कुमारकाः !। षण्मासान्ते सुलब्धेयं, कथञ्चित्पुण्ययोगतः ॥५८॥
हृद्यामृतरसस्वादां, यथेच्छं पिबत वारुणीम्। ततस्तथैव ते पातुं, प्रारब्धा हृष्टचेतसः ॥५९॥
ततो जातमदोद्रेका, ननृतुश्च जगुश्च ते। वल्गन्त्यालिङ्गयन्ते स्म, युद्धयन्ते च परस्परम् ॥६०॥
क्रीडन्तश्च गताः सर्वे, पर्वताभ्यर्णकाननम्। इतश्चेतश्च ते तत्र, पर्यटन्तो व्यलोकयन् ॥६१॥
तपस्तीव्रं चरन्तं तं, मुनिं द्वीपायनाभिधम्। प्रवक्तुं च समारब्धा, यथा सोऽयं महामुनिः ॥६२॥
आदिष्टो यो जिनेन्द्रेण, श्रीमन्नरिष्टनेमिना। नगर्या द्वारिकावत्याः, सर्वनाशविधायकः ॥६३॥
तदेनं किं न भो हन्मो, निष्प्रयोजनवैरिणम्। निकृष्टं निर्घृणं पापं, जनस्यास्य क्षयङ्करम् ॥६४॥
ततो रोषेण रक्ताक्षा, दन्तदष्टावरौष्ठकाः। प्रारब्धा यष्टिमुष्ट्याद्यै-र्हन्तुं द्वीपायनं दृढम् ॥६५॥
हतस्तावदसौ याव-न्निर्बलः सोऽपतद् भुवि। हत्वेत्थं नगरीमध्ये, प्रविविशुः कुमारकाः ॥६६॥
अथेदं वासुदेवाय, कुमाराणां विचेष्टितम्। विश्रम्भणीयकैः पुंभिः, सर्वमेव प्रवेदितम् ॥६७॥
ततो व्यचिन्तयत्केशी, भो भोः पश्यत पश्यत। कुमाराणां विमूढत्वं, दुर्दान्तत्वं प्रमत्तताम् ॥६८॥
निरपेक्षविधायित्व-मदीर्घदर्शितां तथा। तदहो जीवितभूतानां, किमेषां कुर्महे वयम्-? ॥६९॥
चिरं केशी विचिन्त्यैवं, ततो रामसमन्वितः। जगाम कानने तत्र, द्वीपायनोपशान्तये ॥७०॥
दृष्टश्च रुष्टचित्तोऽसौ, द्वीपायनोऽतिदुर्मनाः। क्षामितश्च प्रियालापैः, पादलग्नेन सादरम् ॥७१॥
इत्थं न क्षमते याव-त्तावद्रामेण जल्पितम्। भो ! कृष्णालं प्रयत्नेन, किं व्यर्थं परिखिद्यसे ? ॥७२॥
यदेतेन किमप्यत्र, चिन्तितं विदधातु तत्। दुर्जनो दुर्जनश्चैव, क्षामितोऽपि न शाम्यति ॥७३॥
अथवा यज्जिनेन्द्रेण, नेमिनाथेन भाषितम्। तदहो सर्वथा कृष्ण !, नान्यथा जायते क्वचित् ॥७४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो द्वीपायनेनोक्तं, भो भो भो यादवप्रभो ! । मया हि ताड्यमानेन, प्रतिज्ञा महती कृता ॥७५॥
यथेह द्वारिकावत्यां, प्रदीप्तायां समन्ततः । विमुक्तिर्युवयोरेव, नैवान्यस्य तथाङ्गिनः ॥७६॥
नासत्यं नेमिनो वाक्यं, न प्रतिज्ञापि मेऽन्यथा । तन्मैवं खिद्यतां व्यर्थं, गम्यतां निजकं गृहम् ॥७७॥
आकर्ण्येदं ततोऽत्यन्तं, शोकाकुलितमानसौ । जग्मतुर्नगरीं स्वीयां, द्वावपि रामकेशवौ ॥७८॥
द्वीपायनप्रतिज्ञां च, ज्ञात्वा सर्वैः पुरीजनैः । पुरीभङ्गभयोत्त्रस्तैः, शोचितं शोकनिर्भरैः ॥७९॥
द्वितीयेऽहनि कृष्णेन, कारिता घोषणा यथा । भो भोः पौरजना यूयं !, हरेर्वाक्यं निशाम्यत ॥८०॥
उद्यच्छत यथाशक्त्या, सततं धर्मकर्मसु । पुष्पगन्धादिभिः पूजां, विधत्तानिशमर्हताम् ॥८१॥
सुसाधून् पर्युपासध्वं, तदन्ते शृणुतागमम् । साधुसाधर्मिकान्नित्यं, सन्मानयत सादरम् ॥८२॥
दीनादिभ्यो यथाशक्त्या, कृपादानं प्रयच्छत । सामायिकशुभध्यान-स्वाध्यायाध्ययनादिकम् ॥८३॥
विधत्त सदनुष्ठानम्, सर्वदा शुद्धभावतः । पालयतामलं शीलं, भावयत सुभावनाः ॥८४॥
रागद्वेषादिशत्रूंश्च, विध्वंसयत यत्नतः । सन्त्यजत महाकष्टान्, महारम्भपरिग्रहान् ॥८५॥
विमुञ्चत तथा सङ्गं, कामभोगेषु दूरतः । नित्यं भवत भो लोकाः!, सर्वथा धर्मतत्पराः ॥८६॥
यतो भगवताऽरिष्ट-नेमिना सर्वनाशिता । कथितास्या महापुर्याः, सममेवाखिलैर्जनैः ॥८७॥
अत्रान्तरे क्रमेणैव, विहरन्नेमितीर्थपः । रैवतके समागत्य, समवसृतवानिति ॥८८॥
ततश्च यादवाः सर्वे, वन्दनार्थं समागताः । प्रणम्य नेमिनाथं ते, निषण्णाः स्वस्वभूमिषु ॥८९॥
संसारासारतासारा, जिनेनाकारि देशना । तां च श्रुत्वा भवावासा-न्निर्विण्णाः भोगनिःस्पृहाः ॥९०॥
प्रद्युम्नशुकशाम्बाद्या, भूयांसो राजदारकाः । समीपे नेमिनाथस्य, प्रव्रज्यां प्रतिपेदिरे ॥
अथ पूर्वभवोत्त्रस्ता, रुक्मिण्यपि जनार्दनम् । एवं भणितुमारब्धा, यथा भो भो नराधिप ! ॥९२॥
शिष्टा परिणतिस्ताव-दीदृशी जिननेमिना । संसारस्यास्य निःशेष-यादवानां विशेषतः ॥९३॥
तन्मां विसर्जयस्व त्वं, प्रव्रजामि जिनान्तिके । ततो बाष्पाम्बुपूर्णाक्षो,वासुदेवोऽपि रुक्मिणीम् ॥९४॥
कष्टाद्विसर्जयामास, ततः सापि महर्द्धितः । प्राव्राजीच्च सहान्याभी, राजपुत्रीभिरञ्जसा ॥९५॥
ततः शोकातुराः सर्वे, वासुदेवादियादवाः । प्रविष्टा नगरीमध्ये, चिन्तयन्तो भवस्थितिम् ॥९६॥
वासुदेवोऽपि चात्मानं, पुरमन्तःपुरं तथा । सर्वं शून्यमिवामंस्त, रुक्मिणीविरहातुरः ॥९७॥
अथ नेमिर्गतोऽन्यत्र, भव्यप्रबोधहेतवे । कृष्णोऽपि घोषणां पुर्यां, भूयोऽप्येवमचीकरत् ॥९८॥
यथा भो भो जनाः पौराः, परित्यजत सर्वथा । प्राणिहिंसां मृषावाद-मदत्तादानमैथुनम् ॥९९॥
सर्वं परिग्रहं चैव, सर्वं च रात्रिभोजनम् । क्रोधं मानं च मायां च, लोभं दुर्गतिवर्धनम् ॥१००॥
रागं द्वेषं कलिं चाभ्या-ख्यानं रत्यरतिं तथा । सर्वं परपरिवादं, सर्वं पैशून्यमेव च ॥१०१॥
सर्वां मायां मृषां चैव, मिथ्यादर्शनशल्यकम् । कुरुध्वं सर्वदाक्षिण्यं, धर्मं किमु बहूदितैः ॥१०२॥
षष्ठाष्टमादिरूपं च, तपध्वं दुष्करं तपः । जिनेन्द्रसाधुपूजां च, सम्पादयत सादरम् ॥१०३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तैरपि कर्तुमारब्धं, तत्तथैवाखिलं जनैः । सोत्साहं सविशेषं च, संसारभयभीरुभिः ॥१०४॥
अन्यदा द्वारिकावत्या, नाशे कृतनिदानकः । कृत्वा बालतपस्तीव्रं, द्वीपायनोऽतिदुर्मतिः ॥१०५॥
मृत्वा चाग्निकुमारेषु, समुत्पन्नो महासुरः । स्मृतं च तेन तद्वैरं, रौद्रं यादवनाशकम् ॥१०६॥
ततोऽसौ द्वारिकावत्या, विनाशार्थमुपागतः । न च कर्तुं पुरीभङ्गं, रुष्टोऽपि शशाक सः ॥१०७॥
यतस्तत्र जनस्तीव्रं, तपःकर्म करोत्यलम् । देवानां च गुरूणां च, विधत्ते परिपूजनम् ॥१०८॥
वैराग्यभावनारूढः, स्वाध्यायध्यानतत्परः । प्रकरोति प्रयत्नेन, धर्मकर्माणि सर्वदा ॥१०९॥
अतो द्वीपायनः पापः, पुरीलोकस्य तस्य सः । विधातुं शक्नुते नैव, सुरुष्टोऽपि पराभवम् ॥११०॥
ततश्चातीवकोपान्ध-श्छिद्रान्वेषी निरन्तरम् । अन्तरिक्षे भ्रमन्नास्ते, बद्धामर्षः पुरीं प्रति ॥१११॥
तावद्यावदतीतानि, वर्षाणि द्वादशापि हि । न चैव द्वारिकावत्या, भङ्गं कर्तुं शशाक सः ॥११२॥
ततोऽचिन्ति जनैनैवं, जजल्पे च परस्परम् । अहो भ्रष्टप्रतिज्ञोऽयं, निरोजा निष्प्रभोऽजनि ॥११३॥
अहो नष्टो विनष्टोऽयं, लोके धर्मपरे सति । निर्विण्णः खिन्नचित्तश्च, गतोऽसौ क्वापि दुर्मतिः ॥११४॥
एवमालोच्य तत्रत्यः, सानन्दो निर्भयो जनः । नानाक्रीडाभिरत्यर्थं, प्रक्रीडितुं प्रचक्रमे ॥११५॥
मत्तो गायंश्च नृत्यंश्च, पपौ कादम्बरीं सुराम् । ततः सोऽपि समासाद्य, छिद्रं द्वीपायनोऽधमः ॥११६॥
उत्पातकशतान्युच्चै-स्तत्रानेकानि जज्ञिरे । ततो द्वीपायनः पापो, वातं संवर्तकाभिधम् ॥११७॥
कल्पान्तवातसङ्काशं, सर्वतोऽपि विमुक्तवान् । ततः प्रज्वालयामास, सर्वतस्तां महापुरीम् ॥११८॥
प्रक्षिप्तवांस्तदन्तश्च, तृणकाष्ठादिकं बहु । नश्यल्लोकाननेकांश्च, तिरश्चश्च गवादिकान् ॥११९॥
संवर्त्यावर्त्य तत्रैव, प्रचिक्षेप स दुर्मतिः । प्रादुर्भूतस्ततो रौद्रो, हाहारवो दिशोदिशि ॥१२०॥
हस्त्यश्वादितिरश्चां च, जनानां च सुदारुणः । ततश्च स्यन्दने रम्ये, आरोप्य पितरौ निजौ ॥१२१॥
द्वितीये तु रथे शीघ्रं, रोहिणीं देवकीं तथा । पुर्या निर्गन्तुमारब्धौ, प्रेरिताश्च किशोरकाः ॥१२२॥
यावद्गन्तुं क्षमा नाश्वा, वह्निज्वालाकरालिताः । तावत्तौ स्वयमाक्रष्टु-मारब्धौ निजकैर्भुजैः ॥१२३॥
नीतौ च गोपुरद्वारे, ताभ्यां कृच्छ्रेण तौ रथौ । संरुद्धाविन्द्रकीलेन, निर्गच्छन्तौ च गोपुरात् ॥१२४॥
तं चूर्णयति पादेन, यावद्रामो महारुषा । तावच्च सर्वतस्तत्तु, प्रतोलीमुखमुच्चकैः ॥१२५॥
सम्प्रज्वलितुमारब्धं, दूरं दारुणवह्निना । अत्रान्तरे जगादैवं, द्वीपायनोऽधमासुरः ॥१२६॥
यथा भो रामगोविन्दौ !, पूर्वमेव मयोदितम् । विमुक्तिर्युवयोरेव, नैवान्यस्य शुनोऽपि हि ॥१२७॥
एतस्या द्वारिकावत्या, दुरन्ते दाहसम्भ्रमे । ततश्च वासुदेवेन, पादेनाहत्य पातितम् ॥१२८॥
कपाटमेककं भूमौ, रामेण तु द्वितीयकम् । अत्रान्तरे तु रोहिण्या, देवक्या च प्रजल्पितम् ॥१२९॥
यथा भो पुत्रकौ ! वत्सौ !, स्वकुलानन्दकारकौ ! । युवाभ्यामिह जीवद्भ्यां, यादवानां समुन्नतिः ॥
भविष्यति ततो भद्रौ, निर्गम्यतामितः पुरः । ततस्तौ मातृवाक्येन, रुदन्तौ शोकविह्वलौ ॥१३१॥
वाक्याम्बुबिन्दुसन्दोह-सिक्तश्यामनिजाननौ । निर्गत्य बाह्यतो भग्न-काननस्थौ प्रपश्यतः ॥१३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरीं ज्वलद्धुताशेन, दह्यमानां समन्ततः । [दह्यमानजनाराव-कोलाहलसमाकुलाम्] ॥१३३॥
अथ द्वीपायनेनापि, विधाय सकलान्यपि । द्वाराणि ज्वालिता प्रोच्चैः, समन्ताद् द्वारिकावती ॥१३४॥
इतश्च बलभद्रस्य, कुब्जवाराभिधाङ्गजः । शोकातुरः समारुह्य, निजप्रासादमूर्धनि ॥१३५॥
एवं ब्रूते यथा भो भो, आकर्णयत देवताः ! । अहं हि नेमिनाथस्य, शिष्यः सम्प्रति संयतः ॥१३६॥
निर्ममो निरहङ्कारो, निःसङ्गो निष्परिग्रहः । निवृत्तः सर्वपापेभ्यः, सर्वभूतदयापरः ॥१३७॥
तदहो यदि वचः सत्यं, श्रीमन्नेमेः सुनिश्चितम् । ततश्चरमदेहोऽहं, निर्दिष्टोऽरिष्टनेमिना ॥१३८॥
मया च किल गन्तव्यं, मोक्षे प्रक्षीणकर्मणा । इदं चाकाण्ड एवेह, दृश्यते मृत्युकारणम् ॥१३९॥
तत्किं नेमिजिनस्यापि, सद्भूतार्थप्रवादिनः । भवितालीककं वाक्यं?, तेनैवं जल्पिते सति ॥१४०॥
उत्पाट्य जृम्भकैर्देवै-र्देशे पल्हवनामनि । नीतो नेमिजिनस्यान्ते, स शीघ्रं कुब्जवारकः ॥
कृष्णस्य च सहस्राणि, देवीनां किल षोडश । पादपोपगमं मृत्युं, सम्यग्भावेन चक्रिरे ॥१४२॥
तथा यादवरामाभिः, प्रभूताभिस्तदा किल । पादपोपगमं चक्रे, भीताभिर्वह्निदाहतः ॥१४३॥
एवं द्वासप्ततिश्चैव, षष्टिश्च कुलकोटयः । द्वीपायनेन पापेन, दग्धास्तत्र महापुरि ॥१४४॥
षड्भिश्च किल तां मासै-र्नगरीं निर्ददाह सः । पुनश्च प्लावयामास, सलिलैः पश्चिमोदधिः ॥१४५॥
अथोक्तो हरिणा रामो, शोकातुरेण चेतसा । रामेयमावयोः कीदृक्, सञ्जाता विषमा दशा ॥१४६॥
विप्रयुक्ता वयं सर्वैः, पुत्रमित्रादिभिर्निजैः । तदहो कुत्र गच्छामो ?, यूथभ्रष्टा मृगा इव ।१४७॥
रामेणोक्तमथास्माकं, सन्ति सुस्निग्धबान्धवाः । पाण्डुपुत्राः सदाचाराः, सत्यविक्रमशालिनः ॥
तेषां च दक्षिणाम्भोधि-संस्थितां मथुरां पुरीम् । गच्छामः किं विलम्बेन ?, ततः प्राह जनार्दनः ॥
द्रौपद्यानयनं राम !, कुर्वता मयका तथा । सर्वस्वहरणं कृत्वा, निर्भर्त्स्य च कटूदितैः ॥१५०॥
निष्काशितास्तदा काले, रोषात्स्वदेशतोऽपि ये । तेषां समीपके भ्रातः !, प्रगन्तुं शक्यते कथम् ? ॥
ततश्चाभाणि रामेण, कृष्णैते पाण्डुपुत्रकाः । सत्यवन्तः सदाचाराः, सारविक्रमशालिनः ॥१५२॥
अस्माकमेव विस्तीर्ण- कुले जाता नरोत्तमाः ॥१५२॥
ते पराभवबुद्ध्याऽऽवां, न द्रक्ष्यन्ति कदाचन । एवमेतदिति प्रोक्तं, हरिणा हलिनं प्रति ॥१५३॥
ततो गन्तुं प्रवृत्तौ तौ, पादचारेण सत्वरम् । शोकाविष्टौ समाश्रित्य, दिशं प्राचीनदक्षिणाम् ॥१५४॥
[१]चलन्तौ तौ क्रमेणाथ स्मरन्तौ च निजां पुरीम् । सौराष्ट्रदेशमुल्लङ्घ्य, सम्प्राप्तौ च क्रमादमू ॥१५५॥
हस्तिकल्पे पुरे तस्य, बाह्योद्याने च तस्थतुः । उक्तश्च हरिणा रामो, यथाद्य मां क्षुधातृषे ॥
बाधेते भ्रातरत्यर्थं, ततो रामोऽब्रवीदिदम् । एष गच्छाम्यहं शीघ्रं, तव भक्ताम्बुहेतवे ॥१५७॥
त्वयकाप्यप्रमत्तेन, स्थेयं कृष्णात्र कानने । यदि चात्र पुरे कश्चि-दपायो मे भवेदहो ॥१५८॥
कुर्वेऽहं सिंहनादं भो, तदातित्वरितं त्वया । समागन्तव्यमित्युक्त्वा, पुरमध्ये गतो हली ॥१५९॥

१ गृहमानौ शरीरातां - BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र च धृतराष्ट्रस्य, पुत्रो राजाच्छदन्तकः । [राज्यं करोति गर्विष्ठो, यादवानां रिपुर्ध्रुवम्] ॥
श्रीवत्सं निजवस्त्रेण, समाच्छाद्य ततो बलः । प्रविष्टः पत्तने तत्र, प्रकृत्या सुन्दराकृतिः ॥१६१॥
जनोल्लापश्च तत्राभू-द्यथाऽहो द्वारिकावती । औत्पातिकाग्निना दग्धा, हरिरामौ च निर्गतौ ॥१६२॥
ततस्तं सीरिणं दृष्ट्वा, सच्छायं प्रांशुविग्रहम् । अद्भुतरूपलावण्यं, जगादैवं जनो मिथः ॥१६३॥
अहो रूपमहो कान्ति-रहो देहप्रमाणता । एवं संश्लाघ्यमानोऽसौ, कुल्लुरिकापणं ययौ ॥१६४॥
गृहीतं च वरं भक्ष्यं, दत्त्वाङ्गुलीयकं निजम् । वारुणीं चातिसुस्वादां, हस्तकङ्कणदानतः ॥१६५॥
ततो निर्गन्तुमारब्धः, प्राप्तश्च गोपुरान्तिकम् । इतश्चारक्षकैः पुंभिः-र्गत्वा राज्ञे निवेदितम् ॥१६६॥
राजन् कश्चिन्नरः प्रांशु-सुन्दराकारधारकः । बलभद्रानुकारी च, विशालोदारमानसः ॥१६७॥
दत्त्वाऽङ्गुलीयकं स्वीयं, महार्घ्यं कटकं तथा ॥१६७A॥
गृहीतपानभक्तोऽसौ, निर्याति नगरान्ननु । श्रुत्वेदमच्छदन्तेन, शीघ्रमेव निजं बलम् ॥१६८॥
सम्प्रेषितं प्रवृत्तं च, प्रयोद्धुं हलिना सह । कृताह्वाननसञ्ज्ञा च, वासुदेवस्य सीरिणा ॥१६९॥
स्वयं भक्तं च पानं च, मुक्त्वैकत्रातिवेगतः । प्रत्यासन्नं समारुह्य, हस्तिनं तद्बलं ततः॥१७०॥
सञ्चूर्णयितुमारब्धः, केसरीव मृगव्रजम् । अथ त्वरितमागत्य, केशवोऽप्यतिरोषतः ॥१७१॥
भङ्क्त्वा द्वारकपाटानि, गृहीत्वा च महार्गलाम् । अच्छदन्तबलं सर्वं, सञ्चूर्ण्येदमभाषत ॥१७२॥
रेरे मूढ ! महापाप !, दुराचाराच्छदन्तक! । किमस्माकं गतं क्वापि, बलं शारीरमप्यहो ? ॥१७३॥
ततो भुङ्क्ष्व निजं राज्यं, भुक्तास्माभिरियं स्थितिः । इत्युक्त्वा तौ गतौ रम्यो-द्याने नानाद्रुमाकुले ॥
अश्रुपातं च कुर्वन्तौ, स्मृत्वा पूर्वां निजस्थितिम् । कृत्वार्हतां नमस्कारं, भक्तिसारं कृताञ्जली ॥१७५॥
तद्भक्तं भोक्तुमारब्धौ, चिन्तयन्तौ च ताविदम् । अहो तथा तदा भुक्त्वा-ऽधुनेत्थमपि भुज्यते ॥१७६॥
अहो बाढं क्षुधातृष्णे, दुर्धरे देहिनां सदा । किञ्चिद्भुक्त्वा च पीत्वा च, कृत्वा चाचमनक्रियाम् ॥
दक्षिणाभिमुखं गन्तुं, प्रवृत्तौ रामकेशवौ । सम्प्राप्तौ च महारण्यं, कोसम्बवननामकम् ॥१७८॥
ततः सलवणाहारा-न्मद्यपानात्पथि श्रमात् । ग्रीष्मकालाच्च शोकाच्च, पुण्यानां क्षयतस्तथा ॥१७९॥
वासुदेवः परिश्रान्तो, बाध्यते तृष्णयाधिकम् । उक्तं चानेन भो राम !, शुष्यत्यास्यं तृषा मम ॥१८०॥
नैवाहं सर्वथा शक्तो, गन्तुं यावज्जलाशयम् । रामेणोक्तं महाभाग !, मम हृदयातिवल्लभ ! ॥१८१॥
त्वमत्र तिष्ठ विश्राम्यन्, छायायामस्य शाखिनः । ततः कौशेयवस्त्रेण, समाच्छाद्य निजां तनुम् ॥१८२॥
जानूपरि निधायाङ्घ्रिम्, तत्र सुष्वाप केशवः । उक्तश्च रामदेवेन, हे हे हृदयवल्लभ ! ॥१८३॥
स्थातव्यमप्रमत्तेन, तावदत्र त्वया क्षणम् । स्वच्छामलं जलं याव-च्छीघ्रमेवानयाम्यहम् ॥१८४॥
भ्रातृस्नेहाच्च तेनैवं, भणिता वनदेवताः । यथायं मे प्रियो भ्राता, युष्माकं शरणागतः ॥१८५॥
रक्षणीयः प्रयत्नेन, भणित्वैवं जगाम सः । अत्रान्तरे महाव्याध-वेषधारी सुभीषणः ॥१८६॥
व्याघ्रचर्मावृताङ्गश्च, चापव्यग्रकरस्तथा । इतश्चेतः परिभ्राम्यन्, मृगघातचिकीर्षया ॥१८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स जरत्कुमारकोऽकस्मा-दायातः केशवान्तिकम्। तेन चारोप्य कोदण्ड-माकृष्य निशितं शरम् ॥१८८॥
दूरादेव कुरङ्गोऽयं, तिष्ठतीति विमर्षतः । विद्धः पादतले मर्म-देशे तेन जनार्दनः ॥१८९॥
स चोत्थायातिवेगेन, जल्पितवानिदं वचः । अहो पादतले केन, प्रविद्धोऽहं विनाऽऽगसा ॥१९०॥
अविज्ञातकुलः कोऽपि, न मया हतपूर्वकः । तस्मात्कोऽयं समाख्यातु, स्वं गोत्रं त्वरितं मम ॥१९१॥
ततो जरत्कुमारोऽपि, कुड्मान्तरिताङ्गकः । व्यचिन्तयद्यथा नैष, मृगः किन्तु पुमानयम् ॥१९२॥
मां [च] सम्पृच्छते गोत्रं, तदस्मै कथयाम्यहम्। श्रूयतां भो समाख्यामि, निजं गोत्रं च नाम च ॥१९३॥
अहं हि हरिवंशोत्थ-वसुदेवस्य नन्दनः । आत्मजश्च जराद्देव्या, ज्येष्ठभ्राता हरेस्तथा ॥१९४॥
नाम्ना जरत्कुमारोऽहं, श्रुत्वा नेमेरिदं वचः । यथा भावी हरेर्मृत्युः, पार्श्वाज्जरत्कुमारतः ॥१९५॥
आकर्ण्येदं परित्यज्य, बन्धुवर्गं निजं ततः । वनाद्वनान्तरं प्रोच्चै-रेवं परिभ्रमाम्यहम् ॥१९६॥
समाश्च द्वादशातीता, अथाख्यातु भवानपि। कस्त्वं किमभिधानश्च ?, ततः कृष्णोऽब्रवीदिदम् ॥१९७॥
आगच्छाऽऽगच्छ भो भ्रातः !, स एवाहं जनार्दनः । कनिष्ठकस्तव भ्राता, रामस्यापि तथैव च ॥१९८॥
त्वं चैवं मम रक्षार्थं, महाटव्यामटस्यहो । यावच्च सर्वथा जातो, निष्फलोऽयं परिश्रमः ॥१९९॥
तदेहि भ्रातरित्युक्ते, सोऽपि शीघ्रं समागतः । कृष्णोऽयमिति मन्वान-स्तथास्थं तं च दृष्टवान् ॥२००॥
ततो बाष्पाम्बुपूर्णाक्षः, प्रलापानकरोदसौ । हाहा हतो दुरात्माहं, निजबान्धवघातकः ॥२०१॥
को वा मां भ्रातृहन्तारं, द्रष्टुमपीह शक्ष्यति । इत्थं नानाविधानुच्चैः, प्रविधाय प्रलापकान् ॥२०२॥
गोविन्दमतिशोकार्त्तो, जगाद गद्गदस्वरम् । कुतस्त्वं भो इहायातः !, किमेकाकी च दृश्यसे ? ॥२०३॥
किं वा द्वीपायनः पापो, ददाह द्वारिकावतीम् ? । नष्टा न वेति भो सर्वे, यादवा वह्निसम्भ्रमात् ॥२०४॥
ततः कृष्णो यथा दृष्टं, तस्मै सर्वं न्यवेदयत् । अथ जरत्कुमारोऽपि, विलपन्नेवमभ्यधात् ॥२०५॥
अहो अद्य मया चक्रे, आतिथ्यमीदृशं हरेः । तदहं कुत्र गच्छामि ?, कस्मै चेदं निवेदये ? ॥२०६॥
स्वभ्रातुर्घातकं को वा, मामीक्षितुमपि शक्ष्यति । इत्यादि प्रलपन्नुच्चैः, साश्रुः शोकसमाकुलः ॥२०७॥
संस्थाप्य कोमलालापैः, स एवं हरिणोदितः । अहो शोकं त्यजाऽऽदाय, मम वक्षःस्थलादिमम् ॥२०८॥

मणिं कौस्तुभनामानं, गच्छ त्वं पाण्डवान्तिकम् ।
वृत्तान्तश्चायमाख्येय-स्तेभ्यः सर्वः सविस्तरः ॥२०९॥

भणितव्याश्च ते सम्यग्, मद्वचनेन साञ्जसम् । यथा भो यत्तदा काले, गङ्गायाः सरितस्तटे ॥२१०॥

द्रौपदीं धातकीखण्डा-न्मयकानयता तथा ।
निर्भर्त्सिताः खरैर्वाक्यैः, सञ्चूर्णितास्तथा रथाः ॥२११॥

स्वदेशतः समस्तांश्च, यन्निर्वास्य विराधिताः । युष्माभिस्तन्ममाशेषं, क्षन्तव्यं सर्वथापि हि ॥२१२॥
यथा क्षमाप्रधाना हि, भवन्ति पुरुषोत्तमाः । युष्मादृशो विशेषेण, नितान्तस्निग्धबान्धवाः ॥२१३॥
शूराः सत्यप्रतिज्ञाश्च, कृतज्ञा बन्धुवत्सलाः । महात्मानः सदा चैव, परोपकृतिकर्मठाः ॥२१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गच्छेदानीमितः स्थाना-दित्युक्तोऽपि स विष्णुना । यदा नैवेहते गन्तुं, तदा भूयोऽप्यभाणि सः ॥
गच्छ गच्छामुतः शीघ्रं, मा मा वत्स ! विलम्बय । जानासि चैव रामस्य, स्नेहवत्त्वं ममोपरि ॥
पानीयार्थं गतो राम, एष आगच्छति ध्रुवम् । दृष्ट्वा चैवमवस्थं मां, भद्र ! त्वां मारयिष्यति ॥
ततो बाणं समुद्धृत्य, शीघ्रं पादतलादसौ । गतस्तेनैव मार्गेण, कृच्छ्राज्जरत्कुमारकः ॥२१७॥
ततश्च वासुदेवोऽपि, वेदनातुरमानसः । कर्तुं पञ्चनमस्कारं, प्रारब्धः शुद्धचेतसा ॥२१८॥
प्रणम्य चार्हतः सर्वान्, त्रैलाक्यार्चनमर्हतः । सिद्धांश्च परमानन्द-समृद्धान् प्रणमाम्यहम् ॥२१९॥
आचार्यान् पञ्चधाचार-धारकान्नौमि भक्तितः । स्वाध्यायध्यानतन्निष्ठा-नुपाध्यायान् प्रणौम्यहम् ॥
नमामि सर्वसाधूंश्च, धर्मकर्मप्रसाधकान् । नमः श्रीनेमिनाथाय, त्रैलोक्यहितकारिणे ॥२२१॥
यः सर्वसङ्गमुत्सृज्य[1] विनिष्क्रान्तो महामुनिः । एवं कृतप्रणामोऽसौ, परं संवेगमागतः ॥२२२॥
संस्तीर्य तृणसंस्तारं, देहमाच्छाद्य वाससा । सुप्तो दृष्ट्वा निजावस्थां, चिन्तयामास मानसे ॥२२३॥
धन्याः प्रद्युम्नशाम्बाद्याः, सर्वे शेषाश्च यादवाः । धन्यास्ते पौरलोकाश्च, निष्क्रान्ता ये जिनान्तिके ॥
ताश्च धन्यतरा देव्यो, रुक्मिण्याद्या मनःप्रियाः । याः सर्वसङ्गमुत्सृज्य, नेम्यन्ते जगृहुर्व्रतम् ॥२२५॥
अहं त्वीदृशदुःखानि, वेदयाम्यत्र कानने । अकृत्वैव हितं कर्म, प्रिये बन्धुविवर्जितः ॥२२६॥
एवं विचिन्तयन् मृत्वा, तृतीयायां गतः क्षितौ । जातश्च नारकत्वेन, बद्धायुः कर्मयोगतः ॥२२७॥
अथ रामोऽपि वेगेन, समादायामलं जलम् । आयातो वार्यमाणोऽपि, शकुनैर्विपरीतकैः ॥२२८॥
दृष्टश्च केशवस्तेन, शयानो दीर्घनिद्रया । अहो श्रान्तः स्वपित्येष, शेतां तावत्क्षणान्तरम् ॥२२९॥
पश्चादस्मै विबुद्धाय, दास्यामीदमहं जलम् । अतिस्नेहाकुलत्वाच्च, न जानाति यथा मृतः ॥२३०॥
एवं विकल्पयन् रामः, प्रतीक्ष्य क्षणमेककम् । हरिं विलोकयामास, मक्षिकापटलान्वितम् ॥२३१॥
दृष्ट्वा च तादृशं भीतो, हा हतोऽस्मीति सञ्जिरन् । मुखाद्वस्त्रं समुत्तार्य, यावत्सम्यग् निरीक्षते ॥२३२॥
तावद् दृष्टो मृतावस्थो, बीभत्सो हलिना हरिः । ततश्च मूर्च्छया भूमौ, सहसैव पपात सः ॥२३३॥
लब्ध्वाऽथ चेतनामुच्चैः, सिंहनादं प्रमुक्तवान् । यथा कम्पितुमारब्धं, तद्वनं श्वापदाकुलम् ॥२३४॥
ऊचे चैवं यथा भो भो, भ्राता येन हतो मम । सत्यं यदि भटः कोऽपि, स मे यच्छतु दर्शनम् ॥२३५॥
कथं वा मुच्यते घातः ?, सुप्तप्रमत्तकादिषु । एवमादि रटन्नुच्चै-र्वने भ्रान्त्वा समन्ततः ॥२३६॥
भूयोऽपि चागतो रामो, वासुदेवस्य सन्निधौ । रोदितुं च समारब्धो, नानाकारं महारवैः ॥२३७॥
हा गुणाकर ! हा वीर !, हा भ्रातर्हा जनार्दन ! । हा यादवकुलानन्द !, हा मे हृदयवल्लभ ! ॥२३८॥
किं ते रोदिमि भो बन्धो !, वीरत्वं विक्रमं बलम् । सौभाग्यं [2]सौहृदं रूपं, किं वाद्भुतामुदारताम् ? ॥२३९॥
किमन्य इव सञ्जातो, न दत्से येन मे वचः ? । किमेकाकी करोम्यद्य ?, जनार्दन ! त्वया विना ॥२४०॥
तदहं कुत्र गच्छामि ?, कं वा पृच्छामि साम्प्रतम् ? । कं चेहोपालम्भे लोकं, कं वा शरणमाश्रये ? ॥

१ °मुत्सृष्ट-BJC ॥ २ सौहृदयं-BC । सुहृदयं-J ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्मै वापि च रुष्यामि ?, किं मरणमुपेम्यहो ? । समाप्तः सर्वथैवायं, जीवलोको ममाधुना ॥२४२॥
इत्थं प्रलपतस्तस्य, भास्वानस्तगिरौ गतः । क्रमात्प्रसारितध्वान्ता, रजनी च समागता ॥२४३॥
ततो विशेषतो राम-श्चक्रन्दे मोहमोहितः । आक्रन्दसङ्कुलं कुर्वन्, समग्रं तदरण्यकम् ॥२४४॥
ततः प्रभातकाले च, वियोगमसहन्नसौ । स्वस्कन्धे च समारोप्य, कुर्वन्नानाप्रलापकान् ॥२४५॥
बभ्राम सर्वतस्तत्र, नानावृक्षकुले वने । नदीगिरिनिकुञ्जेषु, गुहासु विवरेषु च ॥२४६॥
इत्थं च भ्राम्यतस्तस्य, वर्षाकालः समागतः । अत्रान्तरे च रामस्य, सिद्धार्थाभिधसारथिः ॥२४७॥
पूर्वव्यावर्णितो यस्तु, तपः कृत्वा दिवं गतः । स देवोऽवधिना ज्ञात्वा, भ्राम्यन्तं हलिनं तथा ॥२४८॥
स्वचित्ते चिन्तयत्येव-महो स्नेहानुरागिता । अहो मोहस्य माहात्म्य-महो कर्मविचित्रता ॥२४९॥
येनायं वोढुमारब्धो, जीवमुक्ततनुं हरिम् । तद्गत्वा बोधयाम्येनं, बान्धवं बन्धुवत्सलम् ॥२५०॥
तत आगत्य देवेन, पुमानेको विकुर्वितः । उत्तारयन् गिरेर्दुर्गा-ज्जीर्णप्रायं महारथम् ॥२५१॥
स पुनः स्यन्दनस्तस्मि-न्नितश्चेतः स्खलन्नपि । न भग्नः पर्वते दुर्गे, गण्डशैलसमाकुले ॥२५२॥
समं च भूतलं प्राप्य, जगाम शतखण्डताम् । ततोऽसौ पुरुषस्तानि, दारूण्यादाय योजयन् ॥२५३॥
रामेणोक्तो महाभद्र !, यो न भग्नो गिरावपि । [1]भग्नस्त्वत्र च तं मुग्ध !, कथं सन्धातुमिच्छसि ? ॥२५४॥
देवः प्राह यथा भो भो, य एष किल केशवः । भूरियुद्धसहस्रेषु, युद्ध्यमानोऽपि नो मृतः ॥२५५॥
विनापि सोऽधुना युद्धं, मृतः सुप्तोऽत्र कानने । जीविष्यति यदा चैष, स्कन्धारूढस्तवानुजः ॥२५६॥
तदा रथोऽप्ययं भद्र !, भविष्यति पुनर्नवः । ततस्तूष्णीक एवाशु, हली गन्तुं प्रचक्रमे ॥२५७॥
देवेन रोपयन् भूयः, शिलापट्टेषु पद्मिनीः । विकुर्वितः पुमानेको, रामेणैवमवाचि सः ॥२५८॥
कथं शिलासु पद्मिन्यो, मुग्ध ! रोहन्ति रोपिताः । सुरः प्राह तव भ्राता, जीविष्यति यदाचल ! ॥२५९॥
पद्मिन्योऽपि तदैवैता, रोहिष्यन्ति न संशयः । ततश्च मौनवृत्त्यैव, गच्छता हलिनाऽग्रतः ॥२६०॥
दृष्ट एको नरः स्थाणु-कल्पं तिन्दुकिनीद्रुमम् । दग्धं वनं हुताशेन, सिञ्चन् वारिभृतैर्घटैः ॥२६१॥
ततो रामस्तकं प्राह, भद्रायं दग्धपादपः । कदा संसिच्यमानोऽपि, पुनर्मोक्ष्यति पल्लवान् ॥२६२॥
देवेनोक्तं यदा काले, त्वदीयस्कन्धसंस्थिते[2] । एतस्मिन् मृतके व्यक्तं, चैतन्यं प्रभविष्यति ॥२६३॥
ततः स्तोकान्तरं याव-द्गतस्तावद्विलोकितः । ददन्नीलतृणव्रातं, गोपो गवां करोटिषु ॥२६४॥
स उक्तो बलदेवेन, यथास्थिशेषा इमाः कदा । जीविष्यन्ति पुनर्गावो, दत्तैर्नीलतृणैरपि ॥२६५॥
देवेनाभाणि भो मुग्ध !, यदैष तव बान्धवः । जीविष्यति मुरारति-र्लब्धसुव्यक्तचेतनः ॥२६६॥
श्रुत्वेदं लब्धसञ्ज्ञेन, रामेणैवं प्रजल्पितम् । किमेष मामको भ्राता, सत्यं सम्प्राप्तपञ्चताम् ? ॥२६७॥
येनैवं कोऽपि मामत्र, वने बोधयते नरः । अथ देवोऽपि सिद्धार्थ-रूपं कृत्वाऽब्रवीदिदम् ॥२६८॥
सोऽहं भो भो ! तव भ्राता, राम ! सिद्धार्थनामकः । यः प्राचीनभवेऽभूवं, सारथिस्ते महारथ ! ॥२६९॥

१ भग्नश्चात्र तं-BJC । २ °स्थितं-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीमतो नेमिनाथस्य, प्रसादेन सुरोऽभवम् । उक्तश्चाहं त्वया पूर्वं, यथा भो प्राणवल्लभ ! ॥२७०॥
त्वयाहमापदि क्वापि, सम्बोध्यः सर्वयत्नतः । ततोऽहमागतो राम !, त्वत्प्रतिबोधहेतवे ॥२७१॥
स चायं प्रतिबोधस्य, कालः सम्प्रति वर्तते । यथोक्तं स्वामिना पूर्वं, यथा जरत्कुमारकात् ॥२७२॥
हरेः सम्पत्स्यते मृत्यु-स्तथैव च बभूव भोः । श्रुत्वेदं हलिना प्रोक्तं, कदा पुनर्जनार्दनः ॥२७३॥
भद्र ! जरत्कुमारेण, व्यापादितस्ततः सुरः । आचख्यौ सर्ववृत्तान्तं, हरिव्यापादनादिकम् ॥२७४॥
तावद्यावत्स कृष्णेन, पाण्डवानां समीपके । सम्प्रेषितः प्रियालाप-पूर्वं जरत्कुमारकः ॥२७५॥
ततः स्नेहात्समालिङ्ग्य, सिद्धार्थं हलिनोदितम् । यथा भोः किं मया कार्य-मिदानीं कथयस्व मे ॥२७६॥
देवः प्राह महाभाग !, सर्वसङ्गविवर्जनात् । सर्वज्ञोक्तविधानेन, कुरु श्रामण्यमुत्तमम् ॥२७७॥
संस्मर च जिनेन्द्रस्य, नेमेस्तानि वचांस्यहो । रामः प्राह करोम्येष, श्रामण्यं साधुसेवितम् ॥२७८॥
सुष्ठु दुःखविमोचिन्यो, नेमिवाचः स्मराम्यहम् । परं कुत्र नयिष्यामि, हरेरेतत्कलेवरम् ॥२७९॥
देवेन भाषितं राम !, नदीद्वितयसङ्गमे । मुक्त्वेदं पुष्पगन्धाद्यैः, सत्कुर्मः पूजयामहे ॥२८०॥
यतस्तीर्थकृतश्चक्र-वर्तिनो रामकेशवाः । पूजामर्हन्ति सर्वेऽपि, पूजिताश्च जनैः सदा ॥२८१॥
ततस्ताभ्यां द्वयोर्नद्योः, सङ्गमे पुलिने वरे । हरेर्देहमिमं[1] मुक्त्वा, पूजितं संस्कृतं तथा ॥२८२॥
अत्रान्तरे च रामस्य, स्वामिनारिष्टनेमिना । प्रव्रज्यासमयं ज्ञात्वा, विद्याधरश्च[2] सन्मुनिः ॥२८३॥
प्रेषितो बलदेवस्य, प्रव्रज्यादानहेतवे । आगतस्तन्न वेगेन, दीक्षां च हलिने ददौ ॥२८४॥
ततो भगवतोऽरिष्ट-नेमेर्वाक्यैस्तदा हली । परं संवेगमापन्न-स्त्रुटितः स्नेहजालकः ॥२८५॥
तुङ्गिकाभिधशैलस्य, शिखरे संवृतेन्द्रियः । एकाकी कर्तुमारब्ध-स्तपःकर्मसुदुष्करम् ॥२८६॥
सिद्धार्थोऽपि दृढं हृष्टः, प्राचीनस्नेहरज्जुभिः । रक्षंस्तमेव रामर्षिं, नित्यं तत्रैव तिष्ठति ॥२८७॥
तथा जरत्कुमारोऽपि, दक्षिणां मथुरां ययौ । दृष्टाश्च पाण्डवास्तेभ्यो, ढौकितः कौस्तुभो मणिः ॥
शिष्टं च द्वारिकावत्या, दाहलोकक्षयादिकम् । निःशेषं पाण्डुपुत्रेभ्य-स्तावद्यावदिहागतः ॥२८९॥
श्रुत्वेदं पाण्डवाः शोका-न्महाक्रन्दनपूर्वकम् । चक्रिरे मृतकृत्यानि, वर्षमेकं सुदुःखिताः ॥२९०॥
ततो जरत्कुमाराय, दत्त्वा राज्यश्रियं निजाम् । सर्वेऽपि प्रस्थिता गन्तुं, श्रीमन्नेमिजिनान्तिके ॥२९१॥
अत्रान्तरे जिनेन्द्रेण, नेमिना पाण्डवान्तिके । सम्प्रेषितश्चतुर्ज्ञानी, साधुसन्दोहसंयुतः ॥२९२॥
दीक्षार्थं पाण्डुपुत्राणां, धर्मघोषाभिधो मुनिः । प्रव्राजिताश्च ते तेन, साधुना सुविधानतः ॥२९३॥
ततो नेमिजिनस्यान्ते, गन्तुमारेभिरे च ते । षण्मासान्तं च षष्ठाद्यं, कुर्वन्तो दुष्करं तपः ॥२९४॥
यतस्ते तावदायाता, यावद् द्वादशभिः किल । योजनैर्वर्तते श्रीमान्, नेमिनाथो जिनेश्वरः ॥२९५॥
ततस्तैश्चिन्तितं चित्ते, परमानन्दनिर्भरैः । वयं नेमिजिनं प्रात-र्सन्द्रक्ष्याम[3]ः सुनिश्चितम् ॥२९६॥
तत्रैव गमिता रात्रिः, प्रभाते च श्रुतं तकैः । जनवादाद्यथा नेमि-रुज्जयन्ते शिवं गतः ॥२९७॥

---

१ °मिदं-BJC । २ °धरः सन्मुनिः- BJC ॥ ३ द्राक्षाम-BC । द्रक्षियामः J । ईक्षयामः मु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः शोकातिरेकेण, महादुःखौघदुःखिताः । गत्वा शत्रुञ्जये कृत्वा, पादपोपगमं च ते ॥२९८॥
मृत्वा च क्षीणकर्मांशा, गताः सर्वे शिवालयम् । तथा राजीमतीपार्श्वे, द्रौपदी विहितव्रता ॥
ब्रह्मलोकाभिधे कल्पे, महर्द्धिकः सुरोऽजनि । तथानेका गता देव्यो, रुक्मिणीप्रमुखाः शिवम् ॥३००॥
माता च नेमिनाथस्य, शिवादेवी दिवं गता । तथा नव दशाराश्च समुद्रविजयादयः ॥३०१॥
दाहे च द्वारिकावर्त्या, रोहिणी देवकी तथा । नरेशो वसुदेवश्च, त्रीण्यपि त्रिदिवं ययुः ॥
इतश्च बलदेवोऽपि, महर्षिस्तुङ्गिकाचले । घोराकारं तपः कुर्व-न्नास्ते संयमतत्परः ॥३०३॥
प्रायो मासार्धमासान्ते, काष्ठवाहिजनादितः । लब्धं पारयते शुद्धं, प्राशुकं भक्तपानकम् ॥३०४॥
तैस्तृणकाष्ठहाराद्यैः, शिष्टं गत्वा निजे पुरे । यथा कोऽपि तपस्तीव्रं, तप्यमानः सुदुष्करम् ॥३०५॥
आस्ते भोः ! तुङ्गिकाशैल-शिखरे सुन्दराकृतिः । ततस्तत्रत्यभूपालः, क्षोभेणैवं व्यचिन्तयत् ॥३०६॥
कश्चिन्मदीयराज्यार्थी, करोत्येवंविधं तपः । किञ्चिद्विद्याविशेषं वा, प्रसाधयितुमुद्यतः ॥३०७॥
तदहो ध्वंसयामस्त-मित्यालोच्य परस्परम् । लातनानायुधव्रात- सन्नद्धा बद्धवर्मिकाः ॥३०८॥
सद्यानवाहनारूढा, गता रामर्षिसन्निधौ । ततः सिद्धार्थदेवेन, बलदेवपदान्तिके ॥३०९॥
भीषणाः सिंहसङ्घाता, बीभत्समुखदंष्ट्रिकाः । विकुर्विता महारौद्राः, सुतीक्ष्णनखकोटयः ॥३१०॥
ततस्तं तादृशं दृष्ट्वा, भीतास्ते दूरतो नृपाः । प्रणम्य बलदेवर्षिं, स्वस्थानेषु द्रुतं गताः ॥३११॥
नरसिंह इति ख्यातिं, प्राप रामोऽपि भूतले । तस्य च तत्र शैलाग्रे, स्वाध्यायादि प्रकुर्वतः ॥३१२॥
तेन सुस्वरशब्देन, धर्मदेशनया तथा । आक्षिप्तमानसाः सन्तो, व्याघ्रसिंहमृगादयः ॥३१३॥
आटव्या बहवो जीवा, मुक्तवैरानुबन्धकाः । तिष्ठन्ति बलदेवस्य, समीपे शान्तचेतसः ॥३१४॥
केचन श्रावका जाताः, केऽपि भद्रकतां गताः । प्राप्ताश्चानशनं केऽपि, केचित्तपः प्रकुर्वते ॥३१५॥
तिष्ठतो गच्छतो वापि, कायोत्सर्गस्थितस्य च । मुक्तमांसादिभक्ष्याश्च, रामर्षिं पर्युपासते ॥३१६॥
ततश्चैको मृगःपूर्व-जन्मसम्बन्धतः किल । जातजातिस्मरोऽत्यन्तं, परं संवेगमागतः ॥३१७॥
यत्र यत्र बलो याति, भक्तपानादिकार्यतः । तत्र तत्र मृगः सोऽपि, परिभ्राम्यति मार्गतः ॥३१८॥
अन्यदा बलदेवर्षि-र्मासोपवासपारणे । भिक्षाकाले तु भिक्षार्थ-मेकत्र प्राविशत्पुरे ॥३१९॥
ददृशे एकया कूप-तटस्थतरुणस्त्रिया । ततश्च रामरूपश्री-क्षिप्तमानसया तया ॥३२०॥
कुम्भकण्ठं विमुच्यैव, भ्रान्त्या प्रादायि पाशकः । कटीतटात्समुत्तार्य, स्वशिशोरेव कण्ठके ॥३२१॥

ततोऽवतारितः कूपे, व्यलोकि [च] बलेन सः ।
निवारिता च सा बाला, यथा किं नेक्षसे शिशुम् ? ॥३२२॥

ततो रामोऽतिसंविग्नो, मनस्येवं व्यचिन्तयत् । अहो देहोऽपि मे प्राणि-वर्गस्यानर्थकारणम् ॥३२३॥
तदिदानीं न दृश्येऽहं, स्त्रीभिर्यत्र व्यवस्थितः । तत्रस्थेनैव सङ्ग्राह्या, भिक्षा नैवान्यथा मया ॥३२४॥
एवमभिग्रहं लात्वा, तस्मादेव प्रदेशतः । विनिवृत्त्य विनीतात्मा, तस्मिन्नेव वने गतः ॥३२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यदा चारुदारूणां, हेतवे रथकारकाः । समागता वने तत्र, छिन्दन्ति स्म महाद्रुमान् ॥३२६॥
अथ मासोपवासस्य, पारणे रामसन्मुनिः । प्रभोक्तुं च प्रवृत्तेषु, तेषु भिक्षार्थमागतः ॥३२७॥
शुष्कपत्रतृणाहारी, तस्त्रं मार्गानुलग्नकः । स मृगोऽपि समायात-स्तस्मिन्नेव प्रदेशके ॥३२८॥
ततोऽसौ राममालोक्य, वनच्छेदकनायकः । व्यचिन्तयद्यथाद्याहो, मम पुण्यमहोदयः ॥३२९॥
मरुस्थलेऽपि सम्प्राप्तो, मया कल्पमहीरुहः । सञ्जातोऽद्य कृतार्थोऽहं, पूर्णसर्वमनोरथः ॥३३०॥
येन ममैष भिक्षार्थं, महामुनिरिहागतः । तत्करोमि निजात्मानं, विगताखिलकल्मषम् ॥३३१॥
अस्मै भिक्षाप्रदानेन, साधुवृत्ताय साधवे । एवं विचिन्तयन् शुद्ध-शुभभावसमन्वितः ॥३३२॥
सम्भ्रान्तो बलदेवर्षिं, प्रणम्य विहिताञ्जलिः । विशुद्धयमानभावश्च, गृहीत्वा भक्तपानके ॥३३३॥
सद्भक्तिबहुमानाभ्यां, तस्मै दातुं समुद्यतः । द्रव्यक्षेत्रादिभिः शुद्धं, गृहीतं मुनिनापि तत् ॥३३४॥
ततश्च रथकारेण, पात्रदानप्रभावतः । सद्गतेर्योग्यताकर्म, निबद्धं भावशुद्धितः ॥३३५॥
मृगोऽपि पृष्ठतस्तिष्ठन्, सानन्दो रामसन्मुनेः । गुरौ गाढानुरागेण, बाष्पवारिप्लुतेक्षणः ॥३३६॥
रथकारे च संन्यस्त-मन्थरस्निग्धदृष्टिकः । निष्पन्दकर्णयुगश्च, नमत्सुदीर्घकन्धरः ॥३३७॥
एवं चिन्तितुमारब्धो, यथायं रथकारकः । धन्यः पुण्यः कृतार्थश्च, नृजन्मास्य सुलब्धकम् ॥३३८॥
येनैष प्रवराहारैः, सन्मुनिः प्रतिलम्भितः । अहं त्वधन्यको जात-स्तिर्यग्योनौ स्वकर्मभिः ॥३३९॥
नैवाहमीदृशं पात्रं, समर्थः प्रतिलम्भितुम् । तदपुण्यक एवाहं, धिग्धिग् जातिं मदीयकाम् ॥३४०॥
सर्वदायं वनच्छेत्ता, पुण्यभागत्र भूतले । अथासौ रथकारोऽपि, सत्पात्रप्रतिलम्भनात् ॥३४१॥
सहसोद्गतरोमाञ्चः, परं तोषमुपागतः । [1]रामेण चिन्त्यते चैवं, यथा मे मासपारणे ॥३४२॥
द्रव्यक्षेत्रादिभिः शुद्धा, भिक्षाप्राप्तिरभूदिति । एवं त्रयोऽपि ते याव-द्धर्मध्यानमुपागताः ॥३४३॥
आसते पतितस्ताव-दर्धच्छिन्नो महाद्रुमः । बलदेववनच्छेतृ-मृगाणामुपरि द्रुतम् ॥३४४॥
तेन ते चूर्णिताः सन्त-स्त्रयोऽपि स्वायुषः क्षये । अगच्छन् पञ्चमे कल्पे, ब्रह्मलोकाभिधानके ॥३४५॥
पुष्पोत्तराभिधाने च, विमाने रत्नभास्वरे । भास्वद्देहधरा देवाः, समुत्पन्ना महर्द्धिकाः ॥३४६॥
एवं वर्षशतं कृत्वा, श्रामण्यं रामसन्मुनिः । तत्रैव त्रिदशो जातो, विशिष्टर्द्धिसमन्वितः ॥३४७॥
ततश्चावधिना रामः, पूर्वस्नेहातिरेकतः । कृष्णं वीक्षितुमारब्धो, यावत्तृतीयकक्षितौ ॥३४८॥
दृष्टो दुरन्तदुःखार्त्तो, नारको नरकालये । ततस्तत्र गतः शीघ्रं, कृत्वा वैक्रियविग्रहम् ॥३४९॥
दिव्यरत्नप्रभाजालैः, समुद्योतं विधाय च । सुगन्धिपुद्गलक्षेपं, कृत्वा कृष्णं ददर्श सः ॥३५०॥
ऊचे चैवं यथा भ्रातः, कृष्ण ! स्वबन्धुवत्सल ! । प्रियं ते सज्जनानन्द !, किमिदानीं करोम्यहम् ॥३५१॥
कृष्णः प्राह स्वयं चैवो-पार्जिताशुभकर्मणाम् । भुञ्जानस्य फलं तीव्रं, दुःखरूपं ममाधुना ॥३५२॥
को नाम शक्तियुक्तोऽपि, परित्रां कर्तुमीश्वरः । स्वयमेव हि भुज्यन्ते, स्वानि कर्माणि जन्तुभिः ॥३५३॥

---

१ रामेणाऽप्यचिन्त्येवं-BC । रामेणाप्यचिन्तयत्येवं-J ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथासौ बाहुदण्डाभ्या-मुद्धृतो हलिना हरिः । स च प्रोत्क्षिप्यमाणश्च, सर्वाङ्गैरपि हेलया ॥३५४॥
विलीयतेऽग्नितापेन, नवनीतमिव द्रुतम् । ततश्च केशवो गाढं, महादुःखौघपीडितः ॥३५५॥
भो राम ! मुञ्च मुञ्चाशु, मां महावेदनातुरम् । यतः प्रजायते दुःखं, विशेषेण सुदारुणम् ॥३५६॥
तद्गच्छ भारते वर्षे, कुर्विदं मामकं वचः । गत्वा तत्र गदाचक्र-शङ्खखड्गप्रधारकम् ॥३५७॥
पीतवस्त्रधरं रम्यं, गरुडध्वजभूषितम् । विधेहि मामकं रूपं, रामरूपं स्वकं तथा ॥३५८॥
वरं नीलाम्बरं बिभ्रन्, मुशलं लाङ्गलं तथा । तालचिह्नध्वजोपेतं, ततः सर्वं महीतले ॥३५९॥
सर्वेषामपि लोकानां, परिभ्रम्य प्रदर्शय । ततो रामोऽपि तत्सर्वं, तथैव प्रतिपन्नवान् ॥३६०॥
ततो रामः समागत्य, मर्त्यलोकं ततो वरम् । विमानमकरोत्तत्र, निवेश्य प्रतिमां हरेः ॥३६१॥
स्वकीयं च प्रतिच्छन्दं, ततो भ्राम्यन् महीतले । लोकेभ्यो दर्शयामास, स्ववैरिभ्यो विशेषतः ॥३६२॥
ऊचे चैवं हली स्वीय-शत्रूणामग्रतो यथा । पुरेषु स्वेषु भो भूपा-स्त्रिकचतुष्ककादिषु ॥३६३॥
प्रतिमा नो[1] विधायाशु, निवेशयत सर्वतः । [2]पूजयध्वं च धूपाद्यै-र्नमस्कुरुत सादरम् ॥३६४॥
वयं हि सृष्टिसंहार-कारकास्त्रिदशोत्तमाः । देवलोकादिहागत्य, दिव्यदेवर्द्धिसंयुताः ॥३६५॥
[स्व]क्रीडाभिरनेकाभिः, क्रीडामात्रं [हि] भूतले । सृष्टानेकजनव्राताः, सृष्टानेकमहापुरः ॥३६६॥
यस्मादस्माभिरेवेह, सृष्टेयं द्वारिकावती । अस्माभिरेव संहृत्य, प्रक्षिप्ता पश्चिमोदधौ ॥३६७॥
तदहो वयमेवेह, सृष्टिसंहारकारकाः । कारणिकपुमांसश्च, विश्वस्यास्येति बुद्ध्यताम् ॥३६८॥
ततो लोकेन भीतेन, तथैव तत्प्रतिश्रुतम् । कृताश्च प्रतिमाः सर्व-ग्रामेषु नगरेषु च ॥३६९॥
पारम्पर्येण सञ्जाता, लोके ख्यातिरियं तथा । ब्रह्मेशकेशवा लोक-सृष्टिसंहारकारकाः ॥३७०॥
सर्वमेतत्ततो रामः, कारयित्वा दिवं गतः । आस्ते च तत्र भुञ्जानो, दिव्यां भोगपरम्पराम् ॥३७१॥
तथा जरत्कुमारोऽपि, कलिङ्गाधिपभूपतेः । सुतायां पुत्रमुत्पाद्य, वसुध्वजाभिधानकम् ॥३७२॥
तस्मै राज्यं निजं दत्त्वा, भववासविरागतः । तीर्थे नेमिजिनस्यैव, प्रव्रज्यां प्रतिपन्नवान् ॥३७३॥
तदहो पात्रसद्दान-मनुमोदयतोऽपि हि । दातृतुल्यं फलं प्राज्यं, हरिणस्येव जायते ॥३७४॥
ददध्वं तद्यथाशक्त्या, दानं पात्राय भावतः । वित्ताभावे कुरुध्वं भोः, पात्रदानेऽनुमोदनम् ॥३७५॥

इति **दानाद्यधिकारः**

१ वो-BJC । नौ-मु. ॥ २ पूजयत्पुष्पधूपाद्यैः BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिष्टसङ्गाऽधिकारः १४

उक्तो दानादिचतुर्विधोऽपि धर्मः, स च शिष्टैरेव सेव्यत इत्यतस्तदनन्तरं शिष्टसङ्गाधिकारमाह–

महामोहभराक्रान्ता, दुःखौघावर्तवर्तिनः ।
स्वहिताय न चेष्टन्ते, शिष्टसङ्गादृते नराः ॥२७४॥
मोक्षमार्गपरिज्ञानं, न तावज्जायते नृणाम् ।
यावन्नोन्मीलिते नेत्रे, शिष्टसङ्गशलाकया ॥२७५॥
दुर्गतिद्वारहेतूनि, सर्वानर्थकराणि च ।
सुलभानि कुमित्राणि, शिष्टसङ्गस्तु दुर्लभः ॥२७६॥
तमस्तानवकर्तारः, प्रशमामृतवर्षिणः ।
शरदिन्दुसमाः सन्तः, सन्तोषितजगज्जनाः ॥२७७॥
एको द्वौ वा त्रयो वापि, पुरग्रामेषु सज्जनाः ।
यद्वा सन्ति न सर्वत्र, कल्पोपपदपादपाः ॥२७८॥
मालतीचन्दनचन्द्र-सुधा येन विनिर्मिताः ।
तेनैव दलेनैते, स्रष्ट्रा सृष्टा हि सज्जनाः ॥२७९॥
शरद्धदजलाकारं, गम्भीरं मलवर्जितम् ।
कोपेऽपि शिशिरं मध्ये, बहिरुष्णं सतां मनः ॥२८०॥
असारोऽप्येष संसारः, सारवानिव लक्ष्यते ।
परदुःखदुःखितैः सद्भिः, परोपकृतिचञ्चुभिः ॥२८१॥
सागरादपि गम्भीरा, मेरोरपि गरीयसी ।
भूयसी भूरिशः कार्या, सङ्गतिः सह सज्जनैः ॥२८२॥
क्रूरकर्मापि सत्सङ्गा-ल्लभते फलमुत्तमम् ।
केशिसङ्गाद्यथा लब्धं, फलम् राज्ञा प्रदेशिना ॥२८३॥
यैः स्वार्थं परिहृत्य हृद्यहृदयैः प्रायः परार्थः कृतः,
यैरेकान्तहितावहा तनुमतां दत्ता मतिः पृच्छताम् ।
यैराजन्म जितेन्द्रियैर्जगदिदं शुभ्रैर्गुणैः शुभ्रितं
ते संसारसरःसरोरुहसमाः सेव्याः सदा सज्जनाः ॥२८४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति श्लोका एकादश पाठसिद्धा एव, तथापि किञ्चिदुच्यते-**महामोहभराक्रान्ता** बृहदज्ञानभरावष्टब्धाः, दुःखौघ एवाऽऽवर्तन्त इत्येवंशीला **दुःखौघावर्तवर्तिनः, स्वहितायात्मकल्याणाय न चेष्टन्ते** न व्याप्रियन्ते **शिष्टसङ्गात्सज्जनसम्पर्कादृते** विना **नरा** [1]मानवाः ॥२७४॥

मोक्षमार्गपरिज्ञानं शिवपथावबोधो **न तावज्जायते** न तावत्सम्पद्यते **नृणां** नराणां **यावन्नोन्मीलिते** यावन्नैव विकासिते **नेत्रे** लोचने **शिष्टसङ्गशलाकया** सज्जनसम्पर्ककीलिकया ॥२७५॥

दुर्गतिद्वारहेतूनि कुगतिमुखकारणानि, **सर्वानर्थकराणि** च समस्तव्यसनजनकानि च **सुलभानि** सुप्रापाणि **कुमित्राणि** कुत्सितसुहृदः, **शिष्टसङ्गस्तु दुर्लभः** सद्योगो दुष्प्रापः ॥२७६॥

तमस्तानवकर्तारोऽज्ञानकृशत्वकारकाः **प्रशमामृतवर्षिण** उपशमसुधावर्षकाः, **शरदिन्दुसमाः** शारदचन्द्रसन्निभाः **सन्तः** सत्पुरुषाः **सन्तोषितजगज्जना** आनन्दितविश्वलोकाः ॥२७७॥

एको द्वौ वेति श्लोकः स्पष्टः, नवरं **कल्पोपपदपादपाः** कल्पवृक्षाः ॥२७८॥
मालतीचन्दनमिति श्लोको व्यक्तः ॥२७९॥
शरद्ध्रदजलाकारमिति कण्ठ्यं, नवरं शरत्काले ह्रदजलाकारं नदनीराकारम् ॥२८०॥
असारोऽपीत्यादि श्लोकत्रयं सुव्यक्तमेव, नवरं जन्तुभिः परोपकारकरणशीलैः ॥२८१-२८३॥

यैः कैश्चित्स्वार्थं स्वप्रयोजनं **परिहृत्य** परित्यज्य **हृद्यहृदयैर्बन्धुरमनोभिः प्रायः** प्रायेण **परार्थः** परप्रयोजनं **कृतो** विहितः, **यैरेकान्तहितावहा** निर्विकल्पं हितकारिका **तनुमतां** शरीरिणां **दत्ता** वितीर्णा **मतिर्बुद्धिः पृच्छतां** प्रश्नयतां, **यैराजन्माऽऽजन्मकालाज्जितेन्द्रियैर्विजितनिजाक्षैर्जगदिदं** भुवनमेतच्चुभ्रैः शुक्लैर्गुणै-रौदार्यादिभिर्जीवपरिणामैः **शुभ्रितमुज्ज्वलितं, ते संसारसरःसरोरुहसमाः** ते पुरुषाः संसारसरोवरस्य शोभाकारित्वात्सहस्रपत्रसन्निभाः **सेव्या** आसेवनीयाः **सदा** सर्वदा **सज्जनाः** सत्पुरुषा इति ॥२८४॥

---

१ समानवाः - BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केशिप्रदेशिकथानकं पुनरिदं-

अस्त्यत्र भारते क्षेत्रे, सुरमन्दिरशोभिता। नगर्यामलकल्पाख्या, रम्यारामादिराजिता ॥१॥
तस्यां बभूव वीरस्य, समवसृतिरन्यदा। सूरिकाख्यसुरस्तत्र, वन्दनार्थमुपागतः ॥२॥
अभिवन्द्य महावीरं, स प्राह प्रकृताञ्जलिः। भगवन् सर्वमेवेह, यूयं जानीत पश्यथ ॥३॥
गौतमादिमुनीनां तु, किञ्चिन्नाटचं प्रदर्शये। तूष्णचैव भगवांस्तस्थौ, सूरिकाभः सुरस्ततः ॥४॥
दिशमुत्तरपौर्वस्तीं, गत्वा सिंहासनं तथा। विकुर्व्य तत्र सन्तिष्ठं-स्ततो दक्षिणतो भुजात् ॥५॥
दिव्यातोद्यं च गन्धर्व-सन्नाटचविधिसंयुतम्। शतमष्टाग्रमाकृष्टं, कुमाराणां वराकृतिं ॥६॥
वामभुजाच्च देवीनां, रम्यं नाटचविधिं ततः। द्वात्रिंशद्विधमादर्श्य, निजं स्थानमुपाययौ ॥७॥
श्रीमता गौतमेनाथ, पृष्टो वीरजिनेश्वरः। भगवन्नमरः कोऽयं ?, कथं वा प्राप्तवानिमाम् ? ॥८॥
देवर्द्धिं सर्वतोभद्रां, कथं वा सुकृतं कृतम् ?। उत्पन्नः कुत्र वा कल्पे ?, कुतो धर्मं च लब्धवान् ? ॥९॥
भगवानाह सौधर्मे, विमाने चारुणाभके। चतुष्पल्योपमायुष्को, देवोऽयं सूरिकाभिधः ॥१०॥

जन्मन्यनन्तरे चायं, श्वेतवत्यां महापुरि।
प्रदेश्याख्योऽभवद्राजा, सूर्यकान्तास्य-गेहिनी ॥११॥
पुत्रस्तु सूर्यकान्ताख्यो, मन्त्री चित्राभिधोऽभवत्।
स च प्रदेशिना राज्ञा-न्यदा क्वचित्प्रयोजने ॥१२॥
श्रावस्त्यां प्रेषितः पुर्यां, जितशत्रुनृपान्तिके।
स च तत्र गतो दृष्ट्वा, पार्श्वजिनगणाधिपम् ॥१३॥

आचार्यं केशिनामानं, चतुर्ज्ञानसमन्वितम्। सानन्दो वन्दते भक्त्या, धर्मं चाकर्णयत्यसौ ॥१४॥
धर्मं श्रुत्वा च सम्बुद्धः, सूरीणामन्तिके ततः। पञ्चाणुव्रतिकं सप्त-शिक्षापदसमन्वितम् ॥१५॥
श्राद्धसम्बन्धिनं धर्मं, विधिना [1]प्रतिपद्य च। भाषते भगवन्नस्ति, श्वेतवत्यां मम प्रभुः ॥१६॥
प्रदेशिसंज्ञितो राजा, सोऽपि सम्बुद्धचते यदि। तदा सम्पद्यते श्रेष्ठं, ततः सूरिः प्रभाषते ॥१७॥
भद्रेदं शोभनं चैव, केवलं यस्तव प्रभुः। प्रदेशिनामको राजा, क्रूरकर्मा दुराशयः ॥१८॥
इहलोकाभिसम्बद्धः, परलोकपराङ्मुखः। अनेकसत्त्वहन्ता च, निर्धर्मो निर्दयस्तथा ॥१९॥
नास्तिकमतवादी च, स कथं प्रतिभोत्स्यते ?। ततश्चित्रो वदत्येवं, युष्माकं किं प्रदेशिना ? ॥२०॥
श्वेतवत्यां जनोऽन्योऽस्ति, भूयान् भव्येश्वरादिकः। सोऽभिवन्दिष्यते पूज्या-न्मनः करिष्यते तथा ॥२१॥
अशनादिकमाहारं, सद्भक्त्या सम्प्रदास्यति। वस्त्रं पात्रं च शय्यां च, पीठकं फलकं तथा ॥२२॥
किञ्च तत्रान्यलोकानां, युष्माकमनुभावतः। सम्यक्त्वादिमहालाभो, भविष्यति गुणो महान् ॥२३॥
सूरिणोक्तमहो चित्र !, करिष्यामो यथोचितम्। त्वया धर्मे महायत्नो, विधेयः प्रतिवासरम् ॥२४॥

१ प्रतिपद्यते-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं करिष्य इत्युक्त्वा, गतश्चित्रो निजां पुरीम् । सूरयोऽप्यन्यदा काले, यथोदितविहारतः ॥२५॥
विहरन्तः समायाताः, श्वेतवत्यामथ क्रमात् । स्थिताश्च प्रासुके स्थाने, सुसंयतजनोचिते ॥२६॥
वर्धापितस्ततश्चित्रो, गुरूदन्तनियुक्तकैः । तत्रस्थेनैव तेनापि, सूरयस्तेऽभिवन्दिताः ॥२७॥
चिन्तितं च यथैषो हि, राजा पापेषु कर्मसु । सक्तश्चण्डश्च रौद्रश्च, महामिथ्यात्वमोहितः ॥२८॥
मय्यपि मन्त्रिणि प्राज्ञे, नरके निपतिष्यति । तदुपायेन केनापि, सूरिमूले नयाम्यहम् ॥२९॥
ततोऽश्ववाहनव्याजा-न्निजोद्यानसमीपके । नानावृक्षादिभी रम्ये, निनाय सचिवो नृपम् ॥३०॥
प्रवेशितश्च तत्रासौ, खेदापनोदनच्छलात् । जनमध्यगता यत्र, धर्ममाख्यान्ति सूरयः ॥३१॥
सूरिनिःस्वनमाकर्ण्य, भूपतिः प्राह मन्त्रिणम् । यथा भो किमयं मुण्डो, रारटीति महारवैः ॥३२॥
मन्त्री प्राह न जानेऽहं, तदभ्यर्णेऽभ्यगम्यताम् । ततो जगाम सूरीणा-मन्तिके मन्त्रिसंयुतः ॥३३॥
सूरिणापि ततस्तस्य, प्रारब्धा धर्मदेशना । देवतत्त्वं समाख्यातं, जीवाजीवादयस्तथा ॥३४॥
धर्माधर्मफलं चैव, स्वर्गादि च परिस्फुटम् । राजाह सर्वमेवेद-मसम्बद्धं त्वयोदितम् ॥३५॥
असम्बद्धत्वमेतस्या-त्यन्तासत्त्वादिति ब्रुवे । असत्त्वं पुनरध्यक्ष-प्रमाणाविषयत्वतः ॥३६॥
वियदिन्दीवरादीव, ततः सूरिरुवाच तम् । येयं भोः भो नराधीश !, गोचरातीतता किल ॥३७॥
सा तवैव किमाहोश्वि-त्सर्वेषामपि देहिनाम् । आद्यपक्षे गृहस्तम्भ-कुट्यादीनामपीह भोः ॥३८॥
अभावो जायते जीव-स्वर्गादीनामिव स्फुटः । त्वदीयदर्शनस्यार्वा-ग्भागवर्तित्वगादिके ॥३९॥
प्रवृत्तेर्नैव मध्यादि-भागेषु भो नरेश्वर ! । नापि द्वितीयकः पक्षो, यस्मादयमसिद्धिमान् ॥४०॥
तत्सिद्धौ च तवैवेह, सर्वज्ञत्वं प्रसिद्ध्यति । सर्वज्ञत्वे च संसिद्धे, जीवत्वं सिद्धमेव हि ॥४१॥
जीवत्वे सति सन्त्येव, पुण्यपापादयोऽखिलाः । इत्यादिना प्रवादेन, नास्तिकत्वे निराकृते ॥४२॥
राज्ञोक्तमभविष्यत्सन्, परलोको यदि ध्रुवम् । आसीच्च धर्मसन्निष्ठा, सर्वदा जननी मम ॥४३॥
ततस्तव मतेनासौ, भविष्यति दिवं गता । पिता तु पापकर्माभू-त्स नूनं नरकं गतः ॥४४॥
तन्माता किं न मामेत्य, सम्बोधयति सत्वरम् । यथा भो मा कृथाः पापं, दूरं दुर्गतिकारणम् ॥४५॥
मत्सम्बोधकृते किं वा, समेत्य नरकादिह । पितात्मीयमहो मह्यं, न प्रयच्छति दर्शनम् ॥४६॥
सूरिः प्राह महाराज !, यत्ते माता समेति नो । स्वर्गान्मनुष्यलोकेऽत्र, तत्राऽऽकर्णय कारणम् ॥४७॥
देवा हि सर्वदात्यन्तं, विषयासक्तमानसाः । असमाप्तविधेयाश्च, मनुजेषु च निःस्पृहाः ॥४८॥
नरक्षेत्रं च दुर्गन्धं, नेहागच्छन्ति तेन ते । नारकास्तु पराधीना, दुःखार्त्ताश्च निरन्तरम् ॥४९॥
स्वकर्मरज्जुभिर्बद्धा, आगच्छेयुः कथं तु ते ? । निर्गन्तुमनसोऽपीह, बन्धुस्नेहपरा अपि ॥५०॥
यथेहागसि कुत्रापि, कृते कोऽपि नरस्त्वया । अन्धगुप्तौ सुगुप्तायां, गाढं बद्ध्वा प्रवेशितः ॥५१॥
सोऽभिलषेद्यदि द्रष्टुं, ज्ञातिवर्गं निजं नृप !। त्वं किं विज्ञप्यमानोऽपि, तं वराकं विमुञ्चसि ? ॥५२॥
भूयोऽपि भूपतिः प्राह, भगवन्नेकदा मया । चौर एको महाकुम्भ्यां, प्रक्षिप्तो यत्नतस्ततः ॥५३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थगयित्वा च तद्द्वारं, निश्छिद्रं [1]जतुना कृतम् । मृतश्चौरो न चालोकि, तद्विनिर्गमरन्ध्रकम् ॥५४॥
कुम्भीमध्येऽपि यत्नेन, वीक्षमाणैर्निरन्तरम् । जीवः कुत्रापि नो दृष्टो, दृष्टश्च कृमिपुञ्जकः ॥५५॥
तथान्योऽपि मया चौरः, सूक्ष्मखण्डानि कारितः । न तत्र वीक्षितो जीवः, सञ्छिन्नेऽपि तिलं तिलम् ॥
सूरिणाभाणि भो कश्चि-त्कुम्भीमध्यगतो नरः । नीरन्ध्रं पिहिते द्वारे, शङ्खमादाय वादयेत् ॥५७॥
स शङ्खनिःस्वनो भद्र !, निष्क्रामति कुतो बहिः । वह्निना ध्मायमाने वा, लोहपिण्डेग्निभासुरे ॥५८॥
सर्वात्मना कुतस्तत्र, [2]प्रविवेश हुताशनः । द्वितीयस्तेनके चायं, दृष्टान्तो जनविश्रुतः ॥५९॥
यथा हि मानवः कोऽपि, गृहीत्वाऽरणिदारुकम् । सर्वतः पाटयन्नुच्चै-रग्निं तत्र न पश्यति ॥६०॥
अन्यश्चोत्थापयामास, वह्निं तत्रापि दारुके । यदीदृक्षस्वरूपाणि, मूर्तवस्तून्यपीह भोः ॥६१॥
तदमूर्तपदार्थानां, को विशेषोऽप्रदर्शने । राजाह पुनरप्येवं, मयैकः स्तेन एकदा ॥६२॥
जीवन्नेव तुलारूढो, जनाध्यक्षं प्रतोलितः । उच्छ्वासस्य निरोधेन, मारयित्वा तथैव सः ॥६३॥
तोलितस्तत्क्षणं याव-त्तावानेव न चोनकः । सूरिर्ब्रूते इहैकेन, गोपालेन दृतिर्दृढम् ॥६४॥
तोलितो वातसम्पूर्णो, रिक्तोऽपि च तथैव सः । तावानेव हि सञ्जातो, न च न्यूनो न चाधिकः ॥६५॥
तदहो यदि मूर्तेऽपि, तौल्यमाश्रित्य नान्तरम् । दृष्टं कथममूर्तेषु । भावेषु तत्प्रदृश्यतां ॥६६॥
तस्मात्सर्वांगिवर्गस्य, कथंचिद्देहतः पृथक् । स्वसंवेदनसंसिद्धो, जीवः प्रत्यक्ष एव हि ॥६७॥
तथा-चैतन्यानुगतानेक-चलनस्पन्दनादिभिः । चेष्टाभिर्लक्ष्यते जीवो, वातवद्ध्वजकम्पनात् ॥६८॥
राज्ञोक्तं भगवन्नेत-देवमेव न संशयः । त्वदीयवाक्यमन्त्रैर्मे, नष्टो मोहपिशाचकः ॥६९॥
परं कुलक्रमायातं, नास्तिकवाददर्शनम् । तत्कथमिव शक्तोऽहं, मोक्तुमकाण्ड एव हि ॥७०॥
गुरुराह महाराज !, स्तोकमेतद्विवेकिनाम् । किं वा व्याधिः क्रमायातो, दारिद्र्यं वा न मुच्यते ॥७१॥
यथेह वणिजः केऽपि, नानावाहनसंयुताः । वाणिज्येन प्रगच्छन्तो, लोहाकरमपश्यत ॥७२॥
ततो लोहं गृहीत्वा ते, गच्छन्तः पुनरग्रतः । त्रपुकाकरमालोक्य, मुक्त्वा लोहं ततो मुदा ॥७३॥
त्रपुकस्य भृता गन्त्र्यो, नैको लोहं विमुञ्चति । सीसपत्रं ततस्ताम्रं, रुप्यं स्वर्णं च हीरकान् ॥
दृष्ट्वा विमुच्य पूर्वात्तं, त्रपुताम्रादिकं क्रमात् । लाभवन्तः प्रमोदेन, हीरकानेव केवलान् ॥७५॥
एकस्तु भण्यमानोऽपि, वणिग्भिस्तैर्मुहुर्मुहुः । तल्लोहं नैव तत्याज, कुग्रहग्रस्तमानसः ॥७६॥
ततः सर्वे समायाताः, स्वेषु स्वेषु गृहेषु ते । तत्र च हीरकग्राही-वणिजो विलसन्त्यलम् ॥७७॥
लोहग्राही तु तानुच्चै-र्भुञ्जानान् ददतस्तथा । दृष्ट्वा दन्दह्यतेऽत्यन्तं, पश्चात्तापकृशानुना ॥७८॥
तथा तवापि भो राजन् !, पश्चात्तापो भविष्यति । अतो विमुच्यतामेष, ध्रुवं निन्द्यः कदाग्रहः ॥७९॥
समग्रोपाधिं मुक्त्वैव, धर्मे यत्नो विधीयताम् । येनायं तीर्यते दुर्गो, दूरपारो भवोदधिः ॥८०॥
ततो जीवादितत्त्वानि, बुद्धोऽद्भुतशुभाशयः । प्रत्यपद्यत सुश्राद्ध-धर्मं द्वादशभेदकम् ॥८१॥

---

१ यतु सारिता-BC । जतु सारिता-J ॥ २ प्रावेश-BC । प्रावेशाद् J ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो गतो निजे गेहे, राजा रञ्जितमानसः । सूरयोऽप्यन्यदान्यत्र, विहृता नगरान्तरे ॥८२॥
भूपेनापि यथाग्राहं, धर्मः सुश्रावकोचितः । निष्कलङ्कश्चिरं कालं, शुद्धभावेन पालितः ॥८३॥
महापरिग्रहारम्भाः, सर्वेऽपि शिथिलीकृताः । स्त्रीसङ्गश्च परित्यक्तो, विशुद्धं धर्ममिच्छता ॥८४॥
ततो विचिन्तितं सूर्य-कान्तयान्यत्र सक्तया । यथायं यत आरभ्य, राजा जात उपासकः ॥८५॥
ततः प्रभृति मार्मेष, सर्वथा त्यक्तवानिति । तद्विषादिप्रयोगेण, विनाश्यैनं नराधिपम् ॥८६॥
पुत्रं च सूर्यकान्ताख्यं, राज्ये संस्थापयाम्यहम् । ततो भुञ्जे यथाकामं, कामभोगान्निरन्तरम् ॥८७॥
निर्भया च निराशङ्का, स्ववशा स्वेच्छचारिणी । ततोऽन्यदा तया क्षिप्तं, भक्तमध्ये महाविषम् ॥८८॥
उपोषितनरेन्द्राय, दत्तं पौषधपारणे । ततो राज्ञः समुत्पन्ना, प्राणप्रहाणकारिणी ॥८९॥
दुःसहा सर्वतो देहे, पित्तज्वरोग्रवेदना । राज्ञा ज्ञातं तकत्सर्वं, यत्कृतं सूर्यकान्तया ॥९०॥
मन्ये विषविकारोऽयं, तेनाधरं वपुर्मम । ततः संवेगमापन्न-स्तस्यामद्विष्टमानसः ॥९१॥
अनुव्रतानि पञ्चापि, समुच्चार्य यथाविधि । आलोचितप्रतिक्रान्तो, नमस्कारपरायणः ॥९२॥
मृत्वा [1]समाधिना प्राप्तः, कल्पे सौधर्मनामनि । विमाने सौरिकाभे च, सूर्यनाभाभिधः सुरः ॥
चतुष्पल्योपमायुष्कः, समुत्पन्नो महर्द्धिकः । भुक्त्वा तत्र महाभोगां-स्ततश्च्युत्वा स्थितिक्षयात् ॥९४॥
क्षेत्रे महाविदेहाख्ये, कृत्वा संयममुत्तमम् । [2]यास्यति निःशेषकर्मांश-विनिर्मुक्तः शिवालयम् ॥

इति **शिष्टसङ्गाधिकारः**

१ समाधिसंप्राप्तः BJC ॥ २ B । यास्यत्यशेषं मुः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विनयाधिकारः १५

उक्तः शिष्टसङ्गाधिकारः, शिष्टसङ्गादेव विनीतो जायते जन्तुरित्यतस्तदनन्तरं विनयाधिकारमाह-

यत्र तत्र प्रयातोपि, दुर्विनीतो न शोभते ।
न चापि सेव्यतामेति, निर्जलेव यथा नदी ॥२८५॥
किं किं यन्न प्रयच्छन्ति, किं किं यन्न प्रकुर्वते ।
स्वबन्धुमिव पश्यन्ति, विनयाराधिता नराः ॥२८६॥
अङ्गजोऽपि हि दुष्टात्मा, व्रणः सन्तापकारणम् ।
पुत्रोऽपि दुर्विनीतात्मा, पितुर्निर्वेदकारणम् ॥२८७॥
कोदण्डस्यैव नम्रस्य, कोटिमारोहते गुणः ।
ततोऽपि च टणत्कारो, बम्भ्रमीति महीतले ॥२८८॥
दुर्विनीतं परित्यज्य, स्वपुत्रं मेदिनीपतिः ।
अन्यस्यापि ददात्येव, राज्यं विनयरञ्जितः ॥२८९॥
हन्ता जन्मद्वयस्यापि, दुर्विनीतो दुराशयः ।
हितेष्वप्यहितः पापः, कूलवालो यथा मुनिः ॥२९०॥
नेत्रहीनं यथा वक्त्रं, दानहीनं यथा धनम् ।
चन्द्रहीनं यथाकाशं, पद्महीनं यथा सरः ॥२९१॥
निर्नायकं यथा सैन्यं, तपोहीनश्च संयमः ।
निःसंस्कारं यथा वाक्यं, निरपत्यं यथा गृहम् ॥२९२॥
तथैव दुर्विनीतस्य, चेष्टितं जल्पितं स्थितम् ।
पाण्डित्यं च क्रियाकाण्डं, सर्वथैव न शोभते ॥२९३॥
गुर्वादिषु शुभं चित्तं, विनयो मानसो मतः ।
हितं मितं प्रियं वाक्यं, विनयस्तेषु वाचिकः ॥२९४॥
कायिकश्च यथाशक्ति, तत्कार्याणां प्रसाधकः ।
सर्वथाऽऽशातनात्यागः, सर्वदा नीचवर्तिता ॥२९५॥
ज्ञानदर्शनचारित्र-रत्नत्रितयभाजनम् ।
विनयादेव जायन्ते, गुरूणां योग्यजन्तवः ॥२९६॥
लिम्बतां दुर्विनीतत्वात्, पश्चाच्चागमदाम्रताम् ।
यथैष क्षुल्लको गच्छे, पित्रा सार्धं कृतव्रतः ॥२९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]वरविनयगुणौघप्राप्तलोकप्रशंसः,
सफलितनिजजन्मा भूरिधामा महात्मा ।
कतिपयदिनमध्ये क्षीणनिःशेषकर्मा,
सकलजनविनीतः शाश्वतं स्थानमेति ॥२९८॥

इति श्लोकाश्चतुर्दश, यत्र तत्र प्रयातोऽपि यस्मिंस्तस्मिन् स्थाने गतोऽपि, दुर्विनीतो दुर्नयकारी न शोभते न शोभामर्हति, न चापि सेव्यतामेति आश्रयणीयतां न गच्छतीत्यर्थः, निर्जलेव सलिलविकलेव यथा येन प्रकारेण नदी निम्नगेति प्रथमश्लोकार्थः ॥२८५॥

अथ विनयाराधिताः सन्तः सन्तो यादृशा भवन्ति तद्दर्शयन्नाह-किं किं न प्रयच्छन्तीत्यादिश्लोकः सुगमः ॥२८६॥
पुत्रोऽपि दुर्विनीतः पितुरुद्वेगकारणमिति दर्शयन्नाह-अङ्गजोऽपीत्यादि, तत्राङ्गजो देहोद्भव इति शेषं सुगममिति ॥२८७॥
अथ नमनशीलस्य धनुर्दृष्टान्तेन गुणमाह-कोदण्डस्येति श्लोकः सुगमः ॥२८८॥
अथ पितापि दुर्विनीतस्य यत्करोति तद्दर्शयन्नाह-दुर्विनीतं परित्यज्येति श्लोकः स्पष्टः ॥२८९॥

अथ दुर्विनीतस्याऽनर्थप्राप्तिं सदृष्टान्तामाचष्टे, हन्तेत्यादि, तत्र हन्ता घातयिता जन्मद्वयस्यापि ऐहिकामुष्मिकभवद्वितयस्यापि दुर्विनीतो दुराशयो दुष्टचित्तो हितेष्वपि हितकारिष्वपि गुर्वादिष्विति गम्यते, अहितः शत्रुतुल्यः पापः पापकारी कूलवालो यथा मुनिरिति ॥२९०॥

अथेह यथा दुर्विनीतस्य चेष्टितजल्पितादि न शोभते नेत्रवक्त्रादिदृष्टान्तैस्तथा दर्शयन् श्लोकत्रयमाह-नेत्रहीनं यथा वक्त्रमित्यादि सुगमं चैतत् ॥२९१-२९३॥

अथ मानसिकादिभेदेन विनयत्रैविध्यं तत्स्वरूपं च दर्शयन् श्लोकद्वयमाह-गुर्वादिषु शुभं चित्तमित्यादि सुखावबोधमेतदिति ॥२९४-२९५॥

---

१ वरविनयगुणावाप्तशेषलोकः B ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ गुर्वादिषु विनयकारिणां यद्भवति तद्दर्शयन् श्लोकमेकमाह-**ज्ञानेत्यादि** स्पष्टमेवेदम् ॥२९६॥
अथ विनयाविनययोः फलमाह--**लिम्बतां दुर्विनीतत्वादिति** श्लोकः सुगमः ॥२९७॥

अथ सर्वोत्तमं विनयफलमाविष्कुर्वन् वृत्तमाह-

वरविनयेत्यादि अस्य व्याख्या- वरविनय एव गुणस्तेनाऽऽप्ता प्राप्ता अशेषलोकविहिता [1]प्रशंसा येन स तथा, सफलितं सफलीकृतं निजं जन्म येन स तथा, भूरि प्रभूतं धाम तेजो यस्य स तथा, महान् प्रशस्य आत्मा यस्य स तथा, **कतिपयदिनमध्ये** कियद्दिवसाभ्यन्तरे स्तोककालेनेत्यर्थः, **क्षीणनिःशेषकर्मा** क्षीणानि प्रलयं गतानि निःशेषाणि समस्तानि कर्माणि ज्ञानावरणीयादीनि यस्य स तथा, **सकलजनविनीतः** समस्तविनयाऽहीलकः विनयकारी **शाश्वतं** शश्वद्भवं **स्थानं** पदमेति गच्छति, निर्वाणनगरमुपगच्छतीत्यर्थः, इति श्लोकचतुर्दशसमासार्थः ॥२९८॥

कूलवालककथानकं सङ्क्षेपादिदं-

एकस्याचार्यस्यात्यन्तदुर्विनीतो विनेयः, तं चाचार्यो विनयं ग्राहयन् बहुधा शिक्षयति कदाचिन्मधुरैर्वाक्यैः कदाचित्किञ्चिन्निष्ठुरैरिति, स चाचार्यं प्रति बृहदनुशयं वहति। अन्यदा सूरिस्तेनैव सार्धं केनापि प्रयोजनेन कञ्चित्पर्वतमारूढः, सिद्धप्रयोजनेन पश्चादागच्छता [तेन शिष्येण] मामयं निरपराधमेव मुहुर्मुहुर्निर्भर्त्सयत्यतो मारयाम्येनं स्वगुरुमिति कल्पयता शिलैका समुत्पाट्य सूरेः पृष्टतो मुक्ता, सूरिणापि खाट्कारं कुर्वन्ती महावेगेनागच्छन्ती सहसैव सा लक्षिता, स्थितश्च द्रुतमेव मार्गं मुक्त्वैकत्र पार्श्वे सूरिः, जगाम भूतले शिला, ततश्च सूरिणातिरुष्टेन स दुर्विनीतो विनेयः शप्तो यथा रे दुरात्मन् ! दुर्विनीत ! दुष्टकर्मकारिन् ! स्वगुरुघातक ! स्त्रीभ्यस्ते विनाशो भवत्विति । तेनोक्तं मया तत्र स्थातव्यं यत्र स्त्रीणां सम्भवोऽपि नास्तीत्युक्त्वा गतः शून्यारण्यं, तत्र चैकत्र नदीकूले कायोत्सर्गस्थितः प्रतिदिवसमातापनां प्रकुर्वन्नास्ते, तत्रायातसार्थादेः सकाशाल्लब्धभक्तपानादिना च पारयति इतश्च **वैशालीनगरीं** भङ्क्तुमशक्नुवन् **कोणिकनरेन्द्रो** नितरां खेदमावहन्नेवं व्यचिन्तयत्, कथं नामैतस्या नगर्या मया भङ्गः कर्तव्य इति । अत्रान्तरे सहसैव गगनमण्डले वचनमिदमुल्ललास-

जया समणे कूलवालए, मागहियं गणियं रमिस्सइ ।
राया असोगचंदए, वेसालीं नगरीं गहिस्सइ ॥१॥

[संवेगरंगसाला १२८३]

---

१ प्रशंसा विहिता येन-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याकर्ण्य राज्ञा तत्क्षणमेव मागधिकां गणिकां समाहूय शिक्षयित्वा च प्रेषिता कूलवालकसमीपे। ततस्तया श्राविकाया वेषं कृत्वा वन्दितः कूलवालकः, पर्युपासितश्च क्षणं, भणितश्च यथा भगवन् मम सार्थे समागत्य भक्तपानादिनानुग्रहः क्रियतां, ततोऽसौ क्रमेण गतस्तत्र प्रदेशे, तयापि च चूर्णमिश्रमोदकैः प्रतिलम्भितो गतः स्वस्थानं, कृतं च तैर्मोदकैः पारणकं, जातं च पायुक्षालकं, अत्यन्तमधरीभूतं च तच्छरीरकं, तया च सुश्राविकयेव सादरं सर्वप्रकारैः प्रतिजागरितः कालेन च प्रगुणतां ययौ, सस्नेहं प्रार्थितश्च तया यथा पश्चाद्धर्मं भगवन् ! कुर्याः, मयैव सार्धमधुना भोगान् भुङ्क्ष्वेति, तथैव तेनापि प्रतिपन्नं तद्वचः, कृतश्च कालेन तया स कूलवालक आत्मवशवर्ती, नीतश्च कोणिकराजसमीपे, उक्तश्च कोणिकेन यथा भो भट्टारक ! कथमेतस्या नगर्या भङ्गो भविष्यतीति, तेन निगदितं नगरीं निरीक्ष्य कथयामि, ततः प्रविष्टस्तदभ्यन्तरे, निरूपिता च सर्वतः, दृष्टं च अतीवरमणीयं मुनिसुव्रतजिनस्तूपं, ज्ञातं च यथास्य प्रभावेण नगरी न भज्यत इति ततश्च कथितं तेन लोकानां यथा भो भो नागरकाः ! स्तूपस्यास्य दोषेण नगरीरोधकोऽजनि, स्तूपभङ्गे रोधकभङ्गो भविष्यति, प्रत्ययश्चात्रास्योत्कीलनाकाल एव परचक्रं दूरं गमिष्यति, इत्युक्त्वा गतः कूलवालकः कोणिकसमीपे, कथितस्तस्मै सर्वोऽपि स्तूपभञ्जनादिव्यतिकरः नगरीलोकैश्च स्तूपो भङ्क्तुमारब्धः, कोणिकोऽपि सस्कन्धावारो दूरं दूरतरं गतः, लोकेनापि जातप्रत्ययेन समन्तादुत्कीलितः स्तूपः, कोणिकेनापि समागत्य गृहीता नगरी, भग्ना च, कूलवालकोऽपि गुरुप्रत्यनीको भ्रष्टचारित्रो दुष्कर्मकारी दुर्गतिं गतवानिति।

अथाम्रलिम्बकथानकं, तच्चेदं-

अस्त्यत्रैव सुविख्यातो-ऽवन्तीजनपदो भुवि। धनधान्यादिसम्पन्नो, रम्यग्रामादिसङ्कुलः ॥१॥
तस्मिन्नुज्जयिनी नाम, प्रवरास्ति महापुरी। जैनेन्द्रचैत्यसन्दोहैः, सर्वतोऽपि विराजिता ॥२॥
शतानि पञ्च तत्रासन्, गच्छानां सद्गुणश्रियाम्। भिन्नभिन्नाश्रयस्थानां, साधुसन्दोहशालिनाम् ॥३॥
तत्र गच्छे किलैकस्मिन्, गीतार्थगुर्वधिष्ठिते। सहाऽऽम्राख्यसुतेनैको, जग्राह स्थविरो व्रतम् ॥४॥
अथ प्रवर्धमानोऽसा-वाम्रकः प्रतिवासरम्। विनयं ग्राह्यमाणोऽपि, सर्वकल्याणकारणम् ॥५॥
जातस्तथाप्ययोग्यत्वाद्, दुर्विनीतशिरोमणिः। एहीत्युक्तो व्रजत्येव, व्रजेत्युक्तो समेति सः ॥६॥
चैत्यवन्दनसद्ध्यान-कालप्रग्रहणादिषु। विघ्नं सुसाधुकृत्येषु, व्यर्थमेव चकार सः ॥७॥
ततस्तं तादृशं दृष्ट्वा, दुर्विनीतं दुराशयम्। निर्विण्णाः साधवः सर्वे, गुर्वन्तिकमुपागताः ॥८॥
विहितानतयः प्रोचु-र्भगवन्नयमाम्रकः। युष्मच्छिष्यः सदाकालं, कुरुते दुर्नयानलम् ॥९॥
इयन्तं कालमस्माभिः, सोढा एतस्य दुर्नयाः। सम्प्रत्युद्वेजिता दूरं, न वयं सोढुमीश्वराः ॥१०॥
अयं हि शास्त्रपाठादि-साधुकार्येषु सर्वदा। कुरुते विघ्नसङ्घातं, वार्यमाणोऽपि साधुभिः ॥११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदिदं पूज्यपादाना-मस्माभिः कथितं स्फुटम् । युक्तायुक्तं विजानन्ति, पूज्या एवात्र वस्तुनि ॥१२॥
गुरूणापि स आकार्य, पित्रा सार्धं तु तत्क्षणम् । जल्पितः कोमलालापैः, संवेगरसदायकैः ॥१३॥
यथा भो भो महाभाग ! त्वं धर्मार्थं समुद्यतः । धर्मार्थिना च सन्त्याज्या, दूरतोऽखिलदुर्नयाः ॥१४॥
भाव्यं च सुविनीतेन, वाञ्छता हितमात्मनः । वर्जनीयं च सर्वत्र, पराप्रीतिकमुच्चकैः ॥१५॥
तन्मुक्त्वा दुर्विनीतत्वं, विनयः शिक्ष्यतामहो । स्वर्गापवर्गसंसर्ग-सौख्यसम्पत्तिकारणम् ॥१६॥
श्रुतज्ञानं सुविज्ञानं, यशोराज्यादिसम्पदः । जायते चेष्टसंसिद्धि-र्विनयादेव देहिनाम् ॥१७॥
विनय एव विस्तारि, मूलं सद्धर्मशाखिनः । सर्वदा साधुवर्गस्य, विनयो वरभूषणम् ॥१८॥

कुलरूपवचनयौवन-धनमित्रैश्वर्यसम्पदपि पुंसाम् ।
विनयप्रशमविहीना, न शोभते निर्जलेव नदी ॥१९॥
न तथा सुमहार्घैरपि, वस्त्राभरणैरलङ्कृतो भाति ।
श्रुतशीलमूलनिकषो, विनीतविनयो यथा भाति ॥२०॥
विनयफलं शुश्रूषा, गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरति-र्विरतिफलं चाश्रवनिरोधः ॥२१॥
संवरफलं तपोबल-मथ तपसो निर्जरा फलं दृष्टम् ।
तस्मात्क्रियानिवृत्तिः, क्रियानिवृत्तेरयोगित्वम् ॥२२॥
योगनिरोधाद्भवसन्ततिक्षयः, सन्ततिक्षयान्मोक्षः ।
तस्मात्कल्याणानां, सर्वेषां भाजनं विनयः ॥२३॥

[प्रशमरति प्रकरणे का. ६७, ६८, ७२, ७३, ७४]

तदहो यदि कल्याणं, सदात्मनः समीहसे । सुशीलः सुविनीतश्च, नम्रः प्रियंवदो भव ॥२४॥
इत्यादिपेशलैर्वाक्यै-राम्रको गुरुणा भृशम् । सम्बोधितः समं पित्रा, साधूनामग्रतः स्फुटम् ॥२५॥
इत्यमृतरसस्यन्द-स्राविन्योऽपि गुरोर्गिरः । तीव्रकटुरसस्वादा-स्तेनामन्यन्त चेतसि ॥२६॥
ततश्चाकाम एवासौ, प्रतिपद्य गुरोर्वचः । उत्थाय च ततः स्थाना-त्तथैव समचेष्टत ॥२७॥
पूर्वक्रमेण भूयोऽपि, साधुभिः कथितं गुरोः । तेनापि सामभेदाभ्यां, प्रज्ञापितो मुहुर्मुहुः ॥२८॥
एवं प्रज्ञाप्यमानोऽपि, यावन्नोज्झति वक्रताम् । तावन्निष्कासितो गच्छात्, समं पित्रा स मूढधीः ॥२९॥
ततो जनकपुत्रौ तौ, तस्यामेव महापुरि । गतौ गच्छान्तरं तत्र, विधिना प्रविवेशतुः ॥३०॥
तत्रापि विनयं नैव, गुरोरपि करोत्यसौ । प्रत्युत साधुकृत्येषु, विघ्नान्नित्यं निरङ्कुशः ॥३१॥
ततः पूर्वक्रमेणैव, निष्कासितश्च सूरिभिः । समं पित्रा गतोऽन्यत्र, ततो निष्कासितोऽपि हि ॥३२॥
एवं तत्रैव तौ पुर्यां, गच्छानां शतपञ्चकम् । हिण्डितौ न च कुत्रापि, प्राप्नवन्तौ समाश्रयम् ।३३।
इत्थं यदा न लेभाते, स्थानं कुत्रापि तौ गणे । ततो रोदितुमारब्धो, बृहच्छब्देन तत्पिता ॥३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निम्बकेनोदितं तात !, किमर्थं रुद्यते त्वया ।
स्थविरः प्राह रे पाप !, रोदिमि तव चेष्टितम् ॥३५॥
दुर्विनीत ! दुराचार !, दुर्बुद्धे ! दुष्टभाषक ! । भवद्दोषेण कुत्रापि, पश्य स्थानं न लभ्यते ॥३६॥
किं करोमि ? क्व गच्छामि ?, ज्ञानविज्ञानवर्जितः । कमाश्रयामि रे मूढ !, तव दोषविदूषितः ॥३७॥
त्वं पुनर्वर्धसे नित्यं, विषपूर्ण इवोरगः । समं दुर्नयशतैर्धोरै-र्जनकोद्वेगकारकः ॥३८॥
तदिदमेकमेवात्र, रोदने मम कारणम् । न चान्यत्किञ्चिदेवास्ति, बुद्ध्यस्व यदि बुद्ध्यसे ॥३९॥
श्रुत्वेदं तस्य निम्बस्य, तत्प्रतिचित्तमागतम् । यथैष सुन्दरं ब्रूते, परिणामसुखावहम् ॥४०॥
अहो अहं महापापः, पितुः सन्तापकारकः । येन मे सर्वगच्छेषु, साधवः प्रविराधिताः ॥४१॥
इत्यादि बहुधात्मानं, चिरं चित्ते विनिन्द्य सः । पितरं प्राञ्जलिः प्राह, गाढं संविग्नमानसः ॥४२॥
तात ! त्वं मा कृथाः खेदं, मा मा रोदीश्च मा रुष । नाद्यप्रभृति कुत्रापि, दुर्विनयं करोम्यहम् ॥४३॥
तदुत्तिष्ठ वयं यामो, गच्छे श्रीमति मौलिके । गुणाढ्यसाधुसम्पूर्णे, दीक्षासूरेश्च सन्निधौ ॥४४॥
स्थविरः प्राह भो वत्स !, साधु साधु त्वयोदितम् । परं तत्र प्रवेशोऽपि, लप्स्यामहे वयं न हि ॥४५॥
यतस्त्वया समग्रोऽपि, गच्छ उद्वेजितो दृढम् । स कथं तव नामापि, मुग्धबुद्धे ! सहिष्यते ॥४६॥
तद्गच्छवासिनः सर्वे, त्वद्गन्धादपि बिभ्यति । को वा दुर्जनसंसर्गा-द्धीरोऽप्युद्वजते न हि ॥४७॥
निम्बकेनोदितं तात! यथैव त्वं प्रभाषसे । तथैव सर्वमेवैतत्, कार्यं नैवात्र संशयः ॥४८॥
तथापि गम्यतां तत्र, वारामेकां प्रविश्यताम् । तत्रत्यसर्वसाधूनां, दूरं [1]वारयतामपि ॥४९॥
ततो[ऽहं] यत्करिष्यामि, गच्छवासव्यवस्थितः । तदेतत्तात! निःशेषं, त्वमप्यालोकयिष्यसि ॥५०॥
एवं विधीयतां वत्से-त्युक्ते वृद्धेन सत्वरम् । समुत्थाय ततः स्थाना-द्गतौ द्वावपि तत्र तौ ॥५१॥
तावायान्तौ समालोक्य, भीताः सर्वेऽपि साधवः । अहो अयं समेत्यत्र, भूयोऽपि विघ्नकारकः ॥५२॥
इत्यादि ध्यायतां चित्ते, श्रमणानां क्षणान्तरम् । झटित्येव समायातौ, गुरूणामन्तिके तकौ ॥५३॥
कृत्वा सर्वां यथाज्ञातां, प्रतिपत्तिं यथोचिताम् । साधूनां च गुरूणां च, सद्भक्त्या नम्रगात्रकौ ॥५४॥
साधुदत्तासने तस्मि-न्नुपविष्टौ गुर्वनुज्ञया । सम्भाषितौ यथौचित्यं, गुरुभिः कोमलोदितैः ॥५५॥
ततो विज्ञपयामास, वृद्धः सूरिं कृतादरः । [2]यथातथैकवारं मां, प्रवेशस्व गणे विभो! ॥५६॥
यद्ययं मामकः पुत्रः, कथञ्चिन्निम्बकाभिधः । विधत्ते दुर्नयं भूय-स्ततो निष्कास्यतां खलु ॥५७॥
गुरुराह यथा भद्र!, तावत्तिष्ठ दिनत्रयम् । प्राघूर्णकोऽत्र पश्चाच्च, यद्युक्तं तत्करिष्यते ॥५८॥
अथ तौ गुर्वनुज्ञातौ, स्थितौ तत्र वरे गणे । साधुकृत्यानि सर्वाणि, प्रकुर्वाणौ प्रयत्नतः ॥५९॥
सर्वेषामपि साधूनां, गुरूणां च विशेषतः । विनयं कर्तुमारब्धो, निम्बकोऽपि यथाफलम् ॥६०॥
सामाचारीं च सम्पूर्णां, सुसाधुजनसेविताम् । यथाकालं यथाशक्त्या, प्रवृत्तः कर्तुमुच्चकैः ॥६१॥

१ वारयतामिति-BJC ॥ २ यथा यथैक° BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च कुर्वता तेन, रञ्जिताः सर्वसाधवः । दिनत्रये गते चैवं, ततः सूरेर्निवेदितम् ॥६२॥
यथैषः निम्बकः साधु-र्जातः सम्प्रति नम्रकः । सुशीलः सुविनीतश्च, धार्मिको धार्मिकप्रियः ॥६३॥
गुरुभिर्भाषितं तर्हि, तिष्ठत्वत्रैव शिक्षया । सम्यक्पालनीयश्च, शिक्षणीयो विशेषतः ॥६४॥
ततोऽसौ निवसंस्तत्र, गुर्वाराधनतत्परः । स्वकैरेव गुणग्रामैः, सञ्जातः साधुसंमतः ॥६५॥
विनीतत्वेन सत्कीर्ति-स्तस्य दूरे विजृम्भिता । आम्रक इति नामापि, सम्प्रवृत्तं चिरन्तनम् ॥६६॥
इत्थं वन्द्यश्च पूज्यश्च, श्लाघनीयः सतां मतः । तत्रास्ते रञ्जिताशेष-साधुश्रावकसंहतिः ॥६७॥
अन्यदा तेन वृद्धेन, विज्ञप्तो मुनिपुङ्गवः । यथाऽऽवयोः समग्रेषु, गच्छेष्वत्र महापुरि ॥६८॥
अप्रसिद्धिर्दृढं जाता, दुर्विनीतत्वसम्भवा । अयमप्याम्रकोऽगच्छ-त्साम्प्रतं सुविनीतताम् ॥६९॥
तदहं तेषु गच्छेषु, व्रजामि सकलेष्वपि । आराध्यैरभ्यनुज्ञातः, प्रमार्ष्टुं स्वकलङ्कताम् ॥७०॥
ततश्चैवं विधेहीति, सूरिणा जल्पिते सति । स वृद्धः सर्वगच्छेषु, ययावाम्रकसंयुतः ॥७१॥
सद्विनयविवेकादि-सद्गुणग्रामसम्पदा । सर्वेऽपि रञ्जितास्ताभ्यां, गच्छा यतिशताकुलाः ॥७२॥
[प्र]लब्धः साधुवादश्च, महत्त्वं पूज्यतां जने । सर्वत्र धार्मिकत्वेन, वल्लभत्वमलभ्यत ॥७३॥
इत्थं कलङ्कमुत्तार्य, स्वस्योच्चैर्दुर्नयाश्रयम् । आयातौ पितृपुत्रौ तौ, सानन्दौ निजके गणे ॥७४॥
तत्र तत्र स्थितौ सन्तौ, सर्वदा साधुसंमतौ । साधुसम्मतसम्पूर्ण-सामाचारीपरायणौ ॥७५॥
भावसारं चिरं कालं, कृत्वा संयममुत्तमम् । मृत्वाऽऽगमविधानेन, देवलोकमुपागतौ ॥७६॥
इत्थमाम्रकनामासौ, साधुर्दुर्विनयादिह । व्याहृतः सर्वगच्छेषु, निम्बक इति साधुभिः ॥७७॥
पुनः सोऽपि च सर्वत्र, विनयादिगुणसम्पदा । प्रापाम्रक इति ख्यातिं, लोके पूजासमन्विताम् ॥७८॥
तदिह सकलधर्मोर्वीरुहस्यादिमूलं, दिविजमनुजभाजां सम्पदामेकहेतुः ।
सह विशदसुकीर्त्या कारणं मोक्षलक्ष्म्याः, प्रवरविनयधर्मः शिक्ष्यतां चर्यतां च ॥७९॥

इति **विनयाधिकारः**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयाऽधिकारः १६

उक्तो विनयाधिकारः विनयवद्भिश्च विषया दूरतः परित्याज्या इत्यतस्तदनन्तरं विषयाधिकारमाह–

हृत्पूरकाशिनो यद्व-त्तृणेष्वपि सुवर्णधीः ।
दुःखात्मकेषु कामेषु, कामिनां सुखवासना ॥२९९॥
स्वप्ने दृष्टं यथा पुंसः, क्षणमात्रं सुखायते ।
प्रबुद्धस्य न तत्किञ्चि-देवं विषयजं सुखम् ॥३००॥
त्यजन्ति कामिनं कामा-स्त्यज्यन्ते ते न कामिभिः ।
कामानां न प्रियः कोऽपि, कामाः सर्वजनप्रियाः ॥३०१॥
शब्दादिविषयासक्ता, धर्ममार्गपराङ्मुखाः ।
अजरामरवन्मूढा-श्चेष्टन्ते नष्टचेतनाः ॥३०२॥
गर्त्ताशूकरसङ्काशा, विषयाशुचिकर्दमे ।
ये रमन्ते रमन्ते ते, नरके नरकीटकाः ॥३०३॥
विषयेषु विषीदन्तौ, न पश्यन्ति हिताहितम् ।
शृण्वन्ति न हितं वाक्य-मन्धबधिरसन्निभाः ॥३०४॥
आदौ हृद्यरसास्वादाः, पर्यन्ते परितापिनः ।
विषया विषवत्त्याज्याः, पुंसा स्वहितमिच्छता ॥३०५॥
एकवारं विषं हन्ति, भुक्तमेव न चिन्तितम् ।
विषयाश्च चिन्तनादेव, बहुधा च विनाशकाः ॥३०६॥
प्राप्ता अपि नरैः कामा, दुःखं ददति केवलम् ।
क्षणं दृष्टाः क्षणं नष्टा, गन्धर्वनगरोपमाः ॥३०७॥
यथा यथा निषेव्यन्ते, विषया मोहमोहितैः ।
तथा तथा प्रवर्धन्ते, यथा चाहुर्महर्षयः ॥३०८॥
उपभोगोपायपरो, वाञ्छति यः शमयितुं विषयतृष्णाम् ।
इच्छत्याक्रमितुमसौ, पूर्वाऽपराह्णे निजच्छायाम् ॥३०९॥
विषयेषु प्रसक्तानां, प्रजायन्ते सुदारुणाः ।
लोकद्वयविघातिन्यो, नानानर्थपरम्पराः ॥३१०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र कामिनां विपर्यस्तबुद्धीनां श्लोकद्वयमाह-**हृत्पूरकेत्यादि, हृत्पूरकाशिनो** धत्तूरभक्षकस्य यद्वद्येन प्रकारेण **तृणेष्वपि** वीरणादिवनस्पत्यवयवविशेषेष्वपि **सुवर्णधीः** कनकबुद्धिः **दुःखात्मकेषु** दुःखस्वभावेषु **कामेषु** शब्दादिषु सुखधीः सुखबुद्धिस्तथा तेन प्रकारेणेति ॥२९९॥

स्वप्ने दृष्टं यद्वत्पुंसो नरस्य क्षणमात्रं स्तोककालं **सुखायते** सुखं ददाति (अनुभवति), **प्रबुद्धस्य** विनिद्रस्य **न तत्किञ्चिदसत्त्वात्तस्य**, एवममुना प्रकारेण **विषयजं** विषयोद्भवं **सुखं** शर्मेति श्लोकद्वयार्थः ॥३००॥

अथ कामाः कामिनं त्यजन्तोपि न ते तेन त्यक्तुं शक्यन्त इति दर्शयन्नाह-
त्यजन्त्यादिकं श्लोकार्धं सुगमं, तथा **कामानां** शब्दादीनां **न प्रियो** न वल्लभः **कोऽपि** कश्चिदपि, **कामाः सर्वजनप्रियाः**; सकललोकवल्लभा इति श्लोकार्थः ॥३०१॥

अथ कामासक्तानां धर्मं प्रत्यनादरतां दर्शयन्नाह-**शब्दादीत्यादिश्लोकः** सुगमः ॥३०२॥

अथ कामिनामपायान् दर्शयन्नाह-गर्तेत्यादि, **गर्ताशूकरसङ्काशा** गर्ताशूकरो भुण्डस्तेन तुल्या **विषयाशुचिकर्दमे** विषया एवाशुचिकर्दमो विष्टाविलपङ्कस्तत्र **ये रमन्ते** क्रीडन्ति, ते क्रीडन्ति **नरके** प्रतीते **नरकीटका** नरा अपि कृम्यादिकीटतुल्या इत्यर्थः ॥३०३॥
अथ विषयासक्तानामेवान्धबधिरतुल्यतामाह-**विषयेष्वित्यादिश्लोकः** कण्ठ्यः ॥३०४॥

अथ विषयाणां विषतुल्यतामाह-आदावित्यादि, **आदौ** मूले **हृद्यरसास्वादा** मधुररसा इत्यर्थः, **पर्यन्ते** तत्सेवनान्ते परलोके वा **परितापकारिणः** परिणामदारुणा इत्यर्थः, **विषयाः** शब्दादयो **विषवत्कालकूटमिव त्याज्याः पुंसा** नरेण **स्वहितमात्मकल्याण-मिच्छताभिलषतेति** श्लोकार्थः ॥३०५॥

अथ विषादपि विषयाणां दुष्टत्वमाह-**एकवारमिति** श्लोकः स्पष्टः ॥३०६॥
अथ कामानामेव दुःखदायित्वमस्थिरत्वं च दर्शयन्नाह-**प्राप्ता अपीत्यादिश्लोकः** सुगमः ॥३०७॥
अथ विषया निषेव्यमाणा अपि वर्धन्त एवेति वक्तुमाह-**यथा यथेत्यादिश्लोको** व्यक्त एवेति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ कामासक्तानामैहिकामुष्मिकानर्थं प्रदर्शयन्नाह-**विषयेष्वित्यादि**, **विषयेषु** विषयादिषु **प्रसक्तानां** गृद्धानां **प्रजायन्ते** भवन्ति **सुदारूणा** सुतरां घोरा **लोकद्वयविघातिन्य** इहलोकपरलोकविघातकारिण्यो **नानानर्थपरम्परा अनेकापायसन्ततयः** इति श्लोकत्रयोदशकार्थः ॥३०९-३१०॥

इह पर्यन्तश्लोके विषयप्रसक्तानां लोकद्वयविघातिन्यो नानानर्थपरम्पराः प्रजायन्त इत्युक्तं, यथा च विषयप्रसक्ता नानाऽनर्थपरम्पराभाजो भवन्ति तथा लौकिकलोकोत्तरदृष्टान्तैः **शुकसारिका-मुखाख्यानैः** प्रदर्श्यते, तद्यथा-

अटव्यां लुब्धकैकेन, शुकेन सह सारिका । गृहीता विहितं नाम, **नीलकण्ठाभिधः** शुकः ॥१॥
सारिका **हरिमेलेति**, एवं गच्छन्ति वासराः । व्याधेन भणिता भार्या, प्रिये! प्राणप्रिये ! शृणु॥
श्रीमत्तालपुरे राजा, **विक्रमादित्यविक्रमः**। समस्तसम्पदां धाम, त्यागी भोगी महाबलः ॥३॥
समस्तपण्डितग्राम-ग्रामणीः **सिंहविक्रमः** । एतत्तस्मै प्रयच्छामि, द्वयं द्विरदगामिनि ! ॥४॥
गतः प्रवेशितो दृष्टो, [1]राज्ञाऽरण्यविचारिणा । पुरतः पादयोर्मुक्ते, तेन ते शुकसारिके ॥५॥
शुक उवाच-विबुद्धपुण्डरीकाक्ष ! क्षोणीपालशिरोमणे ! । प्रसीद दर्शनं देहि, सिंहविक्रमभूपते! ॥६॥
सारिकोवाच-परस्परविरोधिन्यौ, देहवक्त्रकृतास्पदे । बिभ्रते श्रीसरस्वत्यौ, समं राजन्नमोऽस्तु ते ॥७॥
सहस्रद्वितयं दत्त्वा, राज्ञा व्याधो विसर्जितः । सुवर्णपञ्जरस्यान्त-स्तयोः स्थानं निरूपितम् ॥८॥
सभामण्डपमध्यस्थ-स्वर्णपञ्जरमध्यगे । कथाकाव्यविनोदेन, तिष्ठतः शुकसारिके ॥९॥
इतश्च **हेमसुन्दर्या**, सिंहविक्रमभार्यया । शुकसारिकयोः केल्या, विवाहं कर्तुकाम्यया ॥१०॥
ननान्दा **विरतिर्नाम**, [2]प्रमोदेन निमन्त्रिता । आयातासौ समारब्धो, विवाहो वरमङ्गलैः ॥११॥
अत्रान्तरे समायातो, महासत्या समन्वितः । परस्परविसंवादे, **लिम्बदेवो** नृपान्तिकम् ॥१२॥
तयोश्च दर्शनं दृष्ट्वा, मूर्च्छिते शुकसारिके । मूर्च्छान्ते प्रश्नितो राज्ञा, शुको मूर्च्छानिबन्धनम् ॥१३॥
शुकेनोक्तं महाराज!, शृणु मूर्च्छानिबन्धनम् । स्वगृहे स्वशरीरे च, यद्वृत्तं मे तदुच्यते ॥१४॥

वसन्तसुन्दरे ग्रामे, श्रेष्ठी **सत्यप्रियोऽभवत्** ।
सती च गेहिनी तस्य, **सुशीला** सत्यवादिनी ॥१५॥

कालेन गच्छता जातः, पुत्रोऽहमनयोः प्रियः । यथाश्रुतपरिग्राही, मुग्धो **मुग्धकनामकः** ॥१६॥
परिणीता तद्वास्तव्या, सुगुप्तवणिजः सुता । **महासती**कृताह्वाना यथार्थीकृतनामका ॥१७॥
एवं व्रजति संसारे, पितरौ गुणशेषताम् । सञ्जातौ तत्पदे जातो, ह्यहं च गृहचिन्तकः ॥१८॥

---

१ राजारं BJC ॥ २ पुण्यभगिनी-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकोऽस्ति मद्गृहे दासो, गृहदासीकुक्षिसम्भवः । सप्तदशाब्ददेशीयो[१], विकारी कान्तदर्शनः ॥१९॥
शौचधर्मसमारूढा, करस्थताम्रभाजना । [२]जनालिरञ्जनाहेतो-र्बम्भ्रमीति महासती ॥२०॥
रजन्यां विजने जाते, गृहदाससमन्विता । मद्यं पिबति चाश्नाति, मांसं सा पापकारिणी ॥२१॥
अन्यदाऽजनि पुत्रश्च, दासेनास्यास्ततो द्रुतम् । मामाहूय महासत्या, सङ्क्षेपेण प्रजल्पितम् ॥२२॥
नाथ ! धात्रीसमानेया, कालक्षेपो न सङ्गतः । स्तनं पिबति येनायं, भवदीयस्तनन्धयः ॥२३॥
[३]मयापि च समानीता, [४]कृतार्थाभून्महासती । ततः सञ्जाततोषेण, निर्मलामलमौक्तिकैः ॥२४॥
अष्टादशसरो हार-स्तत्कृते कारितो मया । समर्पितो महासत्या, न चासौ प्रतिपद्यते ॥२५॥
हारः पुरुषनामायं, कथं मे लगिता गले । अन्योऽपि पुरुषाह्वो यो-ऽलङ्कारस्तिलकादिकः ॥२६॥

सोऽपि नाथ! न दातव्यो, तेनाऽपि न प्रयोजनम् ।
तदन्यः कोऽपि यो लोके, नरनामा नरोऽपि वा ॥२७॥

नासौ मे लगिता देहे, नाथायं मम निश्चयः । तन्मया चिन्तितं चित्ते, तद्गुणाक्षिप्तचेतसा ॥२८॥
श्रूयन्ते हि महासत्यः, सीताद्या जगतीतले । एषा हि सर्वनारीणां, शीलेन धुरि धार्यते ॥२९॥
मुग्धगृहे समायाता, ब्राह्मणा दक्षिणार्थिनः । पादान्न क्षालयत्येषा, दूरस्थैवावतिष्ठते ॥३०॥
ब्रूते च ब्राह्मणा यूयं, परं मे नियमः कृतः । धर्मार्थमपि नान्यस्य, नरस्याङ्गं स्पृशाम्यहम् ॥३१॥
श्वश्रूगुणानतिक्रम्य, सद्गुणैरुपरि स्थिता । तैरूचे च चिरं जीव, यथार्था त्वं महासती ॥३२॥
एकदा भणितो भ्राता, भगिन्या हितकाम्यया । वत्स! मध्यं न जानासि, गृहचारो न सुन्दरः ॥३३॥
प्रजल्पन्ती मया दृष्टा, नर्मगर्भं प्रिया तव । [५]सार्धं च गृहदासेन, भ्रूप्रविक्षेपसञ्ज्ञया ॥३४॥
न चैतत्सुन्दरं वत्स!, परिणामोप्यसुन्दरः । पुत्रोऽपि दाससञ्जात-स्त्वं पिता नाममात्रतः ॥३५॥
विश्रम्भो हि न कर्तव्यः, शुद्धानामपि योषिताम् । शुद्धा दीपशिखा वत्स!, मलिनीकुरुते गृहम् ।३६।
ननान्दुर्भाषितं श्रुत्वा, महासती च शङ्किता । मच्चरितं कथितं सर्वं, पत्युश्च पापयानया ॥३७॥
एकान्ते सह दासेन, रजन्यां मन्त्रितं तया । स्वामी ते गोकुले गन्ता, सहायस्त्वं द्वितीयकः ॥३८॥
गच्छन्तं विजनं ज्ञात्वा, ह्यागच्छन्तं तथैव च । रजन्यां वा दिवा वापि, जीविताद्व्यपरोपयेः ॥३९॥
प्रतिपन्नमनेनापि, मुग्धोऽसौ गोकुले गतः । लब्ध्वा छिद्रशतं चापि, न तेन व्यपरोपितः ॥४०॥
पुरस्वामी गृहस्वामी, द्रष्टव्यः पितृसन्निभः । प्रच्छन्नं वा प्रकाशं वा, न युक्तो मम मारितुम् ॥४१॥
रक्ता मत्ताश्च जल्पन्ति, यत्किञ्चन हतस्त्रियः । श्रोतव्यमेव तद्वाक्यं, न कर्तव्यं मनीषिणा ॥४२॥
एवं चिन्तयता तेन, लब्ध्वा छिद्रशतान्यपि । नैव व्यापादितो मुग्धः, क्षेमेण गृहमागतः ॥४३॥
अन्यदा भोजने चूर्णं, प्रक्षिप्तं पापयाऽनया । क्षीयन्ते तेन सर्वाण्य-प्यङ्गोपाङ्गानि मेऽनिशम् ॥४४॥

---

१ °यः सविकारः का° B C ॥ २ जनचित्तर° BC ॥ ३ तेनाऽपि-BJC ॥ ४ कृतार्थाजनिम° BJC ॥
५ समानं गृ° BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धातवो गलिताः सर्वे, कीकसानि शरीरके । केवलानि विलोक्यन्ते, मुखे विस्फारिताक्षिणी ॥४५॥
हस्तपादादिकं सर्वं, संवाहयितुमक्षमः । मुखाद्वागतिकष्टेन, मन्दं मन्दं प्रवर्तते ॥४६॥
भगिनी प्राङ्गणे सुप्ता, [1]ततः सङ्घुप्तपादया । महासत्या समागत्य, घण्टिका मम टालिता ॥४७॥
महावेदनया ग्रस्त-श्चार्तध्यानपरायणः । मृत्वा सोऽहं शुको जातो-ऽटव्यां च वटकोटरे ॥४८॥
ततो रोदितुमारब्धा, वक्षस्ताडनपूर्वकम् । हा हता मन्दपुण्याहं, विधिनापहृतो प्रियः ॥४९॥
हाहा विधे! त्वया नून-मेतदसङ्गतं कृतम् । यदि प्रियस्त्वया नीतो, धृताहं कस्य हेतवे ? ॥५०॥
भगिन्या भणिता पापे!, हा हा कपटकारिणि! । यत्त्वया विहितं किञ्चि-[2]त्तत्ते पततु मस्तके ॥५१॥
शरीरमग्निसात्कृत्वा, वितीर्य च जलाञ्जलिम् । स्वजनान्यजनाः सर्वे, स्वस्वस्थानमुपागताः ॥५२॥
दासदाससुतौ जातौ, मन्दिरे मम नायकौ । अर्धचन्द्रं गले दत्त्वा, भगिनी मे बहिष्कृता ॥५३॥
ये निजास्ते परे जाताः, परे च गृहनायकाः । अहो संसारवैरस्यं, नटपेटकसन्निभम् ॥५४॥
पक्षौ ममापि सञ्जातौ, सर्वलोकमनोहरौ । उड्डीयोड्डीय गच्छामि, वनारामनगादिषु ॥५५॥
अन्यदा लुब्धकैकेन, पातितो निजपाशके । व्यसन्तसुन्दरे ग्रामे, नीतोऽहं धनकाङ्क्षया ॥५६॥
गृहीतो दासपुत्रेण, कारितं वरपञ्जरम् । ददाति भोजनं नित्यं, शालिसिक्थफलादिकम् ॥५७॥
स्वगृहं गृहदासं च, दासपुत्रं महासतीम् । विलोक्य मे समुत्पन्नम्, जातिस्मरणमात्मनः ॥५८॥
श्यामवक्त्रा निरानन्दा, कोपकम्पितकन्धरा । मां दृष्ट्वा तत्क्षणादेव, सञ्जातेयं महासती ॥५९॥
गतत्राणो निरालम्बो, निरुद्धेन्द्रियपञ्चकः । दिनानि कतिचित्तत्राहं, महामुनिरिव स्थितः ॥६०॥
अन्यदा तु समाकृष्य, पञ्जराद्वीतशङ्कया । मारितोऽहं महाराज!, मोटयित्वा कृकाटिकाम् ॥६१॥
भूयोऽपि च शुको जातो, जातौ पक्षौ मनोहरौ । वनेषु वनखण्डेषु, स्वेच्छया विचरन्नहम् ॥६२॥
जालिकेन स्वजालेन, गृहीत्वा तव ढौकितः । त्वयापि पुत्रवद् दृष्टः, पाठितश्च यथोचितम् ॥६३॥
काव्यशास्त्रविनोदेन, नीतः कालः कियानपि । अद्य त्वेषा मया दृष्टा, पातकिनी महासती ॥६४॥
तेनाहं मूर्च्छितो राजन्!, भयसम्भ्रान्तमानसः । [3]क्षणं च न मया ज्ञातं, मृतेनेव सुखासुखम् ॥६५॥
[4]नानादोषौघकारिण्यः, सत्यशौचबहिष्कृताः । सुप्तैः स्वप्नेऽपि राजेन्द्र!, [5]न दृष्टाः सुखदाः स्त्रियः ॥६६॥
इदं नेत्रपथे वृत्त-मिदं शास्त्रे मया श्रुतम् । अस्ति चम्पापुरी नाम, पुरी शक्रपुरीसमा ॥६७॥
तन्निवासी सतां श्लाघ्यो, धर्मकर्मविचक्षणः । काष्ठश्रेष्ठीति विख्यातः, समस्ति जगतीतले ॥६८॥
मनःप्रिया प्रिया तस्य, वज्रेति कृतनामिका । भुञ्जानस्य तया सार्धं, कामभोगान् मनोहरान् ॥६९॥
वज्रायाश्च सुतो जातः, पूर्णपुण्यनिकेतनम् । समये प्रतिष्ठितं नाम, पुण्यसारेति यथार्थकम् ॥७०॥
पुण्यसारसमस्तस्य, कुर्कुटो वसति गृहे । पञ्जरस्थे प्रिये तस्य, वसतः शुकसारिके ॥७१॥
अन्यदा भणिता तेन, भार्या कोमलया गिरा । प्रिये! देशान्तरे यामि, ह्यर्थोपार्जनहेतवे ॥७२॥

---

१ ततो गुप्तं BJC ॥ २ J । तत्ते पतन्मस्तके-BC तत्तवैवापतत्-मु. ॥ ३ क्षणमात्रं न मया-CJ ॥ ४ नाना दोषकां BC ॥ ५ मा दृष्टा मा श्रुता स्त्रियः BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थहीनः पुमान् लोके, तृणादपि लघूयते । अर्थोऽयं सर्वसौख्यानां, गौरवस्य च कारणम् ॥७३॥

यतः-**अर्थयुक्तः कुरूपोऽपि, नलकूवरतायते ।**
जल्पन्नपि कठोराणि, ह्यर्थवानमृतायते ॥७४॥

यस्यार्थस्तस्य मित्राणि, यस्यार्थस्तस्य बान्धवाः । यस्यार्थः स पुमान् लोके, यस्यार्थः स च पण्डितः ॥
गृहचिन्ता त्वया कार्या, वार्या दुर्जनसङ्गतिः । शरीरस्थं सदा धार्यं, शीलाभरणभूषणम् ॥७६॥
शुकश्च सारिका चैषा, कुर्कुटोऽपि प्रबोधकृत् । पुण्यसारसमं ज्ञेय-मेतत् त्रिकमपि त्वया ॥७७॥
प्रतिपन्नमनया सर्वं, श्रेष्ठी तुष्टः स्वमानसे । सामग्रीं कर्तुमारब्ध, उदारस्थिरमानसः ॥७८॥
गृह्यन्ते वरभाण्डानि, निरूप्यन्ते सहायकाः । सम्बलानि विधीयन्ते, दम्यन्ते सुरभीसुताः ॥७९॥
एवं समस्तसामग्रीं, विधाय विधिना ततः । प्रशस्ते तिथिनक्षत्रे, दध्यादिकृतमङ्गलः ॥८०॥
प्राचीं दिशं समाश्रित्य, ससारासौ शनैः शनैः । बलीवर्दादिसार्थेन, स्थलेन सुखवर्त्मना ॥८१॥
देवशर्मद्विजोऽप्येति, प्रत्यहं श्रेष्ठिमन्दिरे । पुष्पाण्यादाय निःशङ्को, देवपूजनहेतवे ॥८२॥
मिथो जल्पेन हास्येन, नर्मणा दानकर्मणा । वज्राया मानसं तेन, द्विजेन स्ववशीकृतम् ॥८३॥
क्वचिद्भुङ्क्ते क्वचिच्छेते, तत्रैव विगतत्रपः । सारिका च शुकं वक्ति, निःस्पृहा कर्कशं वचः ॥८४॥
शुक! त्वं न शुना तुल्यः, स्वस्वामिगृहरक्षकः । स्वामिभक्तो विनीतश्च, कृतज्ञः प्रभुभक्तिमान् ॥८५॥
शालिसिक्थानि साराणि, दाडिमीबीजपुञ्जकम् । तातेन ते स्वहस्तेन, दत्तं तदपि विस्मृतम् ॥८६॥
तुण्डिक! त्वं कृतघ्नोऽसि, ह्यद्रष्टव्योऽसि सर्वदा । नोपकारो धृतश्चित्ते, तातस्यापि न लज्जितम् ॥
अहो पञ्चदिनाः प्राणाः, प्रियास्तेन यशः स्थिरम् । एवं निर्भर्त्स्यमानोऽपि, तया कर्कशया गिरा ॥
शुकश्च समयापेक्षी, काष्ठमौनेन तिष्ठति । न[1] नारीवत्पुमांसस्तु, ह्यनालोचितकारिणः ॥८९॥
प्रविशन्तं समालोक्य, द्विजं पश्चिमवर्त्मना । जजल्प सारिका रुष्टा, साक्षेपमीदृशं वचः ॥९०॥
रे रे दासीसुतः कोऽय-मकर्तव्यविधायकः । अपद्वारेण तातस्य, गृहमागन्तुमिच्छति ॥९१॥
सविषादं देवशर्मेण, जल्पितं वज्रया सह । प्रिये ! शृणोसि वाक्यानि, सारिका यानि जल्पति ॥९२॥
सुखं दुःखायते नूनं, भविता च विडम्बना । पञ्जरस्था यतश्चैषा, वर्धते विषकन्दली ॥९३॥
शुकेन स श्रुतो जल्प, आत्मरक्षां प्रकुर्वता । उच्चैःकारं वचस्तेन, बृहच्छब्देन जल्पितम् ॥९४॥
सारिके! त्वं न जानासि, स्त्रीणां पार्ष्णिकयोर्मतिः । स एव हि पिता मह्यं, यो मातुर्मम वल्लभः ॥
तत् श्रुत्वा रञ्जितो विप्रो, वज्रा प्रहसिता हृदि । सारिकाया मनः क्रूरं, सानुकूलं शुकस्य च ॥९६॥
गता रात्रिर्दिनं जातं, देवशर्मा गतो गृहे । पञ्जरात्सा समाकृष्टा, सारिका पापवज्रया ॥९७॥
रसन्ती विरसं शश्व-त्तारं तरललोचना । मारिता दुःखमारेण, मोटयित्वा कृकाटिकाम् ॥९८॥
भिक्षार्थं तद्गृहे प्राप्तः, साधुसङ्घाटकोऽन्यदा । तयोर्भणितमेकेन, निरीक्ष्य गृहकुर्कुटम् ॥९९॥

---

१ न स्त्रीवत्पुमांसो ऽप्यनालोचित° BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजा पृथ्वीपतिर्भावी, भोक्ष्यते योऽस्य मञ्जरीम् । श्रुतमेतद् गृहस्यान्तः-स्थितेन ब्रह्मकर्मणा ॥१००॥
प्रदानं वा निदानं वा, यदा कोऽपि न यच्छति । स्वत एव ततः साधू, निर्गतौ मन्दिरात्ततः ॥१०१॥
वज्रा वज्रोपमं वाक्यं!, भणिता तेन द्विजातिना । गृहकुर्कुटमांसेन, भोक्तव्यमद्य मे प्रिये! ॥१०२॥
पुण्यसारसमानोऽयं, कुर्कुटो मम वर्तते । अन्यकुर्कुटमांसेन, भोजनं तव दीयते ॥१०३॥
[1]प्रतिपन्नं न चैतेन । तया सोऽपि निपातितः । ततो [2]राद्धुं समारब्धा, पुत्रोऽपि गृहमागतः ॥१०४॥
मातर्मे भोजनं देहि, पाठको मां हनिष्यति । उपविष्टस्तया दत्ता, सैव कुर्कुटमञ्जरी ॥१०५॥
लेखशालां गतः पुत्रो, जारश्च गृहमागतः । निविष्टो भोजनं कर्तुं, पिशितं परिवेशितम् ॥१०६॥
न दृष्टा मञ्जरी तेन, वज्रा पृष्टा क्व मञ्जरी ? । तयोक्तं पुण्यसारेण, भक्षिता सा न विद्यते ॥१०७॥
भणितं मे[3] तया कार्यं, किमेतत्पिशितेन मे । पुत्रोदरं विपाट्याशु, मञ्जरी मम दीयताम् ॥१०८॥
प्रतिपन्नं तया धात्री, धावित्वा पुरतो गता । पुण्यसारं समादाय, नष्ट्वा देशान्तरे गता ॥१०९॥
निशाकरपुरे तत्र, निस्सन्तानो नृपो मृतः । [4]दिव्यैश्च पुण्यसारोऽयं, प्रपन्नोऽजनि भूपतिः ॥
इतश्चेतश्च सर्वत्र, पुण्यसारो गवेषितः । वज्रया न पुनर्दृष्टो, जाता वज्रसमाहता ॥१११॥
देवशर्मद्विजेनोक्ता, किं दृष्टो निजपुत्रकः । तयोक्तं न [5]मया दृष्ट-स्तेनोक्तं नाशितस्त्वया ॥११२॥
परित्यक्तो द्विजेनापि, तया सह समागमः । शुशोचासौ विशेषेण, दुःखव्रातसमाहता ॥११३॥
न पतिर्न च पुत्रो मे, जारोऽपि च पराङ्मुखः । इहैव विधिना दत्तो, विपाकः पापकर्मणाम् ॥११४॥
दरभग्नं गृहं जातं, गृहाचारः क्षयं गतः । शिष्टैः समागमो मुक्तो, भृत्यैश्च भेजिरे दिशः ॥११५॥
काष्ठश्रेष्ठी समायातो, गृहाचारदिदृक्षया । दृष्टं निजगृहं तेन, शून्यं श्मशानसन्निभम् ॥११६॥
विस्मयापन्नचित्तेन, भणितः श्रेष्ठिना शुकः । पुण्यसारस्तव भ्राता, किमर्थं नेह दृश्यते ? ॥११७॥
कुर्कुटः केन कार्येण, पर्यटन्नावलोक्यते । पञ्जरं शून्यमाधाय, क्व गता सारिका वद? ॥११८॥
शुकोऽपि मौनमाधाय[6], स्थितो नैव प्रजल्पति । रुष्टेन श्रेष्ठिना प्रोचे, साक्षेपं कर्कशं वचः ॥११९॥
पालितो लालितो नित्यं, भोजितो भव्यभोजनम् । रेरे कीर! परो जातो, वार्तामात्रेऽपि संशयः ॥१२०॥
अश्रूणि मुञ्चता तेन, शुकेनेदं बभाषिरे । त्वं तात! न विजानासि, तर्जयन्तीं पुनः पुनः ॥१२१॥
वस्त्रं निष्पीलयन्तीं च, स्थगयन्तीं मुखं मुहुः । स्वभार्यां विहिताकार्यां, वज्रां वज्रसमप्रभाम् ॥१२२॥
मुञ्च मां पञ्जराद्येन, सर्वं वच्मि परिस्फुटम् । मोचितः कथितं तेन, मूलतो गृहचेष्टितम् ॥१२३॥
वज्रा मूलमनर्थानां, सङ्क्षेपादिति भाव्यताम् । चित्ते खेदो न कर्तव्यो, ज्ञाततत्त्वेन धीमता ॥१२४॥
स्त्रियो हि सर्वदोषाणां, मूलमाहुर्मनीषिणः । यदेताश्च प्रकुर्वन्ति, कथितुं तन्न पार्यते ॥१२५॥

यतः-हंसेण समं रमिऊण, कमलिणी रमइ महुयरेणावि ।
सियकसिणनिव्विसेसाइं, हुंति महिलाण हिययाइं ॥१२६॥

---

१ तत्प्रतिपन्नमेतेन तथा-BJC ॥ २ राद्धुमारब्धा-BC॥ ३ ते-BC ॥ ४ दिव्यैः पुण्य° BJC ॥ ५ मे दृ° BJC॥ ६ °मादाय-BC॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेणं विणिम्मिया उ, विहिणा सो चेव जइ परं मुणइ ।
महिलाणमणं बहुकूड-कवडभरियं दुरवगाहं ।।

रक्षणीयस्त्वया तात!, सदाप्यात्मा प्रयत्नतः । तन्नास्ति यन्न कुर्वन्ति, स्त्रियः कोपवशं गताः ॥१२८॥
तातात्मा विधृतः कष्टा-न्मया वार्ता निवेदिता । साम्प्रतं च वनं यामि, दुःखदग्धस्तवाज्ञया ॥१२९॥
श्रेष्ठिना भणितं वत्स!, गच्छ स्थानं समीहितम् । भूयोऽपि दर्शनं भूया-देवमुक्त्वा गतः शुकः ॥१३०॥
तिर्यग्योनौ विजातोऽपि, वरमेषो विहङ्गमः । यस्यैषा कोमला वाणी, विवेकश्च सुनिर्मलः ॥१३१॥
कृतं मे गृहवासेन, विचारेणापि मे कृतम् । सर्वसङ्गं परित्यज्य, जिनधर्मं करोम्यहम् ॥१३२॥
द्वारि सार्थः समायात-स्तत्रैवावासितश्चिरम् । राजा दृष्टश्च पृष्टश्च, व्रतं देव! करोम्यहम् ॥१३३॥
अष्टाह्निकामहं कृत्वा, महामहपुरस्सरम् । सप्तक्षेत्र्यां धनं दत्त्वा, निश्चक्राम गृहादसौ ॥१३४॥
सुस्थिताचार्यपादान्ते, दीक्षां जग्राह निर्मलाम् । विजहार महीपीठे, पठन्नङ्गादिकं श्रुतम् ॥
पतिपुत्रपरित्यक्ता, निस्सारा शीलवर्जिता । राजगृहीतसर्वस्वा, पुरादपि बहिष्कृता ॥१३६॥
वज्रा वज्राहतेवोच्चैः, पर्यटन्ती महीतले । निशाकरपुरे प्राप्ता, यत्राजन्यङ्गजो नृपः ॥१३७॥
जातः काष्ठानगारोऽपि, गीतार्थः श्रुतनिर्मलः । गुर्वाज्ञयाथ कार्येण, निशाकरपुरे गतः ॥१३८॥
षष्ठपारणके काष्ठो, भिक्षामटन् गृहे गृहे । कथञ्चिद्भावियोगेन, वज्राया गृहमागतः ॥१३९॥
मध्यस्थया तया दृष्टो, दूमिता निजमानसे । मारयाम्मि ह्युपायेन, केनाप्येवं ततः सुखम् ॥१४०॥
भिक्षाभोजनमध्यस्थं, निजाभरणमेतया । कृत्वा [चं] क्रूरचित्तेन, दास्या हस्तेन दापितम् ॥१४१॥
नातिदूरं गते तस्मिन्, कोलाहलः कृतोऽनया । शस्त्रव्यग्रकरास्तूर्ण-माजग्मुर्दण्डपाशिकाः ॥१४२॥
तैरूचे किंनिमित्तोऽयं, भद्रे! रोलो विधीयते । सङ्कल्प्य च तयाभाणि, तेषामुत्तरमीदृशम् ॥१४३॥
[1]भूषणानि बहिर्मुक्त्वा, प्रविष्टाहं गृहान्तरे । भिक्षार्थं निर्गता याव-त्तावच्छून्यः करण्डकः ॥१४४॥
यात यात द्रुतं लात, यावद् दूरं न गच्छति । धावितास्ते निरुद्धोऽसौ, भिक्षामध्ये निरूपितम् ॥१४५॥
भूषणं विस्मितो लोको-ऽप्यहो वेषविडम्बना । तलवरेण साश्चर्यं, नरेन्द्राय निवेदितम् ॥१४६॥
साधुवेषधरः कोऽपि, पाखण्डी श्वेतवस्त्रभृत् । लोप्त्रहस्तो मया लब्धः, को दण्डस्तस्य कथ्यताम् ॥
व्रतं च तस्करत्वं च, विरुद्धमिव लक्ष्यते । आनीय दर्शयास्माकं, येन दण्डं करोम्यहम् ॥१४८॥
काष्ठः कृतमहाकष्टः, सर्वसत्त्वहितावहः । तलारेण समानीतः, सर्वतो जनवेष्टितः ॥१४९॥
दर्शनादेव विज्ञातो, धात्र्या काष्ठमहामुनिः । प्रधाविता च वेगेन, सम्भ्रमभ्रान्तलोचना ॥१५०॥
पादग्राहं विधायासौ, रुदिता दुःखदुःखिता । पृष्टा सा च नरेन्द्रेण, धात्री रोदनकारणम् ॥१५१॥
तयापि कथितं सर्वं, यावदेष पिता तव । तत् श्रुत्वा लज्जितो राजा, स्थितोऽधोमुखदृष्टिकः ॥१५२॥
धात्र्याभाणि महाभाग!, विश्वविश्वहितावह! । कथं ते व्यसनं जातं, मुनिराह न वेद्म्यहम् ॥१५३॥

---

१ आभरणानि- BC ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजानितमिदं जात-मचिन्तितमतर्कितम् । पूर्वजन्मकृतस्याय-मुदयः कर्मणां मम ॥१५४॥
अत्रान्तरे समायाता, वज्रादासी मनःप्रिया । ज्ञातवृत्तान्तया सर्वं, तया राज्ञे निवेदितम् ॥१५५॥
पुरुषैरानायिता वज्रा, दृष्टा धात्री सुतो नृपः । भर्ता च लोकमध्यस्थ[1]:, कूटदूषणदूषितः ॥१५६॥
अलमत्र विचारेण, ह्यात्मलाघवकारिणा । वज्रा विसर्ज्यते दूरं, तातश्चात्रैव धार्यते ॥१५७॥
माता विसर्जिता दूरं, दत्त्वा सम्बलमात्रकम् । स्थितस्तत्रानगारोऽसौ, काष्ठः कष्टकृदग्रिमः ॥१५८॥
पुण्यसारनृपो नित्य-मप्रमादी जनान्वितः । वन्दनार्थं समभ्येति, शृणोति च जिनोदितम् ॥१५९॥
धर्मं जीवदयासारं, सर्वसत्त्वहितावहम् । स्वर्गापवर्गसंसर्ग-साधकं पापबाधकम् ॥१६०॥
स्वल्पैरेव दिनै राजा, सञ्जातो धर्मकोविदः । जनोऽपि जैनधर्मस्य, कारको बहुशोऽभवत् ॥१६१॥
सञ्जातमत्सरैर्विप्रै-रथान्योन्यं च मन्त्रितम् । तपसा वचसा लोकः, सर्वोऽपि श्रावकीकृतः ॥१६२॥
तदस्य गच्छतो बाढं, छायाभ्रंशं प्रकुर्महे । येन भूयोऽपि लोकोऽयं, स्वं स्वं धर्मं प्रपद्यते ॥१६३॥
इत्यालोच्य स्थिता विप्रा, मत्सरच्छन्नबुद्धयः । नास्ति कृत्यमकृत्यं वा, पापोपहतचेतसाम् ॥१६४॥
व्यतीते चाथ वर्षर्त्तौ, प्राणिनां जीवितप्रदे । शरत्कालः समायातो, मलिनत्वापनोदकृत् ॥१६४॥
दिग्यात्राभिमुखा यत्र, भूपाः पङ्कविवर्जिताः । पन्थानः पक्वशस्यकाः, सश्रीका ग्रामभूमयः ॥१६५॥
मुमुदिरे बलीवर्दा, ननन्दुः सितपक्षिणः । प्रम्लानं कोकिलैर्यत्र, रेजुर्नक्षत्रराजयः ॥१६६॥
मुनय इव मार्गस्थाः, सरितः शालिमञ्जरी । [2]कुलाङ्गनेव नमिताङ्गा, गन्धघ्राणमनोहरा ॥१६७॥
अधःकृतमलान्युच्चै-र्जनतापहराणि च । स्वच्छानि यत्र तोयानि, मनांसीव महात्मनाम् ॥१६८॥
निर्मलो रजनीनाथः, काशा यत्र चकासति । विबुद्धजलजैर्यत्र, हसन्तीव जलाशयाः ॥१६९॥
व्यतीते कार्तिके मासे, सर्वलोकमनोहरे । गुणस्थसर्वसाधूनां, विहारकरणोचिते ॥१७०॥
अनुशिष्टिं सर्वलोकानां, दत्त्वा धर्मसमाश्रयाम् । पुण्यसारं नृपं धर्मे, कृत्वा निश्चलमानसम् ॥१७१॥
चातुर्मासकमाधाय, निराहारो महामुनिः । बहिर्विचरणाहेतोः, कार्तिक्यामेव निर्गतः ॥१७२॥
गतानुगतिकाः केचि-त्केचिद्राजानुरोधतः । गुणानुरागतः केचि-त्तं काष्ठमनुवव्रजुः ॥१७३॥
अत्रान्तरे समायाता, काचिदव्यक्तलिङ्गिनी । सन्निरुद्धय मुनेर्मार्गं, स्थिता दुर्गतिगामिनी ॥१७४॥
[3]निर्गतिकां निर्द्धनां दीनां, सगर्भां बन्धुवर्जिताम् । न युक्तं नाथ ! गन्तुं ते, मां मुक्त्वान्यत्र साम्प्रतम् ॥
अवश्यं यदि गन्तव्यं, निर्वाहो मम चिन्त्यताम् । दुःखिताहं यतो नाथ !, गर्भोऽयं स्थापितस्त्वया ॥
साधुना भणितं भद्रे !, न युक्तं वक्तुमीदृशम् । उक्तानि हि दुरुक्तानि, दुःखं ददति देहिनाम् ॥१७७॥
असम्बद्धं न वक्तव्यं, लोकद्वयविबाधकम् । सुलभो हि मृषावादो, दुर्लभं सत्यभाषणम् ॥१७८॥
साधवोऽपि यदि जातु, कुर्वतेऽलीकभाषणम् । तदास्मादृशलोकानां, मुद्रिता सत्यसङ्कथा ॥१७९॥
अन्यस्त्रीणामिवास्यापि, जन्म [4]योनेः प्रजायताम् । मदीयो यद्ययं गर्भो, मिथ्या चेदन्यथा तदा ॥१८०॥

१ °स्थो असदूदूषण° BJC । २ BJC । छादिताङ्गा कुलस्त्रीव-मु. । ३ BJC । निराश्रयां तथा दीनां-मु. । ४ पापे!-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निपात्य जठरं सद्यो, गर्भो निपतितो भुवि । सापि वेदनया ग्रस्ता, पश्चात्तापसमाहता ॥१८१॥
यथावृत्तमवादीदं, भो भो शृण्वन्तु नागराः ! । कारिताहं द्विजैर्दत्त्वा, दीनारशतपञ्चकम् ॥१८२॥
मयापि पापकारिण्ये-हलौकप्रतिबद्धया । परलोकं परित्यज्य, कृतं पातकमीदृशम् ॥१८३॥
लोकः स्थिरतरो जातो, धर्मे सर्वज्ञभाषिते । पुण्यसारनरेन्द्रेण, ब्राह्मणा करदीकृताः ॥१८४॥
गृहीता वेश्यया पुत्री, सा मृता दुर्गतिं गता । काष्ठोऽपि विहृतोऽन्यत्र, प्रकाश्य जिनशासनम् ॥१८५॥

इति **काष्ठकथानकं** परिसमाप्तम्

पुराणोक्तं स्त्रीचरित्रम्

अन्यदपि महीनाथ !, भण्यमानं निशाम्यताम् । स्त्रीचरित्रं पुराणेषु, यदवाचि विचक्षणैः ॥१॥
शुकः कथितुमारब्धो, राजा शुश्राव सादरम् । भुक्तौ श्रीधर्मराजस्य, लोचनानन्ददायिनी ॥२॥
अमरावतीव शक्रस्य, ह्यस्ति चम्पापुरी पुरी । निधानं सर्वसौख्याना-मास्पदं सर्वसम्पदाम् ॥
विचारचतुरो राजा, विचारकुशला प्रिया ।
विचारधवलः पुत्रो, विचारधवला सुता ॥४॥
तत्रैव नगरे श्रेष्ठी, धनो धनदसन्निभः । बभूव गेहिनी तस्य, धारिका धर्मधारिका ॥५॥
अपारासारसंसार-वृक्षस्य फलसन्निभा । सञ्जाताऽविरतिर्नाम, दुहिता विषकन्दली ॥६॥
सत्यशौचविनिर्मुक्ता, दुर्विनीता दुराशया । दुष्टा दुष्टसमाचारा, मातुरुद्वेगकारिणी ॥७॥
श्रमणं ब्राह्मणं दृष्ट्वा, दूरतः सा पलायते । पातकिनं नरं दृष्ट्वा, हृष्टा भवति मानसे ॥८॥
न युक्तं दूषणं वक्तुं, सतां सदपि सर्वदा । परं श्रुतानुवादोऽयं, [1]न तेन दोषहेतवे ॥९॥
कौमार्येऽपि कुशीलत्वा-द्दलितं शीलमेतया । दीयमाना न केनापि, परिणीता कुलसूनुना ॥१०॥
ततः समानजातीयो, निर्धनो रोरनन्दनः । पित्रा बहुधनं दत्त्वा, गृहजामातृकः कृतः ॥११॥
परिणीतैव तेनैषा, न पुनर्वशवर्तिनी । स्वच्छन्दचारिणी जाता, [2]भर्तुश्च दुःखदायिनी ॥१२॥
त्यक्तकुलक्रमाचारा, स्वैरिणी विटसङ्गता । सत्यशौचबहिर्भूता, निर्मर्यादा निरर्गला ॥१३॥
जानन्नपि न जानाति, पश्यन्नपि न पश्यति । कथितोऽपि करोत्येव, पिता गजनिमीलिकाम् ॥१४॥
सापि सक्तान्यदा विप्र-पुत्रे मदनविग्रहे । अत्यन्तरक्ता सा तत्र, विश्वं पश्यति तन्मयम् ॥१५॥
अन्यदा नक्तमानीता, तेनैषा निजमन्दिरे । सुप्ता तत्रैव निःशङ्का, यावज्जातो दिवाकरः ॥१६॥

१ मु. । तेन नो-J । तेन मो-BC ॥ २ भर्ता मुखनिरीक्षकः-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टैषा विप्रगेहिन्या, निजतल्पगता सती। गृहीता चाग्रकेशेषु, तयैषा ह्यनया च सा ॥१७॥
कृतरोलं महाघोरं, दुष्टं दुर्वचनाश्रयम्। कृतहासं सर्वलोकानां, जातमायोधनं तयोः ॥१८॥
हेलया मिलितो लोको, मुष्टो मदनविग्रहः। गृहीतं गृहसारं च, मुक्तैषा श्रेष्ठिलज्जया ॥१९॥
अन्येद्युर्भणितो विप्रो, यद्यहं तव वल्लभा। तदैषा वैरिणी पापा, हन्तव्या निजगेहिनी ॥२०॥
प्रतिपन्नमनेनापि, छिद्रान्वेषणतत्परः। नयत्यहानि सङ्क्लिष्ट-चेता मद्गनविग्रहः ॥२१॥
आरामादन्यदा तेन, घटे क्षिप्त्वा महोरगः। [1]आनीतः स्थापितश्चापि, गृहान्तर्गतबुद्धिना ॥२२॥
रजन्यां भणिता भार्या, घटेऽमुत्र मया प्रिये !। मनोज्ञा मोदका मुक्ता-स्तानानीय ममार्पय ॥२३॥
गता सोद्घाटितं द्वारं, दष्टा सर्पेण दक्षिणे। करे कृतमहाक्रन्दा, [2]पतिता विषविह्वला ॥२४॥
[3]मुक्ता च तत्क्षणं प्राणै-स्तेन लोकस्य साधितम्। दष्टा भुजङ्गमेनैषा, मृता सम्प्रति लक्ष्यते ॥२५॥
नीता च बन्धुवर्गेण, श्मशाने भस्मसात्कृता। गृहदास्या भणितो विप्रः, [4]क्व स्वामिंस्तव मोदकाः ? ॥
शून्यो मया घटो दृष्टो, [5]दष्टेयमहिना कथम् ?। तेनोक्तं किं विचारेण ?, नूनं भ्रान्तिर्ममाभवत् ॥
दासीतो ज्ञातवृत्तान्तै-र्बन्धुभिः कृतनिश्चयैः। [6]प्रोक्तं नराधिपस्येदं, भार्या पत्या विनाशिता ॥२८॥

भूपेन शब्दितो विप्रः, किं भार्या घातिता त्वया ?।
स प्राह न मया किन्तु, सर्पदष्टा हि सा मृता ॥२९॥

बन्धुभिर्भणितं सत्यं, वाच्यं विप्र ! न कृत्रिमम्। स प्राह शुद्धिराधेया, वचनं न हि केवलम् ॥३०॥
ततस्तस्य गृहाद्दासी, समाहूता समागता। तया तु कथितं सर्वं, यथा तेन कृतं तथा ॥३१॥
सगर्भस्त्रीविघातेन, पापमेकमुपार्जितम्। अलीकेन द्वितीयं च, पापः पापैर्न तुष्यति ॥३२॥
अरे यदि घटे मुक्ताः, क्व गतास्तव मोदकाः। येन दास्या घटो दृष्टो, मोदका नावलोकिताः ॥३३॥
विचारचतुरो राजा, विचारकुशला प्रिया। विचारधवलः पुत्रो, विचारधवला सुता ॥३४॥
विचारो यदि नात्रापि, तदा कुत्र भविष्यति ?। सावेशमभिधायैवं, बन्धवो मौनमाश्रिताः ॥३५॥
नगररक्षको राज्ञा, भणितो रक्तचक्षुषा। अरे विनाशयोग्योऽयं, विप्रो मदनविग्रहः ॥३६॥
तेनापि च करे कृत्वा, नीतः श्मशानसन्निधौ। वटे विशालशाखायां, गले बद्ध्वावलम्बितः ॥३७॥
सापि धारिकया प्रोक्ता, सोपालम्भं पुनः पुनः। गच्छ वत्से ! न युक्तं ते, स्वभर्तुरपमाननम् ॥३८॥
सापीदं वचनं श्रुत्वा, कृत्वा च भृकुटिं मुखे। प्राह याम्युपरोधेन, सम्प्राप्ता भर्तुरन्तिके ॥३९॥
अनुकूलस्याऽपि तस्यैषा, प्रतिकूलविधायिनी। सोऽपि सुप्तोऽवधीर्येमां, निद्रया सह निस्पृहः ॥४०॥
सद्भावस्नेहसम्पूर्णे, रक्ते रागोऽपि सङ्गतः। विरक्ते च पुना रागः, सेयं पूर्णा विडम्बना ॥४१॥
इतश्चेतश्च निक्षिप्त-लोचनैषा विलोकिता। तस्करेण ततस्तेन, निलीय निभृतं स्थितम् ॥४२॥
चन्दनागुरुकर्पूर-पुष्पताम्बूलपूरितम्। पटलं जलपात्रं च, करे कृत्वा विनिर्गता ॥४३॥

---

१ आनीतो मुक्तो (क्ता-C) मध्ये, गृहस्य गतबुद्धिना-BJC। २ निर्गता-BJC। ३ क्षणेन मुक्ता प्राणैः BJC।
४ क्व ते स्वामिन् मोः BJC। ५ किं सर्पेणोपजीविता-BJC। ६ कथितं-BJC।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चौरक्षात्रेण तेनैषा, चलिता सत्वरैः पदैः । चौरोऽपि पृष्टतो लग्नो, दूरस्थो यात्यनाकुलः ॥४४॥
सापि वेगेन सम्प्राप्ता, श्मशानेऽशिवसङ्कुले । ज्वलज्ज्वालाकुले रौद्रे, भीरुसन्त्रासकारिणि ॥४५॥
इतस्ततः परिभ्रम्य, वटशाखावलम्बितः । दृष्टः सोऽप्यनयाभीष्टो, मुक्तः प्राणैरधोमुखः ।४६॥
कच्छाबन्धं विधायैषा, गृहीत्वा ज्वलदुल्मुकम् । वटशाखां समारुह्य, धृत्वा रज्जुमुपायतः ॥४७॥
[1]क्षिप्तो ह्यसौ महीपीठे, समुत्तीर्णा ततः स्वयम् । स्नपितो वारिणा तेन, विलिप्तश्चन्दनेन च ॥४८॥
बद्धानि दिव्यपुष्पाणि, मस्तके मल्लग्रन्थिना । कर्पूरपूरसन्मिश्री-कृत्य ताम्बूलबीटकम् ॥४९॥
प्रक्षिप्य स्वे मुखे पश्चा-द्विधाय चार्धचर्वितम् । स्वमुखेन मुखे तस्य, क्षिपत्यधरधावनम् ॥५०॥
करोति गाढमालिङ्गं, शेते तेन समं क्षणम् । वेतालश्चिन्तयामास, किमिदं क्रियतेऽनया ॥५१॥
निशीथे प्रेतसङ्कीर्णे, घूकघूत्कारभीषणे । निन्दनीयेऽतिबीभत्से, जीवमुक्तकलेवरे ॥५२॥
अहो दृष्टा मया नार्यो, [2]ह्यकार्यकरणोद्यताः । परमेतादृशी पापा, न श्रुता नावलोकिता ॥५३॥
करोमि शिक्षणमस्याः, प्रविश्यास्मिन् कलेवरे । वेतालेनेति सञ्चिन्त्य, ततश्चाधरधावनम् ॥५४॥
कुर्वन्त्याः खण्डितो मूला-दधरश्चापि नाशिका । कर्णौ विकीर्णतां नीतौ, हहा हसनपूर्वकम् ॥५५॥
वेतालो वटमारूढ-स्ततः सापि तथाविधा । चलिता दृष्टमार्गेण, तस्करोऽपि च पृष्ठतः ॥५६॥
समायातः प्रविष्टश्च, तद्गृहे निश्चलः स्थितः । पश्यामि तावदेतस्या, इदानीमपि चेष्टितम् ॥५७॥
ततो रोदितुमारब्धा, कचाकर्षणपूर्वकम् । ससम्भ्रमा समायाता, पूर्वं माता ततः पिता ॥५८॥
दृष्टा तथाविधा पुत्री, पृष्टा वत्से ! किमीदृशम् । कष्टं व्यसनमापन्नं, तया सङ्कल्प्य जल्पितम् ॥५९॥
कुलस्त्रीणामयोग्यं य-त्तदहं कर्म कारिता । न कृतं तन्मया मात-स्तेनायं कुपितो मम ॥६०॥
पादप्रक्षालनासक्ता, वारिता तेन न स्थिता । क्षुर्या तेन च पापेन, अहमेवं विडम्बिता ॥६१॥
श्रेष्ठिनात्यन्तरुष्टेन, करे कृत्वा समर्पितः । जामाता राजलोकानां, मोहे नास्ति विचारणा ॥६२॥
वध्यो राज्ञा समादिष्टः, श्मशाने चालितो नरैः । चौरेण चिन्तितं कष्टं, वराको मार्यते मुधा ॥६३॥
यदेषा कुरुते पापा, निजपापस्य गोपनम् । मारापयति भर्तारं, निर्दोषं दोषदूषिता ॥६४॥
तदयं रात्रिसम्बन्धी, विफलो मे परिश्रमः । इदं चेतसि सञ्चिन्त्य, प्रकाशं तेन जल्पितम् ॥६५॥
निर्दोषोऽपि वराकोऽयं, मार्यते केन हेतुना ? । निर्दोषो दोषयुक्तो वा, कथं तद् ज्ञायते त्वया ? ॥
यथावृत्तं तथा सर्वं, जानेऽहं कथयामि च । [3]यद्ययं च पुराधीशो, ह्यभयं मे प्रयच्छति ॥६७॥
श्रुत्वेदं भूमिनाथोऽपि, समाहूय मलिम्लुचम् । अभयं ते न कर्तव्या, शङ्का ब्रूहि निरर्गलः ॥६८॥
तेनापि कथितं सर्वं, यथा दृष्टं यथा श्रुतम् । आदितो निधनं याव-द्विस्मितश्च नराधिपः ॥६९॥
राजादेशाद्गतश्चौरः, श्मशानं सह मन्त्रिणा । [4]दृष्टास्तत्र मुखेऽनेन, श्रवणाधरनासिकाः ॥७०॥
मन्त्रिणा कथितं सर्वं, यथादृष्टं महीभुजे । जामाता मोचितो राज्ञा, तस्करोऽपि विसर्जितः ॥७१॥

१ क्षिप्तोऽसौ-BJC । २ अकार्य° BJC । ३ यदि दत्ते दर्शनं राजा अभयं-BJC । ४ दृष्टा स च- BC । दृष्टा सर्वे-J ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविरतिर्महापापा, नानाकारं विडम्बिता । निष्कासिता च सा देशा-न्मृत्वा च दुर्गतिं गता ॥७२॥
तथान्यदपि राजेन्द्र !, शृणु स्त्रीणां विचेष्टितम् । यन्मयाकर्णितं वेदे, भण्यमानं मनीषिभिः ॥७३॥

वेदोक्तं स्त्रीचरित्रम्

श्रीवसन्तपुरे राजा, जितशत्रुर्महाबलः । रूपसौभाग्यलावण्य-कलाकौशलमन्दिरम् ॥७४॥
प्रीतिपात्रं महादेवी, यथार्था सुकुमारिका । बभूव भूपतेस्तस्य, प्राणेभ्योऽपि प्रिया प्रिया ॥७५॥
तया सार्धं दिवारात्रौ, विषयासक्तमानसः । परित्यक्तान्यकर्तव्यो, गमयामास वासरान् ॥७६॥
न चास्थानं न चामन्त्रो, न धर्माधर्मचिन्तनम् । स च तस्यां समासक्तो, विश्वं पश्यति तन्मयम् ॥
सीदन्ति राजकार्याणि, हन्यन्ते प्रान्तभूमयः । तस्करास्तरलायन्ते, सर्वं राज्यं विसंस्थुलम् ॥७८॥
मन्त्रितं मन्त्रिसामन्तै-र्नेदमुन्नतिकारणम् । वचनं न करोत्येष, उपायः कोऽपि चिन्त्यताम् ॥७९॥
हुं ज्ञातं मदिरामत्तः, प्रसुप्तो गाढनिद्रया । नक्तं देव्या समायुक्तो, महाटव्यां विमुच्यते ॥८०॥
प्रतिपन्नमिदं सर्वैं-र्लेखोऽयं लिखितः स्फुटः । कठोराक्षरसंयुक्तो, निःस्नेहो व्यक्तकाक्षरः ॥८१॥
यदि ते जीवने वाञ्छा, पाता वा शीतलं जलम् । तदा दूरतरे देशे, गन्तव्यमिति निर्णयः ॥८२॥
अन्येद्युर्विहितं सर्वं, यथामन्त्रितमञ्जसा । प्रबुद्धो वीक्षते राजा, कान्तारं त्रासकारणम् ॥८३॥
न तद्राज्यं न तद्वेश्म, न सा शय्या मनोहरा । रौद्रशिवशताराव-भीषणेयं महाटवी ॥८४॥
विसर्पत्सिंहशार्दूल-वनमहिषगजाकुला । विसर्पद्घूकघूत्कारा, भीषणेयं महाटवी ॥८५॥

प्रिये ! किं मतिमोहो मे ?, किमेतदिन्द्रजालकम् ? ।
स्वप्नो वायं मया दृष्टो, साशङ्कमिव मे मनः ॥८६॥

दृष्टो वस्त्राञ्चले लेखो, वाचितश्च शनैः शनैः । ततः सञ्जातकोपेन, स्मृता तेनासिधेनुका ॥८७॥
विरक्तमन्त्रिसामन्त-दण्डैरेतत्कृतं तव । समूलकाषङ्कशति, विरक्तिरनुजीविनाम् ॥८८॥
कोपं कुर्वन्निषिद्धोऽसौ, देव्या कोमलया गिरा । ततश्च वक्तुमारब्धः, श्रूयतां देवि ! मद्वचः ॥८९॥
हस्त्यश्वरथयानानि, किं करिष्यन्ति तानि च । कोष्ठागारादयः सर्वे, देवि! तेऽपि निरर्थकाः ॥९०॥
त्वदायत्ताः प्रिये ! प्राणा, जीवितं यौवनं च मे । संसारसुखसर्वस्वं, त्वमेवैका मम प्रिया ॥९१॥
सहैव राज्यमायात-मागच्छन्त्या त्वया मम । अनुकूलो विधिर्मन्ये, येन त्वं न वियोजिता ॥९२॥
ततः साहसमालम्ब्य, देव्या सार्धं शनैः शनैः । प्राचीं दिशं समाश्रित्य, चचाल्लाचलमानसः ॥९३॥
स्तोकान्तरं गते राज्ञि, मूर्च्छाच्छादितचेतना । निपपात धरापीठे, निःसहा सुकुमारिका ॥९४॥
सम्प्राप्तचेतनां राजा, पप्रच्छ मधुराक्षरैः । किं बाधते कुरङ्गाक्षि!, प्राणेश! तृड् विबाधते ॥९५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]क्षुर्या च कर्तयित्वाथ, वामे बाहौ सिरां ततः। पलाशपत्रनिष्पन्नः, शोणितस्य भृतः पुटः ॥९६॥
गुटिकान्तरयोगेन, जलवर्णीकृतं तकत्। ततः सा पायिता देवी, सञ्जाता स्वस्थमानसा ॥९७॥
भूयः स्तोकान्तरं गत्वा, साऽवोचद्धरणीपतिम्। नाथ! गन्तुं न शक्ताहं, बुभुक्षा बाधतेतराम् ॥९८॥
सितक्षुरिकया कृत्वा, स्वोरुमांसविकर्तनम्। अग्निपक्वं पुटे कृत्वा, तेन तस्यै समर्पितम् ॥९९॥
ततः भुक्तं तया सर्वं, सञ्जाता गमनक्षमा। लङ्घिता चाटवी प्राप्ता, गङ्गागोदावरी पुरी ॥१००॥
अङ्गुलीयकमादाय, निजाङ्गुल्या महीभृता। सङ्ग्रहीतं गृहं हट्टो, वणिग्धर्मे मनः कृतम् ॥१०१॥
[२]व्यवहारं कर्तुमारब्धो, लब्धलाभो दिने दिने। भोजनार्थं गृहे याति, स्वापार्थं च नरेश्वरः ॥१०२॥
अन्यदा भणितो देव्या, कष्टं कष्टेन वासराः। एकाकिन्याः प्रगच्छन्ति, द्वितीयः कोऽपि चिन्त्यताम्॥
प्रतिपन्नमनेनापि, हट्टमार्गे विलोकितः। पङ्गुर्नराधमः कोऽपि, गीतनर्मविचक्षणः ॥१०४॥
आनीय च गृहे मुक्त, एष ते गृहरक्षकः। सहायः सर्वकार्येषु, देवि! तिष्ठ निराकुला ॥१०५॥
ततो दिने दिने तेन, नर्मणा गीतकर्मणा। तस्या आवर्जितं चित्त-मनाचारे मतिर्गता ॥१०६॥
अनाचारप्रवृत्तानां, तेषां गच्छन्ति वासराः। साशङ्का सा सदा देवी, बम्भ्रमीति दिवानिशम् ॥१०७॥
अनेनावर्जिता लक्ष्मी-र्भोगयोग्यास्ति मे गृहे। यद्ययं म्रियते शल्यं, तदा मम निवर्तते ॥१०८॥
इत्यत्याकुलचित्ता सा, छिद्रान्वेषणतत्परा। आकाशगामिनीकल्पा, कालं नयति दुःखिता ॥१०९॥
अन्यदा भणितो रात्रौ, प्रिय! प्रातस्त्वया सह। भोक्तव्यं हि मया नूनं, गङ्गाकूलस्थपादपे ॥११०॥
एवमङ्गीकृतं तेन, हृष्टासौ निजमानसे। विधाय पाकं चलिता, भोजनार्थं प्रियान्विता ॥१११॥
भुक्त्वा च तत्र सुप्त्वा च, क्षणमेकमनाकुलम्। ततः क्रीडितुमारब्ध-स्तया सार्धं नराधिपः ॥११२॥
क्षिप्रं क्षिप्रं समागच्छ, प्रिय पश्य कुतूहलम्। जलहस्ती हस्तिना सार्धं, जलान्तर्योध्धुमुद्यतः ॥११३॥
कुत्र कुत्र प्रियेत्येवं, पश्यन्नेष निराकुलः। पृष्ठतः प्रेर्य हस्तेन, क्षिप्तो गङ्गाजले पतिः ॥११४॥
मुधा कोलाहलं कृत्वा, गता सा निजमन्दिरे। निःशङ्का पङ्गुना सार्धं, कामभोगान्निषेवते ॥११५॥
गाङ्गेन श्रोतसा शीघ्र-मुह्यमानो दिवानिशम्। दिनत्रयेण सम्प्राप्तो, राजा सिंहपुरे पुरे ॥११६॥
निराम्नायो मृतस्तत्र, राजा शूलेन सत्वरम्। जितशत्रुः कृतो राजा, दिव्यैर्मन्त्रिनृपादिभिः ॥११७॥
गुणानुरक्तनिःशेष-मन्त्रिसामन्तमण्डलम्। राज्यं पालयतस्तस्य, वव्रजुर्भूरिवासराः ॥११८॥
इतः सा ज्ञातवृत्तान्तै-र्लोकै राज्ञे निवेदिता। तेनापि हृतसर्वस्वा, पुरादपि बहिष्कृता ॥११९॥
रुदती पङ्गुमादाय, विधाय निजमस्तके। भिक्षां भ्रमितुमारब्धा, प्रतिग्रामं प्रतिगृहम् ॥१२०॥
पङ्गुं भूम्यां विमुच्यैषा, जगाद विशदाक्षरैः। पतिव्रताया मे देहि, भिक्षां येन व्रजाम्यहम् ॥१२१॥
पर्यटन्तीं क्रमेणैषा, ग्रामे ग्रामे पुरे पुरे। कदाचिद्दैवयोगेन, गता सिंहपुरे पुरे ॥१२२॥
तत्रापि पर्यटन्त्येषा, करोति जनविस्मयम्। पतिव्रतेति सर्वत्र, जने रूढिमुपागता ॥१२३॥

१ शितया क्षुरिकया दत्त्वा-BJC। २ BJC व्यापारं-मु.।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविचारो जनो ब्रूते, यथाश्रुतपरिग्रहः । अहो पतिव्रता नार्यः, सन्त्यद्यापि पतिव्रताः ॥१२४॥
श्रुतमेतन्नरेन्द्रेण, शब्दिता निजमन्दिरे । मिलितः पुरलोकोऽपि, हेलया नृपमन्दिरे ॥१२५॥
भणितो मन्त्री नरेन्द्रेण, पृष्टव्येयं त्वयाबला । का त्वं च कीदृशं नाम ?, कोऽयं पङ्गुः शिरोगतः ? ॥
[1]सर्वं तेनापि सा पृष्टा, तयापीदं प्रजल्पितम् । पूर्वं वसुन्धरा नाम, श्रेष्ठिना मम निर्मितम् ॥१२७॥
द्वितीयं गुणनिष्पन्नं, कृतं लोकैः पतिव्रता । भर्तायं गुरुभिर्दत्तो, मस्तकेनोह्यते मया ॥१२८॥

पङ्गुलो वातिकुब्जो वा, काणः कुण्टोऽतिदुर्भगः ।
सुरूपो वा कुरूपो वा, धनी वा निर्धनोऽपि वा ॥१२९॥

[2]कुलस्त्रीणामयं धर्मो, यत्पतिर्नैव मुच्यते । शेषा वेश्यासमा नार्यः, सदा स्वार्थपरायणाः ॥१३०॥
अल्पा कस्तूरिका यद्वत्, स्वल्पं मलयजं यथा । स्वल्पं कश्मीरजं यद्व-त्तद्वन्नार्यः पतिव्रताः ॥१३१॥
निशम्येदं महीनाथः, कोपकम्पितकन्धरः । सोपहासं जगादेदं, वचो मर्मविघट्टकम् ॥१३२॥
बाहुभ्यः शोणितं पीत-मुरुमांसं च भक्षितम् । भर्ता गङ्गाजले क्षिप्तः, साधु साधु पतिव्रता ॥१३३॥
पापे! शीघ्रं प्रयाहि त्वं, यत्र नो दृश्यसे दृशा । नामापि श्रूयते नैव, यत्र तत्र व्रज द्रुतम् ॥१३४॥
स्वपुरान्निजदेशाच्च, भूपेनासौ बहिष्कृता । अहो पापानि पापाना-मिहैव फलदान्यलम् ॥१३५॥
शुकेनाभाणि भूपाल !, श्रुतं स्त्रीणां विचेष्टितम् । स्त्रियो विश्वासघातिन्यः, पापाः पापनिबन्धनम् ॥
यावज्जीवं मया देव!, स्त्रीभिः सङ्गो विवर्जितः । ब्रह्मचर्यं चरिष्यामि, मुक्त्वा स्पर्शनदर्शने ॥१३७॥
सिंहविक्रमराजेन, रोषारुणितचक्षुषा । महासती महापापा, देशनिर्धाटिता कृता ॥१३८॥

इति कथानकदृष्टान्तोऽयम्

सारिके ! त्वमपि ब्रूहि, निजमूर्च्छानिबन्धनम् । तयोक्तं शृणु राजेन्द्र! यद्वृत्तं मे शरीरके ॥१३९॥
श्रीशृङ्गारपुरे रम्ये, लिम्बदत्ताभिधो वणिक् । बभूव सद्गुणग्राम-ग्रामणीः करुणापरः ॥१४०॥
लिम्बदेवसुतस्तस्य, कटुर्लोचनचित्तयोः । दौर्भाग्यपुद्गलान् लात्वा, वेधसेह विनिर्मितः ॥१४१॥
अधर्मज्ञोऽकृतज्ञश्च, कलाकौशलवर्जितः । वणिजानां कुले जातो, न वणिग् नापि पामरः ॥१४२॥
तत्रैव नगरे श्रेष्ठी, सोमदेवाभिधोऽभवत् । प्रियदर्शना तद्भार्या, पुत्रिकाहं सुदर्शना ॥
[3]ऊढाहं तेन पापेन, लिम्बदत्तस्य सूनुना । यथाकामं करोत्येष, विधिर्नानाविडम्बनाम् ॥१४४॥
अस्याहं वल्लभात्यन्तं, न चासौ मम रोचते । [4]वासः स्वल्पश्च सञ्जात-स्तेन मे श्वशुरालये ॥१४५॥
अन्यां कन्यां पिता नित्यं, गवेषयति सादरम् । न च कोऽपि ददात्यस्य, सदा सापत्न्यशङ्कया ॥
ततश्च भोगलुब्धेन, पापेनेदं विचिन्तितम् । न कोऽपि मे सुतां दद्या-दनया विद्यमानया ॥१४७॥
ततोऽहं तेन पापेन, सुप्ता क्षुरिकया हता । लोकप्रत्यायनाहेतो-र्मुधा कोलाहलः कृतः ॥१४८॥

---

१ तेनाऽपि पृष्टा सर्वं-BJC । २ कुलकन्यानामयं-BJC । ३ परिणीता-BC । ४ स्वल्पः श्वसुरकुले वासो तत्राऽपि च न सङ्गमः-BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिलिता नागराः सर्वे, पृच्छतां तेन जल्पितम् । मृषावादं महापाप-मुत्तरं पापकर्मणा ॥१४९॥
बन्दिग्राहं गृहीतोऽह-मेषा निपतिताम्बरे । कृतशब्दा च चौरैस्तै-रसिधेनुकया हता ॥१५०॥
सर्वं शृणोमि कर्णाभ्यां, पश्यामि न च चक्षुषा । महावेदनया ग्रस्ता, महादुःखेन दुःखिता ॥१५१॥
न जाने किं मयाकारि ?, पुरा जन्मनि पातकम् । येनास्य करलग्राहं, प्राणैर्भोगैश्च वर्जिता ॥१५२॥

नेत्रे नोत्पाटिते किं च, मिलिते यस्य नेत्रयोः ।
करोऽपि किं न छिन्नोऽसौ, लग्नो योऽस्य करे मम ॥१५३॥

न मे श्वश्रूगृहं जातं, न जातं पैतृकं गृहम् । न भोगा विरतिर्नैव, गतं जन्म निरर्थकम् ॥१५४॥
हे मातर्हे पितर्भगिनि !, पितृव्यभ्रातृमातुलाः ! । न युष्माकमयं दोषो, दोषोऽयं मम कर्मणाम् ॥
वेदनाविह्वलः कायः, प्राणाः पर्यन्तवर्तिनः । मर्षणीयं तकत्सर्वं, यन्मया दुष्कृतं कृतम् ॥१५६॥
यदि मे साटिका शुद्धा, निर्मलो दक्षिणः करः । तदा विडम्बनापूर्वं, मरिष्यत्येष पातकी ॥१५७॥
आर्तध्यानसमारूढा, बद्धायुर्गतचेतना । मृत्वा मार्गसमासन्ने, वटेऽथाजनि सारिका ॥१५८॥
असञ्जातबलौ पक्षौ, संवाहयितुमक्षमा । इतश्चेतश्च बभ्राम, वट एव शनैः शनैः ॥१५९॥
पक्षबले समुत्पन्ने, जाताहं व्योमचारिणी । विद्याधरीव सर्वत्र, सञ्चरामि यथेच्छया ॥१६०॥
आम्रारामेषु रम्येषु, मृद्वीकामण्डपेषु च । दाडिमीषु च पक्वासु, कृताहारप्रयोजना ॥१६१॥
नदीकूपतडागेषु, निर्झरेषु ह्रदेषु च । पयः पीत्वा मनोहारि, विचरामि यथासुखम् ॥१६२॥
प्रकृतिरेषास्य पापस्य, विधातुर्विषमा जने । सुस्थं द्रष्टुं न शक्नोति, चिरकालं जनं यतः ॥१६३॥
एकदा वटशाखायां, कृतासनपरिग्रहा । यावत्तिष्ठामि तत्राहं, तावत्तत्र समागतः ॥१६४॥
निषण्णः स वटस्याधो, दत्तं चोल्मुकसन्निभम् । उपरिष्टान्निजं चक्षुः, प्राणा निपतिता मम ॥१६५॥
मूर्छिता पतिता भीता, निस्सहास्यैव मस्तके । मारिता तेन पापेन, मोटयित्वा कृकाटिकाम् ॥१६६॥
भूयोऽपि तिर्यगायुष्कं, बद्ध्वा जाता च सारिका । सञ्जातौ कोमलौ पक्षौ, दूरसञ्चरणक्षमौ ॥१६७॥
कथञ्चित्पुण्ययोगेन, प्रविष्टा तव पञ्जरे । एतावन्तं स्थिता कालं, प्रमोदभरनिर्भरा ॥१६८॥
अद्य त्वेष मया दृष्टः, पातकी पुरुषाधमः । लिम्बदेवो दुरात्मायं, तेनाहं मूर्च्छिता प्रभो ! ॥१६९॥
अजानतेव तेनेदं, लिम्बदेवेन भाषितम् । किमेषा पक्षिणी ब्रूते ?, सभामध्ये निरर्गला ॥१७०॥
यन्न भूतं न वा भावि, न च सम्प्रति वर्तते । अन्यथा भवती ब्रूते, [1]स च कोऽप्यन्य एव हि ॥
साक्षी न दृश्यते कोऽपि, सङ्कीर्णमिव लक्ष्यते । सारिकाह महाराज!, तर्हि शुद्धिं करोम्यहम् ॥१७२॥
यद्यशुद्धा दहत्वग्निः, शुद्धा मुञ्चतु जीवतीम् । ततश्च सत्त्वयोगेन, वह्निशुद्धा विनिर्गता ॥१७३॥
सारिका सभ्यलोकेन, सर्वेणापि प्रशंसिता । लिम्बदेवो नरेन्द्रेण, दण्डयित्वा विसर्जितः ॥१७४॥
नराणां चरितं श्रुत्वा, कम्पते मे शरीरकम् । अन्यदपि शृणु राजेन्द्र ! पुराणे यन्मया श्रुतम् ॥

१ कोऽप्येषोऽन्यथैव हि-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समस्ति स्वर्णसङ्काशं, श्रीसुवर्णपुरं पुरम्। श्रेष्ठी स्वर्णध्वजस्तत्र, कनकश्रीस्तद्गेहिनी॥
कालक्रमेण सञ्जात-स्तयोः पुत्रो धनञ्जयः। पुण्यश्रीर्गेहिनी तस्य, गुणरत्नकरण्डिका ॥१७७॥
एकदा भ्रमता तेन, विस्तीर्णे भानुमन्दिरे। द्यूतासक्तास्त्रपामुक्ता, द्यूतकारा विलोकिताः ॥१७८॥
कौतुकार्थी गतस्तत्र, दापितं बृहदासनम्। अर्थवान् श्रेष्ठिपुत्रोऽयं, धनदाता धनञ्जयः ॥१७९॥
सोऽपि द्यूतं समारब्धो, रन्तुं मुग्धमतित्वतः। हारितं शतमेतेन, दीनाराणां गतो गृहे ॥१८०॥
तत्रासौ मञ्चकं लात्वा, सुप्तो विद्राणमानसः। न पिबत्यम्बु नाश्नाति, न च जल्पति किञ्चन॥
दीनं श्याममुखं दृष्ट्वा, मात्रा भर्त्रे निवेदितम्। [1]दीनाराणां शतं नाथ!, द्यूते पुत्रेण हारितम् ॥१८२॥
दापितं वारितस्तेन, वत्स! द्यूतं न सङ्गतम्। अधोमुखः क्षणं स्थित्वा, निर्गतः पितृपार्श्वतः ॥१८३॥
द्वितीयेऽह्नि सहस्रं तु, हारित्वा गृहमागतः। दत्तं तदपि तातेन, वारितो न च तिष्ठति ॥१८४॥
एवं द्वे त्रीणि चत्वारि, यावल्लक्षोऽपि हारितः। पिताप्यपहृतो धात्रा, धृता मात्रा वधूटिका ॥१८५॥
धनञ्जयोऽपि सञ्जातो, गृहस्वामी निरर्गलः। हारयते धनं द्यूते, ददाति प्रतिवासरम् ॥१८६॥
कालेन गच्छता तेन, सदनं निर्धनीकृतम्। मातुश्च शाटिका सापि, हारिता हतकर्मणा ॥१८७॥
रजन्यां पश्चिमे यामे, द्यूतिभ्यो भीतमानसः। दक्षिणां दिशमाश्रित्य, चचालाशु धनञ्जयः ॥१८८॥
प्रत्यहं गच्छता तेन, प्राप्ता चन्द्रपुरी पुरी। तत्रास्ति चन्द्रसारस्य, ह्यापणः पण्यपूरितः ॥१८९॥
दीर्घाध्वश्रमतस्तत्र, निषसाद धनञ्जयः। गच्छता स्वगृहे नीतः, स्नापितो भोजितस्तथा ॥१९०॥
अन्यदा प्रश्नितः कुत्र, कुले त्वं केन हेतुना ?। एकाकी धनहीनश्च, बम्भ्रमीषि महीतले ॥१९१॥
तेनापि कथितं सर्वं, मूलतो निजचेष्टितम्। भणितश्चन्द्रसारेण, वत्स! द्यूतं न सङ्गतम् ॥१९२॥
द्यूतमेतन्महापापं, महापापनिबन्धनम्। कुलशीलहरं द्यूतं, द्यूतमर्थहरं परम् ॥१९३॥
सत्यशौचहरं द्यूतं, द्यूतं कीर्तिक्षयङ्करम्। सर्वाविश्वासमूलं हि, द्यूतमाहुर्मनीषिणः ॥१९४॥

यतः-**कुलकलंकणु सच्च-पडिवक्खु गुरुलज्जासोयकरु।**
धम्मविग्घु अत्थपणासणु, जं दाणभोगेहिं रहिओ ॥१९५॥
गालियघायघुम्मंतलोयणु तणु संतावणि कुगइ पडितहिं पि य जूइयमरज्जू।
जूइं अत्थु जु विढवियइ' तिं अत्थिहिं नवि कज्जू ॥१९६-१९७॥

तवोपदेशतस्तात !, यावज्जीवमिदं मया। द्यूतं च द्यूतकारैश्च, सङ्गतिः सापि वर्जिता ॥१९८॥
ततः सञ्जाततोषेण, चन्द्रसारेण जल्पितम्। वत्स ! ते कथ्यते किञ्चि-त्सावधानेन श्रूयताम् ॥१९९॥
अस्त्येका मे सुता मान्या, चन्द्रलेखेति विश्रुता। रूपसौभाग्यसंयुक्ता, चन्द्रकान्तासमुद्भवा॥
तद्वियोगमशक्तोऽहं, सोढुं सा हि मम प्रिया। भवते तां प्रयच्छामि, यद्यन्यत्र न गच्छसि ॥२०१॥

---

१ दीनारशतं-BJ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्नमनेनापि, प्रशस्ते तिथिवासरे । कारापितं प्रमोदेन, पाणिग्रहणमङ्गलम् ॥२०२॥
खानपानादिसुस्थस्य, कामभोगान् प्रभुञ्जतः । पुत्रवद् दृश्यमानस्य, गतः कालः कियानपि ॥२०३॥
अन्यदा चिन्तितं तेन, धिक्कष्टं मम जीवितम् । निन्दितं सर्वलोकेऽपि, शिष्टलोके विशेषतः ॥२०४॥
द्यूतं च द्यूतकाराश्च, तस्य चित्ते व्यवस्थिताः । गुप्तिप्रक्षेपतुल्यं हि, पारवश्यं विदुर्बुधाः ॥२०५॥

उक्तं च- **सोच्छ्वासं मरणं निरग्निदहनं निःशृङ्खलं बन्धनं,**
निष्पङ्कं मलिनं विनैव नरकं सैषा महायातना ।
सेवासञ्जनितं नरस्य सुधियो धिक्पारवश्यं यतः,
पञ्चानां सविशेषमेतदपरं पष्ठं महापातकम् ॥२०६॥
स्वभावो नोपदेशेन, शक्यते कर्तुमन्यथा ।
सुतप्तान्यपि तोयानि, पुनर्यान्ति स्वभावताम् ॥२०७॥

साम्प्रतं मुञ्च मां तात !, मनो मे गमनोत्सुकम् । स्वगृहं मातरं भार्यां, द्रष्टुं गच्छामि सत्वरम् ॥
जामातुर्भणितं श्रुत्वा, चन्द्रसारेण चिन्तितम् । मनःपूतं करोत्वेष, बलात्कारो न सङ्गतः ॥२०९॥
पृष्टा च चन्द्रलेखापि, वत्से ! गन्ता तव प्रियः । या गतिर्जीवितेशस्य, ममापि ननु सा गतिः ॥
वस्त्राभरणादिकं दत्त्वा, ससहाया विसर्जिता । अर्धमार्गे प्रसुप्तेन, चिन्तितं तेन चेतसा ॥२११॥
आभरणेन मे कार्यं, न कार्यं चन्द्रलेखया । अन्तर्दुष्टं बहिर्मिष्टं, भणितं कोमलया गिरा ॥२१२॥
एहि कान्ते ! कुरङ्गाक्षि !, कौतुकं दर्शयामि ते । गता सा दर्शितस्तेन, कूपो जलविवर्जितः ॥२१३॥
तं पश्यन्ती निराशङ्का, क्षिप्ता तत्रैव तेन सा । भूषणानि समादाय, गतः स्वर्णपुरे पुनः ॥२१४॥
गवेषणां प्रकुर्वाणैः, स्वपुम्भिः सा निरीक्षिता । निष्कासिता ततः कूपा-त्पृष्टा व्यसनकारणम् ॥२१५॥
तयाऽचिन्ति न मे युक्तं, वक्तुं नाथस्य दूषणम् । तेन दुष्टेन दुष्टाहं, साध्वी चानेन साधुना ॥२१६॥
यः प्रिय उपकारी च, भूयो येन प्रयोजनम् । कुले जाता न कुर्वन्ति, तस्य मर्मविघट्टनम् ॥२१७॥
बन्दिग्राहं गृहीतानि, तस्करैः पापकर्मभिः । भूषणानि समादाय, क्षिप्ताहमन्धकूपके ॥२१८॥
आर्यपुत्रश्च तैर्नीतो, बन्दीकृत्य न लक्ष्यते । चन्द्रलेखां समादाय, सहायाः स्वपुरं गताः ॥२१९॥
सङ्कल्प्य कथितः पित्रे, वृत्तान्तश्चन्द्रलेखया । अहो प्राणप्रणाशेऽपि सज्जनाश्चन्दनोपमाः ॥२२०॥

यतः- **सुजनो न याति विकृतिं, परहितनिरतो विनाशकालेऽपि ।**
छेदेऽपि चन्दनतरुः, सुरभयति मुखं कुठारस्य ॥२२१॥

भूयो धनञ्जयो जातः, सर्वरोरशिरोमणिः । निन्द्यश्चः सर्वलोकाना-मुद्दण्डद्यूतदोषतः ॥२२२॥
क्षीणोपायः प्रवृत्तोऽसौ, पुनर्दृष्टेन वर्त्मना । क्रमेण क्रमता पृथ्वीं, प्राप्ता चन्द्रपुरी पुरी ॥२२३॥
गृहे च विशता दृष्टा, चन्द्रलेखा गृहाङ्गणे । तयापि च समागत्य, शिक्षितोऽसौ प्रजल्पितुम् ॥२२४॥
यन्मया भणितं किञ्चि-द्भाषणीयं त्वयापि तत् । वाक्यभेदो हि दोषाय, गुणायाऽभिन्नवाक्यता ॥२२५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टोऽसौ चन्द्रसारेण, सानन्दमवगूहितः । [१]तत्प्रौढं व्यसनं जातं, कथं ते वत्स ! साध्यताम् ॥२२६॥
[२]हानितो भूषणानां मे, यापि कापि कदर्थना । सापि मे सफला जाता, तात ! ते मुखदर्शनात् ॥
पूर्ववत्तिष्ठतस्तस्य, स्नेहगौरवपूर्वकम् । सुखंसुखेन सर्वत्र, व्यतीताः कतिचित्समाः ॥२२८॥
भूयोऽपि च स्मृतं द्यूतं, द्यूतकारा हृदि स्थिताः । विजृम्भिताऽरतिर्देहे, गमनाय कृतं मनः ॥२२९॥
न च देवः प्रियो नापि, न माता न पिता गुरुः । द्यूतकारस्य पापस्य, प्रियमेकं दुरोदरम् ॥२३०॥
सन्देशकः समायातः, प्रिये ! स्वर्णपुरान्मम । मातृमातुलसम्बन्धी, शीघ्रमागम्यतामिति ॥२३१॥
तयापि समये सर्वं, चन्द्रसाराय साधितम् । शिवा वः सन्तु पन्थानो, यात भूयोऽपि दर्शनम् ॥२३२॥
[३]वस्त्राभूषणं दत्त्वा, चन्द्रलेखा विसर्जिता । स्वल्पेनैव च कालेन, प्राप्ता स्वर्णपुरं पुरम् ॥२३३॥
सहाया वलिता जातो, द्यूतकारे समागतः । द्यूतं रन्तुं समारब्धो, यथा रात्रौ तथा दिवा ॥२३४॥
पुण्यश्रीसाटिका सापि, हारिता तेन पापिना । स्वल्पैरेव दिनैर्जातो, रोरराजो धनञ्जयः ॥२३५॥
एकदा भणिता तेन, चन्द्रलेखा निशागमे । प्रिये ! प्रभाते भोक्तव्यं, त्वयोद्याने मया सह ॥२३६॥
[४]प्रतिपन्नं तया सर्वं, कृतः पाको मनोहरः । प्रियेण सह सम्प्राप्ता, कानने जनवर्जिते ॥२३७॥
भुक्तं च भोजनं भव्यं, पीतं वारि मनःप्रियम् । पुष्पादिसर्वसामग्री, सेविता क्रीडितं चिरम् ॥२३८॥
सुखसुप्ता हता तेन, हताशेनार्थलोभतः । हहा ही द्यूतकाराणां, कृत्याकृत्यं न विद्यते ॥२३९॥
प्रक्षिप्य विजले कूपे, गृहीत्वाभरणादिकम् । निस्त्रिंशो गृहमागत्य, द्यूतं रन्तुं समुद्यतः ॥२४०॥
जनन्या भणितः किं न, चन्द्रलेखा विलोक्यते ? । गृहे किं न समायाता ?, निर्गता सा ममाग्रतः ॥
एकाकिन्यपि क्रोधान्धा, गता सा पितृमन्दिरे । मातश्चिन्ता न कर्तव्या, गता तत्र भविष्यति ॥२४२॥
भूयोऽपि निर्धनो जातः, पापकारी धनञ्जयः । विन्ध्याटवी गजेनेव, स्मृता चन्द्रपुरी पुरी ॥२४३॥
क्रामन् बृहत्क्रमैः पृथ्वीं, चचालासौ गतत्रपः । प्राप्तश्च स क्रमेणैवं, दुष्टात्मा क्रूरमानसः ॥२४४॥
चन्द्रलेखां विना दृष्टः, प्रविशंश्चन्द्रकान्तया । पादप्रक्षालनं कृत्वा, पृष्टः साशङ्कचित्तया ॥२४५॥
अङ्गोपाङ्गानि दह्यन्ते, स्पन्दते दक्षिणेक्षणम् । कुस्वप्ना वत्स ! दृश्यन्ते, न बहिर्न गृहे सुखम् ॥
शरीरे कुशलं वत्स !, वत्साया मे निवेद्यताम् । पृष्टव्यमेतदेवेह, प्राणिनां सुलभापदा ॥२४७॥
पतिं विना गृहे पत्यु-र्वासः स्त्रीणां न सुन्दरः । नैतच्छोभनमाभाति, परं वक्तुं न शक्यते ॥२४८॥
दिष्ट्या त्वं वर्धसे मात-र्लघूभूता तवाङ्गजा । सर्वलक्षणसम्पूर्णं, पुत्ररत्नमजीजनत् ॥२४९॥
नामापि निर्मितं तस्य, चन्द्रशेखरसञ्ज्ञितम् । आगच्छता च नानीता, शुक्रश्च सन्मुखो यतः ॥
निशम्येदं कृतानन्दा, चन्द्रकान्ताप्यजायत । दत्ता स्वर्णमयी जिह्वा, जगज्जनितविस्मया ॥२५१॥
सस्नेहं सादरं स्थित्वा, दिनानि दश पञ्च वा । न युक्तं मे चिरं स्थातुं, गन्तुमेव ममोचितम् ॥२५२॥
भूषणं चन्द्रकान्ताया, हृत्वा रात्रौ विनिर्गतः । श्रेष्ठिना जातशङ्केन, कृता पुत्र्या गवेषणा ॥२५३॥

---

१ व्यसनं व्यं J । व्यसनव्यसनं-BC । २ अर्थेन दुःखितं यातं-BJC । ३ वस्त्राभरणादिकं दत्त्वा-BJC ।
४ प्रतिपन्नमनया-BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गताः स्वर्णपुरे [१]केचिद्, भृत्याः सा तैर्निरूपिता । श्वश्वाऽभाणि रुषित्वाऽतो, गता सा पितृमन्दिरे ॥
ततः पुम्भिः समागत्य, चन्द्रसाराय साधितम् । रुरोद दुःखितः श्रेष्ठी, सततं करुणस्वरैः ॥२५५॥
वियोगभयभीतेन, मया वै यदनुष्ठितम् । विपरीतमिदं जातं, वत्से ! दुर्लभदर्शने ॥२५६॥
वञ्चिता कूटजामात्रा, पापेनाहं पदे पदे । चन्द्रलेखागुणान् स्मृत्वा, चक्रन्द कुररीव सा ॥२५७॥
सुताशोकं परित्यज्य, विभाव्य भवभावनाम् । श्रेष्ठी धर्मपरो जातो, यो मृतो मृत एव सः ॥२५८॥
भूषणं चन्द्रकान्ताया, हारित्वा हीनपौरुषः । पुनः स्वर्णपुरे प्राप्तो, गतलज्जो धनञ्जयः ॥२५९॥
मृता माता गता सापि, पुण्यश्रीः पितृमन्दिरे । गृहं शून्यतरं जातं, धिग्धिग्दुष्पुत्रचेष्टितम् ॥२६०॥
क्वचिद्भुक्तः क्वचित्सुप्तः, क्वचिद्भोजनवर्जितः । क्वचिद् दुःखसमासक्तः, क्वचिन्नखविदारितः ॥२६१॥
समयं गमयामास, पुरुषार्थविवर्जितः । निन्दनीयः सतां शोच्य-स्त्वजागलस्तनोपमः ॥२६२॥
अन्यदा द्यूतकारेण, विसंवादे विसंवदन् । हतः क्षुरिकया मृत्वा, जातो दुर्गतिभाजनम् ॥२६३॥

इति द्यूते **धनञ्जयदृष्टान्तः** ।

अन्यच्च श्रूयतां राजन् ! पुरुषाधमचेष्टितम् ।, श्रुतं [२]मया **पुराणेषु**, सतां निर्वेदकारणम् ॥२६४॥
श्रीमञ्जीरपुरे रम्ये, काननोद्यानशोभिते । नवयौवनमारूढा, रूढा रूपादिभिर्गुणैः ॥२६५॥
[३]अङ्गोपाङ्गादिलावण्यै, राजधानी मनोभुवः । अन्यजन्मकृतैः पुण्यै-र्लब्धसौभाग्यमञ्जरी ॥२६६॥
बभूव सर्वलोकानां, हृदयानन्दकारिणी । कन्दली कामभोगानां, नाम्नापि **कामकन्दली** ॥२६७॥
वेश्याचारसमायुक्ता, वेश्या विस्मयकारिणी । सर्ववेश्याशिरोरत्नं, सर्वालङ्कारधारिणी ॥२६८॥
तस्यां [४]वणिक्सुतो रक्तो, **यक्ष**नामा महाधनः । त्यागी भोगी सुसंस्कारो, दत्त्वा दीनारविंशतिम् ॥
एवं दिने दिने तस्य, वसतो यान्ति वासराः । समारूढं तयोः प्रेम-सारं वाचामगोचरम् ॥२७०॥
अन्यदा कुट्टिनी प्रोक्ता, **माधव**ाख्यद्विजन्मना । यथा तुभ्यं प्रयच्छामि, दीनारशतपञ्चकम् ॥२७१॥
अष्टादशसरं हारं, सर्वलोकमनोहरम् । मासमेकं मया सार्धं, वसतां कामकन्दली ॥२७२॥
अक्कयाङ्गीकृतं सर्वं, भणिता निजपुत्रिका । स्थिता साधोमुखी तन्वी, न दत्तमुत्तरं तया ॥२७३॥
नदीकूपतडागानां, यथा साधारणं पयः । वेश्यानां यौवनं वत्से !, सर्वसाधारणं तथा ॥२७४॥
एकपुंसि प्रसक्ता हि, शस्यन्ते कुलयोषितः । सर्वलोककृते वेश्या, वेधसेह विनिर्मिता ॥२७५॥
पत्यन्तरसमासक्ता, निन्द्यन्ते कुलबालिकाः । धन्या वत्से ! जने वेश्या, पतिलक्षेऽप्यनिन्दिता ॥२७६॥
यदि नार्थेन ते कार्यं, मे वचनं विधीयताम् । यथा यक्षस्तथैषोऽपि, रम्यतामन्तरान्तरा ॥२७७॥
अर्थार्थं च सुखार्थं च, रमणी रमते नरम् । अर्थश्च मे गृहेऽप्यस्ति, सुखं यक्षे पुनः स्थितम् ॥
मानखण्डनसञ्जात-कोपा माधवसङ्गता । यक्षे च कामकन्दल्या-मुदासीनतया स्थिता ॥२७९॥

---

१ केचित्तैस्तत्र निं JC । केचित्तैस्तत्र निं B ॥ २ मे-BJC ॥ ३ दशविंशति भाटीका राजं BJC ॥ ४ वणिक्सुतः सुप्तः-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुट्टिनी क्रूरचित्ता सा, गमयामास वासरान्। कामशक्तिक्षयात्क्षीणो, यक्षः प्राप परासुताम् ॥२८०॥
ततः प्रवेशितः शीघ्रं, माधवो धनलुब्धया। रमते तेन सार्धं सा, गतस्नेहं निरादरम् ॥२८१॥
करिणीव वनानीता, कालं नयति दुःखिता। [वियोगेनाथ यक्षस्य, स्नेहमोहविमोहिता] ॥२८२॥
अन्यदा नक्तमेकान्ते, तल्पमारूढयाऽनया। सुदुःखं पठितं चेदं, रुदन्त्या व्यक्तभाषया ॥२८३॥

यथा- **भमरा सुरतरुमंजरिहिं, परिमलु लेवि हयास।**
हियडु फुट्टिवि कह नहि, अह ढंढोलिउं पलास ॥२८४॥

श्रुत्वेदं पठितं रोषा-त्कुट्टिनी हसिता हृदि। पापो मुञ्चति नाद्यापि, हृदयं ते मनःप्रियः ॥२८५॥
मृता माता ततो जाता, दुःखिता कामकन्दली। चिरं न सहते धाता, सम्बन्धं सह बन्धुभिः ॥२८६॥
अन्यस्मिंश्च दिने सुप्तो, दत्त्वा दीनारविंशतिम्। माधवः कामकन्दल्या, किञ्चिच्चलितमानसः ॥२८७॥
सुखसुप्तां निशि ज्ञात्वा, कृत्वा च गलकर्तनम्। हाटकस्य शतान्यष्टौ, द्वौ हारौ द्वे च कुण्डले।२८८।
अङ्गदे द्वे कटीसूत्रं, मूषित्वा प्रपलायितः। तत्रैव नगरे विलस-न्नन्यया वेश्यया सह ॥२८९॥
नगरारक्षकैर्दृष्टो, बद्ध्वा राज्ञे समर्पितः। चौरस्त्रीवधकारी च, मारणाय निरूपितः ॥२९०॥
नराणां चरितं श्रुत्वा, कम्पते मे शरीरकम्। स्त्रियो हि नामभिर्दग्धा नराः कर्मभिरेव च ॥२९१॥
अन्यदपि महाराज, ! श्रूयतां यन्मया श्रुतम्। कथ्यमानं पुराणेषु, निन्दितं नरचेष्टितम् ॥२९२॥
अस्ति भद्रपुरे श्रेष्ठी, भद्रो भद्रनिकेतनम्। सुभद्रा गेहिनी तस्य, समस्तगुणमन्दिरम् ॥२९३॥
एकदा च कृतस्नाना, निशीथे सुप्तजागरा। विवदन्तं नरं वक्त्रे, विशन्तं वीक्ष्य शङ्किता ॥२९४॥
ससम्भ्रमा समुत्थाय, सम्प्राप्ता भर्तुरन्तिके। यथा दृष्टस्तथा तस्य, तया स्वप्नो निवेदितः ॥२९५॥
तेनापि भणिता पुत्रो, [1]भावी ते कलहप्रियः। गच्छ भद्रे ! न भेतव्यं, स्वस्थानं समलङ्कुरु ॥२९६॥
पूर्णकाले प्रसूता सा, जातोऽयं कुलदूषकः। आजन्मतोऽपि दुर्जातो, कलिकारी कुदर्शनः ॥२९७॥
स्वप्नानुसारतो दत्तं, नामास्य कलहप्रियः। [2]कलहं मूल्यतो लाति, लभते यदि नो मुधा।२९८।
समये समागते पित्रा, समाहूय समर्पितः। कलाचार्यस्य पुत्रोऽयं, कलाग्रहणहेतवे ॥२९९॥
कलहं कुर्वता तेन, कलाचार्योऽपि खेदितः। तेनाप्युपेक्षितो जातः, सर्वथैव निरक्षरः ॥३००॥
नाराचवन्न जानाति, गुणागुणपरीक्षणम्। नाराचस्तुलनाकाले, कनकोपलयोः समः ॥३०१॥
समुद्रवणिजः पुत्री, [3]तेनोढा कलिकारिणी। मृता माता पिताप्यस्य, गतः स्मरणशेषताम्॥
गृहस्वामी ततो जातः, क्रमेण कलहप्रियः। भार्या च कारणं जाता, गृहे कलहकारिणी ॥३०३॥
बहिर्लोकैः समं युद्धं, गृहे च सह भार्यया। सुखं च यदि सुप्तानां, जाग्रतां दुःखमेव च ॥३०४॥
[4]विशति न गृहे कोऽपि, श्रमणो ब्राह्मणोऽपि वा। स्वजनो वा सुहृद्वापि, भिक्षायै याचकोऽपि वा॥
विश्वमुद्वेजयत्येवं, सततं दुष्टचेष्टया। कुरूपाणां परासीमा, मूर्खाणां च धुरि स्थितः ॥३०६॥

---

१ भविता ते-BJC ॥ २ कलहं स मूं BJC ॥ ३ परिणीता-BJC ॥ ४ नैव विशति गृहे-BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुच्छता चार्कतूलस्य, समा समधिकापि वा। चापल्यं मर्कटस्येव, भुजङ्गस्येव दुष्टता ॥३०७॥
कातर्यं मूषकस्येव, लोभिनो वा कदर्यता। निष्पुण्यनिर्धनादीनां, सर्वेषां धुरि धार्यते ॥३०८॥
निर्गुणोऽपि गुणाधारं, स्वं वितर्कयति स्वयम्। रूपेण कामदेवोऽहं, कुबेरो धनसम्पदा ॥३०९॥
शिवः शरणागतस्याहं, कृपया मेघसन्निभः। मुनिः प्रशान्तभावेन, बुद्ध्या सुरगुरुरहम् ॥३१०॥
क्षीरनीरधिसङ्काशो, गाम्भीर्येण न संशयः। स्थैर्येण च महामेरुः, शौर्येण च धनञ्जयः ॥३११॥
दानेन कर्णतुल्योऽहं, सत्येन तु युधिष्ठिरः। इत्येवं मन्यते मूढो, विपर्यस्ततया मतेः ॥३१२॥
यथा भर्ता तथा सापि, स्वात्मानं बहु मन्यते। प्रविशन्तं गृहे दृष्ट्वा, कलहेनोपतिष्ठते ॥३१३॥
पितृसत्का गता लक्ष्मी-र्दारिद्र्यं पृष्ठतः स्थितम्। बहिर्गृहे च सर्वत्र, तृणायाऽपि न गण्यते ॥३१४॥
निर्धनो राटिकारी च, सर्वेण परिभूयते। न कुतोऽपि परित्राणं, वचनेनापि जायते ॥३१५॥
मुखं वक्ति कुवाक्यानि, सहते च शरीरकम्। भज्यते पङ्कजस्यास्यं, बाढमश्नाति शूकरः ॥३१६॥
जनैः कदर्थितो बाढं, दुर्गदारिद्र्यपीडितः। एकदा भणिता तेन, भार्या कलहकारिणी ॥३१७॥
प्रिये ! देशान्तरं यामो, धनोपार्जनहेतवे। धनहीनो नरो लोके, तृणादपि लघूयते ॥३१८॥
अथ श्रुत्वा वचो भर्तु-र्भाषते कलहप्रिया। दारिद्र्यं प्रिय ! कस्यापि, किं नश्यति प्रयाणकैः ॥३१९॥
दूरं दूरतरं देशं, दारिद्र्यभयभीरुकः। लोकः प्रयाति तत्रापि, दारिद्र्यं छिद्यते न हि ॥३२०॥
भोः प्रियतम ! पूर्वजन्मार्जितात्मीयप्रचुरतरप्रवरपुण्यस्कन्धभारज्वलज्ज्वालावलीकरालदम्भोलिनिर्घातैरेव सञ्चूर्ण्यते दुर्गदारिद्र्यमहामहीधरः, ॥
न देशान्तरगमनैः[1], प्रार्थनाकरणैर्न च। न चापि परराज्यादि-धनवल्लोकसेवनैः ॥३२१॥

न चापि नीचकर्मसमाश्रयणैर्न च दीनतालम्बनैरिति, यतो निष्पुण्यका दारिद्र्यमुद्गराघात-विदीर्णाखिलमनोरथा द्रव्यार्थिनः सन्तो भ्रमन्ति नानाविधदेशान्तराणि, लङ्घयन्ति जलनिधिम्, खनन्ति रोहणगिरिधरणीतलं, विशन्ति विवराणि, कुर्वन्ति परगृहेषु दुष्करकर्माणि, आरम्भयन्ति कृष्यादीननेकान् व्यापारान् शीतवातातपक्षुत्पिपासादिदुःखव्रातमविगणयन्तः सन्तो धावन्ति तेषु स्थानेषु, तथापि भोजनाच्छादनमात्रमपि कथञ्चिदेव महता क्लेशेन सम्पद्यते, पूर्वसुकृतकर्माणस्तु यदेव किञ्चिदारभ्यते कृष्यादिकं तदपि चिन्तातिक्रान्तप्रभूततरफलदायि भवति।

यतः- **नूनं समेऽपि यत्ने, भाव्यं यद्यस्य तस्य तद्भवति।**
एकस्य विभवलाभ-श्छेदः प्रत्यक्षमपरस्य ॥३२२॥
विकटाटव्यामटनं, शैलारोहणमपांनिधेस्तरणम्।
क्रियते गुहाप्रवेशो, विहितादधिकं कुतस्तदपि ? ॥३२३॥

---

१ °नै-र्नापि परप्रार्थनाकरणैः - BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्येवं तर्हि ये पुण्यरहितास्तैः किं पादौ प्रसार्य स्थातव्यं मर्तव्यं वा ? एतदपि न, यतः-
यद्यपि पुरुषाकारो, निरर्थको भवति पुण्यरहितानाम्। त्यक्तव्यो नैवात्मा, यथोचितं तदपि करणीयम्॥
तन्नाथ ! मुञ्च देशान्तरगमनाग्रहं, अत्रैव स्थीयतां, त्यज्यतां विषादः, क्रियतां स्वभूमि
क्रियतां स्वभूमिकानुसारेण तथाविधः कोऽपि व्यवसाय इति ॥
श्रुत्वा कलहकारिण्या, वचनं कलहप्रियः। स्थितस्तत्रैव संयम्य, चेतो यात्रासमुत्सुकम् ॥३२५॥
अर्थागमनिमित्तानि, ध्यायता द्विजपुत्रिका। स्वल्पाभरणलाभेन, मारिता तेन पापिना ॥३२६॥
अन्यदा क्लिष्टचित्तेन, तेन सा महिषासुरा। महिषासना महारौद्रा, दृष्टा नगरदेवता ॥३२७॥
पाषाणपिण्डिकाहस्तः, प्रविष्टो देवतागृहे। सन्निलीनः स्थितो याव- दन्धकारो विजृम्भितः ॥३२८॥
शनैः शनैः समुत्थाय, प्रविश्याभ्यन्तरं ततः। गृहीत्वा दक्षिणे हस्ते, भणिता तेन देवता ॥३२९॥
बन्दिग्राहं गृहीतासि, देवि ! मे देहि सम्पदम्। नो चेदद्य शरीरं ते, खण्डं खण्डं करोम्यहम् ॥३३०॥
देवता काष्ठमौनेन, स्थिता क्षीणा च शर्वरी। न दानं न निदानं च, खण्डखण्डीकृता ततः ॥३३१॥
मालाकारेण दृष्टोऽसौ, निर्गच्छन् देवतागृहात्। यामिन्याः पश्चिमे यामे, मलयम्प्रति गच्छता ॥३३२॥
ततः सञ्जातशङ्केन, पौरलोकेन शब्दितः। पृष्टश्च किमिदं पाप !, [1]कलिप्रिय ! कृतं त्वया ? ॥३३३॥
न कृतं चेत्तदा तूर्णं, प्रत्यापय महाजनम्। भवता भवने देव्या, उषितं केन हेतुना ? ॥३३४॥
न च यात्रामहः कोऽपि, न च पूजा कृता त्वया। एकाकी निर्गतस्त्वं हि, रजन्यां केन हेतुना ? ॥
भणतः पुरलोकस्य, किमहं वच्मि सन्मुखम्। भगवत्येव जानाति, यादृशं तादृशं स्फुटम् ॥३३६॥
एतत् श्रुत्वा च कोपान्धा, प्रस्फुरदोष्ठपल्लवा। पूजकस्य जनी जाता, साधिष्ठाना सुदुर्धरा ॥३३७॥
जगाद पुरलोकस्य, पुरतः प्रकटाक्षरैः। भग्ना ह्यनेन पापेन, देवता महिषासुरा ॥३३८॥
बन्दिग्राहं गृहीतासौ, याचितं विपुलं धनम्। अदत्तवचना देवी, [2]ह्यनेनैवंविधा कृता ॥३३९॥
ब्राह्मणपुत्रिका सापि, [3]ह्यनेनैव निपातिता। पातकी पापनामाय- मद्रष्टव्यमुखः सताम् ॥३४०॥
ततश्च पुरलोकेन, बद्धोऽयं दृढबन्धनैः। नानाकारं विडम्ब्योच्चैः, प्रापितोन्तकमन्दिरम् ॥३४१॥
सारिकाह महाराज !, श्रुतं पुरुषचेष्टितम्। अकृत्यकारिणः पापा, दूरस्थाः सुन्दरा नराः ॥३४२॥
शुक आह-ज्ञानं दानं क्षमा शौर्यं, सत्यशौचादयो गुणाः।
नरं विना निराधारा, निस्साराः सारिके ! स्त्रियः ॥३४३॥
यद्यप्यत्र त्वया भद्रे !, दृष्टान्तत्वेन दर्शिताः। दूरं दुष्कर्मकर्तारो, नरा धनञ्जयादयः ॥३४४॥
तथापि स्तोकका एव, सारिके ! ईदृशा नराः। ये निन्द्यं निर्घृणं कर्म, कुर्वन्ति कुलजा अपि॥
स्त्रियस्तु बहुधा बह्व्यो, ग्रामे ग्रामे पुरे पुरे। गृहे गृहे विलोक्यन्ते, क्रूरा दुष्कर्मकारिकाः ॥३४६॥
सत्यसन्धाः सदाचाराः, शुद्धशीलाः शुभाशयाः। अत्यन्तं स्तोकका नार्यो, दृश्यन्तेऽनेकशो नराः॥

१ कलहप्रिय-BJC। २ अनेनैं BJC। ३ अनेनैं BJC।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रूयन्ते सर्वशास्त्रेषु, दृश्यन्ते च पुरादिषु । सर्वत्र हीनका नार्यः, पुरुषाः पुनरुत्तमाः ॥३४८॥
तदहो विषयासक्त-लोकानां हि विडम्बना । आकर्ण्यैवंविधा घोरा-स्त्यजत विषयानहो ॥३४९॥

इति **विषयाधिकारः** समाप्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवेकाधिकारः १७

उक्तो विषयाधिकारः, विषयाश्च विवेकिभिरेव परिहर्तुं शक्यन्ते, इत्यतस्तदनन्तरं विवेकाधिकारः उच्यते, तत्रैते श्लोकाः-

विवेको निर्मलं चक्षु-रेकं यस्य महात्मनः ।
तद्बुद्धिः सङ्गतिश्चैव, द्वितीयं चक्षुरुज्ज्वलम् ॥३११॥
एतन्नेत्रयुगं यस्य, वस्तुसद्भावदर्शकम् ।
स द्रष्टा परमार्थेन, शेषा अन्धसमा नराः ॥३१२॥
निर्विवेका न शस्यन्ते, जन्तवः पशवो यथा ।
विवेको हि परं रत्नं, सतां हृदयमण्डनम् ॥३१३॥
सततं तीव्रदुःखौघ-[1]मन्दरोद्दामवेगतः ।
मथितस्य मनोम्भोधे-रुत्पन्नं न कदाचन ॥३१४॥
विवेकसंज्ञितं रत्न-मनर्घ्येयमनुत्तरम् ।
सतां सदा समीपस्थ-महार्यं तस्करादिभिः ॥३१५॥
स्वदेशे च विदेशे च, ग्रामे मार्गे च गच्छताम् ।
रात्रौ दिवा च कण्ठस्थं, नृणां मण्डनमुत्तमम् ॥३१६॥
निर्विवेककृतं कार्यं, परिणामे न सुन्दरम् ।
पाताय जायते नूनं, जात्यन्धस्येव चेष्टितम् ॥३१७॥
विवेकदण्डमादाय, मार्गमन्धोऽपि लङ्घते ।
वाञ्छितं स्थानमाप्नोति, सुखानि च समश्नुते ॥३१८॥
असारे सारतावाञ्छा, शत्रावपि च मित्रधीः ।
मित्रेष्वमित्रताबुद्धि-र्निर्विवेकस्य लक्षणम् ॥३१९॥
नमस्तस्मै विवेकाय, हृदयानन्दकारिणे ।
सद्गुणाय सुवृत्ताय, श्रेयसे हारहारिणे ॥३२०॥
सविवेकं दुर्लभं दानं, सविवेकं दुर्लभं तपः ।
सविवेकं दुर्लभं शीलं, सविवेका दुर्लभा श्रियः ॥३२१॥
विवेकाद्भोगदेवेन, सम्पदः सफलीकृताः ।
विवेकादेव तेनैव, त्यक्ताः प्रथमतश्च ताः ॥३२२॥

---

१ J । मन्दिरो BC । मन्दारं मु. ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भव्या भक्तिर्भगवति जिने यत्सदा निष्प्रकम्पा,
संसाराब्धेस्तरणतरिका सेवना यद्यतीनाम् ।
यन्निर्लोभं हृदयमनघं यज्जयश्चेन्द्रियाणा-मेतत्सर्वं
शिवसुखफलं सद्विवेकस्य कार्यम् ॥३२३॥

इति श्लोकास्त्रयोदश ।

अथ विवेक इति कः शब्दार्थः ? उच्यते-इह 'विचिर् पृथग्भावे[1]' इत्यस्य धातोर्विपूर्वस्य विविच्यते पृथक्क्रियते आत्मप्रदेशेभ्यः सकाशाद् ज्ञानावरणीयाद्यष्टप्रकारं कर्मानेनास्मिन्निति वा विवेक इति ।

''अकर्तरि च कारके संज्ञायाम् [कातन्त्रव्याकरणे पाद ६/सू. ४८६]

इत्यनेन सूत्रेण करणाधिकरणयोर्घटते, ततः 'चजोः कगौ धुट्घानुबन्धयोः [कातन्त्रव्या. कृद्वृतिः पाद/ ६ सूत्र ४८६/पृ. २२१] इत्यनेन सूत्रेण चकारस्थाने ककारः, **नामिनश्चोपधाया लघोः**[कातन्त्रव्या. आख्यातवृत्तिः पाद ५/सू. २१८] इत्यनेन च गुणे सति विवेक इति भवति, स च मतिश्रुतात्मको ज्ञानविशेष एवेह गृह्यते, तस्यैव हिंसाहिंसादिवस्तूनां हेयोपादानद्वारेण समस्तार्थक्रियासार्थनिष्पत्तिहेतुत्वादिति, तत्र यस्यास्ति विवेकवद्भिः सह सङ्गतिः स एव पश्यति, शेषास्तु परमार्थतोन्धा एवेति दर्शयन् श्लोकद्वयमाह-**विवेक** इत्यादि, **विवेक** उक्तशब्दार्थो **निर्मलमुज्ज्वलं चक्षुर्लोचनमेकं यस्य महात्मनस्तद्वद्भिर्विवेकवद्भिः सह सङ्गतिः संसर्गश्चैवेति** समुच्चये, **द्वितीयं चक्षुर्नयनमुज्ज्वलं** विशदं, **एतदुक्तलक्षणं नेत्रयुगं** लोचनद्वयं **वस्तुसद्भावदर्शकं** पदार्थपरमार्थप्रकाशकं, **स द्रष्टा**, स एव चक्षुः **परमार्थेन, शेषा अन्धसमा नरा** इति ।

उक्तं च- **एकं हि चक्षुरमलं सहजो विवेक-स्तद्वद्भिरेव सह संवसतिर्द्वितीयम् ।**
एतद् द्वयं भुवि न यस्य स तत्त्वतोऽन्धः स्तस्याप्यमार्गचलने खलु कोऽपराधः ? ।१।
॥३११-३१२॥

अथ निर्विवेकानामश्लाघ्यत्वं विवेकस्य च रत्नरूपत्वं दुर्लभत्वं च दर्शयन् श्लोकचतुष्टयमाह-

---

१ 'विजृङ्ङी पृथग्भावे [२/८४]... चान्तोऽयमिति **सभ्याः** ।' इति [हेम] **धातुपारायणे** पृ. १९१ 'विजिर् पृथग्भावे' इति **माधवीया धातुवृत्तौ** [रुधादि-५] ''विचिर् इति **क्षीरस्वामी मैत्रेयश्च। भट्टोजीदीक्षितोऽपि**' इति माधवीयाधातुवृत्तौ तत्रैव टिप्पनम् पृ. ४१७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्विवेका इत्यादि, **निर्विवेका** विवेकविकला न **शस्यन्ते** न श्लाघ्यन्ते **जन्तवो** जीवाः, **पशवो यथा** अजादिपशव इव, **विवेको** हि सद्बोधो हि **परं** प्रधानं **रत्नं सतां** सत्पुरुषाणां **हृदयमण्डनं** हृदयालङ्करणमिति, यथा **सततमनवरतं तीव्रदुःखौघ** एव मन्दरस्तस्योद्दामो वेगस्तस्मान्मथितस्य व्यालोडितस्य **मनोम्भोधे-** र्मनःसमुद्रस्योत्पन्नं सञ्जातं न कदाचिदपि, उक्तं च-

अणवरयगुरुयदुक्खोह- मंदरुद्दामवेयमहियस्स ।
तहवि तुह हिययसार ! विवेयरयणं न उच्छलियं ॥१॥

विवेकसंज्ञितमित्यादि श्लोकद्वयं स्पष्टमिति श्लोकचतुष्टयार्थः ॥३१३-३१६॥
अथ विवेकाविवेकयोः फलमाविष्कुर्वन् श्लोकद्वयमाह-**निर्विवेककृत**मित्यादि सुगमं चैतत् ॥३१७-३१८॥

अथ निर्विवेकलक्षणमाह-**असारेऽसुन्दरे सारतावाञ्छा** सुन्दरत्वाभिलाषः, **शत्रावपि** रिपावपि **मित्रधीः** सुहृदबुद्धिः, **मित्रेष्वपि** स्निग्धवयस्येष्वप्यमित्रबुद्धिः शत्रुबुद्धिरित्यर्थः,तदेतन्निर्विवेकस्य लक्षणमिति श्लोकार्थः ॥३१९॥
अथ विवेकमेव स्तुवन् श्लोकद्वयमाह-**नमस्तस्मै** इत्यादि स्पष्टं चैतत् ॥३२०-३२१॥
अथ विवेकिन एव स्वसम्पदः सफलीकुर्वन्तीति दर्शयन् दृष्टान्तमाह-**विवेकादि**ति श्लोकः सुगमः ॥३२२॥

अथ विवेकस्य कार्यं दर्शयन् वृत्तमाह-**भव्येत्यादि**, **भव्या** प्रधाना **भक्तिराराधना भगवति** समग्रैश्वर्ययुक्ते **जिने** सर्वज्ञे **यद्यस्मात् सदा** सर्वदा **निष्प्रकम्पा** निश्चला **संसाराब्धेर्भवसमुद्रस्य तरणतरिका** परपारगमनप्रवणद्रोणिका, **सेवना** पर्युपासना **यद्यतीनां** यत्साधूनां, **यन्निःस्पृहं** हृदयं चित्तमनवद्यं, **निग्रहश्चेन्द्रियाणां** हृषीकाणाम् एतत्पूर्वोक्तं सर्वं समस्तं **शिवसुखफलं** सिद्धिसौख्यफलं **सद्विवेकस्य** सद्बोधस्य **कार्यं** फलमिति । उक्तं च-

यत्सन्तोषसुखं यदिन्द्रियजयो यच्चेतसः शान्तता,
यज्जीवेषु दयालुता यदपि गीः सत्यामृतस्यन्दिनी ॥
यद्दानं यदनार्यसङ्गविरतिर्यत्सङ्गतिः सज्जनै-
रित्येतत्परिणामसुन्दरफलाः सर्वे विवेकाङ्कुराः ॥१॥

॥ इति श्लोकत्रयोदशकार्थः ॥३२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगदेवकथानकं पुनरिदं, तद्यथा–

अस्त्यत्र विश्वविख्याते, जम्बूद्वीपस्य मध्यगे । ग्रामाकरपुराकीर्णे, क्षेत्रे च **भरताभिधे** ॥१॥
स्वर्ग इव समुत्तुङ्गं, सुरवेश्मविराजितम् । चेतोहारिविभूत्याढ्यं, सुपर्वशतसुन्दरम् ॥२॥
मेर्वासन्नधरित्रीव, **भद्रशाल्लोपशोभितम्** । उत्तुङ्गशिखरोदार-जैनमन्दिरमण्डितम् ॥३॥
समुद्राम्भ इवोदग्र-भूरिसत्त्वसमाकुलम् । विराजद्रत्नराजीभिः, समाकीर्णं समन्ततः ॥४॥
रसातलमिवोद्दाम-भोगभोगिशतान्वितम् । रामारामादिभी रम्यं, पुरं **भोगपुराभिधम्** ॥५॥
माणिक्यानि समादाय, स्थितमेतदिति क्रुधा । यद्वेष्टितमिवाभाति, सिन्धुना परिखाच्छलात् ॥६॥
अभ्रंलिहाणि शृङ्गाणि, बिभ्रत्प्राकारमण्डलम् । खातिकाम्भोनिधिर्यत्र, वेदिकाविभ्रमं दधौ ॥७॥
यियासोः ककुभः कीर्ते-श्चतस्रोऽपि समं दधौ । प्रस्थानपथसंस्थानं, यस्य द्वारचतुष्टयम् ॥८॥
शुभ्राभ्रविभ्रमभ्राज-श्चारुरत्नचयाञ्चिताः । आलया यत्र भान्ति स्म, न्यक्कृतत्रिदशालयाः ॥९॥
मनोरथातिगन्धेन, सुदूराहूतमार्गणाः । यच्छन्ति धनिनो यत्र, बद्धस्पर्धाः परस्परम् ॥१०॥
अदभ्रविभ्रमोपेता, हावभावान्विता बभुः । मारवीरशरीभूता, यत्र रामा मनोरमाः ॥११॥
कलङ्को यत्र शीतांशौ, कोकिले परपुष्टता । काठिन्यं स्त्रीकुचेष्वेव, पद्मनाले च कण्टकाः ॥१२॥
सुतारं हरिसंयुक्तं, सचित्रं मङ्गलालयम् । सकुम्भं बुद्धसंशोभि, द्विजराजविराजितम् ॥१३॥
कन्याभिरामसुद्दाम-मकरमीनकेतुकम् । व्योमेव राजते यत्र, सुन्दरं राजमन्दिरम् ॥१४॥
सप्रभः सप्रतापश्च, जिततेजस्विमण्डलः । यत्र सूर्य इवारेजे, राजा **राजतुरङ्गमः** ॥१५॥
बभूव यत्र सद्भोग्यो-दग्रसौभाग्यसंयुतः । सुभोगो **भोगदेवाख्यः**, सार्थवाहो महाधनः ॥१६॥
शुचिस्त्यागी च भोगी च, कृतज्ञः सुकृती कृती । सदाशयः सदाचारः, सत्यवादी प्रियंवदः ॥१७॥
कृतार्थीकृतसर्वार्थि-सार्थनानामनोरथः । बभार भारताभोगे, यः कल्पतरुकल्पताम् ॥१८॥
दधानो वक्षसा लक्ष्मीं, गतः सत्यानुरागिताम् । अनन्तभोगसङ्गेन, यो दध्यावच्युतश्रियम् ॥१९॥
अभूद्भोगवतीनाम, तस्य भार्या प्रियंवदा । सौभाग्यदानदाक्षिण्य-दयादिगुणसंयुता ॥२०॥
स्वबन्धुकुमुदानन्द-प्रदानोज्ज्वलचन्द्रिका । सत्यसूनृतसुश्राव्य-सद्वाक्यामृतकूपिका ॥२१॥
विशालशीलसम्पन्ना, विशालवरवंशजा । पद्मपत्रविशालाक्षी, सुविशालमनोरथा ॥२२॥
यस्याः सुनिर्मलज्ञान-दीप्रप्रदीपरोचिभिः । मिथ्यात्ववितताध्वान्तं, ध्वंसितं स्वान्तवेश्मनः ॥२३॥
यस्याश्चित्तमहीपीठे, सर्वदोषविवर्जिते । सिक्ते जैनागमाम्भोद-वाक्यनिर्मलवारिभिः ॥२४॥
दृढसम्यक्त्वसन्मूलः, सद्ज्ञानस्कन्धसंयुतः । पञ्चाणुव्रतविस्तारि-मूलशाखाविराजितः ॥२५॥
सप्तशिक्षाव्रतोद्दाम-प्रशाखासञ्चयाञ्चितः । विविधाभिग्रहप्राज्य-प्रोल्लसत्पल्लवाकुलः ॥२६॥
संवेगादिगुणग्राम-विकासिकुसुमोत्करः । स्वर्गादिसौख्यसुस्वाद-सुप्रशस्तफलप्रदः ॥२७॥
सकलोपाधिसंशुद्धः, शुक्लपक्षनिषेवितः । श्रावकधर्मसद्वृक्षः, प्रारुरोह मनोहरः ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिनेन्द्रपूजने सक्ता, रक्ता सर्वज्ञशासने । भक्ता सुसाधुलोकेषु, विरक्ता भववासतः ॥२९॥
विज्ञा सद्धर्मकार्येषु, वत्सला धार्मिके जने । स्त्रीजनोचितनिःशेष-कलाकौशलशालिनी ॥३०॥
मुक्तावलीव सच्छाया, सुतारगुणराजिनी । सरला च सुवृत्ता च, जनतानन्दकारिणी ॥३१॥
तया सार्धं सदौदार्य-धैर्यगाम्भीर्ययुक्तया । सम्पद्यमाननिःशेष-मनोवाञ्छितसम्पदा ॥३२॥
सुरेन्द्रस्येव सद्भोगान्, भुञ्जानस्य सुरालये । प्रकामं भोगदेवस्य, व्यतिक्रामन्ति वासराः ॥३३॥
बभूवान्योऽपि तत्रैव, श्रीदेवाख्यो धनेश्वरः । अनेकधनकोटीनां, स्वामी विख्यातकीर्तिकः ॥३४॥
तेनाचिन्ति यथेयं श्रीः, सर्वकल्याणकारिका । व्यापद्वल्लीवितानस्य, सच्छेदनकुठारिका ॥३५॥
इयं हि प्राणिनां लक्ष्मी-र्गुरुताकरणं वरम् । हेतुर्निर्मलकीर्तीनां, जयश्रीणां शुभाश्रयः ॥३६॥
सुजातिकुलहीनोऽपि, कुरूपोऽपि जडोऽपि हि । मूकोऽपि हीनसत्त्वोऽपि, विचक्षुर्बधिरोऽपि हि ॥३७॥
अस्पृश्योऽपि जघन्योऽपि, क्लीबोऽपि कृपणोऽपि हि । निर्गुणोऽपि श्रिया युक्तः, शोभते भुवि मानवः ॥
जातिः कुलं कुलाचाराः, सर्वे रूपादयो गुणाः । एकयैव श्रिया हीना-स्तृणायन्ते हि देहिनाम् ॥३९॥
तदहं प्रतिमामस्या, लक्ष्म्या लक्षणसंयुताम् । सर्वरत्नमयीं रम्यां, कारयित्वा वराकृतिम् ॥४०॥
विनिवेश्य गृहस्यान्तः, स्फुरद्रत्नविराजिनीम् । आलिके सर्वसौवर्णे, मुक्ताफलसुमण्डिते ॥४१॥
तदेनामेकचित्तेन, त्रिसन्ध्यमपि सादरम् । पूजये वस्त्रपुष्पाद्यैः, सर्वैः सुन्दरवस्तुभिः ॥४२॥
एवं विचिन्त्य चित्तेऽसौ, श्रीदेवः कृतनिश्चयः । तथैव सत्वरं चक्रे, निःशेषं निजवाञ्छितम् ॥४३॥
ततस्तां प्रतिमामेष, स्नपयित्वा प्रयत्नतः । कर्पूरकुङ्कुमोन्मिश्र-सौगन्धोध्धुरवारिभिः ॥४४॥
चारुचन्दनसद्धूप-सद्गन्धकुसुमादिभिः । त्रिसन्ध्यं सादरं भक्त्या, प्रत्यहं पर्यपूजयत् ॥४५॥
इत्थं सम्पूज्य पञ्चाङ्गं, प्रणामं प्रविधाय च । कृत्वा पाणी ललाटस्थौ, लक्ष्मीमेवं सुतुष्टुवे ॥४६॥
जय त्वं देवि ! निःशेष-मर्त्यामरार्चितक्रमे ! । जय त्वं सर्वलोकस्य, स्पृहणीयगुणव्रजे ! ॥४७॥
त्वं देवि ! परमाराध्या, त्वं मे परमदेवता । त्वं मे माता पिता बन्धु-स्त्वं स्वामी त्वं च मे गुरुः ॥
त्वदायत्ता हि जीवानां, सर्वा सौख्यपरम्परा । त्वदायत्तं महाराज्यं, सर्वसम्पत्तिसुन्दरम् ॥४९॥
त्वदायत्ता रणे देवि !, प्ररूढानां जयश्रियः । त्वदायत्ता हि कीर्तिश्च, त्वदायत्ता गुणाः समे ॥५०॥
देवानां दानवानां च, मर्त्यानां व्योमचारिणाम् । त्वं वन्द्या पूजनीया च, श्लाघनीया सुखप्रदा ॥५१॥
स एव सुभगो लोके, सुरूपः शिष्टसम्मतः । मेधावी पण्डितो धीमान्, शूरो धीरः कलालयः ॥५२॥
स एव जगति स्वामी, स एवेह गुणाश्रयः । यस्त्वया स्वामिनि ! प्राणी, दृष्टः सानन्दया दृशा ॥
त्वं मे देवि ! परं तत्त्वं, त्वमेवाभीष्टदेवता । त्वमेव मम सर्वस्वं, त्वमेव मम जीवितम् ॥५३॥
नाहमन्यं स्तुवे देवि !, नान्यमभ्यर्चयाम्यहम् । नाहमन्यं विमुच्य त्वां, मनसापि विचिन्तये ॥५४॥
त्वयि चाराधितायां हि, नित्यं खलु सुभक्तितः । समग्राण्यपि सौख्यानि, करस्थानीह देहिनाम् ॥५५॥
इत्यादि समभिष्टुत्य, महालक्ष्मीं सभक्तितः । विरराम निजात्मानं, मन्यमानः कृतार्थकम् ॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं त्रिसन्ध्यमप्यस्य, श्रीदेवस्य महाश्रियम् । भक्त्याराधयतो नित्यं, गतः कालः कियानपि ॥५७॥
प्रविलोक्यान्यदा लक्ष्मीं, हसन्तीं तत्र हेलया । श्रीदेवो विस्मयापन्नो, विषण्णस्तामभाषत ॥५८॥
किमित्यद्य त्वया देवि !, मामालोक्य प्रहस्यते । कथ्यतां मे प्रसादेन, यद्यकथ्यमिदं न हि ॥५९॥
तयोदितमहो मुग्ध !, हसामि तव चेष्टितम् । स प्राह कीदृशं देवि !, सावोचदवधार्यताम् ॥६०॥
कथं त्वं नोपहास्योऽसि ?, कथं त्वं नैव मुग्धकः ? । लोकधर्मविरुद्धं वा, कथं न क्रियते त्वया ? ॥
यस्त्वं सर्वगुणोपेतान्, सर्वसत्त्वहितावहान् । सुरासुरनराधीश-विद्याधरनतक्रमान् ॥६२॥
सर्वकर्मक्षयोद्भूत-परमानन्दकारकान् । देवेन्द्रादिकृतस्फार-[१]चारुपूजांस्तथार्हतः ॥६३॥
त्यक्त्वार्हत्प्रमुखान् देव-विशेषानतिमूढधीः । प्रपूजयसि मामेका-मिहलोकसुखार्थिकः ॥६४॥
[२]न चेत्तत्त्वं विजानासि, यथाहं न स्थिरा क्वचित् । भवामि सुभगस्यापि सत्पूजाद्युपचारतः ॥६५॥
निगुर्णस्यापि सत्त्वस्य, पुण्यैरेव पुरा कृतैः । भवामि स्थेयसी भद्र !, नान्यथेत्यवधार्यताम् ॥६६॥
श्रीदेवोऽपि ततः प्राह, भक्तिनिर्भरमानसः । ललाटदेशविन्यस्त-प्रोल्लासिकरसम्पुटः ॥६७॥
किमेवमुच्यते देवि !, त्वमेव मम देवता । त्राणमालम्बनं चैव, जीवितं जीवितप्रदा ॥६८॥
त्यक्तान्यदैवतस्येह, त्वामाराधयतो ध्रुवम् । सद्भक्त्यैकाग्रचित्तेन, यद्भवति तदस्तु मे ॥६९॥
ततो विशेषतस्तस्य, तामेवार्चयतः सदा । सन्त्यक्तशेषदेवस्य, व्यतिक्रामन्ति वासराः ॥७०॥
अन्यस्मिंश्च दिने दृष्ट्वा, श्रियं श्यामीकृताननाम् । पप्रच्छोद्विग्नचित्तोऽसौ, संयोज्य करसम्पुटम् ॥७१॥
श्यामीकृतमुखाम्भोजा, वहन्ती खेदमुच्चकैः । लक्ष्यसे विश्वसम्पूज्ये !, स्वामिनि ! किमु कारणम् ? ॥
तयोक्तं तव सञ्जातो, योऽयं सम्प्रति दारकः । स निर्भाग्यो निरादेयो, सर्वथाप्यपलक्षणः ॥७३॥
अतोऽहं तावकं गेहं, त्यक्तुमिच्छामि सत्वरम् । तेनाहं खेदमापन्ना, त्वद्वियोगाभिशङ्कया ॥७४॥
श्रुत्वेदं सविषादेन, श्रीदेवेन प्रभाषितम् । मुक्त्वा च मामकं गेहं, देवि ! त्वं कुत्र यास्यसि ? ॥
तयोक्तं भोगदेवस्य, सार्थवाहस्य मन्दिरे । वास्तव्यस्य पुरेऽत्रैव, तत्पुण्याकृष्टमानसा ॥७६॥
अथ क्रमाद्गता सापि, भोगदेवस्य मन्दिरे । [३]श्रीदेवस्य गृहं मुक्त्वा, चञ्चलत्वस्वभावतः ॥७७॥
रत्नस्वर्णादिसम्पूर्णं, सर्वतोऽपि स्वमन्दिरम् । दृष्ट्वा भोगवतीं प्राह, भोगदेवो गतस्मयः ॥७८॥
प्रिये ! दीनादिसत्त्वेभ्यो, देहि दानं यदृच्छया । उपभुङ्क्ष्व समं सर्वै-रिमां लक्ष्मीं स्वबन्धुभिः ॥७९॥
यदेषा नैव कस्यापि, सञ्जाता स्थेयसी भुवि । सद्गुणस्यापि सत्त्वस्य, प्रकृत्यैवातिचञ्चला ॥८०॥
श्रुत्वा वाक्यमिदं भर्तुः, सापि सानन्दमानसा । नाथैवं प्रकरोमीति, प्रतिपन्नं तथा तया ॥८१॥
एवं सम्प्रेरिता भर्त्रा, भार्येयं दानशूरिका । दातुं भोक्तुं समारब्धा, यथेष्टं सा निजश्रियम् ॥८२॥
तस्येत्थं भोगदेवस्य, याति कालं यथासुखम् । जैनं दानादिकं धर्मं, कुर्वतः प्रियया सह ॥८३॥
श्रीदेवोऽपि श्रिया मुक्तो, मुक्तः सर्वगुणैरपि । सर्वस्यापि च लोकस्य, जातः परिभवास्पदम् ॥८४॥

१ चारुपूजनमर्हतः - BJC । २ न चैतत् वि° BJC । ३ श्रीधरस्य- BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तेन समारब्धा, नानारम्भा धनार्थिना । षण्ढपोषणवाणिज्य-समुद्रतरणादयः ॥८५॥
परं सर्वेऽपि ते तस्य, निष्फला एव जज्ञिरे । यत्नतोऽपि यथा [१]बीज-मुप्तं खलूषरावनौ ॥८६॥
व्यवसायपरोऽप्येवं, यतमानोऽप्यहर्निशम् । लाभं कुत्रापि नो प्राप, परं छेदमवाप सः ॥८७॥
धनाकाङ्क्षी ततो गाढ-मितश्चेतश्च पर्यटन् । सर्वत्र निष्फलारम्भो, नाशितवान् गृहाद्यपि ॥८८॥
ततोऽतिक्षीणपुण्यस्य, श्रीदेवस्य सुदुस्तरम् । महापराभवस्थानं, दारिद्र्य-समजायत ॥८९॥
अथासौ सर्वलोकेन, सर्वव्यवहारेष्वलम् । देवभूपादिगेहेषु, सर्वत्र परिभूयते ॥९०॥
पुत्रमित्रकलत्राणि, सर्वे स्वजनबान्धवाः । भृत्याः कर्मकराश्चैव तस्यावज्ञां प्रचक्रिरे ॥९१॥

यतः- **"लज्जन्ते बान्धवास्तस्य, सम्बन्धं गोपयन्ति च ।**
न भजन्ते यथा पूर्वं, यस्य स्तोकाः कपर्दकाः" ॥९२॥

"किञ्च-**गुरुयावि गुणा गुण-वंतयाण दालिद्दतमभरक्कंता ।**
अत्थजोएण विणा, पयडावि न पायडा होन्ति" ॥९३॥
"दालिद्दय तुम्ह गुणा, छाइज्जंतावि धीरपुरिसेहिं ।
पाहुणएसु छणेसु य, वसणेसु य पायडा होंति" ॥९४॥
"दालिद्दपरिभवो, परिभवाण सव्वाण चेव जेट्ठयरो ।
जीवंतावि हु जेणिह, मयव्व पुरिसा गणिज्जन्ति" ॥९५॥

"अन्यच्च-**उद्यमः साहसं धैर्यं, व्यवसायः पराक्रमः ।**
सर्वोऽपि च समारम्भो, निष्पुण्यस्येह निष्फलः" ॥९६॥
"स्वल्पोऽपि च समारम्भो, निःसत्त्वस्यापि देहिनः ।
सम्पूर्णपुण्ययोगेन, जायते हि महाफलः" ॥९७॥

यतः- **उज्जमु कज्जारंभियउनहि किं करइ ।**
धन्नउ पगु वि न देइ असड्ढलु संभवइ ।
सूरह सत्त तुरंम गयणि भमंताह
विब्भह कोडिगइंदह एउ वियर्दिताह ॥९८॥

"किञ्च-**धनेन विकलो यस्मा-न्नार्थं किञ्चन साधयेत् ।**
समग्रगुणयुक्तोऽपि, निन्दाभाक्केवलं भवेत्" ॥९९॥
"भारवाहादिकां कुर्वन्, वरमर्थक्रियां पशुः ।
न पुनर्धनहीनस्य, मानुषत्वं वरं क्वचित्" ॥१००॥

---

१ बीजं वप्तमुखरावनौ-B बीजं स्तप्तमधूस्वरावनौ-JC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''कुलीनोऽपि सुजात्योऽपि, विनीतो रूपवानपि ।
शूरश्च चतुरोऽप्यत्र, वित्तहीनस्तृणायते'' ॥१०१॥
''अकुलीनोऽपि मूर्खोऽपि, कुरूपोऽप्यगुणोऽपि च ।
अर्थवान् पूज्यते लोके, धिगर्थरहितं नरम्'' ॥१०२॥

अथासौ भोगदेवोऽपि, भूरिधान्यादिसम्पदा । सर्वत्र पुण्ययोगेन, ववृधे प्रतिवासरम् ॥१०३॥
ततश्चाशेषदीनादि-साधुसाधर्मिकादिके । धर्मस्थाने विशेषेण, निजं द्रव्यं स दत्तवान् ॥१०४॥
अन्यदा च समायातो, नगरे तत्र केवली । सूर्य इव स्फुरद्रोभिः, सन्देहतिमिरापहः ॥१०५॥
ततस्तस्य गता लोका, बहवो वन्दनाकृते । भोगवत्या समं तत्र, भोगदेवोऽपि चागमत् ॥१०६॥
ततः केवलिनाकारि, संवेगरसदायिका । सन्देहशतसच्छेत्री, [१]पर्षदि धर्मदेशना ॥१०७॥
अथ प्रस्तावमासाद्य, भोगदेवोऽब्रवीदिदम् । सुपात्रदत्तदानस्य, किं फलं जायते नृणाम् ? ॥१०८॥
जगाद केवली भद्र !, फलं सद्दानजं त्वया । विशालशालवास्तव्यो, दौर्गत्यभरपीडितः ॥१०९॥
दुर्गतकपताकाख्यः, प्रष्टव्यः प्रश्नकारकः । गृहे सञ्चयशीलस्य, सार्थवाहस्य कर्मकृत् ॥
इत्यादि केवली धर्मं, कथयित्वा ततः स्थितः । लोकोऽपि निजकस्थाने, जगामानन्दनिर्भरः ॥१११॥
कतिचिद्दिनपर्यन्ते, ययावन्यत्र केवली । भव्याम्भोजप्रबोधाय, विवस्वानिव सप्रभः ॥११२॥
अन्यदा भोगदेवोऽपि, भोगवत्या समं ययौ । पुरे विशालशालाख्ये, दानफलपिपृच्छया ॥११३॥
दृष्टा प्रविशता तत्र, कथञ्चिद्दैवयोगतः । दुर्गतकर्पताकस्य, गेहिनी दुर्गिलाभिधा ॥११४॥
सम्पृष्टा च यथा भद्रे !, कुत्र स्थानेऽत्र पत्तने । श्रीमत्सञ्चयशीलस्य, सार्थवाहस्य मन्दिरम् ॥११५॥
तया प्रहृष्टयाऽ भाणि, समागच्छत दर्शये । जग्मुर्दृष्टं च तद्गेहं, पूर्णं च सुन्दरश्रिया ॥११६॥
भार्यां सञ्चयशीलस्य, नामतो धनसुन्दरीम् । पप्रच्छ च यथा भद्रे !, समस्त्यत्र गृहे तव ॥
दुर्गतकपताकाख्यो, युष्मत्कर्मकरः स्फुटम् । तया प्रोक्तमहो श्रेष्ठिन् !, बभूवासौ गृहे मम ॥११८॥
नवमो वर्तते मासो, मृतस्यास्य तु साम्प्रतम् । इत्युक्त्वा धनसुन्दर्या, पृष्टं किं ते प्रयोजनम् ? ॥
केवलिप्रोक्तवृत्तान्तं, सोऽपि तस्यै न्यवेदयत् । अत्रान्तरे समायातो, धनी सञ्चयशीलकः ॥१२०॥
दर्शितं च ततस्तेन, भोगदेवस्य सुन्दरम् । गेहमेकं ततस्तत्र, तस्थौ सोऽपि निराकुलः ॥१२१॥
अन्यस्मिंश्च दिने शस्ते, प्रसूता धनसुन्दरी । द्योतयन्तं दिशां चक्रं, सुरूपं चारुदारकम् ॥१२२॥
वर्धापितस्ततो गत्वा, दास्यासौ सार्थवाहकः । सोऽपि व्ययतः सम्भीतो, मौनमालम्ब्य संस्थितः ॥
विलक्षवदना दासी, निरानन्दा न्यवर्तत । गेहतः सार्थवाहोऽपि, निर्ययौ सहसा बहिः ॥१२४॥
अन्यदा धनसुन्दर्या, सोपालम्भमभाण्यसौ । अपुत्राया अयं जातः, पुत्रो बृहन्मनोरथैः ॥१२५॥
अत्यन्तं त्वं पुनर्लोभाद्, द्रविणव्ययभीरुकः । न ददासि न चाश्नासि, सदपीदं गृहे धनम् ॥१२६॥

---

१ पर्षदे-BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमनेन करोषि त्वं ?, भुवो भारविधायिना । पुत्रजन्मोत्सवेऽपीह, यदेतन्नोपयुज्यते ॥१२७॥
अहो एषा न जानाति, यत्कष्टं द्रविणार्जने । मूर्खेयं भिन्नचित्ता च, मुग्धा वै मम गेहिनी ॥१२८॥
इत्यादि चिन्तयन्नेष, आर्त्तध्यानवशं गतः । गमयित्वा दिनं रात्रौ, मृत्वार्थव्ययभीरुकः ॥१२९॥
तत्रैव नगरे जातो, नागिलदुर्गताङ्गजः । आजन्मतोऽप्यनिष्टश्च, मातुरप्यपपुण्यकः ॥१३०॥
क्लेशेन महता कालं, निर्वाहयति दुःखितः । आक्रोश्यमानो[1] मात्रापि, खानपानविवर्जितः ॥१३१॥
ततश्च धनसुन्दर्या, स्वभर्तुर्मृतकर्मसु । विहितेषु यथायोगं, बन्धुसम्बन्धिभिः सह ॥१३२॥
समये च कृतं नाम, दारकस्य विशोकया । सम्मतं बन्धुवर्गस्य, धनदत्त इति स्फुटम् ॥१३३॥
स पुनर्दारको दृष्ट्वा, तन्मन्दिरं जनं च तम् । जातजातिस्मरज्ञानः, परिकम्पितकन्धरः ॥१३४॥
ऊर्ध्वीकृतकरस्तोषा-देकाक्येवाब्रवीदिदम् । अहो सुपात्रदानस्य, प्रपश्यत महाफलम् ॥१३५॥
येनाहं दुर्गतो भूत्वा, प्रेष्यकर्मकरोऽपि हि । त्रयोदशार्थकोटीनां, जातः साम्प्रतमीश्वरः ॥१३६॥
एवं जल्पन्तमालोक्य, सप्रमोदं दिने दिने । पप्रच्छ भोगदेवस्तं, विस्मयापन्नमानसः ॥१३७॥
अहो वत्स ! क एतस्य, भावार्थो जल्पितस्य ते । तेनोक्तं कथयाम्येष सावधानमनाः शृणु ॥१३८॥
अत्रैवाहं पुरे रम्ये, तातस्यैव च मन्दिरे । दुर्गतकपताकाख्यः, ख्यातः कर्मकरोऽभवम् ॥१३९॥
महर्षिदानमाहात्म्या-देतस्यैव च मन्दिरे । सर्वस्य नायको जात-स्तेनैवं प्रवदाम्यहम् ॥१४०॥
श्रुत्वेदं भोगदेवस्य, तस्मिन् केवलिभाषिते । जातः सम्प्रत्ययो बाढं, दाने च बहुमानतः ॥१४१॥
प्रविवेशान्यदा तत्र, भिक्षार्थं मुनिरेककः। गुणन्धराभिधानस्तु, तमद्राक्षीच्च बालकम् ॥१४२॥
उक्तवांश्च यथा भद्र !, किमेवं हर्षनिर्भरः । जातोऽहमस्य गेहस्य, नायक इति भाषसे ॥१४३॥
नैकान्तेन प्रहर्षोऽपि, कर्तव्यः क्वापि वस्तुनि । रङ्कोऽपि जायते राजा, याति राजापि रङ्कताम् ॥१४४॥
यतो यस्ते पिता भद्र !, सञ्चयशीलनामकः । अदत्ताभुक्तवित्तौघः, सत्यप्यर्थेऽपि दुर्गतः ॥१४५॥
स मृत्वा नागिलाह्वस्य, रोरस्याजनि पुत्रकः । मातापितृजनद्वेष्यो, लोकानां च विशेषतः ॥१४६॥
अप्राप्तभोजनाच्छादो, वेदनां वेदयन्नसौ । नरकप्रतिरूपां च, गमयामास वासरान् ॥१४७॥
अतो हर्षविषादौ हि, वर्तेते भुवि देहिनाम् । सममेवेति सञ्जल्प्य, गतः साधुर्यथागतम् ॥१४८॥
श्रुत्वेदं धनसुन्दर्या, समाहूय स नागिलः । प्रोक्तः कार्यं त्वया कर्म, मद्गृह एव सर्वदा ॥१४९॥
अयं च दारकः सम्य-क्पालनीयः प्रयत्नतः । भोजनाद्यहमेवास्मै, प्रदास्यामि यथोचितम् ॥१५०॥
एषोऽपि गुरुको जात-स्तिष्ठन्नत्रैव मद्गृहे । मदीयसर्वकर्माणि, कृष्यादीनि करिष्यति ॥१५१॥
नागिलोऽपि सपत्नीक-स्तद्वाक्यं प्रतिपन्नवान् । ततस्तस्या गृहे कर्म, कुर्वतो यान्ति वासराः ॥१५२॥
अन्यदा भोगदेवोऽपि, सुखं सुप्तो गृहे निशि । शृणोति स्त्रीयुगस्योच्चैः, संलापं कौतुकावहम् ॥१५३॥
तत्रैका च वदत्येवं, का भद्रे ! त्वमिहागता । साप्यवोचदहं लक्ष्मी-र्भोगदेवगृहाश्रिता ॥१५४॥

---

१ °नः स्वमात्राऽपि-BC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आद्या प्राह तव क्षेमं, द्वितीयेदं ततोऽवदत् । दानभोगादिकृत्येषु, भोगदेवेन भोगिना ॥१५५॥
नित्यं व्यापार्यमाणायाः, कौतस्त्यं मे सुखं सखि ! । इत्यावेद्य तया पृष्टं, त्वं तु कुत्रावतिष्ठसे ? ॥
सा प्राह सखि ! तिष्ठामि, सञ्चयशीलवेश्मनि । आद्याह सुखवासस्ते, द्वितीया प्राह नो सखि ! ॥
यतस्तिष्ठामि निक्षिप्ता, नित्यमत्यन्तभीषणे । [१]अन्धकारे महागर्ते, चारक इव बन्दिनी ॥१५८॥
अतः कुतः सुखावासः ?, कुतो निद्रा ? कुतो धृतिः ? । अदृष्टसूर्यचन्द्राया, वसन्त्या मम गर्तके ॥
आकर्ण्येदं ततश्चित्ते, भोगदेवेन चिन्तितम् । अहो सुदुःखिते एते, दूरं द्वे अपि तिष्ठतः ॥१६०॥
अहो लोकेऽत्र नैवास्याः, करिकर्णचलश्रियः । स्थिरीकरणतोपायः, कोऽपि कुत्रापि विद्यते ॥१६१॥
नेयं शौचेन संसाध्या, न भक्त्या न पराक्रमैः । न दानतो न पूजातः, न चैवोद्यमसाहसैः ॥१६२॥
इयं हि स्थेयसी नैव, लक्ष्मीः कस्यापि भूतले । दातुस्तृष्णापरस्यापि, त्यागिनो भोगिनोऽपि वा ॥
तदेषा यावदद्यापि, मां सहसा न मुञ्चति । एतामेव चलां ताव-त्सन्त्यजामि चलश्रियम् ॥१६४॥
इत्यादि बहु सञ्चिन्त्य, [२]कृतसामग्रीकः प्रगे । गतो भोगपुरे शीघ्रं, विशुद्धाध्यवसायभृत् ॥१६५॥
ततः कृत्वा जिनेन्द्राणां, सुसाधूनां च पूजनम् । दत्त्वा दीनादिदानं च, सम्भाष्य च सुहृज्जनम् ॥१६६॥
भोगदत्ताभिधं पुत्रं, विधाय गृहचिन्तकम् । प्रातर्दीक्षां जिनोद्दिष्टां, ग्रहीष्यामीति चिन्तयन् ॥
सुप्तो रात्रौ श्रिया प्रोक्तो, भोगदेवः सखेदया । अहो अहं त्वया दत्ता, प्रयुक्ता च यथेप्सितम् ॥१६८॥
त्यक्ताहमत्यजन्त्येव, त्वया विद्वन् ! विवेकिना । त्वद्वाञ्छितं करिष्यामि, तस्मान्मामीश ! मा मुच ॥
मत्पुत्रेण समं सम्य-ग्वर्तितव्यं त्वया सदा । एवमीश करिष्येऽह-मित्युक्त्वा श्रीस्ततो गता ॥१७०॥
द्वितीयदिवसे सार्धं, भोगवत्या विभूतितः । गृहीता भोगदेवेन, दीक्षा सद्गुरुसन्निधौ ॥१७१॥
परिपाल्य चिरं चारु, निष्कलङ्कं निजं व्रतम् । विहिताराधनो मृत्वा, सर्वार्थसिद्धिमाप सः ॥१७२॥
भोगवत्यपि तत्रैव, समुत्पन्ना शुभोदयात् । ततश्च्युत्वा प्रयास्यन्ती, निर्वाणपुरमुत्तमम् ॥१७३॥
अथ तस्य तया लक्ष्म्या, मुक्तस्याशुभयोगतः । श्रीदेवस्य महारौद्र-दारिद्र्यार्दितचेतसः ॥१७४॥
अत्रान्तरे मृतः पुत्रः, स निष्पुण्योपलक्षणः । ततः श्रीरपि तद्गेहे, प्रादुर्भूता पुनर्भृशम् ॥१७५॥
ततस्तदेव पूज्यत्वं, लोके सैव च मान्यता । यतो विभव एवेह, पूज्यते नहि मानवः ॥१७६॥
अथान्यदा रजन्यां तु, सुप्तो वरपर्यङ्के । रुदन्तीं ललनां दृष्ट्वा, तामपृच्छत्स विस्मितः ॥१७७॥
भद्रे ! का त्वं ? किमर्थं वा ? रोदिष्येवं सुदुःखिता । तया प्रोक्तमहं लक्ष्मी-र्वास्तव्या तव मन्दिरे ॥
रोदितव्ये पुनः श्रेष्ठिन् !, सदा सद्भक्तिकारकः । अतर्कितो ममाकाण्डे, त्वद्वियोगोऽत्र कारणम् ॥
यतो येयं त्वया भार्या, परिणीता द्वितीयका । सर्वपुण्यविनिर्मुक्ता, नूनं लक्ष्मीसुदुर्भगा ॥१८०॥
न तया सममेकत्र, वासो मेऽस्ति कदाचन । इत्युक्त्वा तत्क्षणादेव, जगाम श्रीरदर्शनम् ॥१८१॥
भूयोऽपि तस्य दारिद्र्यं, तदेवोच्चैरजायत । तदेव लाघवं लोके, स एव च पराभवः ॥१८२॥

---

१ महान्धे BJC । २ प्रातः कृतसामग्रिकः - BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

होऊण अहुंतीए, लच्छीए माणमलणदच्छिए ।
सिरिदेवो सयलजणे, विडंबिओ णेगहा काउं ।।१८३।।
अब्भत्थिया न थक्कइ, सोयं न गणेइ सेवइ दायारं ।
रूसइ रक्खिज्जंती, छिंडणमहिला य लच्छी य ।।१८४।।
अणुकूलं चिय भुंजइ, मइमं न करेइ गरुयपडिबंधं ।
परपुरिसासत्तमणं, मुच्चइ लच्छिं च महिलं च ।।१८५।।
रक्खंतस्स विरुद्धा, संचयसीलस्स भोगदेवस्स ।
दिंतस्स अभोगपरा-यणस्स वि परंमुहा जाया ।।१८६।।
जो संतं वि न भुंजइ, न देइ उक्खणइ निहणइ ससंको ।
सो संचयसीलसमो, हवंति दालिद्दिओ पुरिसो ।।१८७।।
संचयसीलसरिच्छा पुरिसा महिमंडलम्मि सव्वत्तो ।
जे छलिया लच्छीपिसा-इयाए करिकन्नचंचलाए ।।१८८।।
जो संतं परिभुंजइ, देइ न दिंतस्स पडइ परिणामो ।
सो भोगदेवसरिसो, उभयभवसुहावहो पुरिसो ।।१८९।।
ते विरला सप्पुरिसा, जयम्मि जे भोगदेवसारिच्छा ।
लच्छीए जे न छलिया, छलिया लच्छी पुणो जेहिं ।।१९०।।
को मुणइ ताण संखं, नराण लच्छीए जे छलिज्जंति ।
संता वि जेहिं लच्छी, छलिया ते एक्क दो तिन्नि ।।१९१।।
ता छड्डिज्जउ एसा, जाव न छड्डेइ अप्पणा चेव ।
लच्छीए छलिओ पुण, लहुत्तणं पावए पुरिसो ।।१९२।।

इति **भोगदेवकथानकं** समाप्तम्

[इति विवेकाधिकारः]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृदुभाषिताधिकारः १८

उक्तो विवेकाधिकारः विवेकिनस्तु मृदुभाषका भवन्तीति तदनन्तरं मृदुभाषिताधिकारमाह, तत्र [१]श्लोकास्त्रयोदश, तद्यथा–

तदेवेहामृतं मन्ये, यत्सत्यं कोमलं वचः ।
वार्तैषा यत्सुरैः सिन्धु-र्मथितादुद्गतं तु तत् ।।३२४।।
न तस्यास्ति रिपुः कोऽपि, न चापि च परो जनः ।
वस्त्वसाध्यं न चास्त्यस्य, यस्यास्ति मधुरं वचः ।।३२५।।
एषैव देवता वन्द्या, जिह्वाग्रे या सरस्वती ।
अशुभेतरभेदेन, वक्त्रे वक्त्रे व्यवस्थिता ।।३२६।।
मित्राणि चाप्यमित्राणि, [२]बन्धूनपि ह्यबान्धवान् ।
शत्रूभूतं करोत्याद्या, विश्वं विश्वं सरस्वती ।।३२७।।
अमित्राण्यपि मित्राण्य-बन्धूनपि च बान्धवान् ।
मित्रभूतं करोत्याद्या, विश्वं विश्वं सरस्वती ।।३२८।।
स्वरुच्या दीयते दानं, विद्यमानं निजे गृहे ।
स्वाधीनं दुर्गतस्यापि, मोदकं मधुरं वचः ।।३२९।।
किं किं तेन न दत्तं स्यात्, किं किं नोपकृतं जने ।
प्रथमं [३]हृष्टवक्त्रेण, मधुरं येन भाषितम् ।।३३०।।
गुणान् स्मरन् सदा शेते, स्मरन्नेव प्रबुध्यते ।
दानं विनापि लोकोऽयं, पुंसो मधुरभाषिणः ।।३३१।।
सुधया किं गुडेनाथ, किं वा खण्डेन निर्मिता ।
किंवा शर्करया सृष्टा, स्रष्ट्रा जिह्वा महात्मनाम् ।।३३२।।
यदेषा सर्वदा सूते, सुनृतं मधुरं वचः ।
कठोरकारणाद्यस्मा-न्मृदुकार्यं न जायते ।।३३३।।
शुभाशुभानि भावीनि, जीवानां कर्मयोगतः ।
दुःखमुत्पादयत्येव, तत्क्षणाद् दुर्वचः श्रुतम् ।।३३४।।

---

१ श्लोकाश्चतुर्दश-BJC । २ बन्धूनप्यबा° BC । ३ प्रहृष्ट° B ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दग्धा दवेन रोहन्ति, छिन्ना अपि पुनः पुनः ।
वचोदग्धा वचश्छिन्ना, न रोहन्ति नरांह्रिपाः ॥३३५॥
मितमधुरमुदारं जन्तुसन्तोषकारं,
वदत वदत लोकाः ! सद्वचश्चित्तहारम् ।
हरहसितहिमानीहारनीहारहारि,
भ्रमति भुवि समन्तात्सद्यशो येन सारम् ॥३३६॥

तदेवेत्यादि, तदेवेह लोकेऽमृतं पीयूषं मन्ये तर्कयामि, यत्सत्यं समीचीनं कोमलं मृदु वचो वचनं, वार्ता किंवदन्त्येषेयं यद्यस्मात्सुरैर्देवैः सिन्धोः समुद्रान्मथिता-ल्लोडितादुद्गतं निर्गतं तदमृतमिति श्लोकार्थः ॥३२४॥

अथ मृदुवचनस्य गुणमाह-नतस्येत्यादिश्लोकः सुगमः ॥३२५॥

अथ शुभेतरभाषाया माहात्म्यं वर्णयन् श्लोकत्रयमाह-एषैवेत्यादि, एषैवेयमेव देवता देवी वन्द्या स्तुत्या जिह्वाग्रे रसनान्ते सरस्वती या वाणी, अशुभेतरभेदेन कर्कशमृदुविकल्पेन वक्त्रे वक्त्रे मुखे मुखे व्यवस्थिता स्थितिं कृतवती ॥३२६॥

मित्राण्यपि सुहृदोऽपि अमित्राणि शत्रून्, बन्धूनपि स्वजनानप्यबान्धवान्, शत्रूभूतं रिपुसमानं करोति विधत्ते आद्या प्रथमा कर्कशेत्यर्थः, विश्वं सर्वं विश्वं जगत्सरस्वती भाषा ॥३२७॥

अमित्राण्यपीति श्लोकस्य पूर्वश्लोकविपर्ययेण व्याख्या कर्तव्येति श्लोकत्रयार्थः ॥३२८॥
अथ मृदुभाषकं स्तुवन्नाह-स्वरुचीत्यादिश्लोकत्रयं स्पष्टमेव ॥३२९-३३१॥

अथ मृदुभाषकजिह्वाया मधुरभाषकत्वे कारणं वितर्कयन् श्लोकद्वयमाह-सुधयेत्यादि, सुधयाऽमृतेन किमिति वितर्के, गुडेन प्रतीतेन, अथ विकल्पे किंवा खण्डेन निर्मिता कृता, किंवा शर्करया प्रसिद्धया सृष्टा निष्पादिता स्रष्ट्रा धात्रा जिह्वा रसना महात्मनां महापुरुषाणाम् ॥३३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदेषा सर्वदा सूते जनयति सूनृतं सत्यं प्रियं च सूनृतमुच्यते, **मधुरं** कोमलं **वचो** वचनं, **न कठोरकारणाद्यस्मान्मृदुकार्यं जायते** भवतीति श्लोकद्वयार्थः ॥३३३॥

अथ कटुकवचसो दोषमाह-शुभेत्यादि श्लोकद्वयं, **शुभाशुभानि** सुखदुःखरूपाणि **भावीनि जीवानां** जन्तूनां **कर्मयोगतः** कर्मसम्बन्धाद् **दुःखमसुखमुत्पादयत्येव** जनयत्येव **तत्क्षणात्तस्मिन्नेव** समये **दुर्वचः श्रुतं** सदिति ॥३३४॥

दग्धा दवेनेत्यादि सुगममिति श्लोकद्वयार्थः ॥३३५॥

अथ मृदुभाषकत्वं प्रत्युपदिशन् वृत्तमाह-**मितेत्यादि मितं** स्तोकं **मधुरं प्रियमुदारं स्फारं जन्तुसन्तोषकारं** जीवानां तुष्टिकरमित्यर्थः **वदत वदत** जल्पत जल्पत **लोका** जनाः! **सद्वचः** शोभनवाक्यं **चित्तहारं** मनोहारि, **हरहसितहिमानीहारनीहारहारि,** तत्र हरहसितं हराट्टहासः, हिमानी महद्धिमं, हारो मुक्ताफलमाला, नीहारस्तुषारः, तद्वद्धारि शोभायमानं हरहसितादिवच्छुभ्रमित्यर्थः, **भ्रमति** भ्राम्यति **भुवि** पृथिव्यां **समन्तात्सर्वतः सद्यशो** शोभना सर्वदिग्गामिनी **कीर्तिर्येन** कारणेन **सारं** प्रधानमिति वृत्तार्थः ॥३३६॥

अथ मधुरकटुकभाषिणामर्थानर्थसूचकं श्लोकद्वयेन दृष्टान्तमाह-

इह लोकेऽपि कल्याणं, जायते मृदुभाषिणाम् ।
अत्रामृतमुखी नाम, वृद्धनारी निदर्शनम् ॥३३७॥
इह लोकेऽपि दुःखानि, लभन्ते कटुभाषिणः ।
अत्रार्थे ऋतुभिः शप्ता, वृद्धयोषा निदर्शनम् ॥३३८॥

इह लोकेऽपि मनुष्यलोके **कल्याणं** सुखं सत्कीर्तिसम्प्राप्तिरूपं **जायते** सम्पद्यते **मृदुभाषिणां** मधुरवादिनाम्, **अत्रास्मिन्नर्थेऽमृतमुखी नाम वृद्धनारी** स्थविरस्त्री **निदर्शनं** दृष्टान्त इति प्रथमश्लोकार्थः ॥३३७॥

इह लोकेऽपि मनुजजन्मनि **दुःखान्यशर्माणि लभन्ते** प्राप्नुवन्ति **कटुभाषिणः** कटुवक्तारः, **अत्रार्थे ऋतुभिः शप्ता,** ऋतवः शिशिरादयस्त्रयः कालविशेषास्तदधिष्ठायका देवा अपि ऋतुशब्देनाभिधीयन्ते, तैः शप्ता आक्रोशिता वृद्धयोषा वृद्धनारी **निदर्शनं** दृष्टान्त इति द्वितीय श्लोकार्थः ॥३३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ वृद्धनारीदृष्टान्तश्चायं-

[1]अस्त्यत्रैव भारते वर्षे महीमण्डलमण्डना सकलसम्पदावासा **सुखावासा** नाम नगरी, तस्यां **नागदत्तो** नाम इभ्यपुत्रः परिवसति, तस्य च यथार्थाभिधानाऽमृतमुखी नाम जननी, **कटुकमुखी**नामधेया च श्वश्रूः, **नागश्री**र्नाम च भार्या । अन्यदा च परलोकं गते जनके जातो गृहस्वामी नागदत्तो विचिन्तयति गृहकार्याणि, न कसेति कुत्सितजनैः सह सङ्गं न प्रसरति द्यूतादिव्यसनेषु । अन्यदा च स नगरान्निर्गच्छन् दृष्टो दुष्टहस्तिना, तद्भयेन च नष्ट्वा प्रविष्टः समासन्ने सङ्कटद्वारेऽनङ्गसेनाभिधानवेश्यामन्दिरे, विनयपुरस्सरं कृतस्तया तस्यासनाद्युपचारः, भणितश्च नागदत्तो निजगृहमिवैतदेव, तदत्रैव भुज्यतामिति, प्रतिपन्नमनेन, मज्जितः परममज्जनविधिना, भोजितः सर्वादरेण, ततः पुष्पताम्बूलविलेपनादिभिः प्रतिपत्तिं कृत्वा परिहासगर्भैर्वचोभिः समावर्जितं तस्य हृदयम्, उषितस्तत्रैव तां रजनीं, गतः प्रभाते निजमन्दिरं, पृष्टश्च जनन्या यथा वत्स ! कुत्र त्वमद्य रजन्यामुषितोऽसि ? दुःखसम्भारपूरितानामस्माकं कथंकथमपि कष्टेन व्यतीता रजनी। अत्रान्तरे वक्रीकृताननया प्रकृतिकटुकभाषणशीलया सासूयं जल्पितं श्वश्र्वा, किमत्र प्रष्टव्यं लोचने एवास्य रात्रिजागरणं साधयतः, व्यसनासक्तः स्वच्छन्दचारी च तव पुत्रकः, नेदं गृहवृद्धिकारणं, यतः-

देवकुले राजकुले वुड्ढीसु य ऊसवेसु विविहेसु ।
कह होउ तत्थ वुड्ढी, जत्थ न वुड्ढा गणिज्जंति ।।
वयपरिणयलोयपर-म्मुहाण दुक्खाणि सुयणु ! सुलहाणि ।
एसो तुह पुण पुत्तो, न कुणइ वुड्ढाण वयणाइं ।।२।।

तद्भद्रे ! निवारय यदि शोभनेन प्रयोजनं, ततो हस्ते गृहीत्वा बाष्पाविललोचनया भणितो नागदत्तो जनन्या, यथा जात ! यदहं भणामि तदवश्यं त्वया कर्तव्यमेव, तेनोक्तमेवं करिष्याम्येव तव वचनं, मा खेदं कार्षीः । तया भणितं यद्येवं वत्स ! न त्वया बहिर्वस्तव्यं, प्रतिपन्नमिदमनेन । एवं व्रजन्ति वासराः, मिलति चोद्यानादौ गतस्यानङ्गसेना, संवर्धते च तयोस्तत्र गोष्ठीरसः, ददाति च प्रच्छन्नमेव द्रविणजातं नागदत्तः । अन्यस्मिन् दिवसे परिहासेन जल्पितमनया यदहो दौर्भाग्यं मम मन्दिरस्य, यतः प्रथमदिने दृष्ट्वा न दृष्टं पुनरप्यार्यपुत्रेण । तेन भणितं गुरुजनपराधीनतया न साक्षाद् दृश्यसे त्वं, हृदयेन पुनः प्रतिदिवसं पश्यामि भवन्तीम् । तया चिन्तितमीश्वरपुत्रोऽयं दाता, अनुरक्तश्च मां प्रति, यदि कथञ्चिज्जनन्या वियोज्यते तदा पूर्यन्ते मम मनोरथाः । भणितश्चानया नागदत्तो यथार्यपुत्रावसरस्ते साम्प्रतमर्थोपार्जनस्य,

यतः- **"पढमे न पढइ विज्जं, बीए अत्थं न चेव विवड्ढेइ ।**
तइए न कुणइ धम्मं, तुरिये वए होइ हु असारो" ।।१।।

---

१ तुला- मणोरमा कहा पृ. ३५-४१ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

''ववसायवज्जियाणं, संतावि सिरी पणस्सई चेव ।
होइ असंतावि धुवं, ववसायपराण पुरिसाणं'' ।।
''पुव्वपुरिसज्जियाए, लच्छीए कुणइ जो नरो गव्वं ।
सो गयलज्जो धणियं, भणिओ अहमाहमो चेव'' ।।३।।
अप्प-परोभयसुहया, भुज्जंती तह परेसिं दिज्जन्ति ।
नियययपरक्कमपत्ता, भिक्खावियं किं पुणो लच्छी ।।४।।

तदार्यपुत्र ! क्रियतां कालोचितं, गम्यतां देशान्तरं, स्थितमेतच्चित्ते नागदत्तस्य, गतो निजगृहे। विज्ञप्ता जननी, यथा मातर् ! विसर्जय मां देशान्तरे द्रव्योपार्जननिमित्तं, प्रतिषिद्धो जनन्या, तथापि न तिष्ठति, ततो रोदितुं प्रवृत्ता, नागदत्तेन भणितं मातरलं रुदितेन, शीघ्रमेवाहमागच्छामीत्यादि लपन् प्रतिषिद्धोऽपि स न स्थितः, कृता गमनसामग्री, निर्गमदिवसे सविशेषं निवार्यमाणोऽप्यपकर्ण्य जननीं चलितो नागदत्तः स्थितो नगरस्य बहिष्टात्, भणितोऽनङ्गसेनया, आर्यपुत्र ! त्वया विना शून्यमिव नगरमिदमहं मन्ये, यदि भणसि तदा त्वया सह समागच्छामि, प्रतिपन्नमनेन, क्रमेण वहन् सार्थः प्रविष्टः कान्तारे दुरुत्तारे, व्यालोडितो भिल्लैः, गृहीतं द्रव्यजातं, भयभ्रान्तलोचन एकाक्येव प्रविष्टो नंष्ट्वा शून्यारण्यं नागदत्तः । अनङ्गसेनापि बन्दिग्राहं गृहीत्वा पल्लीपतिना पल्लीं प्रापिता, नागदत्तेनापि कान्तारमध्ये पर्यटता दृष्ट एकत्र प्रदेशे एकस्तापसकुमारकः,

प्रणम्य पृष्टश्च कुत्र युष्माकं तपोवनं ? तेन भणितमितो नातिदूर एव, गतस्तेन सह तापसाश्रमं नागदत्तः, वन्दितः कुलपतिः, श्रुतस्तदन्तिके क्षणमेकं धर्मोपदेशः, पश्चात्प्रश्नितस्तेन कुलपतिर्भगवन्! साधारणरूपसौभाग्यगुणगणालङ्कृतस्य प्रथमयौवने वर्तमानस्यापि किं भवतो व्रतकरणकारणं ? कुलपतिना भणितं सौम्य ! शृणु ?–

चण्डरुद्रकथा

अस्ति मलयविषयमण्डनं चन्दनपुरं नगरं, तन्निवासिचण्डदेव-ब्राह्मणसुत-श्चण्डरुद्रो नाम्नाहं, कालान्तरेणोपरतो मम पिता, ममोपरि सङ्क्रान्तो गृहभारः, परस्परं कलहं कुर्वत्यौ न शक्नोमि निवारयितुं जननीगृहिण्यौ, तावदेव च मे सुखं यावदहं गृहं न प्रविशामि, अन्यस्मिन् दिने भणितं गेहिन्या, यदि मया प्रयोजनं तदा निजजननीं गृहबहिष्टात् कृत्वा भोजनमात्रसन्तुष्टां धारय, मां वा विसर्जय । ततो विस्मार्य जनन्या उपकारं, अवलम्ब्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च नीचजनचेष्टितं, [1]कलत्रस्नेहविधुरेण मया खरपरुषवचनैर्निर्भर्त्सिता जननी, भणिता च किं ते गृहतप्त्या ? उदरं भृत्वा तूष्णीका तिष्ठ, तत् श्रुत्वा मन्युभरभृतमानसाऽनवरतमुक्तस्थूलाश्रुजालका गृहादपि निर्गता, उपेक्षिता च मया, [2]समुत्पन्नवैलक्ष्यया च तया प्रक्षिप्त आत्मा नगरकूपे, पतनशब्दश्रवणसम्भ्रान्तमानसा मिलिताः कृत्वा कोलाहलं नरनारीगणाः, विगतप्राणा च सा समुत्तारिता कूपात्, तत्क्षणं लोकैर्विज्ञातवृतान्तैः, धिक्कारितोऽहं नागरिकलोकैः परिहृतः स्वजनवर्गेण, न भुञ्जते मम गृहे ब्राह्मणाः, न गृह्णन्ति भिक्षां पाखण्डिनः । ततोऽहं विषादमापन्नो मरणमेव मे समुचितमिति मन्यमानो निर्गतो नगरात्, गतः स्तोकं भूमिभागं, दृष्टः पूर्वपरिचितगङ्गाधराभिधतापसेन प्रश्निताश्च तेन वत्स चण्डरुद्र ! किं कारणं ? विमनस्को विच्छायवदन इव लक्ष्यसे ? कथितश्च मया मरणाध्यवसायपर्यवसानो निजो व्यतिकरः, तापसेन भणितं वत्स ! धर्म एव जननीवधजनितपापपङ्कप्रक्षालनस्वच्छसलिलसन्निभः शेषदोषनिर्घातनसमर्थश्च । तदहो तमेव धर्मं कुरुष्व । येन ते शुद्धिर्भवति, प्रतिपन्नं च मया तद्वचनं, गतस्तापसः, मयापि गृहीत्वा तापसव्रतमतिनिर्वेदेन शून्यारण्यमिदमङ्गीकृतम् ।

एतत् श्रुत्वा विषण्णो नागदत्तः, गृहीतः पश्चात्तापेन, चिन्तितं च तेन मयाप्यपकर्णिता जननी, विनाशितो गृहभारः, मरणमेव मम शरणमिति मन्यमानो गतस्तापसजनसाधितसामर्थ्यं सर्वकामितनामपत्तनं, चिन्तितुं प्रवृत्तो [यथा] दुर्लभा पुनरपि सर्वकामितपत्तनसम्प्राप्तिः, जन्मान्तरेऽपि मा जननीजनकयोरपमानकारकोऽहमभूवमिति कृत्वा प्रणिधानमत्र निपतामीति विचिन्त्य स समारूढः सर्वकामितपत्तनशिखरिशिखरं, दृष्टोऽसौ मन्त्रसाधनार्थमागतेन योगसिद्धयोगीश्वरेण, लक्षितश्चतेन तदभिप्रायः, सम्भाषितो मधुरवचनेन, भणितश्च भद्र ! कस्त्वं ? किं वा कर्तुमारब्धः? निवेदितो नागदत्तेन सर्वोऽपि निजव्यतिकरः, योगसिद्धेन भणितं भद्रक ! बुधनिन्दित आत्मवधः, विरम त्वममुष्मान्मरणाध्यवसायात्, गत्वा कुरु निजजनन्याः पानभोजनस्नानशयनाशनादिविनयकरणेन परमप्रतिपत्तिं, नष्टद्रविणजातविषये व्यवसाय एव सङ्गतो, न मरणं, नागदत्तेन भणितं भगवन् ! शोभनं त्वया समादिष्टं, किन्तु निष्कासितं मया निजगृहात्प्रभूतं द्रविणजातं नाशितं च, साम्प्रतमर्थेन विना व्यवसायेनापि न [3]तावद्विटपितुं तीर्यते, न निपुणोऽपि कोलिकः सूत्रं विना पटकरणसमर्थः । योगसिद्धेन भणितं भद्र ! दृष्टो मया विनापि सूत्रेण क्रियमाणः पटः, नागदत्तेन भणितं कथं ?

तेन भणितं गतोऽहमेकदा प्रयोजनवशादुत्तरापथं, तत्राटवीशीर्षे मिलित एकः कुलपुत्रकः, भणितश्चाहमनेन भद्र ! आगच्छ सममेव व्रजावः, साम्प्रतं शिशिरकालो, हिमाचलभूमिरेषा,

---

१ कलत्रस्नेहलङ्घितेन-BJC 'कलत्तसिणेह लंघिएण' इति मणोरमा कहा मध्ये पृ. ३६ । २ समुत्पन्नविलक्षया-BJC। ३ BJC । विटप= विस्तार । तावदाजीवितुं पार्यते-मु. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्रावरणश्चाहं, दृश्यते चास्य गुर्वी चीवरमुत्कोली, वितरिष्यति ममापि रजन्यां सवडिमात्रमिति विचिन्त्य चलितोऽहं तेन समं, प्राप्तावटवीमध्ये, अस्तमितो दिनकरः, मुक्त्वा मार्गमुषितं चैकत्र प्रदेशे, उच्छोटिता तेन मुत्कोली, यावत्तत्र सम्बलमेव केवलं, ततो विषादमापन्नेन जल्पितं मया नूनं मर्तव्यमद्य शीतेन, तेन भणितं किं कारणं ? मया भणितमप्रावरणोऽहं, त्वमपि मम सदृश एव, क्लेशेन गमितव्या शिशिरशीतलपवनवाद्यमानदशनैरेवास्माभिः शर्वरी, तेन भणितं मा भैषीः, अवलोकय निजमित्रशक्तिं, कुविन्देनेव तेन विक्षिप्तौ नभस्तले हस्तौ, प्रादुर्भूतं प्रधानसुकुमालपक्ष्मलपटिकायुगलं, एका मम समर्पिता, द्वितीया पुनरात्मना प्रावृता, प्रणष्टं शीतम्। समुत्पन्नकौतुकेन जल्पितं मया [१]अहोऽचिन्त्यं सामर्थ्यं मम मित्रस्य, अलमितरसङ्कथया, एतदेव तावत्कथयतु भवान् प्रियवयस्य ! किमेष सुप्रसन्नगुरुपादुकाप्रसादः ? उत कश्चिद्देवतावर इति ? तेन भणितं सौम्य ! शृणु–

चित्रनिपुणकथा

अस्ति मगधाविषये जयन्ती नाम नगरी, तत्र कनकशेखरो नाम राजा, अन्यदास्थानगतस्य राज्ञश्चित्रनिपुणो नाम कुविन्दः प्रयोजनवशेन समागतः, उपायनीकृतं तेन चित्रचित्रमनोहरं प्रवरतेजसा दीप्यमानमत्यन्तं सुकुमारस्पर्शं वस्त्रयुगलं, तत्क्षणमेव परिहितं राज्ञा, निषण्णः सिंहासने, तुष्टः कुविन्दकस्य, दत्तस्तस्मै सकलक्षियप्रधानो ग्रामो निजाङ्गलग्नवस्त्राभरणादिकं च, प्रशंसितश्च सकललोकेन, परगुणश्रवणसमुत्पन्नमत्सरेण प्रकटमेव जल्पितं मया राजसभामध्ये, सूत्रेण पटः क्रियते, किमत्राश्चर्यं ? कुविन्देन भणितं यदि सूत्रेण विना करोषि तदा युज्यते भणितुमीदृशं, ततः कृता मया राजसमक्षमेवैषा प्रतिज्ञा, यदि सप्तरात्रमध्ये सूत्रं विनापि पटं न करोमि तदा ज्वलने प्रविशामि। कुविन्देन भणितमस्तु तावद्वचनविस्तरः, कार्यसिद्धौ पुनः संशयः, अदत्तप्रतिवचन एव निर्गतोऽहं राजमन्दिरात्, प्राप्तः स्वभवनं, कथं नु नामैष प्रतिज्ञासागरस्तरितव्यः, एवंविधचिन्तासमाकुलो यावत्तिष्ठामि तावत्समागतो मम गृहे लीलाविलासो नाम यौगिकः, गृहाङ्गणे स्थित्वा हुङ्कारितं तेन, आनीता मया स्वहस्तेन यथा पर्याप्ता मनोरमा भिक्षा, निपतितश्च तच्चरणयोः, गतोऽसौ स्वस्थानं, अहमपि गृहीत्वा पुष्पताम्बूलविलेपनादिकं तदनु मार्गलग्न एव प्राप्तस्तस्याश्रमे, प्रक्षालितं तस्य चरण युगलं, पुष्पताम्बूलविलेपनानि सुखं प्रसुप्तस्य तस्य तालवृन्तेन प्रवीजितुमहमारब्धः, एवं द्वितीयतृतीयदिनेऽपि, चतुर्थदिने भणितोऽहं तेन वत्स ! किमिह कार्यवशेन गुरुप्रतिपत्तिं करोषि परलोकार्थं वा ? मया भणितं साम्प्रतं प्रयोजनवशेन, तेन भणितं भण येन

१ अहोऽचिन्त्यसामर्थिता-BC।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रयोजनं कथितो मया निजप्रतिज्ञाविशेषः, तेन भणितमस्त्यत्र तावदुपायः, केवलं सत्त्वसाध्या सिद्धिः, मयोक्तं कीदृशी ? तेनावाच्यष्टोत्तरशतवारं मन्त्राक्षराणि जपित्वा निजशिरसा **गिरिकन्दरोदरो** नाम यक्षः पूजयितव्यः, पश्चादसौ सत्त्वानुरूपं वरं वितरति, प्रतिपन्नं तन्मया, गृहीतो मन्त्रः, कृतं बलिविधानं, गतो गिरिकन्दरोदरमन्दिरं, पूजितो यक्षः, कृतो मन्त्रजापः, आकृष्टं कोशाद्यमजिह्वाकरालं करवालं, वाहितं निजकन्धरायां, निरुपमसत्त्वगुणावर्जितमानसोऽर्धच्छिन्न एव शिरसि प्रत्यक्षीभूतो यक्षः, भणितोऽहमनेन भण ते किं प्रियं करोमि ? मया भणितमसूत्रपटकरणसामर्थ्यं देहि ? तेनोक्तं भविष्यति वत्स ! ते चिन्तितम् ।

ततः सम्पूज्य तं यक्षं परं परितोषमुद्वहन् समागतोऽहं स्वभवनं, प्रणम्य राजानं निषण्णोऽहमुचितासने, पृष्टोऽहं मन्त्रिणा किं सम्पूर्णा ते प्रतिज्ञा ? मया भणितमेवमेतत् । ततः सकलसभासमक्षं विक्षिप्य गगनाङ्गणे करयुगलं दत्तं देवदुष्योपमं वस्त्रयुगलं नरपतये, एवं मन्त्रिसामन्तादिभ्योऽपि, तुष्टो राजा, गुणग्राहिणी जाता नरपतिसभा, भणितोऽहं राज्ञा किं तव प्रियङ्करोमि? मया भणितं वर्षमेकमकरं कुरुष्व जनपदमिमं? प्रतिपन्नं राज्ञा, दत्तश्च प्रवरग्रामपञ्चकसहितः सकलविषयसारः, **सुखसङ्गमो** नाम मह्यं ग्रामः, वितीर्णश्च यदृच्छाचारः, एवमेषा मे शक्तिरीदृशी जातेति । ततोऽभिनन्दितो मया कुलपुत्रकः, प्रशंसितो बहुप्रकारं, प्रस्थितौ ततः स्थानाद् द्वावप्यावां, लङ्घिता सप्तरात्रेणाटवी, गतोऽसौ स्वस्थानम्, अहमपि प्रयोजनवशेनात्र समागतः, तदेवं विनापि सूत्रेण दृष्टो मया क्रियमाणः पटः, अर्थोपार्जनमपि व्यवसायिनां नातिदुष्करं, व्यवसायमेव पुरुषाणां गुरुकं भाण्डमूल्यं, यतः-

आढत्ता सप्पुरिसेहिं, गुरुयववसायदित्तहियएहिं ।
कज्जारंभा होहिंति, निप्फला किं चिरं कालं ? ॥१॥

मया भणितमेवमेतत्, नास्त्यत्र सन्देहः, निवर्तितोऽहमेतस्मादविधिमरणात्, व्रजामि साम्प्रतं स्वस्थानं, यौगिकेन भणितं वत्सैतया गुरुजनपराधीनतया समावर्जितं मे हृदयं, गृहाणेदं स्थावरजङ्गमविषापहारकं प्रधानमणिम्, अनुग्रह इति मन्यमानेन प्रतीच्छितो नागदत्तेन गतो यौगिकः स्वस्थानं, नागदत्तोऽपि निजनगरमागतः, कथितः सर्वोऽपि सविस्तरो निजवृत्तान्तो जनन्याः, तया भणितं वत्स! गच्छतु द्रविणजातं, त्वया विद्यमानेन भूयोऽपि भूरि द्रव्यं भविष्यति, धन्याहं यया पुनरपि तव मुखकमलमवलोकितमिति भणित्वा स्नेहसारं निवेशितो निजोत्सङ्गे, चुम्बितो मूर्धनि नागदत्तः, चिन्तितं तेनाहो स्नेहपरता जननीहृदयानां, अहं पुनः शिलासङ्घातकठिनमानसो यस्तथापकर्ण्य जननीं देशान्तरं प्रस्थितः, प्राप्तमिहलोक एव मया दुर्नयफलं, साम्प्रतं परविनयेन समाराधयामि मातरमिति विचिन्त्यैवं चेतसि कृतनिश्चयो मातुः पार्श्ववर्ती प्रतिदिनं पर्युपास्ते, मातरि स्नातायां स्नाति, भुक्तायां भुङ्क्ते, किम्बहुना? सर्वप्रयोजनेष्वपि सततमानुकूल्येनैव वर्तते, एतद्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्ट्वा दूयते नागश्रीस्तद्गेहिनी, श्यामितवक्त्रीकृतमुखी न गृहकार्येषु सम्यक्प्रवर्तते, एवं व्रजति कालः ।

अन्यस्मिन् दिवसे गुणधरश्रेष्ठिपुत्रो गुणसारः कृष्णभुजङ्गमेन दष्टः, समाहूता गारुडिकाः, प्रयुक्ता मन्त्रागदादयः, न जातः कोऽपि विशेषः । ततः पटहशब्देनाकारि घोषणा नगरे, यथा यो गुणसारं जीवापयति तस्मै श्रेष्ठी शतसहस्रं ददाति, निवारितः पटहको नागदत्तेन, गृहीत्वा योगिना दत्तं मणिरत्नं गतः स श्रेष्ठिसमीपं, प्रक्षाल्य मणिरत्नं [1]पायितस्तज्जलं गुणसारः, नष्टो विषविकारः,संवृत्तश्च स प्रगुणः, तुष्टेन श्रेष्ठिना दत्तं तस्मै सुवर्णशतसहस्रं, गतो गृहीत्वा नागदत्तो निजभवनं, सविशेषं च समाराधयति जननीचरणयुगलम्, अन्यस्मिन् दिने विमनस्का दुर्मना विमुक्तदीर्घनिःश्वासा विच्छायवदनकमला मञ्चकगता दृष्टा नागश्रीर्नागदत्तेन, पृष्टा च प्रिये ! किं तव बाधते? तया भणितं शिरोवेदना, नागदत्तेन भणितं किंनिबन्धना ? तया [2]भणितमनक्षनिबन्धना, यतस्त्वं परिहृतसकलगृहव्यापारः कृतकरतलाञ्जलिर्जनन्याः पुरतः किङ्कर इव किं करोमीति ब्रुवाणस्तिष्ठसि! किं तवैवैकस्य जननी ? किमन्यो जनो नभस्तलान्निष्पतितः? एभिरनक्षैर्ज्वलितज्वलनपतितमिव दह्यते मम शरीरकं, प्रणष्टा निद्रा, न रोचते भोजनं, बाढं बाधते शिरोवेदना, नागदत्तेन भणितं श्रूयतां प्रिये ! परानक्षैरात्मानं कदर्थयसि, अनक्षबहुलकुम्भकारं चानुकरोषि ? तया भणितं क एषोऽनक्षबहुलः नागदत्तेन भणितं श्रूयतां प्रिये !–

अनक्षबहुलकुम्भकारकथा

अस्ति सकलमहीवलयतिलकभूतं कुसुमपुरं नाम नगरं, तस्मिन् कुम्भप्रियो नाम कुम्भकारः परिवसति । स पुनर्यदि कश्चिदघटमानकं ब्रूते तदाकर्ण्य नितरामनक्षभरभृतमानसष्टक्कराभिर्निजमस्तकं चूर्णयति, ततः कृतं लोकैस्तस्य गुणनिष्पन्नमनक्षबहुल इति नाम, तदेव च प्रसिद्धिं गतं, तस्य च गृहे समस्ति विशाला शाला, वसन्ति च तस्यां नानादेशागताः कार्पटिकादयः, वदन्ति च रजन्यामघटमानकानि टक्करशतानि, अनक्षवशविगतनिद्रो रोषवशपरिगतश्चूर्णयति टक्कराभिरनक्षबहुलो निजमस्तकम् । तथा कदर्थयन्तमात्मानं दृष्ट्वा [3]जनको भणितस्तनयैः, तात ! तव गृह एवानक्षाणामन्तो नास्ति, विशेषतो नगरमध्ये, ततो यद्यनक्षपरिहारेण प्रयोजनं तदाटव्यां गृहं क्रियतां ? प्रतिपन्नमिदं तेनापि, गतास्तं गृहीत्वा तत्तनयाः कान्तारमध्यसंस्थित पर्वततलासन्नां स्वच्छसलिलपरिपूर्णामेकां सरसिकां, कृतं तदासन्ने कुटीरकं, बहुदिनयोग्यसम्बलं

१ पायितस्तु जलं गुणसारः, विषविकारं प्रगुणः संवृतः, तुष्टेन-BJC । २ भणितमनक्षनिं BJC । भणितमिर्ष्यानिं मु. । ३ जनकं-BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च समर्प्य मुक्त्वा तत्र जनकं नगरमागतास्तनयाः सोऽपि तत्र कर्दमं मर्दयित्वा भाण्डानि कर्तुमारब्धः, तत्पुत्रा अपि समये समागत्य गृहीत्वा भाण्डानि नगरे विक्रीणन्ति। एवं च व्रजति कालः

अन्यदा मृगयायै निर्गतो महाकान्तारमनुप्रविष्टो राजा, निष्ठितं सलिलं, पिपासितः पृच्छति समासन्नपुरुषान्, यथा भो भोः किमस्त्यत्र जलसम्भवः ? तैरुक्तम्अस्ति, इतः समासन्ना सरसी, तत्र गम्यतामित्युक्ते गतो राजा, दृष्ट्वा राजानं ससम्भ्रममभ्युत्थितः कुलालः दत्तमासनं, निषण्णो राजा, आनीतः स्वच्छशीतलसलिलपरिपूर्णः करबकः, पीतं पयः पृथ्वीपतिना, [1]जातश्च स स्वस्थमानसः, परितुष्टः कुलालस्य, पृष्टश्च स्नेहसारं भद्र ! किंनिमित्तमेकाकी कान्तारे तिष्ठसि ? तेनोक्तमनक्षवचनश्रवणपरिहाराय, राज्ञा भणितं यद्येवं तदागच्छ मया सार्धं नगरे, तथाहं करिष्यामि यथा न कोऽप्यनक्षान् समुल्लपति। तेन भणितमेवं भवतु, चलितो नगराभिमुखं नगरमासन्ने च दृष्टा राज्ञा सागराभिधानस्य वणिजो दुहिता खरकाभिधाना कर्कन्धूफलानि चिन्वन्ती, पृष्टो राज्ञा मन्त्री कैषा कस्य वा सुता? कथितः सर्वोऽपि मन्त्रिणा वृत्तान्तः, प्रविष्टा नगरं, धृतः कुम्भकारो निजमन्दिर एव नरपतिना, कारिता च घोषणा नगरे पटहकेन यथा यः कश्चिदघटमानकं भणिष्यति तं राजा महादण्डेन दण्डयिष्यति, एवं व्रजति कालः.

अन्यस्मिन् दिने विज्ञातनरपतिमनोगतभावेन परिणायिता सा दुर्गतकन्यका सचिवेन, [राज्ञापि] परिणीता च सङ्क्षेपेण, प्रक्षिप्तान्तःपुरे, पूर्वकृतसुकृतानुभावेन जातस्तदुपरि प्रणयानुबन्धो नरपतेः, प्राप्ता सा पट्टमहादेवीपदं, प्रवर्धमानप्रणयेन राज्ञा सह विषयसुखमनुभवन्ती सा कालं गमयामास। अन्यदा तरुणजनमनोमोहने कलकोकिलारावभृतभुवनोदरे समागते च वसन्तमासे नगरोद्यानाभिमुखं च प्रमोदभरनिर्भरे निर्गच्छति सति नागरिकजने उद्यानश्रीदर्शनार्थं समं खरकया महादेव्या अनक्षबहुलकुम्भकारेण च प्रस्थितः पार्थिवोऽपि, निर्गच्छता च दृष्टा अकालफलभरभज्यमानशाखासञ्चयैका बदरी, पृष्टा च राज्ञा समासन्नवर्तिनी खरकामहादेवी, प्रिये ! क एष पादपः ? किमभिधानान्येतस्य फलानि ? सुचिरं निरूप्य जल्पितमनया नाहं विजानामि, तदेवं श्रुत्वा समुत्पन्नानक्षेण प्रहतं निजमस्तकं टक्कराभिरनक्षबहुलेन, राज्ञा भणितं किमेतत् ? तेनोक्तं

यद्भयेन कान्तारे गृहमकारि, खरकां महादेवीं दर्शयता पठितमनक्षबहुलेन-

कल्लइ बोरइं विक्किणइ, अज्ज न जाणइ खक्ख ।
पडुयइ अडविहिं करि, मु घरु न सहउं एह अणक्ख ॥१॥

---

१ जातः समास्वस्थ° BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुष्प्रतिकारमिति कृत्वा विसर्जितो राज्ञा, गतस्तस्मिन्नेव स्थाने, तथैव कालं गमयति । अन्यदा तमःस्तोमान्धकारायां रजन्यां श्रुतस्तेन शार्दूलशब्दः, भयभीतोऽन्यत्र कुत्रापि निलयनमलभमानः प्रविष्टः सङ्कटद्वारां कुम्भिकां, प्रभाते निर्गन्तुमशक्नुवंस्तृषाक्षुधाभिभूतो नारक इव घटिकालये विसंस्थूलं तडफडामानो विरसंस्तत्रैव विनाशमापन्नः । समागता [1]भाण्डानयननिमित्तं तनयाः प्रेक्षते पितरम्, इतस्ततो गवेषयद्भिर्दृष्टो कुम्भिकायां पञ्चत्वमुपगतः, कुम्भिकामुखे चोपदेशकर्मं गाथायुगलं, तद्यथा-

वग्घभएण पविट्ठो, छुहाहओ निग्गमम्मि असमत्थो ।
अट्टवसट्टोवगओ, पुत्तय! पत्तो अहं निहणं ।।१।।
इह लोगम्मि दुरंते, परलोगविवाहगे दुहविवागे ।
महवयणेणं पावे, वज्जिज्जा पुत्तय ! अणक्खे ।।२।।

अवधार्य तदर्थं, कृत्वा जनकस्य मृतकृत्यानि विगतशोका गृहकार्याणि कर्तुमारब्धास्तत्तनयाः, तस्मात्प्रिये ! परानक्षैरेवमनर्थभाजनं प्राणिनो भवन्ति, यद्यहं निजजनन्या विनयं प्रयुञ्जे तत्किं तव शिरो बाधते ? विज्ञातनागदत्तनिश्चया स्थिता मौनेन नागश्रीः, व्रजन्ति वासराः ।

अन्यस्मिन् दिने भणिता सा नागदत्तेन प्रिये ! यदि त्वं निजश्वश्रूशुश्रूषां करोषि तदाहं देशान्तरे व्रजामि वाणिज्यार्थं, हर्षवशविकसितवदनया प्रतिपन्नमनया, गतो नागदत्तः, प्राप्तावसरया चिन्तितं नागश्रिया, साधयामि साम्प्रतं निजसमीहितम् । तत आहारनिरोधं कुर्वत्या क्रमेण महातपस्विनीव शोषितशरीरा सा कृता तया, तेनोत्थातुमपि सा न शक्नोति, परिशुषितमांसरुधिरा प्रसृतश्वासा गलन्नयना च कथंकथमपि जल्पन्ती निःस्थामा सा गमयति दिनानि, यतः-

वहुयाओ सासुयाणं, कलुसियहिययाओ जंपि चिंतिंति ।
सइ सामत्थे जं पुण, कुणंति किं तेण भणिएण ।।१।।

दुःखभरभृतायां कण्ठप्राणायां समागतो नागदत्तः, निपतितस्तच्चरणयोः, पृष्टा जननी कुशलोदन्तं, विमानिताहमनया, कामं बालस्त्वमिति वक्तव्ये स्खलदक्षरं कामपाल इति जल्पितं जनन्या, पृष्टा तेन नागश्रीः, प्रिये ! किं ते श्वश्रूः समुल्लपति ? तत्कालोत्पन्नप्रतिभया[2] जल्पितमनया तदेषा समुल्लपति यद्वक्तुमपि न शक्यते, तथापि तव कथ्यते, यस्मिन्नेव दिने आर्यपुत्रः प्रचलितस्तस्मिन्नेव दिवसे भणिताहमनया वत्से ! अस्ति मम पूर्वपरिचितः कामपालो नाम पुरुषः, अनपत्या च त्वं, तद्वत्से ! रजन्यां तं प्रच्छन्नं प्रवेशयामि, न प्रतिपन्नम् । मया पुनः पुनर्भणन्त्याः समतिक्रान्तानि सप्तदिनानि, तथापि मया न प्रतिपन्नं, तत आज्ञाखण्डनं मन्यमाना सा भोजनमपि न करोतीति ! ततः समुत्पन्नकोपेन जल्पितं तेन मा करोतु भोजनं, म्रियतां किमनया? उत्तीर्णचित्तमिति ज्ञात्वा भणितं नागश्रिया आर्यपुत्र !

१ कुलालानं BJC । २ °प्रातिभेन जं BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विसर्जय मां, नाहमनया सार्धमेकमपि दिनं तव गृहे वसामि, तेन भणितं न त्वं विसर्जनयोग्या यस्याः शीलपरिपालने ईदृशो निश्चयः, एषा पुनर्लङ्घितमर्यादा स्थविरा विसर्जनमप्यर्हति। तया भणितं यद्येवं ततोऽहं स्थिता, ततोऽसौ तद्वचनेन जननीं गृहीत्वा निर्गतो गृहात्, गतो योजनपञ्चकं, दृष्टाटवीमध्ये चैका प्रपा, मुक्त्वा तत्र जननीं समागतो निजगृहम्, सापि दृष्टा प्रपास्वामिना, भणिता च वृद्धे ! समागतो जनस्त्वया पानीयं पातव्यं वसनाशनादिचिन्तामहं तव करिष्यामि, प्रतिपन्नमनया, व्रजन्ति वासराः।

अन्यदा जातः परस्परं शिशिरग्रीष्मवर्षारात्राणां विसंवादः, तत्र शिशिरो भणति मया मेदिनी भूषिता, ग्रीष्मवर्षारात्रावप्येवमेव भणतः, न छिद्यते तेषां विवादः, भणितं शिशिरेण पृच्छामः कमपि चिरवयसं, प्रतिपन्नं ताभ्यां, दृष्टा प्रपोपविष्टाऽमृतमुखी नाम स्थविरा, समागताश्च ते तदन्तिकं, प्रणता स्थविरा, आशीर्दानपुरस्सरं सम्भाषितास्तया कोमलवचनैः पृष्टाश्च किं निमित्तं वत्साः ! समागताः? तैरुक्तमम्ब ! शिशिरग्रीष्मवर्षारात्राणां मध्ये कः श्लाघनीयः ? तयोक्तं त्रयोऽपि श्लाघ्यतमा एव।

जओ- **सिसिरि सुयंधु तेल्लु लाइज्जर, कुंकुमि अंगरागु निरु कज्जइ।**
रुइ आहारि समग्गल वट्टइ, निद्दु वि भोयणु सोसु न कड्ढइ ॥१॥
अच्छा चंदण अच्छा कप्पड, पाय पसारि विसुप्पइ चप्पड।
गिम्हु वि विविहवणेहिं समाउलु वरहिंडोलय-रासरमाउलु ॥२॥
पाउसु पुत्तय ! पुण्णिहिं लब्भइ मेइणि सव्व जि नियजलि गज्जइ।
ठाइ ठाइ [1]रेल्लुयहिव [2]माउलु पमुइयपामरकयकोलाहलु ॥३॥"

ततस्ते त्रयोऽपि परितुष्टाः, भणितास्तैः स्थविरा, अम्ब ! घटमिमं मोदकभृतं त्वं प्रतिदिनं पश्यसि, एवं भणित्वा गतास्ते स्वस्थानं, सापि प्रतिदिनं मोदकान् भुञ्जाना कालं गमयति। अन्यदा चिन्तितं वध्वा यदि तस्या मृतशब्दः श्रूयते तदा मे निवृत्तं भवति हृदयं, भणितश्च [तया] नागदत्तः, आर्यपुत्र ! गत्वा अम्बायाः शुद्धिं लभस्व ? कथं सा तिष्ठति? गतोऽसौ, दृष्टा जननी सुन्दरशरीरा, दर्शितस्तया पुत्रस्नेहः, भोजितः परममोदकैः, निवर्तमानस्य च तस्य सम्बलनिमित्तं समर्पिता मोदकाः, प्राप्तो निजगृहं नागदत्तः, पृष्टो नागश्रिया कथमम्बा तिष्ठति? कथं वा भुङ्क्ते ? । कथितस्तेन सर्वोऽपि व्यतिकरः, दर्शिता मोदकाः, कषायिता नागश्रीः, भणितो नागदत्तो यथा मम जननीं तत्र मुञ्च निजजननीं चेहानय। तथैव कृतं तेन। पुनरपि सम्पन्नस्त्रयाणामपि ऋतुदेवानां विसंवादः, भणितं शिशिरेण पुनरप्यन्यं कमपि पृच्छामः, आगच्छद्भिस्तैर्दृष्टा सा कटुकमुखी, अपूर्वेति कृत्वा च पृष्टा

१ = रेला इति भाषायाम्। २ = कलकलशब्दयुक्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अम्ब ! शिशिरग्रीष्मवर्षारात्राणां को रमणीय इति ? तया भणितं त्रयोऽप्यशोभनाः

यतः- **''सीयलवाइहिं वाजहिं दांत, सुंकडियहिं पावियहिं निसांत ।**
[१]सीयलइ सीइं दाज्झ(झ) इ वामुच्छेहिं न चडइ काम ।।१।।
खणि खणि पिज्जइ उन्हउ पाणिउ नइ-दह-कूव-तडागहं आणिउ ।
तावहिं लूइं दहइ जु देहू, तसु उन्हाला नाउं भलेहु ।।२।।
हेट्ठइ कादउ उप्परि पाणि, पइ पइ आवहिं कुहियउ घाणिउ ।
पाउसु परहओ फिट्टउ बारह, जो अणुहरइ कुहिय चम्मारह ।।३।।

एतत् श्रुत्वा तैस्त्रिभिरपि रुष्टैः शप्ता सोपहतश्रवणनयनव्यापारा दुःखेन तिष्ठति। कतिपयदिवसावसाने भणितो नागदत्तो नागश्रिया मम जनन्यास्तु त्वं वार्तामपि न पृच्छसि, तेन भणितं पृच्छामि गच्छामि च तत्र गतोऽसौ, तत्र स्थाने दृष्टा तथाविधा सा वृद्धा, विस्मयमापन्नेन तेन पृष्टास्तत्रैव सम्पिण्डिताः कार्पटिकादयः, भणितमेकेन दृष्टा मया सा पुरुषत्रिकेण शिशिरादिस्वरूपं पृच्छ्यमाना त्रयाणामपि निन्दापरायणा। ततस्तै रोषापूरितमानसैः प्रणष्टवचननयनश्रवणचेष्टा सा कृता। नागदत्तेन चिन्तितं निजनामसदृशं कुर्वत्या दूनिताः केचिदेतया दिव्यपुरुषाः, तेन चैवंविधा जातेति विचिन्त्य गृहीत्वा तां गतः स्वनगरं, प्रविष्टो गेहे, गेहिन्या पृष्टं कथमेवंविधमवस्थान्तरं सम्प्राप्ता अम्बा, तेन भणितं निजतुण्डफलमेतदिति कथितः सर्वोऽपि वृत्तान्तः। श्रुत्वेदं स्थिता सा लज्जयाधोमुखी, मातरं प्रतिपालयन्ती च क्लेशेन कालं गमयामास। एवं मधुरवचनानि वदन्ती प्रथमस्थविरा सुखपरम्परां प्राप्ता, द्वितीया पुनर्दुर्वाक्यदोषतो दुःखपरम्परामिति। तदेतदवगम्य सदा मधुरभाषिभिरेव भाव्यमिति।

तदिह मधुरभाषाभाषिणामेवमुच्चै-र्विपुलसुखसमृद्धिं वीक्ष्य सार्धं सुकीर्त्या ।
वदत विशदवाक्यं सर्वदा सत्यसारं, मितमधुरमुदारं विश्वसन्तोषकारम् ।।१।।

इति मृदुभाषिताऽधिकारः

---

१ सीयालइ सिइं दज्झहिं चाम । छेहिं न चडइ जु कीजइ काम । इति मनोरमाकहा ग्रन्थे पृ. ४१ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दयाऽधिकारः १९

मितमधुरभाषकाश्च दयापरा भवन्ति, ततस्तदनन्तरं दयाधिकारमाह, तत्रैते श्लोकाः–

दया धर्मस्य सर्वस्वं, दया धर्मस्य जीवितम् ।
मातेव निजपुत्रस्य, दया धर्मस्य पालिका ।।३३९।।
दुःखिताः स्वत एवामी केऽपि केनापि कर्मणा ।
प्राणिनोऽनादिसंसारे तेषांकिं वद चिन्तया ।।३४०।।
जायन्ते चात्र संसारे, शतशः सर्वेऽपि जन्तवः ।
मातृपित्रादिभावेन, कः प्रियः कोऽप्रियस्ततः ।।३४१।।
हन्मीति चिन्तनादेव, सुकृतं हन्ति जन्मजम् ।
त्रिजन्मसम्भवं हन्ति, सुकृतं हेतियोगतः ।।३४२।।
घ्नंश्च जन्मशतोपात्तं, सर्वं हन्ति हितं शुभम् ।
आत्मैव च हतस्तेन, परं घ्नता न संशयः ।।३४३।।
यतो हन्यादसौ हन्ता, लभते वधबन्धनम् ।
दशधा शतधा चैव, लक्षशः कोटिशोऽपि वा ।।३४४।।
दृष्ट्वा च शस्त्रमुदीर्णं, भयात्तरललोचनः ।
वेपते विविधं प्राणी, सर्वो जीवनवाञ्छया ।।३४५।।
आक्रुष्टोऽपि प्रियस्वेति, दुःस्थो भवति मानसे ।
मार्यमाणस्य यद्दुःखं, तद्वेत्ति यदि केवली ।।३४६।।
अर्थवन्तोऽर्थसारेण, राजा राज्येन रक्षति ।
येन तेन प्रकारेण, रक्षामर्हति जीवितम् ।।३४७।।
यथा स्वयं प्रणश्यन्ति, दूरं दूरेण देहिनः ।
मृत्योस्तथापरस्यापि, न प्रियं मरणं क्वचित् ।।३४८।।
निःशेषं विश्वमेकत्र, धृतमन्यत्र जीवितम् ।
विश्वं विश्वं परित्यज्य, जीवो गृह्णाति जीवितम् ।।३४९।।
एतद्धर्मस्य सर्वस्वं, शेषो वचनविस्तरः ।
परेषां तन्न कर्तव्यं, यदात्मनि न रोचते ।।३५०।।

---

१ BJC । जन्तवः शतशः समे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वदानाग्रिमं दानं, शौचानां शौचमुत्तमम् ।
कारणं सर्वसौख्यानां, यदेतत्प्राणिरक्षणम् ।।३५१।।
शेषदानान्यदानानि, मरणे समुपस्थिते ।
जीवितं यो ददात्यस्य, स दाता सर्वदायकः ।।३५२।।
दृष्टान्तोऽत्र नरः कोऽपि, राजरत्नमलिम्लुचः ।
राजप्रसादतो राज्ञ्या मरणाद्विनिमोचितः ।।३५३।।
परप्राणप्रहाणोत्थ-पापपूरेण पूरिताः ।
पतन्ति प्राणिनः पापा, नरके तीव्रवेदने ।।३५४।।
सदयहृदयदत्ता त्रातनिःशेषसत्त्वा,
विधृतगुणविताना सर्वधर्मप्रधाना ।
जयति दलितदोषा सर्वकल्याणपोषा,
जनजनितसदक्षा पालिता जीवरक्षा ।।३५५।।

इति श्लोकाः सप्तदश, व्याख्या-दयेत्यादि दया अहिंसा **धर्मस्य सर्वस्वं** सर्वसारः, दया धर्मस्य जीवितमिव जीवितं, दयासद्भाव एव धर्मसद्भावात् **मातेव** जननीव **निजपुत्रस्य** सुतस्य **दया धर्मस्य पालिकेति** श्लोकार्थः ॥३३९॥

अथ वधचिन्तापि न कर्तव्येत्युपदिशन्नाह-**दुःखिता** इत्यादि श्लोकः स्पष्टः ॥३४०॥
अथात्र संसारे न कोऽपि शत्रुर्मित्रं वापीति दर्शयन्नाह-**जायन्त** इति श्लोकः सुगमः. ॥३४१॥

अथ परप्राणप्रहाणं प्रति चिन्तनशस्त्रग्रहणव्यापादनेषु यावन्मात्रं सुकृतं हन्ति व्यवहारतस्तत्तावन्मात्रं दर्शयन् श्लोकत्रयमाह-**हन्मीति चिन्तनादेवे**त्यादिकं कण्ठ्यं चैतत् ॥३४२-३४४॥

अथ शस्त्रमुद्गीर्णमालोक्यामार्यमाणा अपि यथा दुःखातुरा भवन्ति जन्तवस्तथा दर्शयितुमाह-**दृष्ट्वा शस्त्रं समुद्गीर्णमि**त्यादि श्लोकद्वयं स्पष्टम् ॥३४५-३४६॥

अथ सर्वास्वप्यवस्थासु सर्वेषामपि प्राणिनां सर्वैरपि प्रकारैर्जीवितव्यमत्यन्तवल्लभमिति दर्शयन् श्लोकत्रयमाह-**अर्थवन्तोऽर्थसारेणे**त्यादि सुखावबोधमेवेदमिति ॥३४७-३४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तात्पर्यं कथयन्नाह-**एतद्धर्मस्य सर्वस्वमिति** श्लोकः स्पष्टः ॥३५०॥

अथ दयाया एव माहात्म्यमाविष्कुर्वन्नाह-**सर्वदानेत्यादि**, सर्वदानानाम**ग्रिमं** प्रधानं **दानं** वितरणं **शौचानां** सत्यतपोजलादिशौचानां **शौचमुत्तमं** प्रधानं **कारणं** निबन्धनं **सर्वसौख्यानां** समस्तशर्मणां यदेतत्प्राणिरक्षणमिति ॥३५१॥
अथ शेषदानेभ्यो जीवितव्यदानस्य प्राधान्यमावेदयन्नाह-**शेषदानानीत्यादि**, स्पष्टश्चायं श्लोकः ॥३५२॥

अथ शेषदानेभ्यो यथा जीवितव्यदानं प्रधानं तथा दृष्टान्तेन स्पष्टयन्नाह-**दृष्टान्तोऽत्र नर** इत्यादि, **दृष्टान्त** उदाहरणमत्र दयादानाधिकारे **नरो** मानवः **कोऽपि** कश्चिद्**राजरत्नमलिम्लुचो** राजरत्नहारिचौरो **राजप्रसादतो** राज्ञः प्रसादेन **राज्ञ्या** पट्टमहादेव्या **मारणात्प्राणव्यपरोपणाद्विनिमोचितो** रक्षित इति ॥३५३॥

अथ जीवघातिनामामुष्मिकं दोषमाह-**परेत्यादि**, परप्राणानां प्रहाणं घातनं तदुत्थपापस्य पूरः प्रवाहस्तेन **पूरिता** व्याप्ताः **पतन्ति** निमज्जन्ति **प्राणिनो** जीवाः **पापाः** पापकारिणो **नरके तीव्रवेदन** इति ॥३५४॥

अथ जीवदयां स्तुवन् वृत्तमाह-**सदयेत्यादि**, **सदयहृदयदत्ता** सदयं हृदयं येषां ते सदयहृदयास्तैर्दत्ता, **त्रातनिःशेषसत्त्वा** रक्षितसकलजीवा, **विधृतगुणविताना** विधृतो गुणानां वितानो विस्तरो यया सा, तथा **सर्वधर्मप्रधाना** सर्वधर्मोत्तमा, **जयत्यतिशेते दलितदोषा** विदारितापराधा, **सर्वकल्याणपोषा** सकलश्रेयःपुष्टिकारिणी, **जनजनितसदक्षा** जनानां जनितानि सन्ति शोभनान्यक्षाणीन्द्रियाणि यया सा, तथा **पालिता** सेविता **जीवरक्षा** जीवदयेति वृत्तसमासार्थः ॥३५५॥

राजरत्नमलिम्लुचदृष्टान्तः पुनरयं–
अस्त्यत्र भारते वर्षे **वसन्तपुरं** नाम नगरं तत्र **जितशत्रु**र्नाम राजा बभूव । अथ तत्रैकेन रण्डापुत्रकेण विषयप्रसक्तेन धनार्थिना चौरैः सह सङ्गतिः कृता । अन्यदा तैश्चौरै राज्ञो रत्नभाण्डागारे क्षात्रं दत्तं, स एव रण्डापुत्रकः प्रवेशितो मध्ये, निष्कासितं च किञ्चिद् द्रव्यजातं, अत्रान्तरे विज्ञातास्ते तस्करा दण्डपाशिकेन, चौराश्चौरा इति जल्पन्तो धाविताः सुभटाः, नष्टाश्चौराः, गृहीतो रण्डापुत्रकः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दर्शितो राज्ञः ततो राज्ञा तरलतारं [1]पश्यन्नसौ पृष्टो यथा रे रे मुग्ध! किमर्थं चौरिका कृता ? तेनापि मुग्धत्वेन सत्यमेव निवेदितं । ततो नरेन्द्रेण भणितं नानेन कदाचिदपि चौरिका कृता । मुग्धोऽयं वराको मुच्यतामिति । ततो मन्त्रिणा जल्पितं देव ! यद्यप्येवं तथापि निगृहीतव्य एवायमन्येषां शिक्षानिमित्तमिति राज्ञोक्तमेवं विधेहि ततोऽसौ वध्य आज्ञप्तो दीनो दयाजनको भयातुरो कम्पमानशरीरकस्तरलतारं चक्षुर्विक्षिपन् वध्यभूमौ नेतुमारब्धः, दृष्टश्चालोकगतयैकया देव्या दयापरीतान्तःकरणया दासीमुखेन राजा भणितो यथा देव ! चौरमिमं प्रसादं कृत्वा दिनमेकं मदुपरोधेन विमुञ्चस्व? येनास्य किञ्चिदहं सांसारिकं सुखं दर्शयामि । ततो राज्ञा मुक्तोऽसौ नीतश्च देव्या निजगृहे, कारितं च तस्य स्नानभोजनपुष्पताम्बूलविलेपनादिकं, परिधापितो वरवस्त्राणि, ढौकितास्तस्य पञ्चप्रकारा अपि विषयाः, गतं च दीनाराणां शतमेकं, तद्वचतिकरं द्वितीयदिने राजानं विज्ञप्य द्वितीयया देव्या तस्य तस्करस्य कृतं विशेषेण स्नानभोजनवस्त्राभरणादिकं, गतं च दीनाराणां सहस्रमेकं, तृतीयदिने तृतीयया देव्या स चौरो मोचितः, तयापि च तद्भोगादौ लक्ष एको व्ययीकृतः, चतुर्थदिने यावन्न काचिद्देव्युत्सहते, ततो राज्ञा स्वयमेव पट्टमहादेवी भणिता यथा देवि ! किं ते मनोरथा न पूर्यन्ते ? किमेनं चौरं न मुञ्चयसि? तयोक्तं देव ! न त्वं मामकं वचः करोषि, राज्ञोक्तं किमेवं वदसि? करोम्येव तावकं वचः, देवी प्राह देव! यद्येवं तर्हि जीवन्नेवैष वराको मुच्यतामिति, राज्ञापि तथा कृतं, देव्या च स नीतो गृहे, स्नात्वा तद्वा भोजनं दत्त्वा च विसर्जितः । ततोऽसौ गन्तुमारब्धः, शेषदेवीभिः सा महादेवी हसिता अहो इयं त्यागिनीति! ततस्तया चौर आकारितः पृष्टश्च केन ते प्रभूतं दत्तमिति, स प्राह त्वया यया जीवितव्यं दत्तमिति, यतो मम पाश्चात्यदिनत्रये इदमेव चेतसि वर्तते यदुत प्रातरहमवश्यं मारणीय इति । न पुनर्जानामि किं मया भुक्तं पीतं वा ?, दत्तं परिहितं वा ?, सुखं दुःखं वानुभूतमिति ?, अद्य पुनर्जानेऽहं यदुत त्वयैव महानुभावया महादेव्या मह्यं त्रैलोक्यसम्पदोऽपि दत्ता यया मे दत्तं जीवितव्यमिति। अद्यैव जातोऽहं जनन्या, अद्यैवाहममृतरसेन सिक्त इत्यादि तां महादेवीं परमोपकारिणीं शेषदेवीनां पुरतः श्लाघयित्वा गतोऽसौ रण्डापुत्रक इति। तदेवं सर्वदानानां मध्येऽभयदानं प्रधानं महदिति स्थितम् ।

इति **दयाधिकारः** समाप्तः

---

१ पश्यन् पृ° BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्घपूजाधिकारः २०

उक्तो दयाधिकारः, इह च परमार्थवृत्त्या दयालवः सर्वज्ञशासनस्थिता एव भवन्ति, ते च यथाशक्त्या चतुर्विधमपि श्रमणसङ्घं पूजयन्ते च, अतो दयाधिकारानन्तरं सङ्घपूजोच्यते, तत्रैते श्लोकाः–

कर्मद्रुमकुठाराय, सर्वकल्याणकारिणे ।
जगन्मङ्गलभूताय, सत्पात्राय महात्मने ।।३५६।।
ज्ञानदर्शनचारित्र-सम्पदां कुलसद्मने ।
संसारसारभूताय, सर्वदा सुखहेतवे ।।३५७।।
श्रीमत्सङ्घसमुद्राय, गुणरत्नभृतात्मने ।
पूजां पुण्यजनः कोऽपि, कुरुते भक्तिनिर्भरः ।।३५८।।
शिवसद्मसमारोह-निःश्रेणिः सरला समा ।
गुणगात्रैः समाकीर्णा, सङ्घभक्तिर्गरीयसी ।।३५९।।
किं किं न पूजितं तेन ? सङ्घो येनेह पूजितः ।
न चान्यदीदृशं पात्रं, पवित्रं भुवि विद्यते ।।३६०।।
यस्य निःशेषसंसार-पारवर्ती जिनेश्वरः ।
त्रिलोककृतपूजोऽपि सपर्यां कुरुते स्वयम् ।।३६१।।
तीर्थप्रवर्तनाकाले, भ्रामरीदानपूर्वकम् ।
कृतज्ञतां पुरस्कुर्वन्, यतो नौति जिनोऽपि तम् ।।३६२।।
सङ्घवात्सल्यतः पूर्वं, पश्चात्तीर्थकरोऽजनि ।
अतः कारणभावेन, सङ्घः पूर्वो निगद्यते ।।३६३।।
सर्वोऽपि पूजितः सङ्घः, सङ्घदेशेऽपि पूजिते ।
यथैकपुष्पदानेऽपि, देवो भवति पूजितः ।।३६४।।
सर्वसङ्घसपर्यायाः, फलमाप्नोति मानवः ।
परिणामभेदतो यस्मात् पुण्यापुण्यव्यवस्थितिः ।।३६५।।
आसन्नसिद्धिकस्येदं, लिङ्गमाहुर्मनीषिणः ।
यत्सङ्घपूजनं शक्त्या, भक्तिसारं विधीयते ।।३६६।।
सङ्घपूजाफलं प्रोक्तं, परं सिद्धिस्तथाऽपरम् ।
मर्त्यामरेन्द्रनागेन्द्र-श्रियः सर्वसुखप्रदाः ।।३६७।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्यक्ता दुर्गतिवर्तनी प्रतिहता कष्टा परप्रेष्यता,
मानुष्यं सफलीकृतं शशधरे स्वं नाम संलेखितम् ।
सन्ध्यारागचलाः श्रियः सफलतां तैरेव सम्प्रापिता,
यैः सद्वित्तचयेन शुद्धमनसा श्रीसङ्घपूजा कृता ॥३६८॥
संसारसागरे पोतो, ज्ञानादिगुणभाण्डभृत् ।
येनायमर्चितः सङ्घ-स्तेन तीर्णो भवोदधिः ॥३६९॥
यथाशक्ति यथाभक्ति, यथाकालं यथाधनम् ।
सङ्घपूजा सदा कार्या, जन्मसाफल्यमिच्छता ॥३७०॥
गृहिणा सद्विवेकेन, संसारभयभीरुणा ।
पूजनीयः सदा सङ्घः, कृतार्थं जन्म कुर्वता ॥३७१॥
आसन्नसिद्धिकैरेव, सङ्घश्च पूज्यते नरैः ।
सङ्घपूजारतश्चात्र, धनसारो निदर्शनम् ॥३७२॥

इति श्लोकाः सप्तदश प्रायः सुगमाः, तथापि किञ्चिद्व्याख्यायते-**कर्मद्रुमकुठारायेति** कर्माण्येव द्रुमाः कर्मद्रुमास्तेषां छेदकत्वात्कुठार इव कुठारः परशुस्तस्मै कर्मद्रुमकुठाराय, **सर्वकल्याणकारिणे** समस्तश्रेयोविधायिने, **जगन्मङ्गलभूताय** भुवनमङ्गलकल्पाय, **सत्पात्राय** शोभनभाजनाय, **महात्मने** पूज्यात्मने इति प्रथमश्लोकार्थः ॥३५६॥

तथा **ज्ञानदर्शनचारित्रसम्पदां कुलसद्मने** कुलगृहाय, **संसारसारभूताय** भवप्रधानकल्पाय, **सर्वदा** सर्वस्मिन् काले **सुखहेतवे** सुखकारणायेति द्वितीयश्लोकार्थः ॥३५७॥

श्रीमत्सङ्घसमुद्रायेति श्रीमांश्चासौ सङ्घश्च श्रीमत्सङ्घः, स एव समुद्रस्तस्मै श्रीमत्सङ्घसमुद्राय, **गुणरत्नभृतात्मने** ज्ञानादिगुणमाणिक्यात्मकाय, **पूजां** सपर्यां **पुण्यजनः** पुण्यप्राणी **कोऽपि** कश्चित्**कुरुते** विधत्ते **भक्तिनिर्भरो** भक्तिप्रह्व इति तृतीयश्लोकार्थः ॥३५८॥

शिवसद्मसमारोहणनिःश्रेणिः सिद्धिसौधसमारोहणाधिरोहिणी, **सरला** दीर्घा, **समा** वैषम्यरहिता, **गुणगात्रैर्ज्ञानादिगुणगात्रकैः समाकीर्णा व्याप्ता सङ्घभक्तिः** सङ्घाराधना **गरीयसी** महीयसीति चतुर्थश्लोकार्थः ॥३५९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं किं न पूजितं तेन? सर्वमपीत्यर्थः, सङ्घो ज्ञानादिगुणगणयुक्तो जन्तुसमुदायो येनात्र पूजितोऽर्चितः, न चान्यत्र नैवान्यतरदीदृशमीदृक्षं पात्रं भाजनं पवित्रं शुचि भुवि पृथिव्यां विद्यते समस्तीति पञ्चमश्लोकार्थः ॥३६०॥

न केवलं सङ्घः सुरासुरनरेन्द्रैरेव पूज्यते, किं तर्हि? जिनैरपीत्येतद्दर्शयन्नाह-यस्य निःशेषसंसारपारवर्ती जिनेश्वर इत्यादि श्लोकत्रयं सुगममेव ॥३६१-३६३॥

अथ परः प्राह-ननु कथं पञ्चदशकर्मभूमिवर्ती प्रतिनियतदेशवर्तिना श्रावकेण सङ्घः सम्पूजयितुं शक्यते? तद्देशस्यैव पूजयितुं शक्यत्वात्, सत्यमुक्तं, द्रव्यतोऽसौ देशपूजक एव, भावतस्तु सकलमपि सङ्घ पूजयतीति दर्शयन्नाह-सर्वोऽपि पूजितः सङ्घः सङ्घदेशेऽपि पूजिते इत्यादि श्लोकद्वयं सुगममेव ॥३६४-३६५॥

अथ सङ्घपूजकस्य स्तुतिं कुर्वन् फलं दर्शयन् श्लोकत्रयमाह-तत्रासन्नसिद्धिकस्येदं लिङ्गमाहुर्मनीषिण इत्यादि श्लोकद्वयं पाठसिद्धमेव, तृतीयस्तु व्याख्यायते-त्यक्ता उज्झिता दुर्गतिवर्तनी कुगतिसरणिः, प्रतिहता निराकृता कष्टा दुरन्तदुःखरूपा परप्रेष्यता परकर्मकरत्वं, मानुष्यं मानुषत्वं सफलीकृतं सफलतां नीतं, शशधरे चन्द्रमसि स्वमात्मीयं नाम नामधेयं संलेखितं विन्यस्तं. सन्ध्यारागचलाः सन्ध्याकालरक्तानुसमप्रभाः [श्रियो लक्ष्म्यः] सफलतां फलवतीत्वं तैरेव सङ्घपूजकैरेव सम्प्रापिता लम्भिता यैर्यकैः सद्वित्तचयेन शोभनद्रव्यजातेन शुद्धमनसा निर्मलान्तःकरणेन श्रीसङ्घपूजा श्रीगुणवच्चतुर्विधश्रमणगणसपर्या कृता विहितेति ॥३६६-३६८॥

अथ सङ्घपूजाफलमेव रूपकत्रयेणाह-संसारसागरे इत्यादि, अस्य व्याख्या-संसारसागरे भवसमुद्रे पोतो यानपात्रं, ज्ञानादिगुणा एव भाण्डं क्रयाणकं तद्बिभर्तीति ज्ञानादिगुणभाण्डभृत्, येनायमर्चितः सङ्घस्तेन तीर्णो भवोदधिरिति सुगमम् ॥३६९॥

यथाशक्ति यथाभक्ति, यथाकालं यथाधनम् ।
सङ्घपूजा सदा कार्या, जन्मसाफल्यमिच्छता ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहिणा सद्विवेकेन, संसारभयभीरुणा ।
पूजनीयः सदा सङ्घः, कृतार्थं जन्म कुर्वता ॥२॥

इति श्लोकद्वयं कण्ठचम् ॥३७०-३७१॥
अथ सङ्घपूजाकर्तुरासन्नसिद्धिकत्वं दर्शयन् दृष्टान्तमाह-**आसन्नसिद्धिकैरेवेत्यादि** श्लोकः सुगमः ॥३७२॥

धनसारकथानकं त्विदं—
अस्तीह मन्दरोदार-सुरमन्दिरमण्डितम् । कैलासपर्वतोत्तुङ्ग-प्रेङ्खत्प्राकारवेष्टितम् ॥१॥
भूरिपुण्यजनाकीर्णं, कुबेरपुरसन्निभम् । पुरं **विश्वपुरं** नाम, महाधनजनाकुलम् ॥२॥
बभूव तत्र विख्यातो, राजमान्यो महाधनः । महायशा महात्यागी, सार्थवाहः **सुमङ्गलः**॥३॥
प्रकृत्यैव सदाचारः, सत्यसन्धः सदाशयः । दयादाक्षिण्यसौजन्य-गाम्भीर्यादिगुणालयः ॥४॥
परोपकारतानिष्ठः, सुसन्तुष्टः प्रियंवदः । पापभीरुः सुधीरात्मा, धर्मिष्ठो धार्मिकप्रियः ॥५॥
कल्पवृक्ष इवाध्यक्ष-पूरितार्थिमनोरथः । सद्बन्धुकुमुदानन्दी, सद्वृत्तः पार्वणेन्दुवत् ॥६॥
सुरूपः सुभगः श्रीमान्, कृतज्ञः सुकृती कृती । सदादेयः सतां मुख्यः, शान्तमूर्तिर्गुणप्रियः ॥७॥
बभूव प्रेयसी तस्य, प्रीतिपात्रं प्रियंवदा । **सुनन्दा**ख्या सतीमुख्या, बन्धुवर्गस्य वत्सला ॥८॥
मुक्तावलीव सद्वृत्ता, सद्गुणग्रामराजिनी । सौम्या सर्वजनानन्दा, चन्द्रमूर्तिरिवामला ॥९॥
पद्मपत्रविशालाक्षी, विशालकमलालया । मूर्ता लक्ष्मीरिवात्यन्तं, सर्वलोकस्य वल्लभा ॥१०॥
सीतेव रूपसम्पन्ना, शीलालङ्कारधारिणी । ध्वस्तदोषारुणस्येव, मूर्तिर्लब्धमहोदया ॥११॥
सालङ्कारा सुवर्णाढ्या, सुपदा लक्षणान्विता । सदर्था जैनवाणीव, विबुधानन्ददायिनी ॥१२॥
देवानां पूजने सक्ता, गुरूणां भक्तिकारिका । स्त्रीजनोचितकार्येषु, दक्षा सरलमानसा ॥१३॥
हर्षोल्लसितरोमाञ्चा, जल्पन्ती मधुरं वचः । या ददौ सर्वदा दानं, दीनादिभ्यो निरुत्सुका ॥१४॥
सप्रमोदोऽनया सार्धं, सार्थवाहः सुमङ्गलः । कुर्वाणः स्वकुलाचारं, बुभुजे विषयान् वरान् ॥१५॥
अन्यदा बहिरुद्याने, **चम्पकामोद**नामनि । विहरन्तः समायाताः, सूरयः **शीलसुन्दराः** ॥१६॥
भव्यपद्माकरादित्या, बहुशिष्या बहुश्रुताः । स्थिताः साधूचिते स्थाने, सर्वदोषविवर्जिते ॥१७॥
वन्दनार्थं समायातो, नागरिको जनो बहुः । सुमङ्गलोऽपि सानन्दः, सपत्नीकः समाययौ ॥१८॥
ततो गम्भीरनादेन, सूरिभिर्गुणभूरिभिः । महामोहं निरस्यन्ती, प्रारब्धा धर्मदेशना ॥१९॥
भो भो भव्या भवादृक्षै-र्मङ्क्षु मोक्षाभिकाङ्क्षिभिः । विमुच्याधर्मकर्माणि, यतितव्यं धर्मकर्मसु ॥२०॥
यतः सद्धर्म एवात्र, सर्वसौख्यप्रसाधकः । साधुश्रावकभेदेन, स च द्वेधोदितो जिनैः ॥२१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र क्षमादिभेदेन, प्रथमो [1]दशधोदितः । सद्दर्शनादिसंयुक्तः, पञ्चव्रतविभूषितः ॥२२॥
शुद्धसम्यक्त्वमूलीयः, पञ्चाणुव्रतसंयुतः । द्वितीयो गृहिणां धर्मो, नानाभिग्रहभूषितः ॥२३॥
तत्त्यक्त्वा सर्वसावद्यं, सर्वसङ्गं विमुच्य च । कुरुध्वं साधुसद्धर्मं, यदीच्छा सिद्धिशर्मणि ॥२४॥
अथवा देशतः कृत्वा, सावद्यारम्भवर्जनम् । कुरुध्वं श्रावकं धर्मं, सुश्रावकनिषेवितम् ॥२५॥
धर्मार्थिना च भौं नित्यं, कर्तव्यं देवतार्चनम् । त्रिसन्ध्यं शुद्धभावेन, विधिना कुसुमादिभिः ॥२६॥
देवश्चात्र स विज्ञेयो, यः क्षीणाशेषकल्मषः । निःशेषदोषनिर्मुक्तः, सर्वज्ञः सर्वदर्शनी ॥२७॥
तथा सद्गुरुसद्भक्ति-र्विधेया विधिपूर्वकम् । दानसन्मानसत्कारै-र्वैयावृत्त्यार्थनादिभिः ॥२८॥
सद्गुरुश्च स विज्ञेयो, यो गीतार्थो बहुश्रुतः । अक्षताचारचारित्रो, निःसङ्गो निःस्पृहस्तथा ॥२९॥
तदन्ते शुद्धसिद्धान्तं(न्तः), श्रोतव्यं(व्यः) शुद्धचेतसा । श्रुत्वा तदनुसारेण, कर्तव्या सदनुष्ठितिः ॥
तथा परोपकारोऽपि, कर्तव्यः शक्तितः सदा । परोपकारिता येन, सत्पुरुषत्वलक्षणम् ॥३१॥
ततः सन्तोषिभिर्भाव्यं, न भाव्यमतिलोभिभिः । यतः सन्तोषिणां नित्यं, जायते परमं सुखम् ॥३२॥
तथा भाव्यं भवस्यास्य, निर्गुणत्वं पदे पदे । यत्र-मित्राण्यमित्राणि, जायन्ते स्वजनाः परे ॥३३॥
माता जनी जनीर्माता, पिता पुत्रः सुतः पिता । भ्राता रिपू रिपुर्भ्राता, यत्रासौ निर्गुणो भवः ॥३४॥
तथा नष्टे विनष्टे वा, मृते वा वल्लभे जने । विदित्वा भवनैर्गुण्यं, शोकः कार्यो न धीधनैः ॥३५॥
शोको हि धर्मनाशाय, दुःखाय च प्रजायते । नापि कञ्चिद्गुणं पुंसां, पुष्णातीह कृतोऽपि हि ॥३६॥
तथा भो भो निहन्तव्याः, कषाया दुष्टशत्रवः । हते स्नेहे स मोहोऽपि, हत एव न संशयः ॥३७॥
हते मोहे हतान्येव, शेषकर्माण्यपि स्फुटम् । सर्वकर्मप्रहाणे च जायते शाश्वतं सुखम् ॥३८॥
तथा लोकविरुद्धानि, वर्जनीयानि दूरतः । तद्वर्जनपरो येन, सर्वदा श्लाघ्यते जनैः ॥३९॥
दातव्यं सर्वदा दानं, दीनादिभ्योऽनुकम्पया । सुपात्रेभ्यश्च सद्भक्त्या, निर्जरार्थं विधानतः ॥४०॥
सुक्षेत्रे वापयेद्बीजं, सुपात्रे निक्षिपेद्धनम् । सुक्षेत्रे च सुपात्रे च, निक्षिप्तं न विनश्यति ॥४१॥
पालनीयं वरं शीलं, सर्वतो देशतोऽपि वा । शीलं हि सर्वदा येन, निःशेषगुणभूषणम् ॥४२॥यतः–

ऐश्वर्यस्य विभूषणं चतुरता शौर्यस्य वाक्संयमो,
रूपस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवतो धर्मस्य निर्वाच्यता,
सर्वेषामपि सर्वकालनियतं शीलं परं भूषणम् ॥

तथा द्वादशभेदेऽपि, तपःकर्मणि शक्तितः । उद्यतव्यं यतो यान्ति, सर्वकर्माणि सङ्क्षयम् ॥४४॥
यथा यथा तपस्तीव्रं, तपस्यन्ति तपस्विनः । तथा तथा प्रलीयन्ते कर्माण्यात्मप्रदेशतः ॥४५॥

---

१ दशधा गदितः - BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यतः- **ताविज्जं तह पत्थरह, जह निव्वट्टइ लोहु ।**
तह जीवह तवताविय, फिट्टइ कम्मविरोहु ॥४६॥

तथा भव्या सदा भाव्या, भावना भवभेदिका । यतोऽत्र भावनाहीनं, दानाद्यपि न शस्यते ॥४७॥
तथा भवद्भिर्भो भव्याः, कर्तव्या शिष्टसङ्गतिः । उन्मार्गस्य निराकर्त्री, सन्मार्गस्य प्रवर्तिनी ॥४८॥
शिष्टसङ्गेन भव्यानां, दूरं नश्यति दुर्मतिः । सुमतिर्वर्धते नित्यं, स्वार्थसिद्धिस्ततो ध्रुवा ॥४९॥
स्वार्थसिद्धया मनः स्वास्थ्यं, मनःस्वास्थ्ये सुधीरधीः । [1]सुष्ठुधीरधियो नित्यं, धर्मध्यानं प्रवर्तते ॥
धर्मध्यानप्रवृत्त्या च, शुक्लध्यानमवाप्यते । ततः कर्मक्षयोऽवश्यं, ततो मोक्षः सदासुखः ॥५१॥
तथा गुणवल्लोकस्य, विधेयो विनयोऽनिशम् । विनयो हि नृणां येन, सर्वसम्पत्तिकारणम् ॥५२॥
निर्धनोऽपि कुरूपोऽपि, विदेश्योऽपि जडोऽपि हि । विनीतो जायते जन्तु-र्वल्लभः सर्वदेहिनाम् ॥५३॥
लभते च वरां विद्यां, कीर्तिं लक्ष्मीं च सुन्दराम् । दुर्विनीतस्तु नो स्वार्थं, कदाचिदपि साधयेत् ॥
तथा दूरं परित्याज्याः, शब्दादिविषया बुधैः । विषयिणां हि जायन्ते नानारूपाः कदर्थनाः ॥५५॥

यतः- **कलरिभितमधुरगान्धर्व-तूर्ययोपिद्भिभूषणरवाद्यैः ।**
श्रोत्रावबद्धहृदयो हरिण इव विनाशमाप्नोति ॥५६॥
गतिविभ्रमेङ्गिताकार-हास्यलीलाकटाक्षविक्षिप्तः ।
रूपावेशितचक्षुः, शलभ इव विपद्यते विवशः ॥५७॥
[2]स्नानाङ्गरागवर्तिक-वर्णकधूपाधिवासपटवासैः ।
गन्धभ्रमितमनस्को, मधुकर इव नाशमुपयाति ॥५८॥
मिष्टान्नपानमांसो-दनादिमधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशवद्धो, मीन इव विनाशमाप्नोति ॥५९॥
शयनासनसम्बाधन-सुरतस्नानानुलेपनासक्तः ।
स्पर्शव्याकुलितमति-र्गजेन्द्र इव बद्ध्यते मूढः ॥६०॥
एवमनेके दोषाः प्रणष्टशिष्टेष्टदृष्टचेष्टानाम् ।
दुर्नियमितेन्द्रियाणां, भवन्ति बाधाकरा बहुशः ॥६१॥
एकैकविषयसङ्गा-द्रागद्वेषातुरा विनष्टास्ते ।
किं पुनरनियमितात्मा, जीवः पञ्चेन्द्रियवशार्त्तः ॥६२॥

[प्रशमरति प्रकरणे का. ४१-४७]

तथा भोः ! सर्वदा कार्यो, विवेकः सर्वकर्मसु । विवेकादेव येनेह, कार्यसिद्धिर्भवेन्नृणाम् ॥६३॥
विवेकादेव सद्धर्मो, विवेकादेव पूज्यता । विवेकादेव सत्कीर्ति-र्विवेकादेव सद्गतिः ॥६४॥

---

१ सुष्ठुधीरधिया धीरं धं B ॥ २ स्नानाङ्गरागवर्तक-वर्तिक धूपां BJC ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवेको निर्मलं चक्षु-र्मोक्षमार्गप्रदर्शकम् । विवेकः सुन्दरोदारं, नृणां हृदयमण्डनम् ॥६५॥
तथा हितं मितं सत्यं, वक्तव्यं कोमलं वचः । कोमलं भाषितो येन, जीवो रुष्टोऽपि तुष्यति ॥६६॥

न तथा शशी न सलिलं, न चन्दनं नापि शीतलच्छाया ।
प्रह्लादयन्ति हृदयं, यथा हि मधुराक्षरा वाणी ॥६७॥

न तथा विषं न शस्त्रं, नाग्निर्न रिपुर्न दारुणो व्याधिः । उद्वेजयन्ति हृदयं, यथा कटुकभाषिणी वाणी ॥
तथा भवद्भिर्भो भाव्यं, सर्वदापि दयालुभिः । दया हि येन धर्मस्य, सर्वस्वमिति गीयते ॥६९॥
दानं शीलं तपो ध्यानं, मौनक्षान्त्यादयो गुणाः । सत्यं शौचं च पाण्डित्यं, दयायुक्तं हि शोभते ॥

यतः- **पठितं श्रुतं च शास्त्रं, गुरुपरिचरणं च गुरुतपश्चरणम् ।**
घनगर्जितमिव विजलं, विफलं सकलं दयाविकलम् ॥७१॥

विनयविहीनः शिष्यो, गुरुरपि तत्त्वोपदेशताशून्यः । ज्ञानं च जीवरक्षण-रहितं भस्मनिहूतं नियतम् ॥
तथा भो भो यथाशक्त्या, विधेया सङ्घपूजना । सङ्घं मुक्त्वा यतो नास्ति, पूज्यमन्यज्जगत्त्रये ॥७३॥
सम्पूज्या हि गुणा एव, न पूज्यं देहिनां वपुः । ते च सर्वेऽपि विद्यन्ते, सङ्घे सातिशया यतः ॥७४॥
सुसाधुव्रतिनीश्राद्ध-सुश्राविकाप्रभेदतः । सङ्घश्चतुर्विधो ज्ञेयः, स चावश्यं गुणान्वितः ॥७५॥
गुणाः पुनर्वरं ज्ञानं, दर्शनं चरणं तथा । तपः सत्यं च शौचं च, सर्वं सङ्घेऽस्ति सर्वदा ॥७६॥
एवमादिप्रबन्धेन, सूरिणा देशना कृता । प्रबुद्धा बहवो लोका, व्रतं च प्रतिपेदिरे ॥७७॥
देशतो विरतिं केचित्, सम्यक्त्वमपरे तथा । अन्ये तु मद्यमांसादि- विरतिं प्रतिपेदिरे ॥७८॥
अत्रान्तरे समुत्थाय, सार्थवाहः सुमङ्गलः । नत्वा सूरिं बभाणैवं, ललाटघटिताञ्जलिः ॥७९॥
भगवन् ! श्रावकं धर्मं, ममाख्याहि विशेषतः । तमेव कर्तुमिच्छामि, साधुधर्मे न मे मतिः ॥८०॥
सूरिश्चाह शृणु श्रीमन् !, सावधानं प्रकथ्यते । इह हि श्रावकेणादौ, दातव्याऽऽलोचना गुरोः ॥८१॥
त्रिविधं त्रिविधेनैव, सम्यग्मिथ्यात्वतस्ततः प्रतिक्रम्य समाश्रेयं सम्यक्त्वं सुविधानतः ॥८२॥
विधिश्चायं–

समणोवासओ पुव्वामेव मिच्छत्ताओ पडिक्कमति, सम्मत्तं उवसंपज्जत्ति, नो से कप्पइ अज्जपभिंति अन्नउत्थिए वा, अन्नउत्थियदेवाणि वा अन्नउत्थियपरिग्गहियाणि वा चेइयाणि वंदित्तए वा, नमंसित्तए वा, पुव्विं अणाल[वि]त्तएणं वा, आलवित्तए वा संलवित्तए वा, तेसिं असणं वा पाणं वा खाइमं वा साइमं वा दाउं वा अणुपयाउं वा अन्नत्थरायाभिओगेणं बलाभिओगेणं देवयाभिओगेणं गुरुनिग्गहेणं वित्तीकंतारेणं सेयं सम्मत्ते पसत्थसम्मत्तमोहणीयकम्माणुवेयणोवसमखयसमुत्थे, पसमसंवेगादिलिंगे सुहे आयपरिणामे पन्नत्ते ।

[प्रत्याख्यानाऽऽवश्यकसूत्रे हारिभद्री टीका पृ. २१४]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र सम्यक्त्वं निसर्गा-भिगमाभ्यां लभ्यते, तत्र निसर्गः स्वभावः, अभिगमो गुरुसकाशे धर्मश्रवणं, तत्र नैसर्गिकं सम्यक्त्वं सुश्रावकसत्कपुत्रपौत्राणां वेदितव्यं, स्वयम्भूरमणादिसत्कमत्स्यादीनां वा, ते हि तत्र प्रतिमासंस्थानानि पद्मानि मत्स्यान् वा समालोक्य विशुद्धाध्यवसायसमायोगेन सञ्जातजातिस्मरणाः सम्यक्त्वं प्रतिपद्यन्ते, अधिगमनेन पुनः सद्गुरुसकाशे धर्मश्रवणं कुर्वतां संवेगतो जीवाजीवादिसमस्ततत्त्वानां यदुत्पद्यते तदधिगमसम्यक्त्वमिति, अस्य तु श्रमणोपासकेनेमे पञ्चातिचारा ज्ञातव्याः, न समाचरितव्याः, तद्यथा-शङ्का, काङ्क्षा, विचिकित्सा, परपाखण्डप्रशंसा, परपाखण्डसंस्तव इति । तत्र शङ्का द्विविधा-देशतः सर्वतश्च, तत्र देशतः किमयं जीवोऽस्ति वा न वेत्याशङ्कते, सर्वतः पञ्चापि धर्मास्तिकायादयः सन्ति वा न वेति । काङ्क्षापि सर्व-देशाभ्यां द्विधा, देशतस्तावदार्हतं दर्शनं सुन्दरमिदमपि च सौगतं सुन्दरमिति कृत्वा समाश्रयितुं युक्तमित्याकाङ्क्षा, इति, सर्वतः सर्वाण्येव दर्शनानि । विचिकित्सा फलं प्रति सन्देहः, यथास्य सदनुष्ठानस्य परलोके फलं किञ्चिद्भविष्यति न वेति विद्वज्जुगुप्सा वा, विद्वान्सः साधवस्तेषां जुगुप्सा निन्दा परपाखण्डप्रशंसा परपाखण्डिश्लाघा, परपाखण्डिसंस्तवस्तत्परिचय इति ।

एवं सम्यक्त्वं प्रतिपद्याऽणुव्रतादीनि व्रतानि प्रतिपद्यते, तद्यथा-स्थूलकं प्राणातिपातं श्रमणोपासकः प्रत्याख्याति द्विविधं त्रिविधेनेत्यादिभङ्गकरचनया, स च प्राणातिपातो द्विविधः, सङ्कल्पत आरम्भतश्च, तत्र सङ्कल्पतो यावज्जीवतया प्रत्याख्याति, तत्रापि निरपराधस्य प्रत्याख्यानं, न सापराधस्येति, आरम्भजं प्राणातिपातं तु न प्रत्याख्यात्येव, स्थूलकप्राणातिपातविरमणस्य श्रमणोपासकेनेमे पञ्चातिचारा ज्ञातव्याः, न समाचरणीयाः, तद्यथा-वधो बन्धश्छविच्छेदोऽतिभारारोपणं भक्तपानव्यवच्छेदश्च, एवं स्थूलमृषावादविरमणादीनि शेषैकादशश्रावकव्रतानि सविस्तरं सूरिणा व्याख्यातानि ।

ततो व्याख्यामिमां श्रुत्वा, सूरिं नत्वा सुमङ्गलः । हृष्टचित्तो बभाणैवं, ललाटघटिताञ्जलिः ॥८३॥
प्रयच्छानुग्रहं कृत्वा, गृहिधर्मं [1]भदन्त ! मे । कर्तुं नालं यतेर्धर्मं, चारित्रावरणादहम् ॥८४॥
ततो ज्ञात्वा तदाकूतं सूरिणापि तथा कृतम् । ततश्च सूरिमानम्य, गतो गेहे सुमङ्गलः ॥८५॥
सानन्दो धर्मसम्प्राप्त्या, दिनकृत्यानि चकार सः । कृतार्थं मन्यमानः स्वं, सुष्वाप विधिना निशि ॥
प्रातरुत्थाय भूयोऽपि, गतः सूरिपदान्तिकम् । श्रुतो धर्मो जिनाख्यातो भक्तिसारं तदन्तिके ॥८७॥
एवं दिने दिने शृण्वन् धर्मं सूरिसमीपके । जातो जीवादितत्त्वेषु विज्ञः सर्वज्ञशासने ॥८८॥
ततोऽसौ कृतशृङ्गारो, विभूत्या सपरिच्छदः । पञ्चधाभिगमेनैव, याति जैनेन्द्रमन्दिरे ॥८९॥

१ तदन्तिके यदिधर्मं न क्षमः कर्तुं-BJC ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूजयति विधानेन, जैनबिम्बानि भक्तितः । ततः करोति सम्पूर्णं, विधिवच्चैत्यवन्दनम् ॥९०॥
ततः स्तौति जिनं चारु-गम्भीरार्थमहास्तवैः । ततो महर्द्धितो याति, सानन्दो गुरुसन्निधौ ॥९१॥
सुप्रशान्तं गुरुं भक्त्या, वन्दित्वा विधिपूर्वकम् । प्रत्याख्यानं यथाशक्त्या, करोति सपरिच्छदः ॥९२॥
ततो गुर्वाज्ञया शेष-सुसाधूनभिवन्दते । प्रतिपत्तिं मुदा कृत्वा, श्रावकाणां यथोचिताम् ॥९३॥
ततः शृणोति सिद्धान्तं, प्रमोदभरनिर्भरः । ततो याति निजे गेहे, धर्मऽऽकर्णनरञ्जितः ॥९४॥
ततो न्याय्यं करोत्येष, व्यवहारमनिन्दितम् । दापयित्वा ततो दानं, दीनादिभ्यो यथोचितम् ॥९५॥
साधुवर्गं वराहारैः, सद्भक्त्या प्रतिलभ्य च । कृत्वा तृप्तिं निजप्रेष्य-शिशुवत्सादिगोचराम् ॥९६॥
वन्दित्वा गृहचैत्यानि, भावसारं विशालधीः । प्रत्याख्यानं निजं स्मृत्वा, पठित्वा पञ्चमङ्गलम् ॥९७॥
काले भुङ्क्ते विधानेन, सुप्रशान्तो निराकुलः । हितं मितं वरं पथ्य-माहारं पुष्टिकारकम् ॥९८॥
भुक्तान्ते च शुचिर्भूत्वा, वन्दते जिनपुङ्गवम् । प्रत्याख्यानं ततः कृत्वा, विश्राम्यति क्षणान्तरम् ॥
भूयोऽपि याति साधूनां, पार्श्वे यदि निराकुलः । शृणोति तत्र सद्धर्मं, स्वाध्यायादि करोति च ॥१००॥
ततो याति निजे गेहे, [1]चिकीर्षेद्यदि भोजनम् । नो चेत्तत्रैव साध्वन्ते, लात्वा सामायिकं ततः ॥
प्रतिक्रामति संविग्नः, सममेव हि साधुभिः । ततो विश्रामणां शक्त्या, साधूनां प्रकरोति सः ॥१०२॥
ततो गत्वा निजे गेहे, शेते कृत्वोचितं विधिम् । इत्यादि सर्वदा सर्वं, सुश्रावकजनोचितम् ॥१०३॥
विदधत्सदनुष्ठानं, गमयामास वासरान् । अन्यदा रथयानेन, सपत्नीकः सुमङ्गलः ॥१०४॥
गच्छन् ग्रामान्तरं कञ्चित्, पुरासन्नं ददर्श सः । पतितस्तम्भसघातं भग्नप्राकारतोरणम् ॥१०५॥
विशीर्णाशेषपट्टौघं, महज्जीर्णजिनालयम् । ततोऽसौ भार्ययाऽभाणि, यथेदं दृश्यते किमु ? ॥१०६॥
श्यामलं पर्वताकारं, महामेघसमप्रभम् । स प्रोवाच प्रिये ! जीर्ण-मेतज्जैनेन्द्रमन्दिरम् ॥१०७॥
पतितं सर्वतो भग्नं, विशीर्णाशेषसन्धिकम् । एवं तावथ जल्पन्तौ, सम्प्राप्तौ च तदन्तिके ॥१०८॥
उत्तीर्य च रथात्तत्र, प्रविष्टौ तौ जिनालये । दृष्टं जैनेश्वरं बिम्बं, शान्तं कान्तं मनोहरम् ॥१०९॥
पूजितं च वरोदार-सुगन्धकुसुमादिभिः । कृतं च भक्तियोगेन, विधिवच्चैत्यवन्दनम् ॥११०॥
ततो बहिर्विनिष्क्रम्य, सपत्नीकः सुमङ्गलः । सम्यगालोकयामास, सर्वतस्तज्जिनालयम् ॥१११॥
दृष्टं च तत्तथा तेन, भग्नलुप्तं समन्ततः । ततोऽसौ भार्ययाऽभाणि, धर्मे दत्तैकचित्तया ॥११२॥
किञ्चिन्ना[था]थ याचेऽहं, यद्यवश्यं ददासि मे । स प्राह याच्यतां यत्ते, रोचते मनसः प्रिये ! ॥
सावदन्नाथ ! यद्येवं, सुप्रसादोऽसि मामभि । तदेनमुद्धरस्व त्वं, शीर्णं जीर्णं जिनालयम् ॥११४॥
गृहाण फलमेतासां, सन्ध्यारागचलश्रियाम् । [संस्थापय निजात्मानं, मुक्तिलक्ष्मीगृहे द्रुतम्] ॥११५॥
यतो जीर्णजिनागार-समुद्धारविधायिनाम् । सर्वज्ञागमवेत्तारो, वर्णयन्ति महाफलम् ॥११६॥

---

१ यदि करिष्यति-BJ । करिष्येद्यदि-मु. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्यथा- **ये जीर्णमर्हतां गेह-मुद्धरन्ति महात्मनः ।**
आत्मानमुद्धरन्त्येते, पतन्तं दुर्गदुर्गतौ ॥११७॥
निस्तीर्णस्तैर्भवाम्भोधि-र्विदीर्णो मोहमन्दरः
स्थगितं दुर्गतिद्वारं, यैर्जिनागारमुद्धृतम् ॥११८॥
कुन्देन्दुशङ्खसङ्काशा, तेषां कीर्तिर्यशस्तथा
स्वगोत्रं जीवितं जन्म, तैरेव सफलीकृतम् ॥११९॥
स्वभावचञ्चलैर्वित्तैः प्रातः प्राघूर्णकप्रभैः ।
यैरकारि जिनागार-समुद्धारो महात्मभिः ॥१२०॥

श्रुत्वेदं सुन्दरं वाक्यं, सुनन्दायाः सुमङ्गलः । एवं प्रिये ! करोमीति, बभाषे बन्धुरं वचः ॥१२१॥
साधु साधु त्वया प्रोक्तं, हे प्रिये ! प्रियभाषिणि !। प्रतिभाति ममापीदं, त्वद्वाक्येन विशेषतः ॥१२२॥
ततो गत्वा गृहे तूर्णं, सप्रमोदः सुमङ्गलः । सूत्रधारादिसामग्रीं, कृत्वा तत्र समागतः ॥१२३॥
स्तोकैरेव दिनैस्तेन, भूरिवृत्तिं प्रयच्छता । समुद्धृतं जनानन्दं, तुङ्गं तज्जिनमन्दिरम् ॥१२४॥
कारिता च महायात्रा, नेत्रानन्दविधायिनी । प्रदत्तं च महादानं, सन्तोषितजगज्जनम् ॥१२५॥
कृता चतुर्विधस्यापि, सङ्घस्य परिपूजना । भक्तिसारं वराहार-वस्त्रपात्रादिवस्तुभिः ॥१२६॥
ततो दीनादिलोकेभ्यो, ददद्दानं यथेप्सितम् । श्लाघ्यमानो जनैः सर्वैः, सार्थवाहो गृहं गतः ॥१२७॥
एवं कारयता तेन, यात्रां तत्र जिनालये । भूरिशः शासने जैने, कृता प्राज्या प्रभावना ॥१२८॥
बहुधा सङ्घपूजा च, कृता तेन महात्मना । सुश्रावकसमाचारो, विशुद्धः पालितश्चिरम् ॥१२९॥
काले समाधिना मृत्वा, स्वर्गं ईशाननामनि । इन्द्रतुल्यः सुरो जातो, महातेजा महर्द्धिकः ॥१३०॥
सुनन्दापि प्रिया तस्य, धर्मिष्ठा धार्मिका प्रिया । सुश्राविका समाचारं, पालयित्वा सुनिर्मलम् ॥१३१॥
सम्प्राप्याराधनामन्ते, कल्प ईशान एव हि । तस्यैवेन्द्रसमानस्य, देवस्यामलतेजसः ॥१३२॥
जाताग्रमहिषीत्वेन, देवी दिव्यर्द्धिसंयुता । कान्तकाञ्चनसच्छाया, **चन्द्रकान्ता**भिधानका ॥
ततः सुमङ्गलजीवो, देवो दिव्यं महासुखम् । चन्द्रकान्तायुतस्तत्र, भुक्त्वा सम्प्रीतमानसः ॥१३४॥
च्युत्वात्रैव समुत्पन्नो, भारतक्षेत्रसंस्थिते । **धरासारे** पुरे रम्ये, महाधनजनाकुले ॥१३५॥
पुत्रः श्रेष्ठिधनाख्यस्य, **धनश्री**कुक्षिसम्भवः निजातः कालक्रमेणासौ, शुभग्रहनिरीक्षितः ॥१३६॥
कारितं च ततः पित्रा, वर्धापनकमुच्चकैः । मासान्ते विहितं नाम, **धनसार** इति स्फुटम् ॥१३७॥
वाञ्छिताशेषसम्पत्त्या, वर्धमानो गुणैः सह । उद्यं यौवनं प्राप्तः, कामिनीजनमोहनम् ॥१३८॥
इतश्च चन्द्रकान्तापि, ततश्च्युत्वा स्थितिक्षये । अत्रैव च धरासारे, पुरे पौरगुणालये ॥१३९॥
श्रीदत्तश्रेष्ठिनः पुत्री, श्रीकान्ताकुक्षिसम्भवा । जयश्रीर्नाम सञ्जाता, रूपलावण्यसंयुता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्पद्यमाननिःशेष-निरन्तरमनोरथा । वर्धमाना यथासौख्यं, प्राप्ता च वरयौवनं ॥१४१॥
अथैनामन्यदा बालां, क्रीडन्तीं निजमन्दिरे । सखीभिः सह सानन्दां, धनसारो व्यलोकयत् ॥१४२॥
पूर्वजन्मानुभावेना-ऽनुरागोऽजनि तामभि । वीक्षिता सा चिरं तेन, लोचनैः स्नेहमन्थरैः ॥१४३॥
तयाप्येष जनाध्यक्षं, सस्नेहं सादरं चिरम् । सर्वाङ्गं मन्थरैर्नेत्रै-र्वारंवारं विलोकितः ॥१४४॥
धनसास्ततः कामैं, विद्धः कामशिलीमुखैः । गतो गेहे समं मित्रै-स्तामेव हृदि चिन्तयन् ॥१४५॥
धनेनापि हि विज्ञातो, वृत्तान्तोऽयं कथञ्चन । ततः सम्प्रेषितास्तेन, तत्क्षणं निजका नराः ॥१४६॥
श्रीदत्तश्रेष्ठिनो गेहे, जयश्रीयाचनाकृते । गतास्ते कथितं तस्य, धनश्रेष्ठिवचस्ततः ॥१४७॥
प्रतिपन्नं ततस्तेन, वचः सानन्दचेतसा । तैरागत्य नरैस्तुष्टै-र्धनायेदं निवेदितम् ॥१४८॥
ततश्चोभयपक्षाभ्यां, समारब्धा सविस्तरम् । कर्तुं विवाहसामग्री, प्रमोदभरनिर्भरम् ॥१४९॥
क्रमेण गणकाख्याते, सम्प्राप्ते लग्नवासरे । वृत्तं तयोः प्रमोदेन, पाणिग्रहणमङ्गलम् ॥१५०॥
पूर्वजन्मानुभावेन, धनसारजयश्रियोः । सञ्जातो निबिडः स्नेहः, समानन्दितचित्तयोः ॥१५१॥
अथास्य धनसारस्य, जातं मित्रचतुष्टयम् । सदा शिष्टसमाचारं, निबिडस्नेहबन्धुरम् ॥१५२॥
राजपुत्रः सुसेनाख्यो, मन्त्रिपुत्रो गुणाकरः । सार्थवाहसुतश्चन्द्रः, श्रेष्ठिपुत्रः शुभङ्करः ॥१५३॥
एवं च धनसारोऽसौ, सार्धं तैश्च वयस्यकैः । क्रीडन्नानाप्रकाराभिः, क्रीडाभिः प्रीतमानसः ॥१५४॥
प्रकृत्यैव दयादान-दाक्षिण्यादिगुणान्वितः । प्रकृत्यैव च धर्मार्थी, गमयति स्म वासरान् ॥१५५॥
अन्यदा तं पदे कृत्वा, तत्पिता धननामकः । धर्मस्थाने निजं वित्तं, विनियोज्य यथोचितम् ॥१५६॥
कृत्वा सौस्थ्यं कुटुम्बस्य, संविग्नो भवभीरुकः । शमसुन्दरसूरीणां, समीपे व्रतमाददे ॥१५७॥
अथ कुलक्रमायातं, सद्व्यवहारमञ्जसा । विदधद्धनसारोऽपि, राजादिजनसम्मतः ॥१५८॥
पूर्वजन्मकृतोदार-सङ्घपूजाप्रभावतः । अचिरादेव च त्रिंश-त्स्वर्णकोटीश्वरोऽजनि ॥१५९॥
ततोऽसौ राजपुत्राद्यैः सममेव वयस्यकैः । कुर्वन् शिष्टसमाचारं, बुभुजे निजसम्पदम् ॥१६०॥
अन्यदा बहिरुद्याने, बकुलामोदनामनि । विहरन्तः समायाता, दयासाराख्यसूरयः ॥१६१॥
शिष्यसङ्घसमायुक्ता, युक्ताः पञ्चमहाव्रतैः । मतिश्रुतावधिज्ञान-विज्ञातभवविस्ताराः ॥१६२॥
स्थिताः साधूचितस्थाने, सर्वदोषविवर्जिते । आयातो वन्दनार्थं च, नागरिको बहुर्जनः ॥१६३॥
श्रुत्वेदं धनसारोऽपि, समं राजसुतादिभिः । सद्भक्तिकौतुकाक्षिप्तो, वन्दनार्थमुपागतः ॥१६४॥

ततश्च सूरिणा सजलजलदनादेन महामिथ्यात्वध्वान्तध्वंसनैकभानुप्रभोपमा, शारीरमानसानेकदुःखदावानलविध्यापनैकमहामेघसमप्रभा, स्वर्गापवर्गसंसर्गकारिणी, अपारसंसारसागरनिमज्जज्जन्तुसन्तानसमुत्तारविधायिनी प्रारब्धा धर्मदेशना. यथा भो भो भव्या ! जन्मजरामरणभीषणोऽयं संसारः, विविधाऽऽधिव्याधिविधुरोऽयं सदासन्नतरापायः कायः, शरदभ्रविभ्रमोऽयं विभवविस्तारः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सततपातुकमिदमायुष्कं, करिकर्णतरलतरं तारुण्यं, जलधिजलकल्लोललोलं लावण्यं, स्वकार्यनिष्ठोऽयं बन्धनभूतो बन्धुवर्गः, दुर्गतिपातहेतुभूतोऽयं स्त्रीवर्गः, संसारवर्तिनां जीवानां पदे पदे इष्टजनविप्रयोगः, अनिष्टजनसम्प्रयोगः, रिपुराजादिकृतो महापरिभवः, मानखण्डनं, चित्तसन्तापः, सुलभा विपदो, दुर्लभाः सम्पदः, दुरन्ता नानानर्थकारिणो रागादयो महावैरिणः, दुर्लभा च भूयोऽपि जलधिजलमध्यपतितं रत्नमिव मानुषत्वादिसामग्री तदिमामनन्तानन्तपुद्गलपरावर्तपर्यन्ते कथञ्चिदेव तुष्टिवशादासाद्य विवेकवद्भिर्धर्मे यत्नो विधेयः, स चाहिंसादिलक्षणः पूर्वापराविरुद्धसर्वोपाधिविशुद्धः सर्वज्ञभाषित एव दुर्गतिगर्तनिपत- ज्जन्तूद्धरणलक्षणयोगात्परमार्थतो धर्मतां भजते, अतोऽयमेव प्रेक्षापूर्वकारिभिः कषच्छेदतापसंशुद्धो जात्यस्वर्णमिवाविकलफलप्रदानप्रवणो ग्राह्य इति ।

अयं च सर्वज्ञप्रणीतो धर्मो द्विधा यतिश्रावकधर्मभेदात्, तत्र यतिधर्मः क्षान्तिमार्दवार्जवमुक्तितपःसंयमसत्यशौचाकिञ्चन्यब्रह्मचर्यभेदाद्दशधा, श्रावकधर्मस्तु सम्यक्त्वमूलाणुव्रतपञ्चकगुणव्रतत्रिकशिक्षापदचतुष्टयभेदाद् द्वादशधा । इत्यादि यतिधर्मे श्रावकधर्मे च सप्रभेदे दयासारसूरिणा प्ररूपिते सति कैश्चिद्भव्यसत्त्वैः शारीरमानसानेकदुःखसम्भारासारसंसारचारकावासनिर्विण्णैः निखिलकर्मक्षयोद्भूतनिर्व्याबाध-निरन्तरनिरुपमानन्दसन्दोहसुन्दरसुखपरम्परापरिकलितशाश्वतशिवसदनशिखरसंवासलम्पटमानसैः जन्मजरामरणभीषणभवभ्रमणरीणप्राणिगणपरित्राणकारिणी, दुरन्तदुर्गतिगर्तनिपतज्जन्तुसन्तानसमुत्तारिणी निखिलकटुकठिन-घनकर्मवनगहनदहनदावानलज्व- लज्ज्वालावली, सकलकलिलकलुषमलपटलप्रक्षालनसजल- जलदावली, चतुर्गतिकसंसारोद्भवानन्तदुरन्ततीक्ष्णदुःखप्रेङ्खच्छाखिसन्ततिसञ्छेदनोद्धुरनिष्ठुरकुठारिका, अमरनरनभश्चरप्रवरतरप्राज्यराज्यादिसकलातुलविपुलकल्याणपरम्पराकारिका, सर्वसावद्ययोगविवर्जनरूपा सर्वविरतिः प्रतिपन्ना, कैश्चित् सम्यक्त्वमूलपञ्चाणुव्रतसप्तशिक्षापदरूपा देशविरतिरङ्गीकृता, केचित्त्वविरतसम्यग्दृष्टयः सञ्जाताः, केचित्तु मद्यमांसादिविरतिरूपाननेकानभिग्रहान् प्रतिपन्नवन्तः, अन्ये पुनर्भद्रकभावमुपगतवन्त इति ।

अत्रान्तरे धनसारो, नत्वा सूरिंमपृच्छत । यथा स्वामिन् ! किमस्माभिः, कृतं कर्म-शुभं पुरा ? ॥
पञ्चानामपि सत्प्रीति-रस्माकं येन वर्तते । एवंविधाश्च सञ्जाताः, सम्पदः केन हेतुना ? ॥१६६॥
सूरिः प्रोवाच भो भद्राः !, श्रूयतां सावधानकैः । युष्माकं येन सत्प्रीति-स्तदेतत्कथयाम्यहम् ॥१६७॥
अत्रैव भारते वर्षे, पुरे विश्वपुराभिधे । बभूव धनसार ! त्वं, सार्थवाहः सुमङ्गलः ॥१६८॥
एते त्वासन् सुसेनाद्या, वणिक्पुत्रास्तवैव भोः । सस्नेहा एकचित्ताश्च, चत्वारोऽपि परस्परम् ॥१६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाणिज्यं चक्रिरे तत्र, द्रव्यमादाय तावकम् । त्वयापि सह सम्प्रीति-रेतेषामभवत्सदा ॥१७०॥
तथा चैषां त्वमेवासीः, प्रमाणं सर्वकर्मसु । तत्राप्येभिः समं सख्यं, स्नेहसारं तवाभवत् ॥१७१॥
गृहीत्वा श्रावकं धर्मं, सूरीणामन्तिके पुरा । संहतैरेव युष्माभिः, सर्वैरासेवितः किल ॥१७२॥
तथा जिनगृहं जीर्णं, धनसार ! त्वया सदा । समुद्धृत्य कृता चारु-र्यात्रा तत्र जिनालये ॥१७३॥
भूरिद्रव्यव्ययो जातौ, जाता तीर्थप्रभावना । तथा कृता सुवस्त्राद्यैः, सङ्घपूजा च तत्र भोः ॥१७४॥
एतदेभिर्भवन्मित्रैः, सर्वमेवानुमोदितम् । प्रदत्तं च निजं वित्तं, धर्मस्थानेषु शक्तितः ॥१७५॥
ततो मृत्वा गताः सर्वे, कल्प ईशाननामनि । ततश्च्युत्वा च सञ्जाता, यूयमेते वयस्यकाः ॥१७६॥
तद्भोः पूर्वभवाभ्यासा-ज्जाता वः प्रीतिरुत्तमा । सङ्घपूजा कृता तेन, तवेदृक्षा गृहे श्रियः ॥१७७॥
एवं सूरिभिराख्याते, तेषां प्राचीनजन्मनि । जातिस्मरणमुत्पन्नं, सर्वेषामपि तत्क्षणम् ॥१७८॥
ततः संवेगमापन्नाः, सर्वे संसारभीरवः । कृत्वा कराञ्जलिं मूर्ध्नि, सूरिमेवं बभाषिरे ॥१७९॥
भगवन् ! सुस्थतां कृत्वा, स्वकुटुम्बस्य साम्प्रतम् । संसारोत्तारिणीं दीक्षां, गृहीष्यामस्तवान्तिके ॥
सूरिणोक्तं च ह्यत्रार्थे, मा विलम्बं करिष्यथ । सूरिं नत्वा ततो गेहे, गताः सर्वे निजे निजे ॥१८१॥
ततस्तैः संहतैर्भूत्वा, चारुयात्रामहोत्सवाः । कारिताः सर्वचैत्येषु, सर्वर्द्ध्या सर्वयत्नतः ॥१८२॥
दीनानाथादिलोकेभ्यो, दत्तं दानं किमिच्छितम् । दानपूर्वममाघात, उद्घोषितः पुरादिषु ॥१८३॥
वरैर्वस्त्रैर्वरैः पात्रै-र्वराहारैर्वरौषधैः । वरैः कम्बलरत्नैश्च, वरैर्धर्मध्वजादिभिः ॥१८४॥
सम्पूजितः समग्रोऽपि, सङ्घः सर्वगुणालयः । भावसारं गुणाधारः, संसारोत्तारणक्षमः ॥१८५॥
सर्वसाधर्मिकाणां च, कृतं वात्सल्यमुच्चकैः । दत्तं द्रव्यं विशेषेण, सर्वतीर्थेषु पुष्कलम् ॥१८६॥
इत्यादि सकलं कृत्यं, कृत्वा कृत्यविचक्षणः । कृत्वा स्वस्य कुटुम्बस्य, सर्वसौस्थ्यं विशेषतः ॥
ततः काञ्चनसद्रत्न-रम्यासु शिबिकासु ते । आरुह्य कृतशृङ्गारा-श्चारुचन्दनचर्चिताः ॥१८८॥
शुभ्रालङ्कारसद्वस्त्रा, महर्द्ध्या पुरमध्यतः । निष्क्रान्ता ददतो दानं, यथाकामं तदर्थिनाम् ॥१८९॥
श्लाघ्यमाना जनैः सर्वैः, स्तूयमानाश्च बन्दिभिः । एवं क्रमेण कुर्वन्तो, वरां तीर्थप्रभावनाम् ॥१९०॥
गता उद्याननैकटचे, ततः सर्वेऽपि संहताः । शिबिकातः समुत्तीर्य, व्रतोत्कण्ठितमानसाः ॥१९१॥
गतास्ते पादचारेण, सूरीणामन्तिकं ततः । दत्त्वा प्रदक्षिणास्तिस्रो, नत्वा सूरिं बभाषिरे ॥१९२॥
निर्विण्णा वयमेतस्मा-[1]त्प्रभो ! संसारवासतः । देहि दीक्षां जिनोद्दिष्टां, संसारोच्छेदकारिणीम् ॥१९३॥
ततस्ते सूरिणा सर्वे, दीक्षिता विधिपूर्वकम् । अनुशिष्टाश्च सद्वाक्यै-र्भवनैर्गुण्यदर्शकैः ॥१९४॥
यथा भो भो दुरापेयं, बह्वीभिर्भवकोटिभिः । मानुषत्वादिसामग्री, सा सम्प्राप्ता भवादृशैः ॥१९५॥
तथा तथा यतध्वं भो, संयमे नियमे व्रते । सफलेयं समग्रापि, जायते च यथा यथा ॥१९६॥
एवं दत्ता प्रबन्धेन, गुरुणा त्वनुशासना । तैरप्यत्यन्तसंविग्नैः, सम्यगेव प्रतीच्छिता ॥१९७॥

---

१ °भगवन् ! सं° B ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्ते साधवो जाताः, शान्तचेतोजितेन्द्रियाः । पञ्चधाचारसम्पन्ना-स्तपःसंयमसंयुताः ॥१९८॥
शिक्षिता द्विविधा शिक्षा, ग्रहणासेवनाभिधा । जाताः क्रमेण गीतार्थाः, शीलसंयमशालिनः ॥१९९॥
भव्योपकरणे निष्ठा, विहृताः सह सूरिभिः । नानाप्रकारदेशेषु, ग्रामेषु नगरेषु च ॥२००॥
तपोभिः कृशतां नीतं, शरीरं सह कर्मभिः । अन्यदा धनसाराख्यः, साधुः साधितसत्क्रियः ॥
भावयन् भावना भव्या-श्चिन्तयामास मानसे । दुर्बलं मामकं देहं, सम्प्रत्यनशनं वरम् ॥२०२॥
ददाम्यालोचनां सम्य-क्शल्योद्धारं करोम्यहम् । संविग्नश्चिन्तयन्नेवं, गुरूणामन्तिकं गतः ॥२०३॥
वन्दित्वा द्वादशावर्त्त-वन्दनेन गुरून् स च । प्रारब्धः शुद्धभावेन दातुमालोचनामलम् ॥२०४॥
यच्छन्नालोचनामेवं, परं संवेगमागतः । शुक्लध्यानं समारूढः, कर्मारण्यदवानलम् ॥२०५॥
प्रक्षीणं च ततस्तस्य, घातिकर्मचतुष्टयम् । सञ्जातं केवलं ज्ञानं, लोकालोकप्रकाशकम् ॥२०६॥
तदेवं धनसारस्य, शल्योद्धारं प्रकुर्वता । घातिकर्मक्षये जाते, सञ्जातः केवलोदयः ॥२०७॥
एवमेव सुसेनोऽपि, साधुः साधुगुणालयः । दृष्ट्वा स्वं दुर्बलं देहं, देहत्यागचिकीर्षया ॥२०८॥
गुरूणामन्तिकं प्राप्तः, शुद्धयमानो यथोत्तरम् । गुरूणां वन्दनं दत्त्वा, ददावालोचनां स्फुटम् ॥२०९॥
सर्वं कृत्यं विधायाशु, [1]गुरोरन्तिक एव सः । ततो महाव्रतोच्चारं, कर्तुमेवं समुद्यतः ॥२१०॥
अहं भदन्त ! निःशेषं, प्रत्याख्यामि तवान्तिके । प्राणघातं मृषावाद-मदत्तादानमेव च ॥२११॥
मैथुनासेवनं सर्वं, सर्वमेव परिग्रहम् । रजनीभोजनं सर्वं, सर्वथापि त्यजाम्यहम् ॥२१२॥
सर्वं क्रोधं च मानं च, मायां लोभं तथाखिलम् । रागं द्वेषं च निःशेष-मभ्याख्यानं तथैव च ॥२१३॥
सर्वं परपरीवादं, पैशून्यं कलहं तथा । सर्वां मायामृषां मिथ्या-दर्शनं च तथाखिलम् ॥२१४॥
देहमप्यन्तिमोच्छ्वासे, जिनाध्यक्षं त्यजाम्यहम् । कुर्वन्नेवं व्रतोच्चारं, स साधुः शुद्धमानसः ॥२१५॥
परं संवेगमापन्नः, शुक्लध्यानवशादथ । सम्प्राप्तः केवलं ज्ञानं, लोकालोकविलोकनम् ॥२१६॥
एवमेव वरज्ञान-दर्शनादिगुणोदधिः । साधुर्गुणाकरो नाम, देहत्यागाभिकाङ्क्षया ॥२१७॥
गुरूणामन्तिकं गत्वा, शल्योद्धारं विधाय च । कृत्वा सर्वव्रतोच्चारं, संवेगभरनिर्भरः ॥२१८॥
प्रारब्धः क्षामणां कर्तुं, मूर्ध्नि कृत्वा करांजलिम् । अनन्तगुणशुद्धया च, शुद्धयमानः क्षणे क्षणे ॥
व्रतिनां व्रतिनीनां च, या कृताऽऽशातना मया । श्रावकश्राविकाणां च, तत्सर्वं क्षमयाम्यहम् ॥२२०॥
क्षमयाम्येव निःशेषं, जीवराशिं चराचरम् । सर्वे क्षाम्यन्तु मे जीवाः, समभावमुपेयुषः ॥२२१॥
इत्यादि क्षामणां तस्य, कुर्वतः शुद्धचेतसः । केवलज्ञानमुत्पन्नं, सर्वभावावभासकम् ॥२२२॥
एवं चन्द्राभिधानोऽपि, साधुः संशुद्धमानसः । गत्वा गुर्वन्तिके तं च, वन्दित्वालोचनां ददौ ॥
महाव्रतानि सर्वाणि, समुच्चार्य प्रशान्तधीः । सर्वं सङ्घं च जीवांश्च, क्षामयित्वा मुहुर्मुहुः ॥२२४॥
वन्दित्वा सर्वचैत्यानि, सर्वसाधूंश्च भावतः । एवं विधातुमारब्धो-ऽनशनं परतो यतः ॥२२५॥

---

१ गुर्वन्तिक-BC।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्धृताशेषशल्यौघः, समभावव्यवस्थितः । भदन्त ! भवनाशाय, प्रत्याख्यामि भवान्तकम् ॥२२६॥
चतुर्धाप्यहमाहारं, सर्वमेव तवान्तिके । एवं भवान्तिमं तस्य, प्रत्याख्यानं प्रकुर्वतः ॥२२७॥
उल्लास शुभध्यानं, कर्मकान्तारपावकम् । ततः क्षीणं क्षणादेव, घातिकर्मचतुष्टयम् ॥२२८॥
लोकालोकगतानेक-वस्तुस्तोमप्रकाशकम् । उत्पन्नं केवलं ज्ञानं, यद्दुरापमिहाङ्गिनाम् ॥२२९॥
एवमेव गुणाधार-सारसंयमसंयुतः । साधुः शुभङ्करो नाम, नाशितााखिलकल्मषः ॥२३०॥
दृष्ट्वाङ्गं तपसा क्षीण-मक्षीणोज्ज्वलभावतः । गुरूणां सन्निधौ गत्वा, सम्यगालोचनां ददौ ॥२३१॥
संविग्नः शुद्धभावेन, व्रतोच्चारं विधाय च । सङ्घं च सर्वजीवांश्च क्षामयित्वा विधानतः ॥२३२॥
ततः कृत्वा विधानेन सम्पूर्णं चैत्यवन्दनम् । एवं स्तोतुं समारब्धः, संवेगभरनिर्भरः ॥२३३॥

देव ! तुह वयणकमलं, तिहुयणसिरिकुलमणोहरं रम्मं ।
सुतुट्ठिएहिं दिट्ठं, जेहिं जए ते जणा धन्ना ॥२३४॥
तुह गीवा गुणसायर !,सुवन्ननिम्मलतिरेहरेहिल्ला ।
निद्दाविगमे दिट्ठा, न जेहिं किं तेहिं नयणेहिं ॥२३५॥
वत्थच्छलम्मि विलसिर-सिरिवच्छे सउणसेविए तुम्ह ।
जे वीसमिया जगपहु !, दुहदोहो ताण परिनट्ठो ॥२३६॥
पुरवरदुवारवरफरिह-दीहरा तारतंबकरकमला ।
भुयदंडा दिवसमुहे, तुह पहु ! पुन्नेहिं दीसंति ॥२३७॥
नाहिदहम्मि तुह कंत-कंतिपयपूरिए पभायम्मि ।
ण्हायंति जे महायस !, ते कम्ममलेण मुच्चंति ॥२३८॥
तुह उरुजुग्गं जिणवर !, केवललच्छीपवेसतोसेण ।
थंभजुगं पिव विहिणा ! निम्मवियं तोरणट्ठाए ॥२३९॥
वट्टाणुपुव्विकरिकर-करणी कल्लाणकारणं परमं ।
जंघाजुगं पभाए, तुह दीसइ पुन्नवंतेहिं ॥२४०॥
देव ! तुह पायपउमे, निच्चं चिय जाण अविचला भत्ती ।
ताण गुविलोवि जायइ, भवोदही गोपयसमाणो ॥२४१॥
देव ! तुह पायपायव-छाया संसारियाण सुहजणणी ।
भवदवसंतावहरा, संजायइ भत्तिमंताणं ॥२४२॥
किं तेण गुणगणेणं, कुलेण किं तेण किं च विहवेण ? ।
रूवेण जोव्वणेण य, जिणिंद ! तुह भत्तिरहिएण ॥२४३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जत्थ न बुज्झसि हियए, थुव्वसि न गिराए नेव काएण ।
पणमिज्जसि देव ! तुमं, अलाहि किं तेण जम्मेण ॥२४४॥
देव ! तुमाउ न अन्नो, मह नाहो इहभवे परभवे वा ।
एसा मह पडिवत्ती, कम्मवसा कज्जनिप्फत्ती ॥२४५॥
नाह ! तुमाउ न अन्नो, नमामि न थुणामि नेव अच्चेमि ।
पत्थेमि नेव जिणवर !, सुत्तो सुमिणे न समरामि ॥२४६॥
तं चेव मुणसि मुणिवइ !, जइ एयमकारिमं तउ मज्झ ।
तुह पयसेवासहिओ, भवे भवे होज्ज जिण ! जम्मो ॥२४७॥
तवियं तवो तवोनिहि !, सुया सुई तुम्ह भाविओ अत्थो ।
संपइ समाहिमरणं, जह होइ तहा करेज्जासु ॥२४८॥
इय तिसलहनंदणि दुहसय-खंडणि वद्धमाणपहुथुयचलणि ।
वरलक्खणलंछणि भव-भयभंजणि होउ भत्ति मह वीरजिणि ॥२४९॥

एवमादिस्तुतिस्तोत्रैः, संवेगरसदायिभिः । वन्दित्वा भक्तितो देवान्, ववन्दे विधिना गुरून् ॥२५०॥
सर्वस्यापि त्रिलोकस्य, वन्दनीयपदाम्बुजान् । सर्वसाधूंश्च वन्दित्वा, विधायानशनं ततः ॥२५१॥
भावयन् भववैरस्यं, चञ्चलत्वं च सम्पदां । मानुषत्वादिसामग्र्या, भूयोऽप्यत्र दुरापताम् ॥२५२॥
सर्वथा दुर्जयत्वं च, महामोहमहीपतेः । दारुणत्वमकल्याण-मित्रवर्गाभिसङ्गतेः ॥२५३॥
कल्याणमित्रयोगस्य, सर्वकल्याणदायिनः । असमञ्जसकारित्वं, रागिणां च पदे पदे ॥२५४॥
सद्गतेः प्रतिपन्थित्वं, सर्वान्तरद्विषां तथा । एवमादिसमग्राणां, त्रैलोक्योदरभाविनाम् ॥२५५॥
सुन्दरेतरभावानां, शुभेतरविपाकताम् । स संस्तारकमारूढः, प्रौढसद्भावनायुतः ॥२५६॥
सम्यक्पञ्चनमस्कारं, सारमार्हतशासने । उच्चचार स्फुटैर्वाक्यैः, संसारार्णवतारकम् ॥२५७॥
सञ्जातं पञ्चमं ज्ञानं, विश्वविश्वावभासकम् । एवं ते साधवः शुद्ध-पञ्चमज्ञानसंयुताः ॥२५८॥
पञ्चापि पञ्चमोदार-चारुचारित्रशालिनः । प्रक्षीणाशेषकर्मांशाः, सर्वे क्लेशविवर्जिताः ॥२५९॥
कषायरहिताश्चापि, सर्वथा मोहवर्जिताः । सम्प्राप्ताः परमानन्द-सुन्दरं परमं पदम् ॥२६०॥
तदेवं धनसारोऽसौ, सार्धं स्वीयवयस्यकैः । सङ्घपूजाप्रभावेण, जातः कल्याणभाजनम् ॥२६१॥
तदिममिह विलोक्य श्रेयसामेकहेतुं, भवजलनिधिमज्जज्जन्तुसन्तानसेतुम् ।
शमितदुरितदावं सङ्घपूजाप्रभावं, कुरुत भविकलोकाः सादरं सङ्घपूजाम् ॥२६२॥
तदेवं धनसारेण, सङ्घपूजां प्रकुर्वता । तीर्थप्रभावनाकारि, श्रीमज्जैनेन्द्रशासने ॥२६३॥

यतः- **तं किंपि पुरिसरयणं, संघसमुद्दंमि जायइ महग्घं ।**
उज्जोइज्जइ सयलंपि, सासणं जेण जगगुरुणो ॥२६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति सङ्घपूजाधिकारे धनसारश्रेष्ठिकथानकं समाप्तं, तत्समाप्तौ च समाप्तः सङ्घपूजाधिकारः, ॥३७२॥

अथ सूरिः प्रकरणकरणोपात्तपुण्येन शुभप्रार्थनां कुर्वन् श्लोकद्वयमाह-

सुभाषितसुधाधाम-धर्मरत्नकरण्डकम् ।
भव्यसत्त्वोपकाराय, कृत्वा यदुपार्जितं शुभम् ॥३७३॥
तेनैव मम भूयोऽपि, भूयाज्जन्मनि जन्मनि ।
ज्ञानदर्शनचारित्र-भावश्रीवर्धमानता ॥३७४॥

सुभाषितान्येव सुधा पीयूषं, तस्य धाम स्थानं **सुभाषितसुधाधाम**, विशेषणमिदं, विशेष्यमाह-**धर्मरत्नकरण्डकं** धर्मस्य सम्बधिनो ये दानादिभेदास्त एव रत्नानि धर्मरत्नानि, तेषां करण्डक इव करण्डकः सङ्गोपनस्थानं प्रकरणाभिधानमिदं, **भव्यसत्त्वोपकाराय** भव्यलोकानुग्रहाय **कृत्वा** विधाय **यदुपार्जितं** यद्विटपितं **शुभं** पुण्यमिति, **तेनैव** शुभेन **मम** मह्यं **भूयोऽपि** पुनरपि भूयाद्भवेज्जन्मनि **जन्मनि** आसंसारमित्यर्थः, ज्ञानदर्शनचारित्राण्येव भावलक्ष्मीस्तस्या वर्धमानता प्रवर्धमानत्वं **ज्ञानदर्शनचारित्रभाव श्रीवर्धमानता**, अनेन काक्वा प्रकरणकृता स्वाभिधानमुक्तमिति ॥३७०-३७१॥

अथ सूरिः प्रकरणस्य स्वकृतत्वमावेदयन्नाह-

श्रीमदभयदेवाख्य-सूरिशिष्येण निर्मितः ।
सूरिणा वर्धमानेन, धर्मरत्नकरण्डकः ॥३७५॥

श्रीमांश्चासावभयदेवाख्यसूरिश्च, तस्य शिष्यो विनेयस्तेन **निर्मितो** विरचितः, **सूरिणाचार्येण** वर्धमानाभिधानेन **धर्मरत्नकरण्डको** धर्मरत्नकरण्डकाख्यो ग्रन्थ इति श्लोकार्थ इति ॥३७५॥

अथ ग्रन्थाग्रं सूत्रस्य श्लोकसङ्ख्यया प्राह-

ग्रथितेऽपि हि विज्ञेयं, श्लोकानां सर्वसङ्ख्यया ।
पूर्वापर्येण सम्पिण्ड्य, पञ्चत्रिंशं शतत्रयम् ॥३७६॥

श्लोकोऽयं व्यक्त एव ॥३७३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च-श्रीजयसिंहभूपाल-[१]भुक्तौ भूरिजनाश्रयः ।
ग्रामोऽस्ति दायिकाकूपो, जैनवेश्मविराजितः ॥१॥
तत्रासीज्जिन्दकः श्रेष्ठी, हुंवटान्वयभूषणः । द्वितीयश्चाजितो नाम, तस्य भ्राता सहोदरः ॥
ताभ्यां विशालचित्तेन, शुभवित्तेन कारिता । रम्या पौषधशालास्ति, साधुश्रावकसंश्रया ॥३॥
जिन्दकश्रेष्ठिनः कीर्ति-रञ्जितस्य च धीमतः । पुत्रयोः सर्वदेवस्य, श्रेष्ठिनः श्रेष्ठकर्मणः ॥४॥
सूरिणा वर्धमानेन, तस्यां सन्तिष्ठता सता । भव्यलोकोपकाराय, प्रबन्धोऽयं विनिर्मितः ॥५॥
अगाधान्तःपरिस्पन्दे, गूढार्थावर्त्तदुस्तरे । सारस्वते ह्रदे मग्ना, श्रान्ता सन्तरणाक्षमा ॥६॥
धीवरेणेव येनैषा, स्वयं संवाह्य यत्नतः । सम्प्रापिता परं पारं, मन्मतिर्गौरिवाबला ॥७॥
स तपस्वी यशस्वी च, धर्मवान् धार्मिकप्रियः । पार्श्वचन्द्र उपाध्याय-श्चिरं जीवतु नन्दतु ॥
गणिनाशोकचन्द्रेण, लिखिता प्रथमा प्रतिः । तथा धनेश्वरेणापि, साधुना पुण्यहेतवे ॥
सूरिणा वर्धमानेन, नेमिचन्द्रमुनीश्वरैः । पार्श्वचन्द्रोपाध्यायैश्च[२], पण्डितैरेष शोधितः ॥१०॥
तथापि चाऽसमीचीनं, यदत्र परिभाव्यते । तत्संशोध्य समीचीनं, प्रविधेयं विचक्षणैः ॥११॥
नमः श्रीपार्श्वनाथाय, प्रत्यूहापोहहेतवे । अर्हद्वक्त्रनिवासिन्यै, श्रीमद्वाण्यै नमोनमः ॥१२॥
पूर्वापरेण सम्पिण्ड्य, सावधानेन चेतसा । प्रायो दशसहस्राणि, ग्रन्थमानं विनिश्चितम् ॥१३॥
विक्रमतो वर्षाणां, शतेष्वेकादशस्वतीतेषु । द्वासप्तत्या वर्षै-रधिकेषु कृता विवृतिरेषा ॥१४॥

इति श्रीजैनशासनसौधमध्यप्रदीपकल्प-

चन्द्रगच्छीयश्रीमदभयदेवाख्यसूरिपादपद्मचञ्चरीकायमान-

श्रीवर्धमानाचार्यरचितो

धर्मरत्नकरण्डकः परिसमाप्तः ॥

शिवमस्तु सर्वजगतः, परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु नाशं, सर्वत्र सुखी भवतु लोकः ॥१॥

इति श्रीमच्चन्द्रगच्छीयश्रीअभयदेवसूरिपादपद्मचञ्चरीकश्रीवर्धमानाचार्यविरचितो

धर्मरत्नकरण्डकः सम्पूर्णः ॥ श्रीरस्तु ॥

१ भक्तो-मु. B । भोक्तो-J । २ °ध्यायपण्डितैश्च-B ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिशिष्ट १

अकारादिक्रमेण मूल श्लोकानां सूचिः

श्लोकाद्यपदम्	श्लोकाङ्कः	श्लोकाद्यपदम्	श्लोकाङ्कः
अज्ञजोऽपि हि दुष्टात्मा	२८७	आक्रुष्टोऽपि प्रियस्वेति	३४७
अज्ञातभववैरस्याः	१५३	आगच्छद्भिर्विगच्छद्भि	१६४
अज्ञानध्वान्तसन्तानं	१११	आतपच्छाययोर्यद्व	१३२
अत्रार्थे श्रेणिको ज्ञात-मभयश्च	९१	आत्मनः स्वधनादेश्च	२३६
अद्यापि दुःषमाकाले	८३	आत्मानं दुःस्थितं कृत्वा	१०५
अद्विजिह्वाः फणभृतो	१८४	आदाय कुङ्कुमं रम्यं	६३
अधमः किल्बिषं पाप	११	आदौ ह्यरसास्वादाः	३०५
अधीतानि च शास्त्राणि	२६९	आयातः स कुतोऽपीह	१५८
अनाद्यनन्तसंसार	११९	आशापिशाचिका नित्यं	१३०
अनुष्ठानानि तान्येव	२१२	आसतां बहवस्ताव	१६२
अन्तरङ्गद्विषां मान्द्य	१४	आसन्नसिद्धिकः कोऽपि	२३७
अन्यत्रान्यत्र तत्रैव	२१५	आसन्नसिद्धिकस्येदं	३६७
अन्यानपि नमस्यामि	३	आसन्नसिद्धिकैरेव	३७३
अपकारिणि कोपश्चे	१७७	इत्येवं सर्वलोकस्य	२०२
अभक्तिर्मानसे येषां	९६	इह लोकेऽपि कल्याणं	३३७
अमानमानमारूढ	१८२	इह लोकेऽपि दुःखानि	३३८
अमित्राण्यपि मित्राण्य	३२८	इहैव पापकर्माणि	२५
अमुं भवाम्भोधिमगाधमुल्बणं	२४०	उत्पद्यन्ते विनश्यन्ति	१००
अर्थवन्तोऽर्थसारेण	३४८	उपभोगोपायपरो	३०९
अर्थाभावेऽपि दातारः	११२	ऋजुधर्मस्य कर्तारं	२०३
अलब्धान्तः परिस्पन्दे	१३९	एकवारं विषं हन्ति	३०६
अष्टकर्मविनिर्मुक्त	६१	एकेनापि हि पुष्पेण	६२
अष्टस्वङ्गेषु वा पूजा	६०	एको द्वौ वा त्रयो वापि	२७८
असन्तोषो हि दोषाय	१२९	एतदेव हि साफल्यं	७३
असारे सारतावाञ्छा	३१९	एतद्धर्मस्य सर्वस्वं	३५१
असारोऽप्येष संसारः	२८१	एतन्नेत्रयुगं यस्य	३१२
अस्याधिकारिणो ज्ञेया	४६	एतस्मिन् दुःषमाकाले	२१७
अहं दाता अहं भोक्ता	१८१	एवं कृतनमस्कारः	४
अहो ! लोभस्य साम्राज्यं	१९६	एवं सांसारिकाः सर्वे	१३७
अहो मानस्य दौरात्म्यं	१८३	एवंभूताय शान्ताय	२३४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषैव देवतावन्द्या	३२६
ऐश्वर्येणापि किं तेन	७६
औदासीन्यं गुरौ येषा	९५
कथं सन्तो न शस्यन्ते	१०९
करिकेशरिशार्दूल	२५१
कर्मद्रुमकुठाराय	३५७
कल्पपादपतुल्येषु	८६
कल्याणमित्रसंसगः	१३
कायिकश्च यथाशक्ति	२९५
कार्यशतेऽप्यसंमूढा	११३
कार्यश्च सदौदासीन्य	८९
कालरात्रिर्यकारूढा	९८
कालोचितक्रियासक्ता	२४५
किं किं तेन न दत्तं स्यात्	३३०
किं किं दत्तं न तेनेह	२२८
किं किं न पूजितं तेन	३६१
किं किं यन्न प्रयच्छन्ति	२८६
किं बहुना विचारेण	९९
कुटुम्बककृते धाव	१२७
कुदेशः कुत्सितो वासः	१५
कुश्रुतिः कुमतिश्चैव	१६
कृतं शेषगुणैस्ताव	१२६
कृत्यमार्गोपदेष्टारो	८४
कैः कैर्वा न प्रशस्यन्ते	११४
कोदण्डस्यैव नम्रस्य	२८८
क्रूरकर्मापि सत्सङ्गा	२८३
क्लेशेनोपार्ज्य वित्तानि	१०८
क्वचिद्राजा क्वचिद्रङ्कः	१४३
क्वचिन्नारकभावेन	१४२
क्षणमात्रं च मूर्च्छितः स्थित्वा	१७१
क्षमादिब्रह्मपर्यन्त	८५
खिद्यते प्रत्यहं प्राणी	१२८
खिद्यन्ते सर्वदा जीवा	१४६
गच्छतां दुर्गसंसार	४१
गर्त्ताशूकरसङ्काशा	३०३
गुणान् स्मरन् सदा शेते	३३१
गुरुभक्तिर्भवाम्भोधे	७७
गुर्वादिषु शुभं चित्तं	२९४
गृहिणा सद्विवेकेन	३७२
गौरव्या गुरवो मान्या	८७
ग्रथितेऽपि हि विज्ञेयं	३७७
घ्नंश्च जन्मशतोपात्तं	३४४
चराचरजगज्जन्तु	२३३
चारुपुष्पामिषस्तोत्रै	४९
चिन्ताचक्रसमारूढो	१३१
चिन्तितान्यपि जीवा	१४७
चौरयुग्ममिह ज्ञातं	९३
छायया सुखयन्त्यन्यं	१०६
जननी जनको भ्राता	२९
जनयित्री जनी यत्र	१५१
जन्मापि च प्रमोदाय	१०२
जानन्तोऽप्येवमत्यर्थं	३५
जायन्ते चात्र संसारे	३४२
जितरोषरयाः सन्तो	१७६
जिनं पूजयतो यस्य	७४
जिनानामग्रतो दद्यात्	५५
जिनार्चनान्महापुण्यं	७१
जीवेनानन्तशः क्षुण्णे	१३८
ज्ञानदर्शनचारित्र	२९६
ज्ञानदर्शनचारित्र	३५८
तच्च चतुर्धा वीरैः	२३१
ततो माया परित्याज्या	१८९
तथापि निष्प्रतीकारे	१५५
तथापि वालितो नैव	१६९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथापीहोपकारोऽस्ति	६९	देशतः सदनुष्ठानं	२४२
तथैव दुर्विनीतस्य	२९३	द्रव्यतो भावतश्चैव	४५
तदहो मानुषत्वादि	३८	द्रव्येण दीयते दानं	२६५
तदेतद्दानतः सर्वं	२२७	धमाधर्मौ जिने पूजा	५
तदेवेहामृतं मन्ये	३२४	धराधरा महीयांसो	१०३
तदेष भगवान् धर्मो	४३	धमः पुण्यं वृषः श्रेयः	१०
तद्भावादुत्तरो धमः	८१	धर्मलोकविरुद्धानि	२१९
तपः प्रतप्यमानस्य	२५५	धर्मलोकविरुद्धानि	२२०
तपस्विनस्तपस्येव	२५९	धर्माधर्मादिकामेनां	९
तमस्तानवकर्तारः	२७७	धर्माधारार्यदेशेषु	२२२
तस्माच्छोकं परित्यज्य	१७२	धर्मो विजयी सर्वत्रा	४४
तस्मादधर्ममुत्सुज्य	२६	धर्मोपग्रहदानं	२३०
तस्माल्लोकविरुद्धानां	२२१	धूपं दहति यः सारं	५२
तिलानां यादृशो वास	९२	न च पृथ्वी तथा पृथ्वी	१२५
तिष्ठन्त्यर्था गृहेष्वेव	३०	न तस्यास्ति रिपुः कोऽपि	३२५
तीर्थप्रवर्तनाकाले	३६३	न नमस्यति देवेभ्यो	१८०
तेनैव मम भूयोऽपि	३७५	न विना साधुभिस्तीर्थं	८२
तेषां दूरतरं दुःखं	१२४	नदीनाथं तरन्त्येके	१९०
तेषामिहैव दुःखानि	१९९	नमस्तस्मै विवेकाय	३२०
त्यक्ता दुर्गतिवर्तनी प्रतिहता	३६९	नानायोनिसमाकीर्णे	१४१
त्यजन्ति कामिनः कामा	३०१	नानारत्नसमाकीर्णं	६४
त्रैलोक्यगतजीवानां	१९५	निःशेषं विश्वमेकत्र	३५०
दग्धा दवेन रोहन्ति	३३५	निःस्पृहस्य तृणं राजा	११८
दया धर्मस्य सर्वस्वं	३४०	निर्दोषोऽपि च मायावी	१८८
दानं शीलं तपो भावः	७	निर्नायकं यथा सैन्यं	२९२
दुःखदारुकुठाराय	१२१	निर्विवेककृतं कार्यं	३१७
दुःखद्विषो जनाः सर्वे	३४	निर्विवेका न शस्यन्ते	३१३
दुःखिताः स्वत एवामी	३४१	निवृत्ताः सर्वपापेभ्यः	२४
दुर्गतिद्वारहेतूनि	२७६	नेत्रहीनं यथा वक्त्रं	२९१
दुर्विनीतं परित्यज्य	२८९	पण्डिता नैव शोचन्ते	१६५
दृष्टान्तोऽत्र नरः कोऽपि	३५४	परप्राणप्रहाणोत्थ	३५५
दृष्ट्वा च शस्त्रमुद्गीर्णं	३४६	परलोकप्रयाणस्थं	३१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परोपकारकर्तृणां	११६	मित्राणि चाप्यमित्राणि	३२७
परोपकारप्रवणाः	१०१	मिथ्येदं कूर्मशेषाभ्यां	११५
पर्वता अपि शीर्यन्ते	१३६	मोक्षमार्गपरिज्ञानं	२७५
पापोपहतबुद्धीनां	८०	मोहं निहन्त्यशुभतानवमातनोति	२६३
पालयन्ति पुनश्चैत	२४४	यः प्रयच्छति पुण्यार्थं	२३२
पुटपाकादिभिर्गन्धै	५१	यः स्नापयति बिम्बानि	५८
पुत्राणां मरणं श्रुत्वा	१७०	यतो हन्यादसौ हन्ता	३४५
पुरग्रामप्रवेशेषु	२०६	यत्काले दीयते दानं	२३५
पूर्वं कृता करिष्यामः	९७	यत्र तत्र प्रयातोपि	२८५
प्रणिधानमपि प्राहु	७५	यत्र यत्र प्रयात्येष	३२
प्रथमान्तिमतीर्थेशौ	७९	यत्र यत्र प्रयात्येष	३३
प्रदीपयति यो भक्त्या	५३	यत्र शिष्टसमाचारो	७८
प्रमादमदिरामूढो	१४०	यत्र हिंसा मृषा भाषा-	१९
प्राणैः प्राहुणकप्रायैः	७२	यत्रावासस्तदाचार	२०५
प्राप्ता अपि नरैः कामा	३०७	यत्राहिंसावचः सत्य	१८
प्रियाप्रयोजने केचि	१४५	यत्सेवां कुर्वते केचि	१९२
बुद्धचा कार्याणि साध्यन्ते	१७९	यथा तेपे तपः कोऽपि	२६१
ब्रह्मचर्यं पुनः सर्व	२४६	यथा यथा निषेव्यन्ते	३०८
भव्या भक्तिर्भगवति जिने	३२३	यथा स्वयं प्रणश्यन्ति	३४९
भावना यदि नो जाता	२७०	यथाशक्ति यथाभक्ति	३७१
भावनातः क्षयं याति	२६७	यथैकत्र द्रुमे रात्रा	१५९
भावनातोऽपि ये भ्रष्टा	२६६	यदटन्ति महीमेके	१९७
भूरिभोगकरं दानं	२६०	यदन्यदपि वस्त्वत्र	२३
भो जना ! वोऽपि नैकत्र्ये	१६६	यदन्यदपि सद्वस्तु	२१
भो भव्या ! भावना भाव्या	२६४	यदि धमः कर्तुमारब्ध	२११
महापापवतामेत	२१०	यदि ब्रूयान्नरः कोऽपि	६७
महामोहभराक्रान्ता	२७४	यदि माया हतो धर्मो	१८७
महारम्भो महादम्भो	१७	यदेषा सर्वदा सूते	३३३
मानुषत्वं हि सद्धर्म	३९	यद्गृहे पेशला सम्प	२२६
मानुष्यं शोभनो देशः	१२	यद्दीनानि न जल्पन्ति	१२२
मालतीचन्दनचन्द्र	२७९	यद्वा तद्वा जलं येषां	१२३
मितमधुरमुदारं जन्तुसन्तोषकारं	३३६	यन्नीचकुलजातोऽपि	२५७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्मादुत्तिष्ठते वह्नि	१७५	विवेकाद्भोगदेवेन	३२२
यस्य निःशेषसंसार	३६२	विवेको निर्मलं चक्षु	३११
युगादिदेवनिर्वाणे	१६८	विशालशीले सरलः सुरूपः	२५४
ये नराः क्रोधसन्दग्धा	१९८	विश्वासकारणं शीलं	२४९
येन तीव्रं तपस्तप्तं	२६२	विषयेषु प्रसक्तानां	३१०
येषां चित्तं च वित्तं च	१०४	विषयेषु विषीदन्तौ	३०४
येषां योगत्रयस्यापि	१८६	शक्रचक्रिसहस्राणि	१६०
यैः स्वार्थं परिहृत्य हृद्यहृदयैः	२८४	शठानि यस्य मित्राणि	१८५
यो यथा कुरुते पुण्यं	२१३	शब्दादिविषयासक्ता	३०२
योऽक्षतैरक्षतैः शुभ्रै	५४	शरद्धृदजलाकारं	२८०
यौवनं जरयाऽऽघ्रातं	१३५	शान्तं कान्तं शिवं सौम्यं	६६
यौवनेऽपि समारूढा	२४७	शिवसद्मसमारोह	३६०
रङ्गभूमौ च वंशाग्रे	१९१	शीतोष्णकालयोर्यद्व	६८
रथकारः स्वयं दाता	२७१	शीलं चित्तसमाधानं	२४१
रमणीया रमणी या	१४९	शीलं वृत्तं च चारित्रं	२४३
रागद्वेषसमुद्भूत	७०	शीलसारगुणाकृष्ट	२५३
राजानो न प्रजापाला	२०१	शीलाभरणेन ये नित्यं	२५०
रे मूढाः ! किं समारब्धं	१६३	शुक्रशोणितसम्भूते	१४८
लिम्बतां दुर्विनीतत्वात्	२९७	शुभाशुभानि भावीनि	३३४
लोकः सर्वोऽप्ययं बोको	२००	शुभैः सुगन्धिभिः पुष्पै	५०
वञ्चयति पिता पुत्रं	१९३	शूराणां पण्डितानां च	२३८
वधबन्धनदुःखानि	२४८	शेषदानान्यदानानि	३५३
वनवह्निर्यथा दीप्तो	१७४	शोकशङ्कोः समुच्छेद	७६
वरविनयगुणौघप्राप्तलोकप्रशंसः	२९८	शोकेन चाभिभूयन्ते	१७३
वाञ्छा चेन्न सुखं जन्तो	१३३	शोकोऽपि युज्यते कर्तुं	१५७
वाताहतवीचीवच्चञ्चलं	२२३	श्रीमत्सङ्घसमुदाय	३५९
वाताहतार्धच्छिन्नेन	२७२	श्रीमदभयदेवाख्य	३७६
विधाप्य विधिना श्राद्धः	४७	श्रेयांसश्चन्दना धन्या	२३९
विधिना शुचिभूतेन	४८	श्रोतव्यं शुद्धसिद्धान्त	८८
विपदाकुलमालोक्य	२२४	षट्खण्डमहीनाथा	२५६
विवेकदण्डमादाय	३१८	स गोधन इवोदग्रां	५७
विवेकसंज्ञितं रत्न	३१५	स ज्ञानलाभकालेपि	१९४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स प्राप्य सुन्दरा लक्ष्मी	५९
संसारसागरे पोतो	३७०
संसारासारता येषां	१५०
संसारासारतामेनां	१५२
सङ्क्लेशपरिहारेण	२१८
सङ्घपूजाफलं प्रोक्तं	३६८
सङ्घवात्सल्यतः पूर्वं	३६४
सज्जनाश्चन्दनं चन्द्रो	११०
सततं तीव्रदुःखौघ	३१४
सत्कुले जातिरारोग्यं	२०
सदयहृदयदत्ता	३५६
सदाचाप्रमत्तानां	९०
सन्तोषसुखशय्यायां	१३४
सन्तोषामृततृप्तानां	१२०
समं च वर्तते येन	१६१
सममेव प्रवृत्तानां	१५६
समस्ति जीवनोपायो	२०९
सम्प्राप्य मानुषं जन्म	४०
सर्वकर्मविनिर्मुक्तं	२
सर्वकार्याणि सिध्यन्ति	१७८
सर्वजीवाभयं भावा	२२९
सर्वतोऽपि प्रसर्पन्ती	११७
सर्वदा मानसे येषां	९४
सर्वदानाग्रिमं दानं	३५२
सर्वधर्मशिरोरत्नं	८
सर्वनीतिप्रणेतारं	१
सर्वलोकविरुद्धानि	२१६
सर्वलोकविरुद्धेन	२०४
सर्वसङ्घसपर्यायाः	३६६
सर्वापायविनिर्मुक्तः	२८
सर्वोऽपि पूजितः सङ्घः	३६५
सविवेकं दुर्लभं दानं	३२१
सागरादपि गम्भीरा	२८२
साधुभक्ता जना येन	२०८
साधूनां व्यसनं दृष्ट्वा	२०७
सिंहासनायते शूला	२५२
सीदन्त्यत्र न यैर्धमः	४२
सुखे वैषयिके लुब्धाः	३६
सुगन्धसर्पिषा यस्तु	५६
सुधया किं गुडेनाथ	३३२
सुबह्वपि तपस्तप्तं	२६८
सुभाषितसुधाधाम	३७४
सुरूपः सुभगः क्वापि	१४४
सेतुर्भवार्णवे धर्मो	२७
सोऽपि दानादिभेदेन	२२५
स्वकार्यासिद्धितः क्रुद्धः	१६७
स्वदेशे च विदेशे च	३१६
स्वपक्षपरपक्षाभ्यां	२१४
स्वप्ने दृष्टं यथा पुंसः	३००
स्वबन्धुनाशे जीवानां	१५४
स्वरूच्या दीयते दानं	३२९
स्वोदरं भ्रियते कष्टा	१०७
हन्ता जन्मद्वयस्यापि	२९०
हन्मीति चिन्तनादेव	३४३
हस्त्यादिभ्यो महाभीतिं	३७
हारिहारैर्महामूल्यैः	६५
हीनजातितयोत्पन्नौ	२५८
हीना जातिः सरोगत्वं	२२
हृत्पूरकाशिनो यद्व	२९९
हृदयगिरिगुहान्तः संसृतं यत्तमिस्रं	२७३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिशिष्ट २

अकारादिक्रमेण अवतरण सूचिः

अवतरणाद्यपदम्	पृष्ठाङ्कः	अवतरणाद्यपदम्	पृष्ठाङ्कः
अंगोवंगा तिन्नेव	५	अलमेत्थ पसंगेणं	३५
अइघोरतव०	३०९	अलाभ रोग तणफासा०	२७०
अकसिणपवत्तयाणं	३०	अवरविदेहे गामस्स	१३५
अकुलीनोऽपि मूर्खोऽपि०	३७०	अवियारिऊण कज्जं०	२८४
अक्खंडगंडमंडल	४३	असयारंभपवत्ता	१३१
अक्खाण रसणी०	२७१	अह जिणपंचंगेसु	३३
अक्रोधस्तपसः क्षमा०	३९५	अह ते मुणिणा०	३०९
अगुरुलहु पराघायं	६	अह पुण ससुरनरासुर	२१३
अच्चंतणुरत्तकलत्त	४२	अह मुणिणा ते०	३०९
अच्छ ता नियपहुणो	२१२	अह सद्दो जहत्थो०	२६९
अच्छा चंदण अच्छा कप्पड०	३८५	अहिगारिओ य गिहत्थो	३०
अच्छिनिमीलियमित्तं	११४	अहो मोहस्य माहात्म्यं	२२६
अच्छिन्नलच्छिवित्थड्ड	४३	आजम्मं ण्हारुवसट्ठि	४३
अजसकित्ती य तहा	७	आजम्मं रम्मतणू	४३
अज्जवि वड्ढइ धम्मो०	२८३	आढत्ता सप्पुरिसेहिं०	३८१
अट्ठारससीलंगाण	४६	आयरिओ पाडिवओ	१३८
अणिमिसनयणसहस्सा	४४	आरंभो चिय न फुरइ	१२४
अणुकूलं चिय भुंजइ०	३७३	आरत्तियमंगलदीवयं च	३३
अधुवे असासयंमि	१८१	आरोग्यबुद्धि विनयो०	१७९
अन्नं च सुत्तविहिणा	३४	आर्त्तरौद्रमना मूढो	२२७
अन्नन्नरायवंसा	१३९	आलोयण पडिक्कमणे०	२७०
अन्नह निव्विसयत्तं	३४	आवस्सयाइचुन्निसु	३१
अप्पपराभवसुहया०	३७८	आसणयाए पट्टस्स	३४
अप्पवहाए नियय,	२०९	आसायणदोसो वि हु	३१
अब्भत्थिया न थक्कइ०	३७३	इंदियकसायजोगे	४६
अयं निजः परो वेति	१६५	इच्छा मिच्छा तहक्कासे०	२७०
अरइ दुगंछा य पुं०	२७०	इति मत्वा न कर्तव्या०	२२८
अरई अचेल इत्थी०	२७०	इत्थीइ समं वासंपि०	३०७
अर्थयुक्तः कुरूपोऽपि०	३४३	इत्थीपुरिसनपुंसग	६
अर्थानामर्जने दुःखं०	१६२	इदं पात्र मिदं वित्त०	२४५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं पुण्यं पापं०	२४३	एवं निवेयणं पुण	२१२
इय अप्पडियारे हय	२१३	एवं भावेमाणो०	३०६
इय जहसत्तीए गुरुं	३१	एवमधिवासियं तं	३३
इय जाहे विगुत्ता०	३०७	एवमनेके दोषाः०	३९६
इय तिसलहनंदणि०	४०६	एसावि जये लच्छी	२०९
इय नियचरिएहिं चिय	२१०	एसो गुणिड्ढिजोगा	३०
इयरे जं किंचि गुणं	२१०	एसो य कओ पागो०	३०८
इह लोगम्मि दुरंते०	३८४	एसो सो जेण तया०	३०९
इहलोयपरलोइयकज्जाणं	३६	ऐश्वर्यस्य विभूषणं०	३९५
उत्तत्तजच्चकंचणतरुण	४३	ओल्लसई जसो०	३१०
उत्तम गुण बहुमाणो०	१३३	ओसप्पिणी इमीसे अ	१३९
उदये सविता रक्तो	२१५	ओसरइ दुरिय०	३१०
उद्यमः साहसं धैर्यं०	३६९	कज्जं कुणंति नियय	२१०
उपकर्तुं प्रियं वक्तुं०	१६३	कज्जं विणावि भुवणे	२१३
उवगाराभावंमि वि	१३१	कप्पसम्मत्तीए तयं०	२६९
उवघायं कुविहगगई	७	कर्मणा मोहनीयेन	२२६
उववज्जिहि विमाणे	१३९	कलरिभितमधुरगान्धर्व०	३९६
उववूहा जन्न कया	४६	कलसाए कलसण्हवणं	३४
उवसंपया य काले०	२७०	कल्लइ बोरइं विक्किणइ०	३८३
एउ अपुव्वु जं०	२८४	कषायकलुषो जीवो	२२७
एकं हि चक्षुरमलं०	३६४	कषायनिग्रहः शौचं०	२००
एकैकविषयसङ्गा०	३९६	कषायविजये सौख्य	२२७
एकोदरसमुत्पन्ना०	२३८	कषायविषयातङ्कै	२२७
एक्कं पि उदगबिंदु०	१३३	कषायविषयार्तानां	२२७
एगिंदियाइ चउरो	७	कषायशत्रवो बाढं	२२७
एगुणवीसवरिसाणं	१३७	कषायान् शत्रुवत्पश्येत्	२२७
एते हि तस्करा घोरा	२२६	काउं काउस्सग्गं	१३८
एतैर्हि निर्जिता याव	२२६	कान्ताराच्च महा	४८
एत्थं सुहभावकए	३३	कायवहचरणभंसा	३४
एत्थंतरंमि जक्खो०	३०८	कालंमि कीरमाणं	३६
एवं अइक्कमंते	१४०	कालदिन्नस्स पहे०	२४६
एवं ण्हविए बिंबे	३२	कालम्मि अणाईए	२१२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काले विणए य तहा	४६
कालोच्चियजयणाए०	२६९
कार्श्यं क्षुत्प्रभवं	२१
किं चन्द्रेण महोदधे०	१६४
किं तेण गुणगणेणं०	४०५
किं तेन जातु जातेन	१७८
किं तेन जातु जातेन०	२४२
किं बहुणा संतंपि हु	४४
किमत्र चित्रं यत्सन्तः	१६९
कियती पञ्चसहस्री	१६९
कुणइ वियारं कालो	२१५
कुन्देन्दुशङ्खसङ्काशा०	४००
कुलकंलकणु सच्च०	३५५
कुलरूपवचनयौवन०	३३६
कुलीनेनापि किं तेन०	२४२
कुलीनोऽपि सुजात्योऽपि०	३७०
कुसुमाइं सुयंधाइं	३२
कूरावि सहावेण	१४८
को मुणइ ताण संखं०	३७३
कोहाइसंपराओ ज्ञतेण०	२६९
क्रोधो मानस्तथा माया	२२६
खणि खणि पिज्जइ उन्ह पाणिउ०	३८६
खामेमि सव्वे जीवे	४६
खुहा पिवासा सीउण्हं०	२७०
गतिविभ्रमेङ्गिताकार०	३९६
गरुडाए दुद्धरक्खा	३४
गहचक्कमेक्कवेलं	४४
गालिघायघुम्मंत०	३५५
गावीरूवं काउं	१३८
गिम्हसिसिरवासासु०	२६८
गुणा गौरवमायान्ति	२२
गुरुपूयाकरणरुई	३०
गुरुयावि गुणा गुण०	३६९
गोभूमिसुवन्नहिरण०	२४४
घयगुडदीवो सुकुमा	३२
घोसावेज्ज अमारिं	३१
चंदणछडुब्भडेणं,	३२
चंदणज़लेण कुंकुम	३२
चउप्पन्नमहापुरिसा	१३७
चक्खु अचक्खू ओही	६
चिंताणंतरघडमाण	४२
चिंताणंतरसहसत्ति	४४
चुल्लग१ पासग२ धन्ने	८
चोएइ एत्थ कोइ	३४
चोद्दसपुव्वीण तहा	४६
छज्जीवकायसंजमो	३०
छट्ठं चउत्थं च तहा०	१३९
छव्वाससएहिं समं	१३७
छासीसो वासाणं	१३८
छिन्नतरुणोव्व०	३०९
छुह मिट्ठि तिस सीयली०	२३७
जं दाणलाभभोगो	६
जंपंति भट्टचट्टा०	३०८
जंपि य विसिट्ठपयई	४२
जंपि य सव्वंगपहाण	४३
जंपि य सियदेवंऽसुय	४३
जइ जत्थ व त्थ व०	१६४
जइ तस्स चेव एक्कस्स	२१३
जत्थ न बुज्झसि हियए०	४०६
जम्माउ होइ मरणं	२१४
जय जय गुणमणिरोहण !	१२६
जय जय जिण तिजगुत्तम !	१२६
जया समणे कूलवालए०	३३४
जरसमणाईरयणा०	३६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलणो वि पाव०	३०९	जो जेत्तियस्स अत्थस्स	१६
जलणोव्व दहइ०	३०९	जो तित्थवई जइया	३१
जलमाणमणिप्पहपुण्ण	४२	जो तुह रूवं सामिय	१२७
जसु निमित्तु हयहीयडा०	२८३	जो भणइ नत्थि धम्मो	१३७
जह कालम्मि सुखित्ते०	३०८	जो विरडिं पि०	३०७
जह सिद्धिमेरुकुल	३३	जो सं तं परिभुंजइ०	३७३
जह सूरगिरिणो०	२८६	जो संतवि न भुंजइ०	३७३
जहचिंतियसंपज्जंत	४३	ण्हाणाणं सव्वाण वि	३२
जहा लाहो तहा लोहो	१८०	तं किंपि पडइ कज्जं	२१२
जा वल्लरक्खण०	२८२	तं किंपि पुरिसरयणं०	४०६
जाईकुलेसु विसिट्ठा०	३०८	तं चेव मुणसि मुणिवइ !०	४०६
जाईमयावलेवा०	३०५	तं तह पवत्तमाणं	३०
जाण मणवणनिकुंजे	४२	तं दुविगप्पं छउमत्थ०	२६९
जाव दिएहिं नभुत्तो०	३०८	तं दुवियप्पं निव्वि०	२६८
जिणबिंबस्स य विसये	३४	तं नाणं तं दाणं०	२४४
जिणभवणकारणविही	३१	तं सव्वं खमसु तुमं०	२८३
जिणभवणबिंबठावण	२९	तंपि असेसं जाणसु	४४
जिणभवणबिंबपूया-इयं	३४	तंपि हु किर सद्धा	४३
जिणमुद्द कलस परमेट्ठि	३४	तइया इंदवयारे	१३९
जिणमुद्दाए चउकलस	३४	तइया सत्तरिसमहिय	३१
जियकोहमाण०	३०९	तत्तो य अहक्खायं०	२६८
जीवन्तो मृतकाः पञ्च०	१६२	तत्थ सुइणा दुहावि हु	३५
जीवाणं कुंथुमाइण घायणं	१०८	तदिदमुचित पात्रं०	२४६
जूइं अत्थुजुविढ०	३५५	तम्मि दिणे महुराए	१३७
जे केइ जगप्पहाणे	४५	तयणंतरं तु मुद्दिय	३२
जे चेव रक्खगा०	२८२	तवियं तवो तवोनिहि !	४०६
जे पइं थुणंति सामिय !	१२७	तस बायर पज्जत्तं	६
जे हुंति महापुरिसा	२०९	तस्स वुड्ढीए नंदाए	१३७
जेऊण हयकयंतं	२१३	तह गद्दहिल्लरज्जं बा	१३७
जेणं विणिम्मिया उ०	३४६	तह दीवसिंधुससहर	३३
जो चिय सुहभावो खलु	३०	तह पसियसु सामि तुमं	१२७
जो जेणं जंमि ठाणंमि	१३४	तह य दिसिपालठवणं	३१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहा जिणसिद्धकेवलीणं ४६
ता छड्डिज्ज एसा० ३७३
ता जइ वरइ० ३०७
ता जुज्जइ रोयणपिट्ट २१३
ता तह करेसु-जह कह० २८१
ता तुलियनियबलाणं० २६९
ता देह जहासत्तिं० २४४
ता निबिडनिगडघडणा ४२
ता नियविहवाणुरूवं वि ३६
ता विज्जं तह पत्थरह० ३९६
ताव फुरइ वेरग्गु च १८०
ताविंदियह वसाइं १८०
तिण्हं दुप्पडियारं समणाउसो १५८
तित्थयरेणं सहिया ६
तित्थेसु अणारोविय० २६८
तीयाणागयसंपइ ४५
तुम्हारिसावि पुरिसा २१५
तुह उरुजुग्गं जिणवर !० ४०५
तुह गीवा गुणसायर !० ४०५
तुह थोविआवि भत्ती १२६
तुह दंसणेण सामिय १२७
तुह पूयामेत्तेणवि १२७
ते पुत्ता जे पिउणो २१०
ते भगवंते तेल्लोक्क ४६
ते विरला सप्पुरिसा० ३७३
ते सुद्धोभयपक्खा ३२
ते हुंति सत्तवंता २०९
तेरसवाससएहिं ते १३७
तेरिच्छा चउव्विहा० २७०
तेलोक्कपूयणिज्जे ४५
तेलोक्कपूरणत्थं ४४
तेसिं अत्थाहिगमे ३६
तो वंदेज्जा देवे ३३
तो सरससुयंधाइं ३२
तो सव्वसंघसहिओ ३२
त्यागैः सच्चरितैर्दया २३
थंभेइ सीहसद्दूल० २७३
थुइथोत्ता पुण नेया ३६
दंसंणमोहे दंसण० २७०
दट्ठुं मुणिस्स० ३०६
दट्ठूणं ते चट्टे० ३०९
दत्तसुओ जियसत्तु १३९
दत्तेन येन यतिधर्म० २४५
दप्पिट्ठदुट्ठनिट्ठुर ४२
दव्वत्थ य भावत्थ य ३०
दव्वे भावे य तहा ३१
दसवेयालियधारी १३९
दाणं दाउं पंथणयणं १३५
दाणं धणस्स विणओ० २८६
दाणेणं जंति नासं० २४२
दाणेणं दिव्वसत्ति० २४२
दाणेणं भूरिभोगा० २४२
दाने यशसि शौर्ये च १७९
दालिद्दपरिभवो० ३६९
दालिद्दय तुम्ह गुणा० ३६९
दिट्ठा य तेहि० ३०६
दिट्ठे तुमंमि संपइ १२७
दिव्वा माणुस्सा तेरिच्छा० २७०
दीणाण समुद्धरणं २१३
दीहाउओ सुरूवो० २४४
दुक्खं अवणेइ फुडं २१४
दुप्पसहंतं चरणं १३६
दुप्पसहो जा साहू १३९
दुप्पसहो फग्गुसिरी १३९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुप्पसहो समणाणं	१३९	नाणंमि दंसणंमि य	४६
दुष्टयोगजयः शौचं०	२००	नाणावरणे वेए०	२७०
दुष्प्रतिकारौ माता	१५८	नास्ति क्रोधसमो वह्नि	२२६
दुस्सीलेहिं सिएहिं	२१०	नाह ! तुमाउ न अन्नो०	४०६
देव ! तुह पायपायव-०	४०५	नाहिदहम्मि तुह कंत०	४०५
देव ! तुह वयणकमलं,०	४०५	निद्दा निद्दानिद्दा	६
देव ! तुमाउ न अन्नो०	४०६	निप्फन्नस्स य बिंबस्स	३१
देव ! तुह पायपउमे०	४०५	निमिहीजिही पुरं सव्वं	१३८
देवकुले राजकुले वुड्ढीसु०	३७७	नियकुल कलंक जणयं०	२८३
देविंददाणविंदा०	२७३	निस्तीर्णस्तैर्भवाम्भोधि०	४००
देवीहिं माणुसीहिं	४७	नीयं गोत्तं निरया	७
देहाइनिमित्तंपि हु	१२८	नूनं समेऽपि यत्ने०	३६०
दो चेव नवर नीईओ	२११	पंचिंदियजाई तह	५
धनने विकलो यस्मा०	३६९	पंचेव आणुपुव्वी०	२७०
धन्नाण मणोभवणे	४२	पच्चक्खामि इयाणिं	४७
धन्नासि तुमं सुंदरि०	२८३	पच्छा तेण धणेणं	१३८
धम्मं जिपपणियं०	२०४	पच्छिमसंझाए भवे	१४०
धर्मज्ञो धर्मकर्ता च	१३४	पञ्चसु सक्ताः पञ्चविनष्टा	११९
धर्माज्जन्म कुले शरीरपटुता	४८	पठति पाठयते पठतामसौ०	२४३
न कुलं न यावि०	२८४	पठितं श्रुतं च०	३९७
न ज्ञानदानादधिकमत्र किंचि०	२४३	पडिपुन्नचत्तसुत्तेण	३३
न बलेण तस्स केणइ	२१३	पडिलेहणा पमज्जण०	२६९
न लहइ गेहम्मि०	२८१	पढमे न पढइ विज्जं०	३७७
न हि भवति यन्न भाव्यम्	१६	पढिया वेया चउरोज०	२४४
न ज्ञानदानादधिकमत्र०	२४३	पन्नानाणपरीसह०	२७०
नतथा सुमहार्घैरपि०	३३६	परचक्कंपणाणप्प	४३
नमिरसुरविसरसिरमणि	४४	परवसणम्मि सुहेणं	२१५
नयरे मिम्मायंगी	१३८	परिचत्तगिहावासो०	३०८
नवनिहिचोद्दसरयण	४३	परितुलियनियबलाणं	१३७
नवरं सुमुहुत्तंमि	३१	परियायस्स य छेओ०	२६८
नाणं वरविन्नाणं०	२८६	परिहारेण विसुद्धं०	२६८
नाणंतरायदसगं	६	परिहारियाणुपरिहा०	२६९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिहारो पुण परिहा०	२६८	भन्नइ एत्थ समाही	३४
पवरजडिलमूलो०	३१०	भन्नइ जिणपूयाए	१३१
पवरेहिं साहणेहिं	३६	भमरा सुरतरुमंजरिहिं०	३५९
पाउसु पुत्तय !०	३८५	भरहेरवयविदेहे	४५
पाएसु निवडिऊणं०	३०९	भवभमणभुयंगु०	३१०
पाणवहं सुहुमेयर	४७	भास्वाहादिकां कुर्वन्०	३६९
पाणिवहमुसावाए	४६	भावेण वंदमाणस्स०	३०६
पातालान्न विमोचितो	१६९	भिच्चा वि सामिणो तिह	३५
पासंडा फेडेही	१३८	भुवणगुरुण जिणाणं	३५
पुणरवि सो साहूणं	१२८	मंदालोइय कज्जे०	२८४
पुप्फक्खयंजलीहिं	३३	मइसुयओहीमणपज्ज	६
पुरवरदुवारवरफरिह०	४०५	मङ्गलं शास्त्रसम्बन्धः	२
पुव्वाए संझाए	१४०	मज्जे महुंमि मंसे य	१०८
पूइज्जसि जेहि तुमं	१२७	मज्झवि वसंति०	३०६
पूयाइएसु जत्तो	३५	मणपवणजवणचंचल	४३
पूयाए कायवहो	१३०	मयणहले आरोवइ	३३
पेच्छंतु जिणे सव्वे	४७	मरणरणंगणगणर	४२
प्रतिकूलविभाषीति०	३०९	महभत्तिपरेण०	३१०
प्रथमे नार्जिता विद्या	१९	महुरा य सूरसेणा	३ ८
प्रेक्ष्य पूर्वकृतां प्रायः	२	माणसपमुहमहासर	४४
बलमित्तभाणुमित्ता	१३७	माणुन्नयाणवि फुडं	२११
बहु विहकवड०	२८४	माणुस्सा चउव्विहा पन्नत्ता०	२७०
बहुवल्लहे वि कय	१९१	मार्यमाणस्य हेमाद्रिं०	२४४
बहुविहपक्कन्नाणं	३२	मालिंति महियलं	१०८
बहुसंखखेडकब्बड	४३	मिच्छत्तमोहणीयं	६
बायालवाससहसूणि-यत्तिए	१३७	मिष्टान्नपानमांसो०	३९६
बारवई य सुरट्ठा	३८	मुद्दामंतन्नासं	३२
बारसभेयंमि तवे	४६	मुहउग्घाडणसमणं	३३
बारसवरिसे जम्मा	१३९	मेहं पिपीलियाओ	१०८
बावीस बायरसंप०	२७०	मेहाण जलं चंदाण	२०३
ब्रह्मचर्यस्थितो नैव	२१	मोहच्छवीस एसा	७
भत्तीए जन्न कया	४६	यतोऽत्यन्तमचिन्त्येयं०	२२८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्संतोषसुखं०	३६५	वयपरिणयलोयपर०	३७७
यन्नागा मदभिन्नगण्डकरटास्तिष्ठन्ति	४९	वर वेल्लिओ माति०	२८४
यस्मिन्नेवहि काले०	२४६	वरगंधधूयसव्वो	३६
यस्यार्थस्तस्य मित्राणि०	३४३	वररयणनिहाणं०	३१०
ये जीर्णमर्हतां गेह०	४००	ववसायवज्जियाणं०	३७८
यो यत्रातिकठोरकर्मवशगो०	२४३	वसणम्मि ऊसव्वम्मि य	२१५
यो यत्राऽति कठोर०	२४४	वसणम्मि समावडिए	२१५
योगनिरोधाद्भवसन्तति०	३३६	वसुतेओ धणधम्मो०	२६६
रक्खंतस्स विरुद्धा०	३७३	वहुयाओ सासुयाणं०	३८४
रसातलं यातु यदत्र पौरुषं०	२४४	वालो सरस्स भंगं कंटो	१०८
रागद्वेषातुरो जीवः	२२७	वासाण सहस्सेहिं य	१३९
रागाइएहिं जं भे०	३०९	विकटाटव्यामटनं०	३६०
रायगिह मगह १ चंपा	८	वित्तव्ययो भवति०	२४३
रायडमरेहिं दलिया	१३८	वित्तव्ययो भवति नात्र न०	२४३
राया य विमलवाहण	१३९	विद्या नाम नरस्य	१७८
रिद्धिपबंधबंधुर	४४	विद्या बन्धुजनो०	१७८
रोमाञ्चाञ्चितविग्रहो०	२४५	विनयफलं शुश्रुषा०	३३६
लज्जन्ते बान्धवास्तस्य०	३६९	विषयेषु रतो जीवः	२२७
लहुइंति लहुं पुरिसं	९८	विषयोरगदष्टस्य	२२७
लहुएण वि वडबीयं	२२	विहिणाणुट्ठाणमिणं	२९
वंजणअत्थे तह तदु	४६	विहिवयणं च पमाणं	३४
वंदामि गणहरिंदे	४५	वीणावेणुमृदङ्गशङ्खपणवैः०	४९
वंदामि णिट्ठियट्ठे	४५	शयनासनसम्बाधन०	३९६
वंदामि बारसंगी	४५	शेषस्यापि धरां विधृत्य०	१६९
वंदामि वंदणिज्जे	४५	श्रेयांसि बहुविघ्नानी	२
वंदामि वंदणिज्जे	४५	संका कंखा वितिगिच्छा	४६
वंदामि संपयं जे	४५	संगोणंगेण जियो०	२८४
वइराड वच्छ १६ वरणा	८	संचयसीलसरिच्छा०	३७३
वग्घभएण पविट्ठो०	३८४	संतिसुयदेवयाणं	३२
वट्टाणुपुव्विकरिकर०	४०५	संवरफलं तपोबल०	३३६
वत्तक्खा खलु एक्का	३१	संसारे पर्यटन् जन्तु	२२७
वत्थच्छलम्मि विलसिर०	४०५	संहिता च पदं चैव	२
वत्थेण बंधिऊणं	३५	सक्केण कक्किपुत्तो	१३८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सक्तः शब्दे हरिणः	११९	सीयलवाइहिं वाजहिं दांत०	३८६
सगुणेहिं चिय पुरिसा	२१०	सीलं इंदनरिंद०	२८६
सच्चं वयंति विउसा०	२८४	सीलं कित्तिकरं०	२८६
सच्चमिणं सामइयं०	२६८	सीलं दुट्ठगरिट्ठ०	२८६
सच्चित्तमीसअचित्त	४७	सीलं पावपयंग०	२८६
सत्ततीसं नामस्स	५	सुजनो न याति०	३५६
सन्मार्गे तावदास्ते०	१८०	सुरनरपहुपणयाणं	१२७
सप्पुरिसे च्चिय निवडंति	२१५	सुरपुरसरिच्छछन्नवइ	४३
सप्पुरिसच्चिय वसणं	२१५	सेढिं विलग्ग तं०	२६९
समणोवासओ पुव्वामेव०	३९७	सेयवियावि य नयरी	८
समुयारो खलु दुविहो०	२७०	सेसाओ नियभत्ता०	२६८
सम्मं पइट्ठमंतेण	३३	सेहस्स निरइयारं०	२६८
सर्वजीवदया शौचं०	२००	सो दत्तो महाराया	१३९
सर्वज्ञोक्तेन वृत्तेन०	२००	सो नत्थि चिय भुवणेवि	२१३
सर्वस्यैव हि शास्त्रस्य	२	सो पुण इह विन्नेओ	३६
सव्वं असणं पाणं	४७	सो सुकयकम्मु सो निउणमइ	१८०
सव्वस्स पियं वयणं	२१३	सोच्छ्वासं मरणं निरग्निदहनं०	३५६
सव्वस्स होइ सम	२१४	सोवन्नवट्टियाए	३३
सव्वस्सवि एस गइ	२१४	सोहणदिणे य सोहग्ग	३४
सव्वेवि हु नेरईया	२१४	स्नानाङ्गरागवर्तिक०	३९६
ससिसंखछत्तसत्थिय	१२७	स्यादन्धस्य यथा चक्षु०	२४३
साकेय कोसला ६ गयउरं	८	स्वभावचञ्चलैर्वित्तैः०	४००
सागिक्खूवरसोलग	३२	स्वभावो नोपदेशेन०	३५६
सामाइयं च पढमं०	२६८	स्वल्पोऽपि च समारम्भो०	३६९
सायं उच्चागोयं	५	हंसणे संम रमिऊण०	३४३
सावज्जजोगविरइत्ति०	२६८	हारो दहइ सरीरं०	२८१
सिंहो तत्थ पविट्ठो०	२८५	हावेज्ज सत्तधन्नेण	३३
सिद्धत्थयदहिअक्खय	३६	हिंडंतो दट्ठूणं	१३८
सिद्धार्थं सिद्धसम्बन्धं	२	हिंसालियचोरिक्के०	३०८
सिद्धिवहुबद्धरागा०	३०७	हेट्ठइ कादउ उप्परि पाणि०	३८६
सिसिरि सुयंधु तेल्लु०	३८५	होइ गरुयाण वसणं	२१५
सीयंतपरियणब्भत्थियाण	१७९	होइ विणीओ गरुओ,	२०९
सीयंति सव्वसत्थाइं	२१३	होही चंडालकुले	१३७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिशिष्ट ३

अकारादिक्रमेण विशेषनाम्नां सूचिः

	पृष्ठाङ्कः		पृष्ठाङ्कः
अग्निशिख	२९८	अर्हद्दासी	२७४
अग्निशिखा	२२२	अलका	७७
अङ्ग	८७	अवंती	१३७
अङ्गा	२५२	अवन्तिवर्धन	८७
अङ्गा	२७४	अवरविदेह	१३५
अच्छदन्तक	३१८	अविरति	३४८
अजित	२०५	अशोकचन्द्र	४०८
अजित	४०८	अष्टापद	२९८
अज्जसुहम्म	१३९	अष्टापद	२०८
अनक्षबहुल	३८३	अस्थिक	२३४
अनङ्गसेना	३७७	आदिजिनाधीश	२४९
अथर्वणवेद	२२२	आदित्यमन्दिर	१८६
अभय	१४२	आम्र	३३५
अभयकुमार	१५४	आवश्यका	८
अभयकुमार	२५९	इन्द्रदत्त	१७८
अभयदेव	४०७	उज्जयिनी	३३५
अभयदेव	२८	उत्तरापथ	९६
अभयसेन	२५०	उत्तरापथ	३८०
अभया	२७४	उत्तरापथ	९७
अभया	२५	ऋजुर्वेद	२२२
अभया	२७६	ऋषभ	४१
अमरसुन्दर	११७	ऋषभ	२०८
अमरावती	३४८	एणाचन्द्र	९३
अमलकल्प	३२८	एणामुखी	८९
अमृतमुखी	३७७	कक्की	१३७
अयोध्या	१३३	कच्छ	२४९
अयोध्या	२०५	कटक	२९१
अरिष्टनेमि	३१३	कटकावती	३०१
अरुणाभ	३२८	कटुकमुखी	३७७
अर्हत	१२८	कणसार	९४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कणेरदत्त	२९१	काम्पिल्य	२९१
कथानककोश	२६६	कालिकारिणी	३५९
कनकध्वज	१३३	कालिञ्जर	२८९
कनकपुर	१३३	काशी	६४
कनकशेखर —	३८०	काशी	११७
कनकश्री	८२	काश्यप	१७८
कनकश्री	३५५	काष्ठश्रेष्ठि	३४३
कनकसुन्दर	५४	कीर्तिधर्म	८७
कनकसुन्दरी	८२	कुङ्ङ	२२२
कपालकुण्ड	७३	कुन्तल	८६
कपिल	२७६	कुन्ती	२६२
कपिल	१७७	कुन्दकन्दली	१२६
कपिल	१७८	कुन्दकेतु	२८२
कपिल	८६	कुन्दसुन्दरम्	१२५
कपिल	१८०	कुबेर	१९४
कपिला	२७६	कुबेरदत्त	१९७
कप्प	१३८	कुबेरदत्ता	१९७
कर्केतन	११३	कुबेरसेना	१९५
कलहप्रिय	३५९	कुब्जवार	३१७
कलिङ्ग	८१	कुम्भपुर	११५
कलिङ्ग	८७	कुम्भपुर	२३५
कलिङ्ग	९२	कुम्भप्रिय	३८२
कलिङ्ग	३२५	कुरङ्गकेसरा	६०
काकन्दी	१३२	कुरर (पक्षी)	१८२
कादम्ब	३१३	कुलटायक्ष	२६
कादम्बरी	३१३	कुसुमपुर	३८२
कामकन्दली	३५८	कूलवालक	३३५
कामशास्त्र	२७७	कृतपुण्य	२५९
कामश्री	८७	कृतपुण्यक	२६०
कामसंरोहिणी	७१	कृष्ण	३१२
कामसुन्दर	६३	केरला	८५
काम्पिल्य	९४	केरल	८६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केशव २५०
केशव ३१२
केशिन् ३१४
कोटि २९३
कोणिक ३३४
कोशला २९१
कोसम्ब ३१८
कौशम्बी १५६
कौशलिक ३०७
कौशाम्बी २५२
कौशाम्बी २९७
कौशाम्बी १७८
कौस्तुभ ३१९
क्षितिप्रतिष्ठित १५
खण्डविशाखा २९५
खरक ३८९
गगनवल्लभ ४१
गङ्गा २५२
गङ्गा २७५
गङ्गागोदावरी ३५१
गङ्गाधर ३७९
गजपुर २४७
गजपुर २८९
गजपुर ३०५
गजपुर २९१
गण्डितिन्दुक ३०६
गद्दहिल १३७
गम्भीर १४९
गिरिकन्दरोदर ३८२
गुणसार ११२
गुणसुन्दर ५५
गुणाकर (मंत्रीपुत्र) ४०१
गुणाकर (साधु) ४०४
गोधन ११७
गोभद्र २६६
गौतम ३२८
गौतम ६१
गौतमद्वीप १५०
गौरी ३०५
चउम्मुह १३७
चण्डदेव ३७८
चण्डरुद्र ३७९
चन्दन १७१
चन्दनपुर ३७८
चन्दनबाला २५३
चन्द्र २८१
चन्द्र ४०८
चन्द्रकान्ता ९५
चन्द्रकान्ता ४००
चन्द्रकान्ता ३५५
चन्द्रचूड १०६
चन्द्रपुर १६९
चन्द्रपुरी ३५५
चन्द्रलेखा ८५
चन्द्रलेखा १६५
चन्द्रलेखा ३५५
चन्द्रशेखर ८५
चन्द्रशेखर २८१
चन्द्रश्री १०६
चन्द्रश्री १२६
चन्द्रसार ३५५
चन्द्रसिंह ३०१
चन्द्रावतंस २८८
चम्पकामोद १७०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चम्पकामोद	३९४	जितशत्रु	२०५
चम्पा	४७	जितशत्रु	३२८
चम्पा	१६४	जितशत्रु	३५१
चम्पा	२५२	जितशत्रु	३९४
चम्पा	२७४	जितशत्रु	१७८
चम्पापुरी	३४३	जितशत्रु	३५२
चम्पापुरी	३४८	जिनचन्द्र	१०८
चित्र	२८८	जिनदत्त	१००
चित्र	३३१	जिन्दक	४०८
चित्रनिपुण	३८०	जियसत्तु	१३९
चुलनी	२९१	जीवित	३१३
चेटक	२५२	ज्ञानगर्भ	२२६
चेल्लणा	१५४	ज्वलनप्रभ	२०९
चेल्लणा	२५९	डुङ्गर	१५
चेल्लणा	२६६	ताम्बूलिका	१९
चेल्लणा	२५	तारप्रभ	९४
जनार्दन	१३३	तारप्रभ	१००
जनार्दन	६०	तारप्रभा	९४
जम्बूद्वीप	२२१	तारप्रभा	१८६
जम्बूद्वीप	२५२	तारा	८४
जयन्ती	३८०	ताराचन्द्र	१८६
जयपुर	२३४	तारापुर	९१
जयवर्धन	११७	तारापुर	१८६
जयश्री	८७	तारासर	८३
जयश्री	४०१	तारासर	९१
जयसार	१२५	तालपुर	३४१
जयसिंह	४०८	तिन्दुक	३०६
जयसुन्दरी	६७	तुङ्गिका	३२२
जरत्कुमार	३१२	त्रिलोचन	१८६
जरादेवी	३१३	त्रैलोक्यसुन्दर	१७०
जलकान्त	२६४	दत्त	१३९
जह्नु	२०७	दमघोष	५२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दमसार ६५
दयासार ४०१
दयासुन्दर ५२
दशार्णपुर २८९
दसवेयालिय १३९
दातृ (दधि) वाहन २५२
दातृवाहन २७४
दायिकाकूप ४०८
दीर्घ २९१
दुप्पसह १३९
दुर्गतकपताक ३७०
दुर्गता १२५
दुर्गशक्ति १४४
दुर्गिला ६४
दुर्गिला ७८
दुर्गिला ३७०
दुष्प्रसह १३६
दृढधर्मन् ८७
देवकी ३२३
देवदत्ता २७८
देवशर्मन् ३४४
देवशर्मन् २९७
द्रोणमेघ १५
द्रौपदी ३२२
द्वारिकावती ३१२
द्वीपायन ३१२
धन १८
धन १३५
धन ३४८
धन ४००
धनचन्द्र १८
धनचन्द्र २३५
धनचन्द्र २८१
धनञ्जय १५
धनञ्जय ३५५
धनद १७४
धनदत्त २६१
धनदत्त ३७१
धनपाल २३९
धनपाल २६०
धनयक्ष १८
धनश्री ४००
धनसार ४००
धनसुन्दरी ३७१
धनावह २५३
धनावास १८
धनुष २९२
धनेश्वर २३५
धनेश्वर ४०८
धनेश्वर ७७
धन्य २६६
धन्यका २६६
धरासार ४००
धर्मघोष २६६
धर्मघोष ३२२
धर्मरत्नकरण्डक ४०७
धातकीखंड ३१९
धातकीखण्ड १७१
धान्यपुर ९७
धान्यपुर १४४
धान्यसार ९७
धारा ९२
धारिका ३४८
धारिणी २५२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूपसार	७३	नेमिनाथ	३१३
धृतराष्ट्र	३१८	पञ्चपुर	६१
नन्द	१३७	पञ्चाल	९४
नन्दीश्वर	११२	पण्डिता	२७४
नन्दन	११७	पद्मगुल्म	३०२
नन्दा	३००	पराशर	३१२
नन्दिपुर	११७	पर्वत	२२२
नमुचि	२८९	पल्हव	३१७
नरकान्ता	६५	पाटलिपुत्र	२७८
नरकेसरी	६५	पाडलिपुत्त	१३८
नरचन्द्रकुमार	१६४	पाण्डव	३१९
नरधर्म	१७०	पाण्डुमथुरा	३१७
नरवाहण	१३७	पारेतक	१६७
नरवाहन	६४	पार्श्वचन्द्र	४०८
नरसिंह	१६५	पार्श्वजिन	३२८
नरसिंह	३२४	पार्श्वनाथ	४०७
नाइल	१३९	पालग	१३७
नागदत्त	३७७	पिङ्गल	१००
नागश्री	३७७	पिङ्गला	१८२
नागश्री	३८२	पुण्डरिकणी	२४९
नागिल	३७२	पुण्यश्री	३५५
नाट्योन्मत्त	२९८	पुण्यसार	३४४
नाभेय	२४९	पुराण	३४८
नाभिनन्दन	४१	पुराण	३५८
निकृति	२२३	पुराण	३५९
निम्बक	३३७	पुराण	३५३
निशाकरपुर	३४५	पुरिमताल	६२
निषध	९४	पुरिमताल	२९१
नीलकण्ठ	३४१	पुरिमताल	५५
नेमि	१३३	पुष्पकुम्भ	११५
नेमिचन्द्र	४०८	पुष्पचङ्गेर	२८२
नेमिजिनेश्वर	३१२	पुष्पचूल	२९१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुष्पशेखर	५३	ब्रह्मदत्त	२९१
पुष्पश्री	१०२	ब्रह्मलोक	३२४, ११२
पुष्पसुन्दर	१६७	ब्राह्मी	२०८
पुष्पावती	२९८	भद्रपुर	३५९
पुष्पोत्तर	३२५	भद्रशाल	३५९
पूर्णचन्द्र	१०६	भद्रा	२६०
पूसमित्त	१३७	भद्रा	३०७
प्रज्ञप्ति	५०	भद्रा	२६६
प्रदेशी	३२८	भरत	२०५
प्रद्युम्न	३१२	भरत	२२१
प्रियङ्कर	२७	भवदत्त	३०१
प्रियङ्गुलतिका	२६३	भागीरथि	२१६
प्रियदर्शना	३५३	भाणुमित्त	१३७
फलदेव	१०३	भानु	१८८
फलसार	१०२	भानुप्रभ	८०
फलह	१०७	भानुप्रभ	८७
फलचन्द्र	११६	भानुप्रभ	८९
बकुलामोद	४०४	भानुप्रभ महामुनि	९३
बङ्ग	६५	भानुप्रभा	४७
बङ्ग	१२२	भानुमति	८०
बङ्गा	४०	भानुमान्	८०
बन्धुमती	२९३	भानुवेग	४७
बन्धुसुन्दरी	१२२	भानुश्री	८०
बल	३०६	भारत	१५
बलकोट्ट	३०५	भारत	२५२
बलभद्र	३१२	भारत	२८१
बलमित्त	१३७	भीममुखा	७१
ब्राह्मी	२०८	भूतदत्त	२८९
बाहुबली	२२१	भैरव	८१
बाहुबली	२४७	भोगदत्त	३७७
बुद्धिबन्धुर	२३६	भोगदेव	३६६
ब्रह्म	२९१	भोगपुर	११४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगपुर १६८
भोगपुर ३६६
भोगवती ३६६
मकरदष्ट्रा १८९
मगध १५
मगध ८०
मगध २५९
मगध २६६
मगध २५
मगध ५५
मगधा ३८०
मगधासुन्दरी १५
मणिप्रभ ८१
मणिप्रभ १०४
मतिसागर २३४
मतिसागर ५५
मथुरा ३०५
मथुरा ३२२
मथुरा १९४
मदनकन्दली ११७
मदनमञ्जरी ४७
मदनमञ्जरी १८७
मदनमञ्जुषा २६
मदनविग्रह ३४८
मदनसुन्दर ११७
मदनसुन्दरी ४७
मदना ८४
मधुकरीगीत ३०१
मधुसुन्दर ६४
मधुसुन्दर ७८
मधुसुन्दरी ६४
मधुसुन्दरी ७८
मधुसूदन ५६
मधुसूदनी ५६
मनु ५९
मनोरम ३०२
मनोरमा २७५
मयूराक्ष २३३
मरुय १३७
मलय ६७
मलय ३७८
मलय १०४
मलयकेतु ६७
मलयसार ६७
मलयसुन्दर ६६
मलयसुन्दर ६७
मलयसुन्दरी ६७
महाकच्छ २४९
महागङ्गा २१०
महाबल ७२
महाबल १२२
महाबल ९९
महामल्ल ६१
महामेघ ७५
महारम्भ ५४
महाविदेह ४५
महाविदेह ३३१
महावीर १३२
महावीर १३५
महावीर २३३
महावीर २५५
महावीर ३२८
महावीर २०८
महासती ३४१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महिमा	२६१	रङ्गशाला	६५
महुरा	१३७	रङ्गशाला	७६
महेश्वर	१९६	रणकेशरी	७६
मागध	५५	रणकेसरी	६५
मागधिका	३३५	रतिग्रह	८४
माधव	३५८	रत्नचन्द्र	६४
माधव	५५	रत्नपुर	१८२
माधवी	५५	रत्नप्रभ	१०५
मायामय	१८६	रत्नमाला	५४
मुक्तमाला	६२	रत्नमाला	१०४
मुग्ध	३४२	रत्नमेखल (द्वीप)	१८६
मुग्धक	३४१	रत्नमेखला	४७
मुनिचन्द्र	२८८	रत्नचन्द्र	४०
मुनिसुव्रत	३३५	रत्नरेखा	१०४
मूला	२५३	रत्नशेखर	४०
मृगावति	२५६	रत्नसञ्चय	५४
मृगावती	२५२	रत्नसुन्दर	५४
मेघनाद	६६	रत्नसुन्दरी	१०७
मेघनाद	९८	रत्नसुन्दरी	११६
मेहघोष	१३९	रत्नावली	४०
यक्ष	३५८	रथावर्त	१०४
यक्षदत्त	१९६	रससार	१२२
यजुर्वेद	२२२	राजगृह	१४२
यमुन	७३	राजगृह	१५३
यमुना	३१२	राजगृह	२५९
यशःप्रभ	७५	राजगृह	२६६
यशःप्रभ	८१	राजगृह	२९७
यशा	१७८	राजगृह	२५
युगादिजिन	८९	राजतुरङ्गम	३६६
युगादिदेव	९१	राजपुर	१७०
युगादिदेव	४०	राजीमती	३२३
योगावर्तक	६८	राज्यश्री	९१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राम	३१३	वसन्तपुर	३५१
रुक्मिणी	३१५	वसन्तपुर	३८९
रुद्रदेव	२२२	वसन्तसुन्दर	५१
रुद्रदेव	३०८	वसन्तसुन्दर	३४१
रैवतक	३१५	वसन्तसुन्दर	३४३
रोहिणी	३२३	वसन्तसेना	२६१
रोहिणी	२५	वसु	१४९
रोहिणेयकचोर	१४२	वसुकान्ता	१४९
र्दुमुख	७५	वसुदत्त	६४
लक्षपाक	२३५	वसुदत्त	१०३
लतासुन्दर	६३	वसुदेव	३१२
ललिता	४०	वसुदेव	३२३
ललिताङ्ग	२५०	वसुध्वज	३२८
लिम्बदत्त	३५३	वसुन्धरा	१५
लिम्बदेव	३४१	वसुन्धरा	६४
लीलाविलास	३८१	वसुन्धरा	१४९
लोभनन्दि	१८६	वसुन्धरा	३५२
लोभसागर	१८६	वसुभाग	२९७
वत्स	२५२	वसुमति	२५२
वत्सा	६५	वसुश्री	१०३
वत्सा	८५	वसुसार	१४९
वत्सा	१७८	वसुसार	२९८
वनमाला	१०४	वह्निशिख	२९८
वनलता	२९६	वाणारसी	६४
वनसुन्दर	१२५	वाणारसी	२८२
वरधनु	२९६	वाणारसी	३०६
वर्धमान	२५५	वात्स्यायन	१०
वर्धमान	४०८	वाराणसी	७८
वर्धमान	२८	वासुपूज्य	१६४
वर्धमान	२५२	विक्रमादित्य	३४१
ववहार	१३८	विचारचतुर	३४८
वसन्तपुर	१८	विचारधवल	३४८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचारधवला	३४८	वैताढ्य	४९
विचारकुशल	३४८	वैभार	२६६
विजय	२०५	वैभारगिरि	१४२
विजयवर्धन	११७	वैरजङ्घ	२५०
विजयवर्धन	२२१	वैरनाभ	२५०
विजयवर्धन	४०	वैरसेन	२४९
विजया	२०५	वैरसेन	२५०
विजया	२५६	वैशाली	३३४
विद्या बन्धुजनो	१७८	वैश्रमण	३००
विद्युच्छिखा	२९८	शक्र	१५३
विद्युत्सेना	८६	शक्रावतार	१३३
विन्ध्य	१७१	शङ्कर	८३
विमलवाहण	१३९	शङ्ख	१०४
विरति	३४१	शङ्ख	३०५
विलासपुर	८७	शङ्ख	२८९
विशालशाल	३७०	शङ्खचूड	६४
विश्वपुर	१९	शङ्खचूड	७८
विश्वपुर	११२	शङ्खचूड	१०४
विश्वपुर	३९४	शङ्खपुर	२३४
विश्वपुर	४०२	शङ्खावर्त	१०४
विश्वम्भरा	६०	शतानीक	२५२
विष्णु	३२०	शत्रुञ्जय	३२३
वीतभय	१०७	शमसुन्दर	४०१
वीतभय	११३	शर्वाणी	८३
वीर	२६४	शल्योद्धरणिका	१०६
वीरनाथ	१४७	शान्तिनाथ	१००
वृषभदास	२७४	शान्तिसागर	६३
वेद	६०	शाम्ब	३१२
वेद	३४८	शालिग्राम	२६६
वैजयन्त्या	२०५	शालिपुर	९६
वैताढ्य	१०४	शालिप्रभा	९७
वैताढ्य	२९८	शालिभद्र	२६६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शालिभद्र १७९
शिवमन्दिर २९८
शिवशक्ति १४४
शिवादेवी ३२३
शीलसुन्दर १७०
शीलसुन्दरी ४००
शीलसुन्दरी २८१
शीला २२३
शुक ३१५
शुभङ्कर ४०१
शुभङ्कर २७
शुभङ्कर ४०५
शुभचन्द्र १०८
शुभचन्द्र २३४
शुभदत्त १०७
शुभारम्भ ८५
शृङ्गारपुर ३५३
श्यामला १४५
श्रावस्ती ३२८
श्रावस्ती १७८
श्रीकान्ता २९६
श्रीकान्ता ४००
श्रीदत ४००
श्रीदेव ३६६
श्रीपुर २३४
श्रीमञ्जीरपुर ३५८
श्रीमति २९६
श्रीमति ३००
श्रीमती २५०
श्रीमहावीर १४७
श्रीविलास ८७
श्रीविलास २३४
श्रुतसागर ६३
श्रुतसागर २२७
श्रुतसागर १७२
श्रुतसुन्दर १२५
श्रेणिक १४२
श्रेणिक १५३
श्रेणिक २५९
श्रेणिक २६६
श्रेणिक २५
श्रेणिक २६६
श्रेयांस २४८
संकाससिंह ८४
संरोहिणी ५१
सग १३७
सगर २०५
सङ्गम २६६
सच्चसिरी १३९
सञ्चयशील ३७०
सञ्चया २२३
सत्यप्रिय ३४१
सनत्कुमार २८९
सन्तोषसार ७७
सन्तोषसुन्दर १८२
समुद्र ३५९
समुद्रविजय ३२३
सम्भूति २८८
सरलप्रभा ७५
सर्वकामित ३७९
सर्वदेव ४०८
सर्वार्थ २६६
साकेत २८८
सागर २२२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सागर	३८३	सुधन	२३९
सागरचन्द्र	२८८	सुधन	२६१
सागरदत्त	२७५	सुनन्द	२६
साण्डिल्य	२८९	सुनन्दा	१५४
सामवेद	२२२	सुनन्दा	२०८
सिंहपुर	१०६	सुनन्दा	२५६
सिंहपुर	२३९	सुनन्दा	३९४
सिंहपुर	३५२	सुन्दर	२३४
सिंहल	८२	सुन्दर	१७१
सिंहल	१०६	सुन्दरी	८४
सिंहविक्रम	१०७	सुन्दरी	२०८
सिंहविक्रम	१४९	सुबुद्धि	२४८
सिंहविक्रम	३४१	सुबुद्धि	३००
सिंहविक्रम	९१	सुभग	२७४
सिंहसेन	१२६	सुभद्र	१७१
सिद्धार्थ	३१३	सुभद्रा	१८
सिन्धु	२५२	सुभद्रा	२३४
सिन्धुसौवीर	१०७	सुभद्रा	३५९
सीता	३४३	सुमङ्गल	४०२
सुकुमारिका	३५१	सुमङ्गल	३९४
सुखसङ्गम	३८१	सुमित्र	२०५
सुखावास	९२	सुरतेजस्	४४
सुखावास	३७७	सुलोचना	५५
सुगुप्ति	२५६	सुवत्सा	८५
सुचन्द्र	१०६	सुवदना	७५
सुजित	११०	सुवर्णपुर	३५४
सुसारा	८९	सुवर्णवालुका	१०६
सुसीमा	९४	सुविद्य	२३४
सुदर्शन	२७५	सुवेलगिरि	४०
सुदर्शना	९४	सुवेला	५०
सुदर्शना	३५३	सुव्रता	१२७
सुधन	११०	सुव्रता (गणिनी)	१९८

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुशर्म	२८१
सुशर्म	२८१
सुशीला	३४२
सुसेन	४०१
सुसेन	१७२
सुस्थितार्चार्य	३४६
सूर	८०
सूर	१६९
सूर	९३
सूरप्रभ	४१
सूरप्रभ	११४
सूरप्रभ	४१
सूरसेन	१६९
सूरसेन	१९४
सूरसेन	९३
सूरिक	३२८
सूर्य	३३१
सूर्यकान्त	३२८
सूर्यकान्ता	३२८
सेचनक	२६३
सोपार	११२
सोपार	११२
सोपारा	११५
सोमदेव	३०५
सोमदेव	३५३
सोमप्रभ	२४७
सौधर्म	१४६
सौधर्म	३०२
सौभाग्यसुन्दर	६२
सौभाग्यसुन्दरी	१२४
सौरिक	१९६
सौरिकाभ	३३१
स्मृति	२१
स्मृति	६०
स्मृति	६०
स्वयम्प्रभा	२५०
स्वर्णपुर	२३६
स्वर्णसुन्दर	५४
स्वर्णेध्वज	३५५
हर	४०
हरिकेश	२८८
हरिभद्र	२६६
हरिमाला	३४१
हर्षपुर	१२५
हस्तिकल्प	३१७
हस्तिनागपुर	२४९
हारप्रभा	८०
हिमाद्रि	२१६
हुंवट	४०८
हुतवहा	३०५
हेमचन्द्र	४७
हेमपुर	६६
हेमसुन्दरी	४९
हेमसुन्दरी	३४१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org